শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

পরমহংসকুলচূড়ামণি-

শ্রীল-শ্রীধরস্বামিপাদ-বিরচিতা

শ্রীভাবার্থ-দীপিকা

[১মঃ স্কন্ধঃ —৯মঃ স্কন্ধঃ]

অকিঞ্চন-

শ্রীমৎ-পুরীদাস-মহাশয়েন

সম্পাদিতা

ময়মনসিংহ-অলোয়ানিবাসি-

শ্রীশচীনাথরায়-চতুর্ধুরীণেন

প্রকাশিতা

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

অধ্যায়-সূচী

অষ্টমঃ স্কন্ধঃ

নবমঃ স্কন্ধঃ

অধ্যায়-সূচী

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

শ্রীশ্রীগৌড়ীয়-গৌরব-গ্রন্থ-গুটিকা—

ভক্ত্যেকরক্ষক-শুদ্ধাদ্বৈতবাদাচার্য্য-
পরমহংসকুলচূড়ামণি-শ্রীল-শ্রীধরস্বামিপাদ-প্রণীতা

শ্রীভাবার্থ-দীপিকা

প্রথমঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

ওঁ নমো ভগবতে পরমহংসাস্বাদিত-চরণকমলচিন্মকরন্দায়
ভক্তজনমানসনিবাসায় শ্রীকৃষ্ণায়।

বাগীশা যস্য বদনে লক্ষ্মীর্যস্য চ বক্ষসি।
যস্যাস্তে হৃদয়ে সম্বিত্তং নৃসিংহমহং ভজে ॥ (১)

বিশ্ব-সর্গবিসর্গাদি-নবলক্ষণলক্ষিতম্।
শ্রীকৃষ্ণাখ্যং পরং ধাম জগদ্ধাম নমামি[১] তৎ ॥ (২)

পাঠান্তরাণাং সাঙ্কেতিক-চিহ্নানি—'ক' বরাহনগর-শ্রীগৌরাঙ্গ-গ্রন্থমন্দিরস্থ-৩০১৬-সংখ্যক-করলিপিঃ; 'খ' পঞ্চাননতর্করত্ন-সম্পাদিতো বঙ্গবাসি-যন্ত্রালয়-প্রকাশিতো গ্রন্থঃ; 'গ' বঙ্গীয়সাহিত্যপরিষদঃ ২৫৯-সংখ্যক-করলিপিঃ; 'ঘ' নিত্যস্বরূপ-ব্রহ্মচারি-সম্পাদিতো গ্রন্থঃ।

১। নমাম (ঘ)।

মাধবোমাধবাবীশৌ সর্ব্বসিদ্ধিবিধায়িনৌ।
বন্দে পরস্পরাত্মানৌ পরস্পরনতিপ্রিয়ৌ ॥ (৩)

সম্প্রদায়ানুরোধেন পৌর্ব্বাপর্য্যানুসারতঃ।
শ্রীভাগবত-ভাবার্থ-দীপিকেয়ং প্রতন্যতে ॥ (৪)

ক্বাহং মন্দমতিঃ ক্বেদং মথনং ক্ষীরবারিধেঃ ?
কিং তত্র পরমাণুর্বৈ যত্র মজ্জতি মন্দরঃ ? (৫)

মূকং করোতি বাচালং পঙ্গুং লঙ্ঘয়তে গিরিম্।
যৎকৃপা তমহং বন্দে পরমানন্দমাধবম্ ॥ (৬)

শ্রীমদ্ভাগবতাভিধঃ সুরতরুস্তারাঙ্কুরঃ সজ্জনিঃ
স্কন্ধৈর্দ্বাদশভিস্ততঃ প্রবিলসদ্ভক্ত্যালবালোদয়ঃ।
দ্বাত্রিংশত্ত্রিশতঞ্চ যস্য বিলসচ্ছাখাঃ সহস্রাণ্যলং
পর্ণান্যষ্টদশেষ্টদোঽতিসুলভো বর্ব্বর্ত্তি সর্ব্বোপরি ॥ (৭)

১। অথ নানা-পুরাণশাস্ত্র-প্রবন্ধৈশ্চিত্ত-প্রসত্তিমলভমানস্তত্র তত্রাপরিতুষ্যন্নারদোপদেশতঃ শ্রীমদ্ভগবদ্‌গুণবর্ণনপ্রধানং শ্রীমদ্ভাগবতশাস্ত্রং প্রারিপ্সুঃ শ্রীবেদব্যাসস্তৎপ্রত্যূহনিবৃত্ত্যাদিসিদ্ধয়ে তৎপ্রতিপাদ্যপরদেবতানুস্মরণলক্ষণং মঙ্গলমাচরতি—জন্মাদ্যস্যেতি। পরং পরমেশ্বরম্; ধীমহীতি—ধ্যায়তের্লিঙি ছান্দসং, ধ্যায়েম ইত্যর্থঃ, বহুবচনং শিষ্যাভিপ্রায়কম্। তমেব স্বরূপ-তটস্থ-লক্ষণাভ্যামুপলক্ষয়তি। তত্র স্বরূপলক্ষণম্—সত্যমিতি; সত্যত্বে হেতুঃ—যত্র যস্মিন্ ব্রহ্মণি ত্রয়াণাং মায়াগুণানাং তমোরজঃ-সত্ত্বানাং সর্গো ভূতেন্দ্রিয়দেবতারূপোঽমৃষা সত্যঃ। যৎসত্যতয়া মিথ্যাসর্গোঽপি সত্যবৎ প্রতীয়তে, তং পরং সত্যমিত্যর্থঃ; তত্র দৃষ্টান্তঃ—তেজোবারিমৃদাং যথা বিনিময় ইতি; বিনিময়ো ব্যত্যয়োঽন্যস্মিন্নন্যাবভাসঃ; স যথাধিষ্ঠানসত্তয়া সত্যবৎ প্রতীয়তে, তদ্বদিত্যর্থঃ; তত্র তেজসি বারিবুদ্ধি-

র্মরীচিকায়াং প্রসিদ্ধা, মৃদি চ কাচাদৌ বারিবুদ্ধির্বারিণি চ কাচাদি-বুদ্ধিরিত্যাদি যথাযথমূহ্যম্। যদ্বা, তস্যৈব পরমার্থসত্যত্বপ্রতিপাদনায় তদিতরস্য মিথ্যাত্বমুক্তম্ ; যত্র মৃষৈবায়ং[১] ত্রিসর্গো, ন বস্তুতঃ সন্নিতি। যত্রেত্যনেন প্রতীত[২]-মুপাধিসম্বন্ধং বারয়তি। স্বেনৈব ধাম্না মহসা নিরস্তং কুহকং কপটং মায়ালক্ষণং যস্মিন্ তম্। তটস্থলক্ষণমাহ—জন্মাদীতি। অস্য বিশ্বস্য জন্ম-স্থিতি-ভঙ্গং যতো ভবতি, তং ধীমহি। তত্র হেতুঃ—অন্বয়াদিতরতশ্চ, অর্থেষ্বাকাশাদি-কার্য্যেষু পরমেশ্বরস্য সদ্রূপেণান্বয়াৎ, অকার্য্যেভ্যঃ খপুষ্পাদিভ্যস্তদ্ব্যতিরেকাচ্চ। যদ্বা, অন্বয় শব্দেনানুবৃত্তিঃ, ইতরশব্দেন ব্যাবৃত্তিঃ ;—অনুবৃত্তত্বাৎ সদ্রূপং ব্রহ্ম কারণং মৃৎসুবর্ণাদিবৎ, ইতরতো ব্যাবৃত্তত্বাদ্বিশ্বং কার্য্যং ঘটকুণ্ডলাদিবদিত্যর্থঃ। যদ্বা, সাবয়বত্বাদন্বয়-ব্যতিরেকাভ্যাং যদস্য জন্মাদি, তদ্‌যতো ভবতীতি সম্বন্ধঃ। তথা চ শ্রুতিঃ—'যতো বা ইমানি ভূতানি জায়ন্তে, যেন জাতানি জীবন্তি, যৎ প্রযন্ত্যভিসংবিশন্তি' ইত্যাদ্যা ; স্মৃতিশ্চ—'যতঃ সর্ব্বাণি ভূতানি ভবন্ত্যাদিযুগাগমে। যস্মিংশ্চ প্রলয়ং যান্তি পুনরেব যুগ-ক্ষয়ে॥' ইত্যাদ্যা। তর্হি কিং প্রধানং জগৎকারণত্বাদ্ধ্যেয়মিত্যভিপ্রেতম্? নেত্যাহ—অভিজ্ঞো যস্তং (ধীমহি)—'স ঐক্ষত লোকান্নু সৃজা' ইতি, 'স ইমান্ লোকানসৃজত' ইত্যাদি শ্রুতেঃ, 'ঈক্ষতের্নাশব্দম্' ইতি ন্যায়াচ্চ। তর্হি কিং জীবো ধ্যেয়ঃ স্যাৎ? নেত্যাহ—স্বরাট্ স্বেনৈব রাজতে যস্তং, স্বতঃসিদ্ধ-জ্ঞানমিত্যর্থঃ। তর্হি কিং ব্রহ্মা ধ্যেয়ঃ ?—'হিরণ্যগর্ভঃ সমবর্ত্ততাগ্রে, ভূতস্য জাতঃ পতিরেক আসীৎ' ইতি শ্রুতেঃ? নেত্যাহ—তেনে ইতি ; আদিকবয়ে ব্রহ্মণেঽপি ব্রহ্ম বেদং যস্তেনে প্রকাশিতবান্ ;—'যো ব্রহ্মাণং বিদধাতি পূর্ব্বং, যো বৈ বেদাংশ্চ প্রহিণোতি তস্মৈ। তং হ দেবমাত্মবুদ্ধিপ্রকাশং, মুমুক্ষুর্বৈ শরণমহং প্রপদ্যে॥' ইতি শ্রুতেঃ। নন্বু ব্রহ্মণোঽহ-

১। মিথ্যেবায়ং (গ); ২। প্রাপ্তম্ (ক, গ, ঘ)।

ন্যতো বেদাধ্যয়নমপ্রসিদ্ধম্? সত্যম্, তত্তু হৃদা মনসৈব তেনে বিস্তৃতবান্। অনেন বুদ্ধিবৃত্তিপ্রবর্ত্তকত্বেন গায়ত্র্যর্থোঽপি দর্শিতঃ; বক্ষ্যতি হি— 'প্রচোদিতা যেন পুরা সরস্বতী, বিতন্বতাজস্য সতীং স্মৃতিং হৃদি। স্বলক্ষণা প্রাদুরভূৎ কিলাস্যতঃ, স মে ঋষীণামৃষভঃ প্রসীদতাম্॥' ইতি। ননু ব্রহ্মা স্বয়মেব সুপ্তপ্রতিবুদ্ধ-ন্যায়েন বেদমুপলভতাম্? নেত্যাহ—যদ্‌যস্মিন্ ব্রহ্মণি সূরয়োঽপি মুহ্যন্তীতি। তস্মাদ্‌ব্রহ্মণোঽপি পরাধীনজ্ঞানত্বাৎ স্বতঃ-সিদ্ধজ্ঞানঃ পরমেশ্বর এব জগৎকারণত্বেন ধ্যেয়ঃ[১], অতএব সত্যঃ, অসতঃ সত্তাপ্রদত্বাচ্চ। পরমার্থসত্যত্বেন সর্ব্বজ্ঞত্বেন চ সদা নিরস্ত-কুহকস্তং ধীমহীতি গায়ত্র্যা প্রারম্ভেণ গায়ত্র্যাখ্য-ব্রহ্মবিদ্যাস্বরূপমেতৎ পুরাণমিতি দর্শিতম্; যথোক্তং মৎস্যপুরাণে পুরাণদানপ্রস্তাবে—'যত্রাধিকৃত্য গায়ত্রীং বর্ণ্যতে ধর্ম্মবিস্তরঃ। বৃত্রাসুরবধোপেতং তদ্ভাগবতমিষ্যতে॥ লিখিত্বা তচ্চ যো দদ্যাদ্ধেমসিংহসমন্বিতম্। প্রৌষ্ঠপদ্যাং পৌর্ণমাস্যাং স যাতি পরমং পদম্[২]। অষ্টাদশসহস্রাণি পুরাণং তৎ প্রকীর্ত্তিতম্॥'; পুরাণান্তরে চ— 'গ্রন্থোঽষ্টাদশসাহস্রো দ্বাদশস্কন্ধসম্মিতঃ। হয়গ্রীবব্রহ্মবিদ্যা যত্র বৃত্র-বধ-স্তথা। গায়ত্র্যা চ সমারম্ভস্তদ্বৈ ভাগবতং বিদুঃ॥' ইতি; পদ্মপুরাণে চ অম্বরীষং প্রতি শ্রীগৌতমবচনম্—'অম্বরীষ! শুকপ্রোক্তং নিত্যং ভাগবতং শৃণু। পঠস্ব স্বমুখেনাপি যদীচ্ছসি ভবক্ষয়ম্॥' ইতি। অতএব ভাগবতং নামান্যদিত্যপি নাশঙ্কনীয়ম্॥

২। ইদানীং শ্রোতৃপ্রবর্ত্তনায় শ্রীভাগবতস্য কাণ্ডত্রয়বিষয়েভ্যঃ সর্ব্ব-শাস্ত্রেভ্যঃ শ্রৈষ্ঠ্যং দর্শয়তি—ধর্ম্ম ইতি। অত্র শ্রীমতি সুন্দরে ভাগবতে পরমো ধর্ম্মো নিরূপ্যতে। পরমত্বে হেতুঃ—প্রকর্ষেণ উজ্ঝিতং ত্যক্তং কৈতবং ফলাভিসন্ধিলক্ষণং কপটং যস্মিন্ সঃ; প্র-শব্দেন মোক্ষাভি-সন্ধিরপি নিরস্তঃ; কেবলমীশ্বরারাধনলক্ষণো ধর্ম্মো নিরূপ্যত ইতি। অধি-

১। জগদ্ধৃদয়ম্ (গ); ২। পরমাং গতিম্ (গ)।

কারিতোঽপি ধর্ম্মস্য পরমত্বমাহ—নির্ম্মৎসরাণাং, পরোৎকর্ষাসহনং মৎসরঃ, তদ্রহিতানাং সতাং ভূতানুকম্পিনাম্। এবং কর্ম্মকাণ্ডবিষয়েভ্যঃ শাস্ত্রেভ্যঃ শ্রৈষ্ঠ্যমুক্তম্। জ্ঞানকাণ্ডবিষয়েভ্যোঽপি শ্রৈষ্ঠ্যমাহ—বেদ্যমিতি। বাস্তবং পরমার্থভূতং বস্তু বেদ্যম্, ন তু বৈশেষিকাণামিব দ্রব্যগুণাদিরূপম্। যদ্বা, বাস্তব-শব্দেন বস্তুনোঽংশো জীবঃ, বস্তুনঃ শক্তির্মায়া চ, বস্তুনঃ কার্য্যং জগচ্চ—তৎ সর্ব্বং বস্ত্বেব, ন ততঃ পৃথগিতি বেদ্যম্—অযত্নেনৈব জ্ঞাতুং শক্যমিত্যর্থঃ। ততঃ কিমত আহ—শিবদং পরমসুখদম্; কিঞ্চ, আধ্যাত্মিকাদিতাপত্রয়োন্মূলনঞ্চ। অনেন জ্ঞানকাণ্ডবিষয়েভ্যঃ শ্রৈষ্ঠ্যং দর্শিতম্। কর্ত্তৃতোঽপি শ্রৈষ্ঠ্যমাহ—মহামুনিঃ শ্রীনারায়ণঃ, তেন প্রথমং সংক্ষেপতঃ কৃতে। দেবতাকাণ্ডবিষয়গতশ্রৈষ্ঠ্যমাহ—কিং বেতি। পরৈঃ শাস্ত্রৈঃ তদুক্তসাধনৈর্বা ঈশ্বরো হৃদি কিং বা সদ্য এবাবরুধ্যতে স্থিরীক্রিয়তে? বা-শব্দঃ কটাক্ষে, কিন্তু বিলম্বেন, কথঞ্চিদেব; অত্র তু শুশ্রূষুভিঃ শ্রোতুমিচ্ছুভিরেব তৎক্ষণাদেবাবরুধ্যতে। নন্বিদমেব তর্হি কিমিতি সর্ব্বে ন শৃণ্বন্তিঃ? তত্রাহ[১]—কৃতিভিরিতি, শ্রবণেচ্ছা তু পুণ্যৈর্বিনা নোৎপদ্যত ইত্যর্থঃ। তস্মাদত্র কাণ্ডত্রয়বিষয়েভ্যঃ কাণ্ডত্রয়ার্থস্যাপি যথাবৎপ্রতিপাদনাদিদমেব সর্ব্বশাস্ত্রেভ্যঃ শ্রেষ্ঠম্; অতো নিত্যমেতদেব শ্রোতব্যমিতি ভাবঃ॥

৩। ইদানীন্তু ন কেবলং সর্ব্বশাস্ত্রেভ্যঃ শ্রেষ্ঠত্বাদস্য শ্রবণং বিধীয়তে, অপি তু সর্ব্বশাস্ত্রফলরূপমিদম্, অতঃ পরমাদরেণ সেব্যমিত্যাহ—নিগমেতি; নিগমো বেদঃ, স এব কল্পতরুঃ, সর্ব্বপুরুষার্থোপায়ত্বাৎ; তস্য ফলমিদং ভাগবতং নাম। তত্তু বৈকুণ্ঠগতং নারদেনানীয় মহ্যং দত্তম্, ময়া চ শুকস্য মুখে নিহিতম্, তচ্চ তন্মুখাদ্ভুবি গলিতং, শিষ্য-প্রশিষ্যাদিরূপ-পল্লব-পরম্পরয়া শনৈরখণ্ডমেবাবতীর্ণম্, ন তূচ্চনিপাতেন স্ফুটিতমিত্যর্থঃ। এতচ্চ ভবিষ্যদপি ভূতবন্নির্দ্দিষ্টম্, অনাগতাখ্যানেনৈবাস্য শাস্ত্রস্য প্রবৃত্তেঃ। অত-

---

১। তদাহ (ক, খ, গ)।

এবামৃতরূপেণ দ্রবেণ সংযুতম্ ; লোকে হি শুকমুখভ্রষ্টং[১] ফলমমৃতমিব স্বাদু ভবতীতি প্রসিদ্ধম্। অত্র তু শুকো শাস্ত্রস্য মুনিঃ ; অমৃতং পরমানন্দঃ, স এব দ্রবো রসঃ,—'রসো বৈ সঃ, রসং হ্যেবায়ং লব্ধ্বানন্দী ভবতি' ইতি শ্রুতেঃ। অতো হে রসিকা রসজ্ঞাঃ! তত্রাপি ভাবুকাঃ!—হে রস-বিশেষভাবনাচতুরাঃ! অহো!—ভুবি গলিতমিত্যলভ্যলাভোক্তিঃ। ইদং ভাগবতং নাম ফলং মুহুঃ পিবত। নন্বু ত্বগষ্ট্যাদিকং বিহায় ফলাদ্ রসঃ পীয়তে, কথং ফলমেব পাতব্যম্? তত্রাহ—রসং রসরূপম্, অতস্ত্বগষ্ট্যাদে-র্হেয়াংশস্যাভাবাৎ ফলমেব কৃৎস্নং পিবত। অত্র চ রসতাদাত্ম্য-বিবক্ষয়া রসবত্ত্বস্যাবিবক্ষিতত্বাদগুণবচনেঽপি রস-শব্দে বতুপঃ প্রাপ্ত্যভাবাৎ তেন বিনৈব রসং ফলমিতি সামানাধিকরণ্যম্। অত্র ফলমিত্যুক্তেঃ পানাসম্ভবো হেয়াংশ-প্রসক্তিশ্চ ভবেদিতি তন্নিবৃত্ত্যর্থং রসমিত্যুক্তম্। রসমিত্যুক্তেঽপি গলিতস্য রসস্য পাতুমশক্যত্বাৎ ফলমিত্যুক্তমিতি দ্রষ্টব্যম্। ন চ ভাগবতা-মৃতপানং মোক্ষেঽপি ত্যাজ্যমিত্যাহ—আলয়ম্ ; লয়ো মোক্ষঃ, অভিবিধা-বাকারঃ—লয়মভিব্যাপ্য, ন হীদং স্বর্গাদিসুখবন্মুক্তৈরুপেক্ষ্যতে, কিন্তু সেব্যত এব ; বক্ষ্যতি হি—'আত্মারামাশ্চ মুনয়ো নির্গ্রন্থা অপ্যুরুক্রমে। কুর্ব্বন্ত্যহৈতুকীং ভক্তিমিত্থম্ভূতগুণো হরিঃ॥' ইত্যাদি॥

৪। তদেবমনেন শ্লোক-ত্রয়েণ বিশিষ্টেষ্টদেবতানুস্মরণ-পূর্ব্বকং প্রা-রিপ্সিতস্য শাস্ত্রস্য বিষয়প্রয়োজনাদিবৈশিষ্ট্যেন সুখসেব্যত্বেন চ শ্রোতৄনভি-মুখীকৃত্য শাস্ত্রমারভতে— ওঁ নৈমিশ ইতি। ব্রহ্মণা বিসৃষ্টস্য মনোময়স্য চক্রস্য নেমিঃ[২] শীর্য্যতে কুণ্ঠীভবতি যত্র তন্নেমিশং, নেমিশমেব নৈমিশম্ ; তথা চ বায়বীয়ে—'এতন্মনোময়ং চক্রং ময়া সৃষ্টং বিসৃজ্যতে। যত্রাস্য শীর্য্যতে নেমিঃ স দেশস্তপসঃ শুভঃ॥ ইত্যুক্ত্বা সূর্য্যসঙ্কাশং চক্রং সৃষ্ট্বা মনোময়ম্। প্রণিপত্য মহাদেবং বিসসর্জ্জ পিতামহঃ॥ তেঽপি হৃষ্টতমা[৩]

১। -স্পৃষ্টং (ক, গ, ঘ) ; ২। প্রান্তম্ (গ) ; ৩। -স্তদা (ঘ)।

বিপ্রাঃ প্রণম্য জগতাং প্রভুম্। প্রযযুস্তস্য চক্রস্য যত্র নেমির্ব্যশীর্য্যত। তদ্বনং তেন বিখ্যাতং নৈমিশং মুনি[১]-পূজিতম্॥' ইতি। নৈমিষ ইতি পাঠে বরাহপুরাণোক্তং দ্রষ্টব্যম্। তথা হি গৌরমুখমৃষিং প্রতি শ্রীভগবদ্বাক্যম্—'এবং কৃত্বা ততো দেবো মুনিং গৌরমুখং তদা। উবাচ নিমিষেণেদং নিহতং দানবং বলম্॥ অরণ্যেঽস্মিংস্ততস্ত্বেতন্নৈমিষারণ্য-সংজ্ঞিতম্। ভবিষ্যতি যথার্থং বৈ ব্রাহ্মণানাং বিশেষকম্[২]॥' ইতি। অনিমিষঃ শ্রীবিষ্ণুঃ, অলুপ্ত-দৃষ্টিত্বাৎ, তস্য ক্ষেত্রে। তথা চাত্রৈব শৌনকাদিবচনম্—'ক্ষেত্রেঽস্মিন্ বৈষ্ণবে বয়ম্' ইতি। স্বঃ স্বর্গে গীয়ত ইতি স্বর্গায়ো হরিঃ, স এব লোকঃ, ভক্তানাং নিবাসস্থানং, তস্মৈ তৎপ্রাপ্তয়ে ইত্যর্থঃ। সহস্রং সমাঃ সংবৎসরাঃ, অনুষ্ঠানকালা যস্য, তৎ সত্রং সত্রসংজ্ঞকং কর্ম্মোদ্দিশ্য আসত উপবিবিশুঃ; যদ্বা, আসত অকুর্ব্বতেত্যর্থঃ। আলভতে নির্ব্বপতি, উপযন্তীত্যাদিবৎ প্রত্যয়োচ্চারণমাত্রার্থত্বেনাসতের্ধাত্বর্থস্যাবিবক্ষিতত্বাৎ॥

৫। প্রাতঃকালে হুতা এব হুতা অগ্নয়ো যৈস্তে; অনেন নিত্য--নৈমিত্তিকহোমসাধকত্বং[৩] দর্শিতম্। ইদং বক্ষ্যমাণমাদরাৎ পপ্রচ্ছুঃ॥

৬—৮। বিবিদিষিতানর্থান্ প্রষ্টুং সূতস্য সর্ব্বশাস্ত্রজ্ঞানাতিশয়ত্বমাহুঃ—ত্বয়েতি ত্রিভিঃ শ্লোকৈঃ। ইতিহাসো মহাভারতাদিঃ, তৎসহিতানি; ন কেবলমধীতানি, অপি তু আখ্যাতান্যপি ব্যাখ্যাতানি চ; উত অপি যানি ধর্ম্মশাস্ত্রাণি, তান্যপি॥ (৭) কিঞ্চ যানীতি, বিদাং বিদুষাং মধ্যে শ্রেষ্ঠো ব্যাসো যানি বেদ; পরাবরে সগুণ-নির্গুণে ব্রহ্মণী বিদন্তীতি তথা॥ (৮) বেত্থ জানাসি; সৌম্য! হে সাধো! তেষামনুগ্রহাৎ। তত্ত্বতো জ্ঞানে হেতুমাহুঃ—ব্রূয়ুরিতি; স্নিগ্ধস্য শিষ্যস্য প্রেমবত উত এব গুহ্যং রহস্যমপি ব্রূয়ুরেব॥

১। সুর- (গ); ২। বিশেষতঃ (গ); ৩। -সাকল্যং গ)।

৯। অঞ্জসা—গ্রন্থার্জ্জবেন ; একান্ততঃ শ্রেয়ঃ—অব্যভিচারি শ্রেয়ঃ-সাধনম্ ॥

১০। অন্যেঽপি বহুনা কালেন বহুশাস্ত্রশ্রবণাদিভির্বিনিশ্চিন্বন্তু ? নেত্যাহুঃ—প্রায়েণেতি ; হে সভ্য ! হে সাধো ! অস্মিন্ যুগে কলৌ অল্পায়ুষো জনাঃ, তত্রাপি মন্দা অলসাঃ, তত্রাপি সুমন্দমতয়ঃ, তত্রাপি মন্দভাগ্যা বিঘ্নাকুলাঃ, তত্রাপ্যুপদ্রুতা রোগাদিভিঃ ॥

১১। ন চ বহুশাস্ত্রশ্রবণেঽপি তাবতৈব ফলসিদ্ধিরিত্যাহুঃ—ভূরীণীতি; ভূরীণি কর্ম্মাণ্যনুষ্ঠেয়ানি যেষু তানি ; সমুদ্ধৃত্য, যথাবদুদ্ধৃত্য, যেনোদ্ধৃত-বচনেনাত্মা বুদ্ধিঃ সুপ্রসীদতি সম্যগুপশাম্যতি ॥

১২—১৬। প্রশ্নান্তরম্—সূতেতি পঞ্চভিঃ। ভদ্রং তে ইত্যৌৎসুক্যে-নাশীর্ব্বাদঃ ; ভগবান্—নিরতিশয়ৈশ্বর্য্যাদিগুণসম্পন্নঃ ; সাত্বতাং সচ্ছব্দেন সত্ত্বমূর্ত্তির্ভগবান্, স উপাস্যতয়া বিদ্যতে এষামিতি সত্বন্তো ভক্তাঃ, স্বার্থেঽণ্ রাক্ষস-বায়সাদিবৎ ; তস্য চাশ্রবণমার্ষং, তদেবং সাত্বদিতি ভবতি ; তেষাং পতিঃ পালকঃ ; যস্যার্থবিশেষস্য চিকীর্ষয়া বসুদেবস্য ভার্য্যায়াং দেবক্যাং জাতঃ ॥ (১৩) অঙ্গ ! হে সূত ! তন্নোঽনুবর্ণয়িতুমর্হসি। সামান্যতস্তাবদ্-যস্যাবতারো ভূতানাং ক্ষেমায় পালনায়, ভবায় সমৃদ্ধয়ে, কিং পুনঃ পূর্ণ ইতি ভাবঃ ॥ (১৪) তৎপ্রভাবমনুবর্ণয়ন্তস্তদ্‌যশঃ-শ্রবণৌৎসুক্যমাবিষ্কুর্ব্বন্তি—আপন্ন ইতি ত্রিভিঃ। সংসৃতিং ঘোরমাপন্নঃ প্রাপ্তঃ, বিবশোঽপি গৃণন্ ; ততঃ সংসৃতেঃ। অত্র হেতুঃ—যদ্ যতো নাম্নঃ সকাশাদ্ভয়মপি স্বয়ং বিভেতি ॥ (১৫) কিঞ্চ, যস্য পাদৌ সংশ্রয়ৌ যেষাম্, অতএব প্রশমোঽয়নং বর্ত্ম আশ্রয়ো বা যেষাং, তে মুনয় উপস্পৃষ্টাঃ সন্নিধিমাত্রেণ সেবিতাঃ সদ্যঃ পুনন্তি। স্বর্ধুনী গঙ্গা, তস্যা আপস্তু তৎপাদান্নিঃসৃতাঃ, ন তু তত্রৈব তিষ্ঠন্তি, অতস্তৎসম্বন্ধেন পুনন্ত্যোঽপি অনুসেবয়া পুনন্তি, তত্রাপি

ন তু সত্ত্ব ইতি মুনীনামুৎকর্ষোক্তিঃ ॥ (১৬) পুণ্যশ্লোকৈরীড্যানি স্তব্যানি কর্ম্মাণি যস্য তস্য যশঃ কলিমলাপহং সংসারদুঃখোপশমনম্ ॥

১৭। প্রশ্নান্তরম্—তস্যেতি। উদারাণি—মহান্তি বিশ্বসৃষ্ট্যাদীনি; সূরিভির্নারদাদিভিঃ; কলাঃ—ব্রহ্মরুদ্রাদিমূর্ত্তীঃ ॥

১৮। প্রশ্নান্তরম্—অথেতি। অবতারকথাঃ—স্থিত্যর্থমেব তত্তদবসরে যে মৎস্যাদ্যবতারাঃ, তদীয়াঃ কথাঃ; স্বৈরং লীলাঃ কুর্ব্বতঃ ॥

১৯। যদ্যপি শ্রীকৃষ্ণাবতারপ্রয়োজনপ্রশ্নেনৈব তচ্চরিতপ্রশ্নোঽপি জাত এব, তথাপ্যত্যৌৎসুক্যেন পুনরপি তচ্চরিতান্যেব শ্রোতুমিচ্ছন্তস্তত্রাত্মনস্তৃপ্ত্যভাবমাবেদয়ন্তি—বয়ন্ত্বিতি। যোগযাগাদিষু তৃপ্তাঃ স্মঃ। উদ্গচ্ছতি তমো যস্মাৎ, স উত্তমস্তথাভূতঃ শ্লোকো যশো যস্য, তস্য বিক্রমে তু বিশেষেণ ন তৃপ্যামঃ, অলমিতি ন মন্যামহে। তত্র হেতুঃ—যদ্বিক্রমং শৃণ্বতাম্; যদ্বা, অন্যে তু তৃপ্যন্তু নাম, বয়ন্ত নেতি, তু-শব্দস্যান্বয়ঃ। অয়মর্থঃ—ত্রিধা হ্যলংবুদ্ধির্ভবতি;—উদরাদিভরণেন বা, রসাজ্ঞানেন বা, স্বাদুবিশেষাভাবাদ্বা। তত্র শৃণ্বতামিত্যনেন শ্রোত্রস্যাকাশত্বান্ন ভরণমিত্যুক্তং, রসজ্ঞানামিত্যনেন চাজ্ঞানতঃ পশুবৎ তৃপ্তির্নিরাকৃতা, ইক্ষুভক্ষণবদ্রসান্তরাভাবেন তৃপ্তিং নিরাকরোতি। পদে পদে প্রতিক্ষণং স্বাদুতোঽপি স্বাদু ॥

২০। অতঃ শ্রীকৃষ্ণচরিতানি কথয়েত্যাশয়েনাহুঃ—কৃতবানিতি। অতিমর্ত্ত্যানি—মর্ত্ত্যানতিক্রান্তানি গোবর্দ্ধনোদ্ধরণাদীনি, মনুষ্যেষু অসম্ভাবিতানীত্যর্থঃ ॥

২১। ননু যাজনাধ্যাপনাদি[১]-ব্যগ্রাণাং কুত এব কথাশ্রবণাবকাশঃ[২] স্যাৎ? তত্রাহুঃ—কলিমিতি; কলিমাগতং জ্ঞাত্বা তদ্ভিয়া বিষ্ণুপদং গন্তুকামা দীর্ঘসত্রেণ নিমিত্তেনাত্র বৈষ্ণবে ক্ষেত্রে আসীনাঃ, হরেঃ কথায়াং সক্ষণা লব্ধাবসরাঃ ॥

১। যজনাধ্যয়নাদি- (ঘ); ২। এতচ্ছ্রবণাবকাশঃ (ক, খ, গ)।

২২। অস্মিংশ্চ সময়ে ত্বদ্দর্শনমীশ্বরেণৈব সম্পাদিতমিত্যভিনন্দন্তি—ত্বং ন ইতি, কলিং নিস্তরিতুমিচ্ছতাম্, অর্ণবং নিস্তিতীর্ষতাং কর্ণধারো নাবিক ইব॥

২৩। পুনঃ প্রশ্নান্তরম্—ব্রূহীতি। ধর্ম্মস্য বর্ম্মণি কবচবদ্রক্ষকে, স্বাং কাষ্ঠাং মর্য্যাদাং স্বরূপমিত্যর্থঃ। অস্য চোত্তরম্—'কৃষ্ণে স্বধামোপগতে ধর্ম্মজ্ঞানাদিভিঃ সহ' ইত্যাদিশ্লোকঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে প্রথমোঽধ্যায়ঃ॥ ১॥

দ্বিতীয়োঽধ্যায়ঃ

তদেবং প্রথমাধ্যায়ে ষট্ প্রশ্না মুনিভিঃ কৃতাঃ।
দ্বিতীয়ে তূত্তরং সূতশ্চতুর্ণামাহ তেষ্বথ॥ (১)

১। বিপ্রাণামিতি, এবম্ভূতৈঃ সম্যক্ প্রশ্নৈঃ সম্যগ্‌হৃষ্টো রোমহর্ষণস্য পুত্র উগ্রশ্রবাঃ, তেষাং বচঃ প্রতিপূজ্য সংকৃত্য প্রবক্তুমুপচক্রমে উপক্রান্তবান্॥

২—৪। প্রবচনস্যোপক্রমো নামাত্র গুরুদেবতানমস্কার ইতি, তমাহ—ষমিতি ত্রিভিঃ। তত্র স্বগুরোঃ শুকস্যৈশ্বর্য্যং তচ্চরিতেনৈব দ্যোতয়ন্নাহ—যমিতি; যং প্রব্রজন্তং সন্ন্যস্য গচ্ছন্তমনুপেতম্—মামুপনয়স্বেত্যুপনয়নার্থমাচার্য্যমনুপসন্নম্; যদ্বা, কেনাপ্যনুপেতমননুগতম্, একাকিনমিত্যর্থঃ। তত্র হেতুঃ—অপেতকৃত্যং কৃত্যশূন্যং, কর্ম্মমার্গেঽপ্রবর্ত্তমানং, নৈষ্ঠিকত্বাৎ; দ্বৈপায়নো ব্যাসো বিরহাৎ কাতরো ভীতঃ সন্, পুত্র ইতি প্লুতেনাজুহাব আহূতবান্। দূরাহ্বানে প্লুতে সত্যপি সন্ধিরার্ষঃ। তদা তন্ময়তয়া

শুকরূপতয়া তরবোঽভিনেদুঃ প্রত্যুত্তরমুক্তবন্তঃ। পিতুঃ স্নেহানুবন্ধপরিহারায় যো বৃক্ষরূপেণোত্তরং দত্তবানিত্যর্থঃ, তং মুনিমানতোঽস্মি। তন্ময়ত্বোপপাদনায় বিশেষণম্—সর্ব্বভূতানাং হৃন্মনঃ অয়তে, যোগবলেন প্রবিশতীতি সর্ব্বভূতহৃদয়স্তম্॥ (৩) তৎকৃপালুতাং দর্শয়ন্নাহ— যঃ স্বানুভাবমিতি। অন্ধং গাঢ়ং তমঃ সংসারাখ্যমতিতরিতুমিচ্ছতাম্। পুরাণানাং মধ্যে গুহ্যং গোপ্যম্। অত্র হেতুত্বেন চত্বারি বিশেষণানি ;—স্বো নিজঃ অসাধারণোঽনুভাবঃ প্রভাবো যস্য তৎ স্বানুভাবম্; অখিলশ্রুতীনাং সারম্; একম্ অদ্বিতীয়মনুপমমিত্যর্থঃ; আত্মানং কার্য্যকারণসঙ্ঘাতমধিকৃত্য বর্ত্তমানমাত্মতত্ত্বমধ্যাত্মং, তস্য দীপং সাক্ষাৎপ্রকাশকম্; উপযামি শরণং ব্রজামি॥ (৪) জয়ত্যনেন সংসারমিতি, জয়ো গ্রন্থস্তমুদীরয়েদিতি স্বয়ং তথোদীরয়ন্নন্যানপি পৌরাণিকানুপশিক্ষয়তি॥

৫। তেষাং বচঃ প্রতিপূজ্যেতি যদুক্তং, তৎপ্রতিপূজনং করোতি—হে মুনয়ঃ! সাধু যথা ভবতি তথাহং পৃষ্টঃ, যতো লোকানাং মঙ্গলমেতৎ। যদ্যতঃ কৃষ্ণবিষয়ঃ সংপ্রশ্নঃ কৃতঃ। সর্ব্বশাস্ত্রার্থসারোদ্ধারপ্রশ্নস্যাপি কৃষ্ণে পর্য্যবসানাদেবমুক্তম্॥

৬। তত্র যৎ প্রথমং পৃষ্টং 'সর্ব্বশাস্ত্রসারমৈকান্তিকং শ্রেয়ো ব্রূহি' ইতি, তত্রোত্তরম্—স বৈ ইতি। অয়মর্থঃ—ধর্ম্মো দ্বিবিধঃ, প্রবৃত্তিলক্ষণো নিবৃত্তিলক্ষণশ্চ। তত্র যঃ স্বর্গাদ্যর্থঃ প্রবৃত্তিলক্ষণঃ, সোঽপরঃ। যতস্তু ধর্ম্মাৎ কৃষ্ণে শ্রবণাদরাদি[১]-লক্ষণা ভক্তির্ভবতি, স পরো ধর্ম্মঃ, স এবৈকান্তিকং শ্রেয় ইতি। কথম্ভূতা? অহৈতুকী—হেতুঃ ফলাভিসন্ধানং, তদ্রহিতা ; অপ্রতিহতা—বিঘ্নৈরনভিভূতা॥

৭। নন্বু 'তমেতমাত্মানং বেদানু[২]-বচনেন ব্রাহ্মণা বিবিদিষন্তি, যজ্ঞেন দানেন তপসানাশকেন' ইত্যাদিশ্রুতিভ্যো ধর্ম্মস্য জ্ঞানাঙ্গত্বং প্রসিদ্ধম্; তৎ

১। শ্রবণাদি- (খ); ২। বেদার্থ- (ক)।

কুতো ভক্তিহেতুত্বমুচ্যতে ? সত্যম্, তত্ত্ ভক্তিদ্বারেণেত্যাহ—বাসুদেব ইতি। অহৈতুকম্—শুষ্কতর্কাদ্যগোচরমৌপনিষদমিত্যর্থঃ ॥

৮। ব্যতিরেকমাহ—ধর্ম্ম ইতি ; যো ধর্ম্ম ইতি প্রসিদ্ধঃ, স যদি বিষ্বক্সেনস্য কথাসু রতিং নোৎপাদয়েৎ, তর্হি স্বনুষ্ঠিতোঽপি সন্নয়ং শ্রমো জ্ঞেয়ঃ। নন্বু মোক্ষার্থস্যাপি ধর্ম্মস্য শ্রমত্বমস্ত্যেব ? অত আহ—কেবলং বিফলশ্রম ইত্যর্থঃ। নন্বস্তি, তত্রাপি স্বর্গাদিফলমিত্যাশঙ্ক্য এবকারেণ নিরাকরোতি, ক্ষয়িষ্ণুত্বান্ন তৎফলমিত্যর্থঃ। নন্বু 'অক্ষয্যং হ বৈ চাতুর্ম্মাস্য-যাজিনঃ সুকৃতং ভবতি' ইত্যাদিশ্রুতের্ন তৎফলস্য ক্ষয়িষ্ণুত্বমিত্যাশঙ্ক্য হি-শব্দেন সাধয়তি—'তদ্যথেহ কর্ম্মজিতো লোকঃ ক্ষীয়তে, এবমেবামুত্র পুণ্যজিতো লোকঃ ক্ষীয়তে' ইতি তর্কানুগৃহীতয়া শ্রুত্যা ক্ষয়িষ্ণুত্বপ্রতি-পাদনাৎ ॥

৯-১০। তদেবং হরিভক্তিদ্বারা তদিতরবৈরাগ্যাত্মজ্ঞানপর্য্যন্তঃ পরো ধর্ম্ম ইত্যুক্তম্। অন্যে তু মন্যন্তে—ধর্ম্মস্যার্থঃ ফলম্, তস্য চ কামঃ ফলম্, তস্য চেন্দ্রিয়প্রীতিঃ, তৎপ্রীতেশ্চ পুনরপি ধর্ম্মার্থাদিপরম্পরেতি। যথাহুঃ —'ধর্ম্মাদর্থশ্চ কামশ্চ স কিমর্থং ন সেব্যতে ?' ইত্যাদি। তন্নিরাকরোতি—ধর্ম্মস্যেতি দ্বাভ্যাম্। আপবর্গ্যস্য উক্তন্যায়েনাপবর্গপর্য্যন্তস্য ধর্ম্মস্য অর্থায় ফলত্বায় অর্থো নোপকল্পতে, যোগ্যো ন ভবতি ; তথা অর্থস্যাপ্যেবম্ভূত-ধর্ম্মাব্যভিচারিণঃ কামো লাভায় ফলত্বায় ন হি স্মৃতো মুনিভিঃ ॥ (১০) কামস্য বিষয়ভোগস্য ইন্দ্রিয়প্রীতির্লাভঃ ফলং ন ভবতি, কিন্তু যাবতা জীবেত, তাবানেব কামস্য লাভঃ, জীবনপর্য্যন্ত[১] এব কামঃ সেব্য ইত্যর্থঃ। জীবস্য জীবনস্য চ পুনঃ কর্ম্মভির্ধর্ম্মানুষ্ঠানদ্বারা য ইহ প্রসিদ্ধঃ স্বর্গাদিঃ, সোঽর্থো ন ভবতি, কিন্তু তত্ত্বজিজ্ঞাসৈব ॥

১। -পর্য্যাপ্ত (ঘ)।

১১। ননু তত্ত্বজিজ্ঞাসা নাম ধর্ম্মজিজ্ঞাসৈব, ধর্ম্ম এব হি তত্ত্বমিতি কেচিৎ; তত্রাহ—বদন্তীতি। তত্ত্ববিদস্তু তদেব তত্ত্বং বদন্তি। কিং তৎ? যৎ জ্ঞানং নাম। অদ্বয়মিতি ক্ষণিকজ্ঞানপক্ষং ব্যাবর্ত্তয়তি। ননু তত্ত্ব-বিদোঽপি বিগীতবচনা এব? নৈবম্, তস্যৈব তত্ত্বস্য নামান্তরৈরভিধানাদি-ত্যাহ—ঔপনিষদৈর্ব্রহ্মেতি, হৈরণ্যগর্ভৈঃ পরমাত্মেতি, সাত্বতৈর্ভগবানিতি শব্দ্যতে অভিধীয়তে॥

১২। তচ্চ তত্ত্বং সপরিকরয়া ভক্ত্যৈব প্রাপ্যত ইত্যাহ—তচ্চেত্য-ন্বয়ঃ। জ্ঞানবৈরাগ্যযুক্তয়েত্যত্র জ্ঞানং পরোক্ষম্; তচ্চ তত্ত্বমাত্মনি ক্ষেত্রজ্ঞে পশ্যন্তি। কিং তৎ? আত্মানং পরমাত্মানম্, শ্রুতেন বেদান্তাদি-শ্রবণেন গৃহীতয়া প্রাপ্তয়া ইতি ভক্তের্দার্ঢ্যমুক্তম্॥

১৩। শ্রবণাদিগৃহীত-ধর্ম্মস্য ফলং ভক্তিঃ, নার্থকামাদিকমিতীমমর্থ-মুপপাদ্যোপসংহরতি—অত ইতি। হে দ্বিজশ্রেষ্ঠাঃ! হরিতোষণং হরে-রারাধনম্, সংসিদ্ধিঃ ফলম্॥

১৪। যস্মাচ্চ ভক্তিহীনো ধর্ম্মঃ কেবলং শ্রম এব, তস্মাদ্ভক্তিপ্রধান এব ধর্ম্মোঽনুষ্ঠেয় ইত্যাহ—তস্মাদিতি; একেন—একাগ্রেণ মনসা॥

১৫। ভক্তিবিহীনো ধর্ম্মঃ কেবলং শ্রম এবেত্যুক্তম্, ইদানীন্তু ভক্তের্মুক্তিফলত্বং প্রপঞ্চয়তি—যদিতি; যস্য অনুধ্যা অনুধ্যানং, সৈব অসিঃ খড়্গঃ, তেন যুক্তা বিবেকিনঃ, গ্রন্থিমহঙ্কারং নিবধ্নাতি যৎ কর্ম্ম তৎ ছিন্দন্তি; তস্য কথায়াং রতিং কো ন কুর্য্যাৎ?

১৬। ননু সত্যমেব কর্ম্মনির্ম্মূলনী হরিকথারতিঃ, তথাপি তস্যাং রুচি-র্নোৎপদ্যতে, কিং কুর্ম্মঃ? তত্রাহ—শুশ্রূষোরিতি। পুণ্যতীর্থনিষেবনাদিভিঃ নিষ্পাপস্য মহৎসেবা স্যাৎ, তয়া চ তদ্ধর্ম্মশ্রদ্ধা, ততঃ শ্রবণেচ্ছা, ততো রুচিঃ স্যাদিত্যর্থঃ॥

১৭। ততশ্চ শৃণ্বতামিতি ; পুণ্যে শ্রবণকীর্ত্তনে যস্ত সঃ, সতাং সুহৃৎ হিতকারী ; হৃদি যান্যভদ্রাণি কামাদিবাসনাস্তানি ; অন্তঃস্থো হৃদয়স্থঃ সন্॥

১৮। ততশ্চ নষ্টপ্রায়েম্বিতি ; সর্ব্বাভদ্রনাশস্ত জ্ঞানোত্তরকালত্বাৎ প্রায়-গ্রহণম্ ; ভাগবতানাং ভাগবত-শাস্ত্রস্ত বা সেবয়া, নৈষ্ঠিকী নিশ্চলা, বিক্ষেপাভাবাৎ ॥

১৯। রজস্তমশ্চ, যে চ তৎপ্রভবা ভাবাঃ কামাদয়ঃ, এতৈরনাবিদ্ধ-মনভিভূতম্ ; প্রসীদতি—উপশাম্যতি ॥

২০। ভগবদ্ভক্তিযোগতঃ প্রসন্নমনসঃ, অতএব মুক্তসঙ্গস্ত ॥

২১। জ্ঞানফলমাহ—ভিদ্যত ইতি। হৃদয়মেব গ্রন্থিঃ—চিজ্জড়গ্রন্থন-রূপোঽহঙ্কারঃ, অতএব সর্ব্বে সংশয়া অসম্ভাবনাদিরূপাঃ ; কর্ম্মাণ্যনারব্ধ-ফলানি, আত্মনি আত্মস্বরূপভূতে ঈশ্বরে দৃষ্টে সাক্ষাৎকৃতে সতি। এবকারেণ জ্ঞানানন্তরমেবেতি দর্শয়তি ॥

২২। তত্র সদাচারং দর্শয়ন্নুপসংহরতি—অত ইতি। আত্মপ্রসাদনীং মনঃশোধনীম্ ; বাসুদেবে ভক্তিং কুর্ব্বন্তীতি ভজনীয়বিশেষো দর্শিতঃ ॥

২৩। তদেবোপপাদয়িতুং ব্রহ্মাদীনাং ত্রয়াণামেকাত্মকত্বেঽপি বাসু-দেবস্তাধিক্যমাহ—সত্ত্বমিতি। ইহ যদ্যপি এক এব পরঃ পুমান্ অস্ত বিশ্বস্ত স্থিত্যাদয়ে স্থিতি-সৃষ্টি-লয়ার্থং হরি-বিরিঞ্চি হরেতি সংজ্ঞাঃ কেবলং ভিন্না ধত্তে ; হরিবিরিঞ্চিহরা ইতি বক্তব্যে সন্ধিরার্ষঃ ; তত্র তেষাং মধ্যে শ্রেয়াংসি শুভফলানি সত্ত্বতনোর্বাসুদেবাদেব স্যুঃ ॥

২৪। উপাধিবৈশিষ্ট্যেন ফলবৈশিষ্ট্যং সদৃষ্টান্তমাহ—পার্থিবাদিতি। স্বতঃপ্রবৃত্তিপ্রকাশরহিতাদ্ দারুণঃ কাষ্ঠাৎ সকাশাৎ ধূমঃ প্রবৃত্তিস্বভাবঃ ত্রয়ীময়ো বেদোক্তকর্ম্মপ্রচুরঃ, ঈষৎকর্ম্মপ্রত্যাসত্তেঃ, তস্মাদপি অগ্নিস্ত্রয়ীময়ঃ, সাক্ষাৎ কর্ম্মসাধনত্বাৎ ; এবং তমসঃ সকাশাৎ রজস্তস্মাৎ সত্ত্বং ব্রহ্মদর্শনং ব্রহ্মপ্রকাশকম্। তু-শব্দেন লয়াত্মকাৎ তমসঃ সকাশাদ্রজসঃ সোপাধিক-

জ্ঞানহেতুত্বেন কথঞ্চিদ্[১] ব্রহ্মদর্শনপ্রত্যাসত্তিমাত্রমুক্তম্, ন তু সর্ব্বথা তৎ-প্রকাশকত্বং, বিক্ষেপকত্বাৎ ; যৎ সত্ত্বং, তৎ সাক্ষাদ্‌ব্রহ্মদর্শনম্ ; অতস্তত্তদ্-গুণোপাধীনাং হরব্রহ্মাদীনামপি যথোত্তরং বৈশিষ্ট্যমিতি ভাবঃ ॥

২৫। বাসুদেবভক্তৌ পূর্ব্বাচারং প্রমাণয়তি—ভেজির ইতি। অথ অতো হেতোঃ, অগ্রে পুরা, বিশুদ্ধং সত্ত্বং সত্ত্বমূর্ত্তিং ভগবন্তমধোক্ষজম্ ; অতো যে তাননুবর্ত্তন্তে, তেঽপি ইহ সংসারে মোক্ষায়[২] কল্পন্তে ॥

২৬—২৭। নন্বন্যানপি কেচিদ্ভজন্তো দৃশ্যন্তে ? সত্যম্, মুমুক্ষবস্তু অন্যান্ ন ভজন্তি, কিন্তু সকামা এবেত্যাহ— মুমুক্ষব ইতি দ্বাভ্যাম্। ভূত-পতীনিতি পিতৃপ্রজেশাদীনামুপলক্ষণম্ ; অনসূয়বঃ - দেবতান্তরানিন্দকাঃ সন্তঃ ॥ (২৭) রজস্তমসী প্রকৃতিঃ স্বভাবো যেষাং তে, অতএব পিতৃভূতা-দিভিঃ সমং শীলং যেষাং তে, শ্রিয়া সহ ঐশ্বর্য্যঞ্চ প্রজাশ্চেপ্সন্তীতি তথা তে ॥

২৮—২৯। তত্ত্বতো[৩] মোক্ষপ্রদত্বাদ্বাসুদেব এব ভজনীয় ইত্যুক্তং, সর্ব্বশাস্ত্র-তাৎপর্য্য-গোচরত্বাদপীত্যাহ দ্বাভ্যাম্। বাসুদেবঃ পরস্তাৎপর্য্য-গোচরো যেষাং তে। নন্বু বেদা মখপরা দৃশ্যন্তে ? ইত্যাশঙ্ক্য তেঽপি তদারাধনার্থত্বাৎ তৎপরা এবেত্যুক্তম্। যোগা যোগশাস্ত্রাণি, তেষামপ্যা-সন-প্রাণায়ামাদি-ক্রিয়াপরত্বমাশঙ্ক্য তাসামপি তৎপ্রাপ্ত্যুপায়ত্বাৎ তৎপরত্ব-মুক্তম্ ॥ (২৯) জ্ঞানং জ্ঞানশাস্ত্রম্। নন্বু তজ্‌জ্ঞানং পরমেবেত্যাশঙ্ক্য জ্ঞানস্যাপি তৎপরত্বমুক্তম্। তপোঽত্র জ্ঞানম্, ধর্ম্মো ধর্ম্মশাস্ত্রং দানব্রতাদি-বিষয়ম্। নন্বু তৎ স্বর্গাদিপরমিত্যাশঙ্ক্য তস্যাপি তদধীনত্বাৎ তৎপরত্বম্ ; গম্যতে ইতি গতিঃ স্বর্গাদিফলং, সাপি তদানন্দাংশপ্রকাশরূপত্বাৎ তৎপরৈ-বেত্যুক্তম্। যদ্বা, বেদা ইত্যনেনৈব তন্মূলত্বাৎ সর্ব্বাণি শাস্ত্রাণি বাসুদেব-

---

১। কিঞ্চিৎ (ঘ) ; ২। ক্ষেমায় (ক) ; ৩। অতো (খ, ঘ)।

পরাণীত্যুক্তম্। নন্থ বেদানাং তেষাং মখ-যোগক্রিয়াদি-নানার্থপরত্বান্ন তদেকপরত্বমিত্যাশঙ্ক্য মখাদীনামপি তৎপরত্বমুক্তমিতি দ্রষ্টব্যম্ ॥

৩০—৩৩। নন্থ জগৎসর্গ-প্রবেশ-নিয়মনাদি-বিলাস[১]-যুক্তে বস্তুনি সর্ব্বশাস্ত্রসমন্বয়ো দৃশ্যতে, কথং বাস্থদেবপরত্বং সর্ব্বস্য ? তত্রাহ—স এবেতি চতুর্ভিঃ। এতৈরেব শ্লোকৈঃ 'তস্য কর্ম্মাণ্যুদারাণি ব্রূহি' ইতি প্রশ্নস্যোত্তর-মুক্তম্। সদসদ্রূপয়া—কার্য্যকারণাত্মিকয়া। অগুণশ্চেত্যন্বয়ঃ, স্বতো নির্গুণোঽপি সন্নিত্যর্থঃ ॥ (৩১) ভগবতো জগৎকারণত্বমুক্তম্ ; প্রবেশ-নিয়মন-লক্ষণাং লীলামাহ—তয়েতি। বিলসিতেষু উদ্ভূতেষু গুণেষু আকাশাদিষু অন্তঃপ্রবিষ্টঃ সন্ গুণবানিব, 'মদধীনা এতে গুণাঃ' ইত্যভিমান-বানিব, ন তু বস্তুতস্তথা, যতো বিজ্ঞানেন চিচ্ছক্ত্যা বিজৃম্ভিতঃ অত্যূর্জ্জিতঃ ॥ (৩২) বহুরূপত্বলীলামাহ—যথেতি। স্বযোনিষু স্বা[২]-ভিব্যঞ্জকেষু অবহিতো নিহিতঃ। বিশ্বাত্মা পুমান্ পরমেশ্বরো ভূতেষু প্রাণিষু অন্তর্য্যামিণোঽপি প্রতিযোগি-নানাত্বেন নানাত্বমিবোচ্যতে, ক্ষেত্রজ্ঞরূপেণ বা ॥ (৩৩) ভোগ-রূপাং লীলামাহ—অসাবিতি ; অসৌ হরিঃ ভূতসূক্ষ্মাণি চ ইন্দ্রিয়াণি চ, আত্মা মনশ্চ, তৈঃ স্বয়ং নির্ম্মিতেষু ভূতেষু চতুর্বিধেষিতি ভোগে স্বাতন্ত্র্যং স্যোত্যতে ; তদ্‌গুণান্ তত্তদনুরূপান্ বিষয়ানিচ্ছয়া ভুঙ্‌ক্তে ভোজয়তীতি, ণিজর্থো বা জ্ঞেয়ঃ, পালয়তীতি বা, তদাত্মনেপদমার্ষং, 'ভুজোঽনবনে' ইতি স্মরণাৎ ॥

৩৪। ইদানীং সূত ! জানাসীতি প্রশ্নস্যোত্তরমাহ—ভাবয়তি পালয়তি, এতত্তু সর্ব্বাবতারসাধারণ-প্রয়োজনম্, বিশেষতঃ শ্রীকৃষ্ণাবতারস্য কুন্তী-স্তুতৌ বক্ষ্যতে। লোকভাবনঃ লোককর্ত্তা ; দেবাদিষু যে লীলাবতারাস্তেষু অনুরতোঽনুরক্তঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

১। -লীলা-(ঘ) ; ২। আত্মা-(গ)।

তৃতীয়োঽধ্যায়ঃ

অবতারকথাপ্রশ্নে তৃতীয়ে তূত্তরাভিধা।
পুরুষাগ্যবতারোক্ত্যা তত্তচ্চারিত্রবর্ণনৈঃ ॥ (১)

১—৫। যদুক্তম্ 'অথাখ্যাহি হরের্ধীমন্নবতারকথাঃ শুভাঃ' ইতি, তদুত্তরত্বেনাবতারাননুক্রমিষ্যন্ প্রথমং পুরুষাবতারমাহ—জগৃহে ইতি পঞ্চভিঃ। মহদাদিভির্মহদহঙ্কারপঞ্চতন্মাত্রৈঃ সম্ভূতং সুনিষ্পন্নম্; একাদশেন্দ্রিয়াণি পঞ্চ মহাভূতানি ইতি ষোড়শ কলা অংশা যস্মিন্ তৎ। নন্বু যদ্যপি ভগবদ্বিগ্রহো নৈবম্ভূতঃ, তথাপি বিরাড়্জীবান্তর্যামিণো ভগবতো বিরাড়্রূপেণোপাসনার্থমেবমুক্তমিতি দ্রষ্টব্যম্॥ (২) কোঽসৌ ভগবানিত্যপেক্ষায়াং তং বিশিনষ্টি—যস্যেতি; যস্যাম্ভসি একার্ণবে শয়ানস্য বিশ্রান্তস্য, তত্র চ যোগঃ সমাধিস্তদ্রূপাং নিদ্রাং বিস্তারয়তঃ; নাভিরেব হ্রদঃ, তস্মিন্ যদম্বুজং তস্মাৎ সকাশাৎ ব্রহ্মাসীৎ অভূৎ। পাদ্মে কল্পে স পৌরুষং রূপং জগৃহে॥ (৩) কীদৃশং রূপং জগৃহে? তদাহ—যস্যেতি। নন্বু কীদৃশো বিগ্রহস্তস্য, যোঽম্ভসি শেতে স্ম? তদাহ—তৎ তস্য ভগবতো রূপন্তু বিশুদ্ধং রজ-আগ্যসম্ভিন্নম্, অতএবোর্জ্জিতং নিরতিশয়ং সত্ত্বম্॥ (৪) এতচ্চ যোগিনাং প্রত্যক্ষমিত্যাহ—পশ্যন্তীতি; অদভ্রমনল্পং জ্ঞানাত্মকং যচ্চক্ষুস্তেন, সহস্রম্ অপরিমিতানি যানি পাদাদীনি[১] তৈরদ্ভুতম্, সহস্রং মূর্দ্ধাদয়ো যস্মিন্ তৎ, সহস্রং যানি মৌল্যাদীনি, তৈরুল্লসৎ শোভমানম্॥ (৫) এতত্তু কূটস্থং, ন ত্বন্যাবতারবদাবির্ভাব-তিরোভাববদিত্যাহ—এতদিতি; এতত্তু আদি নারায়ণরূপং নিধীয়তেঽস্মিন্নিতি নিধানং কার্য্যাবসানে প্রবেশস্থানমিত্যর্থঃ; বীজম্ উদ্গমস্থানম্ বীজত্বেঽপি নান্য-বীজতুল্যং

১। পদানীতি (গ)।

কিন্ত্বব্যয়ম্। ন কেবলমবতারাণামেব বীজম্, কিন্তু সর্ব্বপ্রাণিনামিত্যাহ —যস্যাংশো ব্রহ্মা, তস্যাংশো মরীচ্যাদিস্তেন ॥

৬। সনৎকুমারাদ্যবতারং তচ্চরিতঞ্চাহ—স এবেতি; কৌমার আর্ষঃ; প্রাজাপত্যো মানব ইত্যাদীনি সর্গবিশেষনামানি; যঃ পৌরুষং রূপং জগৃহে, স এব দেবঃ কৌমারাখ্যং সর্গমাশ্রিতঃ সন্ ব্রহ্মা ব্রাহ্মণো ভূত্বা ব্রহ্মচর্য্যং চচার; প্রথম-দ্বিতীয়াদিশব্দা নির্দ্দেশমাত্রবিবক্ষয়া[১] ॥

৭। বরাহাবতারমাহ—দ্বিতীয়মিতি। অস্য বিশ্বস্য ভবায় উদ্ভবায়, মহীমুদ্ধরিষ্যন্নিতি কর্ম্মোক্তিঃ, এবং সর্ব্বত্রাবতারস্তৎকর্ম্ম চোক্তমিত্যনু-সন্ধেয়ম্ ॥

৮। নারদাবতারমাহ—তৃতীয়মিতি। ঋষিসর্গমুপেত্য, তত্র চ দেবর্ষিত্ব-মুপেত্যেত্যর্থঃ। সাত্বতং বৈষ্ণবং তন্ত্রং পঞ্চরাত্রাগমমাচষ্ট উক্তবান্, যতস্তন্ত্রাৎ। নির্গতং কর্ম্মত্বং বন্ধহেতুত্বং যেভ্যস্তানি নিষ্কর্ম্মাণি, তেষাং ভাবো নৈষ্কর্ম্ম্যং, কর্ম্মণামেব মোচকত্বং যতো ভবতি, তদাচষ্টেত্যর্থঃ ॥

৯। নরনারায়ণাবতারমাহ—তুর্য্য ইতি; তুর্য্যেচতুর্থেঽবতারে ধর্ম্মস্য কলা অংশঃ ভার্য্যেত্যর্থঃ, 'অর্দ্ধো বা এষ আত্মনো যৎ পত্নী'তি শ্রুতেঃ। তস্যাঃ সর্গে ঋষী ভূত্বেত্যেকাবতারত্বং দর্শয়তি ॥

১০। কপিলাবতারমাহ—পঞ্চম ইতি। আসুরয়ে এতন্নাম্নে ব্রাহ্মণায়; তত্ত্বানাং গ্রামস্য সঙ্ঘস্য বিনির্ণয়ো যস্মিন্ শাস্ত্রে তৎ সাংখ্যম্ ॥

১১। দত্তাত্রেয়াবতারমাহ—ষষ্ঠমিতি। অত্রেরপত্যত্বং তেনৈব বৃতঃ সন্ প্রাপ্তঃ—'অত্রেরপত্যমভিকাঙ্ক্ষত আহ—তুষ্টঃ' ইতি বক্ষ্যমাণত্বাৎ। কথং প্রাপ্তঃ? অনসূয়য়া মৎসদৃশাপত্যমিষেণ মামেবাপত্যং বৃতবানিতি দোষদৃষ্টিমকুর্ব্বন্নিত্যর্থঃ। আন্বীক্ষিকীমাত্মবিদ্যাম্। প্রহ্লাদাদিভ্যশ্চ—আদি-পদাৎ যদু-হৈহয়াদ্যা গৃহ্যন্তে ॥

১। মাত্রাপেক্ষয়া (ক)।

১২। যজ্ঞাবতারমাহ—তত ইতি। স যজ্ঞঃ যামাদ্যৈঃ স্বস্যৈব পুত্রা যামা নাম দেবাঃ, তদাদ্যৈঃ সহ স্বায়ম্ভুবমন্বন্তরং পালিতবান্, তদা স্বয়-মিন্দ্রোঽভূদিত্যর্থঃ ॥

১৩। ঋষভাবতারমাহ—অষ্টম ইতি। সর্ব্বাশ্রমনমস্কৃতমন্ত্যাশ্রমং পারমহংস্যং বর্ত্ম ধীরাণাং দর্শয়ন্ নাভেঃ আগ্নীধ্রপুত্রাদৃষভো জাতঃ ॥

১৪। পৃথ্বতারমাহ—ঋষিভিরিতি। পার্থিবং বপুঃ রাজদেহং পৃথুরূপম্ ; পার্থবমিতি পাঠে পৃথোরিদং পার্থবম্। ওষধীরিত্যুপলক্ষণম্ ; ইমাং পৃথ্বীং সর্ব্বাণি বস্তূনি দুগ্ধ অদুগ্ধ। অড়াগমাভাবস্ত্বার্ষঃ। হে বিপ্রাঃ! তেন পৃথ্বীদোহনেন সোঽয়মবতার উশত্তমঃ কমনীয়তমঃ, 'বশ কান্তৌ' ইত্যস্মাৎ ॥

১৫। মৎস্যাবতারমাহ—রূপমিতি। চাক্ষুষমন্বন্তরে য উদধীনাং সংপ্লবঃ সংশ্লেষস্তস্মিন্। যদ্যপি মন্বন্তরাবসানে প্রলয়ো নাস্তি, তথাপি কেনচিৎ কৌতুকেন সত্যব্রতায় মায়া প্রদর্শিতা। যথা 'অকাণ্ডে[১] মার্কণ্ডেয়ায়' ইতি দ্রষ্টব্যম্। মহীময্যাং নাবি নৌকারূপায়াং মহ্যামিত্যর্থঃ। অপাৎ রক্ষিতবান্। বৈবস্বতমিতি ভাবিনী সংজ্ঞা ॥

১৬। কূর্ম্মাবতারমাহ—কমঠঃ কূর্ম্মস্তদ্রূপেণ ; একাদশে অবতারে বিভুর্দধ্রে দধার ॥

১৭। ধন্বন্তর্য্যবতারমাহ—ধান্বন্তরম্—ধন্বন্তরিরূপম্। দ্বাদশমাদি-প্রয়োগস্ত্বার্ষঃ। ত্রয়োদশমেব রূপং তচ্চরিতেন সহ দর্শয়তি—অপায়-য়দিতি। অত্র সুধামিত্যধ্যাহারঃ। মোহিন্যা স্ত্রিয়া রূপেণ অন্যানসুরান্ মোহয়ন্ ধন্বন্তরিরূপেণামৃতমানীয় মোহিন্যা অপায়য়দিত্যর্থঃ ॥

১৮। নৃসিংহাবতারমাহ—নারসিংহং রূপং বিভ্রৎ ; এরকা অগ্রন্থি-তৃণবিশেষঃ ॥

১। কালে (গ)।

১৯। বামনাবতারমাহ—পঞ্চদশমিতি। দুষ্টানাং মদং বামনয়তীতি বামনকং রূপং, হ্রস্বং রূপং, বা। প্রত্যাদিৎসুঃ তস্মাদাচ্ছিদ্য গ্রহীতুমিচ্ছুঃ॥

২০। পরশুরামাবতারমাহ—অবতার ইতি। ত্রিঃ ত্রিগুণং যথা ভবতি তথা, সপ্তকৃত্বঃ সপ্ত বারান্ একবিংশতিবারানিত্যর্থঃ॥

২১। ব্যাসাবতারমাহ—তত ইতি। অল্পমেধসঃ অল্পপ্রজ্ঞান্ পুংসো দৃষ্ট্বা তদনুগ্রহার্থং শাখাশ্চক্রে॥

২২। রামাবতারমাহ—নরেতি; নরদেবত্বং রাঘবরূপেণ প্রাপ্তঃ সন্, অতঃ পরমষ্টাদশে॥

২৩। রামকৃষ্ণাবতারমাহ—একোনেতি। বিংশতিতম ইতি বক্তব্যে তকারলোপশ্ছন্দোঽনুরোধেন। রামকৃষ্ণাবিত্যেবং নামনী জন্মনী প্রাপ্য॥

২৪। বুদ্ধাবতারমাহ—তত ইতি। অঞ্জনস্য সুতঃ; অজিনসুত[১] ইতি পাঠে অজিনোঽপি স এব। কীকটেষু মধ্যে গয়াপ্রদেশে॥

২৫। কল্ক্যবতারমাহ—অথেতি। যুগসন্ধ্যায়াং কলেরন্তে বিষ্ণুযশসো ব্রাহ্মণাৎ সকাশাৎ জনিতা জনিষ্যতে॥

২৬। অনুক্তসর্ব্বসংগ্রহার্থমাহ—অবতারা ইতি। অসংখ্যেয়ত্বে দৃষ্টান্তঃ—যথেতি। অবিদাসিনঃ উপক্ষয়[২]-শূন্যাৎ, 'দসু উপক্ষয়ে' ইত্যস্মাৎ। সরসঃ সকাশাৎ: কুল্যাঃ অল্প[৩]-প্রবাহাঃ॥

২৭। বিভূতীরাহ—ঋষয় ইতি॥

২৮। তত্র বিশেষমাহ—এতে চেতি। পুংসঃ পরমেশ্বরস্য কেচিদংশাঃ, কেচিৎ কলাঃ বিভূতয়শ্চ। তত্র মৎস্যাদীনামবতারত্বেন সর্ব্বজ্ঞত্বে সর্ব্বশক্তিমত্ত্বেঽপি যথোপযোগমেব জ্ঞানক্রিয়াশক্ত্যাবিষ্করণম্। কুমার-নারদাদিষ্বাধিকারিকেষু যথোপযোগমংশকলাবেশঃ, তত্র[৪] কুমারাদিষু জ্ঞানাবেশঃ, পৃথ্বাদিষু শক্ত্যাবেশঃ। কৃষ্ণস্তু সাক্ষাদ্ভগবান্ নারায়ণ এব, আবিষ্কৃত-

১। জিনসুতঃ (ঘ); ২। অপক্ষয়- (ঘ); ৩। ক্ষুদ্র- (ক, ঘ); ৪। তেষু (ঘ)।

সর্ব্বশক্তিত্বাৎ। সর্ব্বেষাং প্রয়োজনমাহ—ইন্দ্রারয়ো দৈত্যাঃ, তৈর্ব্যাকুলম্ উপদ্রুতং লোকং মৃড়য়ন্তি, সুখিনং কুর্ব্বন্তি॥

২৯। এতৎকীর্ত্তনফলমাহ—জন্মেতি। গুহ্যমতিরহস্যং জন্ম। প্রয়তঃ শুচিঃ সন্। দুঃখগ্রামাৎ সংসারাৎ॥

৩০—৩৪। বিমুচ্যতে ইতি যদুক্তং, তত্র কথং দেহদ্বয়সম্বন্ধে সতি তদ্বিমুক্তিঃ? ইত্যাশঙ্ক্য দেহদ্বয় সম্বন্ধস্ত ভগবন্মায়োত্থাবিদ্যাবিলসিতত্বাৎ এতচ্ছ্রবণাদিজনিতবিদ্যয়া তন্নিবৃত্তিরূপপদ্যতে ইত্যাশয়েনাহ—এতদ্রূপমিতি পঞ্চভিঃ। অরূপস্য চিদেকরসস্য আত্মনো জীবস্য এতৎ স্থূলং রূপং শরীরং ভগবতো যা মায়া তস্যা গুণৈর্মহদাদিরূপৈবিরচিতম্। ক? আত্মনি আত্মস্থানে। শরীরং কৃতমিত্যর্থঃ॥ (৩১) কথমিত্যপেক্ষায়াং স্বরূপাবরণেন তদধ্যাস্তত ইতি সদৃষ্টান্তমাহ—যথেতি। যথা বায়্বাশ্রিতো মেঘৌঘো নভসি আকাশে অবুদ্ধিভিরজ্ঞৈঃ আরোপিতঃ, যথা বা পার্থিবো রেণুস্তদ্গতং ধূসরত্বাদি অনিলে, এবং দ্রষ্টরি আত্মনি দৃশ্যত্বং দৃশ্যত্বাদিধর্ম্মকং শরীরমারোপিতমিত্যর্থঃ॥ (৩২) কিঞ্চ, অতঃ স্থূলাদ্রূপাৎ পরমন্যদপি রূপমারোপিতমিত্যনুষঙ্গঃ। কথম্ভূতং তৎ? যদব্যক্তং সূক্ষ্মম্। তত্র হেতুঃ—অব্যূঢ়গুণবৃংহিতম্, ব্যূঢ়ঃ করচরণাদিপরিণামঃ, তথা অব্যূঢ়াঃ অপরিণতা যে গুণাস্তৈর্গুণৈর্বৃংহিতং রচিতম্, আকারবিশেষরহিতত্বাদব্যক্তমিত্যর্থঃ। এতদেব কুতঃ? তত্রাহ—অদৃষ্টাশ্রুতবস্তুত্বাৎ। যত্তু আকারবিশেষবদ্বস্তু, তদস্মদাদিবদ্ দৃশ্যতে শ্রূয়তে বা ইন্দ্রাদিবৎ, ইদন্তু ন তথা। তর্হি তস্য সত্ত্বে কিং প্রমাণম্? তত্রাহ—স জীবঃ জীবোপাধিঃ। 'জীবো জীবেন নির্ম্মুক্তঃ', 'জীবো জীবং বিহায়' ইত্যাদৌ জীবোপাধৌ লিঙ্গদেহে জীবশব্দ-প্রয়োগাৎ জীবোপাধিতয়া কল্প্যত ইত্যর্থঃ। নন্ স্থূলমেব ভোগায়তনত্বাৎ জীবস্য উপাধিরস্তু, কিমন্যকল্পনয়া? ইত্যত আহ—যদ্যস্মাৎ সূক্ষ্মাৎ পুনর্ভবঃ পুনঃপুনর্জন্ম, উৎক্রান্তিগত্যাগতীনাং

তেন বিনা অসম্ভবাদিতি ভাবঃ ॥ (৩৩) তদেবমুপাধিদ্বয়মুক্ত্বা তদপবাদেন জীবস্য ব্রহ্মতামাহ—যত্রেতি। যত্র যদা ইমে স্থূলসূক্ষ্মরূপে স্বসংবিদা শ্রবণ-মননাদিভক্ত্যা স্বরূপসম্যগ্ জ্ঞানেন প্রতিষিদ্ধে ভবতঃ। জ্ঞানেন প্রতিষেধার্হত্বে তমেব হেতুমাহ—অবিদ্যয়া আত্মনি কৃতে কল্পিতে ইতি হেতোঃ। তদ্ ব্রহ্ম, তদা জীবো ব্রহ্মৈব ভবতীত্যর্থঃ। কথম্ভূতম? দর্শনং জ্ঞানৈকস্বরূপম্ ॥ (৩৪) তথাপি ভগবন্মায়ায়াঃ সংসৃতিকারণভূতায়া বিদ্যমানত্বাৎ কথং ব্রহ্মতা? তত্রাহ—যদীতি, যদীতি অসন্দেহে সন্দেহ-বচনং 'যদি বেদাঃ প্রমাণং স্যুঃ' ইতিবৎ। বৈশারদী বিশারদঃ সর্ব্বজ্ঞ ঈশ্বরঃ, তদীয়া দেবী সংসারচক্রেণ ক্রীড়ন্তী এষা মায়া যহ্যপরতা ভবতি। কিমিত্যুপরতা ভবেৎ? তত্রাহ—মতির্বিদ্যা। অয়ং ভাবঃ—যাবদেষাবিদ্যা আত্মনা আবরণবিক্ষেপৌ করোতি, তাবন্নোপরমতি। যদা তু সৈব বিদ্যারূপেণ পরিণতা, তদা সদসদ্রূপং জীবোপাধিং দগ্ধ্বা নিরিন্ধনাগ্নিবৎ স্বয়মেবোপরমেদিতি। তদা সম্পন্নঃ ব্রহ্মস্বরূপং প্রাপ্ত এবেতি বিদুঃ তত্ত্বজ্ঞাঃ। কিমতঃ? যদ্যেবং স্বে মহিম্নি পরমানন্দস্বরূপে মহীয়তে পূজ্যতে বিরাজত ইত্যর্থঃ ॥

৩৫। যথা জীবস্য জন্মাদি মায়া, এবমীশ্বরস্যাপি জন্মকর্ম্মাদি মায়েত্যাহ —এবমিতি। অকর্ত্তুঃ কর্ম্মাণি, অজনস্য জন্মানি, হৃৎপতেরন্তর্যামিণঃ ॥

৩৬। তর্হি জীবাদীশ্বরস্য কো বিশেষঃ? স্বাতন্ত্র্যমেব বিশেষ ইত্যাহ —স বা ইতি। ষাড়্বর্গিকম্ ইন্দ্রিয়ষড়্বর্গবিষয়ং জিঘ্রতি, দূরাদেব গন্ধবৎ গৃহ্লাতি, ন তু সজ্জত ইত্যর্থঃ। কুতঃ? ষড়্গুণেশঃ ষড়িন্দ্রিয়-নিয়ন্তা ॥

৩৭। ননু কিমীশ্বরস্য সৃষ্ট্যাদিকর্ম্মভিঃ বিষয়ভোগৈর্বা? তত্রাহ—ন চেতি। ধাতুঃ জগদ্বিধাতুঃ ঈশ্বরস্য ঊতীঃ লীলাঃ কুমনীষঃ কুবুদ্ধিঃ নিপুণেন তর্কাদিকৌশলেন ন অবৈতি, ন জানাতি। মনসা রূপাণি,

বচসা নামানি সন্তন্বতঃ সম্যক্ বিস্তারয়তঃ। বচোভিরিতি বহুবচনং শ্রুত্যভিপ্রায়েণ ; মনোবচোভিঃ সহেতি বা ॥

৩৮। ভক্তস্তু কথঞ্চিজ্জানাতীত্যাহ—স বেদেতি। অমায়য়া অকুটিল-ভাবেন সন্ততয়া নিরন্তরয়া অনুবৃত্ত্যা আনুকূল্যেন ভজেত ॥

৩৯। ভক্তিমার্গে প্রবৃত্তানৃষীনভিনন্দতি—অথেতি। যতো ভক্তা এব ভগবত্তত্ত্বং জানাতি, 'অথ অতো ভগবন্তঃ সর্ব্বজ্ঞাঃ ভবন্তো ধন্যাঃ কৃতার্থাঃ। কুতঃ ? যদ্ যস্মাদিত্থং প্রশ্নৈঃ বাসুদেবে আত্মভাবং মনোবৃত্তিং কুর্ব্বন্তি। সর্ব্বাত্মকমৈকান্তিকম্। যত্র যস্মিন্ ভাবে সতি ভূয়ঃ উগ্রো গর্ভবাসাদিদুঃখরূপঃ পরিবর্ত্তো জন্মমরণাত্মাবর্ত্তো ন ভবতি ॥

৪০। সূত ! কিমেতৎ শাস্ত্রম্ অপূর্ব্বং কথয়সি ? তত্রাহ—ইদমিতি। ব্রহ্মসম্মিতং সর্ব্ববেদতুল্যম্। উত্তমঃশ্লোকস্য চরিতং যস্মিন্ তৎ। ঋষির্ব্যাসঃ ॥

৪১। তৎসম্প্রদায়প্রবৃত্তিমাহ—তদিদমিতি। সুতং শুকম্, আত্মবতাং ধীরাণাং বরং মুখ্যম্ ॥

৪২। প্রায়েণ মৃত্যুপর্য্যন্তানশনেন উপবিষ্টমিতি পরমবৈরাগ্যোক্তিঃ ॥

৪৪। হে বিপ্রাঃ ! বিপ্রর্ষেঃ সকাশাদধ্যগমং জ্ঞাতবানস্মি। তত্র কীর্ত্তয়তঃ, তত্র নিবিষ্ট ইতি চান্বয়ভেদেন তত্রপদাবৃত্তিরদোষঃ। যথাধীতং, ন তু স্বমতিবিলসিতম্। তত্র তু যথামতি স্বমত্যনুসারেণ সংক্ষেপতঃ কথিতং বিস্তরেণ শ্রাবয়িষ্যামি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে
তৃতীয়োঽধ্যায়ঃ ॥ ৩ ॥

চতুর্থোঽধ্যায়ঃ

তুর্য্যে ভাগবতারম্ভ-কারণত্বেন বর্ণ্যতে।
ব্যাসস্যাপরিতোষস্তু তপঃ[১]-প্রবচনাদিভিঃ॥ (১)

১। ইতি এবং প্রসন্নতয়া শ্রাবয়িষ্যামীতি ব্রুবাণম্। মুনীনাং বহূনাং মধ্যে একেন বক্তব্যে যো বৃদ্ধঃ, বৃদ্ধেষপি বহুষু যঃ কুলপতিঃ গণমুখ্যঃ, তেষ্বপি বহুষু যো বহ্বৃচঃ ঋগ্বেদী, তেন বক্তব্যম্, অত এবম্ভূতত্বাৎ শৌনকঃ অব্রবীৎ॥

২। যৎ যাং কথামাহ॥

৩। কস্মিন্ বা স্থানে, কেন হেতুনেতি মহাভারতাদি-ধর্ম্মশাস্ত্রাণি কৃতবতঃ পুনরেতৎসংহিতাকরণে কিং কারণমিত্যর্থঃ। কুত ইতি সার্ব্ববিভক্তিকস্তসিঃ, কেন প্রবর্ত্তিত ইত্যর্থঃ। কৃষ্ণো ব্যাসঃ॥

৪—৫। যদুক্তং স তু সংশ্রাবয়ামাসেতি, তৎ শুকস্য ব্যাখ্যানাদিকং কথং ঘটিতমিতি প্রষ্টুং তস্যাসঙ্গোদাসীনতামাহ—তস্যেতি দ্বাভ্যাম্। সমদৃক্ সমং ব্রহ্ম পশ্যতীত্যতো নির্ব্বিকল্পকঃ, স্বার্থে কঃ, নিরস্তভেদঃ। কিঞ্চ, একস্মিন্নেব অন্তঃ সমাপ্তির্যস্যাঃ, তথাভূতা মতির্যস্য সঃ; যত উন্নিদ্রঃ মায়াশয়নাদুদ্বুদ্ধঃ, 'যা নিশা সর্ব্বভূতানাং তস্যাং জাগর্ত্তি সংযমী' ইতি স্মৃতেঃ; অতএব গূঢ়ঃ অপ্রকটঃ, মূঢ় ইব প্রতীয়তে॥ (৫) নির্ব্বিকল্পকত্বং প্রপঞ্চয়তি—দৃষ্ট্বেতি। আত্মজং শুকং, প্রব্রজন্তম্ অনুযান্তম্ অনুগচ্ছন্তম্, ঋষিং ব্যাসম্, অনগ্নমপি দৃষ্ট্বা জলে ক্রীড়ন্ত্যো দেব্যঃ অপ্সরসঃ হ্রিয়া লজ্জয়া পরিদধুঃ, বস্ত্রপরিধানং কৃতবত্যঃ। অনগ্নমপীত্যনেন অর্থাৎ তৎসুতো নগ্ন ইত্যুক্তম্। নগ্নস্য পুরতো গচ্ছতঃ সুতস্য তু হ্রিয়া ন পরিদধুঃ, তচ্চিত্রং

১। শ্রুত (ক)।

বীক্ষ্য। ইয়ং স্ত্রী অয়ং পুমানিতি ভিদা ভেদস্তবাস্তি সুতস্ত পুনর্ভেদমতির্নাস্তি। বিবিক্তা পূতা দৃষ্টির্যস্য ॥

৬। এবম্ভূতোঽসৌ কথমালক্ষিতঃ জ্ঞাতঃ? কুরবো জাঙ্গলাশ্চ দেশবিশেষাঃ, তান্ সম্প্রাপ্তঃ প্রথমম্। ততো গজসাহ্বয়ে বিচরন্, গজেন সহিত আহ্বয়ো নাম যস্য তস্মিন্ হস্তিনাপুরে, হস্তী নাম রাজা, তেন নির্ম্মিতত্বাৎ ॥

৭। এবম্ভূতেন মুনিনা সহ। যত্র সংবাদে এষা সাত্বতী ভাগবতী শ্রুতিঃ সংহিতা ॥

৮। এতদ্ব্যাখ্যানং বহুকালাবস্থানাপেক্ষম্, তস্য ত্বেকত্রাবস্থানং দুর্লভমিত্যাহ—স ইতি। গোদোহনমাত্রং কালং প্রতীক্ষতে, তদপি ন ভিক্ষার্থং, কিন্তু তেষামাশ্রমং গৃহং তীর্থীকুর্ব্বন্ পবিত্রীকুর্ব্বন্। তস্মাদেবম্ভূতোঽত্র বক্তেত্যাশ্চর্য্যম্ ॥

৯—১৩। শ্রোতুস্তু চরিতমতীবাশ্চর্য্যম্, অতঃ কথয়েত্যাহ—অভিমন্যুসুতং সূত ইতি পঞ্চভিঃ। গৃণীহি কথয় ॥ (১০) সম্রাট্ চক্রবর্ত্তী। বেতি বিতর্কে, কস্য বা হেতোঃ কস্মাৎ কারণাৎ। অধিরাট্ ক্বিবন্তঃ। অধিরাজাং শ্রিয়ং সম্পদমনাদৃত্য ॥ (১১) যস্য পাদনিকেতং চরণপীঠম্; হ স্ফুটম্; ধনান্যানীয় শত্রবো নমন্তি। অঙ্গ! হে সূত! যুবা তরুণ এব ঐষত ঐচ্ছৎ; অত্রার্ষমাত্মনেপদম্। অসুভিঃ প্রাণৈঃ সহ ॥ (১২) বিরক্তস্য কিং ধনাদিভিরিতি চেৎ, তত্রাহ—শিবায়েতি। লোকস্য শিবায় সুখায়, ভবায় সমৃদ্ধ্যৈ, ভূতয়ে ঐশ্বর্য্যায় চ তে জীবন্তি, ন ত্বাত্মার্থম্। এবং সত্যসৌ রাজা নির্ব্বিদ্য বিরজ্যাপি পরেষামাশ্রয়ং কলেবরং কুতো হেতোর্মুমোচ? ন হি পরোপজীবনং স্বয়ং ত্যক্তুমুচিতমিত্যর্থঃ ॥ (১৩) যৎ কিঞ্চন পৃষ্টোঽসি, তৎ সর্ব্বং নোঽস্মভ্যং সমাচক্ষ্ব, যদ্ যস্মাৎ বাচাং

বিষয়ে গিরাং গোচরেঽর্থে স্নাতং পারং গতং ত্বাং মন্যে। ছান্দসাদন্যত্র বৈদিক-ব্যতিরেকেণাত্রৈবর্ণিকত্বাৎ ॥

১৪। কস্মিন্ যুগে ইত্যাদিপ্রশ্নানাং ব্যাসজন্ম কথনপূর্ব্বকমুত্তরমাহ—দ্বাপরে সমনুপ্রাপ্তে। কদেত্যপেক্ষায়ামাহ—তৃতীয়ে যুগস্য পর্য্যায়ে পরিবর্ত্তে। বাসব্যামুপরিচরস্য বসোর্বীর্য্যাজ্জাতায়াং সত্যবত্যাং যোগী জ্ঞানী ব্যাসো জাতঃ ॥

১৫। জলমুপস্পৃশ্য জলে স্নানাদিকং কৃত্বেত্যর্থঃ। আসীনো বভূবেতি শেষঃ। বিবিক্তে দেশে ইত্যাদি চিত্তৈকাগ্র্যার্থমুক্তম্ ; অনেনৈব বদরিকাশ্রমং স্থানং সূচিতম্ ॥

১৬—১৮। তত্র চ বসন্ স ঋষির্যুগধর্ম্মব্যতিকরাদিকং বীক্ষ্য সর্ব্ববর্ণাশ্রমাণাং যদ্ধিতং, তদ্ দধ্যাবিতি তৃতীয়েনান্বয়ঃ। পরাবরজ্ঞঃ অতীতানাগতবিৎ। অব্যক্তং রংহো বেগো যস্য তেন কালেন যুগধর্ম্মাণাং ব্যতিকরং সঙ্করং প্রাপ্তং বীক্ষ্য ; তথা ভুবি যুগে যুগে॥ (১৭) ভৌতিকানাং ভাবানাং শরীরাদীনাম্ ; তৎকৃতং কালকৃতম্ ; নিঃসত্ত্বান্ ধৈর্য্যশূন্যান্ দুর্ম্মেধান্ মন্দমতীন্ ; হ্রসিতমায়ুস্তেজো যেষাং তান্॥ (১৮) অমোঘদৃক্—সর্ব্বজ্ঞানসম্পন্নঃ ॥

১৯। ততশ্চ হোত্রোপলক্ষিতাশ্চত্বার ঋত্বিজশ্চতুর্হোতারঃ, তৈরনুষ্ঠেয়ং চাতুর্হোত্রং কর্ম্ম, শুদ্ধং শুদ্ধিকরম্, যজ্ঞসন্তত্যৈ যজ্ঞানামবিচ্ছেদায় ॥

২০। চাতুর্বিধ্যমেবাহ—ঋগিতি। উদ্ধৃতাঃ—পৃথক্কৃতাঃ ॥

২১। নিষ্ণাতঃ পারং গতঃ ॥

২২। দারুণঃ, অথর্ব্বোক্তাভিচারাদিপ্রবৃত্তেঃ ॥

২৩। শাখাবিভাগমাহ—ত এত ইতি। ব্যস্যন্—বিভক্তবন্তঃ ॥

২৪। বেদবিভাগ-প্রয়োজনমাহ—ত এবেতি। যে পূর্ব্বমতিমেধাবিভির্ধার্য্যন্তে স্ম, ত এব ॥

২৫। কিঞ্চ, স্ত্রীশূদ্রেতি। দ্বিজবন্ধবস্ত্রৈবর্ণিকেষ্বধমাস্তেষাম্। কর্ম্ম-রূপে শ্রেয়সি, শ্রেয়ঃসাধনেন. এবং ভবেৎ, অনেনৈব প্রকারেণ শ্রেয়ো ভবত্বিতি; অতএব তেষাং কৃপয়া ভারতাখ্যানং মুনিনা কৃতম্॥

২৬। এবমনেন প্রকারেণ ভূতানাং শ্রেয়সি হিতে। সর্ব্বাত্মকেনা-প্যনেকোদ্দেশবতাপি কর্ম্মণা॥

২৭। নাতিপ্রসীদৎ হৃদয়ং যস্য সঃ। চিত্তাপ্রসত্তৌ হেতুং বিতর্কয়ন্ ইদমুবাচ স্বগতম্॥

২৮। নির্ব্যলীকেন নিষ্কপটবুদ্ধ্যা মানিতাঃ পূজিতাঃ॥

৩০। দৈহ্যো দেহে ভবঃ, আত্মা জীবঃ, বস্তুতো বিভুঃ পরিপূর্ণ এব, আত্মনা স্বেন রূপেণাসম্পন্নস্তাদাত্ম্যমপ্রাপ্ত ইবাভাতি। ব্রহ্মবর্চ্চসং ব্রহ্মণঃ বেদস্য শ্রবণাধ্যাপনোৎকর্ষজং তেজস্তত্র সাধবো ব্রহ্মবর্চ্চস্যাস্তেষু সত্তমোঽতিশ্রেষ্ঠোঽপি; যদ্বা, ন কেবলমসম্পন্ন ইবাভাতি, প্রত্যুত ব্রহ্মবর্চ্চসী ব্রহ্মবর্চ্চসবানপি অসত্তম ইবাভাতি। ব্রহ্মবর্চ্চস্যুশত্তম ইতি পাঠে কমনীয়-তমোঽপীতি॥

৩১। অসম্পত্তৌ হেতুং স্বয়মেবাশঙ্কতে—কিং বেতি। প্রায়েণ ভূয়স্ত্বেন। হি যস্মাৎ, ত এব ধর্ম্মা অচ্যুতস্য প্রিয়াঃ॥

৩২। খিলং ন্যূনম্। খিন্নতঃ খেদং প্রাপ্নবতঃ, কৃষ্ণস্য ব্যাসস্য, প্রাগুদাহৃতং সরস্বতীতীরস্থম্॥

৩৩। তং নারদমাগতমভিজ্ঞায় সহসা প্রত্যুত্থায় বিধিবৎ পূজয়ামাস, সুরপূজিতমিতি ব্রহ্মলোকাদাগতমিত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং প্রথমস্কন্ধে চতুর্থোঽধ্যায়ঃ॥ ৪॥

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে সর্ব্বধর্ম্মেভ্যো হরিকীর্ত্তনগৌরবম্।
ব্যাসচিত্তপ্রসাদায় নারদেনোপদিশ্যতে ॥ (১)

১। উপ সমীপে আসীনং বিপ্রর্ষিং ব্যাসম্, বৃহচ্ছ্রবা মহাযশাঃ; স্ময়ন্ ঈষদ্ধসন্, ইবেত্যনেন মুখপ্রসত্তির্দ্যোত্যতে। যদ্বা, ইবেত্যনধি[১]-কারার্থম্। অহো মহানপি মুহ্যতীতি স্ময়মানঃ ॥

২। শারীরঃ শরীরাভিমানী আত্মা, আত্মনা তেন শরীরেণ কচ্চিৎ কিং পরিতুষ্যতি? মানস আত্মা মনোঽভিমানী, তেন মনসা পরিতুষ্যতি কচ্চিন্নো বা?

৩। তে জিজ্ঞাসিতং জ্ঞাতুমিষ্টং ধর্ম্মাদি যত্তৎ সর্ব্বং সুসম্পন্নং সম্যগ্ জ্ঞাতম্, অপি শব্দাদনুষ্ঠিতঞ্চেত্যর্থঃ। অয়ীতি পাঠে সম্বোধনম্। সুসম্পন্নত্বে হেতুঃ—মহদদ্ভুতমিত্যাদি। সর্ব্বৈরর্থৈর্ধর্ম্মাদিভিঃ পরিবৃংহিতং পরিপূর্ণম্ ॥

৪। কিঞ্চ, যৎ সনাতনং নিত্যং[২] পরং ব্রহ্ম, তচ্চ ত্বয়া জিজ্ঞাসিতং বিচারিতম্; অধীতম্ অধিগতং প্রাপ্তঞ্চেত্যর্থঃ; তথাপি শোচসি, তৎ কিমর্থমিতি শেষঃ ॥

৫। আত্মা শারীরো মানসশ্চ: তন্মূলং তস্যাপরিতোষস্য কারণম্; অব্যক্তম্ অস্ফুটম্। হে নারদ! ত্বা ত্বাং পৃচ্ছাম। আত্মভবো ব্রহ্মা, তস্যাত্মনো দেহাদুদ্ভূতস্ত্বম্, অতএবাগাধোঽতিগম্ভীরো বোধো যস্য তং ত্বাম্ ॥

৬—৭। অগাধবোধতাং প্রপঞ্চয়ন্নাহ—স বা ইতি দ্বাভ্যাম্। সর্ব্বগুহ্য-জ্ঞানে হেতুঃ—যদ্ যস্মাৎ পুরাণঃ পুরুষঃ উপাসিতস্ত্বয়া। স কথম্ভূতঃ? পরাবরেশঃ কার্য্যকারণ-নিয়ন্তা, মনসৈব সঙ্কল্পমাত্রেণ, গুণৈঃ কৃত্বা বিশ্বং

১। ইবেত্যনেন অধিকার্থম্ (ক); ২। সত্যং (গ)।

সৃজতীত্যাদি ॥ (৭) কিঞ্চ ত্বং ত্রিলোকীং পর্য্যটন্নর্ক ইব সর্ব্বদর্শী ; যোগবলেন প্রাণবায়ুরিব সর্ব্বপ্রাণিনামন্তশ্চরঃ সন্নাত্মসাক্ষী বুদ্ধিবৃত্তিজ্ঞঃ। অতঃ পরে ব্রহ্মণি ধর্ম্মতো যোগেন নিষ্ণাতস্য ; তদুক্তং যাজ্ঞবল্ক্যেন—'ইজ্যাচারদয়া-হিংসা-দান-স্বাধ্যায়-কর্ম্মণাম্। অয়ন্তু পরমো ধর্ম্মো যদ্‌যোগেনাত্মদর্শনম্ ॥' ইতি। অবরে চ ব্রহ্মণি বেদাখ্যে, ব্রতৈঃ স্বাধ্যায়নিয়মৈর্নিষ্ণাতস্ত মেঽলমত্যর্থং যৎ ন্যূনং, তদ্বিচক্ষ্ব বিচারয়[১] ॥

৮। অনুদিতপ্রায়ম্ অনুক্তপ্রায়ম্। বিমলং ভগবদ্‌যশো বিনা যেনৈব ধর্ম্মাদিজ্ঞানেন অসৌ ভগবান্ ন তুষ্যেত, তদেব দর্শনং জ্ঞানং খিলং ন্যূনং মন্যে ॥

৯। ননু ভগবদ্‌যশ এব তত্র তত্রানুবর্ণিতম্, তত্রাহ—যথেতি। চ-শব্দাদ্ধর্ম্মাদি-সাধনানি চ। তথা ধর্ম্মাদিবৎ প্রাধান্যেন বাসুদেবস্য মহিমা ন হ্যুক্ত ইত্যর্থঃ ॥

১০। বাসুদেবব্যতিরিক্তান্যবিষয়জ্ঞানবদেবান্যবিষয়ং বাক্‌চাতুর্য্যঞ্চ খিলমেবেত্যাহ—নেতি। চিত্রপদমপি যদ্বচো হরের্যশো ন প্রগৃণীত, তদ্‌বায়সং তীর্থং কাকতুল্যানাং কামিনাং রতিস্থানমুশন্তি মন্যন্তে। কুতঃ? মানসাঃ সত্ত্বপ্রধানে মনসি বর্ত্তমানা হংসা যতয়ো যত্র ন নিরমন্তি, কর্হিচিদপি নিতরাং ন রমন্তে। উশিক্‌ক্ষয়া উশিক্ কমনীয়ং ব্রহ্ম ক্ষয়ো নিবাসো যেষাং তে। যথা প্রসিদ্ধা হংসাঃ মানসে সরসি চরন্তঃ কমনীয়-পদ্মষণ্ডনিবাসাঃ ত্যক্তবিচিত্রান্নাদিযুক্তেঽপি উচ্ছিষ্টগর্ত্তে কাকক্রীড়াস্থানে ন নিরমন্তে ইতি শ্লেষঃ ॥

১১। বিনাপি পদচাতুর্য্যং ভগবদ্‌যশঃপ্রধানং বচঃ পবিত্রমিত্যাহ—তদ্বাগ্‌বিসর্গ ইতি। স চাসৌ বাগ্‌বিসর্গশ্চ বাচঃ প্রয়োগঃ, জনানাং সমূহো

১। বিতর্কয় (ক, ঘ)।

জনতা, তস্যা অঘং বিপ্লাবয়তি নাশয়তীতি তথা। যস্মিন্ বাগ্বিসর্গেঽবদ্ধবত্যপি অপশব্দাদিযুক্তেঽপি প্রতিশ্লোকমনন্তস্য যশসা অঙ্কিতানি নামানি ভবন্তি। তত্র হেতুঃ—যৎ যানি নামানি সাধবো মহান্তঃ বক্তরি সতি শৃণ্বন্তি, শ্রোতরি সতি গৃণন্তি; অন্যদা তু স্বয়মেব গায়ন্তি কীর্ত্তয়ন্তীতি॥

১২। ভক্তিহীনং কর্ম্ম তাবৎ শূন্যমেবেতি[১] কৈমুতিকন্যায়েন দর্শয়তি—নৈষ্কর্ম্যমিতি; নিষ্কর্ম্ম ব্রহ্ম, তদেকাকারত্বান্নিষ্কর্ম্মতারূপং নৈষ্কর্ম্ম্যম্। অজ্যতে অনেন ইত্যঞ্জনমুপাধিস্তন্নিবর্ত্তকং নিরঞ্জনম্। এবম্ভূতমপি জ্ঞানম্, অচ্যুতে ভাবো ভক্তিস্তদ্বর্জ্জিতং চেৎ অলমত্যর্থং ন শোভতে, সম্যগপরোক্ষায় ন কল্পতে ইত্যর্থঃ। তদা শশ্বৎ সাধনকালে ফলকালে চ অভদ্রং দুঃখরূপং যৎ কাম্যং কর্ম্ম, যদপ্যকারণমকাম্যং তচ্চেতি চকারস্যান্বয়ঃ। তদপি কর্ম্ম ঈশ্বরে নার্পিতং চেৎ, কুতঃ পুনঃ শোভতে, বহির্ম্মুখত্বেন সত্ত্বশোধকত্বাভাবাৎ?

১৩। তদেবং ভক্তিশূন্যানি জ্ঞান-বাক্‌চাতুর্য্য-কর্ম্মকৌশলানি ব্যর্থান্যেব যতঃ, অতো হরেশ্চরিতমেবানুবর্ণয়েত্যাহ—অথো ইতি; অথো অতঃ কারণাদমোঘা যথার্থা দৃক্ ধীর্যস্য। শুচি শুদ্ধং শ্রবো যশো যস্য; সত্যে রতঃ; ধৃতানি ব্রতানি যেন; স ভবান্ এবং মহাগুণস্তাবৎ; অত উরুক্রমস্য বিবিধং চেষ্টিতং লীলাং সমাধিনা চিত্তৈকাগ্র্যেণ অখিলস্য বন্ধস্য মুক্তয়ে ত্বমনুস্মর স্মৃত্বা বর্ণয়েত্যর্থঃ। এতচ্চ বাক্যান্তরমিতি মধ্যমপুরুষপ্রয়োগো নানুপপন্নঃ॥

১৪। বিপক্ষে দোষান্তরমাহ—তত ইতি; তত উরুক্রমবিচেষ্টিতাৎ পৃথগ্‌দৃশঃ, অতএবান্যথা প্রকারান্তরেণ যৎ কিঞ্চিদর্থান্তরং বিবক্ষতঃ, তয়া বিবক্ষয়া কৃতৈঃ স্ফুরিতৈঃ রূপৈঃ নামভিশ্চ বক্তব্যত্বেনৈবোপস্থিতৈঃ দুঃস্থিতা অনবস্থিতা সতী, মতিঃ কদাচিৎ ক্বাপি বিষয়ে আস্পদং স্থানং ন লভেত,

---

১। বন্ধনমেবেতি (গ)।

বাতেনাহতা আঘূর্ণিতা নৌরিব। তদুক্তং গীতাসু—'ব্যবসায়াত্মিকা বুদ্ধিরেকেহ কুরুনন্দন! বহুশাখা হ্যনন্তাশ্চ বুদ্ধয়োঽব্যবসায়িনাম্ ॥' ইত্যাদি ॥

১৫। তদেবং হরিযশো বিনা ভারতাদিষু কৃতং ধর্ম্মাদিবর্ণনম্ অকিঞ্চিৎকরমিত্যুক্তম্, প্রত্যুত বিরুদ্ধমেব জাতমিত্যাহ—জুগুপ্সিতমিতি; জুগুপ্সিতং নিন্দ্যং কাম্যকর্ম্মাদি। স্বভাবত এব রক্তস্য, তত্র রাগিণঃ পুরুষস্য ধর্ম্মকৃতে ধর্ম্মার্থমনুশাসতস্তব মহানয়ং ব্যতিক্রমঃ অন্যায়ঃ। কুতঃ? ইত্যত আহ- যস্য বাক্যতোঽয়মেব মুখ্যো ধর্ম্ম ইতি স্থিত ইতরঃ প্রাকৃতো জনঃ, তস্য কাম্যকর্ম্মাদেঃ অন্যেন তত্ত্বজ্ঞেন ক্রিয়মাণং নিবারণং স্বয়মেব বা ত্বয়া ক্রিয়মাণম্; যদ্বা, 'ন কর্ম্মণা ন প্রজয়া ধনেন ত্যাগেনৈকেন অমৃতত্ব-মানশুঃ'ইত্যাদিশ্রুত্যা ক্রিয়মাণং নিবারণং যথার্থমেতদিতি ন মন্যতে; কিন্তু প্রবৃত্তিমার্গানধিকৃতবিষয়ং তদিতি কল্পয়তি। তদুক্তং মতান্তরোপন্যাসে ভট্টৈঃ—'তত্রৈবং শক্যতে বক্তুং যেঽন্ধপঙ্গ্বাদয়ো নরাঃ। গৃহস্থত্বং ন শক্যন্তে কর্ত্তুং তেষাময়ং বিধিঃ ॥ নৈষ্ঠিকং ব্রহ্মচর্য্যং বা পরিব্রাজকতাপি বা। তৈরবশ্যং গ্রহীতব্যা তেনাদাবেতদুচ্যতে ॥' ইত্যাদি ॥

১৬। নন্বু যদ্যেবং প্রবৃত্তিমার্গো নিন্দ্যতে, তর্হি নিবৃত্তিমার্গে সর্ব্বক্রিয়া-ত্যাগেনৈব পারমেশ্বরসুখস্বরূপানুভূতেঃ কিং তদ্যশঃকথনেনাপি? তত্রাহ—বিচক্ষণ ইতি; বিচক্ষণোঽতিনিপুণঃ কশ্চিদেব নিবৃত্তিতঃ সর্ব্বক্রিয়া-নিবৃত্ত্যা অস্য বিভোঃ সুখং নির্ব্বিকল্পকসুখাত্মকং স্বরূপং বেদিতুং জ্ঞাতু-মর্হতি, ন পুনরবিচক্ষণঃ। প্রবৃত্তিঃ স্বভাবঃ। বিভুত্বে হেতুঃ—ন অন্তঃ কালতঃ, পারঞ্চ দেশতো যস্য তস্য বিভোশ্চেষ্টিতম্। ততঃ কারণাৎ হে বিভো! অনাত্মনো দেহাদ্যভিমানিনঃ, অতএব গুণৈঃ সত্ত্বাদিভিঃ প্রবর্ত্ত-মানস্য জনস্য দর্শয় ভবানিতি ত্বমিত্যর্থঃ। ভবন্নিতি পাঠে তু সম্বোধনম্ ॥

১৭। এবং তাবৎ কাম্যকর্ম্মাদেরনর্থহেতুত্বাত্তং বিহায় হরের্লীলৈব বর্ণনীয়েত্যুক্তম্। ইদানীন্তু নিত্যনৈমিত্তিকস্বধর্ম্মনিষ্ঠামপি অনাদৃত্য কেবলং হরিভক্তিরেবোপদেষ্টব্যেত্যাশয়েনাহ—ত্যক্ত্বেতি। নন্বু স্বধর্ম্মত্যাগেন ভজন্

ভক্তিপরিপাকেণ যদি কৃতার্থো ভবেৎ, তদা ন কাচি[১]-চ্চিন্তা ; যদি পুনরপক্ক এব ম্রিয়েত, ততো ভ্রশ্যেদ্বা তদা চ স্বধর্ম্মত্যাগনিমিত্তোঽনর্থঃ স্যাদিত্যা-শঙ্ক্যাহ—ততো ভজনাৎ পতেৎ কথঞ্চিদ্‌ভ্রশ্যেৎ ম্রিয়েত বা যদি, তথাপি[২] ভক্তিরসিকস্য কর্ম্মানধিকারাৎ নানর্থশঙ্কা। অঙ্গীকৃত্যাপ্যাহ—বা-শব্দঃ কটাক্ষে। যত্র ক্ব বা নীচযোনাবপি, অমুষ্য ভক্তিরসিকস্য অভদ্রমভূৎ কিম্? নাভূদেবেত্যর্থঃ, ভক্তিবাসনাসদ্ভাবাদিতি ভাবঃ। অভজদ্ভিস্তু কেবলং স্বধর্ম্মতঃ কো বা অর্থঃ আপ্তঃ প্রাপ্তঃ? অভজতামিতি ষষ্ঠী তু সম্বন্ধমাত্রবিবক্ষয়া ॥

১৮। ননু স্বধর্ম্মমাত্রাদপি 'কর্ম্মণা পিতৃলোকঃ' ইতি শ্রুতেঃ পিতৃলোকপ্রাপ্তিঃ ফলমস্ত্যেব, তত্রাহ—তস্যৈতি। কোবিদো বিবেকী, তস্যৈব হেতোস্তদর্থং যত্নং কুর্য্যাৎ, যৎ উপরি ব্রহ্মলোকপর্য্যন্তম্, অধঃ স্থাবরপর্য্যন্তঞ্চ ভ্রমদ্ভির্জীবৈর্ন লভ্যতে ; ষষ্ঠী তু পূর্ব্ববৎ ; ভগবদ্ভক্তিসুখার্থমেব প্রযতেত, তস্য দুর্লভত্বাদিত্যর্থঃ। তৎ তু বিষয়সুখমন্যত এব প্রাচীন-স্বকর্ম্মণা সর্ব্বত্র নরকাদাবপি লভ্যতে। দুঃখবৎ, যথা দুঃখং প্রযত্নং বিনাপি লভ্যতে, তদ্বৎ। তদুক্তম্—'অপ্রার্থিতানি দুঃখানি যথৈবায়ান্তি দেহিনাম্। সুখান্যপি তথা মন্যে দৈবমত্রাতিরিচ্যতে ॥' ইতি ॥

১৯। যদুক্তং যত্র ক্ব বা অভদ্রমভূদিতি, তদুপপাদয়তি—ন বৈ ইতি। মুকুন্দসেবী জনঃ জাতু কদাচিৎ কথঞ্চন কুযোনিং গতোঽপি সংসৃতিং নাব্রজেৎ, নাবিশেৎ। অঙ্গ! অহো, অন্যবৎ কেবলকর্ম্ম-নিষ্ঠবৎ, ইতি বৈধর্ম্ম্যে দৃষ্টান্তঃ। কুতঃ? ইত্যত আহ—মুকুন্দাঙ্ঘ্র্যুপ-গূহনমালিঙ্গনং পুনঃ স্মরন্ বিহাতুং নেচ্ছেৎ, যতোঽয়ং জনো রসগ্রহো রসেন রসনীয়েন গৃহ্যতে বশীক্রিয়তে ; যদ্বা, রসে রসনীয়ে গ্রহ আগ্রহো

১। কদাচিৎ (ক, খ, গ); ২। তদাপি (ঘ)।

যস্য। তদুক্তং ভগবতা—'যততে চ ততো ভূয়ঃ সংসিদ্ধৌ কুরুনন্দন! পূর্ব্বাভ্যাসেন তেনৈব হ্রিয়তে হ্যবশোঽপি সঃ॥' ইতি॥

২০। তদেবং ভগবল্লীলাং প্রাধান্যেনানুবর্ণয় ইত্যুক্তম্; তত্র কো ভগবান্, কা চ তস্য লীলা? ইত্যপেক্ষায়ামাহ—ইদং বিশ্বং ভগবানেব, স তু অস্মাদ্‌বিশ্বস্মাদিতরঃ। ঈশ্বরাৎ প্রপঞ্চো ন পৃথক্, ঈশ্বরস্তু প্রপঞ্চাৎ পৃথগিত্যর্থঃ। তত্র হেতুঃ—যতো ভগবতো হেতোর্জগতঃ স্থিত্যাদয়ো ভবন্তি, অনেনৈব লীলাপি দর্শিতা। যদ্বা, ইদং বিশ্বং ভগবান্, ইতর ইব যঃ স জীবোঽপি ভগবান্, চেতনাচেতনপ্রপঞ্চস্তদ্ব্যতিরেকেণ নাস্তি, স এবৈকস্তত্ত্বমিত্যর্থঃ। হি-শব্দেন 'সর্ব্বং খল্বিদং ব্রহ্ম' ইত্যাদি শ্রুতিপ্রমাণং সূচিতম্। তদ্ধি স্বয়মেব ভবান্ বেদ; প্রাদেশমাত্রমেকদেশমাত্রম্ 'আচার্য্যবান্ পুরুষো বেদ' ইত্যাদি শ্রুত্যর্থসম্পাদনায় প্রদর্শিতম্॥

২১। ন চ তবাচার্য্যাপেক্ষাপি ঈশ্বরাবতারত্বাদিত্যাহ—ত্বমিতি। হে অমোঘদৃক্! ত্বমাত্মনা স্বয়মাত্মানমজমেব সন্তং জগতঃ শিবায় প্রজাতমবেহি। কুতঃ? পরস্য পুংসঃ কলামংশভূতম্। তৎ তস্মাৎ মহানুভাবস্য হরেরভ্যুদয়ঃ পরাক্রমোঽধি অধিকং গণয়তাং নিরূপ্যতাম্॥

২২। অনেনৈব তপ-আদি সর্ব্বং তব সফলং স্যাদিত্যাহ—ইদমিতি। শ্রুতাদয়ো ভাবে নিষ্ঠা। ইদমেব হি তপঃশ্রবণাদেরবিচ্যুতো নিত্যঃ অর্থঃ ফলম্। কিং তৎ? উত্তমঃশ্লোকস্য গুণানুবর্ণনমিতি যৎ॥

২৩। সৎসঙ্গতো হরিকথাশ্রবণাদিফলং স্ববৃত্তান্তেন প্রপঞ্চয়তি—অহমিতি। অহং পুরা পূর্ব্বকল্পেঽতীতভবে পূর্ব্বজন্মনি বেদবাদিনাং দাস্যাঃ সকাশাৎ অভবং জাতোঽস্মি। নিরূপিতঃ নিযুক্তঃ। ক? যোগিনাং শুশ্রূষণে। প্রাবৃষি বর্ষোপলক্ষিতে চাতুর্ম্মাস্যে। নির্ব্বিবিক্ষতাং নির্ব্বেশমেকত্র বাসং কর্ত্তুমিচ্ছতাম্॥

২৪। অপেতানি গতানি অখিলানি চাপলানি যস্মাৎ তস্মিন্। দান্তে নিয়তেন্দ্রিয়ে। অধৃতক্রীড়নকে ত্যক্তক্রীড়াসাধনকে। অনুবর্ত্তিনি অনুকূলে॥

২৫। উচ্ছিষ্টস্য লেপান্ ভিক্ষাপাত্রলগ্নান্ তৈর্দ্বিজৈরনুজ্ঞাতঃ সন্ ভুঞ্জে স্ম। তেন ভোজনেন অপাস্তকিল্বিষো জাতোঽস্মি। তেষাং ধর্ম্মে পরমেশ্বরভজন এব আত্মনো মনসো রুচিঃ প্রজায়তে স্মেত্যনুষঙ্গঃ॥

২৬। অশৃণবং শ্রুতবানস্মি। মে শ্রদ্ধয়া মমৈব স্বতঃসিদ্ধয়া, ন ত্বন্যেন বলাজ্জনিতয়া, অতো মমেত্যস্যাপৌনরুক্ত্যম্। অনুপদং প্রতিপদম্। প্রিয়ং শ্রবো যশো যস্য, তস্মিন্॥

২৭। প্রিয়ং শ্রবো যস্য তস্মিন্ ভগবতি লব্ধরুচের্মম অস্খলিতা অপ্রতিহতা মতিরভবদিত্যনুষঙ্গঃ। যয়া মত্যা পরে প্রপঞ্চাতীতে ব্রহ্মরূপে ময়ি সদসৎ স্থূলং সূক্ষ্মঞ্চ এতচ্ছরীরং স্বমায়য়া স্বাবিদ্যয়া কল্পিতং, ন তু বস্তুতোঽস্তীতি তৎক্ষণমেব পশ্যে পশ্যামি॥

২৮। এবং শুদ্ধে ত্বম্পদার্থে জ্ঞাতে দেহাদিকৃতবিক্ষেপ-নিবৃত্তেস্তৎ-কারণভূতরজস্তমোনিবর্ত্তিকা দৃঢ়া ভক্তির্জাতেত্যাহ—ইত্থমিতি। হরের্যশঃ। অনুসবং ত্রিকালম্॥

২৯। তস্যৈবমিতি—তস্য জ্ঞাত-শুদ্ধত্বম্পদার্থস্য দৃঢ়ভক্তিমতো মে প্রশ্রিতস্য বিনীতস্য॥

৩০। গুহ্যতমমিতি—সাধনভূতধর্ম্মতত্ত্বজ্ঞানং গুহ্যম্, তৎসাধ্যং বিবিক্তাত্মজ্ঞানং গুহ্যতরম্, তৎ-প্রাপ্যেশ্বরজ্ঞানং গুহ্যতমম্। ভগবতোদিতং ভাগবতং শাস্ত্রম্, অন্ববোচন্ উপদিষ্টবন্তঃ॥

৩১। তদেব জ্ঞানং পূর্ব্বোক্তত্বম্পদার্থ-জ্ঞানাদ্বিবেকেন দর্শয়তি—যেনৈবেতি। অবিদং জ্ঞাতবানহম্॥

৩২। তৎসাধনধর্ম্মরহস্যঞ্চ সূচিতমিত্যাহ—এতদিতি। তাপত্রয়স্য আধ্যাত্মিকাদেশ্চিকিৎসিতং ভেষজং তন্নিবর্ত্তকং সত্ত্বশোধকমিতি যাবৎ।

কিং তৎ? ভগবতি ভাবিতং সমর্পিতং যৎ কর্ম্ম তৎ। কথম্ভূতে ভগবতি? ঈশ্বরে সর্ব্বনিয়ন্তরি, এবমপি চ ব্রহ্মণি অপ্রচ্যুতপূর্ণরূপে॥

৩৩—৩৪। নন্বু সংসারহেতোঃ কর্ম্মণঃ কথং তাপত্রয়নিবর্ত্তকত্বম্? সামগ্রীভেদেন ঘটত ইতি সদৃষ্টান্তমাহ দ্বাভ্যাম্। যশ্চাময়ো রোগো যেন ঘৃতাদিনা জায়তে, তদেব কেবলমাময়কারণভূতং দ্রব্যং তমাময়ং ন পুনাতি, ন নিবর্ত্তয়তীত্যর্থঃ; কিন্তু চিকিৎসিতং দ্রব্যান্তরৈর্ভাবিতং সৎ পুনাত্যেব যথা; (৩৪) তথা আত্মবিনাশায় কর্ম্মনিবৃত্তয়ে কল্পন্তে সমর্থা ভবন্তি, পরে ঈশ্বরে কল্পিতা অর্পিতাঃ সন্তঃ। অত্র চ প্রথমং মহৎসেবা, ততস্তৎকৃপাতস্তদ্ধর্ম্মশ্রদ্ধা, ততো ভগবৎকথাশ্রবণম্, ততো ভগবতি রতিঃ, তয়া চ দেহদ্বয়বিবেকাত্মজ্ঞানম্, ততো দৃঢ়া ভক্তিঃ, ততো ভগবত্তত্ত্বজ্ঞানম্, ততস্তৎকৃপয়া সর্ব্বজ্ঞত্বাদিভগবদ্‌গুণাবির্ভাব ইতি ক্রমো দর্শিতঃ॥

৩৫। নন্বু চ জ্ঞানেনাজ্ঞানপ্রাপ্তকর্ম্মনাশঃ, তচ্চ জ্ঞানং ভক্তিযোগাদ্-ভবতি; কথং কর্ম্মণা কর্ম্মনাশঃ স্যাৎ? তত্রাহ—যদত্রেতি॥

৩৬। ভগবদর্পণেন ক্রিয়মাণং কর্ম্ম ভক্তিযোগং জনয়তীতি সদাচারেণ দর্শয়তি—কুর্ব্বাণা ইতি। যত্র যদা ভগবতঃ শিক্ষয়া কর্ম্মাণি কুর্ব্বাণা ভবন্তি, তদা শ্রীকৃষ্ণস্য গুণনামানি গৃণন্তি অনুস্মরন্তি চ কৃষ্ণমিত্যর্থঃ। ইয়ং হি ভগবচ্ছিক্ষা—'যৎ করোষি যদশ্নাসি যজ্জুহোষি দদাসি যৎ। যৎ তপস্যসি কৌন্তেয়! তৎ কুরুষ্ব মদর্পণম্॥' ইতি॥

৩৭—৩৮। কীর্ত্তনস্মরণরূপ-ভক্তিহেতুত্বমুক্তম্, জ্ঞানহেতুত্বমাহ—নম ইতি দ্বাভ্যাম্। নমো ধীমহি, মনসা নমনং কুর্ব্বীমহি॥ (৩৮) অমূর্ত্তিকং মন্ত্রোক্তব্যতিরিক্তমূর্ত্তিশূন্যং, যজতে পূজয়তি, স পুমান্ সম্যগ্‌দর্শনো ভবতি॥

৩৯। এবঞ্চ কৃতবতি ময়ি হরিঃ স্বসদৃশং জ্ঞানাদিকং দত্তবানিত্যাহ —ইমং স্বনিগমং স্বোপদেশং মদনুষ্ঠিতং ময়ানুষ্ঠিতমবেত্য জ্ঞাত্বা। ভাবঞ্চ প্রীতিঞ্চ ॥

৪০। অতস্ত্বমপ্যেবং কুর্বিত্যাহ—ত্বমিতি। অদভ্রমনল্পং শ্রুতং যস্য হে অদভ্রশ্রুত! বিভোর্বিশ্রুতং যশঃ প্রখ্যাহি কথয়। যেন বিশ্রুতেন বুদ্ধেন বিদাং বিদুষাং বুভুৎসিতং বোদ্ধুমিচ্ছা সমাপ্যতে তৎ; যতো দুঃখৈঃ পীড়িতাত্মনাং সংক্লেশশান্তিং প্রকারান্তরেণ ন মন্যন্তে ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে পঞ্চমোঽধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ব্যাসস্য প্রত্যয়ার্থঞ্চ ষষ্ঠে প্রাগ্‌জন্মসম্ভবম্।
স্বভাগ্যং নারদঃ প্রাহ কৃষ্ণসঙ্কীর্ত্তনোদ্ভবম্ ॥ (১)

২—৪। স্বয়মপি তথা চিকীর্ষুর্গুরূপদেশানন্তরং ভাবি তচ্চরিতং পৃচ্ছতি—ভিক্ষুভিরিতি ত্রিভিঃ। বিপ্রবসিতে দূরদেশ-গমনে কৃতে সতি। বিজ্ঞানস্যাদেষ্টৃভিরুপদেশকর্তৃভিঃ॥ (৩) হে স্বায়ম্ভুব! তে ত্বয়া পরং বয় উত্তরমায়ুঃ কথং বর্ত্তিতং নীতম্? ইদমিতি দাসীপুত্রভূতং কলেবরং কথমুদস্রাক্ষীঃ উৎসৃষ্টবানসি? (৪) এষ কল্পান্তলক্ষণঃ কালঃ তে স্মৃতিং কথং ন ব্যবধাৎ, ন খণ্ডিতবান্? অড়াগমাভাবস্ত্বার্ষঃ। হি যত এষ কালঃ সর্ব্বস্য নিরাকৃতিঃ অপলাপো যস্মাৎ সঃ ॥

৫। অকারষং কৃতবানহম্; রেফ-ষকারয়োর্বিশ্লেষশ্ছন্দোঽনুরোধেন ॥

৬—৮। তত্র তাবৎ কঞ্চিৎ কালং তত্রৈব মাতৃস্নেহেন যন্ত্রিতো ঽবসমিত্যাহ—একেতি ত্রিভিঃ। এক এবাহমাত্মজো যস্যাঃ সা।

যোষিদিতি মূঢ়েতি চ স্নেহানুবন্ধে হেতুঃ॥ (৭) কিঙ্করীত্যস্থার্থং প্রপঞ্চয়তি—সেতি। অস্বতন্ত্রা সা, অতো ন কল্পা, ন সমর্থাসীৎ। দারুময়ী যোষেত্যতিপারবশ্যে দৃষ্টান্তঃ॥ (৮) তদেবং সা স্নেহং চক্রে, অহঞ্চ দিগাদিষ্বনভিজ্ঞঃ, অতস্তত্রৈব ন্যবসমিত্যাহ—অহঞ্চ তস্মিন্ ব্রহ্মকুলে তস্যা মাতুঃ স্নেহানুবন্ধস্যাপেক্ষয়া, কদা বিরমেদিতি প্রতীক্ষয়েত্যর্থঃ, ঊষিবান্ বাসং কৃতবান্। পঞ্চহায়নঃ পঞ্চবর্ষঃ॥

৯। গেহান্নির্গতাং গাং দুহন্তীম্, হেতৌ শতৃ-প্রত্যয়ঃ; দোগ্ধুং নির্গতামিত্যর্থঃ। পদা পাদেনাস্পৃষ্টঃ ঈষদাক্রান্তঃ। অদশৎ অখাদৎ॥

১০। তৎ মাতুর্মরণং, ভক্তানাং শং কল্যাণমভীপ্সত ঈশস্যানুগ্রহং মন্যমানঃ প্রাতিষ্ঠং প্রস্থিতোঽস্মি॥

১১—১৪। স্ফীতান্ জনপদাদীনতিযাতঃ অতিক্রম্য যাতঃ সন্ মহদ্-বিপিনমদ্রাক্ষমিতি চতুর্থেনান্বয়ঃ। জনপদাদিষু নানাগুণদোষযুক্তেষু সমদৃষ্টিঃ সন্ গতোঽহমিতি তাৎপর্য্যার্থঃ। স্ফীতান্ সমৃদ্ধান্, জনপদান্ দেশান্। তত্র তস্যাং দিশি; পুরগ্রামব্রজাকরান্—তত্র পুরাণি রাজধান্যঃ, গ্রামা ভৃগু-প্রোক্তাঃ—'বিপ্রাশ্চ বিপ্রভৃত্যাশ্চ যত্র চৈব বসন্তি তে। স তু গ্রাম ইতি প্রোক্তঃ শূদ্রাণাং বাস এব চ॥' ইতি; ব্রজা গোকুলানি, আকরা রত্নাদ্যুৎ-পত্তিস্থানানি, তান্। খেটাঃ কর্ষকগ্রামাঃ, খর্ব্বটা গিরিতটগ্রামাঃ, ভৃগুপ্রোক্তা বা,—'একতো যত্র তু গ্রামো নগরঞ্চৈকতঃ স্থিতম্। মিশ্রন্তু খর্ব্বটং নাম নদীগিরিসমাশ্রয়ম্॥' ইতি। বাট্যঃ পূগপুষ্পাদীনাং বাটিকাস্তাঃ; বনানি স্বতঃসিদ্ধবৃক্ষাণাং সমূহাঃ; উপবনানি রোপিত-বৃক্ষাণাং সমূহাঃ, তানি চ॥ (১২-১৪) চিত্রৈর্ধাতুভিঃ সুবর্ণ-রজতাদ্যৈর্বিচিত্রানদ্রীংশ্চ; ইভৈর্ভগ্না ভুজাঃ শাখা যেষাং তে দ্রুমা যেষু তান্; শিবানি ভদ্রাণি জলানি যেষাং তান্। নলিনীঃ সরসীঃ; চিত্রাঃ স্বনাঃ যেষাং তৈঃ পত্ররথৈঃ পক্ষিভিঃ তন্নাদপ্রবুদ্ধৈরিতস্ততো বিভ্রমদ্ভির্ভ্রমরৈঃ শ্রীঃ শোভা যাসাং তা নলিনীঃ,

অতিযাতঃ অতিক্রম্য গতঃ সন্, মহদ্বিপিনং বনমদ্রাক্ষম্। কীদৃশম্? নলবেণু-শরস্তম্বৈঃ কুশৈঃ কীচকৈশ্চ গহ্বরং দুর্গমম্। তত্র বেণু-জাতয় এব বিপুলান্তরালগর্ভা নীরজাঃ কীচকাঃ; বেণবো নিশ্ছিদ্রাঃ। ঘোরং দুঃসহং প্রতিভয়াকারং ভয়ঙ্কররূপম্, ব্যালাদীনামজিরং ক্রীড়াস্থানম্॥

১৫। পরিশ্রান্তানীন্দ্রিয়াণি আত্মা দেহশ্চ যস্য। তৃষা পরীতো ব্যাপ্তঃ। উপস্পৃষ্ট আচান্তঃ॥

১৬। পিপ্পলোপস্থে অশ্বত্থমূলে, আশ্রিত উপবিষ্টঃ, আত্মনা বুদ্ধ্যা আত্মস্থং হৃদিস্থম্, আত্মানং পরমাত্মানম্॥

১৭। ভাবেন ভক্ত্যা নির্জ্জিতং বশীকৃতং যচ্চেতস্তেন ঔৎকণ্ঠ্যেনাশ্রু-কলাযুক্তে অক্ষিণী যস্য॥

১৮। প্রেম্ণোঽতিভরেণ নির্ভিন্নপুলকানি অঙ্গানি যস্য। আনন্দানাং সংপ্লবে মহাপ্লবে পরমানন্দে। উভয়ম্—আত্মানং পরঞ্চ॥

১৯। মনসঃ কান্তমভীষ্টম্। শুচা শোকস্তামপহন্তীতি তথা তৎ। উত্তস্থে ব্যুত্থিতবানস্মি॥

২০। হৃদি মনঃ প্রণিধায় স্থিরীকৃত্য। অবিতৃপ্তোঽহমাতুর ইব অভবমিতি শেষঃ॥

২১। গিরামগোচরঃ সন্ বচনস্যা[১]বিষয়ীভূত ঈশ্বরঃ॥

২২। হন্তেতি সানুকম্প-সম্বোধনম্। মা ইতি মাং দ্রষ্টুং মার্হতি নার্হতি; যতোঽবিপক্কা অদগ্ধাঃ কষায়া মলাঃ কামাদয়ো যেষাম্, তেষাং কুযোগিনামনিষ্পন্নযোগানাম্॥

২৩। কুতস্তর্হি দৃষ্টোঽসি? তত্রাহ—সকৃৎ দর্শিতং ময়েতি যৎ, এতৎ কামায় ময়ি অনুরাগায়। ত্বৎকামেন কিম্? ইত্যত আহ—মৎকামঃ পুমান্। হৃচ্ছয়ান্ কামান্॥

১। সংবেদনস্যা-(ঘ)।

২৪। অদীর্ঘয়াপি সতাং সেবয়া। অবন্তং নিন্দ্যমিমং লোকং দেহম্। মজ্জনতাং মৎপার্ষদতাং গন্তাসি ॥

২৫। প্রজানাং সর্গে সৃষ্টৌ, নিরোধে সংহারেঽপি, প্রজাসর্গস্য নিরোধ ইতি বা ॥

২৬। তৎ প্রসিদ্ধং মহদ্ভূতম্; 'তস্য মহতো ভূতস্য নিশ্বসিতমেতদ্-যদৃগ্বেদঃ' ইত্যাদিশ্রুতেঃ। কীদৃক্? ঈশ্বরং সর্ব্বনিয়ন্তৃ চ নভসি লিঙ্গং মূর্ত্তির্যস্য তন্নভোলিঙ্গম্। সন্নিহিতমপি ন লিঙ্গ্যত ইত্যলিঙ্গম্। তস্মৈ অদৃষ্টায় অবনামং প্রণামং বিদধে কৃতবানহম্। তেনানুকম্পিতঃ অনুগৃহীতঃ সন্ ॥

২৭। অনন্তস্য নামানি পঠন্ননবরতং গৃণন্, হতত্রপস্ত্যক্তলজ্জঃ সন্ বিমৎসরো জাতোঽস্মীতি শেষঃ ॥

২৮। কালে স্বাবসরে কালো মৃত্যুঃ প্রাদুরভূৎ আবির্বভূব। অকস্মাৎ প্রাদুর্ভাবে দৃষ্টান্তঃ—তড়িদ্বিদ্যুদিবেতি, সৌদামনীতি বিশেষণং স্ফুটত্বপ্রদর্শনার্থম্। সুদামা মালা, তত্র ভবা সৌদামনী মালাকারেত্যর্থঃ; যদ্বা, সুদামা নাম কশ্চিৎ স্ফটিকপর্ব্বতঃ, 'তেনৈকদিক্' ইতি-সূত্রেণ অণ্, স্ফটিকময়পর্ব্বতপ্রান্তভাগভবা হি বিদ্যুদতিস্ফুটা ভবতি, তদ্বদিত্যর্থঃ; যদ্বা, তড়িদিত্যন্তিক ইত্যর্থঃ, 'তড়িদন্তিকবজ্রয়োঃ' ইতি নৈরুক্তস্মরণাৎ ॥

২৯। প্রযুজ্যমানে ইত্যস্যায়মর্থঃ—'হিত্বাবদ্যমিমং লোকং গন্তা মজ্জনতামসি' ইতি যা ভাগবতী ভগবৎপার্ষদরূপা শুদ্ধা সত্ত্বময়ী তনুঃ, তাং প্রতিশ্রুতাং তনুং প্রতি ভগবতা ময়ি প্রযুজ্যমানে নীয়মানে আরব্ধং যৎ কর্ম্ম, তন্নির্ব্বাণং সমাপ্তং যস্য, আরব্ধকর্ম্মণো নির্ব্বাণমেব নির্ব্বাণং যস্যেতি বা। স পঞ্চভূতাত্মকো দেহো হ্যপতৎ। অনেন পার্ষদতনূনামকর্ম্মারব্ধত্বং নিত্যত্বং শুদ্ধত্বঞ্চ সূচিতং ভবতি ॥

৩০। ইদং ত্রৈলোক্যমাদায় উপসংহৃত্য উদন্বত একার্ণবস্যান্তসি শয়ানে শ্রীনারায়ণে। শিশয়িষোঃ শয়নং কর্ত্তুমিচ্ছোর্বিভোর্ব্রহ্মণঃ অন্তর্মধ্যম্ অনুপ্রাণং নিশ্বাসেন সহ বিবিশে প্রবিষ্টোঽহম্; 'ততোঽবতীর্য্য বিশ্বাত্মা দেহমাবিশ্য চক্রিণঃ। অবাপ বৈষ্ণবীং নিদ্রামেকীভূয়াথ বিষ্ণুনা॥' ইতি কূর্ম্মোক্তেঃ। স্বায়নেঽম্ভসীতি পাঠে স্বায়নে স্বস্যাশ্রয়ে অন্তসি শিশয়িষোর্ব্রহ্মণ ইতি শ্রীনারায়ণেনাভেদবিবক্ষয়োক্তমিতি অবগন্তব্যম্॥

৩১। প্রাণেভ্য ইন্দ্রিয়েভ্যঃ। অহং মরীচিমিশ্রাস্তন্মুখা ঋষয়শ্চ জজ্ঞিরে॥

৩২। যে কর্ম্মিণস্তে বহির্ন যান্তি, যে তপ-আদিভির্ব্রহ্মলোকং গতাস্তে অন্তর্ন যান্তি, অহন্তু মহাবিষ্ণোরনুগ্রহাৎ অখণ্ডিতব্রহ্মচর্য্যব্রতঃ সন্নন্তর্ব্বহিশ্চ পর্য্যেমি পর্য্যটামি। ক্বচিদপি অবিঘাতা অপ্রতিহতা গতির্যস্য সঃ॥

৩৩—৩৬। কিমিতি পর্য্যটসি? ঈশ্বরাজ্ঞয়া লোকমঙ্গলার্থমিত্যাহ—চতুর্ভিঃ। দেবেন ঈশ্বরেণ দত্তাম্। স্বরাঃ নিষাদর্ষভ-গান্ধার-ষড়্জ-মধ্যম-ধৈবতাঃ পঞ্চমশ্চ ইতি সপ্ত। ত এব ব্রহ্ম ব্রহ্মাভিব্যঞ্জকত্বাৎ তেন বিভূষিতাম্, স্বতঃসিদ্ধসপ্তস্বরামিত্যর্থঃ। মূর্চ্ছয়িত্বা মূর্চ্ছনালাপবতীং কৃত্বা॥ (৩৪) স্বপ্রয়োজনমাহ—প্রগায়ত ইতি॥ (৩৫) পরপ্রয়োজনমাহ—এতদ্ধীতি। মাত্রা বিষয়াস্তেষাং স্পর্শা ভোগাস্তেষামিচ্ছয়া, আতুরাণি চিত্তানি যেষাং তেষাং হরিচর্য্যানুবর্ণনং যৎ, এতদেব ভবসিন্ধোঃ প্লবঃ পোতঃ, ন কেবলং শ্রুতিপ্রামাণ্যেন, কিন্তু অন্বয়ব্যতিরেকাভ্যাং দৃষ্ট এবেত্যর্থঃ॥ (৩৬) এতদেবেত্যুক্তমবধারণমনুভবেন দ্রঢ়য়তি—যমাদিভিস্তথা ন শাম্যতি, যদ্বৎ যথা মুকুন্দসেবয়া অদ্ধা সাক্ষাৎ আত্মা মনঃ শাম্যতি। কথঞ্চিন্মুকুন্দসেবামাত্রেণ শাম্যতি, কিং পুনস্তদ্‌গুণবর্ণনেনেতি ভাবঃ॥

৩৭। ভবতো মনঃপরিতোষকারণঞ্চ ব্যাখ্যাতম্॥

৩৮। আমন্ত্র্য অনুজ্ঞাপ্য[১] যাদৃচ্ছিকঃ স্বপ্রয়োজনসঙ্কল্পশূন্যঃ ॥

৩৯। হরিকথাগায়কভাগ্যং শ্লাঘতে—অহো ইতি। মাদ্যন্ হৃষ্যন্। তন্ত্র্যা বীণয়া ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে ষষ্ঠোঽধ্যায়ঃ ॥ ৬ ॥

সপ্তমোঽধ্যায়ঃ

অথ ভাগবতশ্রোতুর্জ্জন্ম বক্তুং পরীক্ষিতঃ।
সুপ্তবালবধাদ্ দ্রৌণের্দণ্ডঃ সপ্তম উচ্যতে ॥ (১)

১। তস্য নারদস্য অভিপ্রেতং শ্রুতবান্ সন্ ॥

২। ব্রহ্মনদ্যাং ব্রহ্মদৈবত্যায়াং ব্রাহ্মণৈরন্বিতায়াং বা সত্রং কর্ম্ম বর্দ্ধয়তীতি তথা ॥

৩। বদরীণাং ষণ্ডেন সমূহেন মণ্ডিতে, মনঃ প্রণিদধ্যৌ স্থিরীচকার, 'সমাধিনানুস্মর তদ্বিচেষ্টিতম্' ইতি নারদোপদিষ্টং ধ্যানং কৃতবানিত্যর্থঃ ॥

৪। প্রণিহিতে নিশ্চলে ; অত্র হেতুঃ—ভক্তিযোগেন অমলে ; পূর্ব্বং প্রথমং পুরুষমীশ্বরমপশ্যৎ। পূর্ণমিতি বা পাঠঃ। তদপাশ্রয়া[২]মীশ্বরাশ্রয়াং তদধীনাং মায়াঞ্চাপশ্যৎ ॥

৫। ঈশমায়াকৃতাঞ্চ জীবানাং সংসৃতিমপশ্যদিত্যাহ—যয়া মায়য়া সম্মোহিতঃ স্বরূপাবরণেন বিক্ষিপ্তঃ পরোঽপি গুণত্রয়াদ্ব্যতিরিক্তোঽপি তৎকৃতং ত্রিগুণত্বাভিমানকৃতমনর্থং কর্ত্তৃত্বাদিকঞ্চ প্রাপ্নোতি ॥

৬। অনর্থমুপশময়তি যোঽধোক্ষজে সাক্ষাদ্ভক্তিযোগঃ, তঞ্চাপশ্যৎ। এতৎ সর্ব্বং স্বয়ং দৃষ্ট্বা এবমজানতো লোকস্যার্থে সাত্বতসংহিতাং

১। অনুজ্ঞায় (ঘ) ; ২। তদুপাশ্রয়াম্ (ক, খ, গ)।

শ্রীভাগবতাখ্যাং চক্রে। তদনেন শ্লোকত্রয়েণ শ্রীভাগবতার্থঃ সংক্ষেপেণ প্রদর্শিতঃ। এতদুক্তং ভবতি—বিদ্যাশক্ত্যা মায়ানিয়ন্তা নিত্যাবির্ভূত-পরমানন্দস্বরূপঃ সর্ব্বজ্ঞঃ সর্ব্বশক্তিরীশ্বরঃ, তন্মায়য়া সম্মোহিতস্তিরোভূত-স্বরূপস্তদ্বিপরীতধর্ম্মা জীবঃ, তস্য চেশ্বরস্য ভক্ত্যা লব্ধজ্ঞানেন মোক্ষ ইতি। তদুক্তং শ্রীবিষ্ণুস্বামিনা—'হ্লাদিন্যা সংবিদাশ্লিষ্টঃ সচ্চিদানন্দ ঈশ্বরঃ। স্বাবিদ্যাসংবৃতো জীবঃ সংক্লেশনিকরাকরঃ॥'; তথা—'স ঈশো যদ্বশে মায়া স জীবো যস্তয়ার্দ্দিতঃ। স্বাবির্ভূতপরানন্দঃ, স্বাবির্ভূতসুদুঃখভূঃ॥ স্বাদৃগুত্থবিপর্য্যাস-ভবভেদজভীশুচঃ। যন্মায়য়া জুষন্নাস্তে তমিমং নৃহরিং নুমঃ॥' ইত্যাদি॥

৭। সংহিতায়া অনর্থোপশমকত্বং দর্শয়তি—যস্যাং বৈ শ্রূয়মাণায়ামেব, কিং পুনঃ শ্রুতায়ামিত্যর্থঃ॥

৮। অনুক্রম্য—শোধয়িত্বা॥

৯। কস্য বা হেতোঃ; বৃহতীং বিততাম্॥

১০। নির্গ্রন্থা গ্রন্থেভ্যো নির্গতাঃ; তদুক্তং গীতাসু—'যদা তে মোহকলিলং বুদ্ধির্ব্যতিতরিষ্যতি। তদা গন্তাসি নির্ব্বেদং শ্রোতব্যস্য শ্রুতস্য চ॥' ইতি; যদ্বা, গ্রন্থিরেব গ্রন্থিঃ নিবৃত্তঃ ক্রোধাহঙ্কাররূপো গ্রন্থির্যেষাং তে নিবৃত্তহৃদয়গ্রন্থয় ইত্যর্থঃ[১]। ননু মুক্তানাং কিং ভক্ত্যেতি সর্ব্বাক্ষেপপরিহারার্থমাহ—'ইত্থম্ভূতগুণো হরিঃ' ইতি॥

১১। ননু ভক্তিং কুর্ব্বন্তু নাম, এতচ্ছাস্ত্রাভ্যাসে শুকস্য কিং কারণ-মিত্যত আহ—হরেরিতি। অধ্যগাদধীতবান্। বিষ্ণুজনাঃ প্রিয়া যস্যেতি। ব্যাখ্যানাদি-প্রসঙ্গেন তৎসঙ্গতিকাম ইতি ভাবঃ। এতেন 'তস্য পুত্রো মহাযোগী' ইত্যাদিনা শুকস্য ব্যাখ্যানে প্রবৃত্তিঃ কথমিতি যৎ পৃষ্টং, তস্যোত্তরমুক্তম্॥

১। গ্রন্থিরেব গ্রন্থঃ, নিবৃত্তহৃদয়গ্রন্থ ইত্যর্থঃ (ক)।

১২। যদন্যৎ পৃষ্টং পরীক্ষিতঃ প্রায়োপবেশেন শ্রবণং কথমিতি, তস্য জন্ম মহাশ্চর্য্যম্' ইত্যাদিনা তস্যোত্তরং বক্তুমাহ—পরীক্ষিত ইতি। বিলাপনং মুক্তিং মৃত্যুং বা ; সংস্থাং মহাপ্রস্থানম্ ; শ্রীকৃষ্ণকথানামুদয়ো যথা ভবতি তথা ॥

১৩—১৫। তত্র পরীক্ষিতো জন্ম নিরূপয়িষ্যন্নাদৌ তাবদ্গর্ভস্থ এবাশ্বথাম্নো ব্রহ্মাস্ত্রাৎ শ্রীকৃষ্ণেন পরিরক্ষিত ইতি বক্তুং কথাং প্রস্তৌতি —যদেত্যাদিনা। যদা দ্রৌণিরশ্বথামা কৃষ্ণাসুতানাং দ্রৌপদীপুত্রাণাং শিরাংস্যুপাহরৎ, তদা তন্মাতা অরুদৎ, তাঞ্চ সান্ত্বয়ন্ কিরীটমালী অর্জ্জুন আহেতি তৃতীয়েনান্বয়ঃ। কিমিতি বালানাং শিরাংসি উপাহৃতবান্[১] ইত্যপেক্ষায়ামাহ—মৃধে যুদ্ধে, যদ্যপি পাণ্ডবা অপি কৌরবা এব, তথাপি সৃঞ্জয়বংশজো ধৃষ্টদ্যুম্নঃ পাণ্ডবানাং সেনাপতিরিতি সৃঞ্জয়ানামিত্যুক্তম্। বীরগতিং স্বর্গম্ ; অথো অনন্তরম্, বৃকোদরেণ আবিদ্ধায়াঃ ক্ষিপ্তায়া গদায়া অভিমর্ষেণ ঘাতেন ভগ্নাবূরুদণ্ডৌ যস্য তথাভূতে ধৃতরাষ্ট্রপুত্রে দুর্য্যোধনে সতি ॥ (১৪) ভর্ত্তুর্দুর্য্যোধনস্য ; স্মেতি বিতর্কে। ইত্যেবং প্রিয়ং স্যাদিতি পশ্যন্। তস্য বিপ্রিয়মেবেতি বাক্যান্তরম্। বিপ্রিয়ত্বে হেতুঃ—জুগুপ্সিতমিতি ॥ (১৫) ঘোরং দুঃসহং যথা ভবতি। বাষ্পস্য কলাভির্বিন্দুভিঃ, আকুলে ব্যাপ্তে অক্ষিণী যস্যাঃ সা। তথা কিরীটস্যৈকত্বেঽপি তস্যাগ্রাণাং বাহুল্যাৎ কিরীটমালীত্যুক্তম্ ॥

১৬। শুচঃ শোকাশ্রূণি প্রমৃজামি পরিমার্জ্জয়ামি। যৎ যদা, ব্রহ্মবন্ধোর্ব্রাহ্মণাধমস্য আততায়িন ইতি ; 'অগ্নিদো গরদশ্চৈব শস্ত্রপাণির্ধনাপহঃ। ক্ষেত্রদারহরশ্চৈব[২] ষড়েতে আততায়িনঃ ॥' ইতি-স্মরণাৎ। তত্র তু আততায়ী শস্ত্রপাণিঃ, তেন চ পুত্রহন্তৃত্বং লক্ষ্যতে। গাণ্ডীবাদ্-

---

১। আহৃতবান্ (ক) ; ২। দারাপহারী চ (ঘ)।

ধনুষো মুক্তৈর্বিশিখৈর্বাণৈরুপাহরে ত্বৎসমীপমানয়ামি। যচ্ছির আক্রম্য আসনং বিধায় দগ্ধপুত্রা সতী॥

১৭। বল্গবো রম্যা বিচিত্রা জল্পা ভাষণানি, তৈঃ; স অর্জ্জুনঃ; অচ্যুত এব মিত্রং সূতশ্চ সারথিশ্চ যস্য, দংশিতো বদ্ধকবচঃ, উগ্রং ধনুশ্চাপো যস্য, কপির্হনূমান্ ধ্বজে যস্য। গুরোঃ পুত্রং রথেন অন্বাদ্রবৎ অন্বধাবৎ॥

১৮। আপতন্তমাধাবন্তম্; স দ্রৌণিঃ, কুমারহা বালঘাতী, উদ্বিগ্নমনাঃ কম্পিতহৃদয়ঃ, প্রাণপরীপ্সুঃ প্রাণান্ লব্ধুমিচ্ছুঃ, ন তু কীর্ত্তিম্। যাবদ্গামং যাবদ্গন্তুং শক্যং, তাবদুর্ব্ব্যাং পরাদ্রবৎ পলায়ত। কো ব্রহ্মা মৃগো ভূত্বা সুতাং জভিতুমুত্থতঃ সন্ রুদ্রস্য ভয়াদ্ যথা পলায়তে স্ম। অর্ক ইতি পাঠে বামনপুরাণকথা সূচিতা। তথাহি বিদ্যুন্মালী নাম কশ্চিদ্রাক্ষসো মাহেশ্বরঃ, তস্মৈ রুদ্রেণ সৌবর্ণং বিমানং দত্তম্। ততোঽসাবর্কস্য পৃষ্ঠতো ভ্রমন্ বিমানদীপ্ত্যা রাত্রিং বিলোপিতবান্। ততোঽর্কেণ নিজতেজসা দ্রাবয়িত্বা তদ্বিমানং পাতিতম্। তচ্ছ্রুত্বা কুপিতে রুদ্রে ভয়াদর্কঃ পরাদ্রবৎ। ততো রুদ্রস্য ক্রূরয়া দৃষ্ট্যা দন্দহ্যমানঃ পতন্ বারাণস্যাং পতিতো লোলার্কনাম্না বিখ্যাতো জাত ইতি॥

১৯। অশরণং রক্ষকরহিতম্। নন্বু পলায়নমেব রক্ষকমস্তি? ন, তস্যাপি কুণ্ঠিতত্বাদিত্যাহ—শ্রান্তা বাজিনো যস্য তম্; ব্রহ্মশিরোঽস্ত্রং ব্রহ্মাস্ত্রম্। দ্বিজাত্মজ ইতি, অদীর্ঘদর্শিতামাহ॥

২০। তদ্ ব্রহ্মাস্ত্রম্, সমাহিতঃ কৃতধ্যানঃ; উপসংহারমজানতোঽপি সন্ধানে হেতুঃ—প্রাণকৃচ্ছ্র ইতি॥

২১। ততোঽস্ত্রাৎ সর্ব্বতোদিশং প্রাদুষ্কৃতং প্রকটীকৃতং তেজঃ অভিপ্রেক্ষ্য, ততঃ প্রাণাপদঞ্চাভিপ্রেক্ষ্য॥

২২—২৫। প্রস্তুতং বিজ্ঞাপয়িতুং প্রথমং স্তৌতি—কৃষ্ণ কৃষ্ণেতি চতুর্ভিঃ। সংসৃতের্হেতোর্দহ্যমানানাং তস্যা অপবর্গঃ অপবর্জ্জয়িতা নাশক ইত্যর্থঃ॥ (২৩) যতস্ত্বমীশ্বরঃ সাক্ষাৎ। কুতঃ? যতঃ প্রকৃতেঃ পরঃ পুরুষঃ। তৎ কুতঃ? যত আদ্যঃ কারণম্। কারণত্বেঽপ্যবিকারিতামাহ—মায়াং ব্যুদস্যাভিভূয় কৈবল্যস্বরূপে আত্মন্যেব স্থিত ইতি॥ (২৪) ত্রিবর্গ-দাতাপি ত্বমেব ইত্যাহ—স ইতি। যস্ত্বং মায়ামভিভূয় স্থিতঃ, স এব মায়াভিভূতস্য জনস্য ধর্ম্মাদিফলমুপাসিতঃ সন্ বিধৎসে। বীর্য্যেণ প্রভাবেণ॥ (২৫) তথা চানেনাবতারেণ তব সাধুপক্ষপাতো লক্ষ্যতে ইত্যাহ—তথেতি। কিং ভূভারহরণং মদিচ্ছামাত্রেণ ন ভবতি? তত্রাহ—স্বানাং জ্ঞাতীনাং অনুধ্যানায় চ, তথা অনন্যভাবানামেকান্তভক্তানাঞ্চ॥

২৬। এবং স্তুত্বা প্রস্তুতং বিজ্ঞাপয়তি—কিমিতি, কিং কিমাত্মকমিদং কুতো বা আয়াতীতি; স্বিৎ বিতর্কে॥

২৭। ইদং দ্রোণপুত্রস্য ব্রাহ্মমস্ত্রম্। তেন চ প্রাণবাধে প্রাপ্তে প্রদর্শিতং কেবলং, ন তু তৎপ্রয়োগকুশল ইত্যর্থঃ; যতোঽসাবুপসংহারং ন বেদ, ন জানাতি, এতচ্চ ত্বং বেত্থ জানাসি॥

২৮। প্রত্যবকর্শনং কৃশত্বকরং নিবর্ত্তকমিত্যর্থঃ। অতস্তদস্ত্রতেজঃ উন্নদ্ধমুৎকটং ব্রহ্মাস্ত্রতেজসৈব জহি ঘাতয়। ত্বৎপ্রযুক্তঞ্চাস্ত্রং তদুপ-সংহৃত্য স্বয়মুপশাম্যেদ্‌যতস্ত্বমস্ত্রজ্ঞোঽসি॥

২৯। পরে শত্রবঃ, ত এব বীরাস্তান্ হন্তীতি তথাবিধঃ, ফাল্গুনোঽর্জ্জুনঃ অপঃ স্পৃষ্ট্বা আচম্য তং শ্রীকৃষ্ণং পরিক্রম্য প্রদক্ষিণীকৃত্য, ব্রাহ্মায় ব্রহ্মাস্ত্রং নিবর্ত্তয়িতুম্॥

৩০। ততশ্চ উভয়োর্ব্রহ্মাস্ত্রয়োস্তেজসী শরৈঃ সংবৃতে সংবেষ্টিতে পরস্পরং মিলিত্বা ববৃধাতে অবর্দ্ধেতাম্। কিং কৃত্বা? রোদসী দ্যাবা-

পৃথিব্যৌ খমন্তরীক্ষঞ্চ আবৃত্য, যথা প্রলয়ে সঙ্কর্ষণমুখাগ্নিরূপরিস্থিতোঽর্কশ্চ সংহৃত্য বর্দ্ধেতে তদ্বৎ ॥

৩১। তয়োর্দ্রৌণিফাল্গুনয়োঃ; তেন দহ্যমানাঃ সাংবর্ত্তকং প্রলয়াগ্নি-মমংসত মেনিরে ॥

৩২। লোকানাং ব্যতিকরং ব্যত্যয়ং নাশমিত্যর্থঃ। বাসুদেবস্য মতঞ্চালক্ষ্য ব্রহ্মাস্ত্রদ্বয়মুপসংহৃতবান্ ॥

৩৩। গোতমবংশাজ্জাতা গৌতমী কৃপী তস্যাঃ সুতম্, অমর্ষেণ কোপেন তাম্রে অক্ষিণী যস্য সঃ। নিষ্কপত্বে দৃষ্টান্তঃ—পশুং যথেতি, তস্য বন্ধনং ধর্ম্ম ইত্যত্র বা দৃষ্টান্তঃ, যথা যাজ্ঞিকঃ পশুমিতি, রশনয়া রজ্জ্বা ॥

৩৪—৩৯। শোকরোষাদিযুক্তস্যাপ্যর্জ্জুনস্য ধর্ম্মনিষ্ঠাখ্যাপনায় শ্রীকৃষ্ণ-বাক্যং, তদাহ ষড়্ভিঃ। শিবিরায় রাজনিবেশায় নিনীষন্তং নেতুমিচ্ছন্তম্, প্রকুপিত ইবেতি॥ (৩৫) অনাগসঃ নিরপরাধান্॥ (৩৬) রিপোরপি সুপ্তস্য বালস্য চ বধো ন ধর্ম্ম ইত্যন্যার্থৈর্দর্শয়তি—মত্তমিত্যাদিনা; মত্তং মদ্যাদিনা, প্রমত্তমনবহিতম্, উন্মত্তং গ্রহবাতাদিনা, জড়ম্ অনুত্থমম্, প্রপন্নং শরণাগতম্, বিরথং ভগ্নরথম্॥ (৩৭) তদ্বধো দণ্ডরূপস্তস্যৈব শ্রেয়ঃ পুরুষার্থঃ, যদ্‌যতো দণ্ডপ্রায়শ্চিত্তরহিতাদ্দোষাৎ স পুমান্ অধো যাতীতি। তথা চ স্মরন্তি—'রাজভির্ধৃতদণ্ডাস্তু কৃতপাপাশ্চ মানবাঃ[১]। বিধূতকল্মষা যান্তি স্বর্গং সুকৃতিনো যথা॥' ইতি॥

৪০। যদ্যপি চোদিতঃ, তথাপি হন্তুং নৈচ্ছৎ; আত্মহনং পুত্র-হন্তারমপি, যতো মহান্॥

৪১। গোবিন্দঃ প্রিয়ঃ সারথিশ্চ যস্য সঃ। আত্মজান্ শোচন্ত্যে॥

১। কৃত্বা পাপানি মানবাঃ (ক)।

৪২। তথা পরিভবেণ আহৃতমানীতম্, কর্ম্মণো জুগুপ্সিতেন দোষেণ অবাঙ্মুখম্, অপকৃতমপকারিণং কৃপয়া নিরীক্ষ্য ; বামঃ শোভনঃ স্বভাবো যস্যাঃ সা ; ননাম চ, উবাচ চেতি চকারাভ্যাং সম্ভ্রমঃ সূচিতঃ ॥

৪৩। বন্ধনেনানয়নমসহমানা ॥

৪৪। সরহস্যো গোপ্যমন্ত্রসহিতঃ, বিসর্গোঽস্ত্রপ্রয়োগঃ, উপসংযমঃ উপসংহারঃ, তাভ্যাং সহিতোঽস্ত্রসমূহশ্চ ॥

৪৫। কিঞ্চ, তস্য দ্রোণস্যাত্মনো দেহস্যার্দ্ধং কৃপী আস্তে। অর্দ্ধত্বে হেতুঃ—পত্নী, 'অর্দ্ধো বা এষ আত্মনো যৎ পত্নী' ইতি শ্রুতেঃ ; 'জায়াপতী অগ্নিমাদধীয়াতাম্' ইত্যাদিশ্রুতেঃ, উভয়োরেককারকত্বাবগমাচ্চ। নন্বু ভর্ত্তরি মৃতে কথং সা জীবতি? তত্রাহ—নান্বগাদ্ ভর্ত্তারম্, যতো বীরসূঃ পুত্রবতী ॥

৪৬। তৎ তস্মাৎ, গৌরবং গুরোঃ কুলং, ভবদ্ভিঃ কর্ত্তৃভির্বৃজিনং দুঃখং প্রাপ্তুং নার্হতি, কিন্তু পূজ্যং বন্দ্যঞ্চ ॥

৪৭। মৃতবৎসা মৃতপুত্রা ॥

৪৮। বিপক্ষে দোষমাহ—যৈরিতি। তেষাং রাজন্যানাং কুলং কর্ম্ম। কথম্ভূতম্? সানুবন্ধং সপরিবারম্, শুচা শোকেনার্পিতং ব্যাপ্তঞ্চ, ব্রহ্মকুলং কর্ত্তৃ প্রদহতি ॥

৪৯। ধর্ম্ম্যমিত্যাদয়ো বচসঃ ষড়্গুণাঃ পূর্ব্বশ্লোকষট্কে দ্রষ্টব্যাঃ। তত্র ধর্ম্ম্যং ধর্ম্মাদনপেতং মুচ্যতাং মুচ্যতামিতি, ন্যায্যং ন্যায়াদনপেতং সরহস্য ইত্যাদি, সকরুণং তস্যাত্মনোঽর্দ্ধং পত্নীতি, নির্ব্ব্যলীকং তদ্ধর্ম্মজ্ঞেতি, সমং মা রোদীদিতি দুঃখসাম্যোক্তেঃ, মহৎ যৈঃ কোপিতমিতি নিষ্ঠুরোক্ত্যা হিতোপদেশাৎ, এবম্ভূতং রাজ্ঞ্যা বচঃ। হে দ্বিজাঃ! প্রত্যনন্দৎ অনুমোদিতবান্ ॥

৫০। নকুলাদয়শ্চ প্রত্যনন্দন্ ; যুযুধানঃ সাত্যকিঃ ॥

৫১। তস্য তথাবিধস্য দ্রৌণেঃ বধ এব শ্রেষ্ঠঃ, অন্যথা তস্য নরক-পাতপ্রসঙ্গঃ স্যাৎ, তত্রাহ—ন ভর্ত্তুরিতি ; অহন্ জঘান ॥

৫২। চতুর্ভুজোক্তেরয়ং ভাবঃ—ভীমে তং হন্তুং প্রবৃত্তে, দ্রৌপদ্যাঞ্চ সহসা তন্নিবারণে প্রবৃত্তায়াম্, উভয়োঃ সংবরণায়াবিষ্কৃতচতুর্ভুজ ইতি। সন্দিহানস্য—সখ্যুরর্জুনস্য ॥

৫৩। বধার্হণঃ বধার্হঃ, ময়ৈব শাস্ত্রকৃতা, ব্রাহ্মণো ন হন্তব্য ইতি ; তথা—'আততায়িনমায়ান্তমপি বেদান্তপারগম্। জিঘাংসন্তং জিঘাংসীয়ান্ন তেন ব্রহ্মহা ভবেৎ॥' ইতি চ বদতা ; তদুভয়মপ্যনুশাসনং পরিপালয় ॥

৫৪। তব চ প্রতিজ্ঞাং প্রপূরয়েত্যাহ—প্রিয়াং সান্ত্বয়তা ত্বয়া যৎ প্রতিশ্রুতং হননং, তচ্চ সত্যং কুরু, প্রিয়ঞ্চ কুরু ; মহ্যং মম, তত্র বধে ভীমস্য প্রিয়ং ভবতি, অবধে দ্রৌপদ্যাঃ, দ্বয়ে শ্রীকৃষ্ণস্য ॥

৫৫। হার্দ্দমভিপ্রায়ম্ আজ্ঞায় জ্ঞাত্বা। ন হ্যশক্যমুভয়ং বিদধ্যাদতোঽয়মভিপ্রায় ইতি জ্ঞাত্বেত্যর্থঃ ; অসিনা খড়্গেন, মূর্দ্ধন্যং মূর্দ্ধনি জাতম্, সহমূর্দ্ধজং সকেশম্ ॥

৫৬। মণিনা চ হীনং নিরযাপয়ৎ নিঃসারিতবান্ ॥

৫৭। অনেন চ শ্রীকৃষ্ণোক্তং সর্ব্বং সম্পাদিতবানিত্যাহ—বপনমিতি ॥

৫৮। নির্হরণম্—দাহার্থং নয়নম্ ॥

ইতি শ্রীমদ্ভাগবতভাবার্থদীপিকায়াং প্রথমস্কন্ধে

সপ্তমোঽধ্যায়ঃ ॥ ৭ ॥

অষ্টমোঽধ্যায়ঃ

অষ্টমে কুপিতদ্রৌণেরস্ত্রাদ্রক্ষা পরীক্ষিতঃ।
কৃষ্ণেন তৎস্তুতিঃ কুন্ত্যা রাজ্ঞঃ শোকশ্চ কীর্ত্ত্যতে[১] ॥ (১)

১। তে পাণ্ডবাঃ সম্পরেতানাং মৃতানাং গঙ্গায়ামুদকং দাতুং সকৃষ্ণাঃ কৃষ্ণেন সহিতাঃ স্ত্রিয়ঃ স্ত্রীঃ পুরস্কৃত্য অগ্রতঃ কৃত্বা, তস্মিন্ কার্য্যে স্ত্রীপুরঃসরত্ববিধানাৎ ॥

২। উদকং নিনীয় দত্ত্বা, হরিপাদাব্জরজোভিঃ পূতা যা সরিৎ গঙ্গা, তস্যা জলে। পুনর্গ্রহণাদাদাবপি স্নাতা ইতি গম্যতে ॥

৩। কুরুপতিং যুধিষ্ঠিরম্, সহানুজং ভীমাদিভিঃ সহিতম্। পুত্র-শোকার্ত্তামিতি তিসৃণাং বিশেষণম্ ॥

৪। মুনিভিঃ সহঃ ॥

৫। কিতবৈর্ধূর্ত্তৈর্দুর্য্যোধনাদিভিঃ ; দ্রৌপদ্যাঃ কচগ্রহণাদিনা ক্ষতং নষ্টমায়ুর্যেষাং তান্ ॥

৬। যাজয়িত্বেত্যাদিনা ভাবিকথাসংক্ষেপঃ, শতমন্যোঃ শতক্রতোরিব অতনোৎ ॥

৭। শৈনেয়ঃ শিনের্নপ্তা সাত্যকিঃ, তেন চোদ্ধবেন চ সংযুতঃ ॥

৮। রথমাস্থিতঃ সন্, উত্তরাং পরীক্ষিন্মাতরং ভয়েন বিহ্বলাং ব্যাকুলাম্, অভিমুখং ধাবন্তীমুপলেভে দদর্শ ॥

৯—১০। উত্তরা শ্রীকৃষ্ণং প্রার্থয়তে—পাহি পাহীতি দ্বাভ্যাম্। অন্যস্তু প্রার্থনাযোগ্যো নাস্তীত্যাহ—ত্বৎ ত্বত্তঃ অন্যমভয়ং ভয়রহিতং ন পশ্যামি। যত্র লোকে পরস্পরমন্যোঽন্যং মৃত্যুর্ভবতি তত্র ॥ (১০) অত্র প্রস্তুতং

১। শোকঃ প্রকীর্ত্তিতঃ (ক)।

ভয়মাবেদয়তি—অভিদ্রবতি অভিমুখমায়াতি। তপ্তমায়সং লৌহময়ং শল্যং যস্য সঃ। অতিকার্পণ্যমাহ—কামমিতি, কামং যথেষ্টম্ ॥

১১। পরাভবেণাতিকুপিতস্য দ্রৌণেরপাণ্ডবং পাণ্ডবশূন্যমিদং বিশ্বং কর্ত্তুং প্রবৃত্তং ব্রহ্মাস্ত্রমবুধ্যত।

১২। অতএব বহুমুখং ব্রহ্মাস্ত্রং তদাগতমিত্যাহ—তর্হ্যেবেতি।

১৩। ব্রহ্মাস্ত্রস্য অস্ত্রান্তরৈরনিবর্ত্ত্যত্বাৎ[১] তৎ দুষ্পরিহরং ব্যসনং বীক্ষ্য। ন অন্যবিষয় আত্মা যেষাং স্বৈকনিষ্ঠানামিত্যর্থঃ ॥

১৪। বৈরাট্যা উত্তরায়া অন্তঃস্থঃ সন্ গর্ভমাবৃতবান্। তত্র হেতুঃ—যত আত্মা অন্তর্য্যামী, যোগেশ্বর ইতি বহিঃস্থস্যাপি প্রবেশঘটনার্থমুক্তম্। কুরূণাং তন্তবে সন্তানায়, পাণ্ডবানামপি কুরুবংশজত্বাদেবমুক্তম্ ॥

১৫। অমোঘমপ্রতিক্রিয়ঞ্চ সমশাম্যৎ সংশান্তমাসীৎ ॥

১৬। এতদ্‌ব্রহ্মাস্ত্রশমনমাশ্চর্য্যং মা মংস্থা ন মন্যস্ব ; ইদং জগৎ।

১৭। কৃষ্ণয়া চ সহ ॥

১৮। ত্বা ত্বাং নমস্যে নমস্করোমি। ননু কনিষ্ঠং মাং কথং নমস্করোষি ? তত্রাহ—আদ্যং পুরুষম্। কুতঃ ? প্রকৃতেঃ পরম্ ; তৎ কুতঃ ? ঈশ্বরং প্রকৃতেরপি নিয়ন্তারম্, অতএব সর্ব্বভূতানামন্তর্বহিশ্চ পূর্ণত্বেনাবস্থিতং, তথাপ্যলক্ষ্যম্ ॥

১৯। তত্র হেতুঃ—মায়ৈব জবনিকা তিরস্করিণীরূপা, তয়া আচ্ছন্নং প্রতিচ্ছন্নম্ ; অতোঽহমজ্ঞা ভক্তিযোগানভিজ্ঞা কেবলং নমস্যামি। অধঃ অক্ষজমিন্দ্রিয়জং জ্ঞানং যস্মাত্তম্ ; অব্যয়ম্ অপরিচ্ছিন্নম্, তৎ প্রপঞ্চয়তি—মূঢ়দৃশা দেহাভিমানিনা পুংসা ত্বং ন লক্ষ্যসে ॥

২০। কিঞ্চ, পরমহংসানামাত্মানাত্মবিবেকিনাম্, ততো মুনীনাং মননশীলানামপি, ততশ্চামলাত্মনাং নিবৃত্তরাগাদীনামপি, তথা তেন নিজ-

১। অনিবার্য্যত্বাৎ (ক)।

মহিম্না ন লক্ষ্যসে। ততো ভক্তিযোগং বিধাতুং ত্বাং বয়ং স্ত্রিয়ঃ কথং হি পশ্যেম? যদ্বা, পরমহংসানামপি ভক্তিযোগবিধানার্থং ত্বামাত্মারামান্ মুনীনপি অচিন্ত্যনিজগুণৈরাকৃষ্য ভক্তিযোগং বিধাতুং কারয়িতুমবতীর্ণমিত্যর্থঃ॥

২১—২২। জ্ঞানভক্ত্যোরশক্যত্বমুক্ত্বা পুনঃ কেবলং নমস্করোতি—কৃষ্ণায়েতি দ্বাভ্যাম্॥ (২২) পঙ্কজং নাভৌ যস্য, পঙ্কজানাং মালাস্তি যস্য, পঙ্কজবৎ প্রসন্নে নেত্রে যস্য, পঙ্কজাঙ্কিতাবঙ্ঘ্রী যস্য তস্মৈ॥

২৩—২৪। তৎকৃতোপকারাননুস্মরতি—যথেতি দ্বাভ্যাম্। অয়মর্থঃ—মাতৃতোঽপি ময্যধিকা তব প্রীতিঃ। তথাহি হে হৃষীকেশ! যথা দেবকী কংসেন রুদ্ধা ত্বয়া বিমোচিতা, অহঞ্চ কিং তথৈব বিমোচিতেতি কাক্বা মহান্ বিশেষ উক্তঃ। তং দর্শয়তি—সা অতিচিরং রুদ্ধা সতী তস্মাদেব সকৃদ্বিমোচিতা, তথা শুচার্পিতা চ সতী, ন চ তস্যাঃ পুত্রা রক্ষিতাঃ। অস্তি চান্যো নাথস্তস্যাঃ; অহন্তু বিপদ্গণাৎ, তত্রাপি মুহুঃ শীঘ্রঞ্চ, সাত্মজা চ ত্বয়ৈব নাথেনেতি॥ (২৪) বিপদ্গণমেব দর্শয়তি—বিষাদ্-ভীমস্য বিষ-মোদকদানাৎ, মহাগ্নের্জতুগৃহদাহাৎ, পুরুষাদা হিড়িম্বাদয়ো রাক্ষসাস্তেষাং দর্শনাৎ, অসৎসভায়া দ্যূতস্থানাৎ, অভিতো রক্ষিতা আস্ম অভবাম॥

২৫। যদ্ যাসু বিপৎসু। কীদৃশং দর্শনম্? নাস্তি পুনরপি ভবদর্শনং যস্মাৎ তৎ॥

২৬। সম্পদস্তু শ্রেয়ঃপরিপন্থিন্য ইত্যাহ—জন্ম সৎকুলে, জন্মাদিভিরেধমানো মদো যস্য সঃ, অভিধাতুং শ্রীকৃষ্ণ গোবিন্দেতি বক্তুমপি, অকিঞ্চনানাং গোচরং বিষয়ভূতম্॥

২৭। প্রস্তুতমনোরথ-পূরণায় পুনঃ প্রণমতি—নম ইতি। অকিঞ্চনা ভক্তা এব বিত্তং সর্ব্বস্বং যস্য তস্মৈ। ততঃ কিম্? নিবৃত্তা গুণবৃত্তয়ো

ধর্ম্মার্থকামবিষয়া যস্মাৎ তস্মৈ। তৎ কুতঃ? আত্মারামায়। তৎ কুতঃ? শান্তায় রাগাদিরহিতায়। কিঞ্চ, কৈবল্যপতয়ে কৈবল্যং দাতুং সমর্থায়॥

২৮। নন্থ দেবকীপুত্রং মাং কথমেবং স্তৌষি? তত্রাহ—মন্যে ত্বাং কালং, ন তু দেবকীপুত্রম্। তত্র হেতবঃ—ঈশানং নিয়ন্তারম্, অনাদিনিধনমাদ্যন্তশূন্যম্, বিভুং প্রভুম্, সমং যথা ভবতি তথা সর্ব্বত্র চরন্তম্। নন্থ পার্থসারথের্মম কথং সাম্যম্? তত্রাহ—যদ্ যতস্ত্বত্তো নিমিত্তভূতাদ্ ভূতানামেব মিথঃ কলিঃ কলহো ভবতি, ন তু স্বতস্ত্বয়ি বৈষম্যম্॥

২৯। নন্থ নিগ্রহানুগ্রহরূপং ময়ি প্রসিদ্ধং বৈষম্যম্; অত আহ—ন বেদেতি. নৃণাং বিড়ম্বনমনুকরণমীহমানস্য কুর্ব্বতঃ, যস্মিন্ ত্বয়ি বিষমা মতিরনুগ্রহনিগ্রহরূপা ভবতি॥

৩০। অজস্য জন্ম, অকর্ত্তুঃ কর্ম্ম, তির্য্যক্ষু বরাহাদিরূপেণ, নৃষু রামাদিরূপেণ, ঋষিষু নরনারায়ণাদিরূপেণ[১], যাদঃসু মৎস্যাদিরূপেণ॥

৩১। নরবিড়ম্বনমত্যাশ্চর্য্যমিত্যাহ—গোপীতি, গোপী যশোদা ত্বয়ি কৃতাগসি দধিভাণ্ডস্ফোটনং কৃতবতি যাবৎ দাম রজ্জুমাদদে জগ্রাহ, তাবৎ তৎক্ষণমেব তে তব যা দশা অবস্থা, সা মাং বিমোহয়তি। কিম্ভূতস্য? অশ্রুভিঃ কলিলং ব্যামিশ্রমঞ্জনং যয়োঃ, তে চ তে সম্ভ্রমে ব্যাকুলে অক্ষিণী যস্মিন্, তদ্বক্ত্রং নিনীয় অধঃকৃত্বা তাড়য়িষ্যতীতি ভয়স্য ভাবনয়া স্থিতস্য। যদ্যতঃ ত্বত্তো ভীরপি স্বয়ং বিভেতি, তস্য তে দশা॥

৩২—৩৫। অতএব জগন্মোহনতয়া দুর্জ্ঞেয়ত্বাৎ তব জন্মাদি বহুধা বর্ণয়ন্তীত্যাহ—কেচিদিতি চতুর্ভিঃ। পুণ্যশ্লোকস্য প্রিয়স্য যুধিষ্ঠিরস্য কীর্ত্তয়ে, যদোরেব কীর্ত্তয়ে ইতি বা, অন্ববায়ে বংশে মলয়স্য কীর্ত্তয়ে বংশে বা চন্দনং যথা॥ (৩৩) তথা বসুদেবস্য ভার্য্যায়াং দেবক্যামজ

১। বামনাদিরূপেণ (ক)।

এব ত্বমভ্যগাৎ পুত্রত্বমিতি শেষঃ। প্রথমপুরুষস্ত্বার্ষঃ। অর্ভত্বমিতি পাঠঃ সুগমঃ। তাভ্যামেব পূর্ব্বং সুতপঃ-পৃশ্নিরূপাভ্যাং যাচিতঃ সন্। অস্য জগতঃ ক্ষেমায়॥ (৩৪) আত্মভুবেতি ব্রহ্মপ্রার্থনস্য প্রাধান্যবিবক্ষয়া মতান্তরম্॥ (৩৫) পরমানন্দস্বরূপাজ্ঞানমবিদ্যা, ততো দেহাদ্যভিমানাৎ কামঃ, ততঃ কর্ম্মাণি, তৈঃ ক্লিশ্যমানানাং তন্নিবৃত্তয়ে শ্রবণাদ্যর্হাণি কর্ম্মাণি করিষ্যন্॥

৩৬। অস্য পক্ষস্য সিদ্ধান্ততামভিপ্রেত্য শ্রবণাদিফলমাহ—শৃণ্বন্তীতি, নন্দন্তি অন্যৈঃ কীর্ত্ত্যমানমভিনন্দন্তি যে জনাঃ, ঈহিতং চরিতম্, তাবকং ত্বদীয়ং পদাম্বুজম্। ত এব পশ্যন্ত্যেব অচিরেণৈবেতি সর্ব্বত্রাবধারণম্। কীদৃশম্? ভবপ্রবাহস্য জন্মপরম্পরায়া উপরমো যস্মিন্ তৎ॥

৩৭—৪০। ইদানীং তবাস্মৎপরিত্যাগোঽনুচিত ইত্যাশয়েনাহ—অপীতি চতুর্ভিঃ। হে প্রভো! সুহৃদোঽতিস্নিগ্ধান্ অনুজীবিনশ্চ নোঽস্মাপি স্বিৎ কিংস্বিৎ ত্বং জিহাসসি? যেষামস্মাকমন্যৎ পরায়ণং নৈবাস্তি। কুতঃ? রাজসু যোজিতমংহো দুঃখং যৈস্তেষাম্। স্বানাং কৃতমীহিত-মপেক্ষিতং যেন তস্য সম্বোধনম্। স্বকৃতেহিত ইতি বিসর্গান্তপাঠে ত্বংপদবিশেষণম্॥ (৩৮) নন্ত তব বন্ধবো যাদবাঃ, পুত্রাশ্চ পাণ্ডবাঃ, শূরাঃ সমর্থাশ্চ, তৎ কিং কার্পণ্যং ভাষসে? অত আহ—কে ইতি। যর্হি ভবতো ভগবতোঽদর্শনং যদা ত্বমস্মান্ ন পশ্যসি, তদা নামরূপাভ্যাং নাম্না বিখ্যাতাঃ, রূপেণ সমৃদ্ধ্যা চ যদুভিঃ সহিতাঃ পাণ্ডবা নাম কে বয়ম্? ন কেঽপি; অতিতুচ্ছা ইত্যর্থঃ। হৃষীকাণামিন্দ্রিয়াণামীশিতুঃ জীবস্যাদর্শনে যথা ন কিঞ্চিন্নাম চ রূপঞ্চ তদ্বৎ॥ (৩৯) কিঞ্চ যথেদানীমিয়মস্মৎপাল্যা ভূমিঃ স্বৈরসাধারণৈর্বজ্রাঙ্কুশাদিভির্লক্ষণৈর্বিলক্ষিতৈশ্চিহ্নিতৈস্ত্বৎপদৈরঙ্কিতা সতী ভাতি, তত্র তদা ত্বয়ি নির্গতে সতি ন শোভিষ্যতে॥ (৪০) অপি চ ইমে জনপদা দেশাঃ স্বৃদ্ধাঃ সুসমৃদ্ধয়ঃ সন্তঃ॥

৪১। গমনে পাণ্ডবানামকুশলম্, অগমনে চ যাদবানামিত্যুভয়তো ব্যাকুলচিত্তা সতী তেষু স্নেহনিবৃত্তিং প্রার্থয়তে—অথেতি। বিশ্বেশেত্যাদি সম্বোধনানি স্নেহপাশচ্ছেদে সামর্থ্যখ্যাপনায় ; দৃঢ়ং সন্তম্ ॥

৪২। ততঃ কিম্? অত আহ—ত্বয়ীতি। অনন্যবিষয়া সতী মে মতী রতিমুদ্বহতাৎ অনবচ্ছিন্নাং প্রীতিং করোত্বিত্যর্থঃ। ওঘং পূরম্, যথা গঙ্গা প্রতিবন্ধং ন গণয়তি, এবং মতিরপি বিঘ্নান্ ন গণয়ত্বিতি ভাবঃ ॥

৪৩। এবমভ্যর্থ্য পুনঃ প্রণমতি—হে শ্রীকৃষ্ণ! তে নমঃ। উপকারাননুস্মরন্তী বহুধা সম্বোধয়তি—কৃষ্ণসখ! অর্জ্জুনস্য সখে! বৃষ্ণীনাম্ ঋষভ শ্রেষ্ঠ! অবন্যৈ ভূম্যৈ দ্রুহ্যন্তি যে রাজন্যাস্তেষাং বংশস্য দহন! এবমপি অনপবর্গবীর্য্য অক্ষীণপ্রভাব! গোবিন্দ প্রাপ্তকামধেন্বৈশ্বর্য্য! গোদ্বিজসুরাণামার্ত্তিহরোঽবতারো যস্য ইতি ॥

৪৪। কলানি মধুরাণি পাদানি যেষু, তৈর্বাক্যৈঃ পরিণতঃ স্তুতোঽখিল উদয়ো মহিমা যস্য সঃ ; স্তুতাবিত্যস্মাৎ পরিণুতেতি বক্তব্যে দীর্ঘশ্ছন্দোঽনুরোধেন ; মন্দমীষৎ। তস্য হাস এব মায়া, বক্ষ্যতি হি—'হাসো জনোন্মাদকরী চ মায়া' ইতি ॥

৪৫। ত্বয়ি মেঽনন্যবিষয়া মতিরিতি যৎ প্রার্থিতং, তদ্বাঢ়মিত্যঙ্গীকৃত্য রথস্থানাদ্গজসাহ্বয়মাগত্য পশ্চাৎ তাঞ্চ অন্যাশ্চ সুভদ্রাদ্যাঃ স্ত্রিয় উপামন্ত্র্য অনুজ্ঞাপ্য স্বপুরং যাস্যন্ রাজ্ঞা যুধিষ্ঠিরেণ প্রেম্ণা অত্রৈব কিঞ্চিৎ কালং নিবসেতি সম্প্রার্থ্য নিবারিতঃ ॥

৪৬। অথ ভীষ্মনির্যাণোৎসবং বক্তুমুপোদ্ঘাতকথাং প্রস্তৌতি। ব্যাসাদ্যৈঃ প্রবোধিতোঽপি শুচা ব্যাপ্তঃ সন্নাবুধ্যত বিবেকং নং প্রাপ। কুতঃ? ঈশ্বরেহায়া অজ্ঞৈঃ, স্বভক্তভীষ্মনির্যাণমহোৎসবায় রাজ্ঞা সহ কুরুক্ষেত্রং গন্তব্যং, তন্মুখেনৈবায়ং প্রবোধনীয় ইতি হীশ্বরাভিপ্রায়ঃ কার্য্যদ্বয়বিধায়কঃ, তমজানদ্ভিরিত্যর্থঃ। শ্রীকৃষ্ণেনাপি প্রবোধিতো নাবুধ্যত।

তত্র হেতুঃ—অদ্ভুতকর্ম্মণেতি যথা কুরুপাণ্ডবসন্ধানার্থং গতোঽপি যথোচিতমেব বদন্নপি বিগ্রহমেব স্বীকৃতবান্[১], এবমত্রাপি প্রবোধয়ন্নবোধমেব দৃঢ়ীচকারেত্যর্থঃ ॥

৪৭—৫২। অবোধমেব প্রপঞ্চয়তি—আহেতি ষড়্ভিঃ। প্রাকৃতেন অবিবেকব্যাপ্তেন আত্মনা চিত্তেন। হে বিপ্রাঃ॥ (৪৮) পারক্যস্ত শ্ব-শৃগালাদ্যাহারস্ত দেহস্যার্থে মে ময়া অক্ষৌহিণীঃ অক্ষৌহিণ্যঃ। অক্ষৌহিণী-প্রমাণং ব্যাসেনোক্তম্—'অক্ষৌহিণী প্রসংখ্যাতা রথানাং দ্বিজসত্তমাঃ। সংখ্যা গণনতত্ত্বজ্ঞৈঃ সহস্রাণ্যেকবিংশতিঃ॥ শতান্যুপরি চাষ্টৌ চ তথা ভূয়শ্চ সপ্ততিঃ। গজানাঞ্চ প্রসংখ্যানমেতদেব প্রকীর্ত্তিতম্॥ জ্ঞেয়ং শতসহস্রন্তু সহস্রাণি নবৈব তু। নরাণামপি পঞ্চাশচ্ছতানি ত্রীণি চৈব হি॥ পঞ্চষষ্টিসহস্রাণি তথাশ্বানাং শতানি চ। দশোত্তরাণি ষট্ প্রাহুঃ সংখ্যাতত্ত্ববিদো জনাঃ॥ এতামক্ষৌহিণীং প্রাহুর্যথাবদিহ সংখ্যয়া॥' ইতি॥ (৪৯) সুহৃদঃ সম্বন্ধিনঃ, মিত্রাণি সখায়ঃ, পিতরঃ পিতৃব্যাঃ॥ (৫০) স্মৃত্যাদ্যনুশাসনাদ্ধর্ম্মযুদ্ধে ন দোষ ইতি চেৎ, তত্রাহ—নৈনো রাজ্ঞ ইতি। দ্বিষাং বধঃ, এনঃ পাপং ন ভবতীতি যৎ শাসনং শিক্ষারূপং বচঃ। কুতো ন কল্পতে, যতস্তদ্বচঃ প্রজাভর্ত্তুরেব; অয়ং ভাবঃ—স্বপ্রজানামন্যতো বাধে প্রসক্তে তদ্বধোঽনুজ্ঞাতঃ, দুর্যোধনেন তু প্রজায়াং পাল্যমানায়াং ময়া কেবলং রাজ্যলোভেন হতত্বাং পাপমেবেদমিতি॥ (৫১) কিঞ্চ, যুদ্ধে পুংসাং বধো ভবতু নাম ধর্ম্মঃ, স্ত্রীণান্তু ময়া হতা বন্ধবো যাসাং তাসাং, যোঽসৌ দ্রোহোঽনুদ্দিষ্টোঽপ্যুত্থিতঃ, তং ব্যাপোহিতুমপাকর্ত্তুং কল্পঃ সমর্থো নাহম্। গৃহমেধীয়ৈঃ গৃহাশ্রমবিহিতৈঃ॥ (৫২) ননু চ 'সর্ব্বং পাপ্মানং তরতি ব্রহ্মহত্যাং যোঽশ্বমেধেন যজতে, য উ চৈনমেবং বেদ' ইতি শ্রুতেঃ পাপমশ্বমেধেন নশ্যেদেবেত্যাশঙ্ক্য অবিবেকবিজৃম্ভিতং হেতুবাদমাশ্রিত্য

১। দৃঢ়ীকৃতবান্ (ঘ)।

নিরাকরোতি—যথেতি ; যথা ঘনপঙ্কেন পঙ্কাম্ভো ন মৃজ্যতে, যথা বা সুরালেপ[১]-কৃতমপাবিত্র্যং বহ্ব্যা সুরয়া ন মৃজ্যতে, তথৈব ভূতহত্যামেকাং প্রমাদতো জাতাং বুদ্ধিপূর্ব্বকহিংসাপ্রায়ৈর্যজ্ঞৈর্মাষ্টু্ং শোধয়িতুং নার্হতীতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং প্রথমস্কন্ধে অষ্টমোঽধ্যায়ঃ ॥ ৮ ॥

নবমোঽধ্যায়ঃ

যুধিষ্ঠিরায় ভীষ্মেণ সর্ব্বধর্ম্মনিরূপণম্ ।
কৃষ্ণস্তুতিশ্চ মুক্তিশ্চ নবমে তস্য বর্ণ্যতে ॥ (১)

১। তদর্থং তস্যাবিবেকঃ শ্রীকৃষ্ণেন সংবর্দ্ধিতস্তদ্দর্শয়তি—ইতীতি। সর্ব্বেষাং ধর্ম্মাণাং বিবিৎসয়া বেদিতুমিচ্ছয়া, বিনশনং কুরুক্ষেত্রম্, দেবব্রতো ভীষ্মঃ ॥

২। সন্তঃ শ্রেষ্ঠা অশ্বা যেষু তৈ রথৈঃ ॥

৪। সানুগাঃ পরিবারসহিতাঃ ॥

৫। তত্র তদা তত্রাসন্, তৎক্ষণমেবাগতা ইত্যর্থঃ। ভরতপুঙ্গবং ভীষ্মম্ ॥

৬। রেণুকাসুতঃ পরশুরামঃ ॥

৮। ব্রহ্মরাতঃ শুকঃ, আঙ্গিরসো বৃহস্পতিঃ ॥

৯। বসূত্তমো ভীষ্মঃ, দেশকালবিভাগবিদিতুত্থাতুমশক্যত্বাচ্ছয়ান এব মনসা বাচা চ পূজয়ামাসেত্যভিপ্রায়ঃ ॥

১০। হৃদিস্থং সন্তং পুরত আসীনং পূজয়ামাস ॥

১। সুরালেশ- (ক, ঘ)।

১১। উপাসীনান্ সমীপে উপবিষ্টান্, প্রশ্রয়ো বিনয়ঃ, প্রেম স্নেহঃ, তাভ্যাং সঙ্গতান্ উপসন্নান্, সন্নতানিতি পাঠে তাভ্যামবনতান্। অভ্যাচষ্ট অভ্যভাষত, অনুরাগাস্রৈঃ স্নেহাশ্রুভিঃ অন্ধীভূতেন চক্ষুষা উপলক্ষিতঃ দদর্শেতি বা ॥

১২—২২। অভিভাষণমেবাহ—অহো ইত্যেকাদশভিঃ। হে ধর্ম্ম-নন্দনাঃ ! ক্লিষ্টং যথা ভবত্যেবং জীবিতুং নার্হথ যূয়মিতি যৎ, এতদহো কষ্ট-জুগুপ্সিতম্, অহো অন্যায্যঞ্চৈতৎ, যতো যূয়ং বিপ্রো ধর্ম্মোঽচ্যুতশ্চ আশ্রয়ো যেষাং তে ॥ (১৩) কিঞ্চ সংস্থিতে মৃতে, বালাঃ প্রজাঃ পুত্রা যস্যাঃ সা ; বধূশ্চেতি দৈন্যং দর্শিতম্। তোকান্যপত্যানি তদ্বতী অপত্যৈঃ সহ ক্লেশান্ প্রাপ্তেত্যর্থঃ ॥ (১৪) কালকৃতত্বেন শোকং বারয়তি—সর্ব্বমিতি দ্বাভ্যাম্। ভবতামপি, যদ্বশে যদ্বশবর্ত্তী ॥ (১৫) অহো দুর্ঘটঘটনাপটুঃ কাল ইত্যাহ—যত্রেতি। কৃষ্ণোঽর্জ্জুনঃ, অস্ত্রী ধন্বী, ততস্তত্রাপি বিপৎ, পুণ্যশারীরবলশস্ত্র-নৈপুণ্যশস্ত্র[১]-দেবতাসম্পত্তাবপীত্যর্থঃ ॥ (১৬) ননু কৃষ্ণং কথং কালোঽতি-ক্রামেদিত্যপেক্ষায়ামাহ—ন হীতি। অস্য শ্রীকৃষ্ণস্যেতি অঙ্গুল্যা দর্শয়তি বিধিৎসিতং কর্ত্তুমিষ্টম্। যস্য বিধিৎসিতস্য বিজিজ্ঞাসয়া ॥ (১৭) ইদং সুখাদি, দৈবতন্ত্রমীশ্বরাধীনং ব্যবস্য নিশ্চিত্য তস্যেশ্বরস্যানুবিহিতোঽনুবর্ত্তী সন্, কর্ত্তরি ক্তঃ। হে নাথ ! কুলপরম্পরাগতস্বামিন্ ! প্রভো সমর্থ ! অনাথাঃ প্রজাঃ পাহি ॥ (১৮) অনুবিধেয়ঃ পরমেশ্বরশ্চ শ্রীকৃষ্ণ এবেত্যাহ এষ এব ভগবান্ সর্ব্বেশ্বরঃ, যত আদ্যঃ পুমান্। তচ্চ কুতঃ ? যতো নারায়ণঃ সাক্ষাৎ ॥ (১৯) তদুপপাদয়তি অস্যেতি, অনুভাবং প্রভাবম্ ॥ (২০) ত্বমজ্ঞানাৎ যমেবং মন্যসে। মাতুলেয়ং মাতুল্যাঃ দেবক্যাঃ সুতম্, প্রিয়ং প্রীতিবিষয়ম্, মিত্রং প্রীতিকর্ত্তারম্, সুহৃত্তমং প্রত্যুপকারানপেক্ষ্যোপ-কারকম্, সৌহৃদাদ্বিশ্বাসাদকরোঃ কৃতবানসি ; সচিবং মন্ত্রিণম্ ॥ (২১) ননু

১। -শাস্ত্র- (ক, খ, গ)।

ঈশ্বরশ্চেৎ, কথং নীচে সারথ্যাদৌ প্রবৃত্তঃ ? তত্রাহ—সর্ব্বেতি। তৎকৃতং নীচোচ্চকর্ম্মকৃতং মম যোগ্যমযোগ্যমিতি মতিবৈষম্যং ক্বচিদপি নাস্তি। কুতঃ ? নিরবদ্যস্য রাগাদিশূন্যস্য। তৎ কুতঃ ? অনহঙ্কৃতেঃ। তচ্চ কুতঃ ? অদ্বয়স্য। তদপি কুতঃ ? সমদৃশঃ। তত্রাপি হেতুঃ—সর্ব্বস্যাত্মনঃ, যথেষ্টং বা হেতুহেতুমদ্ভাবঃ ॥ (২২) তথাপি সমত্বেঽপি। হে ভূপ ! অনুকম্পিতমনুকম্পাম্ ॥

২৩—২৪। ইদানীং স্বদেহত্যাগপর্য্যন্তং শ্রীকৃষ্ণাবস্থানং প্রার্থয়তে—ভক্ত্যেতি দ্বাভ্যাম্ ॥ (২৪) যাবদিতি বিলম্বং দ্যোতয়তি। অহং হিনোমি ত্যজামীতি স্বাতন্ত্র্যম্। ইদমিত্যনাত্মত্বেন জ্ঞাতম্। প্রসন্নহাসেন অরুণ-লোচনাভ্যাঞ্চ উল্লসৎ শোভমানং মুখাম্বুজং যস্য। ধ্যানস্য পন্থা বিষয়ঃ, যোঽন্যৈরন্তশ্চিন্ত্যতে কেবলং, সোঽগ্রতঃ স্থিতঃ সন্ মাং প্রতীক্ষতা-মিত্যর্থঃ ॥

২৫। তৎ সানুকম্পং বাক্যমাকর্ণ্য ॥

২৬—২৮। পুরুষস্য স্বভাবেন বিহিতান্ নরজাতিসাধারণান্ (ধর্ম্মান্) বর্ণয়ামাসেতি তৃতীয়েনান্বয়ঃ। যথাবর্ণং বর্ণধর্ম্মান্, যথাশ্রমমাশ্রমধর্ম্মাংশ্চ, বৈরাগ্যরাগাভ্যামুপাধিভ্যাং ক্রমেণাম্নাতমুভয়ং নিবৃত্তিপ্রবৃত্তিরূপং লক্ষণং যেষাং তান্ ॥ (২৭) পুনস্তত্রৈব[১] বিশেষমাহ—দানেতি। মোক্ষধর্ম্মান্ শমদমাদীন্, ভগবদ্ধর্ম্মান্ হরিতোষকান্ দ্বাদশ্যাদিনিয়মরূপান্, সমাসব্যাসৌ সংক্ষেপবিস্তারৌ, তাবেব যোগাবুপায়ৌ ততস্তাভ্যাম্ ॥ (২৮) ধর্ম্মাদীংশ্চ যথাধিকারং প্রতিনিয়তোপায়সহিতান্, যথা যথাবৎ, নানাখ্যানেষু যে যে ইতিহাসাস্তেষু যথা সন্তি তথা বর্ণয়ামাস ॥

২৯। ছন্দেন ইচ্ছয়া মৃত্যুর্যস্য ॥

১। তমেব (*ঘ)।

৩০। সহস্রণীর্যুদ্ধে সমীপস্থান্ সহস্রং রথিনো নয়তি পালয়তীতি সহস্রণীর্ভীষ্মঃ। সহস্রিণীরিতি পাঠে সহস্রার্থবতীর্গিরঃ। লসন্তৌ পীতৌ পটৌ যস্য তস্মিন্। অমীলিতদৃগেব মনো ব্যধারয়ৎ॥

৩১। অনয়ৈব বিশুদ্ধয়া ধারণয়া হতমশুভং যস্য সঃ, তস্য শ্রীকৃষ্ণস্যেক্ষয়া কৃপাদৃষ্ট্যৈব গতা আয়ুধশ্রমা যস্য সঃ, অতশ্চ নিবৃত্তঃ সর্ব্বেন্দ্রিয়বৃত্তীনাং বিভ্রমো বিবিধং ভ্রমণং যস্মাৎ সঃ ; জন্যং দেহম্॥

৩২। পরমফলরূপাং শ্রীকৃষ্ণে রতিং প্রার্থয়িতুং প্রথমং স্বকৃতমর্পয়তি—ইতীতি। নানাধর্ম্মাদ্যুপায়ৈর্মতির্মনোধারণলক্ষণা উপকল্পিতা সমর্পিতা। ক্ব ? সাত্বতানাং পুঙ্গবে শ্রেষ্ঠে ভগবতি ; বিতৃষ্ণা নিষ্কামা, অবিতৃষ্ণেতি বা চ্ছেদঃ, অবিতৃপ্তা ইত্যর্থঃ। বিগতো ভূমা যস্মাৎ তস্মিন্, যমপেক্ষ্যান্যত্র মহত্ত্বং নাস্তীত্যর্থঃ। তদেব পরমৈশ্বর্য্যমাহ—স্বসুখং স্বস্বরূপভূতং পরমানন্দমুপগতে প্রাপ্তবত্যেব। ক্বচিৎ কদাচিৎ, বিহর্ত্তুং ক্রীড়িতুং প্রকৃতিং যোগমায়ামুপেয়ুষি স্বীকৃতবতি, ন তু স্বরূপতিরোধানেন জীববৎ পারতন্ত্র্যমিত্যর্থঃ। বিহর্ত্তুমিত্যুক্তং প্রপঞ্চয়তি—যদ্‌যতঃ প্রকৃতেঃ ভবপ্রবাহঃ সৃষ্টিপরম্পরা ভবতি॥

৩৩। ইদানীং শ্রীকৃষ্ণমূর্ত্তিং বর্ণয়ন্ রতিং প্রার্থয়তে—ত্রিভুবনকমনং ত্রিলোক্যামেকমেব যৎ কমনীয়ং, তদ্বপুর্দধানে রতির্মেঽস্তু। কথম্ভূতং বপুঃ ? তমালবন্নীলো বর্ণো যস্য তৎ, প্রাতঃকালীনা রবেঃ করা ইব স্বত এব গৌরে পীতে বরে নির্ম্মলে অম্বরে যস্মিন্ তৎ, অলককুলৈরুপর্য্যাবৃতমাননাব্জং যস্মিন্ তৎ ; বিজয়সখে পার্থসারথৌ ; অনবদ্যা অহৈতুকী ফলাভিসন্ধিরহিতা রতিরস্তু॥

৩৪। বিজয়সখত্বমেবানুবর্ণয়ন্ রতিং প্রার্থয়তে। যুধি যুদ্ধে তুরগাণাং খুররজস্তরগরজস্তেন বিধূম্রা ধূসরাস্তে চ তে বিশ্বঞ্চ ইতস্ততশ্চলন্তঃ কচাঃ কুন্তলাস্তৈর্লুলিতং বিকীর্ণং শ্রমবারিস্বেদবিন্দুরূপম্, তেন ভক্তবাৎসল্য-

দ্যোতকেনালঙ্কৃতমাস্যং যস্য তস্মিন্ শ্রীকৃষ্ণে মম আত্মা মনোঽস্তু রমতামিত্যর্থঃ। পুনঃ কিম্ভূতে? মদীয়ৈর্নিশিতৈস্তীক্ষ্ণৈঃ শরৈর্বিভিদ্যমানা ত্বক্ যস্য, শরৈরেব বিলসৎ (ক্রুট্যৎ) কবচং যস্য তস্মিন্॥

৩৫। কিঞ্চ, সপদীতি। 'সেনয়োরুভয়োর্মধ্যে রথং স্থাপয় মেঽচ্যুত! যাবদেতান্ নিরীক্ষেঽহং যোদ্ধুকামানবস্থিতান্॥' ইতি সখ্যুরর্জ্জুনস্য বচো নিশম্য সপদি তৎক্ষণমেব স্বপরয়োর্বলয়োঃ সৈন্যয়োর্মধ্যে রথং নিবেশ্য স্থিতে পার্থসখে মম রতিরস্তু। তত্র স্থিত্বা কৃতং সখ্যং দর্শয়তি—পরস্য দুর্য্যোধনস্য সৈনিকানামায়ুরক্ষ্ণা কালদৃষ্ট্যা হৃতবতি 'অসৌ ভীষ্মঃ, অসৌ দ্রোণঃ, অসৌ কর্ণঃ' ইতি তত্তৎপ্রদর্শনব্যাজেন দৃষ্ট্যৈব সর্ব্বেষামায়ু-রাকৃষ্যার্জ্জুনস্য জয়ং কৃতবতি॥

৩৬। ন কেবলমর্জ্জুনস্য সপত্নায়ুর্হরণেনৈব জয়মাবহৎ, কিন্ত্ববিদ্যাহর-ণেনাপীত্যাহ—ব্যবহিতা দূরে স্থিতা যা পৃতনা, তস্যা মুখমিব মুখমগ্রে স্থিতান্ ভীষ্মাদীন্ নিরীক্ষ্যেত্যর্থঃ। স্বজনবধাদ্বিমুখস্য নিবৃত্তস্য; তদুক্তং গীতাসু—'এবমুক্ত্বার্জ্জুনঃ সংখ্যে রথোপস্থ উপাবিশৎ। বিসৃজ্য সশরং চাপং শোকসংবিগ্নমানসঃ॥' ইতি। কুমতিম্—অহং হন্তেত্যাদি-কুবুদ্ধিম্॥

৩৭—৩৮। মম তু মহান্তমনুগ্রহং যঃ কৃতবানিত্যাহ দ্বাভ্যাম্—স্বনিগমম্ 'অশস্ত্র এবাহং সাহায্যমাত্রং করিষ্যামি' ইত্যেবম্ভূতাং স্বপ্রতিজ্ঞাং হিত্বা, 'শ্রীকৃষ্ণং শস্ত্রং গ্রাহয়িষ্যামি' ইত্যেবংরূপাং মৎপ্রতিজ্ঞামৃতং সত্যং যথা ভবতি তথা অধি অধিকাং কর্ত্তুং যো রথস্থঃ সন্নবপ্লুতঃ সহসৈবাবতীর্ণঃ সন্নভ্যয়াদভিমুখমধাবৎ। ইভং হন্তুং হরিঃ সিংহ ইব। কিম্ভূতঃ? ধৃতো রথচরণশ্চক্রং যেন সঃ, তদা চ সংরম্ভেণ মনুষ্যনাট্যবিস্মৃতেরুদরস্থ-সর্ব্বভূতভুবনভারেণ প্রতিপদং চলদ্গুঃ চলন্তী গৌঃ পৃথ্বী যস্মাৎ সঃ, তেনৈব সংরম্ভেণ পথি গতং পতিতমুত্তরীয়ং বস্ত্রং যস্য স মুকুন্দো মে গতির্ভবত্বি-ত্যুত্তরেণান্বয়ঃ॥ (৩৮) এবং যদাভ্যয়াত্তদা স্ময়মানস্যাততায়িনো ধন্বিনে

মে শিতৈস্তীক্ষ্ণৈর্বিশিখৈর্হতঃ ; অতো বিশীর্ণদংশঃ বিধ্বস্তকবচঃ, ক্ষতজেন রুধিরেণ পরিপ্লুতঃ ব্যাপ্তঃ সন্ প্রসভং বলাদ্বারয়ন্তমর্জ্জুনমপ্যতিক্রম্য মদ্বধার্থমভিসসার অভিমুখং জগাম ; এবং যো লোকদৃষ্ট্যার্জ্জুনপক্ষপাতীব লক্ষিতঃ, বস্তুতস্তু মমৈবানুগ্রহং কৃতবান্ ; যৎ 'মদ্ভক্তেনোক্তং বচো মা মৃষাস্তু' ইতি স ভগবান্ মে মম গতির্ভবত্বিত্যর্থঃ ॥

৩৯—৪০　তদেবমন্যায়ৈরপি ভৃত্যরক্ষাব্যগ্রে শ্রীকৃষ্ণে রতিমাশাস্তে—বিজয়োঽর্জ্জুনঃ, তস্য রথ এব কুটুম্বঃ—অকৃত্যশতৈরপি রক্ষণীয়ো যস্য তস্মিন্ ; আত্তং তোত্রং প্রতোদো যেন তস্মিন্ ; ধৃতাশ্চ যে হয়ানাং রশ্ময়ঃ প্রগ্রহাস্তে সন্তি যস্য তস্মিন্ ; 'ব্রীহ্যাদিভ্যশ্চ' ইত্যনকারান্তাদপি রশ্মিশব্দাদীন্ । তচ্ছ্রিয়া সারথ্যশ্রিয়া ঈক্ষণীয়ে শোভমানে । মুমূর্ষোর্মর্ত্তুমিচ্ছোঃ । ননু অন্যায়বর্ত্তিনি কিমিতি রতিঃ প্রার্থ্যতে ? অত আহ—ভগবতি অচিন্ত্যৈশ্বর্য্যে । তদাহ—ইহ যুদ্ধে হতাঃ সর্ব্বে যং নিরীক্ষ্য সরূপং তৎসমানরূপং গতাঃ প্রাপ্তা ইতি দিব্যদৃষ্ট্যা পশ্যন্নাহ ॥ (৪০) ক্ষাত্রধর্ম্মেণ যুধ্যমানাস্তৎসরূপং প্রাপুরিতি ন চিত্রম্ । যতো মদান্ধা অপি প্রাপুরিত্যাহ—ললিতগতিশ্চ বিলাসশ্চ রাসাদির্বল্গুহাসাদিশ্চ । মঞ্জুগত্যাদিভিরাত্মীয়ৈস্তদীয়ৈর্বা কল্পিত উরুর্মহান্ মানঃ পূজা যাসাং তাঃ, অত উৎকটেন মদেন অন্ধাঃ, অতএব তদেকচিত্তত্বেন তস্য কৃতং কর্ম্ম গোবর্দ্ধনোদ্ধারণাদিকমনুকৃতবত্যো গোপবধ্বো যস্য প্রকৃতিং স্বরূপমগমন্ । মকারলোপস্ত্বার্ষঃ ; কিল প্রসিদ্ধৌ । তস্মিন্নেব রতিরস্তু ইতি পূর্ব্বেণৈবান্বয়ঃ ॥

৪১ । জগৎপূজ্যতামনুস্মরন্নাহ—মুনিগণৈর্নৃপবর্য্যৈশ্চ সঙ্কুলে ব্যাপ্তে অন্তঃসদসি সভামধ্যে যুধিষ্ঠিরস্য রাজসূয় এষাং মুনিগণাদীনামীক্ষণীয়ঃ 'অহো রূপমহো মহিমা' ইত্যেবমাশ্চর্য্যেণ বিলোকনীয়ঃ সন্ অর্হণমুপপেদে প্রাপ । এষ জগতামাত্মা মম দৃশি গোচরো দৃষ্টিবিষয়ঃ সন্ আবিঃ প্রকটো বর্ত্ততে ; অহো মে ভাগ্যমিতি ভাবঃ ॥

৪২। সোঽহং কৃতার্থোঽস্মীত্যাহ—তমিমমিতি। ইমমজং সম্যগধিগতঃ প্রাপ্তোঽস্মি। সম্যক্ত্বমাহ—বিধূতভেদমোহঃ। তদর্থং ভেদস্যৌপাধিকত্বমাহ—আত্মকল্পিতানাং স্বয়ং নির্ম্মিতানাং শরীরভাজাং প্রাণিনাং হৃদি হৃদি প্রতিহৃদয়ং ধিষ্ঠিতমধিষ্ঠিতম্, অধিষ্ঠায় স্থিতমিতি যাবৎ ; অকারলোপস্ত্বার্ষঃ। নৈকধা অনেকধা অধিষ্ঠানভেদাদনেকধা ভাতমিত্যর্থঃ। অত্র দৃষ্টান্তঃ—সর্ব্বপ্রাণিনাং দৃশং দৃশং প্রতি একমেবার্কমনেকধা প্রতীতমিবেতি ॥

৪৩। মনোবাগ্দৃষ্টীনাং বৃত্তিভিঃ, পরমাত্মনি শ্রীকৃষ্ণে, অন্তরেঽবলীনঃ শ্বাসো যস্য সঃ ॥

৪৪। নিষ্কলে নিরুপাধৌ সম্পদ্যমানং মিলিতমাজ্ঞায় আলক্ষ্য, বয়াংসি পক্ষিণ ইব ॥

৪৫। দেবৈর্মানবৈশ্চ বাদিতাঃ, রাজ্ঞাং মধ্যে যে সাধবোঽনস্যবঃ ॥

৪৬। নির্হরণাদীনি দাহসংস্কারাদীনি ; সম্যক্ পরেতস্য মুক্তস্যাপীত্যর্থঃ ॥

৪৭। তস্য গুহ্যনামভির্বেদোক্তৈঃ, কৃষ্ণ এব হৃদয়ং যেষাং তে কৃষ্ণহৃদয়াঃ ॥

৪৮। পিতরং ধৃতরাষ্ট্রম্, তপস্বিনীং সন্তাপবতীম্ ॥

৪৯। রাজা যুধিষ্ঠিরঃ ; অনুমতোঽনুজ্ঞাতঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে নবমোঽধ্যায়ঃ ॥ ৯ ॥

দশমোঽধ্যায়ঃ

দশমে কৃতকার্য্যস্য হস্তিনাপুরতো হরেঃ।
স্ত্রীভিঃ সংস্তূয়মানস্য বর্ণ্যতে দ্বারকাগমঃ॥ (১)

১। রাজ্যং চকারেত্যুক্তম্, তত্র পৃচ্ছতি—হত্বেতি। স্বস্য যুধিষ্ঠিরস্য রিক্থে ধনে স্পর্দ্ধন্তে স্ম যে তে তথা ; সম্প্রসারণমার্ষম্ ; যদ্বা, স্বরিক্থায় স্পৃৎ সংগ্রামো যেষাম্, অতএব ধনাদিহরণাদাততায়িনস্তান্ হত্বা প্রত্যবরুদ্ধভোজনো বন্ধুবধদুঃখেন সঙ্কুচিতভোগঃ, রাজ্যলোভেন প্রাপ্তভোগো বা কথং রাজ্যে প্রবৃত্তঃ? প্রবৃত্তো বা ততঃ কিমকার্ষীৎ? রেফ-ষকারয়োর্বিশ্লেষশ্ছান্দসঃ॥

২। রাজ্যপ্রবৃত্তেঃ শ্রীকৃষ্ণস্য প্রীতিং পর্য্যালোচ্য প্রবৃত্ত ইত্যাশয়েনোত্তরমাহ—বংশং কুরোঃ সংরোহয়িত্বা পরীক্ষিদ্রক্ষণেন সংরোহ্য অঙ্কুরিতং কৃত্বা। কথম্ভূতম্? বংশদবাগ্নিনির্হৃতং, বংশ এব দবো বনং তস্মাদুদ্ভূতঃ ক্রোধরূপোঽগ্নিস্তেন নির্হৃতং দগ্ধম্ ; নিজরাজ্যে নিবেশ্য চ॥

৩। প্রবৃত্তৌ হেতুমুক্ত্বা কিমকার্ষীদিত্যস্যোত্তরমাহ—নিশম্যেতি। প্রবৃত্তং যদ্বিজ্ঞানম্—পরমেশ্বরাধীনং জগৎ, ন স্বতন্ত্রমিত্যেবংরূপম্, তেন বিধূতো বিভ্রমোঽহঙ্কর্ত্তেত্যেবম্ভূতো মোহো যস্য সঃ ; অনুজৈরনুবর্ত্তিতঃ সেবিতঃ সন্ ; অজিতঃ শ্রীকৃষ্ণ এব আশ্রয়ো যস্য সঃ ; পরিধিঃ সমুদ্রস্তৎপর্য্যন্তাং গাং পৃথ্বীং পালয়ামাস॥

৪—৬। তস্য রাজ্যমনুবর্ণয়তি—কামমিতি ত্রিভিঃ। মহী সর্ব্বকামদোগ্ধ্রী বভূব, ব্রজান্ গোষ্ঠানি, উধস্বতীঃ উধস্বত্যঃ, উধঃ ক্ষীরাশয়ঃ, তদ্বত্যঃ স্থূলোধস ইত্যর্থঃ। সিষিচুরভ্যসিঞ্চন্॥ (৫) অন্বৃতু—ঋতৌ ঋতৌ॥ (৬), আধয়ো মনোব্যথাঃ, ব্যাধয়ো রোগাঃ, ক্লেশাঃ শীতো-

ষ্কাদিকৃতাঃ, দৈবঞ্চ ভূতানি চ আত্মা চ হেতুর্যেষামাধিদৈবিকাদীনাং তে জন্তূনাং নাভবন্ ॥

৭। ইদানীং দ্বারকাগমনং নিরূপয়িতুমাহ—উষিত্বেতি। স্বস্রুঃ সুভদ্রায়াঃ ॥

৮। তং যুধিষ্ঠিরম্ ॥

৯। যুযুৎসুর্ধৃতরাষ্ট্রাদ্ বৈশ্যায়াং জাতঃ, গৌতমঃ কৃপঃ, যমৌ নকুল-সহদেবৌ ॥

১০। অন্যাশ্চ স্ত্রিয়ঃ, মৎস্যসুতা উত্তরা, তস্যাঃ পুনগ্র হণং গর্ভরক্ষক-কৃষ্ণস্য বিরহমোহাধিক্যাৎ ; যদ্বা, মৎস্যসুতা সত্যবতী ॥

১২। তেষাং পুনঃ কৃষ্ণবিরহাসহনং কৈমুতিকন্যায়েনাহ—সৎ-সঙ্গাদিতি দ্বাভ্যাম্। সতাং সঙ্গাদ্ধেতোর্মুক্তঃ পুত্রাদিবিষয়ো দুঃসঙ্গো যেন সঃ। সদ্ভিঃ কীর্ত্ত্যমানং রুচিকরং যস্য যশঃ সকৃদপ্যাকর্ণ্য সৎসঙ্গং ত্যক্তুং ন শক্নোতি ॥ (১২) দর্শনাদিভিস্তস্মিন্ শ্রীকৃষ্ণে ন্যস্তা অভ্যস্তা ধীর্যেষাং তে ॥

১৩। অতএবানিমিষৈর্নেত্রৈস্তমেব বীক্ষ্যমাণাস্তত্র তত্রার্হণানয়নার্থং চলন্তি স্ম, যতঃ স্নেহেন সম্যগ্ বদ্ধাঃ, অতএব তমনুদ্রুতানি গতানি চেতাংসি যেষাং তে ॥

১৪। দেবকীসুতে অগারান্নির্যাতি নির্গচ্ছতি সতি বান্ধবস্ত্রিয় ঔৎকণ্ঠ্যাদাসক্ত্যাতিশয়াদ্ধেতোরুদ্গলৎ স্রবদ্বাষ্পমশ্রু ন্যরুন্ধন্, নেত্রেষ্বেব স্তম্ভিতবত্যঃ। তত্র হেতুঃ—অভদ্রং নো স্যাদমঙ্গলং মা ভূদিত্যেতদর্থম্ ॥

১৫। মৃদঙ্গাদয়ো দশ বাদ্যভেদাঃ ॥

১৬। প্রেমব্রীড়াস্মিতপূর্ব্বমীক্ষণং যাসাং তাঃ ॥

১৭। গুড়াকা নিদ্রা তস্যা ঈশো জিতনিদ্রোঽর্জ্জুনঃ, গুড়াকা ধনুর্বিদ্যা তস্যা ঈশ ইতি বা ধনুর্বেদপারগ ইত্যর্থঃ ॥

১৮। ব্যজনে চামরে জগৃহতুঃ, মধুপতিঃ শ্রীকৃষ্ণঃ ॥

১৯। সত্যাঃ শ্রীকৃষ্ণে তাসামব্যভিচারাৎ, কিন্তু নানুরূপাশ্চ তা অনুরূপাশ্চ নির্গুণস্য পরমানন্দস্য সুখী ভবেত্যাদয়ো নানুরূপাঃ, গুণাত্মনো মনুষ্যনাট্যাবতারে অনুরূপাশ্চেত্যর্থঃ ; সন্ধিরার্ষঃ ॥

২০। সর্ব্বাসাং শ্রুতীনাং মনোহরঃ, উপনিষদোঽপি মূর্ত্তিমত্যঃ সত্যঃ তং সঞ্জল্পমভ্যনন্দন্নিত্যর্থঃ ॥

২১—২৪। তত্র তেজঃসৌন্দর্য্যাদ্যতিশয়েন বিস্মিতাভ্যঃ সখীভ্যোঽন্যাঃ স্ত্রিয়ঃ কথয়ন্তি—নাত্র বিস্ময়ঃ কার্য্যঃ সাক্ষাদীশ্বরত্বাদস্যেতি স বৈ ইতি চতুর্ভিঃ। বৈ স্মরণে, কিলেতি প্রসিদ্ধপ্রমাণদ্যোতনম্, য এক এবাদ্বিতীয়ঃ পুরুষ আসীৎ, স এবায়ং শ্রীকৃষ্ণঃ। কুত্রাসীৎ? অবিশেষে আত্মনি, নিষ্প্রপঞ্চে নিজরূপে। কদা? অগ্রে গুণেভ্যো গুণক্ষোভাৎ পূর্ব্বম্, তথা নিশি প্রলয়ে চ, অস্য লক্ষণং জগতামাত্মনি জীবে ; নিমীলিতাত্মন্নিতি লুপ্তসপ্তম্যন্তং পদং জাতাবেকবচনম্, ঈশ্বরে লীনরূপেষু জীবেষু সৎস্বিত্যর্থঃ। নন্থ জীবানাং ব্রহ্মত্বাৎ কথং লয়ঃ? তত্রাহুঃ—সুপ্তাসু শক্তিষু সতীষু, জীবোপাধি-ভূতসত্ত্বাদি-শক্তিলয় এব জীবলয় ইত্যর্থঃ॥ (২২) তদেবং সৃষ্টেরাদৌ প্রলয়ানন্তরঞ্চ নিষ্প্রপঞ্চাবস্থানমুক্ত্বা স্থিতৌ সৃষ্টিপ্রলয়য়োর্মধ্যে সপ্রপঞ্চাবস্থানমাহুঃ—স ইতি, স এব অপ্রচ্যুতস্বরূপস্থিতিরেব প্রকৃতি-মনুসসার অধিষ্ঠিতবান্, ভূয়ঃ পুনঃ সৃষ্টিপ্রবাহস্যানাদিত্বাৎ। কীদৃশীম্? নিজবীর্য্য-চোদিতাং স্বকালশক্তিপ্রেরিতাং স্বাংশভূতানাং জীবানাং মায়াং মোহিনীম্, অতএব সিসৃক্ষতীং স্রষ্টুমিচ্ছন্তীম্। কিমর্থমনুসসার? অনামরূপে আত্মনি জীবে রূপনামনী বিধাতুমিচ্ছন্, উপাধিসৃষ্ট্যা জীবানাং ভোগায়েত্যর্থঃ। কর্ম্মাণি চ বিধাতুং বেদান্ কৃতবানিত্যাহুঃ—শাস্ত্রকৃদিতি॥ (২৩) অস্য দর্শনমতিদুর্লভমস্মাভির্লব্ধমিত্যাহুঃ—স বা অয়ং যস্য পদং স্বরূপমঙ্ঘ্রিং বা ; নির্জ্জিতো মাতরিশ্বা প্রাণো যৈঃ ;

হ্রস্বত্বমার্ষম্। তৎ সূরয় এব পশ্যন্তি। কেন? ভক্ত্যা উৎকলিতঃ উৎকণ্ঠিতোঽমলো য আত্মা বুদ্ধিস্তেন। 'দৃশ্যতে ত্বগ্রয়া বুদ্ধ্যা' ইতি শ্রুতেঃ; বুদ্ধিবৈমল্যস্যাপ্যয়মেব হেতুরিত্যাহুঃ—নন্ব হে সখি! এষ এব সত্ত্বং বুদ্ধিং পরিমার্ষ্টুং সম্যক্ শোধয়িতুমর্হতি, ন তু যোগাদয় ইত্যর্থঃ; যদ্বা, নন্ব অহো এষ সত্ত্বং জ্ঞানং পরিমার্ষ্টুং নাশয়িতুং দূর-গমনেনাপ্রত্যক্ষীভবিতুং নার্হতি, কিন্তু অনেন সহৈব অস্মাভির্গন্তব্য-মিত্যর্থঃ॥ (২৪) পুণ্যশ্লোকতামাহুঃ—স বা ইতি। হে সখি! যো বেদেষু রহস্যাগমেষু চ রহস্যনিরূপকৈঃ অনুগীতসৎকথঃ—অনুগীতাঃ সত্যঃ কথা যস্য স এবায়ম্। গানপ্রকারমাহুঃ—য এক ঈশ ইত্যাদি॥

২৫। এবম্ভূতস্য নানাবতারে কারণমাহুঃ—যদেতি। তমোব্যাপ্তা ধীর্যেষাং তে নৃপা যদা অধর্ম্মেণ জীবন্তি কেবলং প্রাণান্ পুষ্ণন্তি, তত্র তদা এষ এব ভবায় স্থিত্যৈ সত্ত্বতঃ বিশুদ্ধসত্ত্বেন রূপাণি দধৎ, ভগাদীনি ধত্তে প্রকটয়তি; যুগে যুগে তত্তদবসরে, ভগমৈশ্বর্য্যম্, সত্যং সত্যপ্রতিজ্ঞত্বম্, ঋতং যথার্থোপদেশকত্বম্, দয়াং ভক্তকৃপাম্, যশঃ অদ্ভুতকর্ম্মত্বম্॥

২৬—৩০। বিশেষতঃ, শ্রীকৃষ্ণাবতারসৌভাগ্যং বর্ণয়ন্তি—অহো ইতি পঞ্চভিঃ। যদ্ যস্মাৎ এষ পুরুষোত্তমঃ শ্রিয়ঃ পতিঃ স্বজন্মনা যদোঃ কুল-মঞ্চতি পূজয়তি সৎকরোতি, অতঃ শ্লাঘ্যতমং তৎ। চংক্রমণেন মধোর্বনং মথুরাম্, অঞ্চতি সৎকরোতি, অতস্তৎ পুণ্যতমমিতি তমপ্-প্রত্যয়ার্থস্যাপ্য-ত্যন্তাতিশয়েঽলমিতি। তত্রাপ্যাশ্চর্য্যে অহো ইত্যুক্তম্॥ (২৭) অহোবত অত্যাশ্চর্য্যম্। কিং তৎ? কুশস্থলী দ্বারকা স্বর্গত উৎকৃষ্ট ইতি যদ্-যশস্তস্য তিরস্করী পরিভবকর্ত্রী। ভুবশ্চ পুণ্যযশঃকর্ত্রী ভবতি। যদ্ যতো যৎপ্রজা যত্রত্যাঃ সর্ব্বাঃ প্রজাঃ স্বানুগ্রহেণ ঈষিতং প্রেষিতং স্মিত-পূর্ব্বকোঽবলোকো যস্য তম্; যদ্বা, অনুগ্রহার্থমিষিতমিষ্টং স্বস্যাত্মনঃ পতিং শ্রীকৃষ্ণম্, ন তু পিত্রাদিবদ্ দেহমাত্রপতিং নিত্যং পশ্যন্তি স্ম;

অনুগ্রহোষিতমিতি পাঠে স্বানুগ্রহার্থমুষিতং কৃতনিবাসম্, ঐকপদপাঠে তু অনুগ্রহেণেষিতং প্রেষিতং যৎ স্মিতম্, তৎপূর্ব্বকোঽবলোকো যস্য তম্ ; নৈতৎ স্বর্গেঽস্তীত্যর্থঃ ॥ (২৮) হে সখি ! অস্য গৃহীতপাণিভিঃ পত্নীভি-রীশ্বরোঽয়মেব নূনং জন্মান্তরেষু সমর্চ্চিতঃ। যস্মিন্নধরামৃতে আশয়শ্চিত্তং যাসাং তাঃ সম্মোহং প্রাপ্তা ইতি মনোহরত্বমুক্তম্ ॥ (২৯-৩০) এতৎ প্রপঞ্চয়তি যা ইতি দ্বাভ্যাম্। বীর্য্যং প্রভাব এব শুল্কং মূল্যং তেন, শুষ্মিণো বলিষ্ঠান্, প্রদ্যুম্নঃ সাম্ব আম্বশ্চ সুতা যাসাং রুক্মিণী-জাম্ববতীনাগ্নজিতীনাং তা আদয়ো যাসাং সত্যভামাদীনাং তাঃ, যাশ্চাপরাঃ। অস্য শ্লোকস্যোত্তর-শ্লোকেনান্বয়ঃ। এতাঃ স্ত্রীত্বমেব পরং কেবলং সাধু শোভনং কুর্ব্বতে। অপাস্তং গতং পেশলং ভদ্রং স্বাতন্ত্র্যং যস্মাৎ, নিরস্তং শৌচং শুচিত্বং যস্মাৎ, তথাভূতমপি। জাতু কদাচিদপি নাপৈতি ন নির্গচ্ছতি। আহৃতিভি-র্ব্যাহারৈঃ ; যদ্বা, পারিজাতাদি-প্রিয়বস্ত্বাহরণৈর্হৃদি স্পৃশন্নানন্দয়ন্ ॥

৩১। এবংবিধা চিত্রা গিরঃ, সস্মিতেন নিরীক্ষণেনাভিনন্দন্ স হরির্যযৌ ॥

৩২। মধুদ্বিষোঽপি গোপীথায় রক্ষণায়, স্নেহাৎ পরেভ্যঃ শত্রুভ্যঃ শঙ্কিতঃ সন্ প্রাযুঙ্‌ক্ত। 'হস্ত্যশ্বরথপাদাতং সেনাঙ্গং স্যাচ্চতুর্বিধম্' ইত্যেবং চতুরঙ্গিণীং পৃতনাং সেনাম্ ॥

৩৩। পাণ্ডোঃ কুরুবংশজত্বাৎ পাণ্ডবা অপি কৌরবা এব, তান্। প্রিয়ৈরুদ্ধবাদিভিঃ সহ ॥

৩৪। কুরুক্ষেত্রং কুরুদেশান্তর্গতমেব। ক্রমোঽত্র ন বিবক্ষিতঃ ॥

৩৫। মরুর্নিরুদকো দেশঃ, ধন্বোঽল্পোদকঃ, আনর্ত্তাখ্যো দ্বারকাদেশঃ। স বিভুরুপাগাৎ প্রাপ্তঃ। হে ভার্গব ! মনাগীষৎ শ্রান্তা বাহা যস্য সঃ ॥

৩৬। তত্র তত্র দেশে তত্রত্যৈর্জনৈঃ প্রত্যুহৃতানি নিবেদিতানি অর্হণান্যুপায়নানি যস্মৈ সঃ। সায়মপরাহ্নে পশ্চাদ্দিশং পশ্চিমাং দিশং ভেজে প্রাপ্তঃ। তদা চ গবিষ্ঠঃ স্বর্গস্থঃ সূর্য্যো গামুদকং গতঃ প্রবিষ্টঃ

অস্তং গত ইত্যর্থঃ, 'অদ্ভ্যো বা এষ প্রাতরুদেত্যপঃ সায়ং প্রবিশতি' ইতি শ্রুতেঃ ; যদ্বা, তদা সায়ংকালে জাতে রথাদবতীর্য্য গবিষ্ঠো ভূমৌ স্থিতস্ততো গাং জলাশয়ং গতঃ সন্, পশ্চাদ্দিশং সন্ধ্যাং ভেজে উপাসিতবানিত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে
দশমোঽধ্যায়ঃ ॥ ১০ ॥

একাদশোঽধ্যায়ঃ

আনর্ত্তৈঃ স্তূয়মানস্য পুরীং নির্ব্বিশ্য বন্ধুভিঃ ।
একাদশে রতিঃ সম্যগ্‌যাদবেন্দ্রস্য বর্ণ্যতে ॥ (১)
উৎসবৈরুচ্চলৎপৌরমুদঞ্চদ্‌ধ্বজতোরণম্ ।
উল্লসদ্রত্নদীপালি স্বপুরং প্রভুরাবিশৎ ॥ (২)

১। স্বৃদ্ধান্ সমৃদ্ধান্, দরবরং পাঞ্চজন্যং শঙ্খম্, দধ্মৌ বাদিতবান্ ॥

২। স ইতি, দরঃ শঙ্খঃ, উচ্চকাশে অতিশয়েন শুশুভে। কথম্ভূতো দরঃ ? করকঞ্জসম্পুটে দাধ্মায়মান আপূর্য্যমাণো বাদ্যমানঃ, ধবলমুদরং যস্য সঃ, তথাপি উরুক্রমস্য কৃষ্ণস্যাধারস্য যঃ শোণগুণস্তেন শোণিমা যস্য সঃ ; করকঞ্জে করকমলে তয়োঃ সম্পুটে মধ্যে বর্ত্তমানঃ। কথমুচ্চকাশে ? অব্জষণ্ডে রক্তকমলসমূহে কলহংসো রাজহংস উৎস্বন উচ্চশব্দো যথা তদ্বৎ॥

৩। জগতো যদ্ভয়ম্, তস্য ভয়াবহম্। প্রত্যুদ্‌যযুঃ প্রত্যুজ্জগ্মুঃ। ভর্ত্তুর্দর্শনে লালসা ঔৎসুক্যং যাসাং তাঃ ॥

৪—৫। তত্র তস্মিন্ শ্রীকৃষ্ণে উপনীতাঃ সমর্পিতা বলয় উপায়নানি যাভিস্তাঃ। নিরপেক্ষেঽপি তস্মিন্নাদরেণ সমর্পণে দৃষ্টান্তঃ—রবের্দীপমিবেতি। পিতরমর্ভকা ইব তং সর্ব্বসুহৃদমবিতারং প্রোচুরিত্যুত্তরেণান্বয়ঃ।

সুহৃত্ত্বেনৈব অবিতারম্, ন তু কামেন। তত্র হেতুঃ—আত্মারামম্, তত্রাপি হেতুঃ—পরমানন্দ-নিজস্বরূপলাভেনৈব পূর্ণকামম্ ॥

৬। কিমূচুরিত্যাহ—নতা ইতি। বিরিঞ্চো ব্রহ্মা, বৈরিঞ্চ্যাঃ সনকাদয়ঃ, ইহ সংসারে পরং ক্ষেমমিচ্ছতাং পরায়ণং পরমং শরণম্। কুতঃ? পরেষাং ব্রহ্মাদীনাং প্রভুরপি কালো যত্র প্রভুর্ন ভবেৎ ॥

৭। অতো ভবায় উদ্ভবায় নোঽস্মাকং ত্বং ভব। হে বিশ্বভাবন! অনুবৃত্ত্যানুগমনেন কৃতিনঃ কৃতার্থা বভূবিম জাতা বয়ম্ ॥

৮। কৃতার্থত্বমেবাহুঃ—অহো! ভবতা বয়ং সনাথাঃ স্ম; যদ্‌যস্মাৎ তব রূপং পশ্যেম। ত্রৈপিষ্টপানামপি দূরে দর্শনং যস্য, দেবানামপি দূরে দর্শনং যস্য, দেবানামপি দুর্লভদর্শনমিত্যর্থঃ। প্রেম্ণা যৎ স্মিতং তদ্‌যুক্তং স্নিগ্ধং নিরীক্ষণং যস্মিন্, তদাননং যস্মিন্ তদ্রূপম্। সর্ব্বং সর্ব্বেষু বা অঙ্গেষু সৌভগং যস্মিন্ ॥

৯। অর্ভকা ইব সকরুণমাহুঃ—যর্হি যদা ভো অম্বুজাক্ষ! নো ভবানিতি পাঠে ন ইত্যনাদরে ষষ্ঠী। অস্মাননাদৃত্যাপসসার অপহায় জগাম। কুরূন্ হস্তিনাপুরম্, মধূন্ মথুরাপুরং বা, তত্র তদা রবিং বিনা আন্ধ্যাদক্ষ্ণোর্যথা একোঽপি ক্ষণঃ অব্দকোটিপ্রতিমো ভবেৎ, এবং তব নঃ ত্বদীয়ানামস্মাকমপীত্যর্থঃ ॥

১১। ইতি চ এবংবিধা অন্যাশ্চোদীরিতা বাচঃ শৃণ্বন্, দৃষ্ট্যা সাভিনন্দাবলোকনেনানুগ্রহং কুর্ব্বন্, পুরং দ্বারকাং প্রাবিশৎ ॥

১২—১৬। তাং দ্বারকাং স্তৌতি পঞ্চভিঃ। স্বতুল্যবলৈঃ মধুভোজাদিভির্গুপ্তাং রক্ষিতাম্ ॥ (১৩) সর্ব্বেষু ঋতুষু সর্ব্বে বিভবাঃ পুষ্পাদিসম্পদো যেষাং তে পুণ্যবৃক্ষা লতাশ্রমা লতামণ্ডপাশ্চ যেষু তৈরুদ্যানাদিভির্বৃতা যে পদ্মাকরাঃ সরাংসি, তৈঃ শ্রীঃ শোভা যস্যাং তাম্; উদ্যানং ফলপ্রধানম্, উপবনং পুষ্পপ্রধানম্, আরামঃ ক্রীড়ার্থং বনম্ ॥

(১৪) গোপুরং পুরদ্বারম্, দ্বারং গৃহদ্বারম্, কৃতানি কৌতুকেন উৎসবেন তোরণানি যস্যাং তাম্ ; গরুড়াদি-চিহ্নাঙ্কিতা ধ্বজা জয়প্রদ-মন্ত্রাঙ্কিতাঃ[১] পতাকাঃ, চিত্রাণাং ধ্বজপতাকানামগ্রৈঃ অন্তঃপ্রতিহত আতপো যস্যাং তাম্ ॥ (১৫) সম্মার্জ্জিতানি নিঃসারিতরজস্কানি মহামার্গাদীনি যস্যাম্, মহামার্গা রাজমার্গাঃ, রথ্যা ইতরমার্গাঃ, আপণকাঃ পণ্যবীথয়ঃ, চত্বরাণ্যঙ্গনানি, ফলাদিভিরুপ্তামবকীর্ণাম্ ॥

১৭—২০। প্রেষ্ঠমায়ান্তং নিশম্য শ্রুত্বা বসুদেবাদয়ঃ প্রত্যুজ্জগ্মুরিতি চতুর্থেনান্বয়ঃ ॥ (১৮) প্রহর্ষবেগেন উচ্ছশিতানি উল্লঙ্ঘিতানি শয়নাদীনি যৈস্তে, শশ প্লুতগতাবিত্যস্মাৎ। (১৯) বারণেন্দ্রং মঙ্গলার্থং পুরতঃ কৃত্বাঃ, সসুমঙ্গলৈঃ সুমঙ্গলং পুষ্পাদি তদ্‌যুক্তপাণিভিঃ, ব্রহ্মঘোষো মন্ত্রপাঠঃ ॥ (২০) প্রণয়েন স্নেহেন আগতং সাধ্বসং সম্ভ্রমো যেষাং তে ; বারমুখ্যা নটাদয়শ্চ প্রত্যুজ্জগ্মুঃ। লসদ্ভিঃ কুণ্ডলৈর্নির্ভাতানি যানি কপোলানি, তৈর্বদনেষু শ্রীঃ শোভা যাসাং তাস্তথা বারমুখ্যা নর্ত্তক্যো বেশ্যা ইতি যাবৎ ॥

২১। নটা নবরসাভিনয়-চতুরাঃ, তালাদ্যনুসারেণ নৃত্যন্তো নর্ত্তকাঃ, গন্ধর্ব্বা গায়কাঃ, 'সূতাঃ পৌরাণিকাঃ প্রোক্তা মাগধা বংশশংসকাঃ। বন্দিনস্ত্বমলপ্রজ্ঞাঃ প্রস্তাবসদৃশোক্তয়ঃ॥' অদ্ভুতানি চেতি চকারস্য বন্দিনশ্চেত্যন্বয়ঃ। তে সর্ব্বে গায়ন্তি চেতি উত্তমঃশ্লোকস্যাদ্ভুতানি চরিতানি ভক্তবাৎসল্যাদীনি ॥

২২। যথাবিধি যৈঃ সহ যথোচিতং তৈস্তথা সমাগমং কৃত্বা সর্ব্বেষাং মানমাদদে কৃতবানিত্যর্থঃ ॥

২৩। তদাহ—প্রহ্বেতি, প্রহ্বং প্রহ্বত্বং শিরসা নতিঃ, অভিবাদনং বাচা নতিঃ, আশ্বাস্য অভয়ং দত্ত্বা শ্বপাকাদীনভিব্যাপ্য বরৈরভীষ্টদানৈশ্চ মানং কৃতবান্ ॥

১। -পত্রাঙ্কিতাঃ (ক), -যন্ত্রাঙ্কিতাঃ (ঘ)।

২৪। অন্যৈশ্চ বন্দিভিশ্চ ॥

২৫—২৬। হে বিপ্র শৌনক ! তস্যেক্ষণৈর্মহান্নুৎসবো যাসাং তাঃ ; যদ্ যস্মান্নিত্যং সদা অচ্যুতং নিরীক্ষমাণানামপি দৃশো নৈব তৃপ্যন্তি, অতো হর্ম্ম্যাণ্যারুরুহুঃ। কথম্ভূতম্ ? শ্রিয়ঃ শোভায়াঃ ধাম স্থানমঙ্গং যস্য তম্ ॥

২৭। এতদেবাভিনয়েনাহ—শ্রিয়ো লক্ষ্ম্যা যস্য উরঃ বক্ষো নিবাসঃ, যস্য মুখং সর্ব্বপ্রাণিনাং দৃশাং সৌন্দর্য্যামৃতপানায় পাত্রম্, যস্য বাহবো লোকপালানাং নিবাসঃ, সারং গায়ন্তীতি সারঙ্গা ভক্তাস্তেষাং যস্য পদাম্বুজং নিবাসঃ, তং নিরীক্ষমাণানাং দৃশ ইতি পূর্ব্বেণান্বয়ঃ ॥

২৮। সিতৈরাতপত্রব্যজনৈরুপস্কৃতো মণ্ডিতঃ, অর্কশ্চ উড়ুপো নক্ষত্র-সহিতশ্চন্দ্রমাশ্চ চাপমিন্দ্রধনুশ্চ, বৈদ্যুতং বিদ্যুত্তেজশ্চ তৈঃ ; অর্কশ্ছত্রস্যো-পমানম্, নক্ষত্রাণি পুষ্পবৃষ্টেঃ, চন্দ্রঃ পরিভ্রমণকৃতমণ্ডলাকারয়োশ্চামর-ব্যজনয়োঃ, চাপং বনমালায়াঃ, বিদ্যুত্তেজঃ পিশঙ্গবাসসোঃ ; অদ্ভুতোপ-মেয়ম্। যদি ঘনস্যোপরি সূর্য্যবিম্বম্, উভয়তশ্চন্দ্রৌ সর্ব্বতো নক্ষত্রাণি, মধ্যে চ মিলিতং চাপদ্বয়ং স্থিরং বিদ্যুত্তেজশ্চ ভবেৎ, তর্হি স ঘনো যথা ভাতি, তথা হরির্বভাবিত্যর্থঃ ॥

২৯। দেবকীপ্রমুখাঃ সপ্ত ববন্দ ইতি মাতৃসোদর্য্যাদাদরবিশেষজ্ঞাপ-নার্থমুক্তম্। অষ্টাদশাপি পিতুর্বসুদেবস্য ভার্য্যা মাতৃতুল্যত্বান্নমস্কৃতা এব ॥

৩০। নেত্রজৈর্জলৈঃ হর্ষাশ্রুভিঃ ॥

৩১। স্বগৃহপ্রবেশমাহ—অথেতি। সহস্রাণি চ ষোড়শেতি চকারা-দষ্টোত্তরশতাধিকানীতি জ্ঞেয়ম্ ॥

৩২। প্রোষ্য দেশান্তরে উষিত্বা, আরাৎ দূরাদেব বিলোক্য সঞ্জাতো মনসি মহোৎসবো যাসাং তাঃ, আসনাদাশয়াচ্চ আসনাদ্দেহেন চ উত্তস্থুঃ, আশয়োঽন্তঃকরণং তস্মাদপ্যাত্মনা উত্তস্থুঃ। শ্রীকৃষ্ণে আত্মনঃ সংশ্লেষে অন্তঃকরণব্যবধানমপি তা নাসহন্তেত্যর্থঃ। ব্রীড়িতানি লোচনানি আননানি

চ যাসাং তাঃ, অপাঙ্গেরেব বীক্ষণাদ্‌ব্রীড়িতলোচনা অবনতমুখত্বাদ্‌-ব্রীড়িতাননাঃ। সাকং ব্রতৈরিতি হাস্যক্রীড়াবর্জ্জনাদিনিয়মা অপি তাভ্য উত্তস্থুরিত্যর্থঃ, ধৃতব্রতা এব উত্তস্থুরিতি বা। ব্রতানি যাজ্ঞবল্ক্যেনোক্তানি—'হাস্যং পরগৃহে যানং সমাজোৎসবদর্শনম্। ক্রীড়াং শরীরসংস্কারং ত্যজেৎ প্রোষিতভর্ত্তৃকা॥' ইতি॥

৩৩। আরাদায়ান্তং তং পতিং দর্শনাৎ পূর্ব্বমাত্মনা বুদ্ধ্যা পরিরেভিরে, ততো দৃষ্টিভিরিন্দ্রিয়ৈঃ; ততঃ সমীপে আগতমাত্মজৈঃ পুত্রৈ-র্গৃহীতকণ্ঠমালিঙ্গয়ন্ত্য ইব স্বয়মপি আলিঙ্গিতবত্য ইত্যর্থঃ। তত্র হেতুঃ—হুরন্তভাবা গম্ভীরাভিপ্রায়াঃ, তদা চ তাসাং নেত্রয়োর্নিরুদ্ধমপ্যম্বুবাষ্পং বৈক্লবাদ্‌বৈবশ্যাদাস্রবৎ ঈষৎ সুস্রাব; অতএব ধৈর্য্যহান্যা বিলজ্জতীনাম্, হে ভৃগুবর্য্য! চিত্রং শৃণ্বিত্যর্থঃ॥

৩৪। পার্শ্বগতঃ সমীপস্থঃ, তত্রাপি রহোগত একান্তে চ বর্ত্ততে স্ম; পদে পদে প্রতিক্ষণম্, নবং নবমেব। অত্র কৈমুত্যন্যায়ঃ—কা বিরমেতেতি। চলা চঞ্চলস্বভাবাপি॥

৩৫—৩৬। উক্তং শ্রীকৃষ্ণচরিতং সংক্ষিপ্যাহ—এবমিতি দ্বাভ্যাম্। ক্ষিতের্ভারায় জন্ম যেষাম্, অক্ষৌহিণীভিঃ কৃত্বা পরিবৃত্তং সর্ব্বতঃ প্রসৃতং তেজঃ প্রভাবো যেষাম্; শ্বসনো বায়ুর্বেণূনামন্যোঽন্যসজ্ঘর্ষণেনানলং বিধায় মিথো দাহেন যথোপশাম্যতি, তদ্বৎ॥ (৩৬) স্ত্রীরত্নকূটস্থ উত্তমস্ত্রীকদম্বস্থঃ॥

৩৭—৩৮। নন্বেবং স্ত্রীসঙ্গাদিভিঃ সংসারিত্বপ্রতীতেঃ কথং ভগবান-বতীর্ণ ইত্যুচ্যতে? তত্রাহ—উদ্দামেতি দ্বাভ্যাম্। যাসামুদ্দামো গম্ভীরো যো ভাবঃ অভিপ্রায়ঃ, তস্য পিশুনঃ সূচকো যোঽমলো বল্গুঃ সুন্দরো হাসো ব্রীড়াবলোকশ্চ, তাভ্যাং নিহতঃ অমদনঃ শ্রীমহাদেবোঽপি সম্মুহ্য লজ্জয়া চাপং পিনাকমজহাৎ। এবংপ্রভাবা যাঃ স্ত্রিয়ঃ ইত্যেতাবদ্বিবক্ষিতম্; যদ্বা,

ভগবতো মোহিনীরূপেণ মহেশোঽপি মোহিত এবমেতাশ্চ তাদৃগ্বিলাসা এবেতি তথোক্তম্। তাঃ কুহকৈঃ কপটৈর্বিভ্রমৈর্যস্যেন্দ্রিয়ং মনঃ বিমথিতুং ক্ষোভয়িতুং ন শেকুঃ, ন শক্তাঃ; অথবা নিহতস্তাড়িতো মদনোঽপি জগদ্বিজয়ী সম্মুহ্য তত্তৎকর্ত্তব্যতামূঢ়ঃ সন্ চাপং ধনুর্লজ্জয়াজহাৎ জহৌ, তাশ্চ প্রমদোত্তমাঃ কামবিজয়িন্যোঽপীত্যাদি পূর্ব্ববৎ॥ (৩৮) তং শ্রীকৃষ্ণময়ং প্রাকৃতো লোক আত্মৌপম্যেন স্বসাদৃশ্যেন সঙ্গিনং মনুজং মন্যতে। অত্র হেতুঃ—ব্যাপৃণ্বানং ব্যাপ্রিয়মাণম্, যতোঽয়মবুধঃ অতত্ত্বজ্ঞঃ॥

৩৯। কুত ইত্যপেক্ষায়ামৈশ্বর্য্যলক্ষণমাহ—এতদিতি। ঈশস্যেশনমৈশ্বর্য্যং নাম এতদেব। কিং তৎ? প্রকৃতিস্থোঽপি তস্যা গুণৈঃ সুখদুঃখাদিভিঃ সদা ন যুজ্যতে ইতি যৎ; যথা আত্মস্থৈরানন্দাদিভিরাত্মাশ্রয়াপি বুদ্ধির্ন যুজ্যতে, তদ্বৎ। বৈধর্ম্ম্যে দৃষ্টান্তো বা আত্মস্থৈঃ সত্তাপ্রকাশাদিভির্যথা বুদ্ধির্যুজ্যতে, আত্মা তথা ন যুজ্যত ইতি; এবং বা অসদাত্মা দেহঃ, তত্রস্থৈর্গুণৈস্তদাশ্রয়া বুদ্ধিস্তদুপাধির্জীবোঽপি যথা যুজ্যতে, এবং প্রকৃতিস্থোঽপি তদ্গুণৈর্ন যুজ্যত ইতি যৎ—এতদীশনমীশস্যেতি॥

৪০। তৎপত্ন্যোঽপি তস্য তত্ত্বং ন জানন্তীত্যাহ—তং স্ত্রৈণমাত্মবশ্যং রহ একান্তে অনুব্রতমনুসৃতঞ্চ মেনিরে। ভর্ত্তুরপ্রমাণবিদঃ প্রমাণমিয়ত্তাং মহিমানমজানত্য ইত্যর্থঃ। ঈশ্বরং ক্ষেত্রজ্ঞং মতয়োঽহংবৃত্তয়ো যথা স্বাধীনং স্বধর্ম্মযোগিনং মন্যন্তে তদ্বৎ; যদ্বা, যথা তাসাং মতয়ঃ কল্পনাঃ, তথা তমীশ্বরং স্ত্রৈণাদিরূপং মেনিরে ইত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে

একাদশোঽধ্যায়ঃ॥ ১১॥

দ্বাদশোঽধ্যায়ঃ

পূর্ব্বোক্তং[১] যৎপ্রসঙ্গায় দ্রৌণিদণ্ডাদি বিস্তরাৎ ।

দ্বাদশে তু তদেবাথ পরীক্ষিজ্জন্ম বর্ণ্যতে[২] ॥ (১)

১। পরীক্ষিতোঽথ রাজর্ষের্জন্ম কর্ম্মেত্যাদি প্রতিজ্ঞায় পাণ্ডবানাং রাজ্যস্থিতিরুপোদ্ঘাতরূপা সপ্রসঙ্গং সপ্তমাধ্যায়মারভ্য নিরূপিতা। ইদানী-মৌপোদ্ঘাতিকমুক্তানুবাদপূর্ব্বকং পৃচ্ছতি—অশ্বত্থাম্নেতি। উপসৃষ্টেন বি-সৃষ্টেন, তস্য জন্মেত্যাদি ব্রূহীত্যুত্তরেণান্বয়ঃ ॥

২। স পরীক্ষিৎ প্রেত্য দেহং ত্যক্ত্বা ॥

৩। প্রার্থয়ে ন ত্বাজ্ঞাপয়ামীত্যাহ—র্গদিতুং যদি মন্যসে, অনুগ্রহেণ তর্হি ব্রূহীতি। যস্য জ্ঞানমদাচ্ছুক ইতি শ্রবণেচ্ছায়াং কারণম্ ॥

৪—৬। নিঃস্পৃহস্যাপি রাজ্ঞঃ শ্রীকৃষ্ণস্য অনুগ্রহাত্তাদৃক্ পৌত্রঃ সমজনীতি বক্তুং তস্য শ্রীকৃষ্ণে ভক্ত্যুদ্রেকমাহ—অপীপলদিতি ত্রিভিঃ। পিতৃবৎ অপীপলৎ পালয়ামাস ॥ (৫) কৃতবন্তস্তদুপার্জ্জিতা লোকাশ্চ ॥ (৬) সুরস্পার্হাঃ সুরাণাং স্পৃহণীয়াস্তে সম্পদাদয়ঃ কামা বিষয়া রাজ্ঞঃ কিং মুদং প্রীতিমধিজহ্রুঃ কৃতবন্তঃ ? ন কৃতবন্ত ইত্যর্থঃ। তত্র হেতুঃ—মুকুন্দে এব মনো যস্যেতি। ক্ষুধিতস্যান্নৈকমনসো যথা ইতরে স্রক্‌চন্দনাদয়ো মুদং প্রীতিং ন কুর্ব্বন্তি তদ্বৎ ॥

৭। প্রস্তুতমাহ—মাতুরিতি। স পরীক্ষিৎ ॥

৮। পুরটং সুবর্ণম্, স্ফুরন্ পুরটমৌলির্যস্যাস্তি তম্ ; ব্রীহ্যাদিভ্য-শ্চেতীন-প্রত্যয়ঃ। অপীব্যমতিসুন্দরং দৃশ্যত ইতি দর্শনং রূপং যস্য, তড়িদ্বদ্‌বাসসী যস্য তং, তড়িদ্বাসসমিতি শ্যামমিতি চ পদাভ্যাং বিদ্যুদ্ভূষিত-মেঘোপমা সূচিতা ; অচ্যুতমবিকারম্ ॥

১। পুরোক্তং (ক) ; ২। উচ্যতে (খ)।

৯। তপ্তং দাহোত্তীর্ণং যৎ কাঞ্চনং, তন্ময়ে কুণ্ডলে যস্য, ক্ষতজাক্ষং সংরম্ভাদত্যারক্তনেত্রম্ ; অহো মদ্ভক্তস্যাপি গর্ভেঽস্ত্রপীড়া ইতি ক্রোধেনেতি ভাবঃ ॥

১০। অস্ত্রতেজো বিধমন্তং বিনাশয়ন্তম্, বৈয়ধিকরণে দৃষ্টান্তঃ—নীহারং হিমম্, গোপতিঃ সূর্য্য ইব। এবংবিধং গর্ভগতো বালঃ সন্নিকর্ষে সমীপে দদর্শ। দৃষ্ট্বা চ 'অসৌ কঃ?' ইতি পর্য্যেক্ষত বিতর্কিতবান্ ॥

১১। অমেয়াত্মা কথং তদ্বিধূতবানিত্যবিতর্করূপঃ। ধর্ম্মং গোপায়তীতি ধর্ম্মগুপ্। দশমাস-পরিচ্ছেদ্যস্য তস্য মিষতঃ পশ্যতো যত্র দৃষ্টঃ, তত্রৈবান্তর্হিতঃ, ন ত্বন্যত্র গতঃ, যতো বিভুঃ সর্ব্বগতঃ ॥

১২। উদর্ক উত্তরফলম্, সর্ব্বগুণানামুত্তরোত্তরাধিক্যসূচকে লগ্নে, তত্র হেতুঃ—অনুকূলৈরন্যৈগ্র´হৈঃ সহিতানাং[১] শুভগ্রহাণামুদয়ো যস্মিন্ ॥

১৩। জাতকং জাতকর্ম্ম, মঙ্গলং পুণ্যাহম্ ॥

১৪। বরান্ শ্রেষ্ঠান্, স্বন্নং শোভনমন্নঞ্চ, তীর্থবিৎ দানকালজ্ঞঃ—'যাবন্ন চ্ছিদ্যতে নালং তাবন্নাপ্নোতি সূতকম্। ছিন্নে নালে ততঃ পশ্চাৎ সূতকন্তু বিধীয়তে ॥' ইতি বচনাৎ ; ততঃ পূর্ব্বমন্নং প্রাদাৎ, আমান্নং বা। প্রজাতীর্থে পুত্রোৎপত্তিপুণ্যকালে, 'পুত্রে জাতে ব্যতীপাতে দত্তং ভবতি চাক্ষয়ম্' ইতি স্মৃতেঃ ; 'দেবাশ্চ পিতরশ্চৈব পুত্রে জাতে দ্বিজন্মনাম্। আয়ান্তি তদ্গৃহং তস্মাৎ সূর্য্যগ্রহশতাধিকম্ ॥' ইতি ; 'দেবাশ্চ পিতরশ্চৈব পুত্রে জাতে দ্বিজন্মনাম্। আয়ান্তি হি নৃপশ্রেষ্ঠ! পুণ্যাহমিতি চাব্রুবন্' ॥ ইতি চ ॥

১৫—১৭। হে পৌরবর্ষভ! পুরূণাং পুরুবংশ্যানাম্ ॥ (১৬) শুক্লে শুদ্ধেঽস্মিন্ প্রজাতন্তৌ। দৈবেন কথম্ভূতেন? অপ্রতিঘাতেন দুর্ব্বারেণ সংস্থাং নাশমুপেয়ুষি গতে সতি বোঽনুগ্রহার্থায় ; যস্মাৎ প্রভবণশীলেন শ্রীবিষ্ণুনা রাতো দত্তঃ ॥ (১৭) তস্মাল্লোকে বিষ্ণুরাত ইতি নাম্না

১। সন্নিহিতানাং (গ)।

ভবিষ্যতি। মহাভাগবতশ্চ, গুণৈশ্চ মহান্ ভবিষ্যতি। নাত্র সন্দেহ ইতি 'তং রাজানং ব্রাহ্মণা ঊচুঃ' ইতি ত্রয়াণামন্বয়ঃ ॥

১৮। মহাভাগবতো ভবিষ্যতীত্যুক্তে হৃষ্টঃ পৃচ্ছতি—অপি স্বিৎ কিং-স্বিৎ সাধুবাদেন যশসা সৎকীর্ত্ত্যা অনুবর্ত্তিতা ভবিষ্যতীতি পূর্ব্বস্মৈবাতঃ-পরমপ্যনুষঙ্গঃ ॥

১৯। প্রজানামবিতা রক্ষকঃ, মানবো মনোঃ পুত্রঃ, ব্রাহ্মণেষু হিতঃ, সত্যপ্রতিজ্ঞশ্চ শ্রীরামো যথা ॥

২০। উশীনরদেশাধিপতিঃ শিবিঃ, যেন স্বমাংসং শ্যেনায় দত্ত্বা শরণাগতঃ কপোতো রক্ষিতঃ। স্বানাং জ্ঞাতীনাং যদূনাং যজ্বনাঞ্চ যশোবিস্তারকো দৌষ্মন্তির্ভরত ইব ॥

২১। অর্জ্জুনয়োঃ পার্থকার্ত্তবীর্য্যয়োঃ ॥

২২। হিমবানিব সতাং নিষেব্যঃ, অনন্যগতিকত্বেন; বসুধেব তিতিক্ষুঃ ক্ষান্ত্যা[১], প্রীত্যা মাতাপিতরাবিব সহিষ্ণুঃ ॥

২৩। পিতামহো ব্রহ্মা, তেন সমঃ সাম্যে সমত্বে, রমাশ্রয়ো হরিরিব ॥

২৪। সর্ব্বৈঃ সদ্‌গুণৈর্যন্মাহাত্ম্যং, তস্মিন্ শ্রীকৃষ্ণতুল্যঃ ॥

২৫। ধৃত্যা ধৈর্য্যেণ সদ্‌গ্রহঃ সন্ ভদ্রো গ্রহোঽভিনিবেশো যস্য সঃ, আহর্ত্তা কর্ত্তা ॥

২৬। রাজর্ষীণাং জনমেজয়াদীনাম্ ॥

২৭। দ্বিজপুত্রেণ প্রেরিতাৎ তক্ষকাদাত্মনো মৃত্যুমুপশ্রুত্য বিরক্তঃ সন্ হরেঃ পদং প্রপৎস্যতে ভজিষ্যতি ॥

২৮। ততশ্চ জিজ্ঞাসিতমাত্মনো যাথার্থ্যং যেন সঃ, ইদং শরীরং গঙ্গায়াং হিত্বা অকুতোভয়ং পদং যাস্যতি; অদ্ধা নিশ্চয়েন ॥

২৯। লব্ধা অপচিতিঃ পূজা যৈঃ ॥

১। ক্ষন্ত্যা (ক, খ, গ)

৩০। পরীক্ষিদিতি নাম নির্বক্তি—স এষ ইতি। যদ্‌যস্মাৎ প্রভুঃ সমর্থঃ সন্ গর্ভে দৃষ্টং পুরুষমনুধ্যায়ন্নিহ দৃশ্যমানেষু নরেষু মধ্যে সর্ব্বমপি নরং পরীক্ষেত, 'অয়মসৌ ভবেৎ নো বা' ইতি বিচারয়েদতঃ পরীক্ষিদিতি বিখ্যাতঃ। পূর্ব্বং দৃষ্টমিতি বা পাঠঃ॥

৩১। শুক্লে শুক্লপক্ষে স প্রসিদ্ধ উড়ুপোঽন্বহং যথা কাষ্ঠাভিঃ পঞ্চদশকলাভিরাপূর্য্যমাণো বর্দ্ধতে, এবং পিতৃভির্যুধিষ্ঠিরাদিভিঃ কামৈশ্চতুঃষষ্টিকলাভিশ্চ আপূর্য্যমাণো ববৃধে॥

৩৩। পূর্ব্বমপক্রম্যোক্তানশ্বমেধান্ স্বাবসরে সপ্রকারং কথয়তি—জ্ঞাতিদ্রোহস্য হানেচ্ছয়া যক্ষ্যমাণঃ করদণ্ডয়োরন্যত্র তাভ্যাং বিনা ন লব্ধধনো দধ্যৌ চিন্তয়ামাস। করদণ্ডজ-ধনস্য পরিজনভরণমাত্রোপক্ষীণত্বাৎ॥

৩৪। প্রহীণং মরুত্তস্য যজ্ঞে ত্যক্তং সুবর্ণপাত্রাদিকমানীতবন্তঃ॥

৩৫। সংভৃতসম্ভারঃ সম্পাদিতযজ্ঞোপকরণঃ, ভীতো জ্ঞাতিদ্রোহাৎ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে
দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

ত্রয়োদশোঽধ্যায়ঃ

নির্গমো ধৃতরাষ্ট্রস্য বিদুরোক্ত্যা ত্রয়োদশে।
উক্তঃ পৌত্রাভিষেকেণ বক্তুং রাজ্ঞো মহাপথম্॥ (১)

১। ইদানীং পরীক্ষিতঃ কলিনিগ্রহাদীনি কর্ম্মাণি কথয়িষ্যন্ বিদুরাগমনেন ধৃতরাষ্ট্রপ্রস্থানম্, ততোঽর্জ্জুনাগমনম্, ততঃ শ্রীকৃষ্ণান্তর্দ্ধানং নিশম্য পাণ্ডবপ্রস্থানঞ্চ নিরূপয়তি ত্রিভিরধ্যায়ৈঃ। আত্মনো গতিং হরিম্, তয়া আত্মগত্যা অবাপ্তং বিবিৎসিতং জ্ঞাতুমিষ্টং সর্ব্বং যেন॥

২। তদেবাহ—যাবতঃ কর্ম্ম-যোগ-ব্রতাদিবিষয়ান্ প্রশ্নান্ প্রথমং কৃতবান্ কৌশারবস্য মৈত্রেয়স্য পুরতঃ, পশ্চাৎ ত্রিচতুরপ্রশ্নার্থজ্ঞানমাত্রেণ গোবিন্দে জাতৈকভক্তিঃ কৃতার্থঃ সন্ তেভ্যঃ প্রশ্নেভ্য উপররাম, ততঃ পরং ন জিজ্ঞাসিতবান্ ॥

৩। সূতঃ সঞ্জয়ঃ, শারদ্বতঃ কৃপঃ, পৃথা কুন্তী ॥

৪। কৃপী দ্রোণভার্য্যা, যাময়ো জ্ঞাতিভার্য্যাঃ, অন্যাশ্চ স্ত্রিয়ঃ ॥

৫। প্রাণং তন্ব ইব কুতশ্চিন্মূর্চ্ছাদিদোষতঃ প্রাণেঽবসন্নে সতি তন্বঃ করাঙ্ঘ্র্যাদয়ো নিশ্চেষ্টা ভবন্তি, পুনস্তস্মিন্নাবির্ভূতে সতি যথোত্তিষ্ঠন্তি, তদ্বৎ ॥

৬। বিরহেণ যদৌৎকণ্ঠ্যং তেন কাতরা বিবশাঃ ॥

৭। তং বিদুরম্ ॥

৮। পক্ষিণো হ্যপত্যানি যথা অতিস্নেহেন পক্ষচ্ছায়য়া বর্দ্ধয়ন্তি, তদ্বৎ যুষ্মৎপক্ষপাতচ্ছায়য়া সমেধিতান্ বর্দ্ধিতান্ নোঽস্মান্ কিং স্মরথ ? সমেধিতত্বমেবাহ—বিপদ্গণাদ্ যস্মান্মোচিতাঃ স্মঃ ॥

৯। বো যুষ্মাভিঃ কয়া বৃত্ত্যা বর্ত্তিতম্, দেহবৃত্তিঃ কা কৃতা ? কানি চ তীর্থাদীনি সেবিতানীতি ॥

১০। ভবতাঞ্চ তীর্থাটনং ন স্বার্থং, কিন্তু তীর্থানুগ্রহার্থমিত্যাহ—ভবদ্বিধা ইতি। মলিনজনসম্পর্কেণ তীর্থানি অতীর্থানি সন্তি, সন্তঃ পুনস্তীর্থীকুর্ব্বন্তি, স্বান্তং মনস্তত্রস্থেন স্বস্যান্তঃস্থিতেন ইতি বা ॥

১১। অপি কিং সুখমাসতে ? ভবদ্ভিঃ ক্বাপি দৃষ্টাঃ শ্রুতা বা ?

১৩। যদুকুলক্ষয়াবর্ণনে কারণমাহ—নন্বিতি ॥

১৪। শ্রেয়স্কৃৎ তত্ত্বমুপদিশন্ ॥

১৫। ননু শূদ্রোঽসৌ কথমুপদিশেৎ ? ন হ্যসৌ শূদ্রঃ, কিন্তু যমস্তদ্রূপেণাসীৎ। কিং তত্র কারণম্? যমে চাত্রাগতেঽমুত্র কো দণ্ডধরঃ ?

ইত্যপেক্ষায়ামাহ—অবিভ্রদিতি, দণ্ডং ধৃতবানিত্যর্থঃ। শাপাৎ মাণ্ডব্য-শাপাৎ। তথা হি ক্বচিচ্চোরানন্নুধাবন্তো রাজভটা মাণ্ডব্যস্য ঋষেস্তপশ্চরতঃ সমীপে তান্ সম্প্রাপ্য তেন সহ নিবধ্যানীয়[১] রাজ্ঞে নিবেদ্য তদাজ্ঞয়া তান্ সর্ব্বান্ শূলমারোপয়ামাসুঃ ; ততো রাজা তমৃষিং জ্ঞাত্বা শূলাদবতার্য্য প্রসাদয়ামাস, ততো মুনির্যমং গত্বা কুপিত উবাচ—'অথ কস্মাদহং শূলমারোপিতঃ ?' ইতি। তেনোক্তম্—'ত্বং বাল্যে শলভং কুশাগ্রেণাবিধ্য ক্রীড়িতবান্।' ইতি। তচ্ছ্রুত্বা মাণ্ডব্যস্তং শশাপ—'বাল্যেঽজানতো মে মহান্তং দণ্ডং যতস্ত্বং কারিতবান্, অতঃ শূদ্রো ভব।' ইতি ॥

১৬। ইদানীং রাজ্যস্যাপকর্ষং নিরূপয়িতুমুৎকর্ষং নিগময়তি—যুধিষ্ঠির ইতি। কুলন্ধরং বংশধরম্ ॥

১৭। তদীহয়া গৃহব্যাপারেণ প্রমত্তানামত্যক্রামৎ, আয়ুঃকালোঽ-তিক্রান্তঃ ; যদ্বা, তান্ কালোঽভ্যভবদিত্যর্থঃ ॥

১৮। অভিপ্রেত্য জ্ঞাত্বা ॥

১৯। নন্বু তৎপ্রতীকারঃ ক্রিয়তাং, কিং নির্গমনেন ? তত্রাহ—প্রতিক্রিয়েতি। সর্ব্বেষামিতি, যৈঃ প্রতিকর্ত্তব্যং তেষামপীত্যর্থঃ ॥

২০। কথং ধনাদিবিয়োগঃ সোঢ়ুং শক্যঃ ? অত আহ—যেনেতি। অভিপন্নঃ অভিগ্রস্তঃ ॥

২১—২৭। অত্রাবস্থানেঽতিদৈন্যমিতি দর্শয়ন্ বৈরাগ্যমুৎপাদয়তি—পিতৃভ্রাত্রিতি সপ্তভিঃ। আত্মা দেহঃ ॥ (২৩) যেন পুত্রা হতাঃ, তেন ভীমেন দত্তং পিণ্ডমন্নম্, গৃহপালঃ শ্বা ইব ॥ (২৪) নিসৃষ্টঃ প্রক্ষিপ্তঃ, গরো বিষম্, দূষিতা অবমতাঃ,. তদ্দত্তৈরন্নাদিভির্বৈরসুভিঃ কিয়ৎ প্রয়োজনম্ ? ন কিঞ্চিদিত্যর্থঃ ॥ (২৫) তস্যাপি এবং দৈন্যমনুভব-তোঽপি পরৈরেতি ক্ষীয়তে। অতএব ধীরো ভবেতি ॥ (২৬) কিং-

১। নিরুধ্যানীয় (ঘ)।

লক্ষণো ধীরঃ ? ইত্যপেক্ষায়ামাহ—গতস্বার্থং যশোধর্ম্মাদিশূন্যম্। মুক্তবন্ধনঃ ত্যক্তাভিমানঃ। ক্ব গত ইতি অবিজ্ঞাতা গতির্যস্য, স ধীরঃ প্রাপ্ত-দুঃখস্য স্বয়ং সহনেন মুক্তিপ্রাপ্তেঃ। বৈ নিশ্চিতম্॥ (২৭) নরোত্তমস্তু ততঃ প্রাগেব কৃতপ্রতীকারঃ, স্বকাৎ স্বত এব, পরতঃ পরোপদেশতো বা॥

২৮। ত্বন্তু পূর্ব্বং নরোত্তমো নাভূঃ, অত ইদানীং ধীরো ভবেত্যাহ —অথেতি। অর্ব্বাক্ অর্ব্বাচীন এষ্যন্নিত্যর্থঃ। গুণান্ ধৈর্য্যদয়াদীন্ বিকর্ষতি আচ্ছিনত্তীতি তথা॥

২৯। আজমীঢ়ঃ অজমীঢ়বংশজঃ। প্রজ্ঞাচক্ষুঃ অন্ধঃ, এবং বোধিতঃ সন্, দ্রঢ়িম্নশ্চিত্তদার্ঢ্যাৎ, ভ্রাত্রা সন্দর্শিতোঽধ্বা বন্ধমোক্ষয়োর্মার্গো যস্য সঃ॥

৩০। সুবলস্য পুত্রী গান্ধারী, সাধ্বী সুশীলা হিমালয়ং প্রয়ান্তং পতিমনুজগাম। ননু কথং সা সুকুমারী হিমাদিদুঃখবহুলং হিমবন্তং গতা ? অত আহ—ন্যস্তদণ্ডানাং সন্ন্যাসিনাং[১] প্রহর্ষো যস্মিন্ তং দুঃখদমপি কথঞ্চিৎ কেষাঞ্চিৎ প্রহর্ষহেতুর্ভবতীত্যত্র দৃষ্টান্তঃ—মনস্বিনাং শূরাণাং যুদ্ধে সন্ তীব্রঃ সম্প্রহারো যথা। পাঠান্তরে সৎ সম্প্রহারং যুদ্ধং যথেতি॥

৩১। কৃতং মৈত্রং মিত্রদৈবত্যং সন্ধ্যাবন্দনং যেন সঃ; নত্বা সম্পূজ্য, পিতরৌ বিদুরধৃতরাষ্ট্রৌ॥

৩২। হে গাবল্গণে! গবল্গণস্য পুত্র! সঞ্জয়॥

৩৩। অকৃতপ্রজ্ঞে মন্দমতৌ, শমলমপরাধমাশংসমান আশঙ্কমানো ভার্য্যয়া সহ॥

৩৪। যৌ অরক্ষতাং তৌ, ইতঃ স্থানাৎ॥

৩৫। কৃপয়া স্নেহবৈক্লব্যাচ্চাতিপীড়িতঃ, আত্মেশ্বরং ধৃতরাষ্ট্রমপশ্যন্, বিরহকর্ষিতশ্চ সূতঃ সঞ্জয়ো ন প্রত্যুত্তরমাহ॥

৩৬। আত্মনা বুদ্ধ্যা, আত্মানং মনো বিষ্টভ্য ধৈর্য্যযুক্তং কৃত্বা; প্রভোঃ ধৃতরাষ্ট্রস্য॥

১। বিরক্তানাং (ক)।

৩৭। ব্যবসিতং নিশ্চিতং গান্ধার্য্যাশ্চ, যতো মুষিতো বঞ্চিতোঽস্মি ॥

৩৮। এবং কঞ্চিৎ কালং শোচতি তস্মিন্নথ নারদ আজগাম। অত্রাস্তি কচিৎ পুস্তকে 'অভ্যর্চ্চয়ন্ মুনিম্' ইতি পাঠান্তরম্; তদুল্লঙ্ঘ্য যথাসম্প্রদায়ং ব্যাখ্যায়তে। শোকবেগাদভ্যর্চ্চয়ন্নিবাহ রাজা, ন ত্বভ্যর্চ্চয়ন্, 'শোকাক্রান্তঃ কৃপাবিষ্টঃ শ্রদ্ধয়া রহিতঃ পুমান্। গুরুদেবদ্বিজাতীনাং পূজনং ন সমাচরেৎ॥' ইতি স্মৃতেঃ ॥

৩৯। নাহং বেদ বেদ্মি, তপস্বিনী দুঃখযুক্তা, অপারে শোকার্ণবে ভগবান্ ত্বমেব পারদর্শকঃ ; অতো ব্রূহীতি শেষঃ ॥

৪১। আদাবেব যথাবৃত্তকথনে শোকেন মূর্চ্ছিতঃ পতেদিতি প্রথমং তাবচ্ছোকমপনয়তি—কঞ্চন মা শুচঃ[১], মা শোচঃ ন কেবলং তানেব, যদ্ যস্মাৎ ঈশ্বরাধীনং জগৎ; তদেবাহ—লোকা ইতি, সংযুনক্তি সংযোজয়তি, বিযুনক্তি বিযোজয়তি চ ॥

৪২। গাবো বলীবর্দ্দা নসি নাসিকায়াং প্রোতাস্তন্ত্যাং দীর্ঘতন্ত্র্যাং দামভির্বদ্ধাঃ স্বামিনো বলিং বহন্তি যথা, এবং বাক্তন্ত্র্যাং কর্ত্তব্যাকর্ত্তব্য-বিধায়কবেদলক্ষণায়াং নামভির্ব্রাহ্মণো ব্রহ্মচারীত্যাদি-বর্ণাশ্রমলক্ষণৈর্বদ্ধাঃ পরমেশ্বরস্য বলিং তেন প্রেরিতাঃ সর্ব্বে বহন্তীত্যর্থঃ ॥

৪৩। প্রবৃত্তৌ পারতন্ত্র্যমুক্ত্বা সংযোগবিয়োগয়োরপ্যাহ—যথেতি। ক্রীড়োপস্করাণাং ক্রীড়াসাধনানাং দারুরচিতমেষাদীনাম্ ॥

৪৪। ঈশ্বরাধীনত্বান্ন শোকঃ কার্য্য ইত্যুক্তম্, লোকতত্ত্বে চ বিচার্য্যমাণে নির্ব্বিষয়োঽয়ং শোক ইত্যাহ—যন্মন্যস ইতি। যদ্যদি লোকং জনং ধ্রুবং জীবরূপেণ, অধ্রুবং দেহরূপেণ, ন বেতি ন ধ্রুবং নাপ্যধ্রুবং শুদ্ধ-ব্রহ্মস্বরূপত্বেন অনির্ব্বচনীয়ত্বেন বা। উভয়ং বা চিজ্জড়াংশতঃ ; সর্ব্বথা

১। ন শোচঃ (ক)।

চতুর্ষ্বপি পক্ষেষু তে পিত্রাদয়ো ন শোচ্যাঃ ; স্নেহাদন্যত্র স্নেহ এব কেবলং শোকহেতুঃ, স চাজ্ঞানমূল ইত্যর্থঃ ॥

৪৫। তস্মান্মাং বিনা কথং তে বর্ত্তেরন্? ইতি মনসো বৈক্লব্যং ব্যাকুলতাং ত্যজ ॥

৪৬। তত্র ত্বদ্দেহতস্তেষাং বৃত্তিরিত্যেতত্তাবন্নাস্তীত্যাহ—কালো গুণ-ক্ষোভকঃ, কর্ম্ম জন্মনিমিত্তম্, গুণ উপাদানম্, তদধীনঃ। পাঞ্চভৌতিকো জড়ঃ, তদ্বিভাগে নাশবাংশ্চ ; সর্পগ্রস্তঃ অজগরগিলিতো যথা অন্যং ন রক্ষতি তদ্বৎ ॥

৪৭। ঈশ্বরেণ বিহিতা বৃত্তিঃ সর্ব্বতঃ সুলভৈবেত্যাহ—অহস্তানি পশ্বাদীনি, অপদানি তৃণাদীনি, তত্র তেষু অহস্তাদিষ্বপি ফল্গূনি, অল্পানি এবং জীবঃ সর্ব্বোঽপি সর্ব্বস্য জীবনং জীবিকা। এতেনৈব সর্ব্বতো মৃত্যুগ্রাসত্বঞ্চোক্তম্ ॥

৪৮। মোহনিবৃত্ত্যর্থং দ্বৈতস্যাবস্তুতামাহ—তদিদম্। অহস্তসহস্তাদি-রূপং জগৎ স্বদৃক্ ভগবানেব, ন ততঃ পৃথগেব, স চৈক এব, ন তু নানা। নন্বু সজাতীয়বিজাতীয়ভেদে প্রত্যক্ষে কুত এতৎ? তত্রাহ—আত্মনাং ভোক্তৄণামাত্মস্বরূপম্, অতো ন সজাতীয়ভেদঃ, অন্তরোঽনন্তরশ্চ অন্ত-র্বহির্ভোক্তৃভোগ্যরূপশ্চ ভাতি, অতো ন বিজাতীয়ভেদোঽপি। নন্বু একঃ কথং তথা প্রতীয়েত? তত্রাহ—মায়য়া উরুধা বহুধা ভাতি, তং পশ্যেতি ॥

৪৯। ক্বাসাবস্তীদৃশো মহামায়াবী? দ্বারকায়ামিত্যাহ—সোঽয়মিতি। অস্যাং ভূম্যাম্ ; অভবায় নাশায় ॥

৫০। তর্হি শ্রীকৃষ্ণোঽত্রাস্তীতি অত্রৈবাস্থাং মা কৃথা ইত্যাহ—নিষ্পাদিতমিতি। তচ্চ দেবানাং কার্য্যং তেন নিষ্পাদিতম্। কেবলমবশেষং প্রতীক্ষতে ; যদুকুলক্ষয়মিতি হৃদিস্থম্, ততো নিজং ধাম যাস্যতি, ততো যূয়মপি গচ্ছতেত্যর্থঃ। তচ্চ ভূতমপি বিদুরবদেব নাবর্ণয়ৎ ॥

৫১—৫৬। তদেবং শোকমাস্থাঞ্চ নিবার্য্য জিজ্ঞাসবে তস্মৈ যথাবৃত্তং কথয়তি—ধৃতরাষ্ট্র ইতি ষড়্ভিঃ। হিমবতো দক্ষিণে ভাগে॥ (৫২) তদপি কুত্রেত্যাহ—স্রোতোভিরিতি। যা বৈ প্রসিদ্ধা স্বর্ধুনী গঙ্গা, সা আত্মানং যত্র সপ্তধা ব্যধাৎ। কিমর্থম্? নানা পৃথক্ সপ্তভিঃ স্রোতোভিঃ প্রবাহৈঃ সপ্তানামৃষীণাং প্রীতয়ে, অতএব তৎ তীর্থং সপ্তস্রোতো বদন্তি॥ (৫৩—৫৬) তত্র তেন কৃতমষ্টাঙ্গযোগমাহ—স্নাত্বেতি চতুর্ভিঃ। অত্র স্নানং হোমোঽব্ভক্ষণঞ্চ (ইতি) নিয়মা উক্তাঃ, ভক্ষস্থানেঽপাং স্বীকারোঽব্ভক্ষঃ; উপশান্ত আত্মা যস্য সঃ, বিগতাঃ পুত্রাদ্যেষণা যস্মাদিতি যমা উক্তাঃ॥ (৫৪) জিতাসন ইত্যাদিনা আসনপ্রাণায়ামপ্রত্যাহারা উক্তাঃ, হরিভাবনয়েতি ধারণোক্তা। ধ্বস্তা রজঃসত্ত্বতমোরূপা মলা যস্যেতি, ফলতো ধ্যানমুক্তম্॥ (৫৫-৫৬) সমাধিমাহ—বিজ্ঞানেতি দ্বাভ্যাম্। আত্মানমহঙ্কারাস্পদং স্থূলদেহাদ্বিযোজ্য বিজ্ঞানাত্মনি বুদ্ধৌ সংযোজ্য একীকৃত্য, তঞ্চ বিজ্ঞানাত্মানং দৃশ্যাংশাদ্বিযোজ্য ক্ষেত্রজ্ঞে দ্রষ্টরি প্রবিলাপ্য, তঞ্চ ক্ষেত্রজ্ঞং দ্রষ্ট্রংশাদ্বিযোজ্য আধারে আশ্রয়সংজ্ঞে ব্রহ্মণি প্রবিলাপ্য, যথা অম্বরং ঘটোপাধের্বিযোজ্য মহাকাশে প্রবিলাপ্যতে তদ্বৎ। ব্যুত্থানাভাবমাহ—ধ্বস্তেতি। অন্তর্গুণক্ষোভাদ্বহিরিন্দ্রিয়বিক্ষেপাদ্বা ব্যুত্থানং ভবেৎ, তদুভয়ং তস্য নাস্তি, যতো ধ্বস্তো মায়াগুণানামুদর্ক উত্তরফলং বাসনা যস্য; নিরুদ্ধানি করণানি চক্ষুরাদীনি আশয়ো মনশ্চ যস্য, অতএব নিবর্ত্তিতোঽখিল আহারো ভোজ্যমিন্দ্রিয়ৈর্বিষয়াহরণং বা যেন সঃ, স্থাণুরিব নিশ্চল আস্তে॥

৫৭। তথাভূতমপ্যানেতুমুদ্যতং প্রত্যাহ—তস্যেতি। অন্তরায়ো বিঘ্নঃ; মৈবাভূঃ ইত্যড়াগমশ্ছান্দসঃ। দর্শনমপি তাবৎ কুর্য্যামিত্যুদ্যতং প্রত্যাহ—স বৈ, অদ্যতনাদহ্নঃ পরতঃ উত্তরত্র; স্বং স্বাধীনম্। তর্হি তদ্দাহার্থং গমিষ্যামি? নেত্যাহ—তচ্চেতি॥

৫৮। তর্হি গান্ধার্য্যানয়নায় গমিষ্যামি ? নেত্যাহ—দহ্যমান ইতি। পত্যুর্দেহে সহোটজে পর্ণশালাসহিতে যোগাগ্নিনা সহ গার্হপত্যাদিভির্দহ্যমানে তস্য পত্নী বহিঃস্থিতা সতী তং পতিমন্বগ্নিং বেক্ষ্যতি প্রবেক্ষ্যতি॥

৫৯। তর্হি বিদুরানয়নার্থং গন্তব্যমেব ? নেত্যাহ—বিদুরস্তু তন্নিশাম্য দৃষ্ট্বা ভ্রাতুঃ সুগত্যা হর্ষঃ, তন্মৃত্যুনা শোকশ্চ তাভ্যাং যুক্তস্তস্মাৎ স্থানাৎ তীর্থানি নিষেবিতুং গন্তা গমিষ্যতি॥

৬০। শুচঃ শোকান্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে

ত্রয়োদশোঽধ্যায়ঃ॥ ১৩॥

চতুর্দ্দশোঽধ্যায়ঃ

চতুর্দ্দশে ত্বরিষ্টানি দৃষ্ট্বা রাজা বিশঙ্কিতঃ।
অশৃণোদর্জ্জুনাৎ কৃষ্ণ-তিরোধানমিতীর্য্যতে॥ (১)

১। শ্রীকৃষ্ণস্য চেতি চকারেণাভিপ্রায়ঞ্চ জ্ঞাতুম্॥

২। কতিচিৎ সপ্ত, তদা কালাতিক্রমেঽপি ততো দ্বারকায়া নায়াৎ নাগতঃ, নিমিত্তানি উৎপাতাদীন্, কুরূদ্বহো যুধিষ্ঠিরঃ॥

৩। রৌদ্রাং ঘোরাম্, তদেবাহ—বিপর্য্যস্তা ঋতুধর্ম্মা যস্মিন্ তস্য, বার্ত্তাং জীবিকাম্ ; ক্রোধলোভানৃতৈর্যুক্ত আত্মা যেষাম্॥

৪। জিহ্মপ্রায়ং কপটবহুলং ব্যবহৃতং ব্যবহারম্, শাঠ্যং বঞ্চনং তন্মিশ্রং সৌহৃদং সখ্যম্, পিত্রাদীনাং স্বপ্রতিযোগিভিঃ কল্কনং কলহাদি॥

৫। অত্যরিষ্টানি অত্যন্তমশুভানি দৃষ্ট্বা, নৃণাং লোভাদ্যধর্ম্মপ্রকৃতিং চ দৃষ্ট্বা ; অনুজং ভীমম্॥

৭। বেতি বিতর্কে, কস্মাদ্ধেতোর্নায়াতীতি নাহং বেদ্মি ॥

৮। অপি কিং যদা আত্মন আক্রীড়ং ক্রীড়াসাধনম্, অঙ্গং মনুষ্য-নাট্যমুৎস্রষ্টুমিচ্ছতি স কালঃ কিং প্রাপ্তঃ? ?

৯। অস্মাকং সর্ব্বপুরুষার্থহেতুঃ শ্রীকৃষ্ণঃ, অতস্তদ্বিয়োগং বিনা অনিষ্টং ন স্যাদিত্যাশয়েনাহ—যস্মাৎ শ্রীকৃষ্ণাদ্ধেতোঃ ; এতচ্চোপরিষ্টাৎ অর্জ্জুনঃ স্পষ্টীকরিষ্যতি। অয়ং শ্লোকোঽধিকঃ ক্বচিৎ পুস্তকে। লোকাশ্চ যত্ত-করণানুরূপা যস্যানুগ্রহাৎ ॥

১০। অদূরাৎ সন্নিহিতং নোঽস্মাকং ভয়ং শংসত উৎপাতান্ ॥

১১। দৈহিকানাহ—ঊর্ব্বিতি ; ঊর্ব্বাদয়ো বামাঃ পরিস্ফুরন্তি, বেপথুঃ কম্পশ্চ হৃদয়ে বর্ত্ততে ; এতে মহ্যমারাৎ সন্নিহিতং বিপ্রিয়ং দাস্যন্তি ॥

১২—১৫। ভৌমানাহ সার্দ্ধত্রিভিঃ। শিবা ক্রোষ্ট্রী উদ্যন্তমাদিত্যম-ভিরৌতি উদ্যৎসূর্য্যাভিমুখং ক্রোশতি, অনলাননা অগ্নিং মুখেন বমন্তী। অঙ্গ! হে ভীম! মামভিলক্ষ্য সারমেয়ঃ শ্বা অভিরেভতি প্লুতং ভষতি, অভীরুবৎ নিঃশঙ্কবৎ ॥ (১৩) শস্তা গবাদয়ো মাং সব্যং বামং কুর্ব্বন্তি, অপরে গর্দ্দভাদয়ঃ প্রদক্ষিণং কুর্ব্বন্তি; বাহান্ অশ্বান্ ॥ (১৪) অয়ং কপোতো মৃত্যুদূতো মৃত্যুসূচকঃ, উলূকঃ পেচকঃ, প্রত্যুলূকঃ তৎপ্রতি-পক্ষো[১] ঘূকঃ কাকো বা ; কুহ্বানৈঃ কুৎসিতশব্দৈঃ, বিশ্বং শূন্যমিচ্ছতঃ ॥ (১৫) ধূম্রা ধূসরাঃ দিশঃ পরিধয় ইবাগ্নিং লোকমাবৃণ্বন্তি ॥

১৫—১৭। দিব্যানাহ সার্দ্ধদ্বাভ্যাম্। নির্ঘাতো নিরভ্রবজ্রপাতঃ। স্তনয়িত্নবোঽভ্রগর্জ্জিতানি তৈঃ সহ ॥ (১৬) তমো বিসৃজন্ বিশেষেণ সৃজন্, অসৃক্ রক্তম্ ॥ (১৭) গ্রহাণাং মর্দ্দং যুদ্ধম্, ভূতা রুদ্রানুচরাঃ,

---

১। বকঃ (ক)।

তেষাং গণৈঃ সঙ্কুলৈর্ব্যামিশ্রৈঃ প্রাণিভিঃ সহিতৈঃ, রোদসী দ্যাবাপৃথিব্যৌ জ্বলিতে প্রদীপ্তে ইব পশ্যেতি ॥

১৮—২০। পুনর্ভৌমানাহ—নদ্য ইতি সার্দ্ধৈস্ত্রিভিঃ। প্রাণিনাং মনাংসি চ॥ (১৯) ন দুহ্যন্তীতি কর্ম্মকর্ত্তর্য্যার্ষম্ ; ন প্রস্নুবন্তীত্যর্থঃ ॥ (২০) দৈবতানি প্রতিমাঃ, অঘং দুঃখম্ ॥

২১। এতৈর্মহোৎপাতৈঃ কৃত্বা, ন বিদ্যতেঽন্যেষু পুরুষেষু শ্রীর্বজ্রাঙ্কুশাদিশোভা যেষাং তৈর্ভগবতঃ পদৈর্হীনা ভূরিত্যহং মন্যে ॥

২২। তস্য রাজ্ঞ ইত্যেবং দৃষ্টান্যরিষ্টানি যেন তেন চেতসা চিন্তয়তঃ সতঃ ॥

২৩। অযথাপূর্ব্বং নিপতিতম্ ; তদেবাহ—আতুরমিত্যাদি। অব্বিন্দূন্ অশ্রূণি নেত্রাভ্যাং বিসৃজন্তমিত্যর্থঃ ॥

২৪। উদ্বিগ্নং কম্পিতং হৃদয়ং যস্য ; বিচ্ছায়ং বিগতকান্তিম্ ॥

২৫। স্বজনা বান্ধবাঃ ॥

২৬। কিং বক্ষ্যতীতি শঙ্কয়া ব্যবহিতক্রমেণ পৃচ্ছতি—শূর ইত্যাদিনা ; মারিষো মান্যো মাতামহঃ শূরো নাম যাদবঃ—কুন্ত্যাঃ পিতা, আনকদুন্দুভির্বসুদেবঃ ॥

২৭। স্বসারঃ পরস্পরম্। বসুদেবক্ষেমাৎ তাসামপি ক্ষেমং পৃষ্টমেব, পৃথগপি পৃচ্ছতি—স্বয়মিতি ॥

২৮। আহুক উগ্রসেন অসন্ পুত্রো যস্য, অতএব জীবনমাত্রমেব পৃষ্টম্ ; অনুজশ্চ দেবকঃ, হৃদীকসুতঃ কৃতবর্ম্মা, জয়ন্তাদয়ঃ শ্রীকৃষ্ণভ্রাতরঃ ॥

৩০। সর্ব্ববৃষ্ণীনাং মধ্যে মহারথঃ, গম্ভীররয়ো যুদ্ধে মহাবেগঃ, বর্দ্ধতে মোদতে ইত্যর্থঃ ॥

৩১। শ্রীকৃষ্ণস্যাপত্যানি কার্ষ্ণয়ঃ, তেষু প্রবরাঃ ॥

৩২। সুনন্দনন্দৌ শীর্ষণ্যৌ মুখ্যৌ যেষাং তে ॥

৩৪। 'ভগবতি সুখমাস্তে' ইতি প্রশ্নস্যানৌচিত্যমাশঙ্ক্যাহ—পুর ইত্যাদি॥ (৩৫—৩৮) ভগবতোঽত্রাবস্থানে হি লোকানাং মঙ্গলং নান্যথেত্যাশয়েনাহ চতুর্ভিঃ। মঙ্গলায় শুভায়, ক্ষেমায় লব্ধপালনায়, ভবায় উদ্ভবায়, অনন্তসখঃ বলভদ্রসহায়ঃ॥ (৩৬) অর্চ্চিতাঃ সর্ব্বৈঃ পূজিতাঃ, পরমানন্দং যথা ভবতি তথা, মহাপুরুষো বিষ্ণুস্তদীয়া মহাপৌরুষিকা বৈকুণ্ঠনাথানুচরা ইব॥ (৩৭) যস্য পাদশুশ্রূষণমেব মুখ্যং তপআদিভ্যঃ শ্রেষ্ঠং যৎ কর্ম্ম, তেন সত্যভামাদয়ঃ; সংখ্যে যুদ্ধে শ্রীকৃষ্ণবলেন নির্জ্জিত্য; তদাশিষো দেবভোগ্যান্ পারিজাতাদীন্, বজ্রায়ুধবল্লভা শচী, তস্যা উচিতাঃ॥ (৩৮) যদ্বাহুদণ্ডপ্রভাবোপজীবিনঃ সুধর্ম্মামঙ্ঘ্রিভিরধিক্রামন্তি, স গোবিন্দঃ সুখমাস্তে ইতি গতপঞ্চমশ্লোকেনান্বয়ঃ॥

৩৯—৪৪। ইদানীং তস্যৈব কুশলং পৃচ্ছতি—কচ্চিদিতি ষড়্ভিঃ। অনাময়মারোগ্যম্, ন লব্ধো মানো যেন বন্ধুভ্যঃ সকাশাৎ; কিংবা তৈঃ প্রত্যুত অবজ্ঞাতস্তিরস্কৃতঃ, যতশ্চিরোষিতঃ বহুকালং তত্র স্থিতঃ॥ (৪০) অভাবৈরিতি চ্ছেদঃ। প্রেমশূন্যৈরমঙ্গলৈঃ পুরুষৈঃ শব্দাদিভির্নাভিহতঃ ন তাড়িতোঽসি কিম্? যদ্বা, অর্থিভ্যঃ কিমপি দাস্যামীতি নোক্তং কিম্? যদ্বা, আশয়া সহ যথা আশা ভবতি, তথা দাস্যামীতি প্রতিশ্রুতং যৎ, তন্ন দত্তং কিম্? (৪১) অন্যদ্বা শরণাগতং সত্ত্বং প্রাণিমাত্রং ন ত্যক্তবানসি কিম্? যতস্ত্বং পূর্ব্বং শরণপ্রদ আশ্রয়প্রদঃ॥ (৪২) অগম্যামিতি চ্ছেদঃ। নিন্দিতাং স্ত্রিয়ং নাগমঃ কিং, ন গতবানসি? অসৎকৃতাং অসংস্কৃতাং মলিনবস্ত্রাদিকাং নাগমঃ কিম্? নোত্তমৈরনুত্তমৈঃ সমৈরিত্যর্থঃ; অসমৈরধমৈর্ব্বা কিং ন পরাজিতোঽসীত্যর্থঃ॥ (৪৩) সম্ভোজনার্হান্ বৃদ্ধান্ বালকাংশ্চ কিংস্বিৎ পর্য্যভুঙ্ক্থাঃ ত্যক্ত্বা ভুক্তবানসি কিম্? অক্ষমং কর্ত্তুমযোগ্যং যৎ তন্ন কৃতবানসি কিম্? (৪৪) নিত্যং সদা প্রেষ্ঠতমেন হৃদয়েন অত্যন্তরঙ্গেণ স্ববন্ধুনা

শ্রীকৃষ্ণেন রহিতঃ শূন্যোঽস্মীত্যাত্মানং মন্যসে ; যদ্বা, স্বহৃদয়েন শূন্যোঽস্মীত্যন্বয়ঃ। অন্যথা তে রুক্ মনঃপীড়া ন ঘটেত ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ ॥ ১৪ ॥

পঞ্চদশোঽধ্যায়ঃ

কলিপ্রবেশমালক্ষ্য ধুরং ন্যস্য পরীক্ষিতি।
আরুরোহ নৃপঃ স্বর্গমিতি পঞ্চদশেঽব্রবীৎ ॥ (১)

১—২। কৃষ্ণোঽর্জ্জুনঃ, আবিকল্পিত ইতি চ্ছেদঃ। নানাশঙ্কাস্পদং রূপমালক্ষ্য বিকল্পিত ইত্যর্থ। প্রতিভাষিতুং নাশক্নোদিত্যুত্তরেণান্বয়ঃ। তত্র হেতবঃ—শ্রীকৃষ্ণবিশ্লেষেণ কর্শিতঃ কৃশঃ কৃতঃ ॥ (২) শোকেন হেতুনা, বদনঞ্চ হৃচ্চ তে এব সরোজে, শুষ্যন্তী বদনহৃৎসরোজে যস্য ; হতা প্রভা তেজো যস্য ॥

৩—৪। শুচঃ শোকাশ্রূণি যান্যুদ্গচ্ছন্তি, তানি নেত্রয়োরেব সংস্তভ্য গলিতানি চ পাণিনা আমৃজ্য ; পরোক্ষেণ দর্শনাগোচরেণ শ্রীকৃষ্ণেন হেতুনা সমুন্নদ্ধমধিকং যৎ প্রেমোৎকণ্ঠ্যম্, তেন কাতরো ব্যাকুলঃ সন্ নৃপমিত্যাহেত্যুত্তরেণান্বয়ঃ ॥ (৪) সখ্যং হিতৈষিতাম্, মৈত্রীমুপকারিতাম্, সৌহৃদং সুহৃত্ত্বং সম্বন্ধিতাঞ্চ, বাষ্পেণ কণ্ঠাবরোধাদ্গদ্গদয়া ॥

৫। যেন মাং বঞ্চয়তা ; দেবান্ বিস্মাপয়তি যৎ ॥

৬—১৩। যস্য ক্ষণবিয়োগেনেত্যাদি-যচ্ছব্দানাং 'তেনাহমদ্য মুষিতঃ' ইতি সপ্তমশ্লোকস্থেন তচ্ছব্দেন সম্বন্ধঃ; প্রিয়স্যাপ্যপ্রিয়ত্বে দৃষ্টান্তঃ। উক্থেন প্রাণেন, এষ পিত্রাদিঃ॥ (৭—১৬) শ্রীকৃষ্ণোপকারাননুস্মরতি যৎসংশ্রয়াদিতি দশভিঃ; যস্য সংশ্রয়াদ্ বলাৎ স্মরেণ কামেন দুর্ম্মদানামতি-মত্তানাং তেজঃ প্রভাবঃ হৃতং ধনুগ্রহণেনৈব, পশ্চাৎ তদ্ধনুঃ সজ্জীকৃতঞ্চ, যেন মৎস্যো যন্ত্রোপরি ভ্রমন্ বিদ্ধঃ, ততস্তান্ বিজিত্য দ্রৌপদী চ প্রাপ্তা॥ (৮) উ ইতি বিস্ময়ে, খাণ্ডবম্ ইন্দ্রস্য বনমগ্নয়ে অদাং দত্তবানস্মি। খাণ্ডবদাহে রক্ষিতেন ময়েন কৃতা সভা চ লব্ধা, অদ্ভুতশিল্পরূপা মায়া যস্যাং সা। তে অধ্বরে রাজসূয়ে॥ (৯) অনন্তরশ্লোকো বিগীতঃ, তথাপি ব্যাখ্যায়তে। নৃপশিরঃস্বঙ্ঘ্রির্যস্য তং জরাসন্ধং তবানুজো ভীমো মখার্থমহন্ হতবান্, তন্নির্জ্জয়ং বিনা রাজসূয়মখানুপপত্তেঃ। গজাযুতস্যেব সত্ত্বমুৎসাহশক্তির্বীর্য্যং বলঞ্চ যস্য সঃ। তং হত্বা প্রমথনাথো মহাভৈরবঃ, তস্য মখায় যে রাজানস্তেনাহৃতাঃ, তে যদ্ যস্মান্মোচিতাঃ, তৎ তস্মাৎ তেঽধ্বরে বলিমানীতবন্তঃ॥ (১০) যৈঃ কিতবৈঃ দুঃশাসনাদিভিস্তব পত্ন্যাঃ কবরং বিকীর্য্য উন্মুচ্য স্পৃষ্টমাকৃষ্টম্, তেষাং স্ত্রিয়ো হতেশাঃ, অতএব বৈধব্যাৎ বিমুক্তকেশাশ্চ অকৃত চকার। কথম্ভূতং কবরম্? অধিমখং রাজসূয়মধিকৃত্য কিপ্তো রচিতো যো মহাভিষেকস্তেন শ্লাঘ্যতমম্। চারু রম্যম্, তচ্চ তচ্চ স্মরণাৎ তদানীমেবাস্মৎকৃপয়া প্রাপ্তস্য শ্রীকৃষ্ণস্য নমনে পদয়োঃ পতিতানি অশ্রূণি মুখাদ্ যস্যাঃ পত্ন্যাঃ, পদ-শব্দস্যাপেক্ষস্যাপি পতিত-শব্দস্যাশ্রু-পদেন সমাসো নিত্যসাপেক্ষত্বাৎ॥ (১১) শিষ্যাণামযুতস্যাগ্রে তৎপঙ্‌ক্তৌ ভুঙ্‌ক্তে যস্তস্মাদ্দুর্ব্বাসসো হেতোঃ অরিণা দুর্য্যোধনেন রচিতং যৎ দুরন্তং কৃচ্ছ্রং শাপলক্ষণম্, তস্মাৎ সকাশাৎ নোঽস্মান্ বনমেত্য জুগোপ। কিং কৃত্বা? শাকমেবান্নং তস্মিন্ পাত্রেঽবশিষ্টমুপযুজ্য ভুক্ত্বা, যত উপযোগাৎ সলিলে বিনিমগ্নো মুনীনাং সজ্ঘ-

স্ত্রিলোকীং তৃপ্তাম্ অমংস্ত ; এবং হি ভারতকথা—"কদাচিৎ দুর্ব্বাসসো দুর্য্যোধনেনাতিথ্যং কৃতম্ ; তেন চ পরিতুষ্টেন বরং বৃণীষ্বেত্যুক্তে দুর্ব্বাসসঃ শাপাৎ পাণ্ডবা নশ্যেয়ুরিতি মনসি বিধায় দুর্য্যোধনেনোক্তম্—'যুধিষ্ঠিরোঽস্মৎকুলমুখ্যোঽতস্তস্যাপি ভবতৈবং শিষ্যাযুতসহিতেনাতিথিনা ভাব্যম্, কিন্তু দ্রৌপদী যথা ক্ষুধয়া ন সীদেৎ, তথা তস্যাং ভুক্তবত্যাং তদ্গৃহে গন্তব্যম্।' ইতি। ততশ্চ তথৈব দুর্ব্বাসসি প্রাপ্তে পরমাদরেণ যুধিষ্ঠিরেণ মাধ্যাহ্নিকং কৃত্বা আগম্যতামিতি বিজ্ঞাপিতো মুনিসঙ্ঘোঽঘমর্ষণায় জলে নিমমজ্জ। তত্র চিন্তাতুরয়া দ্রৌপদ্যা স্মৃতমাত্রঃ শ্রীকৃষ্ণোঽঙ্কস্থাং রুক্মিণীং হিত্বা তৎক্ষণমেব ভক্তবাৎসল্যেনাগতঃ। তয়া চাবেদিতে বৃত্তান্তে ভগবতোক্তং—'হে দ্রৌপদি! অহঞ্চ বুভুক্ষিতোঽস্মি, প্রথমং মাং ভোজয়।' ইতি। তয়া চাতিলজ্জয়া 'অহো মদীয়মভাগ্যমভাগ্যঞ্চ, যতস্ত্রৈলোক্যনাথো যজ্ঞপুরুষো ভগবান্ মদ্গৃহমাগতো ভোজনং প্রার্থয়তে।' ইতি মনসি বিধায়োক্তম্—'ভো স্বামিন্! মদ্ভোজনপর্য্যন্তমক্ষয়মন্নং সূর্য্যদত্তস্থাল্যাম্, ময়া চ সর্ব্বান্ সন্তোজ্য ভুক্তম্; অতো নাস্ত্যন্নম্।' ইত্যশ্রুপাতং চকার। তথাপ্যতিনির্ব্বন্ধেন স্থালীমানায্য তৎকণ্ঠলগ্নং কিঞ্চিচ্ছাকান্নং প্রাশ্যোক্তম্—'অনেন বিশ্বাত্মা ভগবান্ প্রীয়তাম্। অথ ভোক্তুং মুনিসঙ্ঘানাহ্বয়।' ইতি ভীমং প্রহিতবান্। ভীমেন গত্বোক্তম্—'স্বামিন্! ভোজনার্থমাগম্যতাম্। কথং বিলম্বঃ ক্রিয়তে?' স চ তাবতাতিতৃপ্তো বৃথাপাকভয়েন প্রপলায্য গতঃ।" ইতি॥ (১২) গিরিজাসহিতো বিস্মাপিতঃ সন্ নিজং পাশুপতমস্ত্রমদাৎ, অন্যেঽপি লোকপালা নিজান্যস্ত্রাণি দদুঃ। অন্যদপ্যাশ্চর্য্যমাহ—অমুনৈবেতি। মহত ইন্দ্রস্যাসনার্দ্ধম্॥ (১৩) তত্রৈব স্বর্গে ক্রীড়তঃ; গাণ্ডীবং লক্ষণং চিহ্নং যস্য তৎ; অরাতয়ো নিবাতকবচাদয়ো দৈত্যাস্তেষাং বধার্থমাশ্রিতবতঃ; যেনানুভাবিতং প্রভাবযুক্তং কৃতম্। হে আজমীঢ়! যুধিষ্ঠির! তেন মুষিতো বঞ্চিতোঽস্মি। কথম্?

ভূম্না নিজমহিমাবস্থানেন ॥ (১৪—১৬) যদ্বান্ধব ইত্যাদিশ্লোকত্রয়স্যাপি তেন মুষিতোঽহমিতি পূর্ব্বেণৈব সম্বন্ধঃ। শ্রীকৃষ্ণবান্ধব এক এবাহং কৌরব-সৈন্যাব্ধিম্, নাস্ত্যন্তো গাম্ভীর্য্যেণ পারঞ্চ দেশতো যস্য তং ততরে তীর্ণবান্ উত্তরগোগৃহে। অতার্য্যাণি দুস্তরাণি সত্ত্বানি তিমিঙ্গিলাদীনি ভীষ্মাদি-রূপাণি যস্মিন্। পরৈর্নীতং গোধনঞ্চ প্রত্যাহৃতং পরেষাঞ্চ শিরোভ্যঃ সকাশাৎ তেজাস্পদং প্রভাবস্যাস্পদমুষ্ণীবরূপং মণিময়ং মুকুটরত্নরূপঞ্চ বহুধনম্, তান্ মোহনাস্ত্রেণ মোহয়িত্বা হৃতং যদ্বান্ধবেন ময়া। (১৫) অদভ্রা অনল্পা যে রাজন্যবর্য্যাস্তেষাং রথমণ্ডলৈর্মণ্ডিতাসু ভীষ্মাদীনাং চমূষু। সারথিরূপেণ মমাগ্রেচরঃ সন্ হে বিভো! তেষাং রথযূথপানামায়ু-রাদীনি যো দৃশা দৃষ্ট্যৈব আর্চ্ছৎ হৃতবান্। মনাংসীত্যুৎসাহাদিশক্তিম্, সহো বলম্, ওজঃ শস্ত্রাদিকৌশলম্ ॥ (১৬) যস্য দোঃষু ভুজেষু মা মাং প্রণিহিতং স্থাপিতম্, তেনৈব গুর্ব্বাদিভির্নিরূপিতানি প্রযুক্তানি অস্ত্রাণি ন স্পৃশন্তি স্ম ; গুরুর্দ্রোণঃ, নপ্তা ভূরিশ্রবাঃ, ত্রিগর্ত্তঃ ত্রিগর্ত্তদেশাধিপতিঃ সুশর্ম্মা, শলঃ শল্যঃ, সৈন্ধবঃ সিন্ধুদেশাধিপতিঃ জয়দ্রথঃ, বাহ্লীকঃ শান্তনোর্ভ্রাতা, অমোঘো মহিমা যেষাং তথাভূতান্যপি, মহিতানীতি পাঠেঽপি স এবার্থঃ। প্রতীকারাকরণেঽপ্যস্পর্শে দৃষ্টান্তঃ—নৃহরিদাসং প্রহ্লাদমিবেতি ॥

১৭। স্বাপরাধমনুস্মরন্ সন্তপ্যমান আহ—সৌত্যে সারথ্যে কুমতির্মা মে ময়া স বৃতঃ। কুমতিত্বমেবাহ—আত্মদ ইত্যাদিনা। অভবায় মোক্ষায়, ভব্যাঃ শ্রেষ্ঠাঃ ; শ্রান্তা বাহা অশ্বা যস্য তং মাম্। জয়দ্রথবধে হি জলপানং বিনা অশ্বাঃ শ্রান্তাঃ, ততো রথাদবতীর্য্য বাণৈর্ভুবং ভিত্ত্বা জলং সম্পাদিতং ময়া। তদা যস্যানুভাবেন নিরস্তচিত্তা অরয়ো মাং ন প্রহৃতবন্তঃ, স সৌত্যে বৃত ইতি কুমতিত্বম্ ॥

১৮। হে নরদেব! উদারং গম্ভীরং রুচিরং যৎ স্মিতং, তেন শোভিতানি নর্ম্মাণি পরিহাসবাক্যানি, তথা কার্য্যপ্রস্তাবেষু হে পার্থেত্যা-

দানি মধুরাণি সঞ্জল্পিতানি চ হৃদিস্পৃশানি মনোজ্ঞানি মাধবস্য যান্যেতানি তানীদানীং স্মর্ত্তুর্মম হৃদয়ং লুঠন্তি ক্ষোভয়ন্তি। ণিজভাব আর্ষঃ ॥

১৯। বিকত্থনং স্বগুণশ্লাঘনম্, শয্যাদিষু ঐক্যাদব্যতিরেকাদ্ধেতোঃ। কদাচিদ্ ব্যভিচারং দৃষ্ট্বা 'হে বয়স্য! ঋতবান্ সত্যযুক্তস্ত্বম্' ইতি বক্রোক্ত্যা বিপ্রলব্ধস্তিরস্কৃতোঽপি। ঋভুমানিতি পাঠে ঋভবো দেবাঃ সেবকাঃ সন্তি যস্য অসৌ মহানপি ময়া বয়স্য ইতি কৃত্বা[১] বিপ্রলব্ধস্তিরস্কৃত ইত্যর্থঃ; ঋতমানিতি পাঠে বত্বভাব আর্ষঃ। মে অঘমপরাধম্ অসহত, মহিতয়া মহত্ত্বেন, মহামহিতয়েতি পাঠে একপদে অতিমহত্ত্বেনেত্যর্থঃ। সখ্যুরঘং সখেব, তনয়স্যাঘং পিতেব ॥

২০। ত্বয়া শঙ্কিতং পরাজয়ঞ্চ প্রাপ্তোঽহমিত্যাহ—তেন সখ্যা রহিতঃ, অতো হৃদয়েন শূন্যঃ; অঙ্গ! হে রাজন্! উরুক্রমস্য পরিগ্রহং ষোড়শসাহস্রস্ত্রীলক্ষণম্। অসদ্ভির্নীচৈঃ, অবলা যোষেব ॥

২১। শ্রীকৃষ্ণবিয়োগ এবাত্র হেতুঃ, নান্য ইত্যাহ—তদ্বৈ ইতি। যতো যেভ্যো হেতুভ্যো নৃপতয় আনমন্তি, ঈশেন রিক্তং শূন্যম্, অসৎ কার্য্যাক্ষমম্, সন্মন্ত্রবিধানৈরপি ভস্মনি হুতমিব; ভস্মন্নিতি লুপ্তসপ্তম্যন্তং পদম্। অতিপ্রীতাদপি কুহকান্মায়াবিনঃ সকাশাদ্রাদ্ধং লব্ধং যথা অসৎ সম্যক্কর্ষণাদিনাপি ঊষরভূমাবুপ্তং বীজমিব ॥

২২। সুহৃৎপুরে ত্বয়া পৃষ্টানাং নঃ সুহৃদাং মধ্যে চত্বারঃ পঞ্চ বা অবশেষিতাঃ। তত্র হেতুঃ—বিপ্রশাপেত্যাদি ॥

২৩। বারুণীমন্নময়ীম্; অজানতামিবান্যোঽন্যম্ এরকামুষ্টিভির্নিঘ্নতাম্ ॥

২৪—২৬। অবশেষিতা ইত্যনেনোক্তং হেতুকর্ত্তারমাহ—প্রায়েণেতি ত্রিভিঃ। ভাবয়ন্তি পালয়ন্তি ॥ (২৫) জলৌকসাং মৎস্যাদীনাং মধ্যে

১। মত্বা (ঘ)।

মহান্তঃ স্থূলা অণীয়সঃ সূক্ষ্মান্ যথা অদন্তি ভক্ষয়ন্তি ॥ (২৬) ভুবো ভারভূতান্ যদূন্ সংহৃতবান্ ॥

২৭। অতঃপরং বক্তুং ন শক্নোমীতি সূচয়ন্নাহ—দেশকালোচিতার্থ-যুক্তানি মনঃপীড়োপশমকরাণি চ গোবিন্দস্য বচনানি স্মরতো মম চিত্তং হরন্তি আকর্ষন্তি ॥

২৮। এবমিতি সূতোক্তিঃ। অতিদৃঢ়েন স্নেহেন কৃষ্ণপাদসরোরুহং চিন্তয়তোঽর্জ্জুনস্য মতিঃ শান্তা বিশোকা বিমলা বিরক্তা চাসীৎ ॥

২৯—৩০। মতিবৈমল্যফলমাহ—বাসুদেবাঙ্ঘ্র্যনুধ্যানেন পরিবৃংহিতং রংহো বেগো যস্যাস্তয়া ভক্ত্যা নির্ম্মথিতা উন্মূলিতা অশেষাঃ কষায়াঃ কামাদয়ো যস্যাঃ সা ধিষণা বুদ্ধির্যস্য সঃ। জ্ঞানং পুনরধ্যগমদিত্যুত্তরেণান্বয়ঃ॥ (৩০) কালেন কর্ম্মভিস্তমসা ভোগাভিনিবেশেন চ রুদ্ধমাবৃতং সৎ পুনঃ প্রাপ ॥

৩১। জ্ঞানফলমাহ—বিশোক ইতি ; এতদেব শোকহেত্বভাবেনোপ-পাদয়তি—শোকস্য হি হেতুর্দ্বৈতভ্রমঃ, তস্য দেহস্তস্য লিঙ্গম্, তস্য গুণাঃ, তেষামবিদ্যাঃ। তত্র ব্রহ্মসম্পত্ত্যা বেদান্তশ্রবণে ব্রহ্মাহমিতি-জ্ঞানেন লীনা প্রকৃতিরবিদ্যা যস্মিন্ তন্নৈর্গুণ্যং ভবতি, ন তু সুষুপ্তিপ্রলয়য়োরিবা-বিদ্যাবশেষঃ, তস্মান্নৈর্গুণ্যাদ্ গুণকার্য্যলিঙ্গনাশঃ। অলিঙ্গত্বাচ্চ অসম্ভবঃ সম্যগ্ভোগায় ভবতি পুনঃ পুনরিতি সম্ভবঃ স্থূলশরীরং তদ্রহিতঃ ; ততশ্চ তৎপরিচ্ছেদাভাবাৎ সঞ্ছিন্নো দ্বৈতলক্ষণঃ সংশয়ো ভ্রমো যস্য সঃ বিশোকো জাত ইতি ॥

৩২। ভগবতো মার্গমালক্ষ্য, যদুকুলস্য সংস্থাং নাশং শ্রুত্বা নারদোক্ত-মনুস্মৃত্য স্বঃপথায় স্বর্গমার্গায় নিভৃতাত্মা নিশ্চলচিত্তঃ ॥

৩৩। তাং দুর্বিজ্ঞেয়াং ভগবদ্গতিং বক্ষ্যতি হি (একাদশে ১১।৩১।১) —'সৌদামন্যা যথাকাশে যান্ত্যা হিত্বাভ্রমণ্ডলম্। গতির্ন লক্ষ্যতে মর্ত্ত্যৈস্তথা

কৃষ্ণস্য দৈবতৈঃ॥' ইতি। সংস্থতেরুপররাম জীবন্মুক্তো বভূব, দেহং জহাবিতি বা॥

৩৪—৩৫। তদেবমুক্তমপি যাদবেভ্যো ভগবদ্বৈলক্ষণ্যমবুদ্ধা তৎ সাম্যং বদতো মন্দমতীন্ প্রতি বৈলক্ষণ্যং স্পষ্টয়তি দ্বাভ্যাম্। যয়া যাদব-রূপয়া তন্বা ভুবো ভারং কণ্টকেন কণ্টকমিবাহরৎ, যাদবতনুর্ভূ-ভারতনুশ্চেতি দ্বয়মপীশ্বরস্য সংহার্য্যত্বেন সমমেব॥ (৩৫) শ্রীকৃষ্ণস্য মূর্ত্তের্বিশেষমাহ—যথেতি। তান্যপি যথা ধত্তে জহাতি চ, তদাহ—যথা নটো নিজরূপেণ স্থিত এব রূপান্তরাণি ধত্তে অন্তর্ধত্তে চ, তথা তদপি কলেবরং জহৌ অন্তরধাদিত্যর্থঃ॥

৩৬। যুধিষ্ঠিরস্য স্বর্গারোহণপ্রসঙ্গায় কলিপ্রবেশমাহ—যদেতি। স্ব-তন্বা জহৌ স্বতনোরেব বৈকুণ্ঠারোহাৎ। শ্রবণার্হা সতী কথা যস্য, তদা যদহস্তস্মিন্নেব; অহরিতি লুপ্তসপ্তম্যন্তং পদম্। অপ্রতিবুদ্ধচেতসাম-বিবেকিনামিতি, বিবেকিনাস্তু ন প্রভুরিত্যুক্তম্। অন্ববর্ত্ততেতি পূর্ব্ব-মেবাংশেন প্রবিষ্টস্য স্বেন রূপেণানুবৃত্তিরুক্তা॥

৩৭। বুধো যুধিষ্ঠিরঃ, তস্য কলেঃ পরিসর্পণং প্রসারণং বিলোক্য। কথম্ভূতম্? লোভাদি অধর্ম্মচক্রং যস্মিন্; জিহ্মং কৌটিল্যম্। পর্য্যধাৎ তদুচিতং পরিধানমকরোৎ॥

৩৮। আত্মনঃ স্বস্য গুণৈঃ সুসমমতিসদৃশম্। তোয়ং সর্ব্বত এব স্থিতং সমুদ্রোদকমেব নীবী পরিধানবিশেষো যস্যা ভূমেঃ, পতিত্বেনাভি-ষিক্তবান্॥

৩৯। বজ্রমনিরুদ্ধস্য পুত্রম্, নিরূপ্য কৃত্বেত্যর্থঃ; অপিবদাত্মন্যা-রোপয়ামাস; স ঈশ্বরঃ সমর্থঃ॥

৪০। সঞ্ছিন্নান্যশেষাণি বন্ধনানি উপাধয়ো যেন॥

৪১—৪২। তদেব দর্শয়তি দ্বাভ্যাম্। বাচমিত্যুপলক্ষণম্, সর্ব্বেন্দ্রিয়াণি মনসি প্রবিলাপিতবানিত্যর্থঃ। তচ্চ মনঃ প্রাণে, প্রাণাধীনবৃত্তিত্বাৎ। তঞ্চ প্রাণাদিতরে অপানে, তেনাকর্ষণাৎ। অপানব্যাপার উৎসর্গস্তৎ-সহিতমপানং মৃত্যৌ তদধিষ্ঠাতৃদেবতায়াম্। অনেনৈব বাগাদিষ্বপি তত্তৎ-কর্ম্মসাহিত্যং জ্ঞেয়ম্। তং মৃত্যুং পঞ্চত্বে পঞ্চভূতানামৈক্যে দেহে, দেহস্যৈব মৃত্যুর্নাত্মন ইতি ভাবিতবানিত্যর্থঃ। অজোহবীদিতি যঙ্‌লুগন্তাৎ লুঙি রূপম্॥ (৪২) ত্রিত্বে গুণত্রয়ে পঞ্চত্বং দেহম্, তচ্চ ত্রিত্বমেকত্বে অবিদ্যায়াম্। সর্ব্বং সর্ব্বারোপহেতুমবিদ্যাম্, আত্মনি জীবে। অজোহবী-দিতি বক্তব্যেঽজুহবীদিত্যার্ষম্। এবং শোধিতমাত্মানং ব্রহ্মণি অব্যয়ে কূটস্থে। ন তস্যান্যত্র লয় ইত্যর্থঃ॥

৪৩—৪৪। তদেবমাত্মপ্রতিপত্তিমুক্ত্বা বাহ্যস্থিতিমাহ—চীরবাসা ইতি সার্দ্ধদ্বাভ্যাম্। বদ্ধবাক্ মৌনী, অনবেক্ষমাণঃ[১] অনুজাদিপ্রতীক্ষামকুর্ব্বন্॥ (৪৪) আশাং দিশম্, গতপূর্ব্বাং পূর্ব্বপ্রবিষ্টাম্, মহাত্মভির্বিবেকবদ্ভিঃ, যতো যাং দিশম্॥

৪৫। অধর্ম্মো মিত্রং যস্য তেন॥

৪৬। সাধু কৃতাঃ সর্ব্বেঽর্থা ধর্ম্মাদয়ো যৈঃ; অতএব বৈকুণ্ঠস্য চরণাম্বুজমেবাত্যন্তিকং শরণং জ্ঞাত্বা মনসা ধারয়মাসুঃ॥

৪৮। কথম্ভূতে পদে? বিধূতকল্মষাণামাস্থানং নিবাসস্থানং যত্র তস্মিন্, বিরজেনাত্মনৈব প্রাপুঃ, ন তু ষোড়শকলেন লিঙ্গেন; গতের্ব্বা বিশেষণম্। বিরজেনাত্মনৈবাবস্থানরূপাং গতিং তে বিধূতকল্মষাঃ প্রাপুরিতি॥

৪৯। বিদুরোঽপি তীর্থান্যটন্ প্রভাসে, শ্রীকৃষ্ণাবেশেন শ্রীকৃষ্ণে চিত্তমাবেশ্য দেহং পরিত্যজ্য তচ্চিত্ত এব সন্, তদানীং নেতুমাগতৈঃ পিতৃভিঃ সহ স্বক্ষয়ং স্বাধিকারস্থানং যযৌ॥

১। অনপেক্ষমাণঃ (ঘ)।

৫০। আত্মানং প্রত্যনপেক্ষতাং তদা জ্ঞাত্বা তমাপ ॥

৫১। ইত্যেবং যৎ সম্প্রয়াণম্, অলমতিশয়েন স্বস্ত্যয়নং মঙ্গলাস্পদম্, অলং পবিত্রঞ্চ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে
পঞ্চদশোঽধ্যায়ঃ ॥ ১৫ ॥

ষোড়শোঽধ্যায়ঃ

ততশ্চ ষোড়শে ভূমি-ধর্ম্ময়োঃ কলিখিন্নয়োঃ।
সংবাদে বর্ণ্যতে প্রাপ্তিঃ পালকস্য পরীক্ষিতঃ॥ (১)

১। দ্বিজবর্য্যাণাং শিক্ষয়া, সূত্যাং জন্মনি, অভিজাতকোবিদা জাতকর্ম্মবিদঃ। হে বিপ্র! মহতাং গুণা যস্মিন্ সঃ॥

২। জনমেজয়াদীনিত্যর্দ্ধে একাক্ষরাধিক্যং ছান্দসম্। উৎপাদয়দিতি অড়াগমাভাব আর্ষঃ॥

৩। আজহার কৃতবানিত্যর্থঃ; শারদ্বতং কৃপম্; যত্র যেষশ্বমেধেষু দেবা দৃষ্টিগোচরা বভূবুঃ॥

৪। নিজগ্রাহ নিগৃহীতবান্। কলিমেব নির্দ্দিশতি—নৃপেতি॥

৫। কস্য হেতোরিতি; অয়মর্থঃ—কস্মাদ্ধেতোঃ কলিং কেবলং নিজগ্রাহ, ন তু হতবান্? যতোঽসৌ শূদ্রকঃ, অতিকুৎসিতঃ শূদ্রঃ। যো গাং পদা অহন্নিতি॥

৬। অস্য বিষ্ণোঃ পদাম্ভোজয়োর্যো মকরন্দস্তং লিহন্তি আস্বাদয়ন্তি যে, তেষাং সতাং মহতাং বা কথাশ্রয়মিতি সমাসান্নিষ্কৃষ্যানুষঙ্গঃ। তর্হি কথ্যতাম্॥

৭—৮। নোচেৎ কিমন্যৈরসদ্ভিরালাপৈঃ, যৎ যৈরায়ুষো বৃথা ক্ষয়ঃ। অস্মাকময়ং সত্রপ্রযত্নোঽপি হরিকথামৃতপানার্থ এবেত্যাহ সার্দ্ধদ্বাভ্যাম্। ক্ষুদ্রমল্পমায়ুর্যেষামতো মর্ত্ত্যানাং মরণধর্ম্মবতাম্, তথাপি ঋতং সত্যং মোক্ষমিচ্ছতাম্॥ (৮) যো মৃত্যুঃ স ইহ সত্রে শমিতুরিদং শামিত্রং কর্ম্ম পশুহিংসনং তদর্থমুপহূতঃ। ততঃ কিম্? অত আহ—ন কশ্চিদিতি॥

৯। ততোঽপি কিমিত্যত্রাহ—অহো নৃলোকে হরিলীলামৃতং বচঃ পীয়েতেত্যেতদর্থম্, হরিলীলৈবামৃতং যস্মিন্ তৎ॥

১০। তদভাবে বৃথৈব জীবনমিত্যাহ—মন্দস্য অলসস্য, নক্তং রাত্রৌ যদ্বয় আয়ুস্তন্নিদ্রয়া হ্রিয়তে; দিবা অহ্নি যদ্বয়স্তদ্ ব্যর্থকর্ম্মভিঃ অপহ্রিয়তে॥

১১। তত্র তাবৎ কলিনিগ্রহ-প্রসঙ্গমাহ—যদা নিজচক্রবর্ত্তিতে স্বসেনয়া পরিপালিতে দেশে কলিং প্রবিষ্টং শুশ্রাব, তদা তামনতিপ্রিয়াং বার্ত্তাম্, কিঞ্চিৎপ্রিয়াঞ্চ যুদ্ধকৌতুকসম্পত্তেঃ, নিশম্য ততঃ শরাসনং দুষ্টনিগ্রহার্থমাদদে। সংযুগশৌণ্ডিঃ যুদ্ধে প্রগল্ভঃ, সংযুগশৌরিরিতি পাঠে শৌরিতুল্যঃ কৃষ্ণতুল্যঃ॥

১২। ততশ্চ দিগ্বিজয়ায় নির্গতঃ॥

১৩। ভদ্রাশ্বাদীনি পূর্ব্বপশ্চিম-দক্ষিণোত্তরতঃ সমুদ্রলগ্নানি বর্ষাণি। মেরোঃ সর্ব্বত ইলাবৃতম্, তত উত্তরতো রম্যকম্, হিরণ্ময়ঞ্চ, দক্ষিণতো হরিবর্ষং কিম্পুরুষঞ্চ, তানি বিজিত্য॥

১৪—১৬। প্রগীয়মাণং যশো যশ-আদীনি শৃণ্বন্, তেভ্যস্তেভ্যো দদাবিতি তৃতীয়েনান্বয়ঃ॥

১৭। স্নিগ্ধেষু পাণ্ডবেষু বিষ্ণোর্যানি সারথ্যাদীনি কর্ম্মাণি তানি শৃণ্বন্, তথা বিষ্ণোর্জগৎকর্ত্তৃকাং প্রণতিঞ্চ শৃণ্বন্, নৃপতিঃ পরীক্ষিৎ। বিষ্ণো-

শ্চরণারবিন্দে ভক্তিং করোতি স্ম। পারষদমিতি রেফ-ষকারয়োর্বিশ্লেষশ্ছান্দসঃ। তত্র পার্ষদং সভাপতিত্বম্, সেবনং চিত্তানুবৃত্তিঃ, বীরাসনং রাত্রৌ খড়্গাহস্তস্য তিষ্ঠতো জাগরণম্ ॥

১৮। বৃত্তিমনুবর্ত্তমানস্য সতঃ, নাতিদূরে শীঘ্রমেব ॥

১৯। ধর্ম্মো বৃষরূপঃ, বিচ্ছায়াং হতপ্রভাম্, গাং গোরূপাং পৃথ্বীম্, বিবৎসাং নষ্টাপত্যাম্ ॥

২০—২৫। তে আত্মনো দেহস্য যদ্যপি বহিরাময়ো ন লক্ষ্যতে, তথাপি অন্তর্মধ্যে আধিঃ পীড়া যস্যাস্তাং ত্বামালক্ষয়ে। কেন? যতো বিচ্ছায়াসি, অত ঈষন্‌ম্লায়তা বৈবর্ণ্যং ভজতা মুখেন লিঙ্গেন। তত্র কারণানি কল্পয়ন্ পৃচ্ছতি—দূরে বন্ধুমিত্যাদি পঞ্চভিঃ। দূরে স্থিতং বন্ধুম্ ॥ (২১) ত্রিভিঃ পাদৈর্ন্যূনম্, অতএবৈকপাদম্। মা মাং বৃষলৈরত ঊর্দ্ধং ভোক্ষ্যমাণম্, পুংস্ত্বমাত্মপদবিশেষণত্বাৎ; হৃতা যজ্ঞভাগা যেষাম্, যজ্ঞাদ্যকরণাৎ ॥ (২২) হে উর্ব্বি! পৃথ্বি! ভর্ত্তৃভিররক্ষ্যমাণাঃ স্ত্রিয়ঃ, পিতৃভিররক্ষ্যমাণান্ বালান্, প্রত্যুত তৈরেব পুরুষাদৈরিব নির্দ্দয়ৈরার্ত্তান্ ক্লিষ্টান্, বাচং দেবীং সরস্বতীং কুকর্ম্মণি দুরাচারে স্থিতাম্, কুলাগ্র্যান্ ব্রাহ্মণোত্তমান্ সেবকান্ ॥ (২৩) উপসৃষ্টান্ ব্যাপ্তান্, অবরোপিতানি উদ্বাসিতানি, ব্যবায়ো মৈথুনম্, নিষেধানাদরেণ সর্ব্বতোঽশনাদিষূন্মুখং প্রবর্ত্তমানং জীবলোকং বা ॥ (২৪) অম্ব! হে মাতর্ধরিত্রি! তে তব যো ভূরিভারস্তস্যাবতারণার্থং কৃতাবতারস্য কর্ম্মাণি স্মরন্তী, তেন বিসৃষ্টা সতী শোচসি। নির্ব্বাণং বিলম্বিতমাশ্রিতং যেষু তানি; নির্ব্বাণবিড়ম্বিতানীতি পাঠে নির্ব্বাণং বিড়ম্বিতমুপহসিতং যৈঃ, মোক্ষাদপ্যধিকসুখানীত্যর্থঃ ॥ (২৫) হে অম্ব! তে সৌভাগ্যং কালেন বা হৃতম্ ॥

২৬--৩১। ভবান্ জানাত্যেব, তথাপি বক্ষ্যামীত্যাহ—যেন হেতুভূতেন ত্বং চতুর্ভিঃ পাদৈর্বর্ত্তসে, যত্র চ সত্যাদয়ো মহাগুণা ন বিয়ন্তি ন ক্ষীয়ন্তে স্ম, তেন শ্রীনিবাসেন রহিতং লোকং শোচামীতি ষষ্ঠেনান্বয়ঃ॥ (২৭) সত্যং যথার্থভাষণম্, শৌচং শুদ্ধত্বম্, দয়া পরদুঃখাসহনম্[১], ক্ষান্তিঃ ক্রোধ-প্রাপ্তৌ চিত্তসংযমনম্, ত্যাগোঽর্থিষু মুক্তহস্ততা, সন্তোষঃ অলংবুদ্ধিঃ, আর্জ্জবমবক্রতা, শমো মনোনৈশ্চল্যম্, দমো বাহ্যেন্দ্রিয়-নৈশ্চল্যম্, তপঃ স্বধর্ম্মঃ, সাম্যমরিমিত্রাদ্যভাবঃ, তিতিক্ষা পরাপরাধসহনম্, উপরতিঃ লাভপ্রাপ্তাবৌদাসীন্যম্, শ্রুতং শাস্ত্রবিচারঃ॥ (২৮) জ্ঞানমাত্মবিষয়ম্, বিরক্তির্বৈতৃষ্ণ্যম্, ঐশ্বর্য্যং নিয়ন্তৃত্বম্, শৌর্য্যং সংগ্রামোৎসাহঃ, তেজঃ প্রভাবঃ, বলং দক্ষত্বম্, স্মৃতিঃ কর্ত্তব্যা-কর্ত্তব্যার্থানুসন্ধানম্, স্বাতন্ত্র্যম-পরাধীনতা, কৌশলং ক্রিয়ানিপুণতা, কান্তিঃ সৌন্দর্য্যম্, ধৈর্য্যমব্যাকুলতা, মার্দ্দবং চিত্তাকাঠিন্যম্॥ (২৯) প্রাগল্ভ্যং প্রতিভাতিশয়ঃ, প্রশ্রয়ো বিনয়ঃ, শীলং সুস্বভাবঃ, সহওজোবলানি মনসো জ্ঞানেন্দ্রিয়াণাং কর্ম্মেন্দ্রিয়াণাঞ্চ পাটবানি, ভগো ভোগাস্পদত্বম্, গাম্ভীর্য্যমক্ষোভ্যত্বম্, স্থৈর্য্যমচঞ্চলতা, আস্তিক্যং শ্রদ্ধা, কীর্ত্তির্যশঃ, মানঃ পূজ্যত্বম্, অনহ-ঙ্কৃতির্গর্ব্বাভাবঃ॥ (৩০) এতে একোনচত্বারিংশৎ, অন্যে চ ব্রহ্মণ্যত্ব-শরণ্যত্বাদয়ো মহান্তো গুণা যস্মিন্ নিত্যাঃ সহজাঃ ন বিয়ন্তি, ন ক্ষীয়ন্তে স্ম॥ (৩১) তেন গুণপাত্রেণ গুণালয়েন, পাপ্মনা পাপহেতুনা॥

৩৩—৩৬। তস্য বিরহো দুঃসহ ইত্যাহ চতুর্ভিঃ। ব্রহ্মাদয়ো যস্যাঃ শ্রিয়ঃ অপাঙ্গমোক্ষঃ স্বস্মিন্ দৃষ্টিপাতঃ, তৎকামাঃ সন্তঃ বহুতিথং বহুকালং তপঃ সমচরন্ সম্যক্ চরন্তি স্ম। ভগবদ্ভিরুত্তমৈঃ প্রপন্না আশ্রিতা অপি সা শ্রীর্যস্য পাদলাবণ্যমলমনুরক্তা সতী সেবতে॥ (৩৪) তস্য ভগবতঃ শ্রীমদ্ভিঃ পদৈঃ, কেতুধ্বজঃ, অজাদয়ঃ কেতাশ্চিহ্নানি যেষাং তৈঃ;

১। পরদুঃখাপহরং (ক)।

যদ্বা, অব্জাদীনামাশ্রয়ৈঃ সম্যগলঙ্কৃতমঙ্গং যস্যাঃ সাহং ততো ভগবতো বিভূতিং সম্পদমুপলভ্য প্রাপ্য, ত্রীন্ লোকানতিক্রম্যারোচে শোভিত-বত্যস্মি; পশ্চাত্তস্যা বিভূতেরন্তে নাশকালে প্রাপ্তে সতি; উৎস্ময়ন্তীং গর্ব্বং কুর্ব্বাণাং মাং স ব্যসৃজত্ত্যক্তবান্॥ (৩৫) কিঞ্চ যো বৈ আসুরো বংশো যেষাম্, তেষাং রাজ্ঞামক্ষৌহিণীশতরূপং মমাতিভরং ভারমপ-নীতবান্। ত্বাঞ্চ ঊনপদত্বাৎ দুঃস্থং সন্তম্, পৌরুষেণ পুরুষকারেণ, আত্মনি স্বস্মিন্ সম্পূর্ণপদং সুস্থং সম্পাদয়ন্, 'লক্ষণহেত্বোঃ ক্রিয়ায়াঃ' ইতি হেতৌ শতৃ-প্রত্যয়ঃ, সম্পাদয়িতুমিত্যর্থঃ; অবিভ্রৎ ধৃতবানিত্যর্থঃ। (৩৬) তস্য বিরহং কা বা সহেত? প্রেমাবলোকশ্চ, রুচিরস্মিতঞ্চ, বল্গুজল্পশ্চ, তৈর্মধুমানিনীনাং সত্যভামাদীনাং সমানং গর্ব্বসহিতং স্থৈর্য্যং স্তব্ধত্বং যোঽহরৎ। যস্যাঙ্ঘ্রিণা রজস্যুত্থিতেন বিটঙ্কিতায়া অলঙ্কৃতায়াঃ শষ্পাদি-মিষেণ রোমোৎসবো ভবতি॥

৩৭। কথয়তোঃ সতোঃ, প্রাচীং পূর্ব্ববাহিনীং সরস্বতীং কুরুক্ষেত্রে॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে

ষোড়শোঽধ্যায়ঃ॥ ১৬॥

সপ্তদশোঽধ্যায়ঃ

ততঃ সপ্তদশে রাজ্ঞা কলের্নিগ্রহ উচ্যতে।

তস্যৈবং বীর্য্যভাজোঽপি বৈরাগ্যং বক্তুমদ্ভুতম্॥ (১)

১। হন্যমানং তাড্যমানম্॥

২। মৃণালং পদ্মকন্দঃ, তদ্বদ্ ধবলম্; ভয়ান্মেহন্তং মূত্রয়ন্তমিবেত্যনেন পাদাবশেষো ধর্ম্মো ভয়ান্মূত্রয়ন্নিব প্রতিক্ষণং ক্ষীয়মাণাংশঃ, তস্যাপ্য-নির্ব্বাহাৎ কম্পমান ইতি দর্শিতম্॥

৩। ধর্ম্মদুঘাং হবির্দোগ্ধ্রীম্, ক্ষামাং কৃশাম্, যবসং তৃণম্; অত্র শস্যাদিপ্রসবক্ষয়াদ্বিবৎসেব যজ্ঞাদ্যভাবাৎ কৃশা, অতএব যজ্ঞভাগমিচ্ছন্তী পৃথ্বীতি সূচিতম্॥

৪। কার্ত্তস্বরং সুবর্ণম্, তন্ময়ঃ পরিচ্ছদঃ পরিকরো যস্য, স্বর্ণনিবদ্ধ-মিত্যর্থঃ। সজ্জীকৃতকার্ম্মুকঃ॥

৫। হংসি ঘাতয়সি। রাজাহমিতি চেৎ, তত্রাহ—নট ইব বেশ-মাত্রেণ নরদেবোঽসি, কর্ম্মণা অদ্বিজঃ শূদ্রঃ॥

৬। অশোচ্যান্ নিরপরাধান্ রহসি যস্ত্বং প্রহরসি, স শোচ্যঃ সাপরাধোঽসি; অতো বধমর্হসি॥

৭। বৃষং প্রত্যাহ—ত্বং বা কঃ? স্বয়মেব সম্ভাবয়তি—কিং কশ্চি-দ্দেবো বৃষরূপেণাস্মান্ পরিখেদয়ন্ বর্ত্তসে?

৮। দোর্দ্দণ্ডৈঃ পরিরম্ভিতে পরিরম্ভিতবৎ সুরক্ষিতে, তে শুচঃ অশ্রূণি বিনান্যেষামশ্রূণি নানুপতন্তীতি খেদহেতুত্বং দর্শিতম্॥

৯। এবমুক্তে পুনরপি শোচন্তং প্রত্যাহ—ভোঃ সুরভেঃ পুত্র! অত্র মা শুচঃ, শোকং মা কুরু। ব্যেতু অপযাতু। গাং প্রত্যাহ—অম্ব! মাতঃ! শাস্তরি ময়ি জীবতি সতি তে ভদ্রমেব; অতো মা রোদীঃ॥

১০—১১। মদ্ধিতার্থমেবৈনং হনিষ্যামি, ন তবোপকারায়েত্যাহ—যস্যেতি দ্বাভ্যাম্। হে সাধ্বি! সর্ব্বাঃ যাঃ কাশ্চিদপীত্যর্থঃ, অসাধুভিঃ ত্রস্যন্তে পীড্যন্তে। ভগো ভাগ্যম্, গতিঃ পরলোকঃ॥

১২। পুনরপি শোচন্তং বৃষভং প্রত্যাহ—কোঽবৃশ্চৎ চিচ্ছেদ? ত্বাদৃশাস্ত্বদ্বিধা দুঃখিতাঃ॥

১৩। বো ভদ্রমস্তু, আত্মনস্তব পাদচ্ছেদেন বৈরূপ্যং কৃতবন্তম্, পার্থানাং কীর্ত্তিং দূষয়তীতি তথা তমাখ্যাহি॥

১৪। ননু তদাখ্যানে কৃতে কথং ভদ্রং স্যাৎ ? ইত্যত আহ—যস্মাদ-নাগসি জনে যোঽঘং দুঃখং যুঞ্জন্ কুর্ব্বন্ ভবতি, অস্যৈবভূতস্য, মত্তঃ সকাশাৎ সর্ব্বত্রাপি ভয়ং ভবতি। ততঃ সাধূনাং ভদ্রং ভবেদেবেতি॥

১৫। এতস্য দণ্ডেঽহমসমর্থ ইতি মা শঙ্কীরিত্যাহ—অনাগঃস্বিতি, য আগস্কৃদপরাধকর্ত্তা তস্যামর্ত্ত্যস্য দেবস্যাপি ভুজমাহর্ত্তাস্মি আহরিষ্যামি। সাঙ্গদমিত্যনেন মূলত উৎপাট্যাহরিষ্যামীতি দর্শিতম্॥

১৬। নন্বেকস্য নিগ্রহেণ অন্যস্যানুগ্রহে তব কিং প্রয়োজনম্ ? তত্রাহ—রাজ্ঞো হীতি। অন্যানধর্ম্মিষ্ঠান্ শাসতো দণ্ডয়তঃ॥

১৭। আর্ত্তানামভয়ং যস্মাত্তদ্বচো বো যুক্তমুচিতমেব॥

১৮। বয়ন্তু যতঃ পুরুষাৎ প্রাণিনাং ক্লেশহেতবো ভবেয়ুস্তং পুরুষং ন বিজানীমঃ, যতো বাদিনাং বাক্যভেদৈর্বিমোহিতাঃ॥

১৯। বাক্যভেদানেবাহ—বিকল্পং ভেদং বসতে আচ্ছাদয়ন্তি যে যোগিনস্তে আত্মানমেব আত্মনঃ প্রভুং সুখদুঃখপ্রদমাহুঃ। তদুক্তম্—'আত্মৈব হ্যাত্মনো বন্ধুরাত্মৈব রিপুরাত্মনঃ' ইতি; যদ্বা, বিকল্পৈঃ কুতর্কৈঃ[১] বসনাঃ প্রাবৃতা নাস্তিকাঃ; এবং হি তে বদন্তি—'ন তাবদ্-দেবতাদীনাং প্রভুত্বং, কর্ম্মাধীনত্বাৎ; ন চ কর্ম্মণঃ, স্বাধীনত্বাদচেতনত্বাচ্চ।' অতঃ স্বয়মেব প্রভুঃ, ন চান্যঃ কশ্চিদিত্যর্থঃ। অন্যে দৈবজ্ঞা দৈবং গ্রহাদি-রূপাং দেবতাম্; পরে তু মীমাংসকাঃ কর্ম্ম; অপরে লোকায়তিকাঃ স্বভাবম্॥

২০। কেষ্বপি সেশ্বরেষু মধ্যে কেষ্বপীতি দুর্লভত্বং দর্শিতম্; নিশ্চয় ইতি সিদ্ধান্তত্বম্। অপ্রতর্ক্যান্মনসোঽগোচরাৎ, অনির্দ্দেশ্যাদ্বচসোঽ-গোচরাৎ, পরমেশ্বরাৎ সর্ব্বং ভবতীতি। বিমৃশ বিচারয় স্ববুদ্ধ্যা॥

২১। বিখেদো বিগতমোহঃ, পর্য্যচষ্ট প্রত্যভাষত জ্ঞাতবানিতি বা॥

১। বিতর্কৈঃ (ক)।

২২। অনির্দ্ধারিতমিব ব্রুবন্ ঘাতকং জানন্নপি ন সূচয়েদিত্যেবং-রূপং ধর্ম্মং ব্রবীষি, অতো ধর্ম্মোঽসি। সূচকে কো দোষঃ? ইত্যত আহ—যদিতি। স্থানং নরকাদি॥

২৩। যদ্বা, অজ্ঞানাদপ্যকথনং সম্ভবতীত্যাহ—অথবেতি। দেবস্য মায়য়া গতির্বধ্যঘাতকলক্ষণা বৃত্তির্ভূতানাং চেতসো বচসশ্চ অগোচরা সুজ্ঞেয়া ন ভবতীতি নিশ্চয়ঃ॥

২৪—২৫। ধর্ম্মোঽসাবিতি জ্ঞাত্বা তস্য পাদানুবাদেন ব্যবস্থামাহ—তপ ইতি দ্বাভ্যাম্। অধর্ম্মপাদৈস্তব ত্রয়ঃ পাদাস্ত্রিভিরংশৈর্ভগ্নাঃ; স্ময়ো বিস্ময়ঃ॥ (২৫) ইদানীং কলৌ, হে ধর্ম্ম! তে পাদশ্চতুর্থাংশঃ, তত্রাপি সত্যমেবাস্তি; যতঃ সত্যাদ্ভবান্ আত্মানং নিবর্ত্তয়েৎ কথঞ্চিদ্ধারয়েৎ; যদ্বা, পুরুষস্ত্বাং সাধয়েৎ, তমপি পাদমনৃতেন সংবর্দ্ধিতঃ কলিরূপোঽয়মধর্ম্মো গ্রহীতুমিচ্ছতি। তত্রেয়ং স্থিতিঃ—কৃতযুগে প্রথমং সম্পূর্ণঃ চতুষ্পাদ্ধর্ম্মঃ, ত্রেতায়াং চতুর্ণামপি পাদানাং মধ্যে স্ময়েন তপঃ, সঙ্গেন শৌচম্, মদেন দয়া, অনৃতেন সত্যমিত্যেবং চতুর্থাংশো হীয়তে; দ্বাপরে তদর্দ্ধম্; কলৌ চতুর্থাংশোঽবশিষ্যতে, সোঽপ্যন্তে নঙ্ক্ষ্যতীতি॥

২৬। ন্যাসিতঃ অন্যোঽন্যদ্বারেণাবতারিত উরুর্ভরো ভারো যস্যাঃ, কৃতং কৌতুকং মঙ্গলং যস্যাঃ॥

২৭। অশ্রূণি কলয়তি মুঞ্চতীত্যশ্রুকলা। তেন ত্যক্তা সতী শূদ্রা ভোক্ষ্যন্তি মামিতি শোচতি॥

২৮। নিশাতং নিশিতম্, অধর্ম্মস্য হেতুর্যঃ কলিস্তং হন্তুমিত্যর্থঃ॥

২৯। অভিপ্রেত্য জ্ঞাত্বা॥

৩০। শরণ্য আশ্রয়ার্হঃ, শ্লোক্যঃ সুকীর্ত্ত্যর্হঃ॥

৩১। গুড়াকেশোঽর্জ্জুনঃ, তস্য যশোধরা যে বয়ং তেষাম্, তান্ প্রতি বদ্ধোঽঞ্জলির্যেন তস্য তব, কিন্তু কথঞ্চন কেনাপ্যংশেন ন বর্ত্তিতব্যম্ ; যস্মাৎ ত্বমধর্ম্মস্য বন্ধুঃ ॥

৩২। তদেবাহ—রাজদেহেষু বর্ত্তমানং ত্বামনু সর্ব্বতঃ প্রবৃত্তঃ। অনার্য্যং দৌর্জ্জন্যম্, অংহঃ স্বধর্ম্মত্যাগঃ, জ্যেষ্ঠা অলক্ষ্মীঃ, মায়া কপটম্ ॥

৩৩। তৎ তস্মাদ্ ধর্ম্মেণ সত্যেন চ বর্ত্তিতব্যে বর্ত্তিতুমর্হে, ব্রহ্মাবর্ত্তে দেশে যজ্ঞস্য বিতানং বিস্তারঃ, তত্র বিজ্ঞা নিপুণাঃ ॥

৩৪। ইজ্যা যাগঃ, তদ্রূপা মূর্ত্তির্যস্য ; শং ক্ষেমং কামাংশ্চ। নন্বিন্দ্রাদয়ো দেবা ইজ্যন্তে, ন তু হরিস্তত্রাহ—এষ স্থাবরাদীনামাত্মেতি। তথাপি জীববন্ন পরিচ্ছিন্ন ইত্যাহ—অন্তর্বহিরিতি। যথা বায়ুঃ প্রাণরূপেণান্তঃস্থিতোঽপি বহিরপ্যস্তি, তদ্বৎ সর্ব্বান্তর্য্যামীশ্বরোঽপীতি ॥

৩৫। উদ্যতাসিমুদ্ধৃতখড়্গাম্, দণ্ডপাণিং যমম্, উদ্যতমুদ্যুক্তম্ ॥

৩৬। অত্র ন বস্তব্যমিতি যা তবাজ্ঞা, তয়া যত্র ক্বাপি বৎস্যামি, কিন্তু তত্র তত্রাপি আত্তো গৃহীত ইষুর্বাণঃ শরাসনঞ্চ যেন তং ত্বামেব লক্ষয়ে ॥

৩৭। তৎ তস্মান্নিয়তো নিশ্চলো বৎস্যে বৎস্যামি ॥

৩৮। পানং মদ্যাদেঃ, সূনা প্রাণিবধঃ, স্থানানি—দ্যূতেঽনৃতম্, পানে মদঃ, পূর্ব্বং মদো দয়ানাশকত্বেনোক্তঃ ; অত্র তু গর্ব্বদ্বারা তপোনাশকত্বেন স্ত্রীষু সঙ্গঃ, হিংসায়াং ক্রৌর্য্যঞ্চ দয়ানাশকমিতি জ্ঞেয়ম্। যদ্যপি সর্ব্বং সর্ব্বত্র সম্ভবতি, তথাপি প্রাধান্যেনানৃতাদীনাং দ্যূতাদিষু যথাসংখ্যং জ্ঞেয়ম্। দ্বাদশস্কন্ধে (৩।১৮) তু 'সত্যং দয়া তপো দানমিতি পাদা বিভোর্নৃপ' ইত্যত্র দানশব্দেন শৌচমেবোক্তং, মনঃশুদ্ধিরূপত্বাদ্ ভূতাভয়দানস্য। 'ত্রেতায়াং ধর্ম্মপাদানাং তুর্য্যাংশো হীয়তে শনৈঃ। অধর্ম্মপাদৈরনৃত-হিংসাসন্তোষ-বিগ্রহৈঃ ॥' ইত্যত্র চ অসন্তোষ-শব্দেন তস্য হেতুর্গর্ব্বো লক্ষ্যতে। বিগ্রহ-শব্দেন চ তদ্ধেতুঃ স্ত্রীসঙ্গ ইত্যবিরোধঃ ॥

৩৯। চতুর্বিধস্যাপ্যেকত্রাবস্থানং, দেহীতি পুনর্যাচমানায় জাতরূপং সুবর্ণঞ্চ দত্তবান্; ততঃ সুবর্ণদানাদনৃতং মদম্, কামমিতি স্ত্রীষু সঙ্গম্, রজ ইতি রজোমূলাং হিংসাম্; এতানি চত্বারি, পঞ্চমং বৈরঞ্চ অদাদিতি॥

৪০। ঔত্তরেয়েণ পরীক্ষিতা অমূনি অমীষু স্থানেষু ন্যবসদিত্যর্থঃ॥

৪১। অথেতি হেতৌ বুভূষুরুদ্ভবিতুমিচ্ছুঃ, স্ত্রীসুবর্ণয়োরসেবনং নাম তয়োরনাসক্তিঃ॥

৪২। এবং কলিং নিগৃহ্য বৃষস্য পাদান্ প্রতিসন্দধে, তপ-আদীনি প্রবর্ত্তিতবানিত্যর্থঃ॥

৪৩—৪৫। যুষ্মদীয়-সত্রপ্রবৃত্তিরপি তৎপ্রভাবাদিত্যাহ ত্রিভিঃ। এতর্হি ইদানীং যুধিষ্ঠিরেণারণ্যং প্রবেষ্টুমিচ্ছতা উপন্যস্তং সমর্পিতমাসনমধ্যাস্তে॥ (৪৪) অধুনা আস্তে পালয়তে ইতি চ বর্ত্তমানসামীপ্যে বর্ত্তমান-বন্নির্দ্দেশঃ; স্মেত্যধ্যাহারো বা॥ (৪৫) সত্রায় সত্রং কর্ত্তুম্, দীক্ষিতাঃ দীক্ষাং কৃতবন্তঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং প্রথমস্কন্ধে
সপ্তদশোঽধ্যায়ঃ॥ ১৭॥

অষ্টাদশোঽধ্যায়ঃ

রাজ্ঞস্ত্বষ্টাদশে তস্য ব্রহ্মশাপো নিরূপ্যতে।
স চানুগ্রহ এবাস্য জাতো বৈরাগ্যমাবহন্॥ (১)

১। পরীক্ষিতো নির্য্যাণমত্যাশ্চর্য্যং বক্তুং তৎসম্ভাবনায় জন্মাশ্চর্য্য-মনুস্মারয়তি—যো বৈ ইতি। বিপ্লুষ্টো নির্দ্দগ্ধঃ সন্॥

২। ব্রহ্মকোপাদুত্থিতাৎ তক্ষকাদ্ যঃ প্রাণবিপ্লবঃ প্রাণনাশস্তস্মাদ্ যদুরুভয়ং তস্মান্ন সম্মুমোহ। অত্র হেতুঃ—যস্য ভগবত্যর্পিতাশয় ইতি॥

৩। কিন্তু উৎসৃজ্যোতি, বৈয়াসকেঃ শুকস্য শিষ্যঃ সন্ বিজ্ঞাতা-জিতস্য শ্রীহরেঃ সংস্থিতিস্তত্ত্বং যেন সঃ ॥

৪। ন চৈতচ্চিত্রমিত্যাহ—উত্তমঃশ্লোকস্যৈব বার্ত্তা যেষু, অতএব নিত্যং তৎকথারূপমমৃতং জুষতাং সম্ভ্রমো মোহো ন স্যাৎ ॥

৫। তস্মিন্ রাজ্ঞি সুতরাং তন্ন চিত্রমিত্যাশয়েনাহ—তাবদিতি। অভিমন্যোঃ পুত্র একরাট্ চক্রবর্ত্তী ঈশঃ পতির্যাবৎ ॥

৬। ননু তদা কলেরপ্রবেশ এবাস্তু, প্রবিষ্টোঽপি ন প্রাভবদিতি কুতঃ? তত্রাহ—যস্মিন্নহনি যর্হি যস্মিন্নেব ক্ষণে গাং পৃথ্বীমনুবৃত্তঃ প্রবিষ্টঃ। অধর্ম্মস্য প্রভবো যস্মিন্ ॥

৭। ননু অধর্ম্মহেতুং কলিং সর্ব্বথা কিং ন হতবান্? তত্রাহ—নানু-দ্বেষ্টীতি। সারঙ্গো ভ্রমর ইব সারগ্রাহী, সারমাহ—যদ্ যস্মিন্ কুশলানি পুণ্যানি, আশু সঙ্কল্পমাত্রেণ ফলন্তি, ইতরাণি পাপানি আশু ন সিধ্যন্তি; যতস্তানি কৃতান্যেব সিধ্যন্তি, ন তু সঙ্কল্পিতমাত্রাণীতি ॥

৮। ননু দোষাধিক্যাৎ তদ্দ্বেষ এব যুক্তঃ? ন, ধীরেষু তস্যাকিঞ্চিৎ-করত্বাদিত্যাহ—কিং ন্বিতি, কিং নু তেন ভবেৎ? বালেষু অধীরেষু অপ্রমত্তঃ সাবধানঃ সন্ যো বৃক ইব বর্ত্ততে ॥

৯। পারীক্ষিতমাখ্যানমপৃচ্ছত পৃষ্টবন্তো যূয়মিতি ॥

১০। কিং বহুনা, নরৈরেতাবদেব কর্ত্তব্যমিতি সর্ব্বশাস্ত্রসারং কথয়তি—যা যা ইতি। কথনীয়ানি উরূণি কর্ম্মাণি যস্য, তস্য গুণকর্ম্মবিষয়াঃ। বুভূষুভিঃ সদ্ভাবমিচ্ছদ্ভিঃ ॥

১১—১৩। পুনর্বিস্তারেণ কথাঃ শুশ্রূষবঃ[১] সূতোক্তিং তৎসঙ্গঞ্চাভি-নন্দন্তি—সূতেতি ত্রিভিঃ। শাশ্বতীঃ সমাঃ অনন্তান্ সংবৎসরান্ জীব;

১। কথনার্থং (ঘ)

অত্যন্তসংযোগে দ্বিতীয়া। বিশুদ্ধং যশঃ কীর্ত্তয়সি, তচ্চাস্মাকং মর্ত্ত্যানামমৃতং মরণনিবর্ত্তকম্॥ (১২) কিঞ্চ, অস্মিন্ কর্ম্মণি সত্রে অনাশ্বাসেঽবিশ্বসনীয়ে বৈগুণ্যবাহুল্যেন ফলনিশ্চয়াভাবাৎ। ধূমেন ধূম্রো বিবর্ণ আত্মা শরীরং যেষাং তানস্মান্; কর্ম্মণি ষষ্ঠী। আসবং মকরন্দম্, মধু মধুরম্॥ (১৩) ভগবৎসঙ্গিনো বিষ্ণুভক্তাঃ, তেষাং সঙ্গস্য যো লবঃ অত্যল্পঃ কালঃ, তেনাপি স্বর্গং ন তুলয়াম, ন সমং পশ্যাম, ন চাপবর্গম্; সম্ভাবনায়াং লোট্। মর্ত্ত্যানাং তুচ্ছা আশিষো রাজ্যাদ্যা ন তুলয়াম ইতি, কিমুত বক্তব্যম্॥

১৪। এবং সৎসঙ্গমভিনন্দ্য শ্রবণোৎসুক্যমাবিষ্কুর্ব্বন্তি—কো নামেতি। রসবিৎ রসজ্ঞঃ, মহত্তমানামেকান্তেন পরময়নমাশ্রয়ো যস্তস্য কথায়াম্; অগুণস্য প্রাকৃতগুণরহিতস্য কল্যাণগুণানামন্তং যে যোগেশ্বরাস্তেঽপি ন জগ্মুঃ, এতাবন্ত ইতি ন পরিগণয়াঞ্চক্রুঃ; ভবঃ শিবঃ, পাদ্মো ব্রহ্মা চ মুখ্যো যেষাং তে॥

১৫। তন্নোঽস্মাকং মধ্যে ভগবান্ প্রধানং সেব্যো যস্য স ভবান্। নঃ শুশ্রূষতাং হরেশ্চরিতং বিস্তারয়তু॥

১৬—১৭। তচ্চ শুকপরীক্ষিৎসংবাদেন কথয় ইত্যাহ—স বা ইতি দ্বাভ্যাম্। বৈয়াসকিনা শ্রীশুকেন শব্দিতেন কথিতেন যেন জ্ঞানেন জ্ঞানসাধনেন অপবর্গ ইত্যাখ্যা যস্য তৎ খগেন্দ্রধ্বজস্য হরেঃ পাদমূলং ভেজে; যতোঽদভ্রা অনল্পা মহতী বুদ্ধির্যস্য স তথা॥ (১৭) তদিমমসংবৃতার্থং যথা তথা আখ্যাহি, তদেব নির্দ্দিশন্তি। পরীক্ষিতে কথিতং পারীক্ষিতমাখ্যানং শ্রীভাগবতং পুরাণং পরং পুণ্যং সত্ত্বশোধকম্; অত্যদ্ভুতে যোগে নিষ্ঠা যস্য, অনন্তস্যাচরিতৈরুপপন্নং যুক্তম্, অতএব ভাগবতানামভিরামং প্রিয়ম্। এতৈর্বিশেষণৈঃ কর্ম্মজ্ঞানভক্তিযোগ-প্রকাশকত্বং দর্শিতম্॥

১৮—১৯। শ্রীভাগবতব্যাখ্যানে লব্ধপ্রসঙ্গং মহতামাদরপাত্রমাত্মানং শ্লাঘতে দ্বাভ্যাম্। অহো অত্যাশ্চর্য্যে, হ ইতি হর্ষে, বয়মিতি বহুবচনং শ্লাঘায়াম্, বিলোমজাতা অপি অস্থ জন্মভৃতঃ সফলজন্মান আস্ম জাতাঃ, বৃদ্ধানামনুবৃত্ত্যা আদরেণ, জ্ঞানবৃদ্ধঃ শুকস্তস্থ সেবয়া ইতি বা, যতো দুষ্কুলত্বং তন্নিমিত্তমাধিঞ্চ মনঃপীড়াং মহত্তমানামভিধানযোগো লৌকিকোঽপি সম্ভাষণলক্ষণঃ সম্বন্ধঃ বিধুনোতি অপনয়তি॥ (১৯) কুতঃ পুনঃ? কিং পুনর্বক্তব্যম্? তস্থানন্তস্থ নাম গৃণতঃ পুংসো মহত্তমানামভিধানযোগো দৌষ্কুল্যং বিধুনোতীতি। যদ্বা, নাম গৃণতঃ পুনঃ কুতো দৌষ্কুল্যমিতি, যদ্বা, গৃণতঃ পুংসস্তস্থ নাম দৌষ্কুল্যং বিধুনোতীতি কিং বক্তব্যমিতি কৈমুত্যন্যায়মেবাহ। অনন্তাঃ শক্তয়ো যস্থ, স্বতোঽপ্যনন্তঃ। কিঞ্চ, মহৎসু গুণা যস্থ স মহদ্‌গুণঃ, তস্থ ভাবস্তত্ত্বং, তস্মাৎ যং গুণতোঽপ্যনন্তমাহুঃ॥

২০—২২। এতৎ প্রপঞ্চয়তি—এতাবতেতি ত্রিভিঃ। তস্থ যদসাম্যম্ অনতিশায়নঞ্চ গুণৈস্তৎসাম্যং তদাধিক্যঞ্চ অন্যস্থ নাস্তীত্যস্থার্থস্থ জ্ঞানমেতাবতা সূচিতেন অলং পর্য্যাপ্তম্। কস্তদ্বক্তুং বিস্তরতঃ শক্নোতি? তদেবাহ—ইতরান্ ব্রহ্মাদীন্ প্রার্থয়মানান্ হিত্বা বিভূতিঃ শ্রীরনভীপ্সোরপি যস্থাঙ্ঘ্রিরেণুং সেবত ইতি॥ (২১) অথেত্যর্থান্তরে; যস্থ পাদনখাদবসৃষ্টং নিঃসৃতমপি বিরিঞ্চেনোপহৃতং সমর্পিতমর্হণাম্ভঃ অর্ঘ্যোদকমীশসহিতং জগৎ পুনাতি। বিরিঞ্চোপহৃতং সেশমিতি চ তয়োরপ্যুপাসকত্বমুক্তম্। তস্মান্মুকুন্দব্যতিরিক্ত কো নাম ভগবৎপদস্থার্থঃ, সর্ব্বেশ্বরঃ স এবেত্যর্থঃ॥ (২২) ধীরাঃ সন্তঃ, ঊঢ়ং ধৃতম্, অন্ত্যং পরমকাষ্ঠাপন্নম্; তদাহ—যস্মিন্নহিংসা উপশমশ্চ স্বাভাবিকো ধর্ম্মঃ॥

২৩। এবং স্বভাগ্যমভিনন্দ্য পারীক্ষিতোপাখ্যানং বক্তুমাহ—অহং হীতি। হে অর্য্যমণঃ সূর্য্যাঃ ত্রয়ীমূর্ত্তয়ঃ। অত্র যাবানাত্মাবগমঃ, মম

জ্ঞানং তাবৎ আচক্ষে প্রবদামি[১]। তথা হি—যথা পক্ষিণো নভ আত্মসমং স্বশক্ত্যনুরূপমেবোৎপতন্তি, ন কৃৎস্নম্, তথা বিপশ্চিতোঽপি বিষ্ণোর্গতিং লীলাং সমং স্বমতানুরূপমেব বদন্তীত্যর্থঃ ॥

২৪। সম্প্রতি কথামুপক্ষিপতি—একদেতি ॥

২৫। অচক্ষাণঃ অপশ্যন্, তং প্রসিদ্ধাশ্রমং তস্মিন্, মুনিং শমীকম্ ॥

২৬। প্রতিরুদ্ধাঃ প্রত্যাহৃতা ইন্দ্রিয়াদয়ো যেন তম্, অতএব উপারতং স্থানত্রয়াৎ জাগ্রদাদিলক্ষণাৎ পরং তুরীয়ং পদং প্রাপ্তম্, অতএব ব্রহ্মভূতত্বাদবিক্রিয়ম্ ॥

২৭। বিপ্রকীর্ণাভির্জটাভিরাচ্ছন্নম্, রুরুঃ মৃগবিশেষঃ, তস্য চর্ম্মণা চাচ্ছন্নম্, বিশেষেণ শুষ্যৎ তালুরস্য সঃ, তথাভূতং মুনিমুদকমযাচত ॥

২৮। ন লব্ধং তৃণং তৃণাসনং ভূমিরূপবেশস্থানঞ্চ যেন সঃ, ন সম্প্রাপ্তোঽর্ঘ্যঃ সূনৃতঞ্চ যেন সঃ ॥

২৯। মৎসরঃ—তদুৎকর্ষাসহনম্ ॥

৩০। গতাসুং মৃতম্, ধনুষ্কোট্যা চাপাগ্রেণ ॥

৩১। সর্পনিধানে রাজ্ঞোঽভিপ্রায়মাহ—এষ কিমিতি। এষ কিং প্রত্যাহৃতসর্ব্বেন্দ্রিয়ঃ সন্ মীলিতেক্ষণঃ স্থিতঃ? যদ্বা, ক্ষত্রবন্ধুভিরাগতৈ-র্গতৈর্বা কিং নু স্যাদিত্যবজ্ঞয়া মৃষাসমাধিঃ সন্নিতি জিজ্ঞাসয়েত্যর্থঃ ॥

৩২। তস্য পুত্রঃ শৃঙ্গী নাম অতিতেজস্বী তপোবলসম্পন্নঃ, অঘং দুঃখম্, তত্রার্ভকমধ্যে ॥

৩৩। পালানাং রাজ্ঞাম্, পীব্নাং পুষ্টানাম্। অধর্ম্মমেব নির্দ্দিশতি—স্বামিনি দাসানাং যদঘং পাপাচরণম্, বলিভুজাং কাকানামিব শুনামিব চেতি ॥

৩৪। দাসত্বং দর্শয়তি—ব্রাহ্মণৈরিতি। সভাণ্ডং ভাণ্ড এব স্থিতম্ ॥

১। প্রবক্ষ্যামি (ঘ)।

৩৫। তৎ তদনন্তরম্, অহং শাস্মি দণ্ডয়ামি ॥

৩৬। ইতি বয়স্যানুক্ত্বা। রোষেণ তাম্রে অক্ষিণী যস্য সঃ। কৌশিকী নদী, তস্যা অপঃ, সন্ধিরার্ষঃ। বাগ্‌বজ্রং শাপম্ ॥

৩৭। ইতি এবং সর্পনিক্ষেপেণ, দঙ্ক্ষ্যতি ভক্ষয়িষ্যতি, ধক্ষ্যতীতি পাঠে ভস্মীকরিষ্যতি। স্মেতি পাদপূরণে, কুলস্যাঙ্গারতুল্যম্। মে ময়া। তাতদ্রুহমিতি বক্তব্যে ততেতি হ্রস্বত্বমার্ষম্ ॥

৩৮। গলে সর্পকলেবরং যস্যেত্যলুক্‌সমাসঃ ; মুক্তকণ্ঠ উচ্চৈরিত্যর্থঃ ॥

৩৯। আঙ্গিরসো অঙ্গিরোগোত্রোদ্ভবঃ ॥

৪০। তং সর্পং বিসৃজ্য কেনাপকারঃ কৃতঃ ॥

৪১। অনভিনন্দনবাক্যম্—অহো ইতি ; বত কষ্টম্, তে ত্বয়া মহৎ পাপং কৃতম্, অল্পীয়সি দ্রোহে অপরাধে দমো দণ্ডঃ ॥

৪২। পরো বিষ্ণুরিত্যাখ্যা খ্যাতির্যস্য তং নরদেবং নৃভিঃ সম্মাতুং সমং দ্রষ্টুম্ ॥

৪৩। অলক্ষ্যমাণে অদৃশ্যমানে, অবিবরূথবৎ মেষসঙ্ঘবৎ ॥

৪৪। নষ্টো নাথো যস্য লোকস্য তস্য বসোর্বসুনো ধনস্য বিলুম্পকাদপহর্ত্তুশ্চোরাদের্হেতোর্যৎ পাপং ভবিষ্যতি, তদস্মন্নিমিত্তত্বাদস্মানুপৈষ্যতি। অনন্বয়ং সম্বন্ধশূন্যমেব। তদেব পাপং দর্শয়তি—পরস্পরমিতি। শপন্তি পরুষং বদন্তি, পশ্বাদীন্ বৃঞ্জতে অপহরন্তি, পুরুদস্যবশ্চোরবহুলাঃ ॥

৪৫। আর্য্যধর্ম্মঃ সদাচারঃ ; শুনাং কপীনামিব চার্থকাময়োরেবাভিনিবেশিতচিত্তানাম্ ॥

৪৬। এবং রাজমাত্রস্য শাপানর্হত্বমুক্ত্বা প্রস্তুতেঽতিবিশেষমাহ—ধর্ম্মপাল ইতি সার্দ্ধেন। হয়মেধযাট্ অশ্বমেধযাজী। নন্বেবম্ভূতশ্চেৎ, তৎ কুতোঽপকৃতবান্? তত্রাহ—ক্ষুত্তৃড়িতি। স্বাগতপ্রশ্নাদ্যভাবেনাবজ্ঞাতঃ, প্রত্যুত শাপং কথমর্হতীত্যর্থঃ ॥

৪৭। তস্য মহাপাপস্যাস্যৎ প্রায়শ্চিত্তমদৃষ্ট্বা পাপমাবেদয়ন্ ভগবন্তং প্রার্থয়তে—অপাপেষ্বিতি ॥

৪৮। রাজা চেৎ প্রতিশাপং দদ্যাৎ, তর্হি নিষ্কৃতির্ভবেদপি, তত্তু ন সম্ভবতি, তস্য ভাগবতত্বাদিত্যাহ—তিরস্কৃতা নিন্দিতাঃ, বিপ্রলব্ধা বঞ্চিতাঃ, ক্ষিপ্তা অবজ্ঞাতাঃ, হতাস্তাড়িতাঃ ; অস্য তিরস্কারাদিকর্ত্তুঃ ন তৎপ্রতীকারং কুর্ব্বন্তি, তদ্ভক্তাঃ বিষ্ণুভক্তাঃ, প্রভবঃ সমর্থা অপি ॥

৪৯। বিপ্রকৃতঃ অপকৃতঃ, অঘমপরাধম্ ॥

৫০। যুক্তঞ্চৈতদিত্যাহ—প্রায়শ ইতি। দ্বন্দ্বেষু সুখদুঃখাদিষু। অগুণাশ্রয়ঃ সুখদুঃখাদ্যাশ্রয়ো ন ভবতি ॥

ইতি শ্রীমদ্ভাগবতভাবার্থদীপিকায়াং প্রথমস্কন্ধে
অষ্টাদশোঽধ্যায়ঃ ॥ ১৮ ॥

একোনবিংশোঽধ্যায়ঃ

প্রায়োপবিষ্টে গঙ্গায়াং রাজ্ঞি যোগিজনাবৃতে।
শুকস্যাগমনং তত্র প্রোক্তমেকোনবিংশকে ॥ (১)

১—৩। স্বকৃতং তৎ কর্ম্ম মুনিস্কন্ধে সর্পনিক্ষেপণং গর্হ্যং নিন্দ্যং বিচিন্তয়ন্ সুদুর্ম্মনা জাতঃ। চিন্তামেবাহ—সার্দ্ধদ্বাভ্যাম্ অহো ইতি, নীচং পাপম্। অমীবমিতি পাঠে স এবার্থঃ। ব্রহ্মণি ব্রাহ্মণে গূঢ়ং গুপ্তং তেজো যস্য ॥ (২) কৃতং যদ্দেবহেলনমীশ্বরাবজ্ঞাপাপমিত্যর্থঃ, তস্মাৎ নূনং মে ব্যসনং ভবিষ্যতি। তত্তু নাতিদীর্ঘাৎ কালাৎ, অচিরাদেবাস্তু। তত্রাপি অদ্ধা সাক্ষাৎ মমৈব, ন পুত্রাদিদ্বারেণেতি প্রার্থনা। কামমসঙ্কোচতঃ।

এবং প্রার্থনায়াঃ প্রয়োজনম্, অঘস্য নিষ্কৃতায় প্রায়শ্চিত্তায় যথা পুনরেবং ন কুর্য্যামিতি চ ॥ (৩) এবং সাক্ষাৎ স্বস্যৈব ব্যসনং সম্প্রার্থ্য ততঃ প্রাগেব কিঞ্চিৎ প্রার্থয়তে—অদ্যৈব মে রাজ্যাদি দহতু। প্রকোপিতং ব্রহ্মকুলং, তদেবানলঃ, পুনর্দ্বিজাদীন্ পীড়য়িতুং সা ধীর্মে মা ভূৎ, ন ভবেদিত্যর্থঃ ॥

৪। ইত্থং চিন্তয়ন্ স রাজা মুনেঃ সুতোক্তঃ সপ্তমেঽহনি নির্ঋতি-র্মৃত্যুর্যথা ভবিষ্যতি, তথাশৃণোৎ। শমীকপ্রেষিতাৎ শিষ্যাৎ শ্রুত্বা চ সঃ তক্ষকস্য বিষাগ্নিং সাধু মেনে। যতো বিষয়েষু প্রসক্তস্য বিরক্তি-কারণম্ ॥

৫। অথো অনন্তরম্, উভৌ লোকৌ পুরস্তাদ্রাজ্যমধ্য এব হেয়তয়া বিচারিতৌ বিহায়। শ্রীকৃষ্ণাঙ্ঘ্রিসেবামেবাধিমন্যমানঃ সর্ব্বপুরুষার্থেভ্যোঽধিকাং জানন্ প্রায়মনশনং, তস্মিন্নিত্যর্থঃ। তৎসঙ্কল্পেনোপাবিশদিতি যাবৎ, যদ্বা, প্রায়ং প্রকৃষ্টময়নং শরণং যথা ভবতি তথা ॥

৬। অমর্ত্ত্যনদ্যামিতি বিশেষণস্য ফলমাহ—যা গঙ্গা লসন্তী শ্রীর্যস্যাঃ, তয়া তুলস্যা বিমিশ্রা যে কৃষ্ণাঙ্ঘ্রিরেণবস্তৈরভ্যধিকং সর্ব্বোৎকৃষ্টং যদম্বু, তস্য নেত্রী তদ্বাহিনী। উভয়ত্র অন্তর্বহিশ্চ সেশান্ ঈশৈঃ লোকপালৈঃ সহিতান্ লোকান্ পুনাতি। মরিষ্যমাণঃ আসন্নমরণঃ, মরণস্যানিয়তকালত্বাৎ সর্ব্বোঽপি তথা। অতস্তাং কো ন সেবেত?

৭। ইতি এবং বিষ্ণুপদ্যাং গঙ্গায়াং প্রায়োপবেশং প্রতি ব্যবচ্ছিদ্য নিশ্চিত্য, পাণ্ডবেয় ইতি তৎকুলৌচিত্যং দর্শয়তি। নাস্ত্যন্যস্মিন্ ভাবো যস্য সঃ। কুতঃ? মুনিব্রত উপশান্তঃ। তৎ কুতঃ? মুক্তঃ সমস্তসঙ্গো যেন সঃ ॥

৮। তত্র তদা, তদ্দর্শনার্থং মুনয় উপাগতাঃ, ন তু তীর্থস্নানার্থং, কৃতার্থত্বাৎ। ননু তাদৃশানামপি তীর্থযাত্রা দৃশ্যতে? তত্রাহ—প্রায়েণেতি তীর্থযাত্রাব্যাজৈঃ ॥

১১। অরুণাদয়ঃ রাজর্ষিত্ববিশেষেণ পৃথঙ্‌নির্দ্দিষ্টাঃ, নানানামান্যার্ষেয়াণি ঋষীণাং গোত্রাণি, তেষু প্রবরান্ শ্রেষ্ঠান্, শিরসা ভুবং স্পৃষ্ট্বা ববন্দে ॥

১২। বিজ্ঞাপনার্থং পুনঃ কৃতপ্রণামঃ, বিবিক্তং শুদ্ধং চেতো যস্য, অভিগৃহীতৌ সংযোজিতৌ পাণী যেন সঃ; স্বচিকীর্ষিতং প্রায়োপবেশাদি যুক্তমযুক্তং বেতি বিজ্ঞাপয়ামাস ॥

১৩। অনুমোদনেনানুগ্রহমালক্ষ্য আত্মানং শ্লাঘতে—অহো ইতি; নৃপাণাং মধ্যে মহত্তমৈরনুগ্রহণীয়ং শীলং বৃত্তং যেষাং তে। এতচ্চ রাজ্ঞা-মতিদুর্ল্লভমিত্যাহ—ব্রাহ্মণানাং পাদশৌচাৎ পাদপ্রক্ষালনোদকাৎ 'দূরা-দুচ্ছিষ্টবিণ্মূত্রপাদাম্ভাংসি সমুৎসৃজেৎ' ইতি স্মৃতেঃ। দূরে হি তৈস্তদ্বিসৃজ্যতে, ততোঽপি দূরাদেব বিসৃষ্টং ক্ষিপ্তং, তত্রাপি স্থাতুমযোগ্যমিত্যর্থঃ। গর্হ্যং কর্ম্ম যস্যেত্যাত্মানমুদ্দিশ্যোক্তম্ ॥

১৪। আস্তাং তাবদনুগ্রহঃ, ব্রহ্মশাপোঽপি ভগবৎপ্রসাদাদেব জাত ইত্যাহ—তস্যেতি, তস্য গর্হ্যকর্ম্মণ এব, অতোঽঘস্য পাপাত্মনঃ গৃহেষ্বাসক্ত-চিত্তস্য মে স্বপ্রাপ্তয়ে পরাবরাণামীশ এব দ্বিজশাপতয়া বভূব। যত্র যস্মিন্ শাপে সতি গৃহেষু প্রসক্তো ভয়ং ধত্তে, নির্ব্বিণ্ণো ভবতি স্বয়ম্; যতো নির্ব্বেদমূলঃ. নির্ব্বেদো বৈরাগ্যং মূলং প্রাপ্তিকারণং যস্মিন্। স্বস্য বৈরাগ্য-প্রাপ্যত্বাৎ তস্য চ ভয়মূলত্বাৎ তদর্থং দ্বিজশাপং কারিতবানিত্যর্থঃ ॥

১৫—১৬। তান্ প্রার্থয়তে দ্বাভ্যাম্। তং মা মাম্ উপযাতং শরণাগতং প্রতিযন্তু জানন্তু, দেবী দেবতারূপা গঙ্গা চ প্রত্যেতু; বা-শব্দঃ প্রতিক্রিয়াঽনাদরে। গাথাঃ কথা গায়ত ॥ (১৬) স আশ্রয়ো যেষাং তেষু প্রকৃষ্টঃ সঙ্গো ভূয়াৎ, তস্যাং তস্যাং সৃষ্টৌ জন্মনি ॥

১৭। অধ্যবসায়ো নিশ্চয়ঃ; প্রাচীনানি প্রাগগ্রাণি মূলানি যেষাং তেষু প্রাগগ্রেষু কুশেষু আস্তে স্ম, স্বসুতে জনমেজয়ে ন্যস্তো ভারো রাজ্যং যেন সঃ ॥

১৮। মুদা ব্যকিরন্ ; দেবসঙ্ঘৈর্বাদিতা তুন্দুভয়ো নেদুঃ ॥

১৯। প্রজানুগ্রহে শীলং সারো বলঞ্চ যেষাম্, উত্তমঃশ্লোকগুণৈরভি-রূপং সুন্দরমিব ॥

২০। ভবৎসু পাণ্ডোর্বংশ্যেষু যে জহুরিতি যুধিষ্ঠিরাত্মভিপ্রায়েণ ॥

২১। পরস্পরং মন্ত্রয়ন্তস্তে সর্ব্বে ইতি পরং শ্রেষ্ঠং লোকম্। তত্র হেতুঃ—বিরজস্কং নির্মায়ং বিশোকঞ্চ যাস্যতি ইতি ; কুতস্তত্রাহ—অয়মিতি ॥

২২। আশ্রুত্য আকর্ণ্য, সমং পক্ষপাতশূন্যম, মধুচ্যুৎ অমৃতস্রাবি, গুরু গম্ভীরার্থম্, অব্যলীকং সত্যম্ ॥

২৩। ত্রয়াণাং লোকানাং পৃষ্ঠে উপরি সত্যলোকে বেদা যথা মূর্ত্তিধরা ভবন্তি, তত্তুল্যাঃ। জ্ঞানাতিশয়মুক্ত্বা কৃপালুতামাহ—নেতি। ভবতাং প্রয়োজনং পরানুগ্রহং বিনা নাস্তি, তর্হি স এবার্থঃ স্যাৎ, ন আত্মশীলং স্বস্বভাবম্ ॥

২৪। পৃচ্ছ্যং প্রষ্টব্যং বিশ্রভ্য বিশ্বাসং কৃত্বা, এবং কর্ত্তব্যমিত্যস্য ভাবঃ ইতিকৃত্যতা, তস্মিন্ বিষয়ে সর্ব্বাত্মনা সর্ব্বাবস্থাসু যৎ কৃত্যং, বিশেষতশ্চ ম্রিয়মাণৈস্তচ্চ শুদ্ধং পাপসম্পর্করহিতমামৃশত বিচারয়ত ॥

২৫। তত্র তেষু যাগযোগতপোদানাদিভির্বিবদমানেষু সৎসু যদৃচ্ছয়া গাং পর্য্যটন্ ব্যাসপুত্রস্তত্রাভবৎ প্রাপ্তঃ। ন লক্ষ্যমাশ্রমাদিলিঙ্গং যস্য, অবধূতঃ অবজ্ঞয়া জনৈস্ত্যক্তো যস্তস্যেব বেশো যস্য ॥

২৬—২৮। তমিত্যাদীনাং প্রত্যুত্থিতা ইতি তৃতীয়শ্লোকেনান্বয়ঃ। দ্বিগুণান্যষ্টৌ বর্ষাণি যস্য, সুকুমারৌ পাদৌ করৌ ঊরূ বাহূ অংসৌ কপোলৌ গাত্রঞ্চ যস্য তম্, চারুণী আয়তে অক্ষিণী যস্মিন্, উন্নতা নাসা যস্মিন্, লম্বহ্রস্বাদিবৈষম্যং বিনা তুল্যৌ কর্ণৌ যস্মিন্, শোভনে ভ্রুবৌ যস্মিন্, এবম্ভূতমাননং যস্য তম্, কম্বুবদ্রেখাত্রয়াঙ্কিতঃ সুষ্ঠু জাতঃ কণ্ঠো যস্য ॥

(২৭) কণ্ঠস্যাধোভাগে স্থিতে অস্থিনী জত্রুণী, মাংসেন নিগূঢ়ে জত্রুণী যস্য, পৃথু বিস্তীর্ণং তুঙ্গমুন্নতং বক্ষো যস্য, আবর্ত্তবন্নাভির্যস্য, বলিভিস্ত্রির্য্যঙ্‌ নিম্ন-রেখাভির্বল্গু রম্যমুদরং যস্য, দিশ এবাম্বরং যস্য, বক্রা বিকীর্ণাশ্চ কেশা যস্য, প্রলম্বৌ বাহূ যস্য, স্বমরেষু শ্রেষ্ঠেষু দেবেষু উত্তমো হরিস্তদ্বদাভা যস্য ॥ (২৮) সদা অপীব্যম্ অত্যন্তোত্তমং যদ্বয়ো যৌবনম্, তেন যা অঙ্গলক্ষ্মীঃ দেহকান্তিস্তয়া রুচিরস্মিতেন চ। গূঢ়বর্চ্চসমপি প্রত্যুত্থিতা তং দৃষ্ট্বা প্রত্যুদ্‌গমং কৃতবন্ত ইত্যর্থঃ ॥

২৯। শিরসৈব সপর্য্যামাজহার আত্মনিবেদনং কৃতবান্; তেন সহাগতাঃ স্ত্র্যর্ভকাদয়ো নিবৃত্তাঃ। স উপবিবেশ; সন্ধিরার্ষঃ ॥

৩০। স ভগবান্ ব্রহ্মর্ষিসঙ্ঘাদিভিঃ সংবৃতঃ সন্ অলং ব্যরোচত; গ্রহাঃ শুক্রাদয়ঃ, ঋক্ষাণ্যশ্বিন্যাদীনি, অন্যাস্তারাঃ ॥

৩১। ন কুণ্ঠা সর্ব্বার্থেষু মেধা যস্য তম্; প্রশ্নার্থং পুনর্নত্বা ॥

৩২—৩৬। সূনৃতাং গিরমাহ—অহো ইতি পঞ্চভিঃ। সতাং সেব্যা জাতাঃ, যতোঽতিথিরূপেণ হেতুনা তীর্থকা যোগ্যাঃ কৃতাঃ ॥ (৩৪) বিষ্ণোঃ সান্নিধ্যাৎ সুরেতরা অসুরা গয়াদয়ঃ[১] ইব ॥ (৩৫) পাণ্ডু-সুতানাং প্রিয়ঃ, অতস্তেষাং পৈতৃষ্বস্রেয়াণাং প্রীত্যর্থং তদ্গোত্রস্য মে আত্তং স্বীকৃতং বান্ধবং বন্ধুকৃত্যং যেন ॥ (৩৬) অন্যথা শ্রীকৃষ্ণপ্রসাদং বিনা, অব্যক্তা গতির্যস্য। ম্রিয়মাণানাং নিতরাং কথং স্যাৎ? বনয়িতা যাচয়িতা বনয়িতৃতমো বনীয়ান্ তস্য অত্যুদারতয়া মাং যাচেথা ইতি প্রবর্ত্তক-স্যেত্যর্থঃ ॥

৩৭। সম্যক্ সিদ্ধির্যস্মাৎ তম্, কার্য্যং কর্ত্তুং যোগ্যং কর্ত্তব্যং ত্বাবশ্যকমিতি তয়োর্ভেদঃ; অতএব সর্ব্বথা ম্রিয়মাণস্য পুরুষস্য যস্মিন্ কৃতে সংসিদ্ধির্মোক্ষলক্ষণা সিদ্ধির্ভবতি তৎ ত্বাং যোগিনাং গুরুং পৃচ্ছামি ॥

১। ময়াদয়ঃ (ঘ)।

৩৮। যচ্ছ্রোতব্যম্, যজ্জপ্যম্, যৎ কর্ত্তব্যম্, যৎ স্মর্ত্তব্যম্, যদারাধ্যম্, তদ্ ব্রূহি। বিপর্য্যয়মশ্রোতব্যাদি ॥

৩৯। ত্বদ্দর্শনস্যাতিদুর্লভত্বাদিদানীমেব কথনীয়মিত্যাশয়েনাহ—নূনমিতি। গোদোহনমাত্রকালমপি অস্মাকং ভাগ্যবশাৎ ত্বদ্দর্শনং জাতমিতি ভাবঃ ॥

৪০। এবমহো ইত্যাদিকয়া শ্লক্ষ্ণয়া মধুরয়া গিরা আভাষিতঃ অভিমুখীকৃতঃ পৃষ্টশ্চ ॥

আর্য্যং ধর্ম্মজমাহতারিমবনৌ কৃত্বা পরীক্ষিন্নৃপং
ব্রহ্মাস্ত্রাদভিরক্ষিতং কলিজয়াখ্যাতঞ্চ কৃত্বা ভুবি।
অন্তে যঃ শুকরূপতঃ স্বপরমজ্ঞানোপদেশেন তং
শাপাদাবদমুং নমামি পরমানন্দাকৃতিং মাধবম্ ॥ (২)

প্রথমস্কন্ধগূঢ়ার্থ-পদভাবার্থ-দীপিকা।
সদ্ভিরুদ্দীপনীয়েয়ং যথা স্যাৎ তত্ত্বদীপিকা ॥ (৩)

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং শ্রীধরস্বামিবিরচিতায়াং
প্রথমস্কন্ধটীকায়ামেকোনবিংশোঽধ্যায়ঃ ॥ ১৯ ॥

প্রথমস্কন্ধঃ সম্পূর্ণঃ।

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

দ্বিতীয়ঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

যন্নামকীর্ত্তনং দানতপোযোগাদিসৎফলম্।
তং নিত্যং পরমানন্দং হরিং নরমহং ভজে ॥ (১)
দ্বিতীয়ে তু দশাধ্যায়ৈঃ শ্রীভাগবতমাদিতঃ।
উদ্দেশলক্ষণোক্তিভ্যাং সংক্ষেপেণোপবর্ণ্যতে ॥ (২)
তত্র তু প্রথমাধ্যায়ে কীর্ত্তনশ্রবণাদিভিঃ।
স্থবিষ্ঠে ভগবদ্রূপে মনসো ধারণোচ্যতে ॥ (৩)
উক্তঃ পূর্ব্বমুপোদ্ঘাতঃ সপ্রসঙ্গঃ শুকাগমঃ।
রাজ্ঞা পৃষ্টং নৃণাং কৃত্যমথাহ শুকসন্মুনিঃ ॥ (৪)

১। রাজ্ঞঃ প্রশ্নমভিনন্দতি—বরীয়ানিতি, তে ত্বয়া পুংসাং শ্রোতব্যাদিষু মধ্যে যঃ পরঃ শ্রেষ্ঠঃ প্রশ্নঃ কৃতঃ, এষ বরীয়ান্; যতো লোকহিতমেতৎ মোক্ষহেতুত্বাৎ। আত্মবিদাং মুক্তানাঞ্চ সম্মতো যতঃ॥

২—৪। তত্র তাবৎ স্বাভাবিকক্রিয়াণামনর্থহেতুত্বং বদন্ 'ব্রূহি যদ্বা বিপর্য্যয়ম্' ইত্যস্যোত্তরমাহ—শ্রোতব্যাদীনীতি ত্রিভিঃ। গৃহেষু সক্তানা-মতএব গৃহমেধিনাং তদ্গতপঞ্চসূনাপরাণাম্, মেধতির্হিংসার্থঃ; (৩) তেষাং বৃথৈবায়ুর্ব্যয়ো ভবতীত্যাহ—নিদ্রয়েতি। নক্তং রাত্রৌ যদ্বয় আয়ুঃ, তন্নিদ্রয়া ব্যবায়েন রত্যা বা হ্রিয়তে, দিবা অহ্নি যদ্বয়স্তদর্থেহয়া অর্থার্থমুদ্যমেন, সিদ্ধেঽপ্যর্থে কুটুম্বভরণেন বা। চকারাবনুক্তসমুচ্চায়কৌ॥ (৪) নন্বু নশ্বর-কুটুম্বভরণার্থং কথমায়ুর্ব্যয়ং কুর্য্যাৎ? তত্রাহ—দেহাদিষু আত্মনঃ সৈন্যেষু পরিকরেষু অসৎসু মিথ্যাভূতেষ্বপি প্রমত্তঃ প্রসক্তঃ, তেষাং পিত্রাদিদৃষ্টান্তেন নাশং পশ্যন্নপি নানুসন্ধত্তে॥

৫। এবং বিপর্য্যয়প্রশ্নস্যোত্তরমুক্ত্বা শ্রোতব্যাদি-প্রশ্নস্যোত্তরমাহ—তস্মাদিতি। হে ভারত! ভরতবংশ্য! সর্ব্বাত্মেতি শ্রেষ্ঠত্বমাহ[১], ভগবানিতি সৌন্দর্য্যম্, ঈশ্বর ইত্যাবশ্যকত্বম্, হরিরিতি বন্ধহারিত্বম্; অভয়ং মোক্ষমিচ্ছতা ॥

৬। অতঃ পরমন্যৎ শ্রেয়ো নাস্তীত্যাহ—এতাবানেব জন্মনো লাভঃ ফলম্, তমাহ—শ্রীনারায়ণস্মৃতিরিতি। সাংখ্যাদিভিঃ সাধ্য ইতি তেষাং স্বাতন্ত্র্যেণ লাভত্বং বারয়তি, সাংখ্যম্ আত্মানাত্মবিবেকঃ, যোগোঽষ্টাঙ্গঃ, অন্তে তু স্মৃতিঃ পরমো লাভঃ, ন তন্মহিমা বক্তুং শক্যত ইত্যর্থঃ ॥

৭। তত্র সদাচারং প্রমাণয়তি—প্রায়েণেতি। বিধিসেধতঃ বিধিনিষেধাভ্যাং নিবৃত্তাঃ, নৈর্গুণ্যে ব্রহ্মণি স্থিতা অপি হরেগুর্ণানুকথনে কীর্ত্তনে রমন্তে। স্ম প্রসিদ্ধম্ ॥

৮। কিমিদমপূর্ব্বং কথয়সি? সত্যম্, অত্যপূর্ব্বমেবেদমিত্যাহ—ইদং ভগবৎপ্রোক্তং তন্নামৈকপ্রধানং পুরাণং ব্রহ্মসম্মিতং সর্ব্ববেদতুল্যম্; যদ্বা, ব্রহ্ম সম্যঙ্ মিতং প্রতিপাদিতং যেন। কুতস্ত্বয়া প্রাপ্তম্? অত আহ—অধীতবানিতি, দ্বৈপায়নাৎ পিতুঃ। কদা? দ্বাপরাদৌ দ্বাপর আদির্যস্য কালস্য তস্মিন্ দ্বাপরান্তে ইত্যর্থঃ। শন্তনু-সমকালে ব্যাসাবতারপ্রসিদ্ধেঃ ॥

৯। সিদ্ধস্য তব কুতোঽধ্যয়নে প্রবৃত্তিঃ? তত্রাহ—পরিনিষ্ঠিতোঽপীতি গৃহীতচেতা আকৃষ্টচিত্তঃ ॥

১০। মহাপুরুষো বিষ্ণুস্তদীয়ঃ, যস্য যস্মিন্, শ্রদ্ধাং কুর্ব্বতাম্, সতী অহৈতুকী ॥

১১। সাধকানাং সিদ্ধানাঞ্চ নাতঃ পরমন্যৎ শ্রেয়োঽস্তীত্যাহ—এতদিতি। ইচ্ছতাং কামিনাং তত্তৎফলসাধনমেতদেব, নির্ব্বিদ্যমানানাং

১। শ্রেষ্ঠত্বমাহ (ঘ)।

মুমুক্ষূণাং মোক্ষসাধনমেতদেব, যোগিনাং জ্ঞানিনাং ফলঞ্চৈতদেব নির্ণীতম্, নাত্র প্রমাণং বক্তব্যমিত্যর্থঃ॥

১২-১৪। 'অল্পমেবায়ুরবশিষ্টং কিমহং সাধয়েয়ম্?' ইতি মা শুচঃ, ইত্যাহ কিমিতি ত্রিভিঃ। পরোক্ষৈরলক্ষিতৈঃ, হায়নৈর্বর্ষৈঃ, বিদিতং বৃথা যাতীতি জ্ঞাতম্; যতো যেন জ্ঞানেন, ঘটতে যত্নং করোতি[১]॥ (১৩) খট্বাঙ্গো হি দেবপক্ষে স্থিত্বা দৈত্যানজয়ৎ, ততঃ প্রসন্নৈর্দেবৈর্বরং বৃণীষ্বেত্যুক্তে তেনোক্তম্—প্রথমং তাবন্মমায়ুঃ কথ্যতামিতি। ততো দেবৈরুক্তম্—তত্তু মুহূর্ত্তমাত্রমস্তীতি। ততোঽতিশীঘ্রং দেবৈর্দত্তেন বিমানেন ভুবমাগত্য হরিং শরণং গতঃ ইতি। যত ইয়ং স্বর্গভূমী রজোঽধিকা; কর্ম্মভূমিঃ পৃথ্বী॥ (১৪) তব তু এতর্হ্যপি ইদানীমপি। তাবদিতি তাবতা কালেন, সাম্পরায়িকং পারলৌকিকং সাধনং সম্পাদয়॥

১৫। তত্র বৈরাগ্যং তাবদাহ— অন্তকাল ইতি। গতসাধ্বসো মৃত্যুভয়শূন্যঃ, অসঙ্গো নাম অনাসক্তিঃ, তেন শস্ত্রেণ, স্পৃহাং সুখেচ্ছাম্, তং দেহমনু যে পুত্রকলত্রাদয়ঃ, তেষ্বপি স্পৃহাং ছিন্দ্যাৎ॥

১৬। কিঞ্চ গৃহাৎ প্রব্রজিতো নিষ্ক্রান্তঃ, গৃহে স্থিতস্য পুনরপি আসক্তিসম্ভবাৎ। তত্রাষ্টাঙ্গযোগমাহ—ধীর ইতি; ব্রহ্মচর্য্যাদি যমোপলক্ষণম্। পুণ্যতীর্থেতি স্নানাদি-নিয়মোপলক্ষণম্, আসনমাহ—শুচাবিতি। বিবিক্তে একান্তে, বিধিবৎ কুশাজিনচৈলৈঃ ক্রমেণ নির্ম্মিতে॥

১৭। জপগর্ভং প্রাণায়ামং বক্তুং জপ্যমাহ—ত্রিবৃৎ ত্রিভিরকারাদিভিঃ বর্ণিতং[২] গ্রথিতং, ব্রহ্মাক্ষরং প্রণবম্, মনসাভ্যসেদাবর্ত্তয়েৎ; মনসা ইন্দ্রিয়প্রত্যাহারং বক্তুং প্রাণায়ামেন মনোনিয়মনমাহ—মনো যচ্ছেদ্বশীকুর্য্যাৎ, ব্রহ্মবীজং প্রণবমবিস্মরন্নেব জিতশ্বাসঃ সন্॥

১। ঘটেত যত্নং কুর্য্যাৎ (ঘ); ২। বর্ত্তিতং (খ, ঘ)।

১৮। প্রত্যাহারমাহ—নিযচ্ছেন্নিগৃহ্নীয়াৎ, অক্ষানিন্দ্রিয়াণি, নিশ্চয়াত্মিকা বুদ্ধিঃ সারথির্যস্য সঃ। ধারণামাহ—মন ইতি। পুনশ্চ কর্ম্মভিস্তদ্বাসনাভিঃ, আক্ষিপ্তমাকৃষ্টম্, শুভার্থে ভগবদ্রূপে ॥

১৯। ধ্যানমাহ—তত্রেতি। একমেকং পাদাদ্যবয়বম্, অব্যুচ্ছিন্নেন সমগ্ররূপাদবিযুক্তেন, আশ্রয়বিশেষে সামান্যতশ্চিত্তস্থিরীকরণং ধারণা, অবয়ববিশেষভাবনয়া তদ্দার্ঢ্যং ধ্যানমিতি ভেদঃ। সমাধিমাহ—নির্বিষয়ং মনো যুক্ত্বা সমাধায়, স্থিরীভূতে মনসি স্ফুরৎপরমানন্দমাত্রাকারং কৃত্বেত্যর্থঃ। প্রসীদতি উপশাম্যতি ॥

২০। গুণবশাৎ পুনরপি ক্ষোভে সতি ধারণামেব স্থিরীকুর্য্যাদিত্যাহ—রজসাক্ষিপ্তং তমসা বিমূঢ়ং স্বীয়ং মনো নিরুন্ধ্যাৎ, তৎকৃতং রজস্তমোভ্যাং কৃতম্ ॥

২১। যতঃ যস্যাং ধারণায়াং ক্রিয়মাণায়াম্, ভদ্রং সুখাত্মকমাশ্রয়ং বিষয়ং পশ্যতস্তত্রৈব প্রীতির্ভবতি ॥

২২। যথা যত্র যাদৃশী চেতিকর্ত্তব্যতাবিষয়-তত্তদ্বিশেষাণাং প্রশ্নাঃ ॥

২৩। যথেত্যস্যোত্তরম্—জিতাসন ইতি। বিষয়মাহ স্থূল ইতি সার্দ্ধেন ॥

২৪। বিশেষো বিরাড়্দেহঃ, অতিস্থূলানামপি স্থূলতরঃ; সৎ কার্য্যমাত্রম্ ॥

২৫। অস্য চোপলক্ষণত্বেন বিষয়ত্বম্, বস্তুতস্তু বিরাড়্ জীবনিয়ন্তা ভগবানেব বিষয় ইত্যাহ—অণ্ডকোষান্তর্বর্ত্তিকটাহ এব পৃথিব্যাবরণম্, ততোঽপ্তেজোবায়্বাকাশাহঙ্কারমহত্তত্ত্বানীতি সপ্ত ॥

২৬। বিরাড়্-দেহ-তজ্জীব-তদন্তর্যামিণামভেদমারোপ্য উপাসনং কর্ত্তব্যমিত্যাশয়েনাহ—পাতালং পাদমূলং পাদস্যাধোভাগম্। পাতালাদীনাং তদবয়বতা বিধীয়তে। পাতালাদীনি অতলান্তানি অধস্তলাদারভ্য সপ্ত

ভূ-বিবরাণি। পঠন্তি গৃণন্তীত্যাদি প্রমাণ-প্রদর্শনম্। পাষ্ণিপ্রপদে পাদস্য পশ্চাৎপুরোভাগৌ ॥

২৭। উরুদ্বয়স্যাধোভাগে বিতলম্, উত্তরভাগে অতলমিতি জ্ঞেয়ম্, নভস্তলং ভুবর্লোকম্, নাভিরেব সরঃ ॥

২৮। জ্যোতিরনীকং জ্যোতিষাং সমূহং স্বর্গম্, মহর্লোকং গ্রীবেতি গৃণন্তি, তপোলোকংররাটীং ললাটম্, সত্যং সত্যলোকম্ ॥

২৯। উস্রাঃ দেবাঃ, তেজোময়শরীরত্বাৎ তে বাহব ইত্যাহুঃ—দিশঃ অস্মদাদিশ্রোত্রাধিষ্ঠাত্র্যো দেবতাঃ, কর্ণৌ শ্রোত্রস্যাধিষ্ঠানম্। শব্দস্তু শ্রোত্র-বিষয়ঃ, স তস্য শ্রোত্রমিন্দ্রিয়ম্, এবং নাসিকাদিষ্বপি। নাসত্যদস্রৌ অশ্বিনৌ নাসে নাসাপুটে, ইদ্ধঃ দীপ্তঃ ॥

৩০। দ্যৌঃ অন্তরীক্ষম্, অক্ষিণী নেত্রগোলকে, চক্ষুঃ ইন্দ্রিয়ম্, পতঙ্গঃ সূর্য্যঃ, অহনী রাত্র্যহনী। পরমেষ্ঠিধিষ্ণ্যং ব্রহ্মপদম্, তালু অধিষ্ঠানম্, জিহ্বা ইন্দ্রিয়ম্ ॥

৩১। ছন্দাংসি বেদাঃ, শিরো ব্রহ্মরন্ধ্রম্, স্নেহকলাঃ পুত্রাদিস্নেহলেশাঃ, দ্বিজানি দন্তাঃ; যণ্ডত্বমার্ষম্। দুরন্তঃ অপারঃ সর্গ ইতি যৎ, স তস্য কটাক্ষঃ ॥

৩২। অধর্ম্মমার্গোঽস্য[১] পৃষ্ঠভাগঃ। কঃ প্রজাপতিঃ, মিত্রৌ মিত্রাবরুণৌ ॥

৩৩। অনন্তং বীর্য্যং যস্য সঃ, বয়ঃ কালঃ, তস্য গমনম্, গুণপ্রবাহঃ প্রাণিনাং সংসারঃ, কর্ম্ম তস্য ক্রীড়া ॥

৩৪। ভূম্নঃ বিভোঃ, অব্যক্তং প্রধানম্, সঃ প্রসিদ্ধশ্চন্দ্রমাঃ, তদীয়ং মনঃ; সর্ব্বেষাং বিকারাণাং কোষ ইবাশ্রয়ভূতম্ ॥

৩৫। বিজ্ঞানশক্তিং চিত্তং মহিং মহত্তত্ত্বম্, অন্তঃকরণম্ অহঙ্কারম্, গিরিত্রং শ্রীরুদ্রম্, গর্দ্দভাদ্ বড়বায়াং ঘোটকস্ত্রিয়ামুৎপন্না অশ্বতরী ॥

১। স্বধর্ম্মত্যাগোঽস্য (ক)।

৩৬। বয়াংসি পক্ষিণঃ, তস্য ব্যাকরণং 'নামরূপে ব্যাকরবাণি' ইতি শ্রুত্যুক্তং বিচিত্রং শিল্পনৈপুণ্যম্। যথাহুঃ—'যেন শুক্লীকৃতা হংসাঃ শুকাশ্চ হরিতীকৃতাঃ। ময়ূরাশ্চিত্রিতা যেন স তে বৃত্তিং বিধাস্যতি॥' ইতি। মনুঃ স্বায়ম্ভুবঃ, মনীষা বুদ্ধিঃ, মনুজঃ পুরুষঃ, নিবাস আশ্রয়ঃ; 'পুরুষত্বে চাবিস্তরামাত্মা' ইতি শ্রুতেঃ। গন্ধর্ব্বাদীনাং দ্বন্দ্বৈক্যম্। গন্ধর্ব্বাদয়ঃ স্বরস্মৃতীঃ ষড়্‌জাদি-স্বরস্মৃতয় ইত্যর্থঃ। অসুরানীকং বীর্য্যং যস্য সঃ; স্বরঃ স্মৃতিরসুরানীকবর্য্য ইতি পাঠে গন্ধর্ব্বাদয়ঃ স্বরঃ, অসুর-সমূহশ্রেষ্ঠঃ প্রহ্লাদঃ, স্মৃতিস্তস্যেতি॥

৩৭। ব্রহ্মা (বিপ্রঃ) তস্যাননং মুখম্, ক্ষত্রং ক্ষত্রিয়ো ভুজো যস্য সঃ, বিট্ বৈশ্যঃ ঊরূ যস্য, অঙ্ঘ্রি্শ্রিতঃ কৃষ্ণবর্ণঃ শূদ্রো যস্য; নানা অভিধা নামানি যেষাং তে চ তেঽভীজ্যা দেবাশ্চ, তেষাং গণৈর্বসুরুদ্রাদিভি-রুপপন্নো যুক্তঃ, দ্রব্যাত্মকো হবিঃসাধ্যঃ, বিতানযোগো যজ্ঞপ্রয়োগঃ, তস্য কর্ম্ম কার্য্যম্, আবশ্যকোঽভিপ্রেত ইত্যর্থঃ॥

৩৮। ইয়ান্ এতাবান্, সন্নিবেশঃ অবয়বসংস্থানম্, অস্মিন্ স্ববুদ্ধ্যা মনঃ সন্ধার্য্যতে মুমুক্ষুভিঃ; যতো যদ্ব্যতিরিক্তং কিঞ্চিন্নাস্তি তস্মিন্॥

৩৯। তদেবং চিত্তস্থৈর্য্যার্থং বিরাড়্‌দেহজীবেশ্বরাণামভেদেনোপাসন-মুক্তম্। তত্র তু দেহজীবৌ ঈশ্বরে প্রবিলাপ্য স এব ধ্যেয় ইতি নির্দ্ধারয়তি—স ইতি। সর্ব্বেষাং ধীবৃত্তিভিরনুভূতং সর্ব্বং যেন, স এক এব সর্ব্বান্তরাত্মা, তমেব সত্যং ভজেত, অন্যত্র উপলক্ষণে ন সজ্জেত; যত আসঙ্গাদাত্মনঃ পাতঃ সংসারো ভবতি। একস্য তত্তদিন্দ্রিয়ৈঃ সর্ব্বানুভূতৌ দৃষ্টান্তঃ স্বপ্নজনানামীক্ষিতা যথেতি। স্বপ্নে হি কদাচিৎ বহূন্ দেহান্ প্রকল্প্য জীবস্তত্তদিন্দ্রিয়ৈঃ সর্ব্বং পশ্যতি তদ্বৎ। ঈশ্বরস্য তু বিদ্যাশক্তিমত্ত্বান্ন বন্ধঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে প্রথমোঽধ্যায়ঃ॥ ১॥

দ্বিতীয়োঽধ্যায়ঃ

দ্বিতীয়ে তু ততঃ স্থূল-ধারণাতো জিতং মনঃ।
সর্ব্বসাক্ষিণি সর্ব্বেশে বিষ্ণৌ ধার্য্যমিতীর্য্যতে॥ (১)
দৃশ্যালম্বনরূপৈবমুক্তা[১] বৈরাজধারণা।
ইহোচ্যতে তু তৎসাধ্যা সর্ব্বান্তর্যামিধারণা॥ (২)

১। তত্র তাবৎ পূর্ব্বোক্তধারণায়া অবান্তরফলমাহ—এবং যা ধারণা, তয়া তুষ্টাৎ হরেঃ, পুরা প্রলয়সময়ে, নষ্টাং সৃষ্টিস্মৃতিং প্রত্যবরুধ্য লব্ধা, অপ্যয়াৎ প্রাগিদং বিশ্বং যথাসীৎ, তথা সসর্জ্জ। ব্যবসায়াত্মিকা বুদ্ধির্যস্য সঃ, অত এবামোঘা দৃষ্টির্যস্যেতি। অতস্তয়া ধারণয়া বিশ্বসৃষ্টিসামর্থ্যং ভবতি॥

২। উপাসনাফলাদপি বিরক্তস্য শুদ্ধাত্মধারণায়ামধিকারঃ, অতো বৈরাগ্যার্থং সর্ব্বং কর্ম্মফলং নিন্দতি। শাব্দং শব্দময়ং ব্রহ্ম বেদস্তস্য এষ পন্থাঃ কর্ম্মফলবোধনপ্রকারঃ। কোঽসৌ? অপার্থৈরর্থশূন্যৈরেব স্বর্গাদি-নামভিঃ সাধকস্য ধীর্ধ্যায়তি তত্তদিচ্ছাং করোতীতি যৎ। অপার্থত্বমেবাহ—তত্র মায়াময়ে পথি সুখমিতি বাসনয়া শয়ানঃ স্বপ্নান্ পশ্যন্নিব পরিভ্রমন্নর্থান্ ন বিন্দতি, তত্তল্লোকং প্রাপ্তোঽপি নিরবস্থং সুখং ন লভত ইত্যর্থঃ॥

৩। তর্হি সর্ব্বথা কর্ম্মফলত্যাগে সদ্য এব দেহপাতঃ স্যাৎ ইত্যা-শঙ্ক্যাহ—অতঃ কবির্নামসু নামমাত্রেষু ভোগ্যেষু যাবতা অর্থেন অর্থো দেহনির্ব্বাহো যস্য তথাভূতঃ স্যাৎ, অপ্রমত্তঃ তাবন্মাত্রেঽপ্যনাসক্তঃ। ব্যবসায়বুদ্ধিঃ নেদং সুখমিতি নিশ্চয়বান্, তদপি[২] তত্র তস্মিন্নর্থে, অন্যথৈব সিদ্ধে সতি, তত্র প্রযত্নে পরিশ্রমং পশ্যন্ ন যতেত॥

৪—৫। অন্যথাসিদ্ধত্বমাহ—সত্যামিতি দ্বাভ্যাম্। কশিপোঃ শয্যায়াঃ, স্বতঃসিদ্ধে বাহৌ সতি, উপবর্হণৈরুচ্ছীর্ষকৈঃ, পুরুধা বহুপ্রকারয়া,

---

১। দৃশ্যা লক্ষণরূপৈবমুক্তা (ক); ২। তদাপি (ঘ)।

অন্নপাত্র্যা ভোজনপাত্রেণ ॥ (৫) নন্থ দিক্‌সদ্ভাবো নাম নগ্নত্বমেব, বল্কলমন্নং তোয়ং বাসঃ স্থানঞ্চ যাজ্ঞাপ্রযত্নং বিনা কথং প্রাপ্যেত ? তত্রাহ—চীরাণি বস্ত্রখণ্ডানি, পরান্ বিভ্রতি পুষ্ণন্তি ফলাদিভির্যে, গুহাঃ গিরিদর্য্যঃ। নন্থ কদাচিদেষামলাভে কিং কার্য্যম্ ? তত্রাহ—অজিতো হরিঃ, উপসন্নান্ শরণাগতান্ কিং ন অবতি ন রক্ষতি ? কিং-শব্দস্থ পূর্ব্বত্রাপি সম্বন্ধঃ। উক্তঞ্চ—'ভোজনাচ্ছাদনে চিন্তাং বৃথা কুর্ব্বন্তি বৈষ্ণবাঃ। যোঽসৌ বিশ্বম্ভরো দেবঃ কথং ভক্তানুপেক্ষতে ?' ইতি। ধনেন যো দুর্ম্মদস্তেনান্ধান্ নষ্টবিবেকান্ ॥

৬। তদা তেন কিং কর্ত্তব্যম্ ? হরিস্তু সেব্য ইত্যাহ—এবং বিরক্তঃ সন্ তং ভজেত। ভজনীয়ত্বে হেতবঃ—স্বচিত্তে স্বত এব সিদ্ধঃ, যত আত্মা, অতএব যঃ প্রিয়ঃ, তস্থ চ সেবা স্থখরূপৈব। অর্থঃ সত্যঃ, ন ত্বনাত্মবন্মিথ্যা, ভগবান্ ভজনীয়গুণঃ, অনন্তঃ নিত্যঃ। য এবম্ভূতঃ, তং ভজেত। নিয়তার্থঃ নিশ্চিতস্বরূপঃ। তদনুভবানন্দেন নির্বৃতঃ সন্নিতি স্বতঃ স্থখাত্মকত্বং দর্শিতম্। কিঞ্চ, যত্র যস্মিন্ ভজনে সতি, সংসারহেতোরবিদ্যায়া উপরমো নাশো ভবতি ॥

৭। এতদেবান্যচিন্তানিন্দয়া দ্রঢ়য়তি—ক ইতি। তাং তথাভূতাং পরস্থ হরেরনুচিন্তাং ধারণামনাদৃত্য। পশূন্ কর্ম্মজড়ান্ বিনা, যথা—'পশুরেব স দেবানাম্' ইতি শ্রুতেঃ। অসতীং বিষয়চিন্তাং কো নাম কুর্য্যাৎ ? তয়া চিন্তয়া বৈতরণ্যাং পতিতম্, তত্র চ স্বকর্ম্মজান্ আধ্যাত্মিকাদিক্লেশান্, সেবমানং জনং পশ্যন্। বৈতরণী যমদ্বারস্থা নদী তত্তুল্যত্বাৎ সংস্থতির্বৈতরণী ॥

৮—১৩। তামেব ধারণাং সবিশেষমাহ—কেচিদিতি ষড়্ভিঃ। কেচিদ্‌বিরলাঃ স্বদেহস্থ অন্তর্মধ্যে যদ্‌হৃদয়ং, তত্র যোঽবকাশস্তস্মিন্ বসন্তম্ ; প্রাদেশস্তর্জ্জন্যঙ্গুষ্ঠয়োর্বিস্তারঃ, স এব মাত্রা প্রমাণং যস্তেতি

হৃদয়পরিমাণং তত্রোপচর্য্যতে। কঞ্জং পদ্মম্, রথাঙ্গং চক্রম্॥ (৯) নলিনং পদ্মম্, তদ্বৎ প্রসন্নে আয়তে দীর্ঘে ঈক্ষণে যস্য, কদম্বকুসুমস্য কিঞ্জল্কঃ কেশরস্তদ্বৎ পিশঙ্গে পীতে বাসসী যস্য, লসন্তি মহারত্নানি যেষু তানি স্বর্ণময়ানি অঙ্গদানি যস্য, স্ফুরন্তি চ তানি মহারত্নানি চ, তন্ময়ানি কিরীটকুণ্ডলানি যস্য॥ (১০) উন্নিদ্রং বিকশিতং যদ্হৃৎপঙ্কজং তস্য কর্ণিকৈবালয়ঃ স্থানং তস্মিন্, যোগেশ্বরৈরাস্থাপিতৌ পাদপল্লবৌ যস্য। শ্রীরেব লক্ষ্ম চিহ্নং তদ্‌যুক্তম্, পামাদিবিহিতো মত্বর্থীয়ো ন-প্রত্যয়ঃ। কৌস্তুভরত্নং কন্ধরায়াং যস্য ; অম্লানা লক্ষ্মীঃ শোভা যস্যাঃ তয়া বনমালয়া আচিতং ব্যাপ্তম্॥ (১১) স্নিগ্ধত্বাদিবিশিষ্টৈঃ কুন্তলৈর্বিরোচমানে আননে যো হাসঃ, তেন পেশলং সুন্দরম্॥ (১২) অদীনমুদারং যৎ লীলাহসিতং, তেন যদীক্ষণং তস্মিন্নুল্লসন্তো যে ভ্রূভঙ্গা ভ্রূবিক্ষেপাস্তৈঃ সংসূচিতো ভূর্য্যনুগ্রহো যেন ; চিন্তাময়ং চিন্তয়া আবির্ভবন্তম্॥ (১৩) তস্যৈব ধ্যানমাহ—একৈকশ ইতি। অনুভাবয়েৎ ধ্যায়েৎ। যদ্ যৎ জিতং জিতমযত্নতঃ স্ফুরিতং পাদগুল্ফাদিস্থানম্ অবয়বস্তত্তদপোহ্য ত্যক্ত্বা পরং পরং জঙ্ঘাজান্বাদি ধারয়েৎ ধ্যায়েৎ। শুধ্যতি তস্মিন্ নিশ্চলা ভবতি॥

১৪। পূর্ব্বোক্তবৈরাজধারণায়া এতদ্ধারণাঙ্গত্বমাহ—যাবদিতি। পরে ব্রহ্মাদয়োঽবরে কনিষ্ঠা যস্মাৎ। কুতঃ? বিশ্বেশ্বরে দ্রষ্টরি, ন তু দৃশ্যে, চৈতন্যঘনত্বাৎ। ভক্তিযোগঃ প্রেমলক্ষণঃ। ক্রিয়াবসানে আবশ্যক-কর্ম্মানুষ্ঠানানন্তরম্। অনেন কর্ম্মাপি ভক্তিযোগপর্য্যন্তমেবেত্যুক্তম্। প্রযতো নিত্যতৎপরঃ॥

১৫—১৯। এবং তাবদাসন্নমৃত্যোঃ পুংসঃ কৃত্যমুক্তম্। ইদানীং তস্যৈব স্বয়ং দেহং ত্যক্তুমিচ্ছতঃ কৃত্যমাহ—স্থিরমিতি সার্দ্ধৈশ্চতুর্ভিঃ। অঙ্গ! হে রাজন্! এবম্ভূতো যতির্যদা ইমং লোকং দেহং জিহাসুঃ

হাতুমিচ্ছতি, তদা দেশে পুণ্যক্ষেত্রে, কালে চ উত্তরায়ণাদৌ, মনো ন সজ্জয়েৎ সঙ্গং ন প্রাপয়েৎ। ন দেশকালৌ যোগিনঃ সিদ্ধিহেতুঃ, কিন্তু যোগ এবেতি দৃঢ়নিশ্চয়ো ভূত্বা স্থিরং সুখকরঞ্চাসনমাস্থিতঃ প্রাণান্ ইন্দ্রিয়াণি নিযচ্ছেদিত্যর্থঃ॥ (১৬) তদ্ গৃহীতবিষয়ং মনো বুদ্ধ্যা নিশ্চয়রূপয়া নিয়ম্য তন্মাত্রং কৃত্বা, এতাং বুদ্ধিং ক্ষেত্রজ্ঞে বুদ্ধ্যাদিদ্রষ্টরি নিলয়েৎ প্রবিলাপয়েৎ, তঞ্চ ক্ষেত্রজ্ঞম্ আত্মনি শুদ্ধে; তঞ্চ শুদ্ধমাত্মানম্, আত্মৈবাহমিতি, আত্মনি ব্রহ্মণি অবরুধ্য একীকৃত্য, লব্ধোপশান্তিঃ প্রাপ্তনির্বৃতিঃ সন্ কৃত্যাদ্ বিরমেৎ, ততঃ পরং প্রাপ্যাভাবাৎ॥ (১৭) তদেবাহ—ন যত্রেতি। যত্র আত্ম-স্বরূপে, কালো ন প্রভুঃ, কিমপি কর্ত্তুং ন সমর্থঃ, অতএব দেবা ন প্রভব ইত্যাহ—অনিমিষাং দেবানাং পরঃ প্রভুঃ কালোঽপি যত্র ন প্রভুঃ, তত্র কুতো নু দেবাঃ প্রভবঃ স্যুঃ? দেবনিয়ম্যানান্তু জগতাং প্রাণিনাং কা বার্ত্তেত্যাহ—জগতামিতি। কুতো ন প্রভবন্তীত্যপেক্ষায়াং নিরুপাধিত্বাদিত্যাহ—ন যত্রেত্যাদি; যদ্বা, জগৎকারণান্যপি ন যস্য সৃষ্ট্যাদৌ প্রভবন্তীত্যাহ—ন যত্রেতি। বিকারোঽহঙ্কারঃ॥ (১৮) নিরুপাধিত্বং কুতঃ? ইত্যত আহ—পরমিতি। যদ্যস্মাৎ অতৎ আত্মব্যতিরিক্তম্। নেতি নেতীত্যেবম্ উৎস্রষ্টুমিচ্ছবো দৌরাত্ম্যং দেহাদ্যাত্মত্বং বিসৃজ্য, অর্হস্য পূজ্যস্য শ্রীবিষ্ণোঃ পদম্, পদে পদে ক্ষণে ক্ষণে হৃদা উপগুহ্য আশ্লিষ্য নান্যস্মিন্ সৌহৃদং যেষাং তথাভূতাঃ সন্তঃ। তদ্ বৈষ্ণবং পদম্, অতএব পরং সর্ব্বতঃ শ্রেষ্ঠমামনন্তীত্যন্বয়ঃ॥ (১৯) তস্মাদিত্থং ব্রহ্মত্বেন ব্যবস্থিতো মুনিরুপরমেৎ। তু-শব্দেন 'যদি প্রযাস্যন্' ইতি বক্ষ্যমাণাৎ সকামাদ্বিশেষঃ উক্তঃ। তমাহ—বিজ্ঞায়তেঽনেনেতি বিজ্ঞানং শাস্ত্রম্, তেন জাতা দৃক্ জ্ঞানম্, তস্যা বীর্য্যং বলম্, তেন সুরন্ধিতা বিহিংসিতা আশয়া বিষয়বাসনা যস্য সঃ। ইদানীং তস্য দেহত্যাগে প্রকারমাহ—স্বপার্ষ্ণিনা পাদমূলেন,

গুদং মূলাধারম্, আপীড্য নিরুধ্য, অনিলং প্রাণম্, উন্নময়েৎ ঊর্দ্ধং নয়েৎ ; জিতঃ ক্লমো যেন ; ষট্সু স্থানেষু নাভ্যাদিষু ॥

২০। নাভ্যাং মণিপূরকে স্থিতম্, হৃদি অনাহতচক্রে অধিরোপ্য ; উরসি কণ্ঠাদধোদেশে স্থিতে বিশুদ্ধচক্রে, তমনিলম্, মনস্বী জিতচিত্তঃ। স্বতালুমূলং তস্যৈব চক্রস্যাগ্রদেশম্, ততো বহুধা গমনসম্ভবাৎ শনকৈরিত্যুক্তম্ ॥

২১। তস্মাদ্ভ্রুবোরন্তরম্ আজ্ঞাচক্রম্। নিরুদ্ধানি শ্রোত্রে নেত্রে নাসিকে মুখঞ্চেত্যেবং সপ্ত অয়নানি প্রাণমার্গা যেন সঃ। অনপেক্ষঃ ক্রমমুক্তবৎ পারমেষ্ঠ্যাদিভোগকৌতুকানপেক্ষঃ[১] মূর্দ্ধন্ মূর্দ্ধনি ব্রহ্মরন্ধ্রে নির্ভিদ্য দেহমিন্দ্রিয়াণি চ বিসৃজেৎ ॥

২২—৩১। সদ্যোমুক্তিমুক্ত্বা ক্রমমুক্তিপ্রকারমাহ—যদীতি দশভিঃ। যদি তু পারমেষ্ঠ্যং পদং প্রযাস্যন্ ভবতি, উত বৈহায়সানাং খেচরাণাং সিদ্ধানাং যৎ বিহারং ক্রীড়াস্থানম্। কীদৃশম্? অষ্ট আধিপত্যানি অণিমাদ্যৈশ্বর্য্যাণি যস্মিন্ তদপি প্রযাস্যন্। ক্ব? গুণসন্নিবায়ে গুণসমুদায়রূপে ব্রহ্মাণ্ডে সর্ব্বত্রেত্যর্থঃ। তর্হি দেহত্যাগাবসরে মনশ্চ ইন্দ্রিয়াণি চ ন ত্যজেৎ, কিন্তু তৈঃ সহৈব তত্তল্লোকভোগার্থং গচ্ছেৎ ॥ (২৩) যতঃ কর্ম্মগতিবন্ন যোগগতিঃ পরিচ্ছেন্নেত্যাহ—যোগেশ্বরাণাং ত্রিলোক্যা অন্তর্বহিশ্চ মহর্লোকাদিষু ব্রহ্মাণ্ডাদ্ বহিশ্চ গতিমাহুঃ। অত্র হেতুঃ —পবনস্যান্ত আত্মা লিঙ্গশরীরং যেষামিতি। বিদ্যা উপাসনা, তপো ভগবদ্ধর্ম্মঃ, যোগোঽষ্টাঙ্গঃ, সমাধির্জ্ঞানং, তান্ যে ভজন্তি তেষাং যা গতিস্তাম্ ॥ ২৪—৩১। তামাহ—বৈশ্বানরমিত্যষ্টভিঃ। বিহায়সা আকাশেন, তত্র চ ব্রহ্মলোকপথেন গতঃ সন্। তত্র প্রথমং বৈশ্বানরমগ্ন্যভিমানিনীং দেবতাং যাতি। কেনোপায়েন? সুষুম্নয়া নাড্যা। সা চ দেহাদ্-

১। অনপেক্ষশ্চেৎ পরং ব্রহ্ম গতঃ সন্ (ক, খ, গ)।

বহিরপি বিততাস্তীত্যাহ—শোচিষা জ্যোতির্ময্যা। বিধূতস্ত্যক্তঃ কল্কো মলং যেন সঃ, ক্বাপ্যসজ্জমান ইত্যর্থঃ। উদস্তাদুপরিষ্টাদ্ বর্ত্তমানম্, হরেঃ সম্বন্ধি তারারূপ-নারায়ণাধিষ্ঠানমিত্যর্থঃ। শৈশুমারং চক্রং পঞ্চমস্কন্ধে বক্ষ্যমাণং শিশুমারাকারং জ্যোতিশ্চক্রম্। চক্রস্থানি আদিত্যাদি-ধ্রুবান্তানি পদানি প্রযাতীত্যর্থঃ। (২৫) তদ্‌বিষ্ণোশ্চক্রং বিশ্বস্য নাভিং সূর্য্যাদ্যাশ্রয়ভূতম্। আবিষ্টলিঙ্গত্বান্নাভি-শব্দস্য ন ষণ্ডত্বম্। অতিবর্ত্ত্য অতিক্রম্য, পরতঃ স্বর্গিণাং গত্যভাবাদেক এব নির্ম্মলেন লিঙ্গশরীরেণ, ব্রহ্মবিদাং স্থানমন্যৈর্নমস্কৃতং মহর্লোকমুপৈতি। যদ্‌যস্মিন্, বিবুধা মহান্তঃ কল্পায়ুষো ভৃগ্বাদয়ঃ॥ (২৬) অথো অনন্তরং কল্পান্তে সতি, বিশ্বং ত্রৈলোক্যম্, অতিশয়েন দহ্যমানং নিরীক্ষ্য, তত্রাপ্যূষ্মপ্রাপ্তের্যৎ দ্বিপরার্দ্ধস্থায়ি, তৎ পারমেষ্ঠ্যং পদং প্রতি নির্যাতি। সিদ্ধেশ্বরৈর্জুষ্টানি ধিষ্ণ্যানি বিমানানি যস্মিন্ তৎ; উ ইতি শ্রৈষ্ঠ্যং সূচিতম্॥ (২৭) তদেবাহ—ন যত্রেতি। আর্ত্তির্দুঃখম্, উদ্বেগো ভয়ম্, কিন্তু চিত্ততো হেতোর্যদ্ দুঃখম্, অদ ঋতে তদেকং বিনা। তৎ কুতো ভবতি? অনিদংবিদাম্ ইদং ভগবতো ধ্যানমজানতাং প্রাণিনাং দুরন্তদুঃখো যঃ প্রভবো জন্ম তস্যানুদর্শনাৎ তেষাং কৃপয়া। যদ্বা, চিত্ততোদো মনঃপীড়েতি যৎ, তদ্বিনা কুতশ্চিদপি যত্র শোকাদয়ো ন সন্তীতি। তত্র চ ব্রহ্মলোকগতানাং প্রাণিনাং ত্রিবিধা গতিঃ। যে পুণ্যোৎকর্ষেণ গতাঃ, তে কল্পান্তরে পুণ্যতারতম্যেনাধিকারিণো ভবন্তি; যে তু হিরণ্যগর্ভাদ্যুপাসনাবলেন গতাঃ, তে ব্রহ্মণা সহ মুচ্যন্তে। যে তু ভগবদুপাসকাঃ, তে তু স্বেচ্ছয়া ব্রহ্মাণ্ডং ভিত্ত্বা বৈষ্ণবং পদমারোহন্তি॥ (২৮) তত্র প্রস্তুতস্য তস্য ভগবদ্ভক্তস্য ব্রহ্মাণ্ডভেদেন প্রকারমাহ—তত ইত্যাদিনা। তত্রেয়ং প্রক্রিয়া—ঈশ্বরাধিষ্ঠিতায়াঃ প্রকৃতেঃ কেনচিদংশেন মহত্তত্ত্বং ভবতি, তস্যাংশেনাহঙ্কারঃ, তস্যাংশেন শব্দতন্মাত্রদ্বারা নভঃ, তস্যাংশেন স্পর্শতন্মাত্রদ্বারা বায়ুঃ, তস্যাংশেন রূপতন্মাত্রদ্বারা

তেজঃ, তস্যাংশেন রসতন্মাত্রদ্বারা আপঃ, তদংশেন গন্ধতন্মাত্রদ্বারা পৃথ্বী, তৈশ্চ মিলিতৈশ্চতুর্দ্দশভুবনাত্মকং বিরাট্ শরীরম্। তস্য চ পঞ্চাশৎ-কোটিযোজনবিশালস্য পৃথিব্যেবাণ্ডকটাহবিশেষশব্দবাচ্যা, কোটিযোজন-বিশালং প্রথমাবরণম্; পঞ্চাশৎকোটিযোজনবিশালমিত্যেকে। ততশ্চা-বাদীনাং যে পরিণতা অংশাস্তান্যেবোত্তরোত্তরং দশগুণান্যাবরণানি। অষ্টমন্তু প্রকৃত্যাবরণং ব্যাপকমেব। তদেবং স্থিতে পৃথিব্যাদ্যাবরণভেদপ্রকারঃ কথ্যতে। ততো বিশেষং প্রতিপদ্য লিঙ্গদেহেন পৃথিব্যাত্মতাং প্রাপ্যেত্যর্থঃ। এবমুত্তরত্রাপি দ্রষ্টব্যম্। নির্ভয়ঃ কথং যাস্যামীতি শঙ্কাশূন্যঃ। তেনাত্মনা পৃথিবীরূপেণ তন্নিরন্তরা অপঃ প্রতিপদ্য। অত্বরন্ ত্বরামকুর্ব্বন্, তদাত্মত্বেঽপি ক্লেশদাহাদিশঙ্কাভাবাদ্‌যথেষ্টং ভোগান্ ভুঞ্জান ইত্যর্থঃ; এবং জ্যোতির্ম্ময়ঃ সন্। কালে ভোগাবসানে, বৃহদাত্মনো লিঙ্গং পরমাত্মমূর্ত্তিত্বেনোপাসনে যুক্তম্; যদ্বা, বেদশব্দাত্মনা তস্য প্রমাপকমিতি॥ (২৯) ইন্দ্রিয়ার্থানাং ভূতসূক্ষ্মাণামতিক্রমমাহ—ঘ্রাণেনাধিষ্ঠিতেন গন্ধমুপেত্য শ্বসনং স্পর্শনম্, নভো-গুণত্বং শব্দাত্মতাম্। প্রাণেন তত্তৎকর্ম্মেন্দ্রিয়েণ, আকূতিং তত্তৎক্রিয়াম্॥ (৩০) তদেবং স্থূল-সূক্ষ্মভূতাতিক্রমমুক্ত্বা তদাবরণভূতাহঙ্কারপ্রাপ্ত্যা মহ-দাদিপ্রাপ্তিমাহ—স যোগী বিকার্য্যং সংসাদ্য বিজ্ঞানতত্ত্বং যাতীতি পরে-ণান্বয়ঃ। বিবিধং কার্য্যমস্যেতি বিকার্য্যোঽহঙ্কারঃ, স ত্রিবিধঃ—তামসো রাজসঃ সাত্ত্বিকশ্চেতি। তত্র তামসাৎ জড়ানি ভূতসূক্ষ্মাণি জায়ন্তে, রাজসাদ্বহির্মুখানি দশেন্দ্রিয়াণি সাত্ত্বিকান্মন ইন্দ্রিয়দেবাশ্চ। তেষাং লয়শ্চ তত্তদহঙ্কারে। তত্র ভূতসূক্ষ্মাণামিন্দ্রিয়াণাঞ্চ সন্নিকর্ষং লয়স্থানং তামসং রাজসঞ্চ, মনোময়ং দেবময়ঞ্চ সাত্ত্বিকং প্রাপ্য। গত্যা এবং গমনেন, তেনাহঙ্কারেণ সহ, বিজ্ঞানতত্ত্বং মহত্তত্ত্বং যাতি। ততো গুণানাং সন্নিরোধো লয়ো যস্মিন্ তৎ প্রধানং যাতি॥ (৩১) তেনাত্মনা প্রধান-

রূপেণ আনন্দময়ঃ সন্, উপাধীনামবসানে শান্তমবিকৃতম্, আনন্দং পরমাত্মানমুপৈতি। ন বিষজ্জতে নাবর্ত্তত ইত্যর্থঃ ॥

৩২। এতে সৃতী মার্গৌ প্রকারাবিত্যর্থঃ। হে নৃপ! অনপেক্ষো 'নির্ভিদ্য মূর্দ্ধন্ বিসৃজেৎ পরং গতঃ' ইতি যা সদ্যোমুক্তিঃ, সৈকা সৃতিঃ, 'যদি প্রযাস্যন্' ইত্যাদিনা ক্রমমুক্তিশ্চ দ্বিতীয়া সৃতিশ্চ, এতে সৃতী বেদেন গীতে উক্তে, ন তু স্বোৎপ্রেক্ষিতে। তত্র 'যদা সর্ব্বে প্রমুচ্যন্তে কামা যেঽস্য হৃদি স্থিতাঃ। অথ মর্ত্ত্যোঽমৃতো ভবত্যত্র ব্রহ্ম সমশ্নুতে॥' ইতি সদ্যোমুক্তিঃ, 'তেঽর্চ্চিরভিসংভবন্তি' ইত্যাদিনা ক্রমমুক্তিশ্চ বেদেনোক্তা; যদ্বা, 'ন কর্ম্মভিস্তাং গতিমাপ্নুবন্তি' ইতি দক্ষিণমার্গস্যাপি সূচিতত্বাদেতে সৃতী ইতি দ্বিবচনম্। ত্বয়াভিপৃষ্টে 'যচ্ছ্রোতব্যম্' ইত্যাদিপ্রশ্নেন, অর্থান্মুক্তিবিষয়ে দ্বে অপি সৃতী পৃষ্টে। 'ব্রূহি যদ্বা বিপর্য্যয়ম্' ইতি চ দক্ষিণমার্গোঽপ্যর্থাৎ পৃষ্টঃ। এবং ত্বয়া চ যে পৃষ্টে, তে এতে সৃতী ইত্যন্বয়ঃ ॥

৩৩। সন্তি সংসরতঃ পুংসো বহবো মোক্ষমার্গাস্তপোযোগাদয়ঃ, সমীচীনস্ত্বয়মেবেত্যাহ—ন হীতি। যতোঽনুষ্ঠিতাদ্ভক্তিযোগো ভবেৎ, অতোঽন্যঃ শিবঃ সুখরূপো নির্ব্বিঘ্নশ্চ নাস্ত্যেব ॥

৩৪। কুত এতৎ? অত আহ—ভগবান্ ব্রহ্মা, কূটস্থঃ নির্ব্বিকারঃ একাগ্রচিত্তঃ সন্নিত্যর্থঃ, ত্রিঃ ত্রীন্ বারান্, কার্ৎস্ন্যেন সাকল্যেন, ব্রহ্ম বেদম্, অন্বীক্ষ্য বিচার্য্য, যত আত্মনি হরৌ রতির্ভবেৎ, তদেব মনীষয়া অধ্যবস্যৎ নিশ্চিতবান্ ॥

৩৫। নন্বনুভূতেঽর্থে রতির্ভবতি, অননুভূতে তু ভগবতি কথং রতিঃ স্যাৎ? তত্রাহ—ভগবান্ লক্ষিতো দৃষ্টঃ। কথম্? স্বাত্মনা ক্ষেত্রক্ষেত্রজ্ঞান্তর্যামিতয়া। কৈঃ? দৃশ্যৈর্বুদ্ধ্যাদিভিঃ। তদেব অন্তর্যামিত্বং দ্বেধা দর্শয়তি। দৃশ্যানাং জড়ানাং বুদ্ধ্যাদীনাং দর্শনং স্বপ্রকাশকং দ্রষ্টারং বিনা ন ঘটত ইত্যনুপপত্তিমুখেন লক্ষণৈঃ স্বপ্রকাশান্তর্যামিলক্ষকৈঃ, তথা

বুদ্ধ্যাদীনি কর্তৃপ্রযোজ্যানি, করণত্বাৎ। বাস্যাদিবদিতি ব্যাপ্তিমুখেনানু-মাপকৈঃ। স্বতন্ত্রশ্চ কর্ত্তেত্যেবমীশ্বরসিদ্ধিঃ॥

৩৬। যচ্ছ্রোতব্যমিত্যাদিপ্রশ্নস্য উত্তরমুপসংহরতি—তস্মাদিতি॥

৩৭। শ্রবণাদিফলমভিনয়েনাহ—পিবন্তীতি। সতামাত্মন আত্মত্বেন প্রকাশমানস্য। কথৈব অমৃতম্, বিষয়ৈর্বিদূষিতং মলিনীকৃতমাশয়ং পুনন্তি শোধয়ন্তি; তস্য চরণপদ্মান্তিকং শ্রীবিষ্ণুপদং ব্রজন্তি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে
দ্বিতীয়োঽধ্যায়ঃ॥ ২॥

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে বিষ্ণুভক্তেস্তু বৈশিষ্ট্যং শৃণ্বতো মুনেঃ।
ভক্ত্যুদ্রেকেণ তৎকর্ম্মশ্রবণাদর ঈর্য্যতে॥ (১)

১। ইদানীমন্যদেবতাভজনস্যাপি পুত্রাদিভজনবদেব তুচ্ছফলত্বেন হেয়ত্বং বক্তুং পূর্ব্বোক্তমনুবদতি—এবমিতি। মমেতি—মাম্। কদাচি-দ্দৈবযোগেন মনুষ্যত্বং প্রাপ্তেষু জীবেষু যে মনীষিণস্তেষাম্, তত্রাপি যে ম্রিয়মাণাস্তেষাং বিশেষতঃ, এবমেতৎ হরিকথাশ্রবণাদিকম্, নিগদিতং বিহিতমিত্যর্থঃ॥

২। ব্রহ্মণঃ পতিং বেদপতিং ব্রহ্মাণম্, ইন্দ্রিয়পাটবকামস্ত্বিন্দ্রম্, প্রজাকামঃ প্রজাপতীন্ দক্ষাদীন্॥

৩। মায়াং দুর্গাম্; বিভাবসুম্ অগ্নিম্। বসুকামঃ ধনার্থী। বীর্য্যং প্রভাবঃ, তৎকামঃ বীর্য্যবান্ সন্ রুদ্রান্ যজেৎ॥

৪। অন্নাদ্যং ভক্ষ্যং ভোগ্যঞ্চ[১]। অদিতেঃ সুতান্ দ্বাদশাদিত্যান্। বিশাং দেশস্থপ্রজানাম্, স্বাধীনতামিচ্ছন্ সাধ্যান্ যজেৎ ॥

৫। ইলাং পৃথ্বীম্; প্রতিষ্ঠা স্থানাদপ্রচ্যুতিঃ; রোদসী দ্যাবাভূমী ॥

৬। অপ্সরাশ্চাসৌ উর্ব্বশী চ তাম্ ॥

৭। যজ্ঞং যজ্ঞোপাধিং বিষ্ণুম্। কোষো বসুসঞ্চয়ঃ, বসুকাম ইত্যত্র ধনমাত্রমিতি ভেদঃ। দাম্পত্যমন্যোঽন্যপ্রীতিঃ, তদেবার্থো যস্য সঃ ॥

৮। ধর্ম্মার্থো ধর্ম্মকামঃ, উত্তমঃশ্লোকোপাধিং বিষ্ণুম্। তন্তুং তন্বন্, সন্তানবৃদ্ধিমিচ্ছন্। রক্ষা বাধানিবৃত্তিঃ, তৎকামঃ। পুণ্যজনান্ যক্ষান্; ওজো বলম্, তৎকামঃ; মরুদ্গণান্ দেবান্ ॥

৯। রাজ্যং রাজত্বম্, তৎকামো মনূন্ মন্বন্তরাধিপান্ দেবান্। রাজ্ঞঃ কর্ম্মরাজ্যম্, তৎকামো বিশ্বান্ দেবানিতি বিশেষঃ। অভিচরন্ শত্রু-মরণমিচ্ছন্, নির্ঋতিং রাক্ষসম্; কামকামো ভোগেচ্ছুঃ; অকামো বৈরাগ্য-কামঃ; পুরুষং পরং প্রকৃতিব্যতিরেকোপাধিমীশ্বরম্ ॥

১০। অকামঃ একান্তভক্তঃ, উক্তানুক্তসর্ব্বকামো বা; পুরুষং পূর্ণং পরং নিরুপাধিম্ ॥

১১। পূর্ব্বোক্তনানাদেবতাযজনস্যাপি সংযোগপৃথক্ত্বেন ভক্তিযোগ-ফলত্বমাহ—এতাবানিতি। ইন্দ্রাদীনপি যজতাম্, ইহ তত্তদ্যজনেন ভাগবতানাং সঙ্গতো ভগবত্যচলো ভাবো ভক্তির্ভবতীতি যৎ, এতাবানেব নিঃশ্রেয়সস্য পরমপুরুষার্থস্য উদয়ো লাভঃ, অন্যৎ তু সর্ব্বং তুচ্ছমিত্যর্থঃ ॥

১২। ভাগবতসঙ্গত ইত্যনেন সূচিতাং হরিকথারতিং স্তৌতি—জ্ঞানমিতি। যৎ যাসু কথাসু জ্ঞানং ভবতি। কীদৃশম্? আ সর্ব্বতঃ প্রতিনিবৃত্তমুপরতং গুণোর্ম্মীণাং রাগাদীনাং চক্রং সমূহো যস্মাৎ তৎ। উত

১। ভোজ্যঞ্চ (খ)।

অনন্তরং, তদ্ধেতুরাত্মপ্রসাদশ্চ। যত্র যাসু; মনঃপ্রসাদহেতুঃ গুণেষু বিষয়েষু অসঙ্গো বৈরাগ্যঞ্চ। উভয়ত্রেতি পাঠে ইহামুত্র চ গুণেম্বসঙ্গঃ। অথ কৈবল্যমিত্যেব সম্মতঃ পন্থা যো ভক্তিযোগঃ। নির্বৃতঃ শ্রবণসুখেন, অন্যত্রানির্বৃত ইতি বা। তাসু হরিকথাসু কো ন রতিং কুর্য্যাৎ?

১৩। অভিব্যাহৃতম্ উক্তম্; ঋষিং পরব্রহ্মদর্শিনম্; কবিং শব্দব্রহ্ম-নিষ্ণাতম্॥

১৪। শ্রবণেচ্ছায়াং হেতুঃ—হরিকথা এব উদর্ক উত্তরফলং যাসু, তাঃ কথাঃ, সতাং ভাগবতানাম্, সদসি সভায়াং স্যুঃ॥

১৫—১৬। এতৎ প্রপঞ্চয়তি—স বা ইতি দ্বাভ্যাম্। কৃষ্ণপূজাদি-রূপাং ক্রীড়াং যঃ স্বীকৃতবান্॥ (১৬) উরুগায়স্য গুণৈরুদারা মহত্যঃ কথাঃ স্যুঃ॥

১৭—১৯। কিঞ্চ বৃথৈব ক্ষীয়মাণমায়ুর্হরিকথয়া সফলং কুর্ব্বিত্যা-শয়েনাহ—আয়ুরিতি ত্রিভিঃ—অসৌ সূর্য্য উদন্ উদ্গচ্ছন্, অস্তমদর্শনঞ্চ যন্ গচ্ছন্, যৎ যেন, পুংসামুত্তমঃশ্লোকস্য বার্ত্তয়া ক্ষণো নীতঃ, তস্যায়ুঋ্র্তে বর্জ্জয়িত্বা, বৃথৈব হরতি॥ (১৮) ননু জীবনমেব তেষামায়ুষঃ ফলমস্তু? তত্রাহ—তরব ইতি। ননু তেষাং শ্বাসো নাস্তি? তর্হি ভস্ত্রাশ্চর্ম্মময়-কোষাঃ। ননু তাসামাহারাদিকং নাস্তি? তত্রাহ—ন খাদন্তি নাশ্নন্তি, ন মেহন্তি রেতঃসেকং মৈথুনং ন কুর্ব্বন্তি কিম্? উত অপি তমপি নরাকারং পশুং মত্বাহ—অপর ইতি॥ (১৯) তদেবাহ—শ্বাদিভিঃ সংস্তুতঃ, সদৃশত্বেন নিরূপিতঃ। যস্য কর্ণপথং কদাচিদপি নাগতঃ সঃ। অবজ্ঞাস্পদত্বাৎ শ্বভিঃ, কশ্মলবিষয়াসক্তত্বাদ্বিড়্বরাহৈগ্র্াম্যশূকরৈঃ, কণ্টকবদ্দুঃখদবিষয়াসক্তত্বাদুষ্ট্রৈঃ, ভারবাহিত্বাৎ খরৈস্তুল্য ইত্যর্থঃ॥

২০—২৪। তস্যাঙ্গানি চ নিষ্ফলানীত্যাহ—বিলে ইতি পঞ্চভিঃ। বত ইতি খেদে। ন শৃণ্বতঃ অশৃণ্বতঃ, নরস্য যে কর্ণপুটে, তে বিলে বৃথারন্ধ্রে।

ন চেদুপগায়তি তস্য জিহ্বা, অসতী দুষ্টা, দর্দ্দুরো ভেকস্তদীয়া জিহ্বেব ॥ (২১) পট্টবস্ত্রোষ্ণীষেণ কিরীটেন চ জুষ্টমপি শিরো যদি ন নমেৎ, তর্হি কেবলং ভার এব। শবো মৃতকস্তৎকরতুল্যো লসন্তি কাঞ্চনকঙ্কণানি যয়োস্তৌ। অপ্যর্থে বা-শব্দঃ ॥ (২২) যে নয়নে বিষ্ণোর্মূর্ত্তীর্ন নিরীক্ষেতে, তে বর্হায়িতে ময়ূরপুচ্ছনেত্রতুল্যে। ক্রমবজ্জন্ম ভজেতে ইতি তথা, বৃক্ষমূলতুল্যাবিত্যর্থঃ ॥ (২৩) নাভিলভেত অভিতো ন স্পৃশেৎ, ন ধারয়েৎ। শ্রীবিষ্ণুপদ্যাঃ শ্রীবিষ্ণুপদলগ্নায়াঃ। ন বেদেতি, অবঘ্রায় নাভিনন্দেদিত্যর্থঃ ॥ (২৪) অশ্মবৎ সারো বলং কাঠিন্যং যস্য। বিক্রিয়া-লক্ষণমাহ—অথেতি। গাত্ররুহেষু রোমসু, হর্ষস্তদুদ্গমঃ ॥

২৫। যস্মাদভক্তস্য সর্ব্বমিদং ব্যর্থম্, মনসোঽনুকূলং প্রিয়ঞ্চ ব্রূষে, অথ অতঃ সাধু পৃষ্টঃ সন্ বৈয়াসকির্নৃপতিং প্রতি যদাহ, তদভিধেহীতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে
তৃতীয়োঽধ্যায়ঃ ॥ ৩ ॥

চতুর্থোঽধ্যায়ঃ

তুর্য্যে পরীক্ষিতা পৃষ্টং সৃষ্ট্যাদি হরিচেষ্টিতম্।
শুকেন ব্রহ্মতৎপুত্র-সংবাদেনোপবর্ণ্যতে ॥ (১)

১—৪। রাজ্ঞঃ প্রশ্নং কথয়িতুং তস্য প্রাক্তনীং স্থিতিমাহ চতুর্ভিঃ। বৈয়াসকেঃ শুকস্য, ইতি এবম্ভূতম্, আত্মনস্তত্ত্বস্য নিশ্চয়ো যস্মাৎ, তদ্বচ উপধার্য্য আকলয্য সতীং শুদ্ধাং 'কৃষ্ণ এব সেব্যো নান্যঃ' ইত্যেবম্ভূতাম্ ॥ (২) আত্মা দেহঃ; পশবো গজাদয়ঃ ॥ (৩) ইমমেবার্থং হরিলীলা-

লক্ষণম্ ॥ (৪) সংস্থাং মৃত্যুম্। ত্রৈবর্গিকং ধর্ম্মার্থকামপ্রধানম্, সংন্যস্ত ত্যক্ত্বা, আত্মভাবং পরমপ্রেম্ণা ভগবদাত্মত্বং গতঃ প্রাপ্তঃ সন্ পপ্রচ্ছ ॥

৫। মহ্যং মম, তমঃ অজ্ঞানং বিশীর্য্যতে নশ্যতি। তব কথয়তঃ সতঃ ; অতঃ সমীচীনম্ ॥

৬। পুনশ্চ বেদিতুমিচ্ছামি। ইদং দুর্ব্বিভাব্যমবিতর্ক্যং বিশ্বং যথা সৃজতি ॥

৭। গোপায়তি পালয়তি। সংযচ্ছতে সংহরতে। পুরুশক্তির্বহু-শক্তিমান, ক্রীড়ন্ যথা করোতি। আত্মানং ব্রহ্মাদিরূপিণং ক্রীড়য়ন্ বিকরোতি বিবিধং করোতি ॥

৯। একঃ পুরুষরূপেণ যুগপৎ, জন্মভির্ব্রহ্মাদ্যবতারৈঃ ক্রমশো বা ; যথা প্রকৃতের্গুণান্ গৃহ্লাতি ॥

১০। বিচিকিৎসিতং সন্দিগ্ধম্ ; শাব্দে ব্রহ্মণি বিচারেণ নিষ্ণাতঃ, পরস্মিন্ অনুভবেন ॥

১১। উপামন্ত্রিতঃ প্রার্থিতঃ। প্রচক্রমে দেবতাগুরু-নমস্কারাদিরূপ-মুপক্রমং কৃতবানিত্যর্থঃ ॥

১২—২৪। তদেবাহ ত্রয়োদশভিঃ। পরস্মৈ সর্ব্বোত্তমায়। তত্র হেতুঃ—ভূয়সে অপরিমিতমহিম্নে। তদ্দর্শয়তি—সতঃ প্রপঞ্চস্য উদ্ভবাদিষু নিমিত্তভূতা যা লীলা, তয়া গৃহীতং ব্রহ্মাদিরূপেণ রজআদিশক্তি-ত্রিতয়ং যেন তস্মৈ। অন্তর্ভবায় অন্তর্যামিণে। অতএব সর্ব্বান্তরত্বাৎ অনুপলক্ষ্যং বর্ত্ম যস্য তস্মৈ ॥ (১৩) বিচিত্রফলদাতৃত্বমনুস্মরন্ প্রণমতি—ভূয়ঃ পুনশ্চ নমঃ। সতাং ধর্ম্মবর্ত্তিনাং বৃজিনচ্ছিদে দুঃখহন্ত্রে ; অসতামধর্ম্মশীলানাম্, অসম্ভবায় অনুদ্ভবহেতবে ; অখিলসত্ত্বমূর্ত্তয়ে তত্তদ্দেবতাদিরূপেণ তত্তৎ-ফলদায়েত্যর্থঃ, সমগ্রসত্ত্বমূর্ত্তয় ইতি বা ; পুনরিতি পূর্ব্বোক্তোভয়বৈলক্ষণ্য-মেবাহ—পারমহংস্যে প্রত্যঙ্ নিষ্ঠারূপে, আশ্রমে ব্যবস্থিতানাং পুংসামনু-

মৃগ্যম্, অতন্নিরসনেন পুনঃ পুনর্মৃগ্যং যদাত্মতত্ত্বম্, তস্ম দাশুষে দাত্রে ॥ (১৪) সাত্বতাং ভক্তানামৃষভায় পালকায় ; কুযোগিনাং ভক্তি-হীনানাং বিদূরা কাষ্ঠা দিগপি যস্য, দুর্ব্বিজ্ঞেয়ায়েত্যর্থঃ। তদেবং বৈষম্য-প্রতীতাবপি নির্দ্দোষত্বায় অচিন্ত্যমৈশ্বর্য্যমাহ—নিরস্তং সাম্যমতিশয়শ্চ যস্য, যদপেক্ষয়া অন্যস্য সাম্যমতিশয়শ্চ নাস্তি, তেন ; রাধসা ঐশ্বর্য্যেণ ; স্বধামনি স্বস্বরূপে ব্রহ্মণি রমমাণায় ॥ (১৫-১৬) সর্ব্বসাধনেভ্যো ভক্তেঃ শ্রৈষ্ঠ্য-মনুস্মরন্ প্রণমতি—যৎকীর্ত্তনমিতি দ্বাভ্যাম্। অর্হণং পূজনম্। সুভদ্রং সুমঙ্গলং শ্রবো যশো যস্য তস্মৈ। বিচক্ষণা বিবেকিনো যস্য চরণয়োরুপ-সাদনাৎ উপসত্তের্ভজনাৎ, অন্তরাত্মনো মনসঃ, উভয়ত ইহ পরত্র চ, সঙ্গং ব্যুদস্য নিরস্য, গতক্লমাঃ প্রয়াসরহিতাঃ ॥ (১৭) ভক্তিশূন্যানাং সকল-সাধনবৈফল্যং দর্শয়ন্ নমতি—তপস্বিন ইতি। তপস্বিনো[১] যোগিনঃ ; সুমঙ্গলাঃ সদাচারাঃ। যদ্‌যস্মিন্ তপ-আত্মর্পণং বিনা। সুভদ্রশ্রবসে ইত্যস্যা-বৃত্তির্যশঃশ্রবণাদেঃ প্রাধান্যজ্ঞাপনায় ॥ (১৮) ভক্তেঃ পরমশুদ্ধিহেতুত্বং দর্শয়ন্নাহ—কিরাতাদয়ো যে পাপজাতয়ঃ, অন্যে চ যে কর্ম্মতঃ পাপরূপাস্তে, যদুপাশ্রয়া ভাগবতাস্তদাশ্রয়াঃ সন্তঃ শুধ্যন্তি। অসম্ভাবনাশঙ্কাং পরিহরতি—প্রভবিষ্ণবে প্রভবনশীলায়েতি ॥ (১৯) সর্ব্বোপাস্যত্বমনুস্মরন্ প্রার্থয়তে—স এষ আত্মবতাং ধীরাণামাত্মা, আত্মত্বেনোপাস্য ইত্যর্থঃ। ত্রয়ীময়ত্বাদি-বিশেষণৈস্তত্তন্মার্গেণোপাস্যত্বং বিবক্ষিতম্। গতব্যলীকৈর্নিষ্কপটৈর্ভক্তৈ-র্বিতর্ক্যমত্যাশ্চর্য্যেণ বীক্ষণীয়ং লিঙ্গং মূর্ত্তির্যস্য স প্রসীদতু ॥ (২০) সর্ব্ব-পালকত্বমনুস্মরন্নাহ—শ্রিয় ইতি। গতিশ্চ[২] সর্ব্বাপৎসু রক্ষকঃ ॥ (২১-২২) জ্ঞানপ্রদত্বমনুস্মরন্নাহ—যদঙ্ঘ্রীতি দ্বাভ্যাম্, যস্যাঙ্ঘ্র্যোরনুধ্যানমেব সমাধিস্তেন ধৌতয়া শোধিতয়া। যথারুচং রুচ্যনুসারেণ সগুণনির্গুণাদি-ভেদৈঃ ; যদ্বা, রুক্ বক্তৃপ্রতিভা, যথামতীত্যর্থঃ ॥ (২২) কিঞ্চ পুরা

১। মনস্বিনো (খ, ঘ) ; ২। পতিঃ (ঘ)।

কল্পাদৌ, অজস্য হৃদি সতীং সৃষ্টিবিষয়াং স্মৃতিং বিতন্বতা যেন প্রচোদিতা সতী সরস্বতী তস্য মুখতঃ কিল প্রাদুর্ভূতা। স্বানি আত্মীয়ানি লক্ষণানি শিক্ষাদ্যুক্তানি যস্যাঃ সা। ঋষীণাং জ্ঞানপ্রদানাম্, ঋষভঃ শ্রেষ্ঠঃ॥ (২৩) ইদানীং স্ববচসঃ[১] শ্রোতৃজনাহ্লাদিনীং শৃঙ্গারকরুণাদিশোভাং প্রার্থয়তে—ভূতৈরিতি। স মে বচাংসি অলঙ্কষীষ্ট অলঙ্করোতু। অন্যস্য বচসামন্যেনালঙ্কারাসম্ভবমাশঙ্ক্য তস্যান্তর্যামিতামাবিষ্করোতি—যো মহদ্ভি-র্ভূতৈরিমাঃ পুরঃ শরীরাণি সৃষ্ট্বা, অমূষু পূর্ষু অন্তর্যামিতয়া শেতে বসতি। অত্র পুরুষসমাখ্যাং প্রমাণয়তি—যদ্‌যস্মাৎ পুরুষ ইতি; অতএব য একা-দশেন্দ্রিয়পঞ্চমহাভূতরূপান্ ষোড়শ গুণান্ কলাঃ ভুঙ্‌ক্তে প্রকাশয়তি, পালয়তীতি বা। তদা আত্মনেপদমার্ষম্। তত্র হেতুঃ—যত ষোড়শানা-মাত্মা চেতয়িতা; স্বার্থে কঃ। ন ত্বত্র জীবত্বমুচ্যতে, প্রার্থনাবিরোধাৎ॥ (২৪) শ্রীব্যাসং নমস্করোতি—নম ইতি। সৌম্যা ভক্তাঃ। যস্য মুখাম্বু-রুহে আসবো মকরন্দস্তম্॥

২৫। ইদানীং প্রশ্নোত্তরতয়া ব্রহ্মনারদসংবাদং প্রস্তৌতি—এতদিতি। উৎপত্তিসময় এব বেদা গর্ভে যস্য। যৎ সাক্ষাদ্ধরির্যদাহ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে
চতুর্থোঽধ্যায়ঃ॥ ৪॥

১। স্ববাচং (ক, খ, গ)।

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে নারদেনাথ পৃষ্টঃ সৃষ্ট্যাদি বক্ত্যজঃ।
হরের্লীলাং বিরাট্সৃষ্টিং কালকর্ম্মাদিশক্তিভিঃ॥ (১)

১। 'নারদায় বিপৃচ্ছতে বেদগর্ভোঽভ্যধাৎ' ইত্যুক্তম্, তত্র নারদ-প্রশ্নমাহ—দেবদেবেতি। হে ভূতভাবন! অতএব সর্ব্বেষাং পূর্ব্বজ! অনাদে! জ্ঞায়তে অনেনেতি জ্ঞানম্, তৎসাধনং যৎ, তদ্বিজানীহি বিশেষেণ জ্ঞাপয়েত্যর্থঃ। কথম্ভূতম্? আত্মতত্ত্বং নিতরাং দৃশ্যতে যেন তৎ॥

২। উপলক্ষণভূতং বিশ্বমেবাত্মজ্ঞানসাধনম্, অতস্তদ্বিশেষং পৃচ্ছতি। যদ্রূপং যেন রূপ্যতে প্রকাশ্যতে। যদধিষ্ঠানং যদাশ্রয়ম্, যতঃ যেন সৃষ্টম্, যৎসংস্থং যস্মিন্ লীয়তে, যৎপরং যদধীনম্, যচ্চেতি যদাত্মকম্, স্বতঃ কারণতো বেত্যর্থঃ। তস্য তত্ত্বং যাথার্থ্যং তত্ত্বতো বদ॥

৩। ন জানামীতি, ন চ বক্তব্যমিত্যাহ—সর্ব্বমিতি। ভূতং জাতম্, ভব্যং জনিষ্যমাণম্, ভবৎ জায়মানম্, তেষাং প্রভুর্যতঃ, অতো বিশিষ্টেন জ্ঞানেনাবসিতং নিশ্চিতম্॥

৪—৮। আস্তামিদম্, আদৌ তাবৎ ত্বামেব কথয় ইত্যাহ—যতো বিজ্ঞানং যস্য, কস্তব বিজ্ঞানদ ইত্যর্থঃ। যদাধারঃ; কস্তবাশ্রয়ঃ? যৎপরো যদধীনঃ, যদাত্মকঃ যৎস্বরূপঃ। মম তু ত্বমেব স্বতন্ত্রঃ পরমেশ্বর ইতি বুদ্ধিঃ। তব তপশ্চরণেন তু পরাশঙ্কয়া পৃচ্ছামীত্যাহ সার্দ্ধৈশ্চতুর্ভিঃ—একঃ অসহায়ঃ॥ (৫) আত্মনি ভাবয়সে পালয়সি স্বয়মেব পরাভবম প্রাপয়ন্। অক্লমঃ শ্রমরহিতঃ। যথোর্ণনাভিরাত্মন এব শক্তিমবষ্টভ্য সৃজতি, তদ্বৎ॥

(৬) তস্মাদহন্ত অস্মিন্ বিশ্বস্মিন্, পরমুত্তমম্, অপরমধমম্, সমং মধ্যমং সমানঞ্চ; তত্রাপি নাম মনুষ্যাদি, রূপং দ্বিপদত্বাদি, গুণঃ শুক্লত্বাদিঃ, তৈর্ভাব্যং সাধ্যম্; তত্রাপি সদসৎ স্থূলং সূক্ষ্মঞ্চ কিঞ্চিদপ্যন্যতো ন বেদ, কিন্তু ত্বত্ত এব সর্ব্বং ভবতীতি মন্যে॥ (৭) স তথাবিধোঽপি ভবান্ তপোঽচরদিতি যৎ, তেন নোঽস্মান্, খেদয়সে মোহয়সি। যতঃ পরাশঙ্কামীশ্বরান্তরাশঙ্কাং প্রযচ্ছসি॥ (৮) যথৈবাহং ত্বয়ানুশাসিতঃ শিক্ষিতঃ সন্ বুধ্যে বুধ্যেয়ম্, তথা বিজানীহি বিশেষেণ জ্ঞাপয়॥

৯। প্রশ্নমভিনন্দতি—বৎস! হে পুত্র! তবেদং বিচিকিৎসিতং সন্দেহঃ, তৎপূর্ব্বকপ্রশ্নোঽয়ং সম্যগিত্যর্থঃ। যতঃ কারুণিকস্য তবায়ং প্রশ্নঃ। অত্র হেতুঃ—যদ্যতঃ পরমধর্ম্মপ্রদর্শনে ভগবদ্বীর্য্যপ্রকাশনে প্রবর্ত্তিতোঽস্মি, অতস্ত্বং জিজ্ঞাসুরপি ময়ি কৃপামেব কৃতবানিত্যর্থঃ॥

১০। নন্ু ত্বমেব ভগবানিত্যুক্তং ময়া 'একঃ সৃজসি ভূতানি' ইত্যাদিনা? সত্যম্; যথা মামীশ্বরত্বেন প্রভাষসে, তদপি তব ভাষণং নাত্যন্তমনৃতম্। যতঃ কারণাৎ এতাবত এতাবৎপ্রভাবস্য ভাব এতাবত্ত্বং মেঽস্তি, কিন্তু মত্তঃ পরমীশ্বরমবিজ্ঞায় ব্রূষে; অতঃ সাদৃশ্যাৎ তবেয়ং ভ্রান্তিঃ, ন তু বুদ্ধিপূর্ব্বকমনৃতমিত্যর্থঃ; যতঃ ঈশ্বরান্মম এতাবত্ত্বং তমবিজ্ঞায় ইতি বান্বয়ঃ॥

১১—১৩। তর্হি কোঽসাবীশ্বর ইত্যপেক্ষায়াং ভক্ত্যা নমস্কুর্ব্বন্নেব তং কথয়তি ত্রিভিঃ। যেন স্বপ্রকাশেন রোচিতং প্রকাশিতমেব প্রকাশয়ামি সৃষ্ট্যাভিব্যক্তং করোমি; যথার্কাদয়শ্চৈতন্যপ্রকাশ্যমেব প্রকাশয়ন্তি। তথা চ শ্রুতিঃ—'ন তত্র সূর্য্যো ভাতি ন চন্দ্রতারকম্, নেমা বিদ্যুতো ভান্তি কুতোঽয়মগ্নিঃ? তমেব ভান্তমনুভাতি সর্ব্বং, তস্য ভাসা সর্ব্বমিদং বিভাতি॥' ইতি॥ (১২) তস্মৈ নমো ধীমহি। যস্য মায়য়া বিমোহিতাঃ সন্তো

যুষ্মদাদয়ো মাং জগদ্‌গুরুং জগৎকর্ত্তারং বদন্তি তস্মৈ॥ (১৩) যন্মায়েয়েতি, মায়াসম্বন্ধোক্তেস্তস্যা দুর্জ্জয়ত্বোক্তেশ্চ তস্যাপি কিমস্তি সংসারঃ? নৈবে-ত্যাহ—মৎকপটমসৌ জানাতীতি যস্য দৃষ্টিপথে স্থাতুং বিলজ্জমানয়েব তস্মিন্ স্বকার্য্যমকুর্ব্বত্যা অমুয়া মায়য়া বিমোহিতাঃ অস্মদাদয়ো দুর্দ্ধিয়ঃ অবিদ্যাবৃতজ্ঞানা এব কেবলং বিকত্থন্তে শ্লাঘন্তে। অনেন 'যদ্রূপম্' ইত্যস্য প্রশ্নস্যোত্তরমুক্তং ভবতি॥

১৪। তদেবং স্বস্মাদন্যং পরমেশ্বরং নিরূপ্যেদানীং 'যদধিষ্ঠানম্' ইত্যাদি-নবপ্রশ্নানাং স এবাধিষ্ঠানাদিকং সর্ব্বমিত্যুত্তরং বক্তুং তদ্ব্যতিরেকে-ণান্যস্যাসত্ত্বমাহ—দ্রব্যমিতি, দ্রব্যং মহাভূতানি উপাদানরূপাণি। কর্ম্ম জন্মনিমিত্তম্; কালস্তৎক্ষোভকঃ; স্বভাবস্তৎপরিণামহেতুঃ; জীবো ভোক্তা। বাসুদেবাৎ পরোঽন্যোঽর্থো নাস্তি, কারণাব্যতিরেকাৎ কার্য্যস্য॥

১৫—১৬। তৎ প্রপঞ্চয়তি দ্বাভ্যাম্। নারায়ণং পরং কারণং যেষাং তে। অনেনৈব শাস্ত্রযোনিত্ব-প্রতিপাদনেনেশ্বরে প্রমাণং সর্ব্বজ্ঞত্বাদিকঞ্চোক্তম্। দেবাশ্চ তদঙ্গাজ্জাতাঃ, অতো ন তদ্ব্যতিরিক্তাঃ; লোকাঃ স্বর্গাদয়স্তদানন্দাংশাঃ, মখাস্তৎসাধনভূতাঃ॥ (১৬) যোগঃ প্রাণায়ামাদিঃ, তপস্তৎসাধ্যং চিত্তৈকাগ্র্যম্, জ্ঞানং তৎসাধ্যম্, গতিস্তৎফলম্; অনেনৈতৎ সর্ব্বং তদধীনমিত্যুক্তম্॥

১৭। তর্হি ত্বং কিং করোষীত্যপেক্ষায়ামাহ—তস্য সৃজ্যমপি তেন সৃষ্টোঽহং সৃজামি, ঈক্ষয়া কটাক্ষেণ। তত্র হেতবঃ—দ্রষ্টুরিত্যাদয়ঃ॥

১৮—২০। নন্বু কুতোঽয়ং জীবেশ্বরবিভাগঃ, যতস্ত্বং প্রের্য্যঃ, স চ প্রেরকঃ স্যাৎ? ইত্যপেক্ষায়াং জীবেশ্বরবিভাগহেতুমাহ—সত্ত্বমিতি ত্রিভিঃ। নির্গুণস্যাপীশ্বরস্যৈতে ত্রয়ো গুণাঃ বধ্নন্তীত্যুত্তরেণান্বয়ঃ। কথম্ভূতাঃ? তেনৈব স্বাতন্ত্র্যেণ স্থিত্যাদ্যর্থং মায়য়া গৃহীতাঃ॥ (১৯) বস্তুতস্তু সর্ব্বদা মুক্তমপি মায়িনং মায়াবিষয়ং পুরুষং জীবং বধ্নন্তি। ক? কার্য্যমধিভূতম্,

কারণমধ্যাত্মম্, কর্ত্তা অধিদৈবম্, তেষাং ভাবস্তত্ত্বং, তস্মিন্। দ্রব্যং মহাভূতানি, জ্ঞান-শব্দেন দেবতাঃ, ক্রিয়া ইন্দ্রিয়াণি, তদাশ্রয়াস্তেষাং কারণভূতাঃ, তত্তদভিমানেন বধ্নন্তি ॥ (২০) অতঃ স এষ বশ্যমায়ঃ, এভিগু´ণৈর্লিঙ্গৈর্জীবানামাবরকৈরুপাধিভিঃ সুষ্ঠু অলক্ষিতা গতিস্তত্ত্বং যস্য সঃ, স্বৈর্ভক্তৈরেব লক্ষিতা গতির্যস্যেতি বা ॥

২১। তস্য সৃষ্টিপ্রকারমাহ—কালমিতি। কর্ম্ম জীবাদৃষ্টম্। বিবুভূষুঃ বিবিধং ভবিতুমিচ্ছুঃ ॥

২২। গুণানাং ব্যতিকরঃ ক্ষোভঃ সাম্যত্যাগঃ; পরিণামো রূপান্তরাপত্তিঃ; পুরুষ ঈশ্বরস্তেনাধিষ্ঠিতত্বং ত্রয়াণাং বিশেষণম্। মহতো মহত্তত্ত্বস্য ॥

২৩। ততো মহত্তত্ত্বাদ্ বিকুর্ব্বাণাদ্‌বিক্রিয়মাণাৎ। তস্য চ ক্রিয়াজ্ঞানশক্তিত্বাৎ ত্রিগুণত্বেঽপি রজঃসত্ত্বাভ্যামুপবৃংহিতত্বম্; অহঙ্কারস্য তু আবরকত্বাৎ তমঃপ্রধানত্বম্। অতএবাহঙ্কারকার্য্যেষু তামসমাকাশাদিকং বহু, রাজসং সাত্ত্বিকঞ্চাল্পম্। এবং তদুপাধিকেষু জীবেষ্বপি তথৈব তামসাধিক্যম্ ॥

২৪। স চ বিকুর্ব্বন্ রূপান্তরং গচ্ছন্। ত্রৈবিধ্যমেবাহ—বৈকারিকঃ সাত্ত্বিকঃ, তৈজসো রাজসঃ। যদ্ভিদা যস্য ভেদঃ। দ্রব্যশক্তিরিত্যাদীনি প্রাতিলোম্যেন ত্রয়াণাং লক্ষণানি। দ্রব্যে মহাভূতাখ্যে শক্তির্যস্য; ক্রিয়াসু ইন্দ্রিয়েষু শক্তির্যস্য; জ্ঞানেষু দেবেষু শক্তির্যস্য। হে প্রভো! বোদ্ধুং শক্ত ॥

২৫। ভূতাদেরিতি তামসস্য বিশেষণম্। নন্থ তামসাৎ অহঙ্কারাৎ প্রথমং শব্দো ভবতীতি প্রসিদ্ধম্? সত্যম্। স তু তস্য নভসো মাত্রা সূক্ষ্মং রূপম্, গুণশ্চ অসাধারণো ব্যাবর্ত্তকো ধর্ম্মঃ, শব্দদ্বারা নভ উৎপদ্যত ইত্যর্থঃ। এবমেব স্পর্শাদিষ্বপি দ্রষ্টব্যম্। শব্দস্য লক্ষণং লিঙ্গমিতি।

কুড্যাদ্যন্তরিতেন কেনচিদুচ্চৈর্গজো গজ ইত্যুক্তে যো গজদ্রষ্টা, যশ্চ তেন দৃশ্যো গজস্তয়োর্লিঙ্গং বোধকম্। লিঙ্গবিশেষণত্বাদ্যচ্ছব্দস্য ষণ্ডত্বম্ ॥

২৬। পরস্য নভসঃ কারণত্বেনান্বয়াচ্ছব্দবাংশ্চ বায়ুঃ, তস্যৈব লক্ষণম্—প্রাণো দেহধারণম্, ওজঃসহোবলানি ইন্দ্রিয়মনঃশরীরাণাং পাটবানি, তেষাং হেতুরিত্যর্থঃ ॥

২৭। উদপদ্যত উৎপন্নম্; স্বতো রূপবৎ তেজঃ বায়ুনভসোঃ কারণভূতয়োরন্বয়াৎ স্পর্শশব্দবচ্চ। এবং নভসঃ পরান্বয়াধিক্যাদ্গুণাধিক্যম্ ॥

২৮। ঘোষঃ—শব্দঃ ॥

২৯। বিশেষঃ পৃথ্বী। পৃথিব্যাশ্চ পরান্বয়াধিক্যাদ্গুণাধিক্যম্ ॥

৩০। মনঃশব্দেনৈব তদধিষ্ঠাতা চন্দ্রোঽপি দ্রষ্টব্যঃ। অন্যে চ দশ দেবা বৈকারিকাঃ সাত্ত্বিকাহঙ্কারকার্য্যাঃ। তানাহ—দিশশ্চ বাতশ্চ অর্কশ্চ প্রচেতাশ্চ অশ্বিনৌ চ, এতে পঞ্চ শ্রোত্রত্বক্চক্ষুজিহ্বাঘ্রাণানামধিষ্ঠাতারঃ, বহ্নিশ্চ ইন্দ্রশ্চ উপেন্দ্রশ্চ মিত্রশ্চ কশ্চ প্রজাপতিঃ, এতে পঞ্চ বাক্পাণিপাদপায়ূপস্থানাম্ ॥

৩১। যতো জ্ঞানশক্তির্বুদ্ধিঃ ক্রিয়াশক্তিঃ প্রাণশ্চ তৈজসাহঙ্কারকার্য্যৌ, অতো জ্ঞানক্রিয়াবিশেষরূপাণীন্দ্রিয়াণামপি তৈজসাদভবন্নিত্যর্থঃ। তান্যাহ—শ্রোত্রমিতি। দাঃ পাণিঃ; মেঢ্র উপস্থঃ; ক্রমস্ত্বত্র ন বিবক্ষিতঃ ॥

৩২। এবং কারণসৃষ্টিমুক্ত্বা কার্য্যসৃষ্টিমাহ—যদা এতে অসঙ্গতা অমিলিতা আসন্; অতএব যদা আয়তনস্য শরীরস্য নির্ম্মাণে ন শেকুঃ ॥

৩৩। তদা সদসত্ত্বং প্রধানগুণভাবম্ উপাদায় স্বীকৃত্য। উভয়ং সমষ্টিব্যষ্ট্যাত্মকং শরীরম্ ॥

৩৪। কালকর্ম্মস্বভাবান্ অধিষ্ঠায় স্থিতঃ। জীবয়তীতি জীবঃ—পরমাত্মা। অজীবমচেতনম্, অজীবয়ৎ চেতয়তি স্ম ॥

৩৫। নির্ভিদ্য পৃথক্কৃত্য স্থিত ইত্যর্থঃ ॥

৩৬। তদবয়বৈর্লোকরচনামাহ—যস্যেতি। কটিরিতি ঊরুমূলয়োঃ পশ্চাদ্ভাগঃ, জঘনং পুরোভাগঃ ; অধঃ সপ্তলোকান্ অতলাদীন্ ; ঊর্দ্ধং ভূরাদীন্ সপ্ত ॥

৩৭। বর্ণানাং তত উৎপত্তিং দর্শয়তি—পুরুষস্যেতি। ব্রহ্ম ব্রাহ্মণঃ মুখমিতি কার্য্যকারণয়োরভেদবিবক্ষয়োক্তম্। বাহব ইতি চ। ক্ষত্রং ক্ষত্রিয়ঃ ॥

৩৮—৩৯। ইদানীমুপাসনার্থং লোককল্পনাভেদান্ দর্শয়ন্ সপ্তলোকপক্ষমাহ দ্বাভ্যাম্। ভূর্লোকঃ পাতালমারভ্য পদ্ভ্যাং কটিপর্য্যন্তাভ্যাম্॥ (৩৯) স্তনদ্বয়াদিতি উপাসনার্থত্বাৎ লোকয়োরূর্দ্ধাধোভাববৈপরীত্যং ন দোষঃ। যদ্বা, স্তনৎ শব্দং কুর্ব্বৎ যদোষ্ঠদ্বয়ং তস্মাদিত্যর্থঃ। ব্রহ্মলোকো বৈকুণ্ঠাখ্যঃ, স তু সনাতনো নিত্যঃ, ন তু সৃজ্যপ্রপঞ্চান্তর্বর্ত্তীত্যর্থঃ ॥

৪০—৪১। ইদানীং চতুর্দ্দশলোকপক্ষং দর্শয়তি। তত্র জঘনাদিভিঃ ভূরাদয়ঃ পূর্ব্বোক্তা এব সপ্ত। কট্যাদিভিরধঃ সপ্ত লোকানাহ—তৎকট্যামিতি দ্বাভ্যাম্। শুদ্ধং, হরিভক্তনিবাসত্বাৎ ॥

৪২। ত্রিলোকপক্ষমাহ—ভূর্লোকঃ পাতালাদিসহিতঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে
পঞ্চমোঽধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠে বিরাড়্বিভূতিশ্চ প্রোক্তাধ্যাত্মাদিভেদতঃ।
দৃঢ়ীকৃতঞ্চ পূর্ব্বোক্তং সর্ব্বং পুরুষসূক্ততঃ॥ (১)

১। ইদানীং বৈরাজস্য বিভূতিঃ সপ্রপঞ্চমনুবর্ণ্যতে। বাচামস্মদাদি-বাগিন্দ্রিয়াণাং তদধিষ্ঠাতুর্বহ্নেশ্চ তস্য মুখং ক্ষেত্রমুৎপত্তিস্থানম্। ছন্দসাং গায়ত্র্যাদীনাং সপ্তানাং তস্য ধাতবঃ ত্বগাদয়ঃ ক্ষেত্রম্। হব্যং দেবানামন্নম্, কব্যং পিতৃণামন্নম্, অমৃতং তদুভয়শেষো মনুষ্যাণাম্, তেষামন্নানাং; সর্ব্বরসস্য চ মধুরাদেঃ ষড়্বিধস্য, চকারাদস্মদাদিরসনেন্দ্রিয়স্য তদধিষ্ঠাতুর্বরুণস্য চ; এতস্য জিহ্বা ক্ষেত্রম্। এবং সর্ব্বত্রানুক্তমূন্নেয়ম্॥

২। সর্ব্বাসূনামস্মদাদিপ্রাণানাং তস্য নাসে নাসারন্ধ্রে পরমায়ণে উত্তমক্ষেত্রে। মোদপ্রমোদয়োশ্চ সামান্যবিশেষগন্ধয়োর্ঘ্রাণেন্দ্রিয়ং পর-ময়নম্॥

৩। রূপাণাং তেজসাং রূপপ্রকাশকানাঞ্চ চক্ষুরিন্দ্রিয়ম্। অক্ষিণী নেত্রগোলকে। সর্ব্বত্র ষষ্ঠ্যন্তানাং প্রথমান্তং ক্ষেত্রং দ্রষ্টব্যম্। কর্ণৌ শ্রোত্রাধিষ্ঠানে; শ্রোত্রমিন্দ্রিয়ম্॥

৪। তস্য গাত্রং শরীরম্, বস্তূনাং যে সারাংশাস্তেষাং ভাজনং স্থানম্। অস্য ত্বক্ স্পর্শস্য বায়োশ্চেত্যর্থঃ। সর্ব্বস্য মেধস্য যজ্ঞস্য॥

৫। উদ্ভিজ্জজাতীনাং সর্ব্ববৃক্ষাণাম্; যৈর্বৃক্ষৈর্যজ্ঞঃ সম্যক্ সাধিত-স্তেষামেব বা। কেশা মেঘানাং ক্ষেত্রং, পূর্ব্বং তথোক্তেঃ, শ্মশ্রূণি বিদ্যুতাম্, পাদকরনখানি শিলালোহানামিতি সাদৃশ্যাদূহ্যম্॥

৬। ক্ষেমকর্ম্মণাং পালনকর্ত্তৄণাম্॥

৭। বিক্রমঃ পাদন্যাসঃ, ভূরাদিলোকানামাস্পদমাশ্রয়ঃ। ভূরাদি-শব্দানামব্যয়ত্বাৎ ষষ্ঠ্যা লুক্। ক্ষেমো লব্ধরক্ষণম্; শরণং ভয়াদ্রক্ষণম্, সর্ব্বেষাং কামানাং বরস্য বরণস্যাপি হরেরঙ্ঘ্রিরাস্পদম্॥

৮। বীর্য্যস্য শুক্রস্য শিশ্নোঽধিষ্ঠানম্, উপস্থস্ত্বিন্দ্রিয়ম্, প্রজাত্যানন্দঃ সন্তানার্থঃ সম্ভোগঃ, তেন যা নির্ব্বৃতিস্তাপহানিস্তস্যাঃ॥

৯। পরিমোক্ষস্য মলত্যাগস্য; পায়ুরিন্দ্রিয়ম্; গুদং স্থানম্; নির্ঋতে-রলক্ষ্যাঃ॥

১০। তমসোঽজ্ঞানস্য পশ্চিমঃ পৃষ্ঠভাগঃ। গোত্রাণাং গিরীণাম্ অস্থিসংঘাতঃ॥

১১। অব্যক্তং প্রধানম্, রসঃ অন্নাদিসারঃ, সিন্ধবঃ সমুদ্রাঃ, তেষাম্। নিধনস্য লয়স্য; উদরং পদং স্থানং বিদিতং জ্ঞানিভিঃ। মনসোঽস্মদাদি-লিঙ্গশরীরস্য॥

১২। তুভ্যং তব; কুমারাণাং সনকাদীনাম্; ভবস্য শ্রীরুদ্রস্য; আত্মা চিত্তং, পরমময়নম্॥

১৩—১৬। এবং তাবৎ পরমেশ্বরাজ্জাতং বিশ্বং ততো ন ভিন্নম্, যথা কুণ্ডলং সুবর্ণান্ন পৃথক্। 'স তু সর্ব্বনিয়ন্তা সর্ব্বপ্রকাশকো নিত্যমুক্তঃ' ইত্যর্থাদুক্তং ভবতি; এতদেব পুরুষসূক্তার্থকথনেন দ্রঢ়য়তি। তত্র 'সহস্রশীর্ষা' ইত্যর্দ্ধর্চস্য, 'ব্রাহ্মণোঽস্য মুখমাসীৎ' ইত্যাদেশ্চ ঋক্ত্রয়স্যার্থঃ পূর্ব্বাধ্যায় এব দর্শিতঃ। 'পুরুষ এবেদং সর্ব্বম্' ইত্যস্যার্থং দর্শয়তি—অহং ভবানিতি সার্দ্ধত্রিভিঃ। তে তব অগ্রজা ইমে সনকাদয়ো মরীচ্যা-দয়শ্চ॥ (১৫) জলঞ্চ স্থলঞ্চ নভশ্চ ওকাংসি যেষাং তে; নভোকস ইতি সন্ধিরার্ষঃ॥ (১৬) সর্ব্বং পুরুষ এব, ন ততঃ পৃথগিত্যর্থঃ। প্রপঞ্চেন তস্যাপরিচ্ছেদং বক্তুং 'স ভূমিম্' ইত্যস্যার্থমাহ। তেন পুরুষেণ, বিশ্বমিতি ভূমিপদস্যার্থঃ। বিতস্তিমিতি দশাঙ্গুলপদস্য; অধীতি অতিশব্দস্য,

আবৃতমিতি বৃত্বেত্যস্য। স চ বিতস্তিমধিকং ব্যাপ্য তিষ্ঠতীতি আধিক্য-মাত্রং বিবক্ষিতং, ন প্রমাণম্, অনুযোগাদপরিচ্ছিন্নত্বাচ্চ ॥

১৭। এতৎ সদৃষ্টান্তমাহ। অসৌ প্রাণ আদিত্যঃ, 'প্রাণো বা এষ আদিত্যঃ[১]' ইতি শ্রুতেঃ। স্বধিষ্ণ্যং মণ্ডলং প্রকাশয়ন্ যথা বহিশ্চ প্রকাশয়তি, এবং বিরাড়্দেহং প্রকাশয়ন্ ব্রহ্মাণ্ডমন্তর্বহিশ্চ প্রকাশয়তি ॥

১৮। নিত্যমুক্তত্বং দর্শয়িতুম্ 'উতামৃতত্বস্য' ইত্যস্যার্থমাহ—স ইতি। অভয়স্যেতি মন্ত্রগতামৃতপদব্যাখ্যা, অন্নেনেতি পদং বিভক্তিব্যত্যয়েন ব্যাচষ্টে; মর্ত্ত্যং মরণধর্ম্মকম্, অন্নং কর্ম্মফলং যস্মাদত্যগাৎ অতিক্রান্তবান্; অতো ন কেবলং সর্ব্বাত্মকঃ, কিন্তু অমৃতত্বস্য নিজানন্দস্যাপীশ্বর ইত্যর্থঃ। ননু প্রপঞ্চাত্মকস্য কুতো নিত্যমুক্তত্বমিত্যাশঙ্ক্য তৎপরিহারায় এতাবান-স্যেত্যস্যার্থমাহ—মহিমেতি। প্রপঞ্চাত্মকস্যাপ্যমৃতেশত্বমিত্যেব মহিমা দুরত্যয়ঃ অপারঃ, প্রপঞ্চানভিভূতত্বাদিতি ভাবঃ। মন্ত্রে চ এতাবানস্য মহিমা বিভূতিঃ, স তু জ্যায়ান্ মহত্তর ইতি বদতায়মেবার্থ উক্তঃ ॥

১৯। তদেবমীশ্বরো নিত্যমুক্ত ইত্যুক্তম্; তদাশ্রিতানাং ভূতানাং বন্ধমোক্ষৌ ব্যবস্থয়েতি দর্শয়ন্ 'পাদোঽস্য বিশ্বা ভূতানি' ইত্যস্যার্থমাহ—পাদেষ্বিতি। তিষ্ঠন্ত্যত্রেতি স্থিতয়ো ভূরাদিলোকাঃ, তে পাদা ইব পাদা অংশা যস্য স স্থিতিপাৎ, তস্য স্থিতিপদঃ পাদেষু অংশভূতেষু লোকেষু সর্ব্বান্ জীবান্ বিদুঃ। মন্ত্রে তু 'পাদোঽস্য বিশ্বা ভূতানি' ইতি সামানাধিকরণ্য-মধিষ্ঠানাধিষ্ঠেয়াভেদবিবক্ষয়া। পাদ ইত্যেকবচনঞ্চ সামান্যাভিপ্রায়েণেতি ব্যাখ্যাতং ভবতি। ভূতেষু ফলবৈচিত্র্যং দর্শয়ন্ 'ত্রিপাদস্যামৃতং দিবি' ইত্য-স্যার্থমাহ। অস্যেশ্বরস্য সম্বন্ধি ত্রিপাদমৃতং নিত্যসুখং দিবি ঊর্দ্ধলোকেষু ন ত্রিলোক্যামিত্যর্থঃ। তদেব ত্রিপাচ্ছব্দেনোক্তং ত্রৈবিধ্যং দর্শয়ন্নাহ—

১। অসৌ বা প্রাণ আদিত্যঃ (ক, ঘ)।

ত্রয়াণাং লোকানাং মূর্দ্ধা মহর্লোকস্তস্য মূর্দ্ধানস্তদুপরিতনলোকাস্তেষু ত্রিষু যথাক্রমমমৃতাদিকধায়ি নিহিতম্। তত্র ত্রিলোক্যাং নশ্বরমেব সুখম্; মহর্লোকস্য ক্রমমুক্তিস্থানত্বেঽপি কল্পান্তে তত্রত্যানাং স্থানত্যাগান্না-বিনাশি সুখম্; জনলোকে তু অমৃতমবিনাশি সুখম্, যাবজ্জীবং স্বস্থানা-পরিত্যাগাৎ; কিন্তু মহর্লোকবাসিনাং কল্পান্তে ত্রিলোকদাহোষ্মপীড়িতানাং তদা তত্র গমনাদক্ষেমদর্শনমস্তি, তপোলোকে তস্যাভাবাৎ ক্ষেমমেব। বক্ষ্যতি হি—'ত্রিলোক্যাং দহ্যমানায়াং শক্ত্যা সঙ্কর্ষণাগ্নিনা। যান্ত্যূষ্মণা মহর্লোকাজ্জনং ভৃগ্বাদয়োঽর্দ্দিতাঃ॥' ইতি। সত্যলোকে ত্বভয়ং মোক্ষঃ, তৎপ্রত্যাসত্তেঃ॥

২০। এতদেব বৈচিত্র্যমধিকারিভেদেনোপপাদয়ন্ ত্রিপাদূর্দ্ধ ইত্য-স্যার্থমাহ—ন প্রজায়ন্তে পুত্রাদিরূপেণেত্যপ্রজাঃ, নৈষ্ঠিকব্রহ্মচারিবনস্থ-যতয়ঃ, তেষামাশ্রমাস্ত্রিলোক্যা বহিরাসন্। গৃহমেধো গৃহস্থস্তন্তঃ, যস্মাৎ অবৃহদ্ব্রতো ব্রহ্মচর্যব্রতরহিতঃ॥

২১। অয়ঞ্চাধিকারভেদ একস্যৈবাস্থাভেদেন, ন ত্বত্যন্তভিন্ন[১]-বিষয় ইতি দর্শয়ন্ 'ততো বিষ্বঙ্' ইত্যস্যার্থমাহ—বিবিধং সুষ্ঠু অঞ্চতীতি বিষ্বঙ্ পুরুষঃ ক্ষেত্রজ্ঞঃ, সৃতী মার্গৌ দক্ষিণোত্তরৌ, বিচক্রমে চলতি স্ম। কথম্ভূতে সৃতী? সাশনানশনে ভোগাপবর্গপ্রাপ্তিসাধনভূতে। তত্র হেতুত্বেন পুনর্বিশেষণম্। যদ্ যতোঽবিদ্যা কর্ম্মরূপা একা, বিদ্যা চ তৎ-সাধনোপাসনারূপান্যা॥

২২। তদেবং বিরাড়ন্তর্বর্ত্তিনাং ফলবৈচিত্র্যমুক্ত্বা তৎকারণেশ্বরস্য তদ্বৈলক্ষণ্যং দর্শয়িতুং 'ততো বিরাড়জায়ত' ইত্যস্যার্থমাহ—যস্মাদণ্ডং জজ্ঞে, তত্র চ ভূতেন্দ্রিয়গুণাত্মকো বিরাট্ চ জজ্ঞে; স ঈশ্বরঃ, তদ্বিষ্বগ্ বিরাড়্-দেহং, দ্রব্যমন্নঞ্চাতিক্রান্তবান্, সূর্য্য ইবেতি পূর্ব্বোক্ত এব দৃষ্টান্তঃ॥

১। -ভেদ- (ক)।

২৩। নন্বেবং পুরুষ এব চেৎ সর্ব্বং, তর্হি যজ্ঞস্য তৎসাধনানাঞ্চাপৃথগ্-ভাবাদ্যজ্ঞৈঃ পুরুষারাধনং ন সিধ্যেদিত্যাশঙ্ক্য তৎপরিহায় 'যৎ পুরুষেণ হবিষা' ইত্যাদিমন্ত্রার্থং সংগৃহ্য দর্শয়তি—যদেত্যাদিনা। অস্যেতি বিরাড়্-দেহান্তর্যামিণঃ, তস্যৈব প্রকৃতত্বাৎ। নাভৌ ভবং নাভ্যং, তস্মাৎ; যজ্ঞস্য সম্ভারান্ সাধনানি নাপশ্যন্॥

২৪—২৭। তদা তেষু সম্ভারেষু সাধ্যেষু সৎসু 'পুরুষাবয়বৈরেতে সম্ভারাঃ সম্ভৃতা ময়া' ইতি চতুর্থেনান্বয়ঃ। বনস্পতয়ো যূপাঃ, দেবযজনং যজ্ঞভূমিঃ; ইদঞ্চেতি-বচনাদ্যজ্ঞার্হে স্থানে উপবিষ্টঃ কথয়তীতি গম্যতে। বহুগুণান্বিতো বসন্তাদিকালঃ॥ (২৫) বস্তূনি পাত্রাদীনি, ওষধয়ো ব্রীহ্যাদয়ঃ, স্নেহা ঘৃতাদয়ঃ, রসা মধুরাদয়ঃ, লোহানি সুবর্ণাদীনি. মৃদশ্চ, জলঞ্চ, চাতুর্হোত্রং হোত্রাদিকং কর্ম্ম॥ (২৬) নামধেয়ানি জ্যোতি-ষ্টোমাদীনি, ঋগাদীনামুক্তত্বাৎ মন্ত্রা ইতি স্বাহাকারাদয়ঃ, দেবতানামনুক্রম উদ্দেশঃ, কল্পো বৌধায়নাদি-কর্ম্মপদ্ধতিগ্রন্থঃ, 'অনেনাহং যক্ষ্যে' ইত্যেবং সঙ্কল্পঃ, তন্ত্রমনুষ্ঠানপ্রকারঃ॥ (২৭) গতয়ো বিষ্ণুক্রমাদ্যাঃ. মতয়ো দেবতাধ্যানানি, প্রায়শ্চিত্তং কৃতস্য ভগবতি সমর্পণম্॥

২৮। সম্ভৃতাঃ সম্পাদিতাঃ সম্ভারা যেন সোঽহম্, তেনৈব যজ্ঞেনৈব। অনেন যজ্ঞেন যজ্ঞমযজন্তেতি মন্ত্রার্থঃ সূচিতঃ॥

২৯—৩০। 'তেন দেবা অযজন্ত' ইত্যস্যার্থং সপ্রপঞ্চং দর্শয়তি—তত ইতি দ্বাভ্যাম্। ব্যক্তমিন্দ্রাদিরূপেণ, অব্যক্তং স্বতঃ; অনেন 'পুরুষং জাত-মগ্রতঃ' ইত্যস্যার্থো দর্শিতঃ॥ (৩০) কালে—স্বস্বাবসরে॥

৩১। যদধিষ্ঠানমিত্যেতৎপ্রশ্নোত্তরার্থমুপসংহরতি—নারায়ণ ইতি। আহিতমধিষ্ঠিতম্। ভগবত্ত্বে হেতুঃ—যঃ স্বতোঽগুণঃ, সর্গাদৌ গৃহীতা মায়য়া উরবো গুণা যেন সঃ, অস্মিন্॥

৩২। যৎপরস্ত্বমিত্যেতৎপ্রশ্নোত্তরম্ ; যদুক্তম্—'স এষ ভগবান্ বিষ্ণুঃ সর্ব্বেষাং মম চেশ্বরঃ' ইতি, তদুপসংহরতি—সৃজামীতি। পালনন্তু স্বয়মেব করোতীত্যাহ—বিশ্বমিতি। পুরুষরূপেণ বিষ্ণুরূপেণ ; ত্রিশক্তির্মায়া, তাং ধরতীতি তথা সঃ॥

৩৩। যচ্চেদং বিশ্বং যদাত্মকশ্চ ত্বমিত্যেবমাদি-সর্ব্বপ্রশ্নানাং সামান্যেনোত্তরং যদুক্তং, 'বাসুদেবাৎ পরো ব্রহ্মন্ ন চান্যোঽর্থোঽস্তি তত্ত্বতঃ' ইতি, 'পুরুষ এবেদং সর্ব্বম্' ইতি শ্রুত্যা চ যদ্দৃঢ়ীকৃতম্, তদুপসংহরতি—ইতীতি। সদসদাত্মকং কার্য্যকারণাত্মকং ভাব্যং সৃজ্যং ভগবতঃ সকাশাদন্যঃ পৃথক্ ন ভবতীত্যভিহিতম্॥

৩৪। যদুক্তম্ 'এতাবত্ত্বং যতো হি মে তমবিজ্ঞায় মামীশ্বরং প্রব্রবীষি' ইতি, তদুপপাদ্যোপসংহরতি— ন ভারতীতি। যদ্ যস্মান্মে ময়া ঔৎকণ্ঠ্যং তদ্ভক্ত্যুদ্রেকঃ, তদ্যুক্তেন হৃদা হরির্ধৃতো ধ্যাতঃ। অঙ্গ! হে নারদ! অতো মে বাঙ্মন-ইন্দ্রিয়াণাং বৃত্তয়ঃ সত্যার্থাঃ, ন তু মৎপ্রভাবেণেত্যর্থঃ॥

৩৫—৩৬। অত্র স্বানুভবমেবান্বয়ব্যতিরেকাভ্যাং প্রমাণয়তি দ্বাভ্যাম্। সোঽহং সমাম্নায়াদিভিঃ সর্ব্বোৎকৃষ্টোঽপি যোগং সমাশ্রিত্যাপি যত আত্মনো মম সম্ভবো জন্ম, তমেব ন জ্ঞাতবান্, কুতোঽন্যস্য বার্ত্তা? এতচ্চ তৃতীয়স্কন্ধে পদ্মোদ্ভবে বক্ষ্যতে॥ (৩৬) তদা সমীয়ুষাং শরণাগতানাং সংসারনিবর্ত্তকং মঙ্গলাবহং, সুসেব্যঞ্চ তস্য চরণং নতোঽস্মি। ততঃ অচিন্ত্যমহিমত্বেন ন জ্ঞাতবানস্মীতি কৈমুত্যন্যায়েনাহ—যো হীতি, স্বমায়াবিস্তারং যঃ স্বয়মপি পর্য্যগাৎ ; পরি-শব্দো নিষেধে ; এতাবান্ ইতি ন জ্ঞাতবানিত্যর্থঃ ; অপরে কুতো জানীয়ুঃ? তস্য চরণং নতোঽস্মীতি পূর্ব্বেণ সম্বন্ধঃ। ননু সর্ব্বজ্ঞঃ কথং ন জানাতি? অন্তাভাবাদিতি দৃষ্টান্তেনাহ—যথা স্বস্যান্তং নভো ন প্রাপ্নোতি, তদ্বৎ ; ন হি খপুষ্পাদর্শনং সর্ব্বজ্ঞত্বং বিহন্তীতি ভাবঃ। তথা চ বক্ষ্যতি— 'দ্যুপতয় এব তে ন যযু-

রন্তমনন্ততয়া, ত্বমপি যদন্তরা-' ইত্যাদি ; শ্রুতিশ্চ—'যোঽস্যাধ্যক্ষঃ পরমে ব্যোমন্, সোঽঙ্গ ! বেদ, যদি বা ন বেদ' ইতি ॥

৩৭—৩৮। এতৎ প্রপঞ্চয়তি—নাহমিতি দ্বাভ্যাম্। বামদেবঃ—শ্রীরুদ্রঃ। যস্য ঋতাং গতিং পরমার্থস্বরূপাম্, কিন্ত্বিদং প্রপঞ্চরূপং, তস্য মায়য়া বিনির্ম্মিতং বিচক্ষ্মহে বিদ্মঃ, তদপি আত্মসমং স্বজ্ঞানানুরূপমেব, ন তু কৃৎস্নম্। মোহিতবুদ্ধয় ইত্যয়ং তদজ্ঞানে প্রপঞ্চজ্ঞানে চ হেতুঃ ॥ (৩৮) ননু সর্ব্বেঽপি তং বর্ণয়ন্তো দৃশ্যন্তে ? তত্রাহ—যস্যেতি ॥

৩৯। অবতারকর্ম্মাণি সংক্ষেপতো দর্শয়তি—স এষ আদ্যো ভগবান, যঃ পুরুষাবতারঃ সন্ সৃষ্ট্যাদি করোতি। আত্মাত্মন্যাত্মনাত্মানমিতি কর্ত্তা অধিকরণং সাধনং কর্ম্ম চ স্বয়মেবেত্যর্থঃ। পুরুষোঽবতারঃ ; সৃষ্ট্যাদীনি চ কর্ম্মাণীতি সংক্ষেপোক্তিঃ ॥

৪০। ন যং বিদন্তি তত্ত্বেনেত্যুক্তম্ ; কিং তৎ তত্ত্বমিত্যপেক্ষায়ামাহ—বিশুদ্ধমিতি। জ্ঞানং কেবলম, সত্যং তত্ত্বম্। ঘটাদ্যাকারবৃত্তিজ্ঞানব্যবচ্ছেদার্থং বিশেষণানি। বিশুদ্ধং বিষয়াকারশূন্যম, যতঃ প্রত্যক্ সর্ব্বান্তরম্, অতএব সম্যক্ সন্দেহাদিরহিতম্। অবস্থিতং স্থিরম্, যতো নির্গুণম্ ; গুণকার্য্যং হি গুণব্যতিকরাচ্চঞ্চলং ভবতি। যদ্যপি বৃত্তিজ্ঞানমপি স্বরূপজ্ঞানমেবেতি, ন চাঞ্চল্যাদিদোষযুক্তং, তথাপ্যন্তঃকরণবৃত্তিদোষৈস্তথা তথা ভবতীতি ব্যবচ্ছিদ্যতে। এভিরেব বিশেষণৈঃ সত্যত্বমপি সমর্থিতম্। কিঞ্চ যদ্বিকারবৎ, তদসত্যং দৃষ্টম্, ন চাস্য জন্মাদয়ঃ ষড়্ বিকারাঃ সন্তীত্যাহ—অনাদ্যন্তং জন্মনাশরহিতম্, অতএব জন্মানন্তরাস্তিত্বলক্ষণোঽপি বিকারো নাস্তি, বৃদ্ধিবিপরিণামাপক্ষয়াশ্চ ন সন্তি, যতঃ পূর্ণম্। সর্ব্বত্র হেতুঃ—নিত্যমদ্বয়ম্ ; নিত্যং সর্ব্বদা দ্বৈতপ্রতীতিসময়েঽপি পরমার্থতোঽদ্বয়মিতি ॥

৪১। অত্র বিদ্বদনুভবং প্রমাণয়তি—হে ঋষে ! নারদ ! প্রশান্তাত্মেন্দ্রিয়াশয়াঃ প্রসন্নদেহেন্দ্রিয়মনসো যদা ভবন্তি, তদা বিদন্তি। অন্যদা

তদজ্ঞানে কারণমাহ—যদা তু তদেব প্রকাশমানমেবাসতাং তর্কৈর্বিপ্লুতং স্থাৎ, তদা তিরোধীয়েতেতি ॥

৪২। কল্পে কল্পে আত্মানং সৃজতীত্যুক্তং, কে তেহস্য সৃজ্যমানাস্তান্ অবতারান্ বিস্তরেণাহ—আদ্য ইতি যাবদধ্যায়সমাপ্তি। পরস্য ভূম্নঃ, পুরুষঃ প্রকৃতিপ্রবর্ত্তকঃ। যস্য সহস্রশীর্ষেত্যাদ্যুক্তো লীলাবিগ্রহঃ, স আদ্যোহ-বতারঃ। বক্ষ্যতি হি—'ভূতৈর্যদা পঞ্চভিরাত্মসৃষ্টৈঃ, পুরং বিরাজং বিরচয্য তস্মিন্। স্বাংশেন বিষ্টঃ পুরুষাভিধান,-মবাপ নারায়ণ আদিদেবঃ ॥' যচ্চোক্তম্—'বিষ্ণোস্তু ত্রীণি রূপাণি পুরুষাখ্যান্যথো বিদুঃ। প্রথমং মহতঃ স্রষ্টৃ দ্বিতীয়ন্ত্বণ্ডসংস্থিতম্। তৃতীয়ং সর্ব্বভূতস্থং তানি জ্ঞাত্বা বিমুচ্যতে ॥' ইতি। যদ্যপি সর্ব্বেষামবিশেষেণাবতারত্বমুচ্যতে, তথাপি কালশ্চ স্বভাবশ্চ সদসদিতি কার্য্যকারণরূপা[১] প্রকৃতিশ্চ, এতাঃ শক্তয়ঃ, মন আদীনি কার্য্যাণি। ব্রহ্মাদয়ো গুণাবতারাঃ, দক্ষাদয়ো বিভূতয় ইতি বিবেক্তব্যম্, মনো মহত্তত্ত্বম্, দ্রব্যং মহাভূতানি, ক্রমোহত্র ন বিবক্ষিতঃ। বিকারোহহঙ্কারঃ, গুণঃ সত্ত্বাদিঃ, বিরাট্ সমষ্টিশরীরম্, স্বরাট্ বৈরাজঃ, স্থাস্নু স্থাবরম্, চরিষ্ণু জঙ্গমঞ্চ ব্যষ্টিশরীরম্ ॥

৪৩। অহং ব্রহ্মা, ভবঃ শ্রীরুদ্রঃ, যজ্ঞো বিষ্ণুঃ, দক্ষাদয়ো যে ইমে প্রজেশাঃ, তললোকপালাঃ পাতালাদ্যধিপতয়ঃ ॥

৪৪। গন্ধর্ব্বাদীনামীশাঃ, যক্ষাদীনাং নাথাঃ। রক্ষোরগেতি সন্ধি-রার্ষঃ। ঋষীণাং পিতৃণাঞ্চ শ্রেষ্ঠাঃ, প্রেতাদীনামধীশাঃ ॥

৪৫। কিং বহুনা, যৎ কিঞ্চিদ্ভগবদাদি, তৎ সর্ব্বং পরমেব তত্ত্ব-মিত্যন্বয়ঃ। ভগবৎ—ঐশ্বর্য্যযুক্তম্; মহস্বৎ তেজোযুক্তম্; ওজঃসহসী ইন্দ্রিয়মনঃশক্তী, তদ্যুক্তম্; বলং দার্ঢ্যং দাক্ষ্যং, তদ্যুক্তম্; শ্রীঃ শোভা, হ্রীরকর্ম্মজুগুপ্সা, বিভূতিঃ সম্পত্তিঃ, আত্মা বুদ্ধিঃ, তদ্যুক্তম্; অর্ণো বর্ণঃ,

১। -কারণাত্মিকা (ঘ)।

অদ্ভুতার্ণম্ আশ্চর্য্যবর্ণমিত্যর্থঃ। রূপমেব স্বরূপম্, রূপবৎ অস্বরূপঞ্চ যৎ, তৎসর্ব্বং পরং তত্ত্বং তদ্বিভূতিরিত্যর্থঃ॥

৪৬। শুদ্ধসত্ত্বাবতারান্ বক্তুমাহ—প্রাধান্যত ইতি। অসৎকথা-শ্রবণৈর্যে কর্ণয়োঃ কষায়া মলাস্তান্ শোধয়ন্তীতি তথা তান্, সুপেশান্ সুন্দরান্, লকারলোপস্ত্বার্ষঃ। হে ঋষে! তে তুভ্যম্, অনুক্রমিষ্যে তদনু-ক্রমেণামৃতং ত্বয়া আপীয়তামিত্যর্থঃ। যদ্বা, আপীয়তামিতি শত্রন্তম্, আপিবতাং কর্ণকষায়শোষানিত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে
ষষ্ঠোঽধ্যায়ঃ॥ ৬॥

সপ্তমোঽধ্যায়ঃ

সপ্তমে ভগবল্লীলাবতারা ব্রহ্মণোদিতাঃ।
নারদায় তু তৎকর্ম্ম প্রয়োজনগুণৈঃ সহ॥ (১)

১। যত্র যদা ক্ষিতিতলোদ্ধরণার্থং বারাহীং তনুং বিভ্রৎ সন্ উদ্যতোঽনন্তঃ, তদা তং সুপ্রসিদ্ধং হিরণ্যাক্ষং দংষ্ট্রয়া দদার॥

২। যজ্ঞাবতারমাহ—রুচেঃ প্রজাপতেঃ সকাশাৎ তদ্ভার্য্যায়া আকুতেঃ সূনুঃ সুতঃ সুযজ্ঞো নাম জাতঃ; স চ স্বভার্য্যায়াং দক্ষিণায়াং, সুযমান্ দেবান্ অজনয়ৎ, স এব ইন্দ্রঃ সন্ যদা আর্ত্তিমহরৎ, তদা পূর্ব্বং সুযজ্ঞ ইত্যুক্তোঽপি অনু পশ্চাৎ, মনুনা মাতামহেন, হরিরিত্যুক্তঃ। অনেন দেবোৎপাদনং লোকত্রয়ার্ত্তিহরণঞ্চ তস্য কর্ম্ম দর্শিতম্। এবং সর্ব্বত্রাবতার-স্তৎকর্ম্ম চ জ্ঞেয়ম্॥

৩। কপিলাবতারমাহ—কর্দ্দমপ্রজাপতের্গৃহে চ তদ্ভার্য্যায়াং দেব-হূত্যাং, যজ্ঞে নবভিঃ স্ত্রীভির্ভগিনীভিঃ সহ, স চ স্বমাত্রে আত্মগতিং

ব্রহ্মবিদ্যামুক্তবান্, যয়া আত্মগত্যা সা আত্মনঃ শমলং মলিনীকরণং গুণ-সঙ্গরূপং পঙ্কমস্মিন্নেব জন্মনি বিধূয় কপিলস্য গতিং মুক্তিং প্রাপ্তবতী ॥

৪। দত্তাত্রেয়াবতারমাহ—ময়া অহমেব তুভ্যং দত্ত ইতি যদ্ যত আহ, ততঃ স নাম্না দত্তো জাতঃ। স্বভক্তেভ্যো যোগৈশ্বর্য্যদানং তচ্চরিতঞ্চ দর্শয়তি—যস্য পাদপঙ্কজয়োর্যঃ পরাগস্তেন পবিত্রা দেহা যেষাং তে। উভয়ীমৈহিকীমামুষ্মিকীঞ্চ ভুক্তিমুক্তিরূপাং বা ॥

৫। কুমারাবতারমাহ—মে ময়া আদৌ যৎ তপস্তপ্তং, তস্মাৎ স্বতপসঃ মত্তপসো হেতোঃ স হরিঃ চতুঃসনোঽভূৎ। সনৎকুমারঃ, সনকঃ, সনন্দনঃ, সনাতন ইতি চত্বারঃ সনশব্দা নাম্নি যস্য সঃ। কথম্ভূতাৎ স্বতপসঃ? সনাৎ অখণ্ডিতাৎ; যদ্বা, স্বতপসঃ সনাদ্দানাৎ সমর্পণাদিত্যর্থঃ। সনু দানে। স চ পূর্ব্বকল্পস্য সংপ্লবে প্রলয়ে, বিনষ্টম্ উৎসন্নসম্প্রদায়মাত্মতত্ত্বম্ ইহ অস্মিন্ কল্পে, সম্যগ্জগাদ্ উক্তবান্। সম্যক্ত্বং দর্শয়তি—যদ্গাদিত-মাত্রমেব মুনয় আত্মন্ আত্মনি মনসি অচক্ষত সাক্ষাদপশ্যন্ ॥

৬—৭। নরনারায়ণাবতারমাহ দ্বয়েন। ধর্ম্মস্য পত্ন্যাং দক্ষদুহিতরি মূর্ত্তিসংজ্ঞায়াং, নারায়ণো নর ইতি মূর্ত্তিদ্বয়েন জাতঃ। কথম্ভূতঃ[১]? স্বঃ অসাধারণস্তপঃপ্রভাবো যস্য। তদেবাহ—অনঙ্গস্য পৃতনাঃ, দেব্যোঽপ্সরসঃ, ভগবতঃ সকাশাদাত্মনঃ স্বপ্রতিরূপা উর্ব্বশ্যাদ্যাঃ স্ত্রীর্দৃষ্ট্বা তস্য নিয়মাবলোপং ব্রতভঙ্গং ঘটয়িতুং সাধয়িতুং ন শেকুঃ; যদ্বা, আত্মনঃ স্বস্য, যো নিয়ম-স্তপোনাশনরূপস্তস্যাবলোপং তত্র দৃষ্ট্বা ভগবতস্তং ঘটয়িতুং ন শেকুরিতি। এতচ্চাখ্যানমেকাদশে ভবিষ্যতি ॥ (৭) যত্র কামবিজয়ী ক্রোধোঽপি বিভেতি, তত্র বরাকঃ কামো ন প্রভবতীতি কিং বক্তব্যমিত্যাহ—কাম-মিতি; কৃতিনঃ শ্রীরুদ্রাদয়ো রোষযুক্তয়া দৃষ্ট্যা কামং দহন্তি। রোষ-স্ত্বাত্মানং দহন্তমপি তে ন দহন্তি, ক্রোধেনাভিভূয়ন্ত ইত্যর্থঃ। ননু অহো

১। কীদৃশঃ সঃ? (খ)

সোঽয়ং রোষো যদন্তরং যন্মধ্যং প্রবিশন্নলং বিভেতি, যদ্বা, যস্থান্তর্মনঃ। কথম্ভূতম্? অমলং নির্ম্মলং শুদ্ধসত্ত্বাত্মকং প্রবিশন্নিতি॥

৮। চরিত্রেণৈব কমপ্যবতারং সূচয়তি—মাতুঃ সপত্ন্যা সুরুচ্যা, উদিতান্যুক্তানি বাক্যান্যেব, পত্রিণো বাণাস্তৈর্বিদ্ধো ধ্রুবঃ, রাজ্ঞ উত্তানপদঃ, অন্তি সমীপে, তপসে তপস্তপ্তুম্, ধ্রুবগতিং ধ্রুবপদম্, যৎ যামুপরিস্থিতামধস্তাৎ স্থিতাঃ, দিবি ভবা দিব্যাঃ সপ্তর্ষয়ঃ স্তবন্তি; যদ্বা, উপরি ভৃগ্বাদয়ঃ, অধস্তাৎ সপ্তর্ষয় ইতি॥

৯। পৃথ্ববতারমাহ—যদ্যদা ঋষিভিরর্থিত- (অবতারিতুং প্রার্থিতঃ) স্তদা বেণদেহাদবতীর্ণঃ। বেণং ত্রাত্বা অন্বর্থং পুত্র ইতি পদং নাম লেভে। 'পুন্নাম্নো নরকাদ্যস্মাৎ পিতরং ত্রায়তে সুতঃ। তস্মাৎ পুত্র ইতি প্রোক্তঃ স্বয়মেব স্বয়ম্ভুবা॥' ইতি হি পুত্রপদ-ব্যুৎপত্তিঃ। কথম্ভূতম্? দ্বিজানাং শাপবাক্যমেব বজ্রম্, তেন নিষ্প্লুষ্টং (বিপ্লুষ্টং) দগ্ধং পৌরুষং ভগমৈশ্বর্য্যঞ্চ যস্য তম্। চরিত্রান্তরমাহ—যেন চ জগতি জগদর্থং বসূনি অন্নাদি-দ্রব্যাণি দুগ্ধা॥

১০। ঋষভাবতারমাহ—অসৌ হরির্নাভেরাগ্নীধ্রপুত্রাৎ সুদেব্যাঃ সূনুরাস। নাভের্ভার্য্যায়া মেরুদেব্যা এব সুদেবীত্যপি সংজ্ঞা। জড়বদ্-যোগেন নিত্যসমাধিনা চর্য্যাম্; যদিতি যাম্। তত্র হেতুঃ—সমদৃক্; তত্রাপি হেতুঃ—স্বস্থঃ স্বস্বরূপস্থিতঃ[১]; যতঃ প্রশান্তেন্দ্রিয়ঃ। তৎ কুতঃ? যতঃ পরিতো মুক্তসঙ্গঃ॥

১১। হয়গ্রীবাবতারমাহ—সত্র ইতি। অথো ইত্যর্থান্তরে। স এব সাক্ষাদ্ভগবান্ মম ব্রহ্মণঃ সত্রে যজ্ঞে হয়শীর্ষা আস। তপনীয়ং সুবর্ণং তদ্বদ্বর্ণং যস্য, ছন্দোময়ো বেদময়ঃ, তদ্বিধেয়া যে মখাস্তন্ময়ঃ, 'অমৃতময়ঃ' ইতি বা পাঠঃ। মখৈর্যজনীয়া যে অখিলদেবাস্তদাত্মা চ; অস্য শ্বসতঃ

১। স্ববংশে স্থিতঃ (ক)।

শ্বাসং মুঞ্চতঃ ; নস্তঃ নাসাপুটতঃ, উশতীরুশত্যঃ কমনীয়া বেদলক্ষণা বাচো বভূবুঃ ॥

১২। মৎস্যাবতারমাহ—মৎস্যো ভাবিনা বৈবস্বতেন মনুনা দৃষ্টঃ। ক্ষৌণীময়ঃ পৃথ্বীময়ঃ পৃথিবীপ্রধানঃ, তদাশ্রয় ইত্যর্থঃ ; অতএব নিখিল-জীবনিকায়ানামাশ্রয়ঃ। মে মুখাদ্বিস্রংসিতান্ পতিতান্ (গলিতান্) বেদস্য মার্গান্ বেদানাদায়, তত্র যুগান্তসলিলে বিজহার। হ হর্ষে ॥

১৩। কূর্ম্মাবতারমাহ—ক্ষীরোদধৌ কচ্ছপবপুঃ সন্ গোত্রং মন্দর-গিরিং মন্থনার্থং পৃষ্ঠেন বিধৃতবান্। কদা ? অমৃতলব্ধয়ে ক্ষীরাব্ধিমুন্মথ্নতাং সতাম্। নিদ্রায়াঃ ক্ষণঃ অবসরো বা উৎসবো যস্য সঃ। কুতঃ ? তত্রাহ—অদ্রেঃ পরিবর্ত্তঃ পরিভ্রমঃ, স এব কষাণঃ কর্ষণং ঘর্ষণসুখপ্রদো যস্যাং, সা কণ্ডূর্যস্য সঃ। যদ্বা, অদ্রিপরিবর্ত্ত এব কষঃ কর্ষণং, তেন অণতি অপযাতীতি কষাণা সা কণ্ডূর্যস্য সঃ ॥

১৪। শ্রীনৃসিংহাবতারমাহ—ত্রৈপিষ্টপা দেবাস্তেষামুরুভয়ং হন্তীতি তথা স ভগবান্ (যদ্বা, ত্রৈপিষ্টপা দেবাস্তেষামপ্যুরুভয়ং যস্মাৎ তাদৃশো হাসো যস্য তৎ নৃসিংহরূপম্ ; অথবা হিরণ্যকশিপো রাজ্যকালে ত্রৈপিষ্টপা দৈত্যাস্তেষাং উরুভয়জনকো হাসো যস্মিংস্তৎ ত্রৈপিষ্টপোরু-ভয়হাসং, তচ্চ তন্নৃসিংহরূপং কৃত্বা)। কথম্ভূতং রূপম্ ? ভ্রমন্ত্যৌ ভ্রুকুটৌ দংষ্ট্রাশ্চ যস্মিংস্তৎ করালং বক্ত্রং যস্মিংস্তৎ। দৈত্যেন্দ্রং স্ফুরন্তমারাৎ সমীপ এব গদয়া উপলক্ষিতমভিপতন্তং, নখৈর্বিদদার ('উগ্রোঽপ্যনুগ্র এবায়ং স্বভক্তানাং নৃকেশরী। কেশরীব স্বপোতানাম-ন্যেষামুগ্রবিগ্রহঃ ॥') ॥

১৫—১৬। হরিসংজ্ঞকাবতারমাহ—অন্তরিতি যুগলেন। গজযূথস্য পতিঃ। তীর্থরূপং শ্রবো যশো যস্য স তীর্থশ্রবাঃ, হে তীর্থশ্রবঃ ! শ্রবণে-নৈব মঙ্গলং নামধেয়ং যস্য সঃ॥ (১৬) তদ্বচনং শ্রুত্বা শরণার্থিনং তং

হস্তে শুণ্ডায়াং প্রগৃহ্য। কিং কৃত্বা? নক্রস্য গ্রাহস্য বদনং বিনিপাট্য বিদার্য্য; তস্মাদ্‌বদনাৎ॥

১৭। বামনাবতারমাহ—অদিতেঃ সুতানাং দ্বাদশাদিত্যানাং মধ্যে অধিযজ্ঞো যজ্ঞাধিষ্ঠাতা বিষ্ণুঃ অবরজঃ কনীয়ানপি গুণৈর্জ্যায়ান্ জ্যেষ্ঠঃ। গুণানেবাহ—যদ্‌যতঃ, ইমান্ লোকান্ বিচক্রমে পাদন্যাসৈরাক্রান্তবান্। অথ প্রতিশ্রুতানন্তরমেব। তত্র হেতুঃ—বলেঃ ক্ষ্মাং বামনরূপেণ জগৃহে। নন্বীশ্বরঃ স্বয়ং কিমিতি দুর্ব্বলবৎ তথা চক্রে? তত্রাহ—যাচ্ঞাং বিনা ধর্ম্মমার্গে প্রবর্ত্তমানো ন চাল্যঃ, ঐশ্বর্য্যান্ন ভ্রংশনীয় ইতি॥

১৮। নন্থ তর্হি যাচ্ঞয়াপি চালনমনুচিতমিত্যাশঙ্ক্য ততোঽধিকঞ্চ স্ব-সালোক্যাদি দাস্যামীত্যাশয়েন হৃতবানিত্যাহ—নার্থ ইতি। যদ্বিবুধাধি-পত্যমিদানীং বলাৎ প্রাপ্তমগ্রে দীয়মানঞ্চ, অয়ং বলেঃ পুরুষার্থো ন ভবতি। কুতঃ? ইত্যত আহ—আ অপ ইতি চ্ছেদঃ। উরুক্রমস্য পাদশৌচং চরণক্ষালনরূপা অপঃ, আ সর্ব্বতো ধৃতবতঃ। ক? শিখায়াং মূর্দ্ধ্নীত্যর্থঃ। কিঞ্চ শুক্রেণ বারিতঃ শপ্তোঽপি; অঙ্গ হে নারদ! যঃ প্রতিশ্রুতং বিনা অন্যৎ ন চিকীর্ষৎ কর্ত্তুং নৈচ্ছৎ; অড়াগমাভাবস্তু আর্ষঃ। যস্তৃতীয়পাদপূরণার্থম্; হরয়ে ত্বাত্মানং দেহমপি অভিমেনে অঙ্গীকৃতবান্। এবং সদেহং ত্রৈলোক্যং শ্রদ্ধয়া দত্তবতো বিবুধাধিপত্যমর্থো ন ভবতীত্যর্থঃ॥

১৯। হংসাবতারমাহ—তুভ্যমিতি। ভৃশং বিবৃদ্ধেন ভাবেন অত্যু-দ্রিক্তয়া ভক্ত্যা পরিতুষ্টঃ সন্ ভক্তিযোগং সাধু যথা ভবতি, তথা উবাচ —জ্ঞানঞ্চেতি, জ্ঞানসাধনম্। কিং তৎ? ভাগবতং নাম। কথম্ভূতম্? তত্ত্বমেব সতত্ত্বম্, আত্মতত্ত্বদীপকম্। বিবৃদ্ধ-ভাবেনেতি বিশেষণস্য ফলমাহ—যদিতি॥

২০। তত্তন্মন্বন্তরাবতারমাহ—চক্রমিতি ; স্বতেজঃ নিজপ্রভাবমেব চক্রং সুদর্শনং বিভর্ত্তি ; চক্রবদপ্রতিহতং প্রভাবং বিভর্ত্তীত্যর্থঃ। তদেবাহ—মনুবংশপালকঃ সন্ ত্রয়াণাং মহর্জনতপোলোকানাং পৃষ্ঠে উপরি স্থিতে সত্যলোকেঽপি কমনায়াং স্বকীর্ত্তিং বিস্তারয়ন্ দুষ্টেষু রাজসু দণ্ডং বিধত্তে ॥

২১। ধন্বন্তর্য্যবতারমাহ—লোকেঽবতীর্য্য ধন্বন্তরিঃ সন্ পুরুরুজাং মহারোগিণাং লোকানাং স্বনাম্নৈব রুজো রোগান্ আশু হন্তি। স্বয়মেব কীর্ত্তিরিতি কীর্ত্ত্যতিশয়োক্তিঃ। অমৃতং মরণশূন্যমায়ুর্যস্মাৎ সঃ ; অব অবসন্নং, পূর্ব্বং দৈত্যৈঃ প্রতিরুদ্ধং যজ্ঞে ভাগঞ্চ অবরুন্ধে লভতে ; অবাপ-রুদ্ধমিতি পাঠেঽপ্যয়মেবার্থঃ। আয়ুর্বিষয়ং বেদঞ্চানুশাস্তি প্রবর্ত্তয়তি ॥

২২। পরশুরামাবতারমাহ—জগতঃ ক্ষয়ায়, বিধিনা দৈবেনোপভৃতং সংবর্দ্ধিতম্, মৃত্যবে সমর্পিতমিতি বা। ব্রাহ্মণেভ্যোঽপি দ্রুহ্যতীতি তথা, অত উজ্ঝিতঃ পন্থা বেদমার্গো যেন, অতএব নরকার্ত্তিং লিপ্সতীব ; এবম্ভূতমবনেঃ কণ্টকতুল্যং ক্ষত্রম্, অসৌ মহাত্মা হরিঃ, উদ্ধন্তি উৎপাটয়তি তীক্ষ্ণধারেণ পরশুনা ॥

২৩—২৫। শ্রীরামাবতারমাহ ত্রিভিঃ—অস্মাকং ব্রহ্মাদীনাং প্রসাদে সুমুখঃ, কলয়া ভরতাদিরূপয়া সহ, কলা মায়া তস্যা ঈশঃ, গুরোর্দশরথস্যা-জ্ঞায়াং তিষ্ঠন্ সীতালক্ষ্মণাভ্যাং সহিতো বনমাবিবেশ। যস্মিন্ বিরোধং কৃত্বা, রাবণো নাশং প্রাপ্তঃ ॥ (২৪) যস্মৈ রামায় উদধির্মার্গং দদৌ। সপদি শীঘ্রং, হরো যথা ত্রিপুরং দিধক্ষুস্তদ্বদরিপুরং লঙ্কাং দগ্ধুমিচ্ছোঃ ; ষষ্ঠী চতুর্থ্যর্থে। কথম্ভূত উদধিঃ ? ঊঢ়ং প্রাপ্তং যদ্ভয়ং, তেনাঙ্গেষু বেপঃ কম্পো যস্য ; যদ্বা, পঞ্চমীয়ম্। কথম্ভূতঃ ? উদধিং দিধক্ষো রামাদ্যদ্ভয়ং প্রাপ্তম্ তেনাঙ্গেষু কম্পো যস্যেতি। অত্র হেতুঃ—দূরে বর্ত্তমানা সুহৃৎ সীতা, তয়া নিমিত্তভূতয়া মথিতঃ ক্ষুভিতো রোষস্তেন সুশোণা অত্যরুণা

দৃষ্টিঃ, তয়া অত্যন্তং তপ্যমানং মকরাণামুরগাণাং নক্রাণাঞ্চ চক্রং যস্মিন্ ॥ (২৫) কিঞ্চ, যুদ্ধে রাবণস্য বক্ষঃস্থলস্পর্শেন রুগ্ণা ভগ্না যে মহেন্দ্রবাহস্য ঐরাবতস্য দন্তাস্তৈর্বিড়ম্বিতাঃ স্বধবলিম্না ধবলীকৃতাঃ, তত্তদ্দিক্ষু পতিতৈঃ প্রকাশিতা ইত্যর্থঃ। যা এবম্ভূতাঃ ককুভো দিশস্তা জুষতে সেবতে পালয়-তীতি বা, তথা তস্য দারহর্ত্তু রাবণস্য; 'অহো মৎসমঃ কোঽন্যোঽস্তি?' ইতি মহাগর্ব্বেণ ঊঢ়ং প্রাপ্তং হাসমসুভিঃ প্রাণৈঃ সহ সদ্যঃ শীঘ্রং বিনেষ্যতি অপনেষ্যতি। কৈঃ? ধনুষো বিস্ফূর্জ্জিতৈঃ টঙ্কারঘোষৈরেব। কথম্ভূতস্য? অধিসৈন্যে স্বপরসৈন্যমধ্যে, উচ্চরতঃ উৎকর্ষেণ বিচরতঃ। ককুজ্জয়রূঢ়হাস-মিতি পাঠে দন্তৈরুজ্জ্বলিতানাং ককুভাং জয়েন যো রূঢ়ো হাসঃ সঞ্জাতো গর্ব্বস্তমপনেষ্যতীত্যর্থঃ ॥

২৬—৩৫। শ্রীকৃষ্ণাবতারমাহ—ভূমেরিতি দশভিঃ। সুরেতরা অসুরাংশভূতা রাজানস্তেষাং বরূথৈঃ সৈন্যৈর্বিমর্দ্দিতায়া ভারেণ পীড়িতায়াঃ। কলয়া রামেণ সহ জাতঃ সন্। ননু কোঽসৌ জাতঃ? সিতকৃষ্ণৌ কেশৌ যস্য ভগবতঃ স এব সাক্ষাৎ। সিতকৃষ্ণকেশত্বং শোভৈব, ন তু বয়ঃপরিণামকৃতম্, অবিকারিত্বাৎ; যদুক্তং বিষ্ণুপুরাণে—'উজ্জহারাত্মনঃ কেশৌ সিতকৃষ্ণৌ মহাবলঃ[১]' ইতি। যচ্চ ভারতে—'স চাপি কেশৌ হরিরুচ্চকর্ত্ত[২], একং শুক্লমপরঞ্চাপি কৃষ্ণম্। তৌ চাপি কেশাবাবিশতাং যদূনাং, কুলে স্ত্রিয়ৌ রোহিণীং দেবকীঞ্চ ॥ তয়োরেকো বলভদ্রো বভূব, যোঽসৌ শ্বেতস্তস্য দেবস্য কেশঃ। কৃষ্ণো দ্বিতীয়ঃ কেশবঃ সম্বভূব, কেশো যোঽসৌ বর্ণতঃ কৃষ্ণ উক্তঃ ॥' ইতি; তচ্চ ন কেশমাত্রাবতারাভিপ্রায়ং, কিন্তু ভারাবতরণরূপং কার্য্যং কিয়দেতৎ? মৎকেশাবেব তৎ কর্ত্তুং শক্তাবিতি দ্যোতনার্থং, রামকৃষ্ণয়োর্বর্ণসূচনার্থঞ্চ কেশোদ্ধরণমিতি গম্যতে, অন্যথা তত্রৈব পূর্ব্বাপরবিরোধাপত্তেঃ, 'কৃষ্ণস্তু ভগবান্ স্বয়ম্' ইত্যেতদ্-

---

১। মহামুনে (ক, ঘ); ২। উদ্ববর্হে (ঘ)।

বিরোধাচ্চ। কথম্ভূতঃ? পরমেশ্বরতয়া জনৈরনুপলক্ষ্যো মার্গো যস্য। তর্হীশ্বরত্বে কিং প্রমাণম্? অতিমানুষকর্ম্মাণ্যথানুপপত্তিরেবেত্যাহ—আত্মনো মহিমা উপনিবধ্যতে অভিব্যজ্যতে যেষু তানি॥ (২৭) এতদেব প্রপঞ্চয়তি—তোকেনেত্যাদিনা। বালেন পূতনায়া জীবহরণম্। যদ্রিঙ্গতা জানুভ্যাং গচ্ছতা, অন্তরগতেন মধ্যপ্রাপ্তেন, দিবিস্পৃশোরত্যুচ্চয়োঃ; ইতরথা অনীশ্বরত্বে তন্ন ভবিতব্যম্॥ (২৮) বিষতোয়পীতান্[১]—বিষময়-তোয়স্য পীতং[২] পানং যেষাং তান্ পালান্, গোপাংশ্চ কৃপাদৃষ্টিসুধাবৃষ্ট্যা জীবয়িষ্যতীতি যমুনায়াং ক্রীড়ন্নুরগং কালিয়মুচ্চাটয়িষ্যতি। তচ্ছুদ্ধয়ে তস্যা হ্রদিন্যা নির্বিষত্বায়; অতিবিষবীর্য্যেণ বিলোলাশ্চঞ্চলা জিহ্বা যস্য তম্॥ (২৯) দিব্যমলৌকিকমিবেতি লোকোক্তিঃ। উন্নেষ্যতি উদ্ধরিষ্যতি, শুচিগ্রীষ্মঃ, তৎসম্বন্ধিনি বনে, শুষ্ক ইত্যর্থঃ; অতো দাবাগ্নের্হেতোরবসিতো নিশ্চিতোঽন্তকালো যস্য তম্। সবলঃ সরামঃ, অনধিগম্যং দুর্জ্ঞেয়ং বীর্য্যং যস্য সঃ। তত্র নিশি নিঃশয়ানমিতি কালিয়দমনে রাত্র্যাং যমুনা-তীরে। নেত্রে পিধাপ্য পিহিতে কারয়িত্বা ইতি; এবং সর্ব্বং মুঞ্জাটব্যামিতি দ্রষ্টব্যম্॥ (৩০) উপবধ্যতেঽনেনেতি উপবন্ধঃ, তৎসাধনং শুল্বং দাম অমুষ্য মাতা যশোদা গৃহ্ণাতি, তত্তদমুষ্য ন মাতি বন্ধনে সম্মিতং ন ভবতি, ন পর্য্যাপ্তমিত্যর্থঃ[৩]। গোপী যশোদা, সংবীক্ষ্য দৃষ্ট্বা, প্রতিবোধিতা নিজৈশ্বর্য্যং জ্ঞাপিতা আসীদিতি যৎ, তচ্চ কর্ম্ম দিব্যমিবেতি সর্ব্বত্র পূর্ব্বেণৈবান্বয়ঃ॥ (৩১) বরুণস্য পাশাদ্যদ্ভয়ং তস্মান্মোচয়িষ্যতি ময়সূনুনা ব্যোমনাম্না; অহ্নি দিবসে আপৃতং ব্যাপৃতম্, নিশি শয়ানমিতি চ বৈকুণ্ঠপ্রাপ্তিসাধনানুষ্ঠানাভাবো দর্শিতঃ। উপনেষ্যতি প্রাপয়িষ্যতি, গোকুলবাসিনং জনম্; স্মেত্যাশ্চর্য্যে॥ (৩২) দেবে ইন্দ্রে; পশূন্ রিরক্ষুঃ রিরক্ষিষুরিত্যর্থঃ। অনঘে শ্রম-রহিতে, একস্মিন্নেব করে সলীলং যথা স্যাৎ তথা, মহীধ্রং গোবর্দ্ধনং, ধর্ত্তা

১। -পীথান্ (ঘ); ২। পীথং (ঘ); ৩। পূর্য্যতে ইত্যর্থঃ (ঘ)।

ধারয়িষ্যতি, উচ্ছিলীন্ধ্রমুচ্ছ্রিতং ছত্রাকমিব ; সপ্ত বর্ষাণি বয়ো যস্য সঃ ॥ (৩৩) নিশি রাত্রৌ, নিশাকররশ্মিভিঃ গৌর্য্যাং ধবলায়াম্। বনে ক্রীড়ন্ কলানি মঞ্জুলানি পদানি যস্মিন্ তচ্চ, তৎ আয়তং দীর্ঘং মূর্চ্ছিতঞ্চ আলাপবিশেষযুক্তং যদ্গীতম্, তেন উদ্দীপিতঃ স্মর এব রুক্ (রোগো) যাসাম্, তাসাং গোপীনাং হর্ত্তুঃ শঙ্খচূড়স্য শিরো হরিষ্যতি ॥ (৩৪) যে চ প্রলম্বাদয়স্তে সর্ব্বে হরিণা হেতুভূতেন তদীয়ং নিলয়ং বৈকুণ্ঠমদর্শনং দর্শনাযোগ্যমলং যাস্যন্তীত্যুত্তরেণান্বয়ঃ। খরো ধেনুকঃ, দর্দ্দুর ইব দর্দ্দুরো বকঃ, ইভঃ কুবলয়াপীড়ঃ, কপির্দ্বিবিদঃ, কুজো নরকঃ ॥ (৩৫) যে চ মৃধে আত্তচাপাঃ, সমিতৌ সংগ্রামে শালন্তে শ্লাঘন্তে, তে সমিতিশালিনঃ। নন্বু প্রলম্বখরকপিবল্বলরুক্মিপ্রমুখা বলভদ্রেণ নিহতাঃ, কাম্বোজাদয়শ্চ ভীমার্জ্জুনাদিভিঃ, শম্বরঃ প্রদ্যুম্নেন, যবনো মুচুকুন্দেন, ন তু হরিণা। তত্রাহ—বলপার্থভীমেত্যাদয়ো ব্যাজাহ্বয়াঃ কপটনামানি যস্য, তেন। সপ্তোক্ষাণস্তু তেন দমিতাঃ কালান্তরে যাস্যন্তীত্যর্থঃ। এতচ্চ সর্ব্বমপি কর্ম্ম দিব্যমিব, তত্ত্বিতরথা ন ভাব্যমিতি পূর্ব্বেণৈব সম্বন্ধঃ ॥

৩৬। ব্যাসাবতারমাহ—অনুযুগং মীলিতা সঙ্কুচিতা ধীর্যেষাং, স্তোকমল্পমায়ুর্যেষাং তেষাং, স্বনিগমঃ স্বকৃতো বেদরাশিঃ, বত অহো দূরে পারং যস্যেতি দুর্গম ইত্যবমৃশ্য সত্যবত্যামাবির্ভূতঃ সন স এব হরিঃ ; বিটপশঃ শাখাভেদেন ॥

৩৭। বুদ্ধাবতারমাহ—দেবদ্বিষাং দৈত্যানাম্, নিগমবর্ত্মনি দেবমার্গে, নিষ্ঠিতানাং নিতরাং স্থিতানাম্ ; তদ্বলেন চ পূর্ভিঃ পুরীভিঃ, অদৃশ্যতূর্ভিরলক্ষ্যবেগাভিঃ ; মতের্বিমোহঃ যোগ্যতাত্যাগো যস্মাৎ, মতেঃ প্রলোভশ্চ অযুক্তস্বীকারো যস্মাৎ তং পাষণ্ডবেষং বিধায়, তেন ঔপধর্ম্ম্যং পাষণ্ডধর্ম্মম্, স্বার্থে ষ্যঙ্, বহু ভাষিষ্যত ইত্যর্থঃ ॥

৩৮। কল্ক্যবতারমাহ—যর্হি যদা সতামপ্যালয়েষু গৃহেষু হরেঃ কথা

ন স্যুঃ, ত্রৈবর্ণিকাঃ পাষণ্ডিনঃ স্যুঃ, শূদ্রাশ্চ রাজানঃ স্যুঃ, তদা কল্কিরূপেণ কলেঃ শাস্তা ভবিষ্যতি। অত্র চ ব্রহ্ম-নারদসংবাদাৎ প্রাগ্‌ভাবিনো বরাহাদয়ঃ, মন্বন্তরাবতারাস্ত ভূতা ভাবিনশ্চ ; ধন্বন্তরি-পরশুরামৌ তদা বর্ত্তেতে ; শ্রীরামাদয়স্ত ভাবিনঃ। তত্র তু ক্বচিদ্ভূতাদিনির্দ্দেশশ্ছান্দস ইতি দ্রষ্টব্যম্ ॥

৩৯। সৃষ্ট্যাদিকার্য্যভেদেন মায়াগুণাবতারবিভূতীরাহ—সর্গ ইতি। স্থানে স্থিতৌ, মখো বিষ্ণুঃ, ধর্ম্মশ্চ মখশ্চ মনবশ্চ অমরাশ্চ অবনীশাশ্চ, অন্তে সংহারে, হরো রুদ্রঃ, মন্যুবশাঃ সর্পাঃ, বহুশক্তিধারিণো ভগবত ইমা মায়াবিভূতয়ঃ ॥

৪০। ইদং ময়া সংক্ষেপেণোক্তম্, বিস্তরেণ বক্তুং হি ন কোঽপি সমর্থ ইত্যাহ—বিষ্ণোরিতি। পৃথিব্যাঃ পরমাণূনপি যো বিমমে বি-গণিতবান্, তাদৃশোঽপি কো নু বিষ্ণোর্বীর্য্যগণনাং কর্ত্তু মর্হতি। কথম্ভূতস্য ? যো বিষ্ণুঃ ত্রিপৃষ্ঠং সত্যলোকং চস্কম্ভ ধৃতবান্ তস্য। কিমিতি চস্কম্ভ ? যস্মাৎ ত্রৈবিক্রমে অস্খলতা প্রতিঘাতশূন্যেন স্বরংহসা স্বপাদবেগেন ত্রিসাম্য-রূপং সদনমধিষ্ঠানং প্রধানং তস্মাদারভ্য উরু অধিকং কম্পযানং কম্পমানম্, কম্পেন যানং যস্যেতি বা ; অতঃ কারণাচ্চস্কম্ভ। আত্রিপৃষ্ঠমিতি বা ছেদঃ ; সত্যলোকমভিব্যাপ্য যঃ সর্ব্বং ধৃতবানিত্যর্থঃ ; তথা চ মন্ত্রঃ—'বিষ্ণোর্নু কং বীর্য্যাণি প্রবোচং যঃ পার্থিবানি বিমমে রজাংসি। যোঽস্কম্ভয়দুত্তরং সধস্থং বিচংক্রমাণস্ত্রেধোরুগায় ত্বা বিষ্ণবে॥' ইতি। অস্যার্থঃ—বিষ্ণোর্নু বীর্য্যাণি কং প্রবোচম্, কঃ প্রাবোচদিত্যর্থঃ। যঃ পার্থিবানি রজাংস্যপি বিমমে, সোঽপি। যো বিষ্ণুস্ত্রেধা বিচংক্রমাণো বিক্রমং ত্রিঃ কুর্ব্বন্ উত্তরং লোকমস্কম্ভয়দবষ্টব্ধবান্। কথম্ভূতম্ ? সধস্থম্, সহস্য সধাদেশঃ, তিষ্ঠন্তীতি স্থাঃ ; তত্রস্থৈর্দেবৈঃ সহ বর্ত্তমানমিতি ॥

৪১। এতৎ প্রপঞ্চয়তি—নান্তমিতি। পুরুষস্য যন্মায়াবলং, তস্য অন্তং ন বিদামি ন বেদ্মি। দশশতান্যাননানি যস্য, স শেষোঽপ্যস্য গুণান্ গায়ন্ অধুনাপি পারং ন সমবস্যতি ন প্রাপ্নোতি ॥

৪২। যদি কেঽপি ন বিদন্তি, তর্হি কথং মুচ্যেরন্? তৎকৃপয়ৈবেত্যাহ—যেষামিতি। দয়য়েৎ দয়াং কুর্য্যাৎ, তে চ যদি নিষ্কপটমাশ্রিতচরণা ভবন্তি, তে দুস্তরাং দেবমায়ামতিতরন্তি; চকারান্মায়াবৈভবং বিদন্তি চ। অথেতি বা পাঠঃ। প্রত্যক্ষমেব তেষাং মায়াতিতরণমিত্যাহ—নৈষামিতি। শ্বশৃগালানাং ভক্ষ্যে দেহে ॥

৪৩—৪৫। অন্তর্জ্ঞানাভাবেঽপি মায়েয়মিতি জ্ঞানং তৎকৃপয়া বহূনামস্তীত্যাহ—বেদাহমিতি ত্রিভিঃ। যূয়মিতি সনকাদীনন্তর্ভাব্য বহুত্বম্। দৈত্যবর্য্যঃ প্রহ্লাদঃ, মনুঃ স্বায়ম্ভুবঃ, তস্য পত্নী শতরূপা চ; তদাত্মজাঃ প্রিয়ব্রতোত্তানপাদৌ পুত্রৌ কন্যাশ্চ। প্রাচীনবর্হিষো বিসর্গলোপশ্ছান্দসঃ। অঙ্গো বেণপিতা ॥ (৪৪) শতধনুশ্চ অনুশ্চ; সন্ধিরার্ষঃ। রন্তিদেবা ইতি পাঠঃ সুগমঃ। ঐকপদ্যে এতৈঃ সহিতো দেবব্রত ইত্যর্থঃ ॥ (৪৫) উপেন্দ্র-দত্তঃ শুকঃ; বিভীষণাদয়ো বর্য্যা মুখ্যা যেষাং, তেঽপি বিদন্তীত্যর্থঃ ॥

৪৬। কিং বহুনা, সৎসঙ্গেন সর্ব্বেঽপি বিদন্তি ইত্যাহ—তে বা ইতি। অদ্ভুতাঃ ক্রমাঃ পাদন্যাসা যস্য হরেস্তৎপরায়ণাস্তদ্ভক্তাস্তেষাং শীলে শিক্ষা যেষাং তে, তথা যদি ভবন্তি, তর্হি যে স্ত্রীশূদ্রাদয়ঃ পাপজীবাস্তেঽপি বিদন্তীত্যর্থঃ। শ্রুতে ভগবতো রূপে ধারণা মনোনিয়মনং যেষাং তে বিদন্তীতি কিমু বক্তব্যম্?

৪৭। কিং তদ্ভগবতঃ স্বরূপম্, যস্মিন্ মনোধারণাং বিধায় মায়াং তরন্তীত্যপেক্ষয়ামাহ—শশ্বদিতি সার্দ্ধেন। যদ্ ব্রহ্মেতি বিদুর্মুনয়স্তদ্বৈ ভগবতঃ পদং স্বরূপম্। কিং তদ্ ব্রহ্ম? তদাহ—অজস্রং নিত্যঞ্চ

তৎ সুখঞ্চ বিশোকঞ্চেতি। অজস্রসুখত্বে হেতুঃ—শশ্বৎ সদা প্রশান্তম্, অতো নিত্যসুখরূপম্। বিশোকত্বে হেতুঃ—অভয়ম্। তৎ কুতঃ? যতঃ সমং ভেদশূন্যম্, অতোঽভয়ম্; 'দ্বিতীয়াদ্বৈ ভয়ং ভবতি' ইতি শ্রুতেঃ। তৎ কুতঃ? যতঃ প্রতিবোধমাত্রং জ্ঞানৈকরসম্। ননু জ্ঞানস্যাপি নীলপীতাদ্যাকারেণ চক্ষুরাদিকরণভেদেন চ ভেদো দৃশ্যতে? ন; শুদ্ধং নির্ম্মলম্। ননু দর্শিতো বিষয়করণোপরাগরূপো মলঃ? ইত্যত আহ—সদসতঃ পরং বিষয়করণসঙ্গশূন্যম্; বৃত্তেরেব তদুপরাগঃ, ন জ্ঞানস্যেতি ভাবঃ। ননু তথাপি জ্ঞাত্রা সহ ভেদঃ স্যাৎ? ন; আত্মতত্ত্বমাত্মনো জ্ঞাতুঃ স্বরূপমেব তৎ, ন ততো ভিন্নম্। ননু চ 'তন্ত্বৌপনিষদং পুরুষং পৃচ্ছামি' ইতি শব্দবোধ্যত্বপ্রতীতেঃ কুতো বোধরূপত্বম্? তত্রাহ—শব্দো ন যত্রেতি। আরোপিতভ্রমনিবৃত্তাবেব শব্দস্য ব্যাপারঃ, ন তদ্বোধ ইত্যর্থঃ। ননু ভবতু নাম নিরস্তভেদজ্ঞানরূপত্বাদ্ বিশোকত্বম্, সুখস্য তু নানা-কারকসাধ্যক্রিয়াফলত্বাৎ কথমজস্রসুখত্বং তস্যেত্যত আহ—যত্র বহু-কারকসাধ্যঃ ক্রিয়ার্থ উৎপত্ত্যাদি চতুর্ব্বিধং ক্রিয়াফলঞ্চ নাস্তি, ইন্দ্রিয়ৈ-র্জ্ঞানাংশস্যাভিব্যক্তিরিব ক্রিয়াভিরানন্দাংশস্যাভিব্যক্তিমাত্রং ক্রিয়তে, নোৎপত্ত্যাদিকমিতি ভাবঃ। ননূৎপত্ত্যাদ্যভাবেঽপি মায়ামলাপাকরণেন বিকার্য্যত্বং স্যাদেব ব্রীহীণামিব তুষাপাকরণেন? ইত্যাশঙ্ক্যাহ—মায়া অভিমুখে স্থাতুং বিলজ্জমানেব যস্মাৎ পরৈতি দূরতোঽপসরতীতি॥

৪৮। তস্মাদেবম্ভূতে ভগবতি নিয়মিতমনসাং কৃতার্থানাং ন কিমপি কৃত্যমস্তীত্যাহ—সধ্র্যঙ্ নিয়ম্যেতি; সহাঞ্চতীতি সধ্র্যক্ সহচরং মনো যং প্রতি নিয়ম্য যস্মিন্ স্থিরীকৃত্য যতয়ো যত্নশীলাঃ, কর্ত্তো ভেদস্তন্নিরাসোঽ-কর্ত্তঃ, তত্র হেতিং সাধনং জহ্যুস্ত্যজেয়ুঃ; অনুপযোগাৎ তন্নাদ্রিয়ন্ত ইত্যর্থঃ। উপযোগাভাবেন সাধনানাদরে দৃষ্টান্তঃ—নিপীয়তেঽস্মিন্নিতি নিপানং কূপঃ, তস্য খনিত্রং খননসাধনং যথা স্বরাট্ স্বয়মেব পর্জ্জন্যরূপেণ

বিরাজমান ইন্দ্রো নাদত্তে তদ্বৎ ; যদ্বা, স্বেনৈব রাজত ইতি স্বরাট্ দরিদ্রঃ, স যথা ইন্দ্রঃ সমৃদ্ধঃ সন্ কর্ম্মকারদশায়াং গৃহীতং নিপানখনিত্রং জহাতি, তদ্বদিত্যর্থঃ ॥

৪৯। এবং তাবদজস্রসুখং বিশোকং পরং ব্রহ্মৈব ভগবতঃ স্বরূপম্, তৎপ্রাপ্তাবন্যৎ প্রাপ্যং কৃত্যং বা ন কিঞ্চিদস্তীত্যুক্তম্। ইদানীং ততঃ প্রাক্ স এব সর্ব্বফলদাতা সর্ব্বকর্ম্মপ্রবর্ত্তকশ্চেত্যাহ—স এব শ্রেয়সাং ফলানাং বিভুর্দাতাপি। তত্র হেতুঃ—ভাবানাং ব্রাহ্মণাদীনাং স্বভাবৈঃ শমদমাদিভির্বিশেষণৈর্বিহিতস্য অস্য সতঃ শুভস্য কর্ম্মণো যতঃ প্রবর্ত্তকাৎ প্রসিদ্ধিঃ ; যদ্বা, ভাবানাং মহদাদীনাং স্বভাবেন পরিণামেন বিহিতস্য সতঃ কার্য্যস্য প্রসিদ্ধিঃ ; স এব স্বর্গাদীনাং দাতেত্যর্থঃ। নন্বু কর্ম্মকর্ত্তৃ-মূর্তস্য কথং স্বর্গাদি ফলং স্যাৎ? তত্রাহ—স্বারম্ভকধাতূনাং ভূতানাং বিগমে বিয়োগে সতি অনুবিশীর্য্যমাণেঽপি দেহে তত্রস্থং ব্যোমেব যস্তেন সহ ন বিশীর্য্যতে ; যতঃ অজস্তেন সহ ন জাতঃ, তস্য পুরুষস্য শ্রেয়সাং প্রভুরিত্যর্থঃ ॥

৫০। অধ্যায়ত্রয়স্যার্থমুপসংহৃত্য কথয়তি—সোঽয়ং সমাসেন সংক্ষেপেণাভিহিতঃ। তমেবাহ—সদসৎ কার্য্যং কারণঞ্চ হরেরন্যন্ন ভবতি। নন্বু হরেস্তদব্যতিরেকেণ তদ্গতবিকারপ্রসঙ্গঃ স্যাৎ? ন ; অন্যস্মাৎ কারণভূতো হরিঃ কার্য্যাদ্ব্যতিরিক্ত ইত্যর্থঃ ॥

৫১। অয়ঞ্চ বিভূতীনাং সংগ্রহ উদিতঃ ॥

৫২। যথা বর্ণিতেন নৃণাং ভক্তির্ভবিষ্যতীত্যেবং সঙ্কল্প্য সঞ্চিন্ত্য, তথা হরিলীলাপ্রাধান্যেন শ্রীভাগবতং বর্ণয়, ন তু ভক্তিরস-বিঘাতেন কেবলং তত্ত্বমিত্যর্থঃ ॥

৫৩। নন্বু লীলা মায়াশ্রয়া ; কিং তদ্বর্ণনেন? ইত্যত আহ—মায়ামিতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে সপ্তমোঽধ্যায়ঃ ॥ ৭ ॥

অষ্টমোঽধ্যায়ঃ

অষ্টমে দেহসম্বন্ধমাক্ষিপন্নীশজীবয়োঃ।
বহূন্ পরীক্ষিদাপৃচ্ছৎ পুরাণার্থান্ বুভুৎসিতান্॥ (১)

১—৩। ত্বমেতদ্বিপুলীকুর্বিত্যুক্তম্। তদেব বিপুলীকরণং পৃচ্ছতি—ব্রহ্মণেতি ত্রিভিঃ। অগুণস্য গুণাতীতস্যাপি দেববদ্দর্শনং যস্য সঃ॥ (২) নিঃসঙ্গং মনঃ শ্রীকৃষ্ণে নিবেশ্যেতি স্বপ্রযত্নো দর্শিতঃ॥ (৩) সোঽপি শ্রদ্ধয়া শৃণ্বতো নাবশ্যকঃ, ইত্যাহ—শৃণ্বত ইতি। স্বপ্রযত্নং বিনাপি ভগবান্ স্বয়মেব হৃদি বিশতি॥

৪। ভাবসরোরুহং হৃদয়কমলং প্রবিষ্টশ্চ তদ্গতং সর্ব্বং মলং ধুনোতি। সলিলস্যেতি—দ্রব্যান্তরমিশ্রণাদিনা কুম্ভস্থে জলে শোধিতে তদেব কেবলং শুধ্যতি, ন তু নদীতড়াগাদিগতম্। স চ মলঃ কুম্ভস্যান্তস্তিষ্ঠত্যেব, ন তু সর্ব্বদা বিলীয়তে; অতএব কিঞ্চিচ্চালনে পুনঃ ক্ষুভ্যতি চ। এবং তপোদানাদি প্রায়শ্চিত্তং ন সর্ব্বথা সর্ব্বেষাং সর্ব্বং পাপং ধুনোতি কিন্তু সাবশেষম্; তচ্চ কস্যচিদেব কিঞ্চিদেব। হৃদি প্রবিষ্টমাত্রস্তু শ্রীকৃষ্ণঃ সর্ব্বেষাং সর্ব্বং পাপং নিঃশেষং হরতীত্যনেন দৃষ্টান্তেনোক্তম্—সলিলস্য মলং যথা শরদিতি॥

৫। ততশ্চ কৃতার্থো ভবতীত্যাহ—ধৌতাত্মা নিষ্পাপঃ; মুক্তাঃ সর্ব্বে রাগদ্বেষাদয়ঃ পরিক্লেশা যেন, পান্থঃ প্রবাসাদাগতঃ, স্বস্য শরণং গৃহং যথা ন মুঞ্চতি, তদ্বৎ॥

৬। তদেবং শ্রবণৌৎসুক্যমাবিষ্কৃত্য সন্দিগ্ধানর্থান্ পৃচ্ছতি—অধতু-মতঃ, ধাতবো ভূতানি, তৎসম্বন্ধশূন্যস্য অস্যালৌকিকস্যাত্মনো[১] জীবস্য

১। অস্যাভৌতিকস্যাত্মনো (ঘ)।

ধাতুভির্দেহারম্ভ ইতি যৎ, এতৎ কিং যদৃচ্ছয়া নির্নিমিত্তম্, হেতুনা বা কর্ম্মাদিনা ? ভবন্তো যথাবজ্জানতে, অতঃ কথয়ন্ত্বিতি শেষঃ ॥

৭। যশ্চাসাবীশ্বরঃ সোঽপ্যেতত্তুল্যদেহবান্ প্রোক্তঃ, অতস্তস্য কো বিশেষঃ ? ইত্যাশয়েন পৃচ্ছতি—আসীদিতি সার্দ্ধেন। লোকানাং সংস্থানং রচনা, তদেব লক্ষণং স্বরূপং যস্য তৎ পদ্মং যস্যোদরাদাসীৎ, অসাবীশ্বর ইয়ত্তাযুক্তৈঃ স্বপরিমিতৈরবয়বৈরয়ং লৌকিকঃ পুরুষো যাবান্, যঃ অসংখ্য-কাবয়বযুক্তস্তাবান্ প্রোক্তঃ ; সংস্থাবান্ অবয়ববানিব চ যঃ প্রোক্তঃ। অতঃ কো বিশেষস্তস্যেতি ॥

৮। অবশ্যঞ্চ বিশেষো বাচ্য, ইত্যাহ—অজো ব্রহ্মা ভূতানাং ব্যষ্ট্যু-পাধীনামাত্মা নিয়ন্তা, সমষ্ট্যুপাধিত্বাৎ ; যেন চানুগৃহ্নতা তস্য স্বরূপং দদৃশে দৃষ্টবান্, এতচ্চ 'তস্যাপি দ্রষ্টুরীশস্য কূটস্থস্যাখিলাত্মনঃ। সৃজ্যং সৃজামি সৃষ্টোঽহমীক্ষয়ৈবাভিচোদিতঃ ॥' ইত্যাদিনোক্তমনূদ্যতে। অগ্রে তু স্পষ্টং ভবিষ্যতি ॥

৯। প্রশ্নান্তরমাহ—স চাপীতি। যত্র শেতে, যেন রূপেণাবতিষ্ঠতে, বিশ্বস্য স্থিত্যাদয়ো যস্মাৎ—এবমাদিপ্রশ্নানাং তত্ত্বতোঽর্হস্যুদাহর্ত্তুমিতি সর্ব্বান্তক্রিয়য়া সম্বন্ধঃ ॥

১০। প্রশ্নান্তরমাহ—পুরুষস্যাবয়বৈঃ পূর্ব্বং কল্পিতাঃ 'যস্যেহাবয়বৈ-র্লোকান্ কল্পয়ন্তি' ইত্যাদৌ, 'লোকৈশ্চামুষ্যাবয়বাঃ' ইতি, 'পাতালমেতস্য হি পাদমূলম্' ইত্যাদৌ চ ত্বন্মুখাদেব শ্রুতবন্তো বয়ম্ ॥

১১। এবং সন্দেহবিপর্য্যয়াভ্যাং পৃষ্টম্, ইদানীমজ্ঞাতান্ বহূনর্থান্ পৃচ্ছতি—যাবানিত্যাদিনা। কল্পো মহান, বিকল্পোঽবান্তরঃ। ভূতাদিঃ শব্দো যস্মাৎ, যস্য বাচক ইতি বা। সতঃ স্থূলদেহাভিমানিনো মনুষ্যপিতৃ-দেবাদেরায়ুষঃ প্রমাণম্ ॥

১২। অনুমানপ্রকারং পৃষ্ট্বা বিশেষপ্রকারং পৃচ্ছতি—কালস্যেতি। অনুগতিঃ প্রবৃত্তিঃ, কর্ম্মগতয়ঃ কর্ম্মপ্রাপ্যাণি স্থানানি, যাদৃশী যাদৃশ্যঃ॥

১৩। গুণানাং সত্ত্বাদীনাং পরিণামং দেবাদিরূপমিচ্ছতাং গুণিনাং জীবানাং মধ্যে যস্মিন্ পরিণামে কর্ম্মণাং পুণ্যপাপানাং সমবায়ঃ সমুদায়ঃ। কেন কর্ম্মসমুদায়েন, কথং কৃতেন, কোঽধিকারী দেবাদিভাবং প্রাপ্নোতীত্যর্থঃ॥

১৪। ভূরাদীনাং সম্ভবঃ; এতানি ওকাংসি যেষাং প্রাণিনাং তেষাঞ্চ সম্ভবঃ। যথেতি সর্ব্বত্রানুষঙ্গঃ॥

১৫। বর্ণানামাশ্রমাণাঞ্চ বিনিশ্চয়স্তত্তৎস্বভাবৈর্নির্দ্ধারণম্॥

১৬। যুগে যুগে প্রতিযুগং যো ধর্ম্মঃ, যচ্চ হরেরবতারানুচরিতম্॥

১৭। সবিশেষঃ বর্ণাশ্রমনিবন্ধনঃ; শ্রেণীনাং তত্তদ্ব্যবসায়োপজীবিনাং ব্যবহারনিয়মলক্ষণো ধর্ম্মঃ। রাজর্ষীণাং প্রজাপালনাধিকারিণাম্, কৃচ্ছ্রেষু আপৎসু জীবতাম্, সর্ব্বেষাম্॥

১৮। তত্ত্বানাং প্রকৃত্যাদীনাং পরিসংখ্যানং সংখ্যা, লক্ষণং স্বরূপম্, হেতুতো লক্ষণং তত্তৎকার্য্যহেতুত্বেন চ লক্ষণমিত্যর্থঃ। পুরুষারাধনস্য বিধির্দেবপূজায়াঃ প্রকারঃ, অষ্টাঙ্গযোগস্য চ বিধিঃ॥

১৯। যোগেশ্বরাণামৈশ্বর্য্যেণ অণিমাদিনা অর্চ্চিরাদিগতিঃ, লিঙ্গশরীরস্য ভঙ্গো লয়ঃ, বেদা ঋগ্বেদাদয়ঃ, উপবেদা আয়ুর্ব্বেদাদয়ঃ, ধর্ম্মা ধর্ম্মশাস্ত্রাণি তেষাম্, ইতিহাসপুরাণয়োশ্চ গতিঃ স্বরূপম্॥

২০। সংপ্লবোঽবান্তরপ্রলয়ঃ, যদ্বা, সম্যক্ প্লবনমুদ্ভবঃ, বিক্রমঃ স্থিতিঃ, প্রতিসংক্রমো মহাপ্রলয়ঃ, ইষ্টং বৈদিকং কর্ম্ম, পূর্ত্তং স্মার্ত্তম্, 'বাপীকূপতড়াগাদি দেবতায়তনানি চ। অন্নপ্রদানমারামঃ পূর্ত্তমিত্যভিধীয়তে॥' ইতি। তত্র চ কাম্যানামগ্নিহোত্রাদীনাং বিধিঃ; ত্রিবর্গস্য ধর্ম্মার্থকামানাং বিধিরবিরোধপ্রকারঃ॥

২১। অনুশায়িনাং লীনোপাধীনাং জীবানাম্, আত্মনো জীবস্য, ব্যবস্থানং বন্ধমোক্ষাতিরিক্তস্বরূপেণাবস্থানম্ ॥

২২। উদাস্তে প্রলয়ে ॥

২৩। চ-শব্দাদপৃষ্টমপি ॥

২৪। প্রমাণং সম্যগ্ জ্ঞাতা, যতস্তব ব্রহ্মনারদব্যাসক্রমেণ সম্প্রদায়োঽস্তীতি সামান্যন্যায়েনাহ—পরে চেতি। যদ্বা, ত্বদন্যে প্রায়শো গতানুগতিকা এব, ন তত্ত্ববিদ ইত্যাহ—পরে চেতি ॥

২৫। ননু তবানশন-দ্বিজকোপাভ্যাং ব্যাকুলচিত্তস্য কুতঃ শ্রবণম্? তত্রাহ—নেতি। ন পরায়ন্তি নাপগচ্ছন্তি, ন ব্যাকুলীভবন্তীত্যর্থঃ; অচ্যুত-কীর্ত্তিপীযূষং পিবতঃ ॥

২৬। উপামন্ত্রিতঃ পৃষ্টঃ। সংশ্চাসৌ পতিশ্চেতি তস্য ॥

২৭। ব্রহ্মকল্পে—সৃষ্ট্যুপক্রমে। ভাগবতাখ্যানেনৈব প্রশ্নানামুত্তরং দাতুমুপক্রান্তবানিত্যর্থঃ ॥

২৮। পাণ্ডবানামৃষভঃ শ্রেষ্ঠঃ; আনুপূর্ব্ব্যেণেতি প্রস্তাবক্রমোঽত্র বিবক্ষিতঃ, ন তু প্রশ্নক্রমঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে
অষ্টমোঽধ্যায়ঃ ॥ ৮ ॥

নবমোঽধ্যায়ঃ

রাজপ্রশ্নোত্তরং বক্ষ্যন্ ব্রহ্মণে হরিণোদিতম্।
কথয়ামাস নবমে শুকো ভাগবতং পুনঃ॥ (১)

১। তত্র যত্তাবদুক্তং 'যদধাতুমতঃ' ইত্যনেন জীবস্য কথং দেহ-সম্বন্ধ ইতি, তত্রোত্তরমাহ—আত্মনো হরের্মায়ামন্তরেণ অনুভবরূপস্যাত্মনঃ অর্থেন দৃশ্যেন দেহাদিনা সম্বন্ধোঽঞ্জসা তত্ত্বতো ন ঘটেত। তত্র হেতুঃ—পরস্যেতি ; স্বপ্নদ্রষ্টুর্যথা স্বপ্নদেহাদিনা সম্বন্ধো ন ঘটতে, তদ্বৎ॥

২। সংসারোঽপি মায়য়ৈবেত্যাহ—বহুরূপো বালযুবাদিরূপঃ, দেব-নরাদিরূপশ্চ আভাতি, গুণেষু দেহাদিষু॥

৩। অতএব ভক্তিযোগেন তন্নিরাসে সতি মোক্ষোঽপি ঘটত ইত্যাহ—যর্হীতি। বাব-শব্দ এবার্থে। স্ব এব মহিম্নি যদা রমেত, তদেবাহ—কালমায়য়োঃ পুরুষপ্রকৃত্যোঃ পরস্মিন্, তদা উভয়মহং মমেতি চ ত্যক্ত্বা উদাস্তে পরিপূর্ণস্বরূপেণাবতিষ্ঠতে। তদুক্তম্—'যয়া সম্মোহিতো জীব আত্মানং ত্রিগুণাত্মকম্। পরোঽপি মনুতেঽনর্থং তৎ-কৃতঞ্চাভিপদ্যতে॥ অনর্থোপশমং সাক্ষাদ্ভক্তিযোগমধোক্ষজে। লোক-স্যাজানতো বিদ্বাংশ্চক্রে সাত্বতসংহিতাম্॥' ইতি॥

৪। যচ্চোক্তং পরমেশ্বরস্যাপি দেহসম্বন্ধাবিশেষাৎ কথং তদ্ভক্ত্যা মোক্ষঃ স্যাদিতি, 'আসীদ্যদুদরাৎ পদ্মম্' ইত্যাদিনা ? তত্রাহ—আত্মনো জীবস্য তত্ত্ববিশুদ্ধ্যর্থং তত্ত্বজ্ঞানার্থং তত্ত্বমেবেদেব। কি তৎ? যৎ তপ-আদিনা স্বভজনং ভগবান্ ব্রহ্মণে আহ। কিং কুর্ব্বন্? ঋতং সত্যং চিদ্ঘনং রূপং দর্শয়ন্। দর্শনে হেতুঃ—অব্যলীকেন ব্রতেন তপসা আদৃতঃ সেবিতঃ সন্। অয়ং ভাবঃ—জীবস্যাবিদ্যয়া মিথ্যারূপদেহসম্বন্ধঃ, ঈশ্বরস্য তু যোগমায়য়া চিদ্ঘনলীলাবিগ্রহাবির্ভাব ইতি মহান্ বিশেষঃ। অতস্তদ্-ভজনান্মোক্ষোপপত্তিরিতি॥

৫। ভগবদ্ভজনাদেব তত্ত্বজ্ঞানমিত্যেতৎ প্রপঞ্চয়িষ্যন্ ব্রহ্মণোঽপি তত্ত্বজ্ঞানং তৎপ্রসাদাদেবেতি দর্শয়িতুমিতিহাসমাহ—স ইত্যাদিনা। পরো গুরুর্ভক্তিরহস্যোপদেষ্টা স্বধিষ্ণ্যং পদ্মমাস্থায় অধিষ্ঠায়, তস্যাধিষ্ঠানান্বেষণায় পূর্ব্বং জলে নিমগ্নঃ পশ্চাৎ পরাবৃত্য স্বধিষ্ণ্যে[১] স্থিত্বেত্যর্থঃ। ঐক্ষত তৎ কথং স্রষ্টব্যমিত্যালোচিতবান্, তাং দৃশং প্রজ্ঞাম্, অত্র সৃষ্টিবিষয়ে সম্মতামব্যভিচারিণীম্। বিধিঃ প্রকারঃ॥

৬। সৃষ্টিং চিন্তয়ন্ কদাচিৎ দ্ব্যক্ষরং বচঃ অম্ভসি উপাশৃণোৎ উপ সমীপে শ্রুতবান্। তে অক্ষরে দর্শয়তি—কাদয়ো মাবসানাঃ স্পর্শাঃ, তেষু যৎ ষোড়শং তকারঃ, যচ্চৈকবিংশং পকারঃ। বচসো নির্দ্দেশার্থং তদর্থমাহ—হে নৃপ! নিষ্কিঞ্চনানাং ত্যক্তধনানাং ধনং যদ্বিদুঃ, যেন তপোধনা ইতি প্রসিদ্ধাঃ, তচ্চ দ্বির্গদিতং 'তপ তপ' ইতি লোটো মধ্যম-পুরুষৈকবচনম্, তস্য বীপ্সাং সাদরবিধিরূপামশৃণোদিত্যর্থঃ॥

৭। এবং নিশম্য তস্য বচসো বক্তু্র্দিদৃক্ষয়া ততঃ প্রচলিতঃ সন্ দিশো বিলোক্য পুনঃ স্বধিষ্ণ্যমাস্থায় কেনচিৎ প্রত্যক্ষং নিযুক্ত ইব তচ্চাত্মনো হিতং বিমৃশ্য তপসি মনো ধৃতবানিত্যর্থঃ॥

৮। ততঃ সোঽখিলানাং লোকানাং তাপনং প্রকাশকং তপঃ অতপ্যত কৃতবান্। 'তপ তপ' ইত্যস্য বচসোঽর্থেঽমোঘং দর্শনং যস্য, জিতঃ অনিল আত্মা মনশ্চ যেন, বিজিতান্যুভয়েন্দ্রিয়াণি জ্ঞানকর্ম্মাত্মকানি যেন, তপতাং তপশ্চরতাং মধ্যে তপীয়ান্ অতিশয়েন তপস্বী॥

৯—১৩। তস্মৈ ব্রহ্মণে, স্বলোকং বৈকুণ্ঠাখ্যম্, পরং শ্রেষ্ঠম্, যৎপরং যতঃ পরমুৎকৃষ্টমন্যন্নাস্তি, তমেব লোকমনুবর্ণয়তি পঞ্চভিঃ—ব্যপেতাঃ সংক্লেশাদয়ো যস্মাৎ, স্বদৃষ্টবদ্ভিঃ সৎপুণ্যবদ্ভিঃ, যদ্বা, স্বস্যাদৃষ্টং দর্শনমস্তি

১। স্বাধিশয়ে (ঘ)।

যেষাম্, আত্মবিদ্ভিরিত্যর্থঃ॥ (১০) তয়োস্তাভ্যাং মিশ্রং সত্ত্বঞ্চ ন বর্ত্ততে, কিন্তু শুদ্ধমেব সত্ত্বম্, কালবিক্রমো নাশঃ, অপরে রাগলোভাদয়ো ন সন্তীতি কিমুত বক্তব্যম্? অনুব্রতাঃ পার্ষদাঃ॥ (১১) শ্যামাশ্চ তে অবদাতা উজ্জ্বলাশ্চ, পদ্মনেত্রাঃ, পীতাম্বরাঃ, সুরুচঃ অতিকমনীয়াঃ, সুপেশসঃ অতিসুকুমারাঃ, উন্মিষন্ত ইব প্রভাবন্তো মণিপ্রবেকা মণ্যুত্তমা যেষু তানি নিষ্কাণি পদকান্যাভরণানি যেষাং তে, সুবর্চ্চসঃ অতিতেজস্বিনঃ, প্রবালাদিবদ্বর্চ্চো বর্ণো যেষাং তে, পরিতঃ স্ফুরন্তি কুণ্ডলানি মৌলয়ো মালাশ্চ সন্তি যেষাং তে॥ (১২) পার্ষদাননুবর্ণ্য পুনরপি লোকমনু-বর্ণয়তি—ভ্রাজিষ্ণুভির্দেদীপ্যমানাভিঃ, প্রমদোত্তমানাং দিবঃ কান্তয়স্তাভি-র্বিদ্যোতমানঃ, সহ বিদ্যুদ্ভির্বর্ত্তমানাঃ সবিদ্যুতস্তাভিরভ্রাবলিভিঃ, তত্র বিদ্যুত ইব স্ত্রিয়ঃ, অভ্রপঙ্‌ক্তয় ইব বিমানানি, নভ ইব লোকঃ॥ (১৩) শ্রীঃ সম্পৎ, রূপিণী মূর্ত্তিমতী, মানং পূজাম্, বিভূতিভির্নানাবিভবৈঃ, প্রেঙ্খ-মান্দোলনং শ্রিতা, কুসুমাকরো বসন্তস্তস্যানুগা ভ্রমরাস্তৈর্বিবিধং গীয়মানা, স্বয়ন্তু প্রিয়স্য হরেঃ কর্ম্ম গায়ন্তী ভবতি॥

১৪। য এবম্ভূতো লোকস্তত্র তস্মিন্॥

১৫। ভৃত্যানাং প্রসাদেঽভিমুখম্, দৃগেব আসব ইব দ্রষ্টৄণাং হর্ষকরী যস্য তম্, প্রসন্নহাসমরুণলোচনঞ্চ আননং যস্য, বক্ষসি স্থিতয়া চ শ্রিয়া লক্ষিতমলঙ্কৃতমিত্যর্থঃ॥

১৬। অধ্যর্হণীয়ং বরিষ্ঠং সিংহাসনম্, চতস্রঃ প্রকৃতি-পুরুষমহদহ-ঙ্কৃতিরূপাঃ, ষোড়শ একাদশেন্দ্রিয়-পঞ্চমহাভূতাখ্যাঃ, পঞ্চতন্মাত্ররূপাশ্চ যা শক্তয়স্তাভির্বৃতম্; স্বৈর্ভগৈঃ স্বাভাবিকৈরৈশ্বর্য্যাদিভিঃ, ইতরত্র যোগিষু অধ্রুবৈরাগন্তুকৈরসাধারণৈরিত্যর্থঃ। এবং সত্যপি স্ব এব ধামন্ স্বস্বরূপ এব রমমাণমতএব ঈশ্বরম্॥

১৭। তস্য দর্শনেন য আহ্লাদস্তেন পরিপ্লুতং ব্যাপ্তমন্তরমন্তঃকরণং যস্য, হৃষ্যন্তী রোমাঞ্চিতা তনুর্যস্য, প্রেমভরেণাশ্রুণি লোচনেষু যস্য ; বিশ্বসৃক্ ব্রহ্মা ; পারমহংস্যেন পথা জ্ঞানমার্গেণ ॥

১৮। তং ব্রহ্মাণং শ্রীভগবান্ বভাষে। প্রজাবিসর্গে কার্য্যে নিজ-শাসনার্হং স্বনিয়োগার্হম্ ; প্রজাবিসর্গে সমুপস্থিতমিতি বান্বয়ঃ। ঈষৎ-স্মিতেন শোচির্দীপ্তিঃ শোভা যস্যাস্তয়া গিরা ॥

১৯। বেদগর্ভেতি সম্বোধয়ন্ বেদান্ সঞ্চারয়ন্তি। সিসৃক্ষয়া হেতুনা চিরং সম্ভৃতেন তপসাহং সম্যক্ তোষিতঃ। দুস্তোষস্তোষয়িতুমশক্যঃ ॥

২০। মা ইতি মাম্, অভিবাঞ্ছিতং বরং বরয় প্রার্থয়, শ্রেয়সাং ফলানাং পরিশ্রামঃ সাধনপ্রয়াসঃ, মম দর্শনমবধির্যস্য স তথা ; ততোঽ-ধিকং শ্রমফলং নাস্তীত্যর্থঃ ॥

২১। এতচ্চ মৎকৃপয়ৈব ত্বয়া প্রাপ্তমিত্যাহ—মনীষিতমিচ্ছা তুভ্য-মিদং দাতব্যমিতি যা মমেচ্ছা তস্যা অনুভাবোঽয়ম্। কোঽসৌ ? তমাহ—মম লোকস্যাবলোকনং যৎ ॥

২২। ন চেদং মমৈব তপোবলেন প্রাপ্তব্যমিতি স্বাতন্ত্র্যং মন্যস্ব, তৎপ্রবৃত্তেরপি মৎকৃতত্বাদিত্যাহ—রহসি তপ তপেতি যদ্বচ উপশ্রুত্য পরমং তপশ্চকর্থ কৃতবানসি, তদপি ত্বাং প্রতি ময়ৈবাদিষ্টমুপদিষ্টম্। কদা ? তত্র তদা সৃষ্ট্যারম্ভে ত্বয়ি কর্ম্মণি কার্য্যার্থে বিমোহিতে সতি ॥

২৩। কিঞ্চ, তপো নাম মমৈব শক্তিরিত্যাহ—তপো মে হৃদয়ম্, অন্তরঙ্গা শক্তিঃ, আত্মা স্বরূপম্, 'যস্য জ্ঞানময়ং তপঃ' ইতি শ্রুতেঃ। গ্রসামি সংহরামি, বিভর্ম্মি পালয়ামি, বীর্য্যং শক্তিঃ ॥

২৪। অধ্যক্ষঃ অধিষ্ঠাতা, গুহাং গুহায়াং বুদ্ধাববস্থিতঃ সন্ যদ্যপি বেদ তথাপীত্যুত্তরেণান্বয়ঃ ॥

২৫। নাথমানস্ত যাচমানস্ত উপতপ্যমানস্যেতি বা। হে নাথ! নাথয় আশংস প্রযচ্ছ, নাথিতং যাচিতম্; 'নাথৃ নাধৃ যাচ্ঞোপতাপৈশ্বর্য্যাশীঃষু।' নাথিতমেবাহ—পরাবরে ইতি। পরং সূক্ষ্মম্, অবরং স্থূলঞ্চ তে রূপং যথা জানীয়াম্॥

২৬—২৭। যথা চ ত্বং ক্রীড়সি, তথা তদ্বিষয়াং মনীষাং ময়ি ধেহীত্যুত্তরেণান্বয়ঃ। নানাশক্ত্যুপবৃংহিতং বিশ্বং, বিলুম্পন্ সংহরন্, বিবিধং সৃজন্, বিভ্রৎ পালয়ন্, আত্মনা স্বয়মেবাত্মানং ব্রহ্মাদিরূপং গৃহ্নন্ অনুগৃহ্নন্ ক্রীড়সি॥ (২৭) ঊর্ণুতে ঊর্ণাভি[১]-রাত্মানমাচ্ছাদয়তি॥

২৮। তৎ কিং সৃষ্টৈরুদ্বিগ্ন এবং তত্ত্বজ্ঞানং প্রার্থয়সে? নেত্যাহ—ভগবতা ত্বয়া শিক্ষিতমনুশিষ্টমতন্দ্রিতোঽনলসঃ সন্ করিষ্যামি। তর্হি কিমনেন তত্ত্বজ্ঞানেন? তত্রাহ—যস্মাদেবম্ভূতাৎ তবানুগ্রহাৎ প্রজাসর্গমীহমানঃ কুর্ব্বন্নপি অহঙ্কারাদিভির্বদ্ধো ন ভবেয়মিতি॥

২৯। অবশ্যঞ্চ মদো ভবিতা, স তু কঞ্চিৎ কালং মা ভূদিতি প্রার্থয়তে—যাবদিতি। ভো ঈশ! তে ত্বয়া লৌকিকস্য সখ্যুঃ সখেবাহং কৃতঃ, করস্পর্শাদিনা সমত্বেন সম্মানিতঃ সন্ প্রজাসর্গরূপে তব পরিকর্ম্মণি সেবায়াং স্থিতোঽবিক্লবোঽব্যাকুল এব যাবজ্জনং বিভজামি, উত্তমমধ্যমাদিভেদেন সৃজামি, তাবৎ ত্বৎসম্মানদানাদহমপ্যজঃ স্বতন্ত্র ইতিমানিনো মে সমুন্নদ্ধ উৎকটো মদো মা ভূৎ; যদ্বা, মদো মা সমুন্নদ্ধ, মা সমুন্নহ্যতাম্, উদ্রিক্তো ন ভবেদিত্যর্থঃ॥

৩০। জ্ঞানং শাস্ত্রোত্থম্, বিজ্ঞানমনুভবঃ, রহস্যং ভক্তিঃ, সুগোপ্যমপি বক্ষ্যামীত্যাদি-নির্দ্দেশাৎ; তস্যাঙ্গং সাধনম্॥

৩১। ননু ত্বদ্দর্শনেঽপ্যসমর্থোঽহং কথং জ্ঞানাধিকারী স্যাম্? তত্রাহ—যাবান্ স্বরূপতঃ, যথাভাবঃ যাদৃক্সত্তাবান্, যানি রূপাণি, গুণাঃ কর্ম্মাণি চ যস্য॥

১। তন্তুভি- (ঘ)।

৩২। এতদেব সম্যগুপদিশন্ যাবানিত্যস্যার্থং স্ফুটয়তি—অহমেবাগ্রে সৃষ্টেঃ পূর্ব্বমাসং স্থিতঃ; নান্যৎ কিঞ্চিৎ যৎ সৎ স্থূলম্, অসৎ সূক্ষ্মম্, পরং তয়োঃ কারণং প্রধানম্। তস্যাপ্যন্তর্ম্মুখতয়া তদা ময্যেব লীনত্বাৎ। অহঞ্চ তদা আসমেব কেবলম্, ন চান্যদকরবম্; পশ্চাৎ সৃষ্টেরনন্তরমপ্যহমেবাস্মি; যদেতদ্বিশ্বং, তদপ্যহমেবাস্মি; প্রলয়ে যোঽবশিষ্যেত, সোঽপ্যহমেব; অনেন চানাদ্যনন্তত্বাদদ্বিতীয়ত্বাচ্চ পরিপূর্ণোঽহমিত্যুক্তং ভবতি॥

৩৩। যথাত্মমায়াযোগেনেত্যনেন মায়ায়া অপি পৃষ্টত্বাদ্বক্ষ্যমাণোপযোগিত্বাচ্চ মায়াং নিরূপয়তি—ঋতেঽর্থং বিনাপি বাস্তবমর্থং যদ্যতঃ কিমপ্যনিরুক্তমাত্মন্যধিষ্ঠানে প্রতীয়েত, সদপি চ ন প্রতীয়েত, তৎ আত্মনো মম মায়াং বিদ্যাৎ। যথা আভাসো দ্বিচন্দ্রাদিরিতি, অর্থং বিনা প্রতীতৌ দৃষ্টান্তঃ—'যথা তমঃ' ইতি সতোঽপ্রতীতৌ তমো রাহুর্যথা গ্রহমণ্ডলে স্থিতোঽপি ন দৃশ্যতে, তথা[১]॥

৩৪। যথাভাস ইত্যেতৎ স্পষ্টয়তি—যথা মহাভূতানি ভৌতিকেষু অনু সৃষ্টেরনন্তরং প্রবিষ্টানি, তেষূপলভ্যমানত্বাৎ; অপ্রবিষ্টানি চ, প্রাগেব কারণতয়া তেষ্ববিদ্যমানত্বাৎ; তথা তেষু ভূতভৌতিকেষ্বহম্, ন চ তেষ্বহম্। এবম্ভূতা মম সত্তেত্যর্থঃ॥

৩৫। সাধনমাহ—আত্মনস্তত্ত্বজিজ্ঞাসুনা এতাবদেব জিজ্ঞাস্যং বিচার্য্যম্। তদেবাহ—অন্বয়ঃ কার্য্যেষু কারণত্বেনানুবৃত্তিঃ, কারণাবস্থায়াঞ্চ তেভ্যো ব্যতিরেকঃ। তথা জাগ্রদাদ্যবস্থাসু তত্তৎসাক্ষিতয়ান্বয়ঃ। ব্যতিরেকশ্চ সমাধ্যাদৌ। এবমন্বয়ব্যতিরেকাভ্যাং যৎ স্যাৎ সর্ব্বত্র সর্ব্বদা চ, তদেবাত্মেতি॥

১। যদ্বা, গ্রহণকালং বিনা সতোঽপি তমসো রাহোরপ্রতীতিরিতি দিক্। (ক)।

৩৬। যৎ প্রার্থিতং 'নেহমানঃ প্রজাসর্গম্' ইতি, তৎ প্রসাদীকরোতি —এতন্মতং সম্যগনুতিষ্ঠ, সমাধিনা চিত্তৈকাগ্র্যেণ, কল্পেষু যে বিকল্পা বিবিধাঃ সৃষ্টয়স্তেষু বিমোহং কর্তৃত্বাদ্যভিনিবেশং ন যাস্যতীতি ॥

৩৭। এবং সম্প্রদিশ্য উপদিশ্য জনানাং পরমেষ্ঠিনং পরমে আধিপত্যে স্থিতং ব্রহ্মাণম্। আত্মনস্তদ্রূপং হরুণদন্তর্হিতবান্ ॥

৩৮। অন্তর্হিত ইন্দ্রিয়ার্থঃ প্রত্যক্ষরূপং যেন তস্মৈ বদ্ধাঞ্জলিঃ সন্ ॥

৩৯—৪৩। তদনন্তরং পূর্ব্বোক্তো ব্রহ্মনারদসংবাদঃ প্রবৃত্ত ইত্যাহ— প্রজাপতিরিতি পঞ্চভিঃ। প্রজানাং ভদ্রমন্বিচ্ছন্ বিমৃশন্ সৈব স্বার্থকাম্যা স্বপ্রয়োজনেচ্ছা, তয়া যমনিয়মানাতিষ্ঠৎ॥ (৪০) রিক্থাদানাং পুত্রাণাং মধ্যে প্রিয়তমঃ, তং পিতরং সেবমানঃ শীলাদিনা পরিতোষয়ামাসে-ত্যুত্তরেণান্বয়ঃ ॥ (৪১) কিমিচ্ছন্? বিষ্ণোর্মায়াং বিবিদিষন্ ॥ (৪২) নিশম্য দৃষ্ট্বা জ্ঞাত্বেত্যর্থঃ। মা মাম্॥ (৪৩) ভগবতা চতুঃশ্লোক্যা সংক্ষেপেণ প্রোক্তং বিস্তরেণ প্রাহ—দশলক্ষণানি লক্ষণীয়া অর্থা বিদ্যন্তে যস্মিন্ ॥

৪৪। তৎসম্প্রদায়তো ভাগবতং ময়া জ্ঞাতমিত্যাশয়েনাহ—নারদ ইতি ॥

৪৫। ভাগবতব্যাখ্যানেনৈব ত্বৎপ্রশ্নানামুত্তরং দাস্যামীত্যাহ— যদুতেতি। 'পুরুষাবয়বৈর্লোকাঃ সপালাঃ পূর্ব্বকল্পিতাঃ' ইত্যাদিনা বৈরাজাৎ পুরুষাদিদং বিশ্বং কথমাসীদিতি যদহং ত্বয়া পৃষ্টঃ, তদ্‌যথাবদু-পাখ্যাস্যামি, শৃণ্বিতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং দ্বিতীয়স্কন্ধে

নবমোঽধ্যায়ঃ ॥ ৯ ॥

দশমোঽধ্যায়ঃ

ততো ভাগবতব্যাখ্যাদ্বারৈব দশমে স্ফুটম্।
রাজপ্রশ্নোত্তরং বক্তুমারেভে বাদরায়ণিঃ ॥ (১)

১। 'দশলক্ষণং পুরাণং প্রাহ' ইত্যুক্তম্, তানি দশ লক্ষণানি দর্শয়তি—অত্রেতি। মন্বন্তরাণি চ ঈশানুকথাশ্চেতি দ্বন্দ্বঃ। সর্গাদয়োঽত্র দশার্থা লক্ষ্যন্তে ॥

২। নন্বেবমর্থভেদাৎ শাস্ত্রভেদঃ স্যাৎ? তত্রাহ—দশমস্যেতি। দশমস্যাশ্রয়স্য বিশুদ্ধ্যর্থং তত্ত্বজ্ঞানার্থং নবানাং লক্ষণং স্বরূপম্; একস্যৈব প্রাধান্যান্নায়ং দোষ ইত্যর্থঃ। নন্বত্র নৈবং প্রতীয়তে? অত আহ—শ্রুতেন শ্রুত্যৈব স্তুত্যাদিস্থানেষু অঞ্জসা সাক্ষাৎ বর্ণয়ন্তি, অর্থেন তাৎপর্য্যবৃত্ত্যা চ তত্তদাখ্যানেষু ॥

৩। সর্গাদীনাং প্রত্যেকং লক্ষণমাহ—ভূতানি আকাশাদীনি, মাত্রাণি চ শব্দাদীনি, ইন্দ্রিয়াণি চ; ধী শব্দেন মহদহঙ্কারৌ। গুণানাং বৈষম্যাৎ পরিণামাদ্‌ব্রহ্মণঃ পরমেশ্বরাৎ কর্ত্তুর্ভূতাদীনাং যদ্বিরাড়্‌রূপেণ স্বরূপতশ্চ জন্ম স সর্গঃ। পুরুষো বৈরাজো ব্রহ্মা, তৎকৃতঃ পৌরুষশ্চরাচরসর্গো বিসর্গ ইত্যর্থঃ ॥

৪। বৈকুণ্ঠস্য ভগবতো বিজয়ঃ, সৃষ্টানাং তত্তন্মর্য্যাদাপালনেনোৎকর্ষঃ, স্থিতিঃ স্থানম্। ততঃ স্থিতেষু স্বভক্তেষু তস্যানুগ্রহঃ পোষণম্। তদনুগৃহীতানাং সতাং মন্বন্তরাধিপতীনাং ধর্ম্মঃ সদ্ধর্ম্মঃ, কর্ম্মণাং বাসনাঃ। 'বেঞ্ তন্তুসন্তানে'; ঊয়ন্তে কর্ম্মভিঃ সন্তন্যন্তে ইত্যূতয়ঃ; যদ্বা, বৃদ্ধ্যর্থাৎ সংশ্লেষার্থাদ্বা বয়তের্ধাতোরিদং রূপম্, ঊয়ন্তে কর্ম্মভির্বধ্যন্তে সংশ্লিষ্যন্ত ইতি বা ঊতয় ইত্যর্থঃ ॥

৫। হরেরবতারানুচরিতম্, অস্যানুবর্ত্তিনাঞ্চ সৎকথা ঈশানুকথাঃ প্রোক্তা ইত্যর্থঃ ॥

৬। অস্যাত্মনো জীবস্য হরের্যোগনিদ্রামনু পশ্চাৎ শক্তিভিঃ স্বোপাধিভিঃ সহ শয়নং লয়ো নিরোধঃ, অন্যথারূপমবিদ্যয়াধ্যস্তং কর্ত্তৃত্বাদি হিত্বা স্বরূপেণ ব্রহ্মতয়া ব্যবস্থিতির্মুক্তিঃ ॥

৭। আভাসঃ সৃষ্টিঃ, নিরোধো লয়শ্চ যতো ভবতি, অধ্যবসীয়তে প্রকাশতে চ, স পরং ব্রহ্মেতি পরমাত্মেতি প্রসিদ্ধ আশ্রয়ঃ কথ্যতে ॥

৮। আশ্রয়স্বরূপমপরোক্ষানুভবেন স্পষ্টং দর্শয়িতুমধ্যাত্মাদি-বিভাগমাহ—যোঽয়মাধ্যাত্মিকঃ পুরুষশ্চক্ষুরাদিকরণাভিমানী দ্রষ্টা জীবঃ, স এবাধিদৈবিকশ্চক্ষুরাদ্যধিষ্ঠাতা সূর্য্যাদিঃ। তত্রৈকস্মিন্নেব উভয়ো দ্বিরূপো বিচ্ছেদো যস্মাৎ স আধিভৌতিকশ্চক্ষুর্গোলকাদ্যুপলক্ষিতো দৃশ্যো দেহঃ পুরুষ ইতি পুরুষস্য জীবস্যোপাধিঃ, 'স বা এষ পুরুষোঽন্নরসময়ঃ' ইতি শ্রুতেঃ ॥

৯। একমেকতরাভাব ইত্যেষামন্যোঽন্যসাপেক্ষসিদ্ধিত্বে নানাত্মত্বং দর্শয়তি। তথা হি দৃশ্যং বিনা তৎপ্রতীত্যনুমেয়ং করণং ন সিধ্যতি, নাপি দ্রষ্টা, ন চ তদ্বিনা করণপ্রবৃত্ত্যনুমেয়স্তদধিষ্ঠাতা সূর্য্যাদিঃ, ন চ তং বিনা করণং প্রবর্ত্ততে, ন চ তদ্বিনা দৃশ্যমিত্যেবমেকতরস্যাভাবে একং নোপলভামহে। তত্র তদা তত্রিতয়মালোচনাত্মকেন প্রত্যয়েন যো বেদ, সাক্ষিতয়া পশ্যতি, স পরমাত্মা আশ্রয়ঃ। তেষামপি পরস্পরমাশ্রয়ত্বমস্ত্যেবেতি তদ্ব্যবচ্ছেদার্থং বিশেষণম্, স্বাশ্রয়ঃ অনন্যাশ্রয়ঃ; স চাসাবন্যেষামাশ্রয়শ্চেতি। তথা চ ভগবান্ বক্ষ্যতি—'দৃগ্‌রূপমার্কং বপুরত্র রন্ধ্রে, পরস্পরং সিধ্যতি যঃ স্বতঃ খে। আত্মা যদেষামপরো য আদ্যঃ, স্বয়ানুভূত্যাখিলসিদ্ধসিদ্ধিঃ॥' ইতি। এতেনৈব ব্যভিচারিত্বাত্তেষাং মায়াময়ত্বমপ্যুক্তম্। অতএব পুরুষাবয়বৈর্লোকাঃ সপালাঃ পূর্ব্বকল্পিতাঃ। লোকৈরমুষ্যাবয়বাঃ সপালৈরিত্যনেনোক্তো বিরোধোঽপি পরিহৃতঃ ॥

১০। উক্তমেবাধ্যাত্মাদিবিভাগং প্রপঞ্চয়ন্ ‘যদুতাহং ত্বয়া পৃষ্টো বৈরাজাৎ পুরুষাদিদম্। যথাসীত্তদুপাখ্যাস্তে’ ইতি যৎ প্রতিজ্ঞাতম্, তদুৎপত্তিপ্রকারমাহ—পুরুষ ইত্যাদিনা। পুরুষো বৈরাজঃ, অণ্ডং বিনির্ভিদ্য পৃথক্ কৃত্বা বিনির্গতঃ পৃথক্স্থিতঃ ইত্যর্থঃ। অয়নং স্থানমন্বিচ্ছন্ বিমৃশন্। যতঃ শুচিঃ স্বয়ম্, অতঃ শুচীঃ শুদ্ধা অপঃ গর্ভোদকসংজ্ঞাঃ অস্রাক্ষীৎ সসর্জ্জ॥

১১। অপ্সু বাসং নারায়ণনাম-নিরুক্ত্যা স্পষ্টয়তি—তেন অপ্সু-বাসেন যদ্‌যস্মাৎ পুরুষো নরঃ, তস্মাদুদ্ভবো যাসাং তা নারা আপোঽয়ন-মস্যেতি নারায়ণ ইত্যর্থঃ ; তদুক্তম্—‘আপো নারা ইতি প্রোক্তা আপো বৈ নরসূনবঃ। অয়নং তস্য তাঃ পূর্ব্বং তেন নারায়ণঃ স্মৃতঃ॥’ ইতি॥

১২। তস্য প্রভাবমাহ—দ্রব্যমুপাদানম্ ; কর্ম্মাদীনি নিমিত্তানি, জীবো ভোক্তা, যস্যানুগ্রহাৎ সন্তি, কার্য্যক্ষমা ভবন্তীত্যর্থঃ॥

১৩। যোগ এব তল্পং শয্যা, তস্মাৎ। বীর্য্যং গর্ভরূপং দেহং হিরণ্ময়-মিব প্রকাশবহুলম্॥

১৪। অস্যৈব প্রপঞ্চঃ—অথেত্যাদিনা॥

১৫। অন্তঃশরীরে য আকাশস্তস্মাৎ, ক্রিয়াশক্ত্যা তত্র বিবিধং চেষ্টমানস্য সতঃ, ওজঃ ইন্দ্রিয়শক্তিঃ, সহো মনঃশক্তিঃ, বলং দেহশক্তিঃ ; ততঃ ক্রিয়াশক্ত্যাত্মকাৎ সূক্ষ্মাদ্‌রূপাৎ প্রাণঃ সূত্রাখ্যো মহান্ মুখ্যঃ অসুঃ প্রাণঃ সর্ব্বেষাম্॥

১৬। মহত্ত্বং দর্শয়তি—অন্বিতি। প্রাণা ইন্দ্রিয়াণি যং প্রাণন্তং চেষ্টাং কুর্ব্বন্তমনু পশ্চাৎ প্রাণন্তি চেষ্টাং কুর্ব্বন্তি। অপানন্তং চেষ্টাং ত্যজন্তমনু অপানন্তি চেষ্টাং ত্যজন্তি, রাজানমনু ভৃত্যা ইব॥

১৭। আক্ষিপতা চালয়তা নিমিত্তেন ক্ষুত্তৃড়াদিকঞ্চ। প্রভোরিতি বিরাড়্জীবাভেদেনোপাসনার্থমুক্তম্। আজায়তে স্ম। ততো জক্ষতঃ ভক্ষতঃ ভক্ষয়িতুমিচ্ছত ইত্যর্থঃ। প্রাক্ প্রথমং নিরভিদ্যত বিভক্তমভূৎ॥

১৮। তালু অধিষ্ঠানম্; জিহ্বা ইন্দ্রিয়ম্; নানারসো বিষয়ঃ; বরুণশ্চ দেবতা জ্ঞাতব্যঃ। এবং সর্ব্বত্র অধিষ্ঠানমিন্দ্রিয়ম্, দেবতা বিষয় ইত্যেতচ্চতুষ্টয়মনুক্তমপ্যূহ্যম্॥

১৯। বিবক্ষোর্বক্তু্মিচ্ছোর্মুখত এব বহ্নির্দেবতা; বাক্ ইন্দ্রিয়ম্; ব্যাহৃতং ভাষণম্; তয়োরিতি ইন্দ্রিয়দেবতাধীনত্বং কর্ম্মণো দর্শয়তি॥

২০। নভস্বতি প্রাণবায়ৌ দোধূয়তি দোধূয়মানেঽত্যন্তং প্রচলতি সতি। তত্র নসি নাসিকায়াং বায়ুর্দেবতা গন্ধং বহতীতি তথা। অনেন গন্ধো বিষয়ো দর্শিতঃ। ঘ্রাণ ইন্দ্রিয়ম্; জিঘৃক্ষতঃ গন্ধং গ্রহীতুমিচ্ছতঃ॥

২১। নিরালোকং প্রকাশশূন্যমাসীদিতি শেষঃ। নির্মক্ষিকমিতি-বদব্যয়ীভাবঃ। তদাত্মানং দেহম্, চকারাদন্যচ্চ বস্তু দিদৃক্ষতঃ; অক্ষিণী স্থানম্; জ্যোতিরাদিত্যো দেবতা; চক্ষুরিন্দ্রিয়ম্; ততঃ গুণস্য রূপস্য গ্রহঃ গ্রহণম্; অনেন রূপং বিষয়ো দর্শিতঃ॥

২২। ঋষিভির্বেদৈর্বোধ্যমানস্য; তদাত্মনঃ প্রবোধনং গ্রহীতুমিচ্ছতঃ; ততো গুণগ্রহঃ শব্দগ্রহণম্॥

২৩। মৃদুত্বঞ্চ কাঠিন্যঞ্চ লঘুত্বঞ্চ গুরুত্বঞ্চ আ উষ্ণত্বঞ্চ ঈষদুষ্ণত্বঞ্চ শীততাঞ্চেত্যর্থঃ। যদ্যপ্যত্যুষ্ণত্বমপি ইন্দ্রিয়বিষয় এব, তথাপি তস্য জিঘৃক্ষা-ভাবাৎ ওষ্ণমিত্যুক্তম্; গুর্ব্বুষ্ণ্যেতি পাঠে বর্ণাদেশশ্ছান্দসঃ। বস্তুন এতান্ ধর্ম্মান্ জিঘৃক্ষতস্ত্বঙ্নির্ভিন্না। ত্বগিন্দ্রিয়াধিষ্ঠানং চর্ম্ম জাতমিত্যর্থঃ। তস্যাং রোমাণি ইন্দ্রিয়ম্, মহীরুহাশ্চ দেবতা জাতাঃ। বস্তুনি হস্তে-নাতোলিতে লঘুত্বগুরুত্বয়োর্জ্ঞানাৎ তয়োরপি ত্বগিন্দ্রিয়বিষয়ত্বমিতি পৌরাণিকাঃ। তত্র ত্বচি অন্তর্ব্বহিশ্চ বাতো বায়ুর্বৃতঃ আবৃত্য স্থিতঃ,

কর্ত্তরি নিষ্ঠা। কথম্ভূতঃ? ত্বচা লব্ধো গুণঃ স্পর্শো যেন; অয়মর্থঃ— ত্বগিন্দ্রিয়মেব বহিঃ কণ্ডূতিসহিতং স্পর্শং গৃহ্লৎ রোমশব্দেনোচ্যতে, তত্র মহীরুহাণাং দেবতাত্বম্, অন্তর্ব্বহিশ্চ স্পর্শং গৃহ্লৎ তদেব ত্বক্শব্দেনোচ্যতে, তত্র বাতো দেবতা; তথা চ তৃতীয়ে বক্ষ্যতি—'ত্বচমস্য বিনির্ভিন্নাং বিবিশুর্ধিষ্ণ্যমোষধীঃ। অংশেন রোমভিঃ কণ্ডূং যৈরসৌ প্রতিপদ্যতে॥ নির্ভিন্নান্যস্য চর্ম্মাণি লোকপালোঽনিলোঽবিশৎ। প্রাণেনাংশেন সংস্পর্শং যেনাসৌ প্রতিপদ্যতে॥' ইতি। তত্র চর্ম্মাণীতি চর্ম্মোপলক্ষিতা ত্বগিত্যর্থঃ, প্রাণেনাংশেনেতি প্রাণবায়ুব্যাপ্তেন ত্বগিন্দ্রিয়েণেত্যর্থঃ। বহ্বৃচশ্রুতৌ— 'ত্বেক এবাংশো নির্দ্দিষ্টঃ। ত্বঙ্ নিরভিদ্যত ত্বচো লোমানি লোমভ্য ওষধয়ো বনস্পতয়ঃ' ইতি॥

২৪। রুরুহতুর্নির্ভিন্নৌ; বলমিন্দ্রিয়ম্; ইন্দ্রো দেবতা; তদুভয়াশ্রয়মাদানং কর্ম্ম॥

২৫। অভিকামিকামভীষ্টাং বিহিতামিত্যর্থঃ। পদ্ভ্যাং সহ যজ্ঞো বিষ্ণুরেব স্বয়ং তদধিষ্ঠাতৃরূপেণ স্থিতঃ। কর্ম্মভিরিতি গত্যাখ্যকর্ম্মশক্তিরিন্দ্রিয়মুক্তম্। হব্যং ক্রিয়ত ইতি গতিপ্রাপ্যং যজ্ঞার্থং দ্রব্যং বিষয় ইত্যুক্তম্। নৃভিরিতি ব্যষ্টিজীবেষ্বপি ইয়মেব রীতিরিতি দর্শয়ন্ নরাধিকারত্বং যজ্ঞাদীনাং দর্শয়তি॥

২৬। প্রজা অপত্যম্, আনন্দো রতিঃ, অমৃতং স্বর্গাদি, তদর্থিনঃ। শিশ্নোঽধিষ্ঠানম্, উপস্থ ইন্দ্রিয়ম্, প্রজাপতিশ্চাসীদিতি জ্ঞেয়ম্। তদুভয়াশ্রয়ম্ ইন্দ্রিয়দেবতাশ্রয়ং কামানাং স্ত্রীসম্ভোগানাং সম্বন্ধি প্রিয়ং সুখম্॥

২৭। ধাতুমলং ভুক্তান্নাদীনামসারাংশং ত্যক্তুমিচ্ছোঃ। গুদপায়ুমিত্রোৎসর্গা অধিষ্ঠানেন্দ্রিয়দেবতাবিষয়াঃ, উভয়াশ্রয়ঃ পায়ুমিত্রাশ্রয়ঃ॥

২৮। পুর্য্যা দেহাৎ পুরো দেহান্তরাণি আসিসৃপ্সোঃ সর্ব্বতো গন্তুমিচ্ছোঃ নাভিদ্বারং নিরভিদ্যতেত্যনুষঙ্গঃ। অপানতঃ অপগচ্ছতঃ, পৃথক্ত্বং

মরণম্, নাভ্যাদীন্যধিষ্ঠানাদীনি, নাভ্যাং হি প্রাণাপানয়োর্বন্ধবিশ্লেষে মৃত্যুরিতি প্রসিদ্ধম্ ॥

২৯। অন্নপানানামাদিৎসোঃ সংগ্রহেচ্ছোঃ, কুক্ষিশ্চ অন্ত্রাণি চ নাড্যশ্চাসন্; অত্র কুক্ষিরধিষ্ঠানম্; অন্নসংগ্রহে অন্ত্রং করণমিন্দ্রিয়স্থানীয়ম্। নাড্যস্তু প্রাণসংগ্রহে; তয়োর্নাড্যন্ত্রবর্গয়োঃ ক্রমেণ নদ্যঃ সমুদ্রাশ্চ দেবতে। তুষ্টিরুদরভরণম্; পুষ্টিস্তু রসপরিণামতঃ স্থৌল্যম্; তদাশ্রয়ে তদুভয়নিমিত্তে। তত্রান্নসংগ্রহেচ্ছোঃ কুক্ষ্যন্ত্রসমুদ্রতুষ্টয় ইতি চতুষ্টয়ম্। পেয়সংগ্রহেচ্ছোঃ কুক্ষিনাড়ীনদীপুষ্টয় ইতি বিবেকঃ ॥

৩০। নিদিধ্যাসোর্নিতরাং চিন্তয়িতুমিচ্ছোঃ, কামোঽভিলাষঃ, হৃদয়মনশ্চন্দ্রসঙ্কল্পা অধিষ্ঠানাদয়ঃ ॥

৩১—৩২। তদেবমধিদৈবাদিভেদং বিভজ্যোক্ত্বা তদংশভূতানাং ধাত্বাদীনাং স্বরূপমাহ—ত্বগিতি দ্বাভ্যাম্। ত্বক্ স্থূলং চর্ম্ম, তদুপরি স্থিতং সূক্ষ্মম্। ত্বগাদয়োঽস্থ্যন্তাঃ দ্বন্দ্বৈকবদ্ভাবেন নির্দ্দিষ্টাঃ; সপ্ত যে ধাতবস্তে ভূম্যপ্তেজোময়স্তেষাং পাঞ্চভৌতিকত্বেঽপি বায়্বাকাশয়োরাহারাদিরূপত্বেন সংবর্দ্ধকত্বাভাবাদেবমুক্তম্[১] ॥ (৩২) গুণাত্মকানি গুণেষু শব্দাদিষু আত্মা যেষাম্, বিষয়াভিমুখস্বভাবানীত্যর্থঃ। গুণাঃ শব্দাদয়ঃ, ভূতাদিরহঙ্কারঃ, ততঃ প্রকর্ষেণ ভবন্তীতি তথা; অহঙ্কারকল্পিত-শোভনস্বভাবাঃ, ন তু বস্তুতস্তথেত্যর্থঃ। অত্র হেতুঃ—যতো মনঃ সর্ব্ববিকারাণামাত্মা স্বরূপম্; বুদ্ধিস্তু তথাভূতার্থবিজ্ঞানরূপিণী, ন তু পরমার্থগ্রাহিণীতি বৈরাগ্যার্থমুক্তম্। অনেনৈব বুদ্ধিমনসোঃ স্বরূপঞ্চোক্তম্ ॥

৩৩। উপসংহরতি—এতদিতি। প্রকৃত্যা সহাষ্টভিঃ ॥

৩৪। স্থূলমুক্ত্বা সূক্ষ্মং সমষ্টিলিঙ্গশরীরমাহ—অতঃ পরমস্য কারণভূতং সূক্ষ্মতমমতীন্দ্রিয়ং, যতোঽব্যক্তম্। তৎ কুতঃ? যতো নির্ব্বিশেষণম্।

১। সম্বন্ধত্বাভাবাদেবমুক্তম্ (ক)।

তৎ কুতঃ? অনাদিমধ্যনিধনমুৎপত্তিস্থিতিলয়শূন্যম্, নিত্যং সদৈকরূপম্, অপক্ষয়াদিশূন্যমিত্যর্থঃ। অতএব বাক্ চ মনশ্চেতি দ্বন্দ্বৈক্যম্, তস্মাৎ পরম্॥

৩৫। উপাসনার্থং ভগবত্যারোপিতং রূপদ্বয়মপবদতি—অমূনি ইতি। ন গৃহ্ণন্তি ন বস্তুতোঽঙ্গীকুর্ব্বন্তি, যতো মায়াসৃষ্টে॥

৩৬। 'যদ্রূপগুণকর্ম্মকঃ' ইতি যদুক্তং ভগবতা ব্রহ্মাণং প্রতি, তৎ প্রপঞ্চয়িতুং ব্রহ্মাদিরূপাণি তৎকর্ম্মাণি চাহ—স ইত্যাদিনা; ইত্থং ভাবেনেত্যতঃ প্রাক্তনেন গ্রন্থেন স ভগবান্ ব্রহ্মরূপধৃক্ সন্ বাচ্যবাচকতয়া, বাচকতয়া নামানি, বাচ্যতয়া রূপাণি ক্রিয়াশ্চ ধত্তে সৃজতীত্যর্থঃ। মায়য়া সকর্ম্মা সব্যাপারঃ সন্, বস্তুতস্তু অকর্ম্মকঃ॥

৩৭—৩৯। এতৎ প্রপঞ্চয়তি—প্রজাপতীনিতি সার্দ্ধৈস্ত্রিভিঃ। দ্বিতীয়ান্তানাং ধত্তে ইত্যনেনান্বয়ঃ। তত্র প্রজাপত্যাদীনি নামানি তদ্বাচ্যানি রূপাণি তৎকর্ম্মাণি চ জ্ঞেয়ানি। পৃথক্ তত্তদবান্তরভেদেন॥ (৩৯) গিরীনিত্যস্যানন্তরং নৃপেতি সম্বোধনম্। দ্বিবিধাঃ স্থাবরজঙ্গমরূপেণ, চতুর্ব্বিধা জরায়ুজাণ্ডজস্বেদজোদ্ভিজ্জরূপেণ, জলস্থলনভাংসি ওকাংসি যেষাং তানপি ধত্ত ইতি পূর্ব্বেণৈব সম্বন্ধঃ॥

৪০। যচ্চ রাজ্ঞা পৃষ্টং 'যাবত্যঃ কর্ম্মগতয়ো যাদৃশী দ্বিজসত্তম' ইতি, তস্যাপি প্রসঙ্গাদনেনৈবোত্তরমাহ—কুশলা উত্তমাঃ, অকুশলা নীচাঃ। মিশ্রা ইতি পদান্তরম্; মিশ্রাঃ মধ্যমাঃ; কর্ম্মণাং পুণ্যাপুণ্যমিশ্রাণাং গতয়ঃ ফলানি॥

৪১। সত্ত্বাদিভেদেন কর্ম্মগতিবৈচিত্র্যং প্রপঞ্চয়তি—সত্ত্বমিতি সার্দ্ধেন, সত্ত্বাদয়স্তিস্রো গতয়ঃ; সুরাদিশব্দা ঋষ্যাদীনামুপলক্ষণার্থাঃ। অন্যাভ্যাং গুণাভ্যাং স্বভাবো গুণ উপহন্যতে অনুবিধ্যতে॥

৪২। ব্রহ্মরূপেণ স্রষ্টৃত্বমুক্ত্বা বিষ্ণুরূপেণ পালকত্বমাহ—স এব ভগবান্ তির্য্যগাদ্যবতারৈরিদং বিশ্বং স্থাপয়ন্ পালয়ন্ ধর্ম্মরূপেণ পুষ্ণাতি, ভোগৈঃ সংবর্দ্ধয়তি ॥

৪৩। রুদ্ররূপেণ সংহর্ত্তৃত্বমাহ—তত ইতি। আত্মনঃ সকাশাদ্‌যদিদং সৃষ্টং, তৎ সন্নিযচ্ছতি সংহরতি ॥

৪৪। কর্ত্তৃত্বাদ্যপবাদেন দশমস্য শুদ্ধিমাহ—ইত্থং ভাবেন স্রষ্টৃত্বাদি-রূপেণ, 'তস্মাদ্বা এতস্মাদাত্মন আকাশঃ সম্ভূতঃ, সোঽকাময়ত, বহু স্যাং প্রজায়েয়' ইত্যাদিশ্রুত্যা কথিতঃ। সূরয়স্তু পরং কেবলমেবংরূপেণৈব দ্রষ্টুং নার্হন্তি ॥

৪৫। তৎ কিম্? যতঃ অস্য বিশ্বস্য জন্মাদৌ কর্ম্মণি পরমেশ্বরস্য ইত্থংভাবঃ কর্ত্তৃত্বং নাস্তি। শ্রুত্যাপি তাৎপর্য্যেণ ন প্রতিপাদ্যতে, কিন্তু অনুবিধীয়তে অনুবর্ণ্যতে। কিমর্থম্? কর্ত্তৃত্বপ্রতিষেধার্থম্; হি যতঃ মায়য়া তদারোপিতং প্রকাশিতম্; তথা চ শ্রুতিঃ—'নিষ্কলং নিষ্ক্রিয়ং শান্তং নিরবদ্যং নিরঞ্জনম্', 'ইন্দ্রো মায়াভিঃ পুরুরূপ ঈয়তে' ইত্যাদ্যা ॥

৪৬। উক্তমর্থমুপসংহরতি—অয়ন্ত্বিতি। ব্রহ্মণঃ সম্বন্ধী কল্পো মহা-কল্পো বিকল্পোঽবান্তরস্তৎসহিতঃ, উদাহৃত উদাহরণত্বেন সংক্ষেপত উক্তঃ। কথম্ভূতঃ? যত্র মহাকল্পে প্রাকৃতা মহদাদিসর্গাঃ, অবান্তরকল্পে চ বৈকৃতাঃ স্থাবরাদিসর্গা ইত্যয়ং বিধিঃ প্রকারোঽন্যৈর্মহাকল্পাদিভিঃ সাধারণঃ ॥

৪৭। বক্ষ্যমাণং বিস্তারং প্রতিজানীতে—পরিমাণং স্থূলং সূক্ষ্মঞ্চ, কল্পস্য লক্ষণম্ ইয়ান্ এবংরূপ ইতি, তদ্বিগ্রহমবান্তরকল্প-মন্বন্তরাদিরূপং বিভাগঞ্চ, যথাবৎ বিস্তরেণ পুরস্তাৎ তৃতীয়স্কন্ধে ব্যাখ্যাস্যামি। তত্র চ পাদ্মং কল্পম্, অথো ইতি কাৎস্ন্যেন ব্যাখ্যায়মানং শৃণু ॥

৪৮। যদর্থং স্বষ্ট্যাদিনিরূপণং, তদেব সাক্ষাৎ শ্রোতুকামঃ কথান্তরং পৃচ্ছতি—যদাহেতি। ক্ষত্তা বিদুরঃ, ভুবঃ সম্বন্ধীনি তীর্থানি, যদ্বা, ভুবঃ ক্ষেত্রাণি চেতি ॥

৪৯। কৌশারবের্মৈত্রেয়স্য, তস্য ক্ষত্তুশ্চ, অধ্যাত্মজ্ঞানসংশ্রিতঃ সংবাদঃ ॥

৫০। পুনরাগতবান্, তত্র চ নিমিত্তং ব্রূহি ॥

৫১। রাজ্ঞা পৃষ্ট ইতি ; অয়মর্থঃ—যদ্যূয়ং পৃচ্ছথ, ইদমেব রাজাপি শুকং পৃষ্টবান্। শুকোঽপি বিদুরমৈত্রেয়সংবাদং পুরস্কৃত্য যে পূর্ব্বং রাজ্ঞা কৃতাঃ প্রশ্নাস্তদনুসারেণ সর্ব্বং পুরাণার্থমবোচৎ। তদেবাহং বোঽভিধাস্যামি, তথৈব শৃণুতেতি ॥

শ্রীমদ্ভাগবতং যেন স্বব্রহ্মমুখতোঽমৃতম্।
ব্রহ্মনারদয়োঃ প্রোক্তং তং বন্দে গুরুমীশ্বরম্ ॥ (২)

যৎসূত্রযন্ত্রিতং বিশ্বং নরীনর্ত্তি জগত্রয়ম্।
সন্তস্তমেব পৃচ্ছন্তু যদত্র স্খলিতং মম ॥ (৩)

দ্বিতীয়স্কন্ধসম্বন্ধি-পদভাবার্থদীপিকা।
উদ্দীপ্যতামিয়ং সদ্ভির্যথা স্যাত্তত্ত্বদীপিকা ॥ (৪)

ঈক্ষন্তামিচ্ছয়া সন্তঃ ক্ষমন্তাং মম সাহসম্।
ময়া হি স্বীয়বোধায় কৃতমেতন্ন সর্ব্বতঃ ॥ (৫)

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং শ্রীধরস্বামি-বিরচিতায়াং
দ্বিতীয়স্কন্ধটীকায়াং দশমোঽধ্যায়ঃ ॥ ১০ ॥

দ্বিতীয়স্কন্ধঃ সম্পূর্ণঃ।

তৃতীয়ঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

তৃতীয়ে তু ত্রয়স্ত্রিংশদধ্যায়ৈঃ সর্গবর্ণনম্।
ঈশেচ্ছয়া গুণক্ষোভাৎ সর্গো ব্রহ্মাণ্ডসম্ভবঃ॥ (১)

তত্র তু প্রথমেঽধ্যায়ে বন্ধূন্ হিত্বা গতায়ুষঃ।
নির্গতস্যোদ্ধবেনাদৌ সংবাদঃ ক্ষত্তুরুচ্যতে॥ (২)

ভগবদ্ব্রহ্মসম্প্রোক্তং সংক্ষিপ্তং বর্ণিতং পুরা।
প্রাহ ভাগবতং শেষ-প্রোক্তং বিস্তরতঃ পুনঃ॥ (৩)

১—২। দ্বেধা হি শ্রীমদ্ভাগবতসম্প্রদায়প্রবৃত্তিঃ—একতঃ সংক্ষেপতঃ শ্রীনারায়ণাদ্ ব্রহ্মনারদাদিদ্বারেণ, অন্যতস্তু বিস্তরতঃ শেষাৎ সনৎকুমার-সাংখ্যায়নাদিদ্বারেণ। তত্র দ্বিতীয়স্কন্ধে শ্রীনারায়ণব্রহ্মসংবাদেন সংক্ষেপতঃ 'অহমেবাসম্' ইত্যাদি-চতুঃশ্লোক্যা শ্রীভাগবতং নিরূপিতম্, তদেব ব্রহ্ম-নারদসংবাদেন দশলক্ষণতয়া কিঞ্চিদ্বিস্তরেণোক্তম্, তদেব শেষোক্তমতি-বিস্তরতো বক্তুং তৃতীয়াস্যারম্ভঃ। অত্র তৃতীয়ে প্রথমং ক্ষত্তুর্মৈত্রেয়-সঙ্গমশ্চতুর্ভিরধ্যায়ৈঃ, ততোঽষ্টভিঃ সবিসর্গঃ সর্গপ্রপঞ্চঃ, ততো বিসর্গ-প্রস্তাবেন সপ্তভির্বরাহাবতারঃ, তত একেন বিসর্গসমাহারঃ, তৎপ্রসঙ্গেন চতুর্ভিঃ কপিলাবতারঃ, ততো নবভিঃ কপিলাখ্যানমিতি ত্রয়স্ত্রিংশদধ্যায়ৈ-স্তৃতীয়স্কন্ধপ্রবৃত্তিঃ। তত্র দ্বিতীয়ান্তে—'পরিমাণঞ্চ কালস্য কল্পলক্ষণবিগ্রহম্।

যথা পুরস্তাদ্ব্যাখ্যাস্তে পাদ্মং কল্পমথো শৃণু ॥' ইতি প্রতিজ্ঞাতমর্থং বিস্তরেণ নিরূপয়িতুমিতিহাসং প্রস্তৌতি ভগবান্ শুকঃ—এবমিতি দ্বাভ্যাম্। ঋদ্ধিমৎ সর্ব্বসম্পত্তি[১]-সম্পূর্ণম্ ॥ (২) কিঞ্চাতিশ্লাঘ্যং ত্যাগানর্হমিত্যাহ—যদ্বৈ প্রসিদ্ধং গৃহং বঃ পাণ্ডবানাং মন্ত্রকৃৎ দৌত্যকর্ত্তা সন্ অয়ং শ্রীকৃষ্ণঃ; বুদ্ধিসন্নিধানাদয়মিতি নির্দ্দেশঃ। পৌরবেন্দ্রো দুর্য্যোধনস্তস্য গৃহং হিত্বা অনাহূত এব প্রবিবেশ। তত্র হেতুঃ—আত্মসাৎকৃতমাত্মীয়ত্বেন গৃহীতম্ ॥

৩। কুত্র ক্ষত্তুর্মৈত্রেয়েণ সঙ্গমঃ সংবাদো বা আস বভূব ?

৪। বরীয়সি শ্রেষ্ঠে অল্পস্যার্থস্যোদয়ো যস্মাত্তথাভূতো ন ভবতি। সাধুবাদেন সতামনুমোদনেন উপবৃংহিতঃ সংবর্দ্ধিতঃ; যদ্বা, সাধো-র্মৈত্রেয়স্য বাদেনোত্তরেণ শ্লাঘিত ইত্যর্থঃ ॥

৬—১৫। ত্যাগানর্হস্যাপি গৃহস্য ত্যাগে হেতুত্বেন কৌরবাপরাধানাহ—যদেত্যাদিদশভিঃ। এতেষাঞ্চ স তদা ক্ষত্তা অযাদিত্যেকাদশে ক্রিয়া-সম্বন্ধঃ। যবিষ্ঠস্য কনিষ্ঠস্য পাণ্ডোঃ, বিবন্ধূন্ পিতৃহীনান্ ॥ (৭) কুরুদেবস্য যুধিষ্ঠিরস্য দেব্যা দ্রৌপদ্যাঃ, আত্মনঃ স্নুষায়াঃ স্বীয়ৈরস্রৈরশ্রুভিঃ স্বকুচ-কুঙ্কুমানি রিপুস্ত্রীণাং বা তদ্ভর্তৃবধেন হরন্ত্যাঃ ॥ (৮) সত্যাবলম্বস্য সত্যাশ্রয়স্য, বনাৎ প্রত্যাগতস্য[২], সময়েন পূর্ব্বকৃতেন, দায়ং ভাগং, যাচমানস্য যৎ যদা; ন অদাৎ ন দদৌ, তমঃ মোহং জুষমাণঃ ॥ (৯) যানি চ বচনানি পুংসাং ভীষ্মাদীনামমৃতায়নানি অমৃতশ্রাবীণি, রাজা ধৃতরাষ্ট্রঃ দুর্য্যোধনো বা উরু বহু ন মেনে। ক্ষতো নষ্টঃ পুণ্যলেশো যস্য সঃ; ন সুখকীর্ত্তিধর্ম্মাদিহেতুঃ, কিন্তু রাজ্যপ্রাপ্তিমাত্রহেতুঃ পুণ্যলেশ এবাসীৎ। তস্যাপি নষ্টত্বাৎ ন আদৃতবানিত্যর্থঃ ॥ (১০—১৫) ইদানীং বিদুরস্যৈব কৃতং পরাভবং দর্শয়তি ষড়্‌ভিঃ। যদা পূর্ব্বজেন ধৃতরাষ্ট্রেণ মন্ত্রায়োপ-হূতোঽন্তর্গৃহং প্রবিষ্টো মন্ত্রং পৃষ্টঃ সন্ অথানন্তরং তদাহ। কিং তৎ ?

১। সর্ব্বসম্পত্তিঃ (ঘ); ২। প্রত্যাগত্য (ঘ)।

মন্ত্রিণোঽন্থাপি যদ্বৈত্বরিকং বিত্বরবাক্যমিতি প্রসিদ্ধং বদন্তি॥ (১১—১৩) তদেবাহ—অজাতশত্রোরিতি ত্রিভিঃ। তব আগঃ অপরাধং সহমানস্য দায়ং প্রতিযচ্ছ দেহি। যত্রাপরাধে অনুজৈঃ সহ বর্ত্তমানো বৃকোদর-রূপোঽহিঃ সর্পঃ ক্রোধেন শ্বসন্ বর্ত্ততে ; যদ্ যস্মাৎ ত্বমলমত্যর্থং বিভেষি॥ (১২) মম তাদৃশা বহবঃ পুত্রাঃ সন্তীতি গর্ব্বং মা কৃথা ইত্যাহ—পার্থাংস্তু মুকুন্দ আত্মীয়ত্বেন গৃহীতবান্। স চ দেবঃ, তথাপি ভগবান্, ন তু প্রাকৃতঃ ; কিঞ্চ, সহ ক্ষিতিদেবৈর্বিপ্রৈঃ দেবৈশ্চেন্দ্রাদিভির্বর্ত্তমানঃ, যত্রাসৌ কৃষ্ণস্তত্রৈব বিপ্রা দেবাশ্চ ইত্যর্থঃ। স চ স্বপুর্য্যামেব সুখমাস্তে, ন ত্বন্যত্র গতঃ ; কিঞ্চ, যদুদেবানাং দেবঃ পূজ্যঃ, যতোঽসৌ কৃষ্ণস্তত্রৈব যদুপ্রবরা ইত্যর্থঃ কিঞ্চ, নৃদেবেষু মণ্ডলেশ্বরেষু দীপ্যন্তি প্রকাশন্তে ইতি নৃদেবদেবা রাজানঃ, বিনির্জ্জিতা অশেষা নৃদেবদেবা যেন ; যতোঽসৌ, তত্রৈব সর্ব্বে রাজানঃ, অতঃ পার্থানাং দায়ং দেহীতি॥ (১৩) নন্নু দুর্য্যোধনস্তন্ন মন্যত ইতি চেদত আহ—স এষ মূর্ত্তো দোষ এব গৃহান্ প্রবিষ্ট আস্তে ; দোষত্বে হেতুঃ—পুরুষদ্বিট্ শ্রীকৃষ্ণদ্বেষ্টা। কোঽসৌ ? যং ত্বম-পত্যমত্যা পুষ্ণাসি, ন ত্বপত্যমসৌ ; ন পতত্যস্মাদিতি হ্যপত্যং প্রাহুঃ। গতা শ্রীর্যস্মাৎ স ত্বমিত্যাক্রোশতি, অত এনমশৈবমমঙ্গলমাশু ত্যজ। নন্নু কথং পুত্রস্ত্যাজ্যঃ ? তত্রাহ—কুলস্য কৌশলায়, 'ত্যজেদেকং কুলস্যার্থে' ইতি ন্যায়াৎ॥ (১৪) ইত্যূচিবান্ এবমুক্তবান্, অসৌ ক্ষত্তা বিত্বরঃ ; সতাং স্পৃহণীয়ং শীলং যস্য সঃ ; কর্ণত্বঃশাসন-শকুনিসহিতেন দুর্য্যোধনেনাসৎকৃতঃ তিরস্কৃতঃ॥ (১৫) তিরস্কারমাহ—ক ইতি। দাসীসুতো হ্যত্রাহ্বানানর্হঃ, জিহ্মঃ কুটিলঃ ; জিহ্মতামাহ—যস্য বলিনা অন্নেন পুষ্টস্তস্মিন্নেব প্রতীপঃ প্রতিকূলঃ পরেষাং কার্য্যে বর্ত্ততে, অতঃ পুরান্নির্ব্বাস্যতাম্। শ্বসানঃ শ্বসন্ জীবমাত্রাবশেষ ইত্যর্থঃ ; শ্মশান ইতি পাঠে শ্মশানবদমঙ্গলঃ ; সর্ব্বধনাদি গৃহীত্বা নির্ব্বাস্যতামিত্যর্থঃ॥

১৬। অত্যুল্বণৈঃ কর্ণবাণৈঃ কর্ণয়োর্বাণবৎ প্রবিশদ্ভিঃ পরুষবাক্যৈঃ মর্ম্মসু তাড়িতোঽপি গতব্যথঃ ; তত্র হেতুঃ—মায়ামুরু বহু মানয়ন্, অহো মায়ায়া মাহাত্ম্যমিতি। তামেব তত্র হেতুং মন্যমানঃ, তন্নিঃসারণাৎ পূর্ব্বং স্বয়মেব অয়াৎ নির্জ্জগাম। কিং কৃত্বা ? এতে নূনং মরিষ্যন্তি, কিং ধনুষেতি তস্য দ্বারি ধনুর্নিধায় ; যদ্বা, ভীমাদিভিঃ সঙ্গত্যাস্মাভির্যোৎস্যত ইতি মা শঙ্কিষ্টেতি ধনুর্নিধানম্॥

১৭—২৪। ততো নির্গতস্য তীর্থাটনপ্রকারমাহ—স ইত্যষ্টভিঃ ; স গজাহ্বয়াৎ নির্গতঃ সন্, তীর্থং পাদৌ যস্য, তস্য হরেঃ পদানি ক্ষেত্রাণি পুণ্যচিকীর্ষয়া অন্বাক্রামৎ প্রত্যপদ্যত। কৌরবাণাং পুণ্যেন লব্ধ ইতি তেষাং ভাগ্যমেব ; তেন রূপেণ গতমিতি সূচিতম্। উর্ব্ব্যাং সহস্রমূর্ত্তি-ব্রহ্মরুদ্রাদ্যনেকমূর্ত্তিঃ সন্ তীর্থপাৎ যানি যানি অধিষ্ঠায় স্থিতঃ, তানি তানি জগামেত্যর্থঃ॥ (১৮) পুণ্যানি যান্যুপবনাদীনি তেষু ; কুঞ্জং লতাদি-গূঢ়ং স্থানম্ ; অপঙ্কানি তোয়ানি যেষাং তেষু, সরিৎসরঃসু চ, তীর্থেষু আয়তনেষু চ ক্ষেত্রেষু। কীদৃশেষু ? অনন্তস্য লিঙ্গৈর্মূর্ত্তিভিঃ সমলঙ্কৃতেষু। অনন্য একাকী॥ (১৯) কিঞ্চ গাং পর্য্যটন্ হরিতোষণানি ব্রতানি চেরে অচরৎ। মেধ্যা পবিত্রা, বিবিক্তা অসঙ্কীর্ণা বৃত্তির্জীবিকা যস্য, সদাপ্লুতঃ প্রতিতীর্থং স্নাতঃ, অধঃ শয়নং যস্য, অবধূতোঽসংস্কৃতদেহঃ, অবধূতবেশো বল্কলাদিধারী, অতএব স্বৈরলক্ষিতঃ॥ (২০) একস্যৈব চক্রং সৈন্যং যস্যাম্, একমেব রাজচিহ্নং শ্বেতাতপত্রং যস্যাং তাম্ ; অজিতেন শ্রীকৃষ্ণেন সহায়েন॥ (২১) তত্র প্রভাসে, পরস্পরসংস্পর্দ্ধয়া নিমিত্তভূতয়া সুহৃদাং কৌরবাণাং বিনষ্টিং বিনাশমশৃণোৎ। পরস্পরনাশে দৃষ্টান্তঃ—বেণুজং বহ্নিং সংশ্রয়তে যদ্বনং, তৎ যথা দগ্ধং ভবতি, তথা। প্রত্যক্ উদগমাভিমুখম্॥ (২২) ত্রিতাদীনামেকাদশ তীর্থানি তত্তন্নাম্না প্রসিদ্ধানি আসেবিতবান্॥ (২৩) দ্বিজদেবৈঋষিভিঃ দেবৈশ্চ কৃতানি ; অঙ্গমঙ্গং প্রতি বর্ত্তন্তে

ইতি প্রত্যঙ্গান্যায়ুধানি, তেষু মুখ্যং চক্রং, তেনাঙ্কিতানি মূর্দ্ধন্যহেমকুম্ভেষু চিহ্নিতানি মন্দিরাণি যেষু তানি, নানাবিধানি বিষ্ণোরায়তনানি ক্ষেত্রাণি, তীর্থানি চ আসিষেবে—যেষাং চক্রাঙ্কিতমন্দিরাণাং[১] দর্শনাৎ শ্রীকৃষ্ণস্মরণং ভবতি ॥ (২৪) অতিব্রজ্য অতিক্রম্য যাবদুদ্ধবঃ প্রাপ্তঃ, তাবৎ স্বয়মপি যমুনামুপেত্য ॥

২৫। স বিদুরঃ, প্রাক্তনয়ং পূর্ব্বশিষ্যং নীতিশাস্ত্রে ; প্রাপ্তনয়মিতি পাঠে প্রাপ্তো নয়ো নীতিশাস্ত্রং যেন তম্, প্রতীতং প্রখ্যাতম্, স্বানাং জ্ঞাতীনাং ভদ্রমপৃচ্ছৎ। প্রশ্নে হেতুঃ—ভগবতঃ প্রজানাং পোষ্যাণাম্ ॥

২৬। প্রথমং তাবৎ রামকৃষ্ণয়োঃ কুশলং পৃচ্ছতি ; কচ্চিদিতি প্রশ্নে। স্বনাভৌ ভবঃ স্বনাভ্যঃ, পাদ্মো ব্রহ্মা, তস্যানুবৃত্ত্যা প্রার্থনয়া ইহাবতীর্ণৌ কুশলমাসাতে বর্ত্তেতে। কৃতক্ষণৌ দত্তাবসরৌ সর্ব্বেষাং কৃতোৎসবাবিতি বা ; তয়োর্নিত্যকুশলত্বেঽপি উক্তবিশেষণবিশিষ্টৌ শূরসেনগেহে কচ্চিদাসাতে ইতি প্রশ্নঃ ॥

২৭—৩৫। যদূনাং কুশলং পৃচ্ছতি নবভিঃ। ভামঃ পূজ্যঃ, শৌরির্বসুদেবঃ ; যদ্বা, ভামো ভগিনীভর্ত্তা, কুন্তী বসুদেবস্য ভগিনী, অতো দেবকী পাণ্ডোর্ভগিনীতি লোকব্যবহারঃ। বরান্ অর্থান্, দদাতি অদাৎ, বদান্যঃ অত্যুদারঃ। বরাণাং তৎপত্নীনাং তর্পণেন সন্তোষণেন সহ ॥ (২৮) বরূথাধিপতিঃ সেনানীঃ, আদিসর্গে পূর্ব্বজন্মনি স্মরং কামং সন্তমভিলেভে পুত্রং লব্ধবতী ॥ (২৯) সাত্বতাদীনামধিপ উগ্রসেনঃ, শতপত্রনেত্রঃ শ্রীকৃষ্ণঃ, নৃপাসনাশাং রাজ্যাভিলাষং পরিহৃত্য প্রাণভয়েন দূরাৎ স্থিতমিত্যর্থঃ॥ (৩০) হে সৌম্য ! হরেঃ সুতস্তেন সদৃক্ষঃ সদৃশঃ সাধু সুখমাস্তে ? গুহং কার্ত্তিকেয়ম্, অগ্রে পূর্ব্বজন্মনি যো ভবান্যা গর্ভে ধৃতস্তম্ ॥ (৩১) যুযুধানঃ সাত্যকিঃ ক্ষেমং কুশলমাস্তে ? ফাল্গুনাদর্জ্জুনাল্লব্ধং ধনুষো রহস্যং

১। -মন্দিরবতাং (খ, ঘ)।

যেন ; তদীয়ামধোক্ষজসম্বন্ধিনীম্ ॥ (৩২) শ্বফল্কপুত্রোঽক্রূরঃ, বুধো বিদ্বান্, অতো ভগবন্তং প্রপন্নোঽনুস্মৃতঃ, অতএব অনমীবো নিষ্পাপঃ। ভক্তৌ লিঙ্গম্—যোঽচেষ্টত ব্যলুঠৎ, প্রেম্ণা বিভিন্নং বিদীর্ণং ধৈর্য্যং যস্য সঃ স্বস্তি ক্ষেমমাস্তে ? (৩৩) দেবকনামা যো ভোজঃ, তস্য পুত্র্যাঃ দেবক্যাঃ, বিষ্ণুঃ প্রজা পুত্রো যস্যাস্তস্যাঃ দেবমাতুরদিতেরিব কচ্চিৎ শিবম্ ? যজ্ঞবিতানরূপমর্থং ত্রয়ী যথা প্রকাশকতয়া বিভর্ত্তি, তথা দধার ॥ (৩৪) সাত্বতানামুপাসকানাম্, কামান্ দোগ্ধি পূরয়তীতি কামদুঘঃ। ভগবত্ত্বে হেতুঃ—যং শব্দস্য যোনিং কারণমামনন্তি বেদাঃ। কুতঃ ? মনোময়ং মনসঃ প্রবর্ত্তকম্। তৎ কুতঃ ? সত্ত্বস্যান্তঃকরণস্য চতুর্ব্বিধস্য তুরীয়ং তত্ত্বং চতুর্থমধিদৈবম্। চিত্তাহঙ্কারবুদ্ধিমনসামন্তঃকরণভেদানাং ক্রমেণ বাসুদেব-সঙ্কর্ষণ-প্রদ্যুম্নানিরুদ্ধা হ্যধিষ্ঠাতারঃ। মনসঃ শব্দযোনিত্বং প্রসিদ্ধম্, 'মনঃ পূর্ব্বরূপং বাগুত্তররূপম্' ইতি শ্রুতেঃ, তথা 'অন্যোঽন্তর আত্মা মনোময়ঃ ইতি প্রস্তুত্য তস্য যজুরেব শিরঃ ঋগ্ দক্ষিণঃ পক্ষঃ, সামোত্তরঃ পক্ষঃ' ইত্যাদিশ্রুতেঃ ; তথা চ শিক্ষায়াম্—'আত্মা বুদ্ধ্যা সমেত্যার্থান্ মনো যুঙ্ক্তে বিবক্ষয়া। মনঃ কামাগ্নিমাহন্তি[১] স প্রেরয়তি মারুতম্। মারুতস্তূরসি চরন্ মন্দ্রং জনয়তি স্বরম্' ইত্যাদি ॥ (৩৫) হে সৌম্য ! অপিস্বিৎ কিংস্বিৎ অন্যে চ স্বস্তি চরন্তি ? নিজস্য দেহাদি-ব্যতিরিক্তস্য আত্মনো দৈবং শ্রীকৃষ্ণমনন্যবৃত্ত্যা একান্তভাবেন যে সম্যগনু-ব্রতা অনুস্মৃতাঃ ; হৃদীকশ্চ সত্যভামায়া আত্মজশ্চ চারুদেষ্ণশ্চ গদ-শ্চাদির্যেষাং, তেঽপি ॥

৩৬—৪১। ইদানীং কুরূন্ পৃচ্ছতি ষড়্ভিঃ—অপি কিং স্বদোর্ভ্যাং স্ববাহুবদ্বর্ত্তমানাভ্যাং বিজয়াচ্যুতাভ্যামর্জ্জুনকৃষ্ণাভ্যাং ধর্ম্মমার্গেণ, ধর্ম্মো যুধিষ্ঠিরঃ, সেতুং ধর্ম্মমর্য্যাদাং পরিপাতি ? যস্য সভায়াং বিজয়ানুবৃত্ত্যা

১। কায়াগ্নিমাহন্তি (ঘ)।

জয়পরম্পরয়া অর্জ্জুনস্থ সেবয়েতি বা, এবম্ভূতং যস্তৈশ্বর্য্যমিত্যর্থঃ ॥ (৩৭) কৃতাঘেষু কৃতাপরাধেষু কুরুষু স্বকর্ত্তৃকমঘং দীর্ঘতমং বহুকালানুচিন্তিতম্ অহিবদত্যমর্ষী ভীমঃ কিং ব্যমুঞ্চৎ, নো বা ? গদায়া বিচিত্রং বিবিধং মার্গং চরতঃ ॥ (৩৮) রথযূথপানাং মধ্যে যশোধাঃ কীর্ত্তিধারী, যদ্বা, স্বীয়ানাং তেষাং কীর্ত্তিপ্রদঃ ; উপরতা অরয়ো যস্মাৎ ; যস্ত শরকূটেন বাণসমূহেন গূঢ় আচ্ছন্নস্ততোষ ॥ (৩৯) উতস্বিৎ কিংস্বিৎ, যমৌ নকুলসহদেবৌ রেমাতে ক্রীড়ত ইত্যর্থঃ। মাদ্র্যাঃ সুতাবপি পৃথায়াস্তনয়ৌ পৃথায়াঃ পুত্রৈ-র্বৃতৌ আবৃতৌ সুপর্ণাবিব রেমাতে ? কিং কৃত্বা ? পরাৎ দুর্য্যোধনাৎ স্বরিক্থং স্বীয়ং রাজ্যমুদ্দায় আচ্ছিদ্য বজ্রিবক্ত্রাৎ ইন্দ্রস্ত মুখাৎ স্বরিক্থ-মমৃতং গরুড় ইবেতি ; যদ্বা, সুপর্ণাবিবেতি যদি দ্বৌ গরুড়াবমৃতমানয়েতাং, তর্হি তদ্বৎ ; অক্ষিণীবেতি মণীবাদিগণত্বাৎ সন্ধিঃ ॥ (৪০) অহো পৃথায়াঃ কিং কুশলং পৃচ্ছেয়ম্ ? যতস্তস্যাঃ পাণ্ডুনা বিনা প্রাণধারণমেবাশ্চর্য্য-মিত্যাহ—অহো ইতি। ধ্রিয়তে জীবতি, ন চাত্রাশ্চর্য্যম্, যতোঽর্ভকার্থে ধ্রিয়তে, ন ভোগার্থম্। তথাপি ত্বাশ্চর্য্যমিত্যাহ—তেন তথাভূতেন বিনা। তদেবাহ—যস্ত্বিতি। ধনুরেব দ্বিতীয়ং সহায়ো যস্ত ॥ (৪১) পৃথা অর্ভকার্থে জীবতীতি যুক্তমেবেত্যাহ—হে সৌম্য ! তং ধৃতরাষ্ট্রং জীবন্তমনুশোচামি। তৎ কিম্ ? যতঃ অধঃ পতন্তম্। তত্র হেতুঃ—পরেতায় মৃতায় ভ্রাত্রে পাণ্ডবে তৎপুত্রদ্রোহেণ যো বিদুদ্রুহে দ্রোহং কৃতবান্। কিঞ্চ, জীবতোঽপি ভ্রাতুর্মমাপকৃতবানিত্যাহ—যেন সুহৃৎ ভ্রাতা অহঞ্চ স্বপুর্য্যাঃ সকাশান্নির্যাপিতঃ নির্ব্বাসিতঃ ॥

৪২। অহো খলু বিস্ময়ঃ, জানতোঽপি তস্যৈবং দুশ্চেষ্টিতম্, যতস্ত্বং সাধুরপি দুঃখং প্রাপিতোঽসীতি, অত আহ—সোঽহং হরেঃ প্রসাদাত্তস্য পদবীং মাহাত্ম্যং পশ্যন্ গতবিস্ময়ঃ। অত্র ভূতলে নান্যোপলক্ষ্যো গূঢ়ঃ সন্

সুখং বিচরামি। কথম্ভূতস্য? মর্ত্ত্যবিড়ম্বনেন ঐশ্বর্য্যাচ্ছাদকেন মনুষ্যানুকরণেন নৃণাং দৃশশ্চিত্তবৃত্তীশ্চালয়তো ভ্রাময়তঃ ॥

৪৩। ননু হরেঃ কিমেবং লীলয়া, যেন স্বভক্তানাং বনবাসাদিক্লেশা ভবন্তি, স্বস্য চ দৌত্যে বন্ধনোত্থমাদি-পরাভবঃ? তদ্বরং তেষামপরাধানন্তরমেব হননম্, নাপরাধোপেক্ষেত্যত আহ—নূনং নিশ্চিতং, ত্রিভির্মদৈরুৎপথানামসদ্‌বৃত্তানাং বধাদ্ধেতোঃ প্রপন্নানামার্ত্তিজিহীর্ষয়া ঈশোঽঘসময় এব হন্তুং সমর্থোঽপি কুরূণামঘমুপৈক্ষত; তদানীমেব তেষাং বধে সর্ব্বদুষ্টরাজবধো ন স্যাদিত্যাশয়েনেত্যর্থঃ। 'বিদ্যামদো ধনমদস্তথৈবাভিজনো মদঃ। এতে মদা মদান্ধানামেত এব সতাং দমাঃ॥' ইতি ত্রয়ো মদাঃ॥

৪৪। সর্ব্বদুর্ব্বৃত্তবধার্থমেব ভগবতো জন্মকর্ম্মাণি নান্যথেতি কৈমুত্যন্যায়েনাহ—অজস্যাপি জন্ম, অকর্ত্তুরপি কর্ম্মাণি পুংসাং গ্রহণার্থায় কর্ম্মসু প্রবৃত্তয়ে; অন্যথা ন চেদেবং, তর্হি ভগবতো জন্মাদিকথা তাবদাস্তাম্, কো বান্যোঽপি গুণানাং পরো গুণাতীতো দেহযোগং কর্ম্মবিস্তারঞ্চার্হতীতি॥

৪৫। তস্মাদেবম্ভূতাচিন্ত্যমায়াবিনোদস্য কথাং কথয়েত্যাহ—তস্য প্রপন্না যেঽখিললোকপাস্তেষামন্যেষাঞ্চ স্বীয়ে অনুশাসনে স্থিতানামর্থায় প্রয়োজনায় যদুষু জাতস্য; তীর্থং সংসারতারিণী কীর্ত্তির্যস্যেতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে

প্রথমোঽধ্যায়ঃ॥ ১॥

দ্বিতীয়োঽধ্যায়ঃ

দ্বিতীয়ে কৃষ্ণবিশ্লেষাদনুশোচন্নথোদ্ধবঃ।
ক্ষত্রে বালচরিত্রাণি কৃষ্ণস্যাবর্ণয়ৎ শ্বসন্॥ (১)

১—৬। তদেবং প্রিয়বার্ত্তাং পৃষ্টস্য উদ্ধবস্য শ্রীকৃষ্ণবিরহোৎকণ্ঠ্যাবেশেন প্রতিবচনাসামর্থ্যমাহ ষড়্ভিঃ—ইতীতি। স্মারিত ঈশ্বরো যস্য॥ (২—৩) এতদেব কৈমুত্যন্যায়েন প্রপঞ্চয়তি—য ইতি দ্বাভ্যাম্। যঃ পঞ্চবর্ষোঽপি, বাললীলয়েতি কৃষ্ণং কঞ্চিৎ পরিকল্প্য পরিকল্পিতৈরেব সাধনৈঃ পরিচর্য্যাং কুর্ব্বন্, মাত্রা প্রাতর্ভোজনার্থং প্রার্থিতোঽপি তদ্ভোজনং নৈচ্ছৎ। জরসং বৃদ্ধত্বং গতঃ প্রাপ্তঃ॥ (৪) শ্রীকৃষ্ণাঙ্ঘ্রিসুধয়া সাধু নির্বৃতঃ। তস্যামেব তীব্রেণ বিবশত্বাপাদকেন ভক্তিযোগেন ভৃশং নিমগ্নশ্চ॥ (৫) পুলকৈরুদ্ভিন্নানি উজ্জৃম্ভিতানি সর্ব্বাণ্যঙ্গানি যস্য সঃ; মীলন্ত্যা দৃশা শুচঃ অশ্রূণি মুঞ্চন্; তেন বিদুরেণ পূর্ণার্থঃ কৃতার্থো লক্ষিতঃ, যতো ভগবতি যঃ স্নেহস্তস্য প্রসরঃ পূরস্তস্মিন্ সংপ্লুতঃ নিমগ্নঃ॥ (৬) ভগবানেব লোকস্তস্মাৎ, নৃলোকং দেহানুসন্ধানম্; উৎস্ময়ন্ যদুকুলসংহারাদি-ভগবচ্চাতুর্য্যস্মরণেন বিস্ময়ং প্রাপ্নুবন্॥

৭। শ্রীকৃষ্ণবিরহেণ সন্তপ্যমানঃ প্রত্যাহ—শ্রীকৃষ্ণ এব দ্যুমণিঃ সূর্য্যস্তস্য নিম্লোচে অস্তময়ে সতি অজগরেণ কালমহাসর্পেণ গীর্ণেষু গিলিতেষু নো গৃহেষু ত্বৎপৃষ্টানাং বন্ধূনাং কিং নু কুশলং ব্রূয়াম্?

৮। অনুশোচন্নাহ—দুর্ভগো ভাগ্যহীনঃ; যে সহ বসন্তোঽপি হরিরয়মিতি ন বিদুঃ;—যথা ক্ষীরসমুদ্রে জাতমুড়ুপং চন্দ্রং তদা তত্রত্যা মীনাঃ কেবলং কমনীয়ঃ কশ্চিজ্জলচর ইত্যেব বিদুঃ, ন চামৃতময়মিতি, তদ্বৎ। যদ্বা, জলে প্রতিবিম্বিতং চন্দ্রং যথেতি॥

৯। ভাগ্যহীনত্বাদেব ন বিদুঃ, ন তু জ্ঞানসামগ্র্যভাবাদিত্যাহ—ইঙ্গিতং চিত্তস্থং জানন্তীতি তথা, পুরু অতিশয়েন প্রৌঢ়া নিপুণাঃ,

একস্মিন্নেব স্থানে আরমন্তীতি[১] তথা, এবম্ভূতা অপি ভূতানামাবাসমীশ্বরং সন্তং সাত্বতামৃষভং সাত্বতশ্রেষ্ঠমমন্যন্ত ॥

১০। যে যাদবা দেবমায়য়া স্পৃষ্টা ব্যাপ্তা যাদবোঽয়মস্মদ্বন্ধুরিতি বদন্তি; যে চ শিশুপালাদয়োঽসদেবান্যদ্বৈরমাশ্রিতা নিন্দন্তি, তেষাং বাক্যৈরাত্মনি হরাবুপ্তাত্মনো নিক্ষিপ্তচিত্তস্য মাদৃশস্য বুদ্ধির্ন ভ্রাম্যতে, মোহং ন প্রাপ্যতে, অন্যে তু মূঢ়া এবেত্যর্থঃ ॥

১১। কোঽসৌ হরিরিত্যপেক্ষায়ামাহ— প্রদর্শ্যেতি। ন তপ্তং তপো যৈঃ, অতোঽবিতৃপ্তা দৃশো যেষাং তেষাম্; স্ববিম্বং শ্রীমূর্ত্তিম্, এতাবন্তং কালং প্রকর্ষেণ দর্শয়িত্বা যোঽন্তর্হিতবান্, লোকস্য লোচনমাদায় আচ্ছিদ্য, তাদৃশস্যান্যস্য বিলোকনীয়স্যাভাবাৎ ॥

১২—১৪। তদেব বিম্বং বর্ণয়তি ত্রিভিঃ। যন্মর্ত্ত্যলীলাসু ঔপয়িকং যোগ্যম্; স্বস্যাপি বিস্ময়জনকম্, যতঃ সৌভগর্দ্ধেঃ সৌভাগ্যাতিশয়স্য পরং পদং পরা কাষ্ঠা। ভূষণানাং ভূষণান্যঙ্গানি যস্মিন্॥ (১৩) দৃশাং স্বস্ত্যয়নং পরমানন্দকরম্, ত্রিভুবনস্থো লোকঃ প্রাণিমাত্রম্, অস্য ইদানীম্, ইহ বিম্বে, অর্ব্বাক্সৃতৌ অর্ব্বাচীনসংসারনির্ম্মাণে মনুষ্যনির্ম্মাণে বা, যৎ কৌশলং নৈপুণ্যম্, তৎ কার্ৎস্ন্যেন গতমুপক্ষীণং, নাতঃ পরং তস্য কৌশলমস্তীত্যেবং মেনে। তন্মূর্ত্তের্বিধাতৃসৃজ্যত্বাভাবেঽপি লোকদৃষ্টিরিয়মুক্তা[২]। (১৪) অনুরাগেণ প্লুতো ব্যাপ্তো হাসো রাসো বিনোদঃ লীলাবলোকশ্চ তৈঃ, স্বকৃতহাসাদ্যনন্তরং প্রতিলব্ধো মানো যাভিস্তা দৃগ্ভিঃ সহ অনুপ্রবৃত্তা গচ্ছন্তং তমেবানুগতা ধিয়ো যাসাং তাঃ, কৃত্যে শেষো যাসাং তাঃ, অসমাপিত-কৃত্যা এব অবতস্থুঃ ॥

১৫। এবম্ভূতবিম্বপ্রদর্শনে কারণমাহ—স্বীয়ান্যেব শান্তান্যশান্তানি চ রূপাণি। তত্র শান্তরূপেষু ইতরৈঃ পীড্যমানেষু অনুকম্পিতঃ কৃতানুকম্প

১। আবসন্তীতি (ঘ); ২। উক্তিঃ (ঘ)।

আত্মা যস্য। অজোঽপি জাত আবির্ভূতঃ;—মহাভূতরূপেণ নিত্যসিদ্ধ এবাগ্নির্যথা কাষ্ঠেম্বাবির্ভবতি, তদ্বৎ। অজস্য জন্মনি হেতুঃ—মহান্ মহত্তত্ত্বমংশঃ কার্য্যলেশো যস্যাব্যক্তস্য তন্মহদংশস্তদ্‌যুক্ত ইতি॥

১৬—১৭। নন্বু কুতোঽসৌ পরাবরাণামীশঃ, পারতন্ত্র্যপ্রতীতেঃ? তত্রাহ দ্বাভ্যাম্। মামপি এতৎ দুর্ব্বিতর্ক্যং দুর্ঘটঞ্চ খেদয়তি, তদেবাহ—বসুদেবগেহে বন্ধনাগারে যজ্জন্মনো বিড়ম্বনমনুকরণম্, ন তু নৃসিংহবদ-কস্মাদাবির্ভাবঃ, কংসভয়াদিব নিলীয় ব্রজে বাসশ্চ, কালযবনাদিরিপু-ভয়াদিব পুরান্মথুরায়া ব্যবাৎসীৎ পলায়ত॥ (১৭) এতচ্চ হরেশ্চরিতং স্মরতো মম চেতঃ কর্ম্মভূতং দুনোতি ব্যথয়তি। তদেব দর্শয়তি—যদাহেতি। হে তাত! হে অম্ব! যুবাং প্রসীদতং প্রসাদং কুরুতম্। ন কৃতা নিষ্কৃতিঃ শুশ্রূষণং যৈস্তেষাং নোঽস্মাকমিতি বহুবচনন্তু রামাদ্যভিপ্রায়ম্॥

১৮—২০। নন্বু তর্হ্যনীশ্বর এব কিং ন স্যাৎ? তব তু শ্রদ্ধা-মাত্রমেতদিতি, তত্রাহ ত্রিভিঃ। কো বা অঙ্ঘ্রিসরোজয়োর্যো রেণুস্ত-মপি বিজিঘ্রন্ সেবমানঃ পুমান্ বিস্মর্ত্তুমীশীত শক্নুয়াৎ? বিস্ফুরন্ ভ্রূ-বিটপঃ ভ্রূলতা, স এব কৃতান্তঃ, তেন॥ (১৯) ন চ তস্যেশ্বরত্বং সাধনীয়ম্, ভবদ্ভিরপি দৃষ্টত্বাদিত্যাহ—দৃষ্টেতি। যাং সিদ্ধিং সম্যগ্‌যোগেন যোগিনঃ প্রাপ্তুমিচ্ছন্তি॥ (২০) আহবে যুদ্ধে পার্থস্যাস্ত্রৈঃ পূতা নিষ্পাপাঃ সন্তঃ॥

২১—২২। তদেবং পরমৈশ্বর্য্যে সত্যপি যদুগ্রসেনানুবর্ত্তিত্বম্, তৎপুন-রস্মানত্যন্তং ব্যথয়তীত্যাহ—স্বয়ন্তু য এবম্ভূতস্তস্য তৎ কৈঙ্কর্য্যং নোঽস্মান্ বিপ্লাপয়তীত্যুত্তরেণান্বয়ঃ। ন সাম্যাতিশয়ো যস্য, যমপেক্ষ্যান্যস্য সাম্য-মতিশয়শ্চ নাস্তীত্যর্থঃ। তত্র হেতবঃ—ত্র্যধীশস্ত্রয়াণাং পুরুষাণাং লোকানাং গুণানাং বা ঈশঃ, স্বারাজ্যলক্ষ্ম্যা পরমানন্দস্বরূপসম্পত্ত্যৈব প্রাপ্তসমস্তভোগঃ। বলিং করমর্হণং বা হরদ্ভিঃ সমর্পয়দ্ভিশ্চিরকালীনৈ-

র্লোকপালৈঃ কিরীটাগ্রেণ ঈড়িতং স্তুতং পাদপীঠং যস্য সঃ। প্রণমতাং কিরীটসঙ্ঘট্টধ্বনিরেব স্তুতিত্বেনোৎপ্রেক্ষ্যতে॥ (২২) অঙ্গ! হে বিদুর! ভৃতান্ ভৃত্যান্, উগ্রসেনে যৎ কিঙ্করত্বম্, তদেবাহ—পরমেষ্ঠিধিষ্ণ্যে রাজাসনে নিষণ্ণমাসীনং স্বয়ং তিষ্ঠন্, হে দেব! নিধারয় অবধারয়েতি ন্যবোধয়ৎ বিজ্ঞাপিতবান্॥

২৩। এবমনুবৃত্তিঃ কৃপয়ৈবেতি সূচয়ন্ অপকারিষ্বপি তস্য কৃপালুতাং দর্শয়ন্নাহ—অহো আশ্চর্য্যং দয়ালুতায়াঃ, হন্তুমিচ্ছয়াপি স্তনয়োঃ সম্ভৃতং কালকূটং বিষং যমপায়য়ৎ, বকী পূতনা, অসাধ্বী দুষ্টাপি ধাত্র্যা যশোদায়া উচিতাং গতিং লেভে, ভক্তবেশমাত্রেণ যঃ সদ্গতিং দত্তবানিত্যর্থঃ। ততোঽন্যং কং বা ভজেম?

২৪। নন্ু ভাগবতানেব ভগবাননুগৃহ্ণাতীতি প্রসিদ্ধম্। সত্যম্, অসুরানপ্যহং ভাগবতানেব মন্যে; যতো ভাগবতা ইব তেঽপি ভগবদ্ধ্যানাভি-নিবেশেন ভগবন্তমপরোক্ষং পশ্যন্তীত্যাহ—সংরম্ভঃ ক্রোধাবেশঃ, তেন মার্গেণাভিনিবিষ্টং চিত্তং যেষাং তান্; অতএব সংগ্রামে তার্ক্ষ্যঃ কশ্যপঃ, তস্য পুত্রং গরুড়ম্; অংসে স্কন্ধে সুনাভায়ুধশ্চক্রায়ুধো হরির্যস্য, তম-চক্ষত অপশ্যন্। তস্মাৎ তেষ্বপি অস্যানুগ্রহো যুক্ত এবেত্যর্থঃ। বক্ষ্যতি চ,—'তস্মাৎ কেনাপ্যুপায়েন মনঃ কৃষ্ণে নিবেশয়েৎ' ইতি॥

২৫। ইদানীং তস্যান্তর্দ্ধানপ্রকারং বক্তুমাদিত আরভ্য তচ্চরিতং সংক্ষেপতঃ কথয়তি—বসুদেবস্য ভার্য্যায়াং জাতঃ, ভোজেন্দ্রঃ কংসস্তস্য বন্ধনে বন্ধনাগারে, অস্যাঃ পৃথিব্যাঃ শং সুখং স্বয়ং চিকীর্ষুঃ। অজেন ব্রহ্মণা যাচিতঃ সন্॥

২৬। পিত্রা হেতুভূতেন নন্দব্রজম্ ইতো গতঃ, একাদশ সমাঃ সংবৎসরান্। গূঢ়ার্চ্চিঃ গুপ্ততেজাঃ॥

২৭। ব্যহরৎ অক্রীড়ৎ, কূজদ্ভির্দ্বিজৈঃ পক্ষিভিঃ সঙ্কুলিতা ব্যাপ্তা অঙ্ঘ্রিপা বৃক্ষা যস্মিন্ ॥

২৮। রুদান্নিবেতি ইবশব্দস্য যথাযোগ্যং সর্ব্বত্রাপ্যন্বয়ঃ। মুগ্ধো বালশ্চ যঃ সিংহস্তদ্বদবলোকনং যস্য সঃ ॥

২৯। স এবাধিকং বয়ঃ প্রাপ্তঃ সন্ গোধনং চারয়ন্। কথম্ভূতং গোধনম্? লক্ষ্ম্যাঃ শোভাদিসম্পদো নিকেতম্। সিতা গোবৃষা যস্মিন্ নানাবর্ণে গোসঙ্ঘে; রণন্ শব্দং কুর্ব্বন্ বেণুর্যস্য; অরীরমৎ রময়ামাস ॥

৩০। ব্যন্নুদৎ জঘান্, ক্রীড়নকান্ তৃণাদিভির্নির্ম্মিতান্ সিংহাদীন্ যথা॥

৩১। বিপন্নান্ মৃতান্ গোপান্, গাব ইতি গাশ্চ উত্থাপ্য, তদেব তোয়ং প্রকৃতিস্থিতং নির্ব্বিষম্ ॥

৩২। ইন্দ্রপূজাভঙ্গেন কৃতা গবাং পূজৈব গোসবো গোযজ্ঞস্তেন; গোপরাজং নন্দম্; বিত্তস্য চেতি চকারাদিন্দ্রস্য মানভঙ্গং কুর্ব্বন্; উরুভারস্য অতিসমৃদ্ধস্য ॥

৩৩। কোপাদ্বর্ষতি। গোত্রঃ পর্ব্বত এব লীলাতপত্রং, তেন; হে ভদ্র ॥

৩৪। মৃষ্টমুজ্জ্বলম্; স্ত্রীণাং মণ্ডলং মণ্ডয়তীতি তথা ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে মথুরামেত্য ব্রজাৎ কংসবধাদিকম্।
যৎ কৃতং দ্বারকায়াঞ্চ কৃষ্ণেন তদবর্ণয়ৎ॥ (১)

১। শমিত্যব্যয়ম্। পিত্রোঃ সুখস্য চিকীর্ষয়েত্যর্থঃ। তুঙ্গাৎ রাজমঞ্চাৎ; রিপুযূথনাথং কংসম্; ব্যসোরপি বিকর্ষণং পিত্রোঃ সুখার্থম্॥

২। ব্রহ্ম বেদং সবিস্তরং ষড়ঙ্গাদিসহিতম্; পঞ্চজনোদরবিদারণ-দ্বারা পুত্রমানীয়েত্যর্থঃ॥

৩। ভীষ্মককন্যয়া রুক্মিণ্যা যে রাজানঃ সমাহূতাঃ; হ্রস্বত্বমার্ষম্; সমাহৃতা ইতি পাঠে আকৃষ্টা ইত্যর্থঃ। কেন সাধনেন? শ্রিয়ো লক্ষ্ম্যাঃ সবর্ণেন সমানেন রূপেণ। যদ্যপি তয়া কেবলং শ্রীকৃষ্ণ এবাহূতঃ, ন সর্ব্বে, তথাপি তস্যা লাবণ্যং তেষামাগমনে হেতুরিতি তয়ৈবাহূতা ইত্যুচ্যতে। এষাং[১] মিষতাং পশ্যতাং মূর্দ্ধ্নি পদং দধৎ, তয়া সহ গান্ধর্ব্ববৃত্ত্যা পরস্পরসময়-রূপয়া বুভূষয়া ভবিতুমিচ্ছয়া জহার। কথম্ভূতাম্? স্বভাগম্, লক্ষ্ম্যংশত্বাৎ, ত্বয়া স্বাত্মনেঽর্পিতত্বাচ্চ। সুপর্ণঃ সুপতনঃ, যদ্বা, সুপর্ণ ইব স্বভাগং সুধামিত্যর্থঃ; যদ্বা, শ্রিয়ঃ রুক্মিণ্যাঃ সমানং বর্ণদ্বয়ং বাচকং যস্য সঃ শ্রিয়ঃ সবর্ণো রুক্মী; তেন সমাহূতা যে শিশুপালাদয়ঃ। কিমর্থম্? ভীষ্মক-কন্যয়া সহ তেষাং বুভূষয়া ভূতির্ভবত্বিত্যেতদর্থম্। তত্র শিশুপালস্যাহ্বানং বরত্বেন বুভূষয়া; জরাসন্ধাদীনাং তদ্বিবাহোৎসবেন। শেষং পূর্ব্ববৎ॥

৪। ককুদ্মিনো বৃষভানবিদ্ধনাসিকান্, বিদ্ধনাসিকান্ কৃত্বেতি বা। তৈর্বৃষৈস্তদ্দমনেন বা ভগ্নো মানো যেষাং, তথাপি তাং গৃধ্যতঃ কাময়-মানান্, অতএবাজ্ঞান্ শস্ত্রভৃতো রাজ্ঞঃ তচ্ছস্ত্রৈ রক্ষত এব জঘান॥

১। তেষাং (ঘ)।

৫। যদা অদিত্যাঃ কুণ্ডলে দাতুং স্বর্গং গতস্তদা প্রভুঃ স্বতন্ত্রোঽপি গ্রাম্যঃ স্ত্রীপরতন্ত্র ইব প্রিয়ায়াঃ সত্যভামায়াঃ প্রিয়ং বিধাতুমিচ্ছুঃ দ্যুতরুং পারিজাতমানীতবান্। যদর্থে যন্নিমিত্তং, তং শ্রীকৃষ্ণং বজ্রী স্ত্রীপ্রেরিতো যোদ্ধুমধাবৎ; স্বকার্য্যসাধকেন তেন সহ যুদ্ধোদ্যমস্তস্যাযুক্ত এবেত্যাহ— ক্রীড়ামৃগ ইতি; অয়ং বজ্রী ॥

৬। সুনাভেন চক্রেণোন্মথিতং হতং সুতং ভৌমং দৃষ্ট্বা তস্য মাত্রা ধরিত্র্যা ভূম্যা আমন্ত্রিতঃ প্রার্থিতঃ সন্ তস্য তনয়ায় ভগদত্তায় হৃতশেষং রাজ্যং দত্ত্বা ॥

৭। তত্রান্তঃপুরে কুজেন ভৌমেন যা আহৃতাস্তাঃ; প্রহর্ষশ্চ ব্রীড়া চ অনুরাগশ্চ, তৈঃ প্রহিতাঃ প্রেরিতা যে অবলোকাস্তৈর্জগৃহুঃ স্বীকৃতবত্যঃ ॥

৮। আসাং যোষিতাং পাণীন্, তত্তদনুরূপঃ সন্ সবিধং বিবাহোচিত-প্রকারসহিতং যথা ভবতি তথা জগৃহে ॥

৯। সর্ব্বতঃ সর্ব্বৈর্গুণৈঃ স্বতুল্যানি; প্রকৃতের্মায়ায়া বিবিধং ভবনং বিস্তারস্তদিচ্ছয়া; যদ্বা, প্রকৃতের্হেতোর্বিবিধং ভবিতুমিচ্ছয়া ॥

১০। কালঃ কালযবনঃ, রুন্ধত আবৃণ্বতঃ, মুচুকুন্দভীমাদিভির্নিমিত্ত-মাত্রৈঃ স্বয়মেব অজীঘনদ্ঘাতিতবান্। তেন চ স্বপুংসাং তেজঃ প্রভাবং কীর্ত্তিঞ্চ দত্তবান্ ॥

১১। শম্বরদ্বিবিদবল্বলানন্যানপি কাংশ্চিৎ প্রদ্যুম্নরামাদিভির্ঘাতয়ৎ অঘাতয়ৎ; ঘাতয়ন্নিতি বা পাঠঃ। দন্তবক্ত্রাদীন্ স্বয়মেবাবধীৎ ॥

১২। নৃপানঘাতয়দিত্যনুষঙ্গঃ। কথম্ভূতান্? কুরুক্ষেত্রমাপততামা-গচ্ছতাং যেষাং বলৈঃ সৈন্যৈর্ভূঃ সর্ব্বাপি চচাল চকম্পে ॥

১৩। স কৃষ্ণঃ; হতা শ্রীরায়ুশ্চ যস্য, ভগ্ন উরূ যস্য তম্, উর্ব্ব্যাং শয়ানং পশ্যন্নপি ন ননন্দ, সন্তোষং ন প্রাপ ॥

১৪। অনভিনন্দনপ্রকারমেবাহ—কিয়ানিতি। দ্রোণাদিভির্মূলৈঃ কারণভূতৈঃ; যদিতি সঃ অষ্টাদশাক্ষৌহিণীযুক্তঃ; হ্রস্বত্বমার্ষম্। ক্ষপিত উরুভারো ভুবঃ। অয়ং কিয়ান্? অত্যল্প ইত্যর্থঃ। যস্মান্মদংশৈঃ প্রদ্যুম্নাদিভির্হেতুভূতৈর্দুর্বিষহং বলমাস্তে ॥

১৫। তেষাং ন চাত্রান্য উপায়ঃ প্রভবতি, কিন্তু মধুনা য আমদঃ সর্ব্বতো মদস্তেন আতাম্রবিলোচনানামেষাং বিবাদো যদা ভবিষ্যতি, তদা ইয়ানেবৈষাং বধোপায়ঃ; অতোহন্যো নাস্তি। একাত্মনোহপি ময্যন্তুতে সতি স্বয়মেব বিবাদেনান্তর্দধীরন্নিত্যর্থঃ ॥

১৬। এবং শ্লোকদ্বয়োক্তং ক্রমেণ সঞ্চিন্ত্য; স্বরাজ্যে স্থাপয়িত্বা ॥

১৭। ধৃতঃ রক্ষিতঃ ॥

১৮। অনুজৈর্ভীমাদিভিঃ সহ ॥

১৯। সাংখ্যং প্রকৃতিপুরুষবিবেকম্ ॥

২০। স্নিগ্ধো যঃ স্মিতসহিতোঽবলোকস্তেন; পীযূষকল্পয়া সুধাতুল্যয়া; পীযূষধারয়েতি পাঠে সুধাপ্রবাহরূপয়া। আত্মনা দেহেন ॥

২১। ক্ষণদয়া রাত্র্যা দত্তঃ ক্ষণোঽবসর উৎসবো বা যাসাং স্ত্রীণাম্, তাসু ক্ষণং সৌহৃদং যস্য সঃ ॥

২২। গৃহমেধেষু গৃহধর্ম্মেষু, যোগেষু[১] কামভোগাদ্যুপায়েষু, বিরাগ ঔদাসীন্যং জাতমিত্যর্থঃ ॥

২৩। যদা স্বাধীনেষ্বপি ভগবতো বিরাগঃ, তদা দৈবাধীনেষু কো বিশ্রম্ভেত বিশ্বাসং প্রীতিং বা কুর্য্যাৎ? যোগেন চেৎ, যোগেশ্বরং শ্রীকৃষ্ণমনুব্রতঃ ॥

১। গার্হস্থ্যোচিত-ধর্ম্মানুষ্ঠানেষু (ঘ)।

২৪। শেপুঃ শাপং দত্তুঃ; ভগবতো মতেঽভিপ্রায়ে কোবিদাঃ অভিজ্ঞাঃ ॥

২৬। পয়ঃশীলাদি-বহুগুণোপেতা যা গাবস্তাঃ ॥

২৭। কন্যাশ্চ; বৃত্তিকরীং জীবিকাপর্য্যাপ্তাম্ ॥

২৮। ভগবদর্পণং যথা ভবতি; গোবিপ্রার্থা অসবো যেষান্তে ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে

তৃতীয়োঽধ্যায়ঃ ॥ ৩ ॥

চতুর্থোঽধ্যায়ঃ

চতুর্থে বন্ধুনিধনং শ্রুত্বাত্মজ্ঞানলব্ধয়ে ।

উদ্ধবস্যোপদেশেন ক্ষত্তা মৈত্রেয়মাগমৎ ॥ (১)

১। তৈর্ব্রাহ্মণৈরনুজ্ঞাতাঃ; বারুণীং পৈষ্টীং মদিরাম্ ॥

২। বারুণ্যেব মৈরেয়ং, তস্য দোষেণ; রবৌ নিম্লোচতি অস্তং গচ্ছতি সতি; মর্দ্দনং কদনম্ ॥

৩। উপস্পৃশ্য সরস্বত্যামাচম্য ॥

৪। অহঞ্চোক্তঃ পূর্ব্বমেব দ্বারকায়াম্ ॥

৫। তদভিপ্রেতং কুলসংহারাদিকম্ ॥

৬। কৃতকেতং কৃতবাসম্, অকেতনমনাশ্রয়ম্ ।

৭। বিরজং বিরজসং শুদ্ধসত্ত্বময়ম্, বিদিতং লক্ষিতম্, কৌশং কৌশেয়ম্ ॥

৮। অধিশ্রিত্য উপরি স্থাপয়িত্বা, অপাশ্রিতঃ পৃষ্ঠতোঽবষ্টব্ধঃ, অর্ভকো বালঃ কোমলোঽশ্বত্থো যেন তম্; ত্যক্তং পিপ্পলং বিষয়সুখং যেন তম্; তথাপ্যক্লশমানন্দপূর্ণম্ ॥

৯। দ্বৈপায়নঃ সুহৃৎ সখা চ যস্য সঃ, স্বগুরুপুত্রত্বাৎ ; পরাশরশিষ্যো মৈত্রেয় ইত্যর্থঃ ॥

১০। প্রমোদেন ভাবেন চ আনতা কন্ধরা যস্য ; প্রমোদভারানতেতি পাঠে প্রমোদস্য ভারেণ। অনুরাগেণ হাসো যস্যাং, তয়া সমীক্ষয়া বিশ্রময়ন্ বিগতশ্রমং কুর্ব্বন্ ॥

১১। হে উদ্ধব! তে মনসীপ্সিতমন্তঃস্থিতো বেদ বেদ্মি। দানে[১] হেতুঃ—বিশ্বসৃজাং বসূনাঞ্চ মিলিতানাং সত্রে। হে বসো ইতি পুরা পূর্ব্বজন্মনি ত্বং বসুরাসীঃ, তদা মৎপ্রাপ্তিকামেন ত্বয়াহমিষ্টঃ, অতস্তৎ সাধনং দদামি দাস্যামি, অন্যৈর্মৎপরাঙ্মুখৈর্দুষ্প্রাপম্ ॥

১২। তস্য ভাগ্যমভিনন্দতি—স এব[২] ভবো জন্ম তে ভবানাং মধ্যে চরমঃ, যদ্‌যস্মিন্ মদনুগ্রহ আসাদিতো লব্ধঃ, যৎ পুনর্মাং রহ একান্তে বিশদানুবৃত্ত্যা একান্তভক্ত্যা দদৃশ্বান্ দৃষ্টবানসি। এতদ্দিষ্ট্যা ভদ্রং জাতমিত্যর্থঃ। নৃলোকান্, নৃশব্দেন জীবাস্তেষাং লোকানুৎসৃজন্তং বৈকুণ্ঠং গচ্ছন্তমিত্যর্থঃ ॥

১৩। দদামীতি যদুক্তং, তদেব নির্দ্দিশতি—পুরা পূর্ব্বস্মিন্ পাদ্মে কল্পে, আদিসর্গে সর্গোপক্রমে মম মহিমা লীলা অবভাস্যতে যেন তৎ ॥

১৪। ইত্যেবমাদৃতশ্চাসাবুক্তশ্চাহং প্রতিক্ষণং কৃপাবলোক এবানুগ্রহঃ, তস্য ভাজনঃ পাত্রভূতঃ ; প্রতিক্ষণানুগ্রহভাজন ইতি পাঠে প্রতিক্ষণমনুগ্রহস্য পাত্রমিতি। শুচঃ অশ্রূণি মুঞ্চন্ আবভাষে উক্তবানস্মি ॥

১৫। ন হি স্বাজ্ঞাননিবৃত্তিমাত্রকামোঽহং, কিন্তু ত্বন্নিষেবণোৎসুকঃ, ত্বয়ি চাঘটমানাচরণং দৃষ্ট্বা মে মোহো ভবতি, অতস্তত্ত্বজ্ঞানং দেহীতি প্রার্থয়িতুমাহ—কো ন্বিতি। চতুর্ষু ধর্ম্মাদিষু ; তথাপি তানহং ন প্রবৃণোমি। হে ভূমন্! ভবৎপদাম্ভোজনিষেবণোৎসুকোঽহম্ ॥

১। জ্ঞানে (ঘ) ; ২। এষ (ঘ)।

১৬। অঘটমানাচরণং দর্শয়তি—কর্ম্মণ্যনীহস্য নিঃস্পৃহস্য, নিষ্ক্রিয়স্য বা অভবস্য অজন্মনো, ভবো জন্ম, কালাত্মনস্তবারিভয়াদ্ দুর্গাশ্রয়ঃ পলায়নঞ্চ। স্বাত্মনি রতির্যস্য তস্য বহ্বীভিঃ স্ত্রীভির্গৃহাশ্রম ইতি যদিহ অস্মিন্ বিষয়ে বিদুষামপি ধীঃ সংশয়েন খিদ্যতে॥

১৭। কিঞ্চ, মন্ত্রেষু প্রস্তুতেষু সৎসু মামাহূয় বৈ অহো পৃচ্ছেঃ অপৃচ্ছঃ। অকুণ্ঠিতঃ কালাদিনা অখণ্ডঃ, সন্ততঃ সদাত্মা সংশয়াদিরহিতো বোধো বিদ্যাশক্তির্যস্য, মুগ্ধবদজ্ঞবৎ, অপ্রমত্তোঽবহিতঃ সন্॥

১৮। স্বাত্মনস্তব রহো রহস্যং তত্ত্বম্, তস্য প্রকাশকম্; কস্মৈ ব্রহ্মণে, সর্ব্বনামত্বমার্ষম্। নোঽস্মাকং গ্রহণায়াপি ক্ষমং যদি যোগ্যং, তর্হি বদ। ভর্ত্তঃ স্বামিন্! যদ্যতো বৃজিনং সংসারদুঃখমঞ্জসানায়াসেন তরিষ্যামঃ॥

১৯। আবেদিতো হার্দ্দো হৃদিস্থোঽভিপ্রায়ো যেন তস্মৈ॥

২০। আরাধিতপাদো ভগবান্, স এব তীর্থং গুরুস্তস্মাদধীতঃ অধিগতঃ তত্ত্বাত্মবিরোধস্য পরমাত্মজ্ঞানস্য মার্গো যেন সোঽহং দেবং শ্রীকৃষ্ণং পরিবৃত্য প্রদক্ষিণীকৃত্য॥

২১। তস্য দর্শনেনাহ্লাদঃ, বিয়োগেনার্ত্তিশ্চ, তাভ্যাং যুতঃ, তস্য বদর্য্যাশ্রমং স্থানং গমিষ্যামি॥

২২। মৃদু পরোপদ্রবশূন্যম্, তীব্রং দুশ্চরম্, দীর্ঘমাকল্পান্তম্, তেপাতে তপশ্চরত ইত্যর্থঃ। লোকভাবনৌ লোকানুগ্রাহকৌ॥

২৩। জ্ঞানেন বিবেকেন॥

২৪। বিশ্রম্ভাৎ বিশ্বাসাৎ॥

২৫। যদ্যস্মাদ্বিষ্ণোর্ভৃত্যাঃ, স্বভৃত্যপ্রয়োজনসাধকাঃ সন্তঃ চরন্তি, ন হি কৃতার্থানামন্যৎ কৃত্যমস্তীত্যর্থঃ॥

২৬। তত্ত্বায় সংরাধ্য ইতি অয়ং ভাবঃ—ভগবতৈব স্মরণমাত্রেণ তবাপি তত্ত্বমুপদিষ্টপ্রায়ম্। অথ কেবলং অসম্ভাবনাদিনিবৃত্তয়ে জ্ঞানী

কশ্চিদারাধ্যঃ, স চ তবারাধ্যো মৈত্রেয়ঃ, ন ত্বহম্, মমান্তিক এব ত্বদুপদেশে তস্যাদিষ্টত্বাদিতি ॥

২৭। প্লাবিতোঽপনীত উরুস্তাপো যস্য ; যমস্বসুর্যমুনায়াঃ পুলিনে তীরে তাং নিশাং ক্ষণমিব সমুষিতঃ ; ঔপগবিরুদ্ধবঃ ॥

২৮। ব্রহ্মশাপেন নিধনং প্রাপ্তেষু ; যস্মাৎ ত্রয়াণাং ব্রহ্মাদীনামধীশো হরিরপ্যাকৃতিং মনুষ্যাকারং ত্যক্তবান্ ॥

২৯। ব্রহ্মশাপঃ অপদেশো মিষং যস্য তেন, কালেন স্বশক্তিরূপেণ, অমোঘং বাঞ্ছিতং যস্য ; ন হ্যত্র শাপঃ প্রভুঃ, কিন্তু ভগবদিচ্ছৈবেত্যর্থঃ ॥

৩০। ময়ি উপরতে সতি জ্ঞানমর্হতি, জ্ঞানযোগ্যো ভবতি, ন চান্যঃ ॥

৩১। মত্তঃ সকাশাদীষদপি ন্যূনো ন ভবতি, যদ্ যস্মাদ্ গুণৈর্বিষয়ৈর্ন ক্ষোভিতঃ ; মদ্বয়ুনং মদ্বিষয়ং জ্ঞানং লোকস্যোপদিশন্নিহ ভূতলে তিষ্ঠতু ॥

৩২। এবমনেনাভিপ্রায়েণ, শব্দযোনিনা বেদকর্ত্রা, ঈজে পূজয়ামাস ॥

৩৪। অন্যেষাং পশূনাং পশুতুল্যানাম্, বিক্লবাত্মনামধীরচিত্তানাম্ ॥

৩৫। মনসেক্ষিতং চিন্তিতম্ ॥

৩৬। কালিন্দ্যাঃ সকাশাৎ সিদ্ধ এব বিদুরঃ কতিপয়ৈর্দিনৈঃ স্বসরিতং গঙ্গাং প্রাপত্তত প্রাপ্তঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং তৃতীয়স্কন্ধে
চতুর্থোঽধ্যায়ঃ ॥ ৪ ॥

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে ভগবল্লীলাং ক্ষত্রা পৃষ্টো মহামুনিঃ।
প্রোবাচ মহদাদীনাং সর্গং তৈশ্চ হরেঃ স্তুতিম্॥ (১)
উক্তশ্চতুর্ভিরধ্যায়ৈঃ ক্ষত্তুর্মৈত্রেয়সঙ্গমঃ।
সংবাদস্তু তয়োঃ স্কন্ধদ্বয়েনাথ নিগদ্যতে[১]॥ (২)

১। দ্যুনদ্যা গঙ্গায়া দ্বারি দ্বারে আসীনম্, ন তু কর্ম্মব্যগ্রম্। তত্র হেতুঃ—অগাধোঽপরিচ্ছিন্নো বোধো যস্যেতি। মৈত্রেয়স্য সৌশীল্যমার্জ্জবাদি, গুণাশ্চ করুণাদয়ঃ, তৈরতিতৃপ্তঃ; সৌশীল্যগুণাভিতৃপ্তমিতি পাঠে ক্ষত্তুঃ সৌশীল্যাদিভিরভিতৃপ্তং সন্তুষ্টং মৈত্রেয়ম্॥

২—১৬। প্রশ্নানেবাহ—সুখায়েতি পঞ্চদশভিঃ। তৈঃ কর্ম্মভিরপি সুখং বা অন্যস্য দুঃখস্য উপারমং বেত্যর্থঃ; অথবা অন্যদ্বা ন বিন্দেত। কিং তদিত্যপেক্ষায়াং তস্যৈব নির্দ্দেশঃ—উপারমং বেতি, ততশ্চ তৈঃ কর্ম্মভিঃ ভূয়ঃ পুনঃপুনঃ দুঃখমেব বিন্দেত। অত্র এবংবিধে সংসারে নোঽস্মাকং যদ্যুক্তং কর্ত্তুং যোগ্যম, তৎ সর্ব্বজ্ঞো ভগবান্ বদেৎ নিরূপয়তু॥ (৩) দৈবাৎ প্রাচীনাৎ কর্ম্মণো নিমিত্তভূতাৎ কৃষ্ণাদ্বিমুখস্য, অতোঽধর্ম্মশীলস্য, অতঃ সুদুঃখিতস্যানুগ্রহায় ভব্যানি মঙ্গলানি ভূতানি চরন্তি, ভবন্তঃ পরোপকারস্বভাবা এব ইত্যর্থঃ॥ (৪) তত্তস্মাৎ হে সাধুবর্য্য! শং সুখরূপং বর্ত্ম নঃ আদিশ কথয়, যেন বর্ত্মনা সংরাধিতো হৃদি স্থিতঃ সন্ তত্ত্বাধিগম আত্মাপারোক্ষ্যম্, তৎসহিতং পুরাণম্ অনাদিবেদপ্রমাণকম্॥ (৫) করোতি কর্ম্মাণীত্যাদীনাং বর্ণয়েতি পঞ্চমশ্লোকে (নবমে) ক্রিয়াসম্বন্ধঃ। যথা যেন প্রকারেণ পুরুষরূপেণ কৃতাবতারঃ সন্ ত্র্যধীশঃ ত্রিগুণমায়ানিয়ন্তা, অতঃ স্বতন্ত্র এব যানি কর্ম্মাণি করোতি।

১। নিরূপ্যতে (ক)।

কর্ম্মাণ্যেব বিশেষতঃ পৃচ্ছতি—যথেত্যাদিনা। নিরীহো নিষ্ক্রিয়ঃ, নিঃস্পৃহো বা, সংস্থাপ্য সুস্থিরং কৃত্বা, বৃত্তিং জীবিকাম্॥ (৬) স্বে স্বীয়ে, খে হৃদয়াকাশে নিবেশ্য স্থাপয়িত্বা নিবৃত্তা বৃত্তয়ো যস্য, গুহায়াং যোগমায়ায়াম্, বহুধা ব্রহ্মাদিরূপেণ॥ (৭) মৎস্যাদ্যবতারভেদৈঃ ক্রীড়ন্ যানি যথা কর্ম্মাণি বিধত্তে করোতি। পুনর্বিশেষং প্রষ্টুমৌৎসুক্যমাবিষ্করোতি—মন ইতি। সুশ্লোকাঃ পুণ্যকীর্ত্তয়ঃ, তেষাং মৌলিরিবাধিক্যেনোপরি বিরাজমানস্তস্যেত্যর্থঃ॥ (৮) অধিলোকনাথো লোকনাথাধিপতিঃ, অলোকান্ লোকালোকপর্ব্বতাদ্বহির্ভাগান্, অচীক্লৃপৎ কল্পয়ামাস; যত্র যেষু সর্ব্বাণি যানি সত্ত্বানি, তেষাং নিকায়াস্তেষাং ভেদঃ অধিকৃতঃ, তত্তৎকর্ম্মাধিকারী আশ্রিত ইতি বা॥ (৯) উত অপি চ যেন প্রকারেণ জীবানামাত্মা স্বভাবঃ, তৎকৃতং কর্ম্ম, তৎকৃতং রূপম্, তৎকৃতা অভিধাঃ, তাসাং ভেদং কৃতবান্। বিশ্বস্রষ্টা স্বয়ঞ্চাত্মযোনিঃ স্বতঃসিদ্ধঃ॥ (১০) নন্বু মহাভারতে ত্বয়া সর্ব্বং শ্রুতমেব, কিং পুনঃ প্রশ্নৈস্তত্রাহ—পরে ত্রৈবর্ণিকাঃ, অবরে শূদ্রাদয়ঃ, তেষাং ব্রতানি ধর্ম্মাঃ, মে ময়া[১], অভীক্ষ্ণং পুনঃ পুনঃ; তেষাং শ্রবণেন অতৃপ্নুম তৃপ্তাঃ স্ম, তেষাং তুচ্ছসুখাবহত্বাৎ। যস্তু তত্র কৃষ্ণকথামৃতৌঘঃ সূচিতস্তস্মাদৃতে তত্র স্বলংবুদ্ধির্নাস্তীত্যর্থঃ॥ (১১) তত্র হেতুঃ—ক ইতি। তীর্থপদঃ কৃষ্ণস্যাভিধানাৎ কথামৃতৌঘাৎ, সত্রেষু সমাজেষু সূরিভির্নারদাদিভিঃ॥ (১২) মহাভারতস্যাপ্যত্রৈব তাৎপর্য্যমিত্যাহ—মুনিঃ কৃষ্ণো বেদব্যাসো ভগবদ্গুণান্ মোক্ষধর্ম্মান্তে নারায়ণীয়োপাখ্যানেন বক্তুমিচ্ছুঃ সন্ অর্থকামাদিবর্ণনন্তু হরিকথায়াং মতিপ্রবেশার্থমেবেত্যাহ—যস্মিন্নিতি। নৃণাং মতিঃ গ্রাম্যসুখানুবাদৈর্দ্বারভূতৈঃ, নু নিশ্চিতং, হরেঃ কথায়াং গৃহীতা নীতা। তদুক্তমিতিহাসসমুচ্চয়ে—'কামিনো বর্ণয়ন্ কামান্ লোভং লুব্ধস্য বর্ণয়ন্। নরঃ কিং ফলমাপ্নোতি কূপেহন্ধমিব

১। মম (ঘ)।

পাতয়ন্? লোকচিত্তাবতারার্থং বর্ণয়িত্বাত্র তেন তৌ। ইতিহাসৈঃ পবিত্রার্থৈঃ পুনস্তত্রৈব নিন্দিতৌ॥ অন্যথা ঘোরসংসারবন্ধহেতূ জনস্য তৌ। বর্ণয়েৎ স কথং বিদ্বান্ মহাকারুণিকো মুনিঃ?' ইতি॥ (১৩) হরিকথায়াং মতিপ্রবেশস্য ফলমাহ—সা কথা মতির্বা, অন্যত্র গ্রাম্যসুখে, ততঃ কিমত আহ—হরেরিতি॥ (১৪) এবম্ভূতায়াং কথায়াং যে ন রমন্তে, তান্ শোচতি—শোচ্যা যে, তেষামপি শোচ্যাংশ্চ, তত্র অবিদো ভারততাৎপর্য্যানভিজ্ঞান্ শোচ্যান্, যে তু জ্ঞাত্বাপি হরেঃ কথায়াং বিমুখাস্তান্, তেষামপি শোচ্যানিতি যোজ্যম্। অনিমিষঃ কালো যেষামায়ুঃ ক্ষিণোতি ক্ষপয়তি। তত্র হেতুঃ—বৃথৈব বাদগতিস্মৃতয়ো বাগ্‌দেহমনোব্যাপারা যেষাম্॥ (১৫) তৎ তস্মাৎ, হে কৌশারব! মৈত্রেয়! অস্য বিশ্বস্য শিবায় কথাসু সারভূতাং হরিকথামেবোদ্ধৃত্য নঃ কীর্ত্তয়, যথা পুষ্পেভ্যো মধু মধুপ উদ্ধরতি, তদ্বদুদ্ধৃত্য॥

১৬। বিশেষতঃ শ্রীকৃষ্ণকথা কথনীয়েত্যাশয়েনাহ—স ইতি। যো বিশ্বসর্গাদ্যর্থং পূর্ব্বং গৃহীতশক্তিঃ, স এব পুরুষেষু কৃতাবতারঃ সন্ পুরুষানতিক্রম্য বর্ত্তমানানি যানি চকার, তানি বিস্তরাদ্বদ॥

১৭। পুংসাং নিঃশ্রেয়সমেবার্থঃ প্রয়োজনম্, তেন হেতুনা পৃষ্টঃ॥

১৮—২২। বহুমানমেবাহ—সাধ্বিতি পঞ্চভিঃ। অধোক্ষজ এবাত্মা মনো যস্য, তস্যাত্মনঃ স্বস্য কীর্তিঞ্চ প্রসঙ্গাদ্বিতন্বতা॥ (১৯) হরির্যদ্গৃহীত এতচ্চিত্রং ন ভবতি। কুতঃ? বাদরায়ণবীর্য্যজে। ননু বাদরায়ণবীর্য্যজো ধৃতরাষ্ট্রোঽপি ভবতি? সত্যং, পরন্তু ত্বয়ি ততো বিশেষ ইত্যাহ—গৃহীত ইতি॥ (২০) ননু তর্হি কথং শূদ্রত্বম্, কথঞ্চ লোকানুগ্রাহকত্বম্? তত্রাহ—মাণ্ডব্যশাপাদিতি। ভ্রাতুর্বিচিত্রবীর্য্যস্য ক্ষেত্রে ক্ষেত্রত্বেন স্বীকৃতায়াং ভুজিষ্যায়াং দাস্যাং যম এব ত্বং জাতোঽসি॥ (২১) কিঞ্চ ভবানিতি কুতঃ? যস্য তব জ্ঞানোপদেশায় মামাদিষ্টবান্; চকারাৎ

স্বয়মপি স্বত্যৈবোপদিষ্টবানিতি ॥ (২২) বিশ্বস্থিত্যাদয়োঽর্থা বিষয়া যাসাং তাঃ ॥

২৩। তত্র সৃষ্টিলীলাং বর্ণয়িতুং ততঃ পূর্ব্বাবস্থামাহ—ইদং বিশ্বম্ অগ্রে সৃষ্টেঃ পূর্ব্বং পরমাত্মা ভগবান্ এক এবাস আসীৎ। আত্মনাং জীবানামাত্মা স্বরূপম্, বিভুঃ স্বামী চ, নান্যদ্‌দ্রষ্টৃদৃশ্যাত্মকং কিঞ্চিদাসীৎ। কারণাত্মনা সত্ত্বেঽপি পৃথক্‌প্রতীত্যভাবাদিত্যাহ—অনানামত্যুপলক্ষণঃ, নানা দ্রষ্টৃদৃশ্যাদি, মতিভির্নোপলক্ষ্যতে ইতি তথা; যদ্বা, অকারপ্রশ্লেষং বিনৈবায়মর্থঃ—যঃ সৃষ্টৌ নানামতিভিরুপলক্ষ্যতে, স তদা এক এবাসী-দিতি। কুতঃ? আত্মেচ্ছা যা মায়া, তস্যা অনুগতৌ লয়ে সতি; যদ্বা, আত্মন একাকিত্বেনাবস্থানেচ্ছায়ামনুবৃত্তায়ামিত্যর্থঃ ॥

২৪—২৫। তত্র প্রথমং মায়োদ্ভবপ্রকারমাহ দ্বাভ্যাম্—স বৈ এষ দ্রষ্টা সন্ দৃশ্যং নাপশ্যৎ, যত একরাট্ এক এব তদা প্রকাশতে, তদা আত্মানমসন্তমিব মেনে, দৃশ্যাভাবে দ্রষ্টৃত্বাভাবাৎ। তদাহ—সুপ্তা মায়াখ্যাঃ শক্তয়ো যস্য সঃ, ন ত্বসন্তমেব মেনে, যতঃ অসুপ্তা দৃক্ চিচ্ছক্তি-র্যস্যেতি ॥ (২৫) সা বৈ দ্রষ্টৃদৃশ্যানুসন্ধানরূপা, সদসদাত্মিকা কার্য্যকারণ-রূপা; যদ্বা, সৎ দৃশ্যম্, অসৎ অদৃশ্যম্, আত্মা স্বরূপম্, তয়োরাত্মা যস্যাঃ, তস্যাস্তদুভয়ানুসন্ধানরূপত্বাৎ ॥

২৬। কালবৃত্ত্যা কালশক্ত্যা গুণময্যাং ক্ষুভিতগুণায়ামধোক্ষজঃ পরমাত্মা আত্মাংশভূতেন পুরুষেণ প্রকৃত্যধিষ্ঠাতৃরূপেণ বীর্য্যং চিদাভাস-মাধত্ত; বীর্য্যবান্ চিচ্ছক্তিযুক্তঃ ॥

২৭। কালপ্রেরিতাদব্যক্তাদ্‌মায়াতঃ; তত্ত্বপদং পরিত্যজ্য মহতো লক্ষণম্, অতঃ পুংলিঙ্গনির্দ্দেশঃ। বিজ্ঞানাত্মেতি সত্ত্বপ্রধানত্বাৎ, স্বদেহস্থং বিশ্বমুচ্ছূনবীজগতাঙ্কুরাদিরূপং বৃক্ষমিব ব্যঞ্জয়ন্ প্রকাশয়ন্, যতোঽসৌ তমো নুদতীতি তমোনুদঃ; তদুক্তং সাত্বততন্ত্রে—'বিষ্ণোস্তু ত্রীণি রূপাণি

পুরুষাখ্যান্যথো বিদুঃ। প্রথমং মহতঃ স্রষ্টৃ দ্বিতীয়ন্ত্বণ্ডসংস্থিতম্। তৃতীয়ং সর্ব্বভূতস্থং তানি জ্ঞাত্বা বিমুচ্যতে॥' ইতি॥

২৮—৩০। অহঙ্কারোৎপত্তিমাহ—সোঽপীতি সার্দ্ধদ্বাভ্যাম্। অংশশ্চিদাভাসো নিমিত্তম্, গুণ উপাদানম্, কালঃ ক্ষোভকঃ, তদাত্মা তদধীনঃ। ভগবান্ সর্ব্বাধ্যক্ষঃ, তদ্দৃষ্টিগোচরঃ সন্ স্বয়মাত্মানং ব্যকরোৎ, রূপান্তরমনয়ৎ॥ (২৯) অহঙ্কারস্য লক্ষণমাহ—কার্য্যমধিভূতম্, কারণমধ্যাত্মম্, কর্ত্তৃ অধিদৈবম্, তেষামাত্মা আশ্রয়ঃ। অত্র হেতুঃ—ভূতেন্দ্রিয়ো মনোময়ঃ, তদ্বিকারবান্। মন ইতি দেবানামপ্যুপলক্ষণম্॥ (৩০) এতদেব বিভাগশঃ প্রপঞ্চয়তি—বৈকারিক ইত্যাদিনা। বৈকারিকঃ সাত্ত্বিকঃ, তৈজসো রাজসঃ। দেবাশ্চ বৈকারিকাঃ, বৈকারিকাহঙ্কারকার্য্যভূতা ইত্যর্থঃ। যতো যেভ্য ইন্দ্রিয়াণ্যধিষ্ঠাতৃভ্যো দেবেভ্যো হেতুভ্যঃ অর্থাভিব্যঞ্জনং শব্দাদিপ্রকাশো ভবতি॥

৩১। তৈজসান্যেবেত্যন্বয়ঃ। জ্ঞানেন্দ্রিয়াণাং জ্ঞানময়ানাং সাত্ত্বিকত্বশঙ্কা মা ভূদিত্যেবকারঃ। তামসো ভূতসূক্ষ্মস্য শব্দস্য আদিঃ কারণম্, যতঃ শব্দাৎ খমাকাশং ভবতি, আত্মনো লিঙ্গং স্বগুণশব্দরূপেণ প্রমাপকং[১] হৃদয়াকাশতয়া বা; যদ্বা, লিঙ্গং শরীরম্, 'আকাশশরীরং ব্রহ্ম' ইতি শ্রুতেঃ॥

৩২। নভসঃ স্বস্মাদনুস্মৃতমুদ্ভূতং স্পর্শং বিকুর্ব্বৎ রূপান্তরং নয়ৎ, অনিলং বায়ুম্। এবং সর্ব্বত্র তন্মাত্রদ্বারা ভূতোৎপত্তিরিতি জ্ঞাতব্যম্॥

৩৩। নভসা সহিতঃ, স্বয়ঞ্চোরুবলান্বিতঃ, ততঃ জ্যোতিস্তেজঃ, লোচনং প্রকাশকম্॥

৩৬। হে ভব্য বিদুর! ভাব্যাবরাবরমিতি পাঠে ভাব্যং কার্য্যম্, যদ্‌যদবরমবরং কার্য্যম্, তেষাং কার্য্যাণাং পরৈঃ কারণৈরনুসংসর্গাদন্বয়াদ্

১। প্রকাশকং (ঘ)।

যথাসংখ্যং যথাক্রমমুত্তরোত্তরমধিকগুণান্ বিদুঃ। তথা হি নভসঃ শব্দ এব গুণঃ, অন্যান্বয়াভাবাৎ; বায়োস্তু স্পর্শঃ, আকাশান্বয়াৎ শব্দশ্চ; এবং তেজসস্তৌ চ রূপঞ্চ, অন্তসস্তানি রসশ্চ; মহ্যাঃ সর্ব্বে॥

৩৭। দেবা মহদাদ্যভিমানিনঃ, বিষ্ণোঃ কলা অংশাঃ, কাললিঙ্গং বিকৃতিঃ, মায়ালিঙ্গং বিক্ষেপঃ, অংশলিঙ্গং চেতনা, তানি বিদ্যন্তে যেষু। অতঃ সমত্বেন নানাত্বাৎ পরস্পরাসম্বন্ধাৎ স্বক্রিয়ায়াং ব্রহ্মাণ্ডরচনায়াম্ অনীশা অশক্তাঃ সন্তো বিভুং পরমেশ্বরং প্রোচুঃ॥

৩৮। 'মিথঃ স্পর্দ্ধিষ্ণবো দেবা ন মিলন্তঃ পরস্পরম্। বিশ্বকর্ম্মণ্য-নীশানা নির্ব্বিণ্ণা হরিমীড়িরে॥' নমামেতি। প্রপন্নানাং তাপোপশমে আতপত্রং ছত্রম্; অত্র হেতুঃ—যস্য পদারবিন্দস্য মূলং তলং কেতু আশ্রয়ো যেষাম্, তে সংসারদুঃখং বহির্দূরত এব উৎক্ষিপন্তি পরিত্যজন্তি, পান্থাঃ স্বগৃহং প্রাপ্য মার্গশ্রমমিব॥

৩৯। শ্রমং নিবেদয়ন্ত আহুঃ—হে ধাতঃ পিতঃ! যদ্‌যস্মাদ্‌ভবে সংসারে, আত্মন্ আত্মনি সম্বোধনং বা; শর্ম্ম সুখম্। ঋতে যদিতি পাঠে যৎ পাদভজনং বিনা শর্ম্ম ন লভন্তে। নন্বু জ্ঞানাদজ্ঞানকৃতস্তাপো নিবর্ত্তেতে, কিং মদঙ্ঘ্রিচ্ছায়াশ্রয়ণেন? তত্রাহুঃ—সবিদ্যাং তদাশ্রয়ণমেব বিদ্যাপ্রাপকমিত্যর্থঃ॥

৪০। অজ্ঞাতস্যাশ্রয়ণাযোগাত্তজ্‌জ্ঞানসাধনমাহুঃ—মার্গন্তি অন্বেষয়ন্তি যৎ তত্তীর্থপদস্তব পদং বয়ং প্রপন্নাঃ। কৈর্মার্গন্তি? ছন্দঃসুপর্ণৈর্বেদ-পক্ষিভিঃ, তবৈব মুখপদ্মং নীড়ং যেষাম্। যথা পক্ষিণো নীড়াদুদ্‌গতা ইতস্ততঃ[১] পরিভ্রম্য পুনস্তত্রৈব বিশন্তি, তথা বেদা অপি ত্বত্ত উদ্‌গতাস্ত্বয্যেব পর্য্যবস্যন্তি; অতো বেদানাশ্রিত্য ত্বৎপদং মৃগয়ন্ত ইতি। বিবিক্তে অসঙ্গে মনসি; কিঞ্চ, অঘমর্ষমঘনাশকমুদমুদকং যাসাং সরিতাং তাসু;

১। ততস্ততঃ (ঘ)।

বরায়া গঙ্গায়াঃ পদমুদ্গমস্থানম্ ; অতো গঙ্গামনুসেবমানা অপি তদুদ্গম-স্থানং ত্বৎপদং প্রাপ্নুবন্তীত্যর্থঃ ॥

৪১। নন্থ বিষয়াকৃষ্টচিত্তানাং কুতস্তদন্বেষণম্ ? তত্রাহুঃ—যচ্ছ্রদ্ধয়েতি। যদ্ধৃদয়ে অবধায় ধ্যাত্বা, বৈরাগ্যং বলং যস্য তেন জ্ঞানেন ধীরা ভবন্তি। নন্থ সরাগে চিত্তে ধ্যানমেব কুতঃ? তত্রাহুঃ—শ্রদ্ধয়া শ্রবণপূর্ব্বিকয়া ভক্ত্যা চ সংমৃজ্যমানে সংশোধ্যমানে ॥

৪২। ভক্তানুগ্রহং স্মরন্ত আহুঃ—বিশ্বস্যেতি ॥

৪৩। অন্তর্য্যামিতয়া নিত্যসন্নিহিতে, অনর্থকং ব্রজনমিত্যাশঙ্ক্যাহুঃ—যদিতি। সানুবন্ধে সোপকরণে ; অসতি তুচ্ছে। পুর্য্যাং স্বদেহ এব বসতোঽপি যৎ সুদূরং দুষ্প্রাপম্ ॥

৪৪। নন্থ যদি হৃদিস্থস্যাপি পদাব্জং কেষাঞ্চিৎ সুদূরম্, তর্হি অন্যেষা-মপি তথৈব স্যাৎ, অবিশেষাদিত্যাশঙ্ক্যাহুঃ—তানিতি। অসদ্‌বৃত্তিভির্বহি-র্মুখৈঃ, অক্ষিভিরিন্দ্রিয়ৈঃ পরাহৃতং দূরমপহৃতমন্তঃস্থং মনো যেষাং তে, অথো অতএব তে নূনং তান্ ন পশ্যন্তি ; বৈ প্রসিদ্ধম্ ; কুতঃ পুনস্তেষাং তৎসঙ্গঃ স্যাৎ? কান্ ? তে তব পদন্যাসো গমনং, তস্য বিলাসো বিভ্রমস্তস্য লক্ষ্মীঃ শোভা, তস্যা যে ত্বল্লীলাকথনাদিভিঃ শোভমানাংস্ত্বদ্ভক্তানিত্যর্থঃ। পথ ইতি লক্ষ্যানিতি চ পাঠে ত্বৎপদন্যাসবিলাসো লক্ষ্যো যেষাং তান্ পথঃ ত্বন্মার্গভূতান্ সতঃ, মার্গান্ বা শ্রবণাদীন্ ন পশ্যন্তীত্যর্থঃ ; যদ্বা, যে এবম্ভূতা ভাগবতাস্তে তানুন্মত্তান্ নূনং নৈব পশ্যন্তীত্যন্বয়ঃ। সৎসঙ্গাভাবেন হরিকথাশ্রবণাভাবাদ্‌হৃদিস্থিতমপি তেষাং সুদূরমিতি ভাবঃ ॥

৪৫—৪৬। এতদেব স্ফুটয়ন্তি—পানেনেতি দ্বাভ্যাম্। বৈরাগ্যং সারো বলং যস্য বোধস্য, তং লব্ধ্বা অন্বীয়ুঃ প্রাপ্নুয়ুঃ, অকুণ্ঠধিষ্ণ্যং বৈকুণ্ঠ-লোকম্ ॥ (৪৬) আত্মনি সমাধির্মনঃস্থৈর্য্যম্, স এব যোগ উপায়ঃ, তস্য

বলেন ; জ্ঞানযোগতঃ শ্রমেণ মোক্ষঃ, সৎসঙ্গতস্ত্বৎকথাশ্রবণাদিনা ত্বনায়াসেনৈব ; অহংমমতাবিশিষ্টানান্তু ন কথঞ্চিদিতি ভাবঃ ॥

৪৭—৫০। তদেবং স্তুত্বা প্রার্থয়ন্তে চতুর্ভিঃ—তৎ তস্মাৎ হে আদ্য ! তে ত্বদীয়া বয়ং যস্মাল্লোকানাং সিসৃক্ষয়া ত্বয়া অনুসৃষ্টাঃ ক্রমেণোৎপাদিতাঃ, ত্রিভিরাত্মভিঃ সত্ত্বাদিভিঃ স্বভাবৈঃ, অতএব বিরুদ্ধস্বভাবত্বাদ্বিযুক্তাঃ সন্তঃ, যদর্থং সৃষ্টাঃ, তৎ স্ববিহারতন্ত্রং ত্বৎক্রীড়োপকরণং ব্রহ্মাণ্ডং তুভ্যং তে প্রতিহর্ত্তবে প্রতিহর্ত্তুং সমর্পয়িতুং ন শক্নুমঃ। অতস্ত্বং নঃ স্বচক্ষুঃ পরিদেহীতি ত্রয়াণাং শ্লোকানাং চতুর্থেনান্বয়ঃ ॥ (৪৮) অসামর্থ্যমেব প্রপঞ্চয়িতুং কার্য্যাতিবৈচিত্র্যমাহুঃ—ভো অজ ! কালে তত্তদবসরে বলিং ভোগ্যং যাবৎ সাকল্যেন তে তুভ্যং হরাম সমর্পয়াম, যথা যেন প্রকারেণ অন্নমদাম ভক্ষয়াম ইত্যনেনান্নমাত্রমস্মাকম, ঐশ্বর্য্যেণ তু ভোগস্তবৈবেত্যুক্তম্। উভয়েষাং তব চাস্মাকঞ্চ ; যত্র স্থিতা ইমে জীবা অনূহা অপ্রত্যূহা নির্ব্বিঘ্নাঃ ; যদ্বা, অনূহাঃ অবিতর্কা নিঃসংশয়া ইত্যর্থঃ। তথা চ শ্রুতিঃ—'তা এনমব্রুবন্ আয়তনং নঃ প্রজানীহি যস্মিন্ প্রতিষ্ঠিতা অন্নমদাম' ইতি ॥ (৪৯) অবশ্যঞ্চ ত্বয়াস্মাকমেষাঞ্চ কার্য্যোপাধীনাং জীবানাং বৃত্তিঃ পরিকল্পনীয়া, জনকত্বাদিত্যাহুঃ—নোঽস্মাকং সান্বয়ানাং স্বকার্য্যাণাম্; যদ্বা, অন্বেতীত্যন্বয়ঃ কারণং তৎসহিতানাং ত্বমেবাদ্যঃ কারণম্। অত্র হেতবঃ—কূটস্থোঽবিক্রিয়ঃ, পুরুষোঽধিষ্ঠাতা, পুরাণঃ পুরাতনঃ ; এতদুপপাদয়ন্তি—ত্বমিতি। হে দেব ! অজ এব ত্বং গুণানাং সত্ত্বাদীনাং কর্ম্মণাং জন্মাদীনাঞ্চ যোনৌ কারণভূতায়াং শক্ত্যাং মায়ায়াং প্রথমং রেত আদধে নিহিতবানসীত্যর্থঃ। কীদৃশম্ ? কবিং সর্ব্বজ্ঞং মহত্তত্ত্বরূপম্ ॥ (৫০) ততঃ হে আত্মন্ ! দেব ! মৎপ্রমুখা মহদাদয়ো বয়ং যদর্থং বভূবিম, তৎ কিং কার্য্যং তে করবাম ? সৃষ্টিমিতি চেৎ, তত্রাহুঃ—তর্হি নোঽস্মভ্যং ত্বং স্বচক্ষুঃ স্বীয়ং জ্ঞানং শক্ত্যা সহ পরিদেহি প্রযচ্ছ, যস্মাৎ ত্বত্ত এবানুগ্রহো

যেষাম্, তে যদনুগ্রহাস্তেষামস্মাকম্। ত্রিয়ার্থে ইয়ানেবৈতাবান্ অনুগ্রহো যেষামিত্যেকং বা পদম্। তদীয়জ্ঞানক্রিয়াশক্তিভ্যামেব বয়ং সৃষ্টৌ ক্ষমাঃ, নান্যথেত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
পঞ্চমোঽধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠে তৈরীশ্বরাবিষ্টৈঃ সৃষ্টিমাহ বিরাট্‌তনোঃ।
অধিদৈবাদিভেদঞ্চ তত্রৈব ভগবৎকৃতম্॥ (১)

১। স্বশক্তীনাং মহদাদীনামসমেত্য অমিলিত্বা সতীনাং স্থিতানাম্, প্রসুপ্তং লোকতন্ত্রং বিশ্বরচনা যাসাম্ ; যদ্বা, প্রসুপ্তজীবোপকরণানাং গতিং স্থিতিং দৃষ্ট্বা অবিশদিত্যুত্তরেণান্বয়ঃ ॥

২। কালেন সংজ্ঞা উদ্বোধো যস্যাঃ ; কলয়তি ক্ষোভয়তি স্বকার্য্যাণীতি বা কালসংজ্ঞা প্রকৃতিঃ, তাং শক্তিম্, প্রকৃত্যা সহ প্রবেশাৎ ত্রয়োবিংশতিতত্ত্বানামিত্যুক্তম্ ; অন্তর্য্যামিতয়া প্রাবিশৎ ॥

৩। চেষ্টারূপেণ ক্রিয়াশক্ত্যা। কর্ম্ম তেষাং ক্রিয়াম্, জীবানামদৃষ্টং বা ॥

৪। প্রবুদ্ধং কর্ম্মক্রিয়াশক্তির্যস্য, স ত্রয়োবিংশতের্গণঃ, দৈবেনেশ্বরেণ প্রেরিতঃ, মাত্রাভিরংশৈঃ, অধিপুরুষং বিরাড়্‌দেহম্ ॥

৫। জননমেবাহ—পরেণ ঈশ্বরেণ, বিশ্বসৃজাং তত্ত্বানাং গণো মাত্রয়া চুক্ষোভ পরিণতঃ ; স সর্ব্বাত্মনা যস্মিন লোকাঃ স্থিতাঃ ॥

৬। স পুরুষঃ যোঽধিপুরুষ ইত্যুক্তঃ। অণ্ডকোষে ব্রহ্মাণ্ডমধ্যে, সর্ব্বৈঃ সত্ত্বৈরনুশায়িভির্জীবৈঃ সহিতঃ ॥

৭। গর্ভঃ কার্য্যরূপো বিরাট্। দৈবশক্তির্জ্ঞানশক্তিস্তয়া একধা হৃদয়াবচ্ছিন্নচৈতন্যরূপেণ, কর্ম্মশক্তিঃ ক্রিয়াশক্তিস্তয়া দশধা প্রাণরূপেণ। প্রাণাদয়ঃ পঞ্চ,—'নাগঃ কূর্ম্মোঽথ কৃকরো দেবদত্তো ধনঞ্জয়ঃ' ইত্যেতে পঞ্চ, ইত্যেবং বৃত্তিভেদেন দশবিধঃ প্রাণঃ। আত্মশক্তির্ভোক্তৃশক্তিস্তয়াধ্যাত্মাদিভেদেন ত্রিধা আত্মানং বিভক্তং কৃতবান্ ॥

৮। এবং বিভাগে সামর্থ্যায় তস্যোৎকর্ষমাহ—এষ হীতি। অশেষসত্ত্বানাং প্রাণিনামাত্মা, ব্যষ্টীনাং তদংশত্বাৎ ; অংশো জীবঃ, অবতারোক্তিস্তস্মিন্ নারায়ণাবির্ভাবাভিপ্রায়েণ ॥

৯। পূর্ব্বশ্লোকার্থং বিবৃণোতি—সাধ্যাত্মঃ অধ্যাত্মানি ইন্দ্রিয়াণি, তৎসহিতঃ ; বিরাড়িতি সর্ব্বত্র ॥

১০। অধ্যাত্মাদিভেদং প্রপঞ্চয়িতুমাহ—স্মরন্নিতি। বিজ্ঞাপিতং 'যাবদ্বলিং তেঽজ ! হরাম' ইত্যাদি ; স্বেন তেজসা চিচ্ছক্ত্যা, অত এতৎ এবং[1] করিষ্যামীত্যালোচিতবান্, 'যস্য জ্ঞানময়ং তপঃ' ইতি শ্রুতেঃ। এষাং বিশ্বসৃজাং বিবৃত্তয়ে বিবিধবৃত্তিলাভায় ॥

১১। মে মত্তঃ শৃণু ॥

১২। আয়তনান্যেবাহ—তস্যাগ্নিরিত্যাদি-চতুর্দ্দশভিঃ। আস্যং নির্ভিন্নং পৃথগ্‌জাতং পদং স্বস্থানং স্বাংশেন স্বশক্ত্যা বাচা সহাবিশৎ ; অসৌ জীবো বক্তব্যং প্রতিপদ্যতে শব্দমুচ্চারয়তীত্যর্থঃ। এবং সর্ব্বত্র যন্নির্ভিন্নং দ্বিতীয়ান্তং তদধিষ্ঠানম্, অগ্ন্যাদিপ্রথমান্তম্ অধিদৈবম্, বাগাদি ইন্দ্রিয়ং তৃতীয়ান্তমধ্যাত্মম্, প্রতিপত্তব্যমধিভূতম্ ॥

১৩। হরের্বিরাজঃ ॥

১। অতপৎ এবং (ঘ)।

১৫। ত্বষ্টা আদিত্যঃ ॥

১৬। প্রাণেনেতি প্রাণবদ্দেহব্যাপিনা ত্বগিন্দ্রিয়েণেত্যর্থঃ ॥

১৭। শব্দস্য সিদ্ধিং জ্ঞানম্ ॥

১৮। ত্বচং চর্ম্ম, ওষধীঃ ওষধ্যঃ, ত্বগিন্দ্রিয়স্যৈব স্থানভেদেন বিষয়দ্বয়ং কণ্ডূঃ স্পর্শশ্চ। অত্র চায়ং নামভেদো দেবতাভেদশ্চেতি দ্বিতীয়স্কন্ধ এব ব্যাখ্যাতম্ ॥

১৯। কঃ প্রজাপতিঃ ॥

২১। স্বঃপতিঃ স্বর্গস্য পতিরিন্দ্রঃ; বার্ত্তয়া ক্রয়বিক্রয়াদিশক্ত্যা; বৃত্তিং জীবিকাম্ ॥

২২। প্রাপ্যং দেশান্তরম্ ॥

২৪। বিক্রিয়াং সঙ্কল্পাদিরূপাম্ ॥

২৫। আত্মানমহঙ্কারম্, অভিমন্যতেঽনেনেতি অভিমানো রুদ্রঃ, কর্ম্মণা অহংবৃত্ত্যা, কর্ত্তব্যমিতি ক্রিয়াম্ ॥

২৬। সত্ত্বমিতি বুদ্ধিচিত্তয়োরভেদেন নির্দ্দেশঃ, মহানিতি ব্রহ্মা, চিত্তেন চেতনয়া ॥

২৭। ত্রিলোকোৎপত্তিমাহ—শীর্ষ্ণ ইতি। বৃত্তয়ঃ পরিণামাঃ ॥

২৮—২৯। এতদেব প্রপঞ্চয়তি দ্বাভ্যাম্। আত্যন্তিকেন উর্জ্জিতেন, 'পণ' ব্যবহারে, পণায়ন্তে যাগাদিনা ব্যবহরন্তীতি পণয়ো মনুষ্যাঃ, তাননু যে তদুপকরণভূতা গবাদয়স্তেঽপি ধরাং প্রপেদিরে ॥ (২৯) তৃতীয়ং তমঃ, তদীয়েন তামসেন। উভয়োর্দ্যাবাপৃথিব্যোরন্তরং মধ্যং ব্যোম অন্তরীক্ষং, তদেব ভগবতো নাভিঃ, তামাশ্রিতা রুদ্রপার্ষদাঃ রুদ্রস্য পার্ষদানাং ভূতাদীনাং গণাঃ ॥

৩০। অবর্ত্তত প্রবৃত্তম্, ব্রহ্ম বেদঃ। যস্তু উন্মুখত্বাৎ মুখোদ্ভবত্বাদ্-বর্ণানাং মুখ্যঃ মুখমিব প্রথমো গুরুশ্চাভূৎ, সোঽপি মুখতোঽবর্ত্ততেত্যনুষঙ্গঃ।

অধ্যাপনাদিনা ব্রাহ্মণস্ত বেদো বৃত্তিঃ, তয়া বৃত্ত্যা সহ ব্রাহ্মণো মুখতো জাত ইত্যর্থঃ। এবমুত্তরবর্ণত্রয়ে জ্ঞাতব্যম্ ॥

৩১। ক্ষত্রং পালনরূপা বৃত্তিঃ, তৎ ক্ষত্রমনুব্রতোঽনুসৃতঃ[১] ক্ষত্রিয়োঽপি বাহুভ্যোঽবর্ত্ততেত্যর্থঃ। তদনুব্রতত্বমেবাহ—য ইতি। পৌরুষঃ পুরুষস্ত বিষ্ণোরংশঃ, কণ্টকাশ্চৌরাদয়স্তেভ্যো যৎ ক্ষতমুপদ্রবস্তস্মাৎ ত্রায়তে রক্ষতি ॥

৩২। বিশঃ কৃষ্যাদিব্যবসায়াঃ, লোকস্ত বৃত্তিকরীর্জীবিকাহেতবঃ; তস্ত বিভোরূর্ব্বোঃ প্রবৃত্তাঃ, তদুদ্ভব উরুজঃ; বার্ত্তাং জীবিকাং যঃ স্ববৃত্ত্যা সম্পাদিতবান্ ॥

৩৩। তস্তাং নিমিত্তভূতায়াম্, যস্ত বৃত্ত্যা দ্বিজশুশ্রূষয়া হরিঃ স্বয়মেব তুষ্যতি ॥

৩৪। যদ্‌যস্মাজ্জাতাঃ; গুরুত্বাৎ, জনকত্বাৎ, বৃত্তিপ্রদত্বাচ্চ হরেরারাধনং তেষাং পরো ধর্ম্ম ইত্যর্থঃ ॥

৩৫। ভোঃ ক্ষত্তঃ! দৈবকর্ম্মাত্মরূপিণঃ কালকর্ম্মস্বভাবশক্তিমতো ভগবতো যোগমায়াবলেন উজ্জৃম্ভিতমেতদ্বিরাড়্রূপমুপাকর্ত্তুং সাকল্যেন নিরূপয়িতুং কঃ শ্রদ্দধ্যাৎ ইচ্ছেৎ? ইচ্ছাপ্যশক্যা, নিরূপণন্তু দূরত ইত্যর্থঃ ॥

৩৬। অঙ্গ বিদুর! তথাপি হরেঃ কীর্ত্তিং কীর্ত্তয়ামি, যথাশ্রুতং গুরুমুখাৎ, তদপি ন সর্ব্বাত্মনা, কিন্তু যথামতি স্বমত্যনুসারেণ; অন্যাভিধা হরিব্যতিরিক্তার্থাভিধানম্, তয়া অসতীং মলিনাং স্বীয়াং বাচং সৎকর্ত্তুং পবিত্রীকর্ত্তুম্ ॥

৩৭। অজ্ঞাত্বাপি যথামতি কীর্ত্তনে শ্রবণে বা আবশ্যকং কৈবল্যমিত্যাহ—একান্ততো লাভং নু নিশ্চিতমাহুঃ, শ্রুতেঃ শ্রোত্রস্ত, উপাকৃতায়াং নিরূপিতায়াম্, উপসংপ্রয়োগং সন্নিধাবর্পণম্ ॥

১। অনুভূতঃ (খ)।

৩৮। ন চাতীব জ্ঞানে নির্ব্বন্ধঃ কর্ত্তব্যঃ, ব্রহ্মণোঽপি দুর্জ্ঞেয়ত্বাদিত্যাহ—আত্মনো হরের্মহিমা যোগবিপক্কয়াপি ধিয়া সংবৎসরসহস্রান্তেঽপি আদিকবিনা ব্রহ্মণাপি কিমবসিতঃ, কিং জ্ঞাতঃ? ইতি কাকুক্ত্যা এতাবানিতি, ন জ্ঞাত এবেত্যুক্তম্ ॥

৩৯। যদ্‌যস্মাৎ স্বয়মপি আত্মা হরিরাত্মবত্ম স্বমায়াগতিমেতাবদিতি ন বেদ, অনন্তত্বাৎ ॥

৪০। অতো দুর্জ্ঞেয়ত্বাৎ কেবলং নমস্করোতি—যত ইতি। যস্ত জ্ঞানায় প্রবৃত্তা বাচোঽপি মনসা সহ তমপ্রাপ্যৈব ন্যবর্ত্তন্ত, দুর্জ্ঞেয়ত্বাৎ। ন কেবলং বাঙ্মনসে, অহমহঙ্কারাধিষ্ঠাতা রুদ্রোঽপি, ইমে ইন্দ্রিয়াধিষ্ঠাতারো দেবা অপি, অন্যে চ।

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে

ষষ্ঠোঽধ্যায়ঃ ॥ ৬ ॥

সপ্তমোঽধ্যায়ঃ

সপ্তমে সংশয়চ্ছেদি প্রতিনন্দ্য মুনের্বচঃ।

পুনঃ ক্ষত্রা কৃতা নানাপ্রশ্নাঃ সম্যগুদীরিতাঃ[১] ॥ (১)

১। 'অথ তে ভগবল্লীলাযোগমায়োপবৃংহিতা' ইত্যাদিনা মায়াগুণৈর্লীলয়া ভগবান্ সৃষ্ট্যাদি করোতীত্যেবং ব্রুবাণং মৈত্রেয়ং, ভারত্যা প্রার্থনরূপয়া, প্রীণয়ন্নিবেতি অভিপ্রায়াজ্ঞানেনাক্ষেপাৎ ॥

২। নির্ব্বিকারস্য ক্রিয়াঃ, নির্গুণস্য গুণাঃ কথং লীলয়েত্যুক্তিঃ? প্রয়োজনাভাবং পরিহরতি, ন বস্তুবিরোধমিতি ভাবঃ ॥

১। সম্যগুদাহৃতাঃ (খ)।

৩। অর্ভকবল্লীলাপি ন যুজ্যতে, বৈষম্যাদিত্যাহ—উদ্যময়তি প্রবর্ত্তয়তীত্যুদ্যমঃ, অর্ভকস্য ক্রীড়ায়াং প্রবৃত্তিহেতুঃ কামোঽস্তি; অন্যতস্তু বস্ত্বন্তরেণ বালান্তর-প্রবর্ত্তনেন যা তস্য ক্রীড়েচ্ছা ভবতি, ঈশ্বরস্য তু স্বতস্তৃপ্তস্য কথং কামঃ? অন্যতঃ সদা নিবৃত্তস্য চ অসঙ্গাদদ্বিতীয়স্য কথমন্যতশ্চিৎক্রীড়িষেত্যর্থঃ ॥

৪। যচ্চোক্তং 'স্মরন্ বিশ্বসৃজামীশো বিজ্ঞাপিতমধোক্ষজঃ' ইত্যাদিনা অবিদ্যোপাধের্জীবস্য ভোগার্থমীশ্বরঃ সৃষ্ট্যাদি করোতীতি তদপ্যাক্ষেপ্তুমনুবদতি—অস্রাক্ষীদিতি। গুণময্যা আত্মনো জীবস্য কর্তৃত্বভোক্তৃত্বাদিমোহোৎপাদিকা যা মায়া, তয়া সৃষ্টবান্; তদুক্তং প্রথমে—'যয়া সম্মোহিতো জীব আত্মানং ত্রিগুণাত্মকম্। পরোঽপি মনুতেঽনর্থং তৎকৃতঞ্চাভিপদ্যতে।' ইত্যাদিনা; অত্র চ—'অতো[১] ভাগবতী মায়া মায়িনামপি মোহিনী' ইতি। সংস্থাপয়তি পালয়তি, প্রত্যপিধাস্যতি প্রাতিলোম্যেন তিরোহিতং করিষ্যতি; আত্মন্ প্রত্যভিধাস্যতীতি পাঠান্তরে প্রাতিলোম্যেনাত্মনি অভিতো ধারয়িষ্যতি ॥

৫। এতচ্চ জীবস্যাবিদ্যাশ্রয়ত্বে ঘটেত, ন তু তৎ সম্ভবতীত্যাহ—দেশত ইতি। যোঽসৌ দেশাদিভিরবিলুপ্তাববোধ আত্মা জীবঃ, ব্রহ্মস্বরূপত্বাৎ, স কথমজয়া অবিদ্যয়া যুজ্যেত? তত্র দেশতো দীপপ্রভায়া ইব লোপো নাস্তি, সর্ব্বগতত্বাৎ; ন কালতো বিদ্যুত ইব, নিত্যত্বাৎ; নাবস্থাতঃ স্মৃতিবৎ, অবিক্রিয়ত্বাৎ; ন স্বতঃ স্বপ্নবৎ, সত্যত্বাৎ; নান্যতঃ ঘটাদিবৎ, অদ্বিতীয়ত্বাৎ। এবমেতৈর্যস্য বোধো ন লুপ্যতে, স কথমজয়া যুজ্যেত? অজা চাত্রাবিদ্যৈব, ন মায়া, তস্যা অববোধেন বিরোধাভাবাৎ ॥

৬। কিঞ্চ ব্রহ্মরূপত্বাদেব জীবস্য সংসারোঽপি ন ঘটত[২] ইত্যাক্ষিপতি—সর্ব্বক্ষেত্রেষ্ববস্থিতো ভোক্তাপি বস্তুতো ভগবানেক এব, চিদ্রূপত্বেন,

১। অহো (ক); ২। বিদ্যত (ঘ)।

তদ্ব্যতিরেকাভাবাৎ। এবঞ্চ সতি অমুষ্য জীবস্য দুর্ভগত্বমানন্দাদিভ্রংশঃ, কর্ম্মভির্হেতুভূতৈঃ ক্লেশো বা কুতঃ কর্ম্মসম্বন্ধাভাবাৎ? অন্যথা ঈশ্বরস্যাপি তৎপ্রসঙ্গঃ স্যাদিতি ভাবঃ॥

৭। অজ্ঞানমেব সঙ্কটং দুর্গং তস্মিন্; তন্মানসং, কশ্মলং মোহম্, পরাণুদ অপাকুরু॥

৮। চোদিত আক্ষিপ্তঃ, স্ময়ন্নিব বিস্ময়মাবিষ্কুর্ব্বন্নিব[১], বস্তুতস্তু গতস্ময়ঃ॥

৯। ভগবতোঽচিন্ত্যশক্তেরীশ্বরস্য সেয়ং মায়া নয়েন তর্কেণ বিরুধ্যত ইতি যৎ; তর্কবিরোধমেবানুবদতি—বিমুক্তস্যৈব পুংসোঽবিদ্যয়া বন্ধনং কার্পণ্যঞ্চেতি॥

১০। অত্রোদাহরণমাহ—যদ্‌যথা অর্থেন শিরশ্ছেদাদিনা বিনাপি উপদ্রষ্টুঃ স্বপ্নসাক্ষিণো মমেদং শিরশ্ছিন্নমিত্যাত্মবিপর্য্যয়ঃ কেবলং মৃষৈব প্রতীয়তে, তদ্বৎ॥

১১। নন্বু তর্হি ঈশ্বরস্যাপি কিং ন প্রতীয়েত? তত্রাহ—যথা জলে প্রতিবিম্বিতস্যৈব চন্দ্রমসো জলোপাধিকৃতঃ কম্পাদিধর্ম্মো দৃশ্যতে, ন ত্বাকাশে স্থিতস্য, তথানাত্মনো দেহাদের্ধর্ম্মোঽসন্নপি তদভিমানিনো দ্রষ্টুরাত্মনো জীবস্যৈব ন ত্বীশ্বরস্যেত্যর্থঃ॥

১২। তন্নিবৃত্ত্যুপায়মাহ—স বৈ অনাত্মনো গুণঃ নিবৃত্তিধর্ম্মেণ যা বাসুদেবানুকম্পা, তয়া চ তস্মিন্ ভক্তিযোগঃ, তেন তিরোধত্তেঽদৃশ্যো ভবতি। শনৈরিত্যনেন সাধনানুসারেণেত্যুক্তম্॥

১৩। নন্বু তর্হি সর্ব্বানর্থনিবৃত্তিঃ কদেত্যপেক্ষায়ামাহ—যদা ইন্দ্রিয়াণামুপরামো নৈশ্চল্যম্। ক্ব? দ্রষ্টুরাত্মনি অন্তর্য্যামিরূপে, অথানন্তরমেব; কৃৎস্নক্লেশবিলয়মাত্রে দৃষ্টান্তঃ—সংসুপ্তস্যেবেতি, ন তু পুনরুত্থানে॥

১। প্রৌঢ়িমাবিষ্কুর্ব্বন্নিব (ঘ)।

১৪। ভক্তিযোগেন ক্লেশনিবৃত্তিং দর্শয়তি—অশেষেতি; গুণানামনুবাদঃ শ্রবণঞ্চ; আত্মনি মনসি লব্ধা, শ্রবণকীর্ত্তনাপেক্ষয়া সপ্রেমধ্যানে, কিং পুনর্ন্যায়োক্তিঃ॥

১৫—২০। উত্তরমভিনন্দন্নাত্মনঃ কৃতার্থতামাবিষ্করোতি—সংছিন্ন ইতি ষড়্ভিঃ। চিদ্রূপত্বাবিশেষেহপি কথমীশ্বরস্য জগৎকর্ত্তৃত্বাদি, কথং বা জীবস্য সংসারঃ? ইতি যঃ সংশয়ো মমাসীৎ, স তব সূক্তং সোপপত্তিকং বাক্যমেবাসিঃ খড়্গস্তেন সংছিন্নঃ; অত ইদানীং মে মন উভয়ত্রাপি ঈশ্বরস্বাতন্ত্র্যে জীবপারতন্ত্র্যে চ সম্প্রধাবতি সম্যক্ প্রবিশতি; এবং বা অবিলুপ্তাববোধরূপস্যাত্মনঃ কথমবিদ্যয়া বন্ধঃ, কুতো বা তন্নিবৃত্তিঃ? ইতি মে সংশয়ঃ; উভয়ত্রেতি বন্ধে মোক্ষে চেত্যর্থঃ॥ (১৬) হে বিদ্বন্! যস্মাৎ ত্বয়া সাধু ব্যবহৃতম্। কিং তৎ? হরেঃ শক্তির্যা আত্মমায়া জীববিষয়া, তদয়নং তদাশ্রয়মেতৎ দুর্ভগত্বাদিকমাভাতীতি। যদ্‌যস্মাৎ স্বশিরশ্ছেদাদিবদপার্থমবস্তুভূতং নির্ম্মূলং মূলশূন্যঞ্চ; যস্মাদস্য বলং বিশ্বস্য মূলং স্বাজ্ঞানং বহির্বিনা নাস্তি॥ (১৭) অল্পজ্ঞত্বাৎ পূর্ব্বং মম সংশয়ো জাত ইত্যাহ—যশ্চেতি। মূঢ়তমো দেহাদ্যাসক্তঃ, যশ্চ বুদ্ধেঃ প্রকৃতেঃ পরমীশ্বরং প্রাপ্তঃ, তৌ সুখং যথা ভবতি তথা এধেতে জীবত ইত্যর্থঃ, সংশয়ক্লেশাভাবাৎ। যস্তু দুঃখানুসন্ধানেন প্রপঞ্চং জিহাসতি, স্বানন্দসংবেদনাভাবাচ্চ হাতুং ন শক্নোতি, স তু ক্লিশ্যত ইত্যর্থঃ॥ (১৮) ইদানীন্তু কৃতার্থোহস্মি, যতস্ত্বয়া সংশয়শ্ছিন্নঃ, কেবলং বাধিতানুবৃত্তিরেবাবশিষ্টা, সাপি যুষ্মৎপ্রসাদান্নিবর্ত্তিষ্যত ইত্যাহ—নাত্মনোহনাত্মনঃ প্রপঞ্চস্য প্রতীতস্যাপি অর্থাভাবম্; অর্থোহত্র নাস্তি, কিন্তু প্রতীতিমাত্রমিতি যুষ্মচ্চরণসেবয়া নিশ্চিত্য তাং প্রতীতিমপ্যহং পরাণুদে অপনেষ্যামীত্যর্থঃ॥ (১৯) মধুদ্বিষঃ পাদয়ো রতিরাসঃ প্রেমোৎসবঃ, তীব্রো দুর্ব্বারঃ, স্বাভাবিকঃ; ব্যসনং সংসারমর্দ্দয়তি নাশয়তীতি তথা॥ (২০) অহো! দুর্লভং প্রাপ্তং

ময়েত্যাহ—দুরাপা দুর্লভা ; বৈকুণ্ঠস্য বিষ্ণোস্তল্লোকস্য বা বর্ত্মসু মার্গ-ভূতেষু মহৎসু ; যত্র যেষু। মহৎসেবয়া হরিকথাশ্রবণম্, ততো হরৌ প্রেম, তেন চ দেহাদ্যনুসন্ধানমপি নিবর্ত্তত ইতি তাৎপর্য্যম্॥

২১—২৩। অর্থান্তরং প্রষ্টুং তদুক্তমনুবদতি—সৃষ্টেতি ত্রিভিঃ। বিকারৈরিন্দ্রিয়াদিভিঃ সহিতানি ; উদ্ধৃত্য তদংশৈর্বিরাজং সৃষ্ট্বা॥ (২২) অনুপ্রবিষ্টস্য স্বরূপমাহ—যমিতি ; বিরাজং বিশিনষ্টি—যত্রেতি। তে ইমে বিশ্বে সর্ব্বে লোকাঃ ; সবিকাশমসঙ্কোচেন॥ (২৩) প্রাণাদয়ঃ পঞ্চ, নাগাদয়ঃ পঞ্চেত্যেবং দশবিধঃ। ইন্দ্রিয়াণি চ অর্থাশ্চ ইন্দ্রিয়াণি চেতি, পুনরুক্তিস্তদ্দেবতালক্ষণার্থা, তৎসহিতঃ ; সর্ব্বোপবৃংহকত্বাৎ প্রাণস্য তৎসাহিত্যম্ ; এবং ত্রিবৃৎ ত্রিবিধঃ প্রাণস্ত্বয়া ঈরিত উক্তঃ ; তস্য বিভূতীর্ব্রহ্মাদ্যা বিসর্গশব্দবাচ্যাঃ॥

২৪। যত্র যাসু ; ইদং বিশ্বং ততং ব্যাপ্তম্॥

২৫—৪২। 'এবমেতৎ পুরা পৃষ্টো মৈত্রেয়ো ভগবান্ কিল' ইতি পরীক্ষিৎ-প্রশ্নোত্তরতয়া বিদুরমৈত্রেয়সংবাদঃ প্রস্তাবিতঃ, অতস্তানেব বিদুরেণ কৃতান্ প্রশ্নানাহ যাবৎসমাপ্তি। প্রজাপতীনাং পতির্ব্রহ্মেত্যাদীনাং বর্ণয়েতি বক্ষ্যমাণেনান্বয়ঃ। চকৢপে অকল্পয়ৎ, সর্গান্ নববিধান্, অনুসর্গান্ তদ্ভেদান্॥ (২৬) হে মিত্রায়া আত্মজ! (২৭) সংস্থাং সন্নিবেশম্ ; সর্গানাং সংব্যূহং সংবিভাগম্ ; গার্ভস্বেদদ্বিজোদ্ভিদাম্—গার্ভা জরায়ুজাঃ, স্বেদাচ্চ দ্বাভ্যাঞ্চ জাতাঃ স্বেদদ্বিজাঃ, উদ্ভিদশ্চ, তেষাম্॥ (২৮) সর্গাদীনামাশ্রয়ঞ্চ সৃজতঃ কুর্ব্বতঃ॥ (২৯) রূপং লিঙ্গম্, শীলমাচারঃ, স্বভাবঃ শমাদিস্ততো, বিকর্ষণং বিভাগম্॥ (৩০) বিতানানি বিস্তারান্ ; নৈষ্কর্ম্ম্যস্য চ জ্ঞানস্য, তদুপায়স্য চ সাংখ্যস্য, পথো মার্গান্ তন্ত্রঞ্চেত্যর্থঃ॥ (৩১) পাষণ্ডানাং পন্থাঃ প্রবৃত্তিঃ তদেব বৈষম্যম্॥ (৩২) নিমিত্তোন্ন্যপায়ান্, পরস্পরাবিরোধেন॥ (৩৩) গ্রহাদীনাং কালচক্রে সংস্থিতিম্॥

(৩৫) যেন মার্গেণ ভগবান্ সন্তুষ্যেৎ ; যেষামিতি যাদৃশানাম্ ॥ (৩৬) অনাপৃষ্টমপি অপৃষ্টমপি ; যদ্‌যোগ্যম্, তদ্‌বক্তব্যমিতি ভাবঃ ॥ (৩৭) প্রতিসংক্রমঃ প্রলয়ঃ ; তত্র প্রলয়ে ইমং পরমেশ্বরং শয়ানং রাজানমিব চামরগ্রাহিণঃ কে বা তমনুশেরতে শয়ানমনুস্বপন্তি ॥ (৩৮) পুরুষস্য সংস্থানং জীবস্য তত্ত্বম্, পরমেশ্বরস্য স্বরূপম্, যেনাংশেন তয়োরৈক্যম্, তথা জ্ঞানঞ্চ নৈগমমৌপনিষদম্ ॥ (৩৯) যানি সূরিভিঃ প্রোক্তানি তস্য জ্ঞানস্য সাধনানি, তানি চ ব্রূহি। গুরুং বিনৈতন্ন ভবতীত্যাহ—স্বত ইতি ॥ (৪০) মে প্রশ্নান্ মে মিত্রত্বাৎ স্নিগ্ধত্বাদিতি অন্বয়ভেদান্ন 'মে'-পদস্য পৌনরুক্ত্যম্ ॥ (৪১) তত্ত্বোপদেশেন জীবাভয়প্রদানস্য ॥ (৪২) পুরাণে কল্পতে প্রকাশতে ইতি পুরাণকল্পো বুভুৎসিতোঽর্থ আপৃষ্টঃ। পুরাণকল্পো যঃ, বহুব্রীহিঃ ; স মুনিপ্রধানঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
সপ্তমোঽধ্যায়ঃ ॥ ৭ ॥

অষ্টমোঽধ্যায়ঃ

অষ্টমে সমভূদ্‌ব্রহ্মা নাভেস্তু জলশায়িনঃ।
তমজানন্ জলে বিভ্যৎ তপসাতোষয়ৎ প্রভুম্[১] ॥ (১)

১। শ্রোতারমভিনন্দতি—সতাং সেবিতুং যোগ্যঃ ; বত অহো, যদ্-যস্মাৎ ইহ অস্মিন্ বংশে লোকপালো ধর্ম্মরাজস্ত্বং বভূবিথ জাতোঽসি। কথম্ভূতঃ ? ভগবানেব প্রধানভূতো যস্য সঃ ; অত্র হেতুঃ—অজিতেতি। প্রতিক্ষণং নূতনয়সি নবীনাং করোষি ॥

১। বিভুম্ (ঘ)।

২। অল্পসুখায় মহদ্দুঃখং প্রাপ্তানাম্, তস্য দুঃখস্য বিরমায় প্রবর্ত্তয়ে প্রারভে॥

৩—৯। কোঽসৌ ভগবান্, কেভ্যশ্চ ঋষিভ্য আহ, কথঞ্চ ত্বয়া প্রাপ্তম্? ইত্যপেক্ষায়ামাহ—আসীনমিতি সপ্তভিঃ। উর্ব্ব্যাং পাতালতলে, অকুণ্ঠসত্ত্বমপ্রতিহতজ্ঞানম্; অতঃ সঙ্কর্ষণাৎ, পরস্য শ্রীবাসুদেবস্য॥ (৪) তমেব বিশিনষ্টি—স্বমেব ধিষ্ণ্যং স্বীয়মাশ্রয়ম্, বাসুদেবসংজ্ঞং পরমানন্দরূপম্, ধ্যানপথেনানুভূয় বহু মানয়ন্তং সর্ব্বোৎকর্ষেণ পূজয়ন্তম্, প্রত্যগ্ধৃতমন্তর্ম্মুখীকৃতম্, নেত্রাম্বুজমুকুলং কিঞ্চিদুন্মীলয়ন্তম্, কৃপাবলোকেন সনৎকুমারাদীনামভ্যুদয়ার্থম্॥ (৫—৬) মুনীনাং বিশেষণং সার্দ্ধেন—স্বধুন্যা উদকেনার্দ্রৈরিতি। শ্রীভাগবতশ্রবণার্থং সত্যলোকাৎ পাতালমবতরন্তো নিরন্তরং গঙ্গামধ্যত এবাবতীর্ণা ইতি ভাবঃ। চরণাবুপধীয়েতে যস্মিন্ পদ্মে তদুপস্পৃশন্তো নমন্তঃ। কথম্ভূতম্? তদাহ—যৎ পদ্মং প্রেমসহিতং যথা ভবত্যেবং নানোপহারৈঃ পূজয়ন্তি; বরার্থাঃ পতিকামাঃ॥ (৬) কৃতানি কর্ম্মাণি গৃণন্তঃ। কেন? অনুরাগেণ স্খলন্তি পদানি যস্মিন্, তেন বচসা; তানি জানন্তীতি তজ্জ্ঞাঃ; সহস্রমেব সাহস্রম্, কিরীটানাং সাহস্রে যে মণিপ্রবেকা রত্নোত্তমাস্তৈঃ প্রদ্যোতিতমুদ্দামফণানাং সহস্রং যস্য তম্, অন্বপৃচ্ছন্নিতি পূর্ব্বেণান্বয়ঃ॥ (৭) তেন সঙ্কর্ষণেন সনৎকুমারায় প্রোক্তম্॥ (৮) পারমহংস্যে ধর্ম্মে মুখ্যঃ; বিবক্ষমাণ ইত্যাত্মনেপদম্, ক্রুবাদেশস্য বচেরুভয়পদিত্বাৎ; অন্বিতায় অনুগতায়॥ (৯) পুলস্ত্যেনোক্ত ইত্যত্রৈবমাখ্যায়িকা—পিতরং রাক্ষসভক্ষিতং শ্রুত্বা পরাশরো রাক্ষসসত্রে প্রবৃত্তো বশিষ্ঠবচনান্নিবৃত্তঃ। ততঃ পুলস্ত্যেন স্বসন্ততিরক্ষণাৎ তুষ্টেন বরো দত্তঃ—'পুরাণবক্তা ভবিষ্যসি' ইতি॥

১০। তদেবং সঙ্কর্ষণাৎ সম্প্রদায়প্রবৃত্তিং প্রদর্শ্য বিভূতিকথনায় পদ্মোদ্ভবং বক্তুমাহ—উদাপ্লুতমেকার্ণবোদকে নিমগ্নং যদ্যদা আসীৎ,

তদা অমীলিতদৃক্ অতিরোহিতচিচ্ছক্তিরেব শ্রীনারায়ণো নেত্রে নিমীলিতবানিত্যর্থঃ। মায়াবিনোদং পরিত্যজ্য স্বাত্মরতৌ স্বরূপানন্দ[১] এব কৃতোৎসবঃ, অতএব নিরীহো নিষ্ক্রিয়ঃ সন্॥

১১। কালশক্তেঃ প্রেরণং পুনঃ সৃষ্ট্যবসরে প্রবোধনার্থম্; স্বে পদে অধিষ্ঠানে, বহির্বৃত্ত্যভাবে দৃষ্টান্তঃ—যথানল ইতি॥

১২। স্বয়া চিচ্ছক্ত্যা সহ বর্ত্তমান এব যোগনিদ্রয়া স্বপন্। পূর্ব্বমেব প্রবোধনার্থং নিযুক্তয়া স্বকালশক্ত্যা আসাদিতং প্রাপিতং কর্ম্মতন্ত্রং ক্রিয়াকলাপো যস্য সঃ, অপীতান্ লীনান্ দদর্শ॥

১৩। লোকসৃষ্ট্যর্থমর্থসূক্ষ্মে অভিনিবিষ্টা দৃষ্টির্যস্য। কালানুসারিণা রজোগুণেন বিদ্ধঃ ক্ষোভিতঃ সন্, তনীয়ানতিসূক্ষ্মোঽর্থঃ, সূষ্যন্ প্রসোষ্যন্ উদ্ভবিষ্যন্ নাভিদেশাদুদ্ভূত ইত্যর্থঃ॥

১৪। স তনীয়ানর্থঃ পদ্মকোষঃ সন্ উদতিষ্ঠৎ। কর্ম্মাণি জীবাদৃষ্টানি প্রতিবোধয়তি যঃ কালস্তেন; আত্মা শ্রীবিষ্ণুর্যোনির্যস্য॥

১৫। তল্লোকাত্মকং পদ্মম্, সর্ব্বান্ গুণান্ জীবভোগ্যানর্থান্ অবভাসয়তীতি তথা তৎ তস্মাজ্জাতম্, স এব বিষ্ণুঃ। উ ইতি সম্বোধনে। প্রাবীবিশৎ প্রকর্ষেণ অলুপ্তশক্তিরেব অন্তর্য্যামিতয়া বিবেশ। তস্মিন্ বিষ্ণুনাধিষ্ঠিতে পদ্মে বিধাতা ব্রহ্মাভূৎ। কথম্ভূতঃ? স্বয়মেব বেদময়ঃ, ন ত্বধ্যয়নেন প্রাপ্তবেদঃ। কোঽসৌ? অদৃষ্টপিতৃকত্বেন যং স্বয়ম্ভুবং বদন্তি, সঃ প্রাক্কল্পান্তে নারায়ণেন সহ নিদ্রয়ৈকীভূত আসীৎ, তস্মিংশ্চ প্রবুদ্ধে তত এব পাদ্মে কল্পে পদ্মদ্বারেণাভিব্যক্তিং প্রাপ্ত ইত্যর্থঃ॥

১৬। স চ তস্মিন্ কল্পে চতুর্মুখোঽভূদিত্যাহ—তস্যামিতি। পরিক্রমন্ তত্রস্থ এব গ্রীবাং চালয়ন্; লোকনিরীক্ষণার্থং বিবৃত্তে বিচলিতে[২] নেত্রে যস্য॥

১। পরমানন্দ (ক); ২। চালিতে (ক)।

১৭। তস্য চ শ্রীনারায়ণোপাসনয়ৈবাবিভূর্তজ্ঞানক্রিয়াশক্তের্লোক-কর্তৃত্বম্, ন স্বত ইতি বক্তুং প্রথমং তস্য বিমোহমাহ—তস্মাৎ সলিলাৎ বিরূঢ়মুদ্গতং কঞ্জমাশ্রিতোঽপি সাকল্যেন তৎ কঞ্জং লোকতত্ত্বঞ্চাত্মানঞ্চ সাক্ষান্নাবিদন্ন জ্ঞাতবান্; উ ইতি বিস্ময়ে। কথন্তূতাৎ? যুগান্তশ্বসনঃ প্রলয়বায়ুঃ, তেনাবঘূর্ণং তত্র তত্র প্রকম্পিতং যজ্জলম্, তস্মাৎ সর্ব্বত ঊর্ম্মিচক্রং যস্মিন্ ॥

১৮। অবিদুষস্তস্য বিতর্কমাহ—যোঽসাবহমব্জপৃষ্ঠে এষ কঃ? অনন্য-দেকমেবৈতদব্জং কুতো বা জাতম্? যত্রৈতদধিষ্ঠিতম্, তেনাধস্তাৎ সতা বর্ত্তমানেন নু নিশ্চিতং ভাব্যম্। স ইত্থমুদ্বীক্ষ্যেত্যুত্তরেণান্বয়ঃ। তথা চ শ্রুতিঃ—'সোঽপশ্যৎ পুষ্করপর্ণে তিষ্ঠন্ সোঽমন্যত অস্তি বৈ। তদ্‌যস্মিন্নিদ-মধিতিষ্ঠতি' ইতি ॥

১৯—২০। তস্য চ বহির্ম্মুখপ্রবৃত্ত্যা মহতাপি কালেন তদপ্রাপ্তিমাহ—স ইতি দ্বাভ্যাম্। তস্যাব্জস্য যন্নালম্, তস্য নাড়ীভিরন্তশ্ছিদ্রৈঃ। যস্য খরনালস্য পদ্মস্য যন্নালম্, তস্য নাভিমধিষ্ঠানং বিচিন্বন্ অর্ব্বাগ্‌গতোঽপি তৎ তদা নাবিন্দত ॥ (২০) হে বিদুর! আত্মসর্গং স্বকারণম্; ত্রিনেমিঃ কালঃ; অজস্য বিষ্ণোর্হেতিঃ সুদর্শনরূপং শস্ত্রম্, দেহভাজাং নরাণাং ভয়মুৎপাদয়ন্নিতি সংবৎসরশতমতিক্রান্তমিত্যুক্তং ভবতি ॥

২১—২২। অন্তর্ম্মুখতয়া ভগবন্তং দৃষ্টবানিত্যাহ দ্বাভ্যাম্। ততোঽন্বেষণান্নিবৃত্তঃ; ন প্রতিলব্ধঃ কামো মনোরথো যেন; স্বধিষ্ণ্যং পদ্মম্। জিতেন শ্বাসেন নিবৃত্তং সংযতং চিত্তং যস্য, অতএবারূঢ় আশ্রিতঃ সমাধি-যোগো যেন তথাভূতঃ সন্ ন্যষীদৎ উপবিবেশ ॥ (২২) পুরুষায়ুষা সংবৎসরশতেন কালেনাভিপ্রবৃত্তঃ সুসম্পন্নো যো যোগস্তেন বিরূঢ় উৎপন্নো বোধো যস্য; যৎ পূর্ব্বং বিচিন্বন্নপি নাপশ্যৎ, তৎ স্বয়মেবান্ত-র্হৃদয়েঽবভাতমপশ্যৎ ॥

২৩—৩১। যদপশ্যৎ, তদ্বর্ণয়তি—মৃণালেতি নবভিঃ। নবস্বপ্যপশ্যদিত্যস্যৈবানুষঙ্গঃ। মৃণালবদ্গৌরশ্চাসাবায়তশ্চ যঃ শেষস্তস্য ভোগো দেহঃ, স এব পর্য্যঙ্কস্তস্মিন্। কুত্র স্থিতে পর্য্যঙ্কে? ফণাতপত্রৈরাযুতাঃ সর্ব্বতো যুক্তা যে মূর্দ্ধানস্তেষাং রত্নানি কিরীটস্থানি, তেষাং দ্যুভিঃ প্রভাভির্হতধ্বান্তে যুগান্ততোয়ে ॥ (২৪) কথম্ভূতং পুরুষম্? হরিতোপলাদ্রের্মরকতশিলাময়পর্ব্বতস্য প্রেক্ষাং শোভাং ক্ষিপন্তং স্বলাবণ্যাতিশয়েন তিরস্কুর্ব্বন্তম্; সন্ধ্যাবভ্রং নীবিঃ পরিধানং যস্য তস্য শোভাং পীতাম্বরেণ ক্ষিপন্তম্; উরুরুক্মমূর্দ্ধ্নোঽনেকসুবর্ণশিখরস্য তস্য স্বকিরীটৈঃ। রত্নানি চ উদধারাশ্চ ওষধয়শ্চ সৌমনস্যানি চ, পুষ্পসমূহাঃ সুমনস এব বা তেষাং বনস্রজো বনমালা যস্য; বেণব এব ভুজা যস্য, অঙ্ঘ্রিপা এবাঙ্ঘ্রয়ো যস্য স চাসৌ স চ তস্য। অয়মর্থঃ—যদি তস্মিন্ মালা ইব স্থিতা রত্নাদয়ো ভবন্তি, বেণবশ্চ ভুজা ইব, বৃক্ষাশ্চ পাদা ইব, তর্হি তস্য শোভাং স্বীয়রত্নমুক্তাতুলসীপুষ্পদামভির্ভুজৈরঙ্ঘ্রিভিশ্চ ক্ষিপন্তমিতি ॥ (২৫) কিঞ্চ, আয়ামতো দৈর্ঘ্যেণ বিস্তরতশ্চ স্বমানদেহেন; মীয়তেঽনেনেতি মানমুপমানম্; শোভনশ্চাসাবমানো নিরুপমশ্চ যো দেহস্তেন; যদ্বা, সুষ্ঠু অমানঃ অপরিচ্ছিন্নস্তেন; যদ্বা, তাভ্যাং স্বানুরূপপ্রমাণেন, অতএব লোকত্রয়ং সংগৃহ্যতে যস্মিন্, তথা বিচিত্রাণি নানাবিধানি দিব্যান্যপূর্ব্বাণি চ আভরণান্যংশুকানি চ, তেষাং কৃতা শ্রীঃ শোভা যেন, তেন দেহেন বিশিষ্টম্। এবং স্বত এবাতিরম্যত্বেঽপি অপাশ্রিতবেষঃ স্বীকৃতালঙ্কারো দেহো যস্য, তমপশ্যৎ; যদ্বা, কেন প্রেক্ষাং ক্ষিপন্তমিত্যপেক্ষায়াম্, এবম্ভূতেন দেহেনেতি সম্বন্ধঃ॥ (২৬) স্বাভিলষিতফলায় বিবিক্তৈঃ শুদ্ধৈর্বেদোক্তৈর্মার্গৈরভ্যর্চ্চতাং পুংসাং কামদুঘমঙ্ঘ্রিপদ্মং প্রদর্শয়ন্তং, কিঞ্চিদুন্নময্য সমর্পয়ন্তম্। নখা এবেন্দবস্তেষাং ময়ূখা রশ্ময়স্তৈর্ভিন্নাঃ সংভিন্না অঙ্গুলয় এব চারূণি পত্রাণি যস্য, তৎ ॥ (২৭) লোকার্ত্তিহরং স্মিতং যস্মিন্ তেন;

পরিস্ফুরদ্ভ্যাং কুণ্ডলাভ্যাং মণ্ডিতেন ; অধরবিম্বদীপ্ত্যা শোণবদাচরিতেন ; শোভননাসাযুক্তেন সুভ্রূা শোভনয়া ভ্রুবা চ প্রত্যর্হয়ন্তং পূজকান্ প্রতি-পূজয়ন্তং সম্মানয়ন্তম্ ॥ (২৮) কদম্বকিঞ্জল্কবৎ পিশঙ্গং যদ্বাসস্তেন মেখলয়া চ নিতম্বে স্বলঙ্কৃতম্। হে বৎস ! শ্রীবৎসযুক্তং যদ্বক্ষঃস্থলং, তস্য বল্লভেন বক্ষস্তনর্ঘ্যেণ হারেণ স্বলঙ্কৃতমিত্যর্থঃ ॥ (২৯) মহাচন্দনবৃক্ষরূপকেণ নিরূপয়িতুং তং বিশিনষ্টি—পরার্দ্ধ্যানি শ্রেষ্ঠানি কেয়ূরাণি অঙ্গদানি মণি-প্রবেকাশ্চ মণ্যুত্তমাস্তৈঃ পর্য্যস্তা ব্যাপ্তা দোর্দ্দণ্ডা এব সহস্রমনন্তাঃ শাখা যস্য। চন্দনবৃক্ষোঽপি কেয়ূরাদিতুল্যৈঃ ফলপুষ্পাদিভির্ব্যাপ্তশাখো ভবতি। অব্যক্তং প্রধানং মূলমধোভাগো যস্য, যদ্বা, অব্যক্তং ব্রহ্মমূলং যস্য, ব্রহ্মাভিব্যক্তিরূপত্বাৎ ; বৃক্ষস্যাপি মূলং ন ব্যক্তম্। ভুবনাত্মকমঙ্ঘ্রিপেন্দ্রং বৃক্ষশ্রেষ্ঠম্। অহীন্দ্রস্যানন্তস্য ভোগৈঃ ফণৈর্দেহাবয়বৈর্বা অধিবীতাঃ সংবেষ্টিতাঃ স্পৃষ্টা বল্শাঃ[১] স্কন্ধা যস্য ; 'বনস্পতে শতবল্শো[২] বিরোহ' ইতি শ্রুতেঃ। সোঽপি সর্পৈর্বেষ্টিতো ভবতি ॥ (৩০) প্রেক্ষাং ক্ষিপন্ত-মিত্যত্রৈব পর্ব্বতরূপকেণ নিরূপিতমপি বিশেষণান্তরৈঃ পুনর্নিরূপয়তি— ভগবানেব মহীধ্রস্তম্ ; চরাচরাণামোকঃ স্থানম্। সোঽপি তথা অহীন্দ্রস্য বন্ধুম্, সোঽপ্যহীন্দ্রাণাং বন্ধুঃ। সলিলেন উপগূঢ়মাবৃতম্, পর্ব্বতোঽপি মৈনাকাদিস্তথা। কিরীটসাহস্রমেব হিরণ্যশৃঙ্গাণি যস্য, সোঽপি মের্ব্বাদিস্তথা। যথা পর্ব্বতস্য গর্ভে ক্বচিৎ রত্নমাবির্ভবতি, তথা আবির্ভবৎ স্পষ্টং দৃশ্যমানং কৌস্তুভরত্নং গর্ভে মূর্ত্তিমধ্যে যস্য তম্ ॥ (৩১) কিঞ্চ, বনমালয়া নিবীতং কণ্ঠলম্বিন্যা ব্যাপ্তম্ ; আম্নায়া বেদা এব মধু-ব্রতাস্তৈঃ শ্রীর্যস্যাস্তয়া ; হরিমিতি পর্ব্বতাদিরূপমপশ্যৎ। হরিরসাবিতি জ্ঞাতবানিত্যর্থঃ। সূর্য্যাদিভিরগমমগম্যম্, স্বস্বব্যাপারৈরাকলয়িতুমশক্য-মিত্যর্থঃ। কিঞ্চ, ত্রিষ্বপি লোকেষু ধাম মূর্ত্তির্যেষাং[৩] তৈ রক্ষণার্থং পরি-

১। বল্কাঃ (ক) ; ২। শতবল্কো (ক) ; ৩। স্ফূর্ত্তির্যেষাং (ঘ)।

ক্রমদ্ভিঃ পরিতো ধাবদ্ভিঃ প্রাধনিকৈঃ প্রধনং সংগ্রামস্তৎপ্রয়োজনৈঃ সুদর্শনাদিভির্হেতুভূতৈর্দুরাসদং দুষ্প্রাপম্ ॥

৩২। যদৈবং হরিমপশ্যৎ, তর্হ্যেব তদৈব লোকবিসর্গদৃষ্টিঃ সন্ তস্য নাভিসরসি সরোজং শ্বসনং প্রলয়বায়ুং বিয়দাকাশঞ্চ দদর্শ ॥

৩৩। কর্ম্মবীজং লোকসৃষ্টেঃ কারণম্, রজসা উপরক্তো রজোগুণ-যুক্তঃ, অতঃ প্রজাঃ স্রষ্টুমিচ্ছন্। ইয়দেব নাভিসরোজাদিপঞ্চকমেব। বিসর্গেঽপি অভিমুখো দত্তচিত্তঃ; অব্যক্তবর্ত্মনি ভগবতি নিবেশিতচিত্তঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
অষ্টমোঽধ্যায়ঃ ॥ ৮ ॥

নবমোঽধ্যায়ঃ

নবমে তপসা তুষ্টং দৃষ্ট্বা নারায়ণস্ত্বজঃ।
অম্ভোদেকার্ণবে সীদন্ লোকসর্গচিকীর্ষয়া ॥ (১)

১। ভগবজ্জ্ঞানেনাত্মনঃ কৃতার্থতামাবিষ্কুর্ব্বন্, অজ্ঞাংশ্চ শোচন্নাহ—জ্ঞাতোঽসীতি। সুচিরাদ্বহুকালোপাসনেন, অদ্য মে ময়া জ্ঞাতোঽসি। ননু অহো দেহভাজামেতদবদ্যং দোষঃ। কিং তৎ? যদ্ভগবতস্তব গতিস্তত্ত্বং ন জ্ঞায়ত ইতি। যতস্ত্বমেব জ্ঞাতুং যোগ্যঃ, সত্যত্বাৎ, নান্যদসত্য-ত্বাদিত্যাহ—ত্বৎ ত্বত্তোঽন্যন্নাস্তি, যদ্যপ্যস্তীতি প্রতিভাতি, তদপি শুদ্ধং সত্যং ন ভবতি। কথমসতঃ প্রতীতিঃ? তত্রাহ—যদ্যতঃ মায়াগুণ-ক্ষোভাৎ ত্বমেব উরুর্বহুরূপো বিভাসি ॥

২—৩। ননু ত্বমপি সম্যঙ্ ন জানাসি, যৎ ত্বয়া দৃষ্টং রূপমেতদপি গুণাত্মকমেব, নির্গুণং ব্রহ্মৈব তু সত্যম্? তত্রাহ—রূপমিতি দ্বাভ্যাম্।

অববোধরসোদয়েন চিচ্ছক্ত্যাবির্ভাবেণ শশ্বৎ সদা নিবৃত্তং তমো যস্মাৎ, তস্য তব যদেতদ্রূপং ত্বয়ৈব স্বাতন্ত্র্যেণ সতামুপাসকানামনুগ্রহায় গৃহীতমাবিষ্কৃতম্, অবতারশতস্য শুদ্ধসত্ত্বাত্মকস্য যদেকং বীজং মূলম্ ; তৎপ্রদর্শনার্থং গুণাবতারবীজত্বং দর্শয়তি—যন্নাভীতি ॥ (৩) হে পরম! অবিদ্ধবর্চ্চোঽনাবৃতপ্রকাশম্, অতোঽবিকল্পং নির্ভেদমতএবানন্দমাত্রম্। এবম্ভূতং যদ্ভবতঃ স্বরূপং তৎ, অতো রূপাৎ পরং ভিন্নং ন পশ্যামি, কিন্তু ইদমেব তৎ ; অতঃ কারণাৎ তে তব অদ ইদং রূপমুপাশ্রিতোঽস্মি। যোগ্যত্বাদপীত্যাহ—একমুপাস্যেষু মুখ্যম্, যতঃ বিশ্বসৃজং বিশ্বং সৃজতীতি, অতএব অবিশ্বং বিশ্বস্মাদন্যৎ ; কিঞ্চ, ভূতেন্দ্রিয়াত্মকং ভূতানামিন্দ্রিয়াণাঞ্চাত্মানং কারণমিত্যর্থঃ ॥

৪। নন্বেবমপি সোপাধিকমেতদর্ব্বাচীনমেবেত্যাশঙ্ক্যাহ—তদ্বৈতদেবেদম্। হে ভুবনমঙ্গল! যতস্তে ত্বয়া নোঽস্মাকমুপাসকানাং মঙ্গলায় ধ্যানে দর্শিতম্ ; ন হি অব্যক্তবর্ত্মন্যভিনিবেশিতচিত্তানামস্মাকং ত্বয়া সোপাধিকদর্শনং দাতুং যুক্তমিতি ভাবঃ। অতস্তুভ্যং নমোঽনুবিধেম অনুবৃত্ত্যা করবাম। তর্হি কিমিতি কেচিন্মাং নাদ্রিয়ন্তে? তত্রাহ—যোঽনাদৃত ইতি ; অসৎপ্রসঙ্গৈর্নিরীশ্বরকুতর্কনিষ্ঠৈঃ ॥

৫। আদরেণ তু ত্বাং ভজন্তঃ কৃতার্থা ইত্যাহ—যে ত্বিতি। শ্রুতির্বেদঃ, স এব বাতস্তেন নীতং প্রাপিতম্, নাপৈষি নাপযাসি, যে ত্বৎকথাশ্রবণমত্যাদরেণ কুর্ব্বন্তি, তেষাং হৃদি নিত্যং প্রকাশস ইত্যর্থঃ ॥

৬। ততঃ কিম্? অত আহ—তাবদিতি। দ্রবিণাদৌ বিদ্যমানে ভয়ম্, গতে শোকঃ, পুনশ্চ স্পৃহা, ততশ্চ পরিভবঃ, তথাপি বিপুলো লোভস্তৃষ্ণা, পুনঃ কথঞ্চিৎ প্রাপ্তে মমেত্যসদাগ্রহঃ, আর্ত্তিমূলং ভয়শোকাদেঃ কারণম্, ন প্রবৃণীত নাশ্রয়েত ; ত্বৎপাদাশ্রয়ণমাত্রেণ ভয়াদিনিবৃত্তিঃ, কিং পুনস্ত্বৎপ্রকাশে সতীতি ভাবঃ ॥

৭। যে নিষ্কামা অপি সন্তস্ত্বাং নাদ্রিয়ন্তে, তে নরকভাজ ইত্যুক্তম্। যে তু ত্বৎকথাশ্রবণাদিবিমুখাঃ সন্তঃ কাম্যকর্ম্মপরাস্তেঽতিমন্দা ইত্যাহ—দৈবেন তে হতধিয়ো নষ্টমতয়ঃ ; প্রসঙ্গাৎ শ্রবণকীর্ত্তনাদিরূপাৎ সর্ব্বদুঃখ-নিবর্ত্তকাদ্‌বিমুখানীন্দ্রিয়াণি যেষাম্ ; অকুশলানি অক্ষেমকরাণি ॥

৮। অকুশলত্বমেব দর্শয়তি—ক্ষুচ্চ তৃট্ চ ত্রিধাতবশ্চ বাতপিত্ত-শ্লেষ্মাণস্তৈঃ। ইমাঃ প্রজাঃ সুদুর্ভরেণ সুদুঃসহেন কামাগ্নিনা, অচ্যুতয়া রুষা অবিচ্ছিন্নক্রোধেন চ পীড়্যমানাঃ সম্পশ্যতো মে মনঃ সীদতি ॥

৯। নন্বেবম্ভূতায়াঃ সংসৃতেরপরমার্থত্বাৎ কিমর্থং বিষাদঃ ক্রিয়তে ? তত্রাহ—যাবদিতি। আত্মন ইদং পৃথক্ত্বং দেহাদিভাবম্, ভগবতস্তব ইন্দ্রিয়ার্থরূপা যা মায়া, তয়া বলমাধিক্যং যস্য তৎ, তাবৎ ন প্রতি-সংক্রমেত নোপরমেত ; দুঃখসমূহং প্রাপয়ন্তী, ক্রিয়াণামর্থঃ ফলং যস্যাম্ ; পৃথক্ত্বমিদমিতি পাঠে ইদং দেহাদি ত্বদিতি ত্বত্তঃ পৃথক্ পশ্যেদ্‌যাবত্তাবদ্‌-ব্যর্থাপি নোপরমেৎ ॥

১০। নন্বু ভবত্যেবমবিবেকিনাং, বিবেকিনস্তু মুক্তা এবেতি কিং তেষাং ভক্ত্যা কৃত্যম্ ? অত আহ—অহ্নি আপৃতানি ব্যাপৃতানি চ তান্যার্ত্তানি ক্লিষ্টানি করণানীন্দ্রিয়াণি যেষাম্ ; রাত্রৌ বিষয়সুখলবোঽপি নাস্তি, যতো নিঃশয়ানাঃ ; স্বপ্নদর্শনেন চ ক্ষণে ক্ষণে ভগ্ননিদ্রাঃ ; দৈবে-নাহতাঃ সর্ব্বতঃ প্রতিহতা অর্থানাং রচনা অর্থার্থোদ্যমা যেষাম্ ॥

১১। তদেবমভক্তানাং সংসারানিবৃত্তিমুক্ত্বা ভক্তানাং তন্নিবৃত্তিমাহ—ত্বমিতি। ভক্তিযোগেন শোধিতে হৃৎসরোজে আসসে তিষ্ঠসি। শ্রুতেন শ্রবণেন ঈক্ষিতঃ পন্থা যস্য সঃ। কিঞ্চ, যস্য শ্রবণং বিনাপি ত্বদ্ভক্তা মনসা যদ্‌যৎ তব বপুঃ রূপং স্বেচ্ছয়া ধ্যায়ন্তি, তত্তৎ প্রণয়সে প্রকটয়সি, সতাং ত্বদ্ভক্তানামনুগ্রহায় ॥

১২। ভক্তানাঞ্চ নিষ্কামাণাং ত্বমতিসুলভঃ, নেতরেষামিত্যাহ—নেতি। উপচিতৈরূর্জ্জিতৈরুপচারৈঃ পুষ্পোপহারাদিভিঃ ; যদ্‌যথা অসতামভক্তানামলভ্যয়া সর্ব্বভূতদয়য়া ; প্রসাদে হেতুঃ—এক ইত্যাদি ॥

১৩। যতঃ সকামানাং ভবান্ নাতিপ্রসীদতি, অতঃ কামপ্রাপ্তিঃ ক্রিয়াণামুত্তমং ফলং ন ভবতি, কিন্তু ত্বৎপ্রীণনমেব। কামসংযোগস্তু অবান্তরফলেন প্ররোচনার্থমিত্যাহ—পুংসামিতি। ভগবতস্তবারাধনমেব সংশ্চাসৌ ক্রিয়ার্থশ্চ শ্রেষ্ঠং ক্রিয়াফলম্। শ্রেষ্ঠত্বে হেতুঃ—যত্র ত্বয়ি অর্পিতো ধর্ম্মো ন কদাচিন্‌ম্রিয়তে ন নশ্যতি, কামার্থস্তু ধর্ম্মঃ, কামং দত্ত্বা নশ্যতীত্যর্থঃ ॥

১৪। অতস্ত্বামেব বয়ং নতা ইত্যাহ—শশ্বৎ সর্ব্বদা স্বরূপচৈতন্যেনৈব নিরস্তভেদভ্রমায় ; পুনশ্চ বোধ এব ধিষণা বিদ্যাশক্তির্যস্য, যদ্বা, ধিষণমাশ্রয়ঃ, অতএব পরস্মৈ। তত্র হেতুঃ—বিশ্বোদ্ভবাদিনিমিত্তং যা মায়া, তস্যা লীলা বিলাসস্তয়া রাসঃ ক্রীড়া যস্য ; তে তুভ্যমিদং নমঃ নমনং চক্রম কৃতবন্তো বয়ম্ ॥

১৫। নামগ্রহণমাত্রতঃ কৈবল্যপ্রদত্বেনৈশ্বর্য্যং ব্যঞ্জয়ন্ নমস্করোতি—যস্যেতি। অবতারাদীনাং বিড়ম্বনমনু করণমস্তি যেষু ; তত্রাবতার-বিড়ম্বনানি দেবকীনন্দন ইত্যাদীনি, গুণবিড়ম্বনানি সর্ব্বজ্ঞো ভক্তবৎসল ইত্যাদীনি, কর্ম্মবিড়ম্বনানি গোবর্দ্ধনোদ্ধরণঃ কংসারাতিরিত্যাদীনি, অসু-বিগমেঽপি বিবশা অপি, গৃণন্তি কেবলমুচ্চারয়ন্তি কেবলম্ ; শমলং পাপম্, অপাবৃতং নিরস্তাবরণম্ ঋতং ব্রহ্ম প্রাপ্নুবন্তি ॥

১৬। তত্র গুণাবতারকর্ম্মাণি দর্শয়ন্ প্রণমতি—যো বৈ একঃ, ত্রিপাৎ ত্রয়ো ব্রহ্মাদয়ঃ পাদাঃ স্কন্ধা যস্য ; প্রত্যেকঞ্চ উরবঃ প্ররোহাঃ শাখোপশাখা মরীচ্যাদিমন্বাদিরূপা যস্য তথাভূতঃ সন্ ববৃধে, তস্মৈ ভুবনাকারায় দ্রুমায় নমঃ। কিং কৃত্বা ববৃধে? আত্মা স্বয়মেব মূলম-

ধিষ্ঠানং যস্য, তৎ প্রধানং ভিত্ত্বা গুণত্রয়রূপেণ বিভজ্য। ত্রিপাত্ত্বমেবাহ—অহং ব্রহ্মা গিরিশশ্চ স্বয়ং বিভুর্বিষ্ণুশ্চেতি স্থিত্যুদ্ভবপ্রলয়হেতবো যে বয়ম্; এবং ত্রিপাদ্ ভূত্বা যো ববৃধ ইত্যর্থঃ॥

১৭—১৮। এবং গুণাবতারকর্ম্মবিড়ম্বনমুক্ত্বা তস্যৈব তৎকালাখ্যং রূপং তৎ কর্ম্ম চ দর্শয়ন্ প্রণমতি—লোক ইতি দ্বাভ্যাম্। বিকর্ম্মনিরতো বিরুদ্ধ-কর্ম্মনিষ্ঠঃ; কুশলে হিতে, স্বে আত্মীয়ে, ত্বদুদিতে ত্বয়ৈব সাক্ষাদুক্তে, ভগবদর্চ্চনরূপে কর্ম্মণি; উক্তং হি গীতাসু—'যৎ করোষি যদশ্নাসি য-জ্জুহোষি দদাসি যৎ। যত্তপস্যসি কৌন্তেয়! তৎ কুরুষ্ব মদর্পণম্॥' ইতি। তস্মিন্ প্রমত্তঃ অদত্তচিত্তো যাবদ্বর্ত্ততে, তাবদস্য লোকস্য, অনিমিষায় কালায়॥ (১৮) আস্তাং তাবল্লোকস্য কথা, যস্মাৎ কালাখ্যাৎ ত্বত্তো যদ্-দ্বিপরার্দ্ধাবস্থায়ি ধিষ্ণ্যং স্থানং, তদারূঢ়োঽপি বিভেমি। ভীতশ্চ সন্ ত্বামেবাবরুরুৎসমানঃ প্রাপ্তুমিচ্ছন্ তপস্তপ্তবান্। কথম্ভূতঃ? বহুসবঃ বহবঃ সবা যাগাঃ সংবৎসরা বা যস্য; বহূন্ যাগান্ কৃত্বা বহূন্ সংবৎসরান্ বা তপস্তপ্তবানিত্যর্থঃ। অধিমখায় মখাদিকর্ম্মা-ধিষ্ঠাত্রে॥

১৯। ইদানীন্তু তত্তৎকালভাবিলীলাবতারকর্ম্মাণি দর্শয়ন্নাহ—তির্য্যগা-দিষু জীবযোনিষু স্বেচ্ছয়া স্বীকৃতমূর্ত্তিঃ সন্ স্বকৃতধর্ম্মমর্য্যাদাপালনেচ্ছয়া রেমে। বস্তুতঃ স্বানন্দানুভবেনৈব নিরস্তবিষয়সুখোঽপি যঃ, অতএব পুরুষোত্তমঃ, তত্তদুপাধিধর্ম্মাসংস্পর্শাৎ; তদুক্তং শ্রীগীতাসু—'যস্মাৎ ক্ষরমতীতোঽহমক্ষরাদপি চোত্তমঃ। অতোঽস্মি লোকে বেদে চ প্রথিতঃ পুরুষোত্তমঃ॥' ইতি॥

২০—২১। ইদানীং দৃশ্যমানামেব মূর্ত্তিং প্রণমতি—যোঽবিদ্যয়েতি দ্বাভ্যাম্। দশার্দ্ধাঃ পঞ্চ বৃত্তয়ো যস্যাস্তয়া অবিদ্যয়া নিদ্রাহেতুভূতয়া

অনভিভূতোঽপি যো নিদ্রামুবাহ, তস্মৈ তে নম ইত্যুত্তরেণান্বয়ঃ। জঠরীকৃতা উদরে প্রবিলাপিতা[১] লোকযাত্রা লোকস্থিতির্যেন; অহিরেব কশিপুঃ শয্যা তস্যাঃ স্পর্শোঽনুকূলো যস্যাং তাং নিদ্রাম্; ভীমানামুর্ম্মীণাং মালা বিদ্যন্তে যস্মিন্ অন্তর্জ্জলে; নিদ্রাণস্যাবিবেকিনো জনস্য নিদ্রাসুখমাদৃগিতি বিবৃণ্বন্ প্রদর্শয়ন্ উপহসন্নিত্যর্থঃ; অতএবান্তর্জ্জলাদিবিশেষণানি, যদ্বা, পূর্ব্বকল্পে শ্রান্তস্য জনস্য বিশ্রামসুখং বিবৃণ্বন্ স্ফারয়ন্; তদা তু পরোপকারায় স্বয়ং দুঃসহমপি দুঃখং সোঢ়ব্যমিতি দ্যোতনার্থং বিশেষণানি॥ (২১) কিঞ্চ, যস্য নাভিপদ্মমেব ভবনং তস্মাৎ; লোকত্রয়মুপকরণং যস্য, যদ্বা, লোকত্রয়স্য স্বষ্ট্যাদিদ্বারেণোপকরোতীতি তথা, তাদৃশোঽহং যদনুগ্রহেণাসম্; উদরে স্থিতো ভবঃ সংসারপ্রপঞ্চো যস্য; যোগনিদ্রাবসানে বিকসন্নলিনবদীক্ষণং যস্য॥

২২—২৫। এবং স্তুত্বা প্রার্থয়তে—সোঽয়মিতি চতুর্ভিঃ। যদ্যেন সত্ত্বেন জ্ঞানেন ভগেন ঐশ্বর্য্যেণ চ মৃড়য়তে সুখয়তি বিশ্বম্। দৃশং প্রজ্ঞামনুস্পৃশতাৎ যোজয়তু, যথাহং স্রষ্টুং ক্ষমো ভবিষ্যামি; যতঃ প্রণতিপ্রিয়োঽসৌ, অহঞ্চ প্রণতঃ; ন চান্যঃ প্রার্থনীয়োঽস্তি, যতো ভগবান্। স এব সমস্তজগতাং সুহৃৎ, যতোঽসৌ একোঽনুস্যূতঃ, আত্মা অন্তর্য্যামী॥ (২৩) আত্মশক্ত্যা রময়া সহ যদ্যৎ কর্ম্ম করিষ্যতি, স্ববিক্রমং স্বস্য বিষ্ণোরেব বিক্রমঃ প্রভাবো যস্মিন্, তদিদং বিশ্বং তদাজ্ঞয়া সৃজতোঽপি মে চেতঃ স এব যুঞ্জীত প্রবর্ত্তয়তু। কর্ম্মাসক্তিং তৎকৃতং শমলঞ্চ বৈষম্যাদিপাপং যথা বিজহ্যাং ত্যক্ষামি॥ (২৪) অম্ভসি জলে সতো যস্য নাভিহ্রদাদিহ[২] আসম্; বিজ্ঞানে শক্তির্যস্য মহত্তত্ত্বাত্মকস্য চিত্তস্য তদভিমানী; অস্য রূপমিদং বিশ্বং বিস্তারয়তো মম নিগমস্যাবয়বভূতানাং গিরাং বিসর্গ উচ্চারণং মা রীরিষীষ্ট 'হলান্তং ব্রহ্মবর্চ্চসম্' ইতি ন্যায়েন মা

১। প্রাপিতা (ক); ২। অহম্ (ক)।

লুপ্যতামিত্যর্থঃ ॥ (২৫) বিবৃদ্ধপ্রেমস্মিতেন বিজৃম্ভয়ন্, বিশ্বস্ত বিজয়ায় উদ্ভবায়, চকারাদস্মদনুগ্রহায় চোত্থায় ॥

২৬। স্বস্থ সম্ভবো যস্মাত্তম্, তপঃ শারীরং, বিদ্যা উপাসনা, সমাধিরৈকাগ্র্যং, তৈর্নিশাম্য দৃষ্ট্বা যথাশক্তি স্তুত্বা শ্রান্তবদ্বিররাম ॥

২৭—২৮। আত্মনো লোকসংস্থানবিজ্ঞানে পরিখিন্নতো ব্রহ্মণোঽভিপ্রেতমালক্ষ্য তমাহেতি দ্বয়োরন্বয়ঃ। তেন প্রলয়োদকেন, বিষণ্ণচেতসং, কশ্মলং মোহং শময়ন্নিবেতি সমস্তমোহাশমনং দর্শয়তি ॥

২৯। হে বেদগর্ভ! তন্দ্রীং বিষাদকৃতমালস্যং মা গাঃ। তেনৈব মে দৃশমনুস্পৃশতাদিত্যাদি যৎ প্রার্থয়তে, তদগ্রে পূর্ব্বমেব সম্পাদিতম্ ॥

৩০। তর্হি কথমহং ন জানামীত্যত আহ—ভূয় ইতি ॥

৩১। ভক্তিযুক্তঃ সমাহিতশ্চ সন্নাত্মনি স্বস্মিন্ লোকে চ মাং ততং ব্যাপ্য স্থিতং দ্রষ্টাসি দ্রক্ষ্যসি আত্মনো জীবাংশ্চ ॥

৩২। সর্ব্বত্র মদ্দর্শনে মোহো নিবর্ত্তত ইত্যাহ—যদা ত্বিতি; প্রতিচক্ষীত পশ্যেৎ ॥

৩৩। তদা চ মিথ্যাজ্ঞাননিবৃত্তৌ মুচ্যতে ইত্যাহ—যদেতি। ভূতাদিভির্বিরহিতমাত্মানং জীবং, শুদ্ধং ত্বম্পদার্থম্; স্বরূপেণ স্বস্যাত্মভূতেন ময়া তৎপদার্থেন উপেতমেকীভূতং পশ্যন্ ভবতি, তদা স্বারাজ্যং মোক্ষং প্রাপ্নোতি ॥

৩৪। যতো বর্ষীয়ান্ বৃদ্ধতরোঽত্যধিকোঽস্তীত্যর্থঃ ॥

৩৫—৩৮। অনুগ্রহমেবাহ—ঋষিমাদ্যমিতি চতুর্ভিঃ। যদ্‌যতস্তে মনো ময়ি নির্ব্বদ্ধম্ ॥ (৩৬) যদ্‌যস্মাদ্‌ভূতৈঃ, ইন্দ্রিয়ৈর্গুণৈঃ সত্ত্বাদিভিঃ আত্মনা অহঙ্কারেণ চ অযুক্তং মন্যসে ॥ (৩৭) তুভ্যং তব, নালেন মার্গেণ, পুষ্করস্য মূলমধিষ্ঠানং সলিলে বিচিন্বতো, ময়ি বিচিকিৎসায়াং, ভবিতব্যমস্যাশ্রয়েণ ন চ দৃশ্যতে, ততোঽস্তি-নাস্তীতি সন্দেহে সতি, আত্মা স্বরূপং, মে

ময়া, অবহিরন্তর্হৃদি দর্শিতঃ ॥ (৩৮) অঙ্গ হে ব্রহ্মন্ ! চকর্থ কৃতবানসি। মৎকথৈবাভ্যুদয়স্তেনাঙ্কিতম্, স এষ বন্ধাভাবো ময়ি মনোনির্ব্বন্ধঃ, মজ্জ্ঞানং মদ্রূপস্য হৃদি দর্শনম্, মৎস্তুতিঃ, তপোনিষ্ঠা চেতি যৎ, স এষ সর্ব্বোঽপি মদনুগ্রহঃ ॥

৩৯। গুণময়ত্বেন প্রতীয়মানমপি নির্গুণমেবানুবর্ণয়ন্ ॥

৪০। তব প্রীত ইতি কিং বক্তব্যমিত্যাহ—য ইতি ॥

৪১। ন চ মৎপ্রীতেরধিকং কিঞ্চিদস্তীত্যাহ—পূর্ত্তাদিভী রাদ্ধং সিদ্ধং যন্নিঃশ্রেয়সং ফলং, তন্মৎপ্রীতিরেবেতি তত্ত্ববিদাং মতম্ ॥

৪২। অত্র হেতুমাহ—অহমিতি। আত্মনামহঙ্কারোপাধীনাং জীবানামাত্মা, অতঃ প্রেয়সামতিপ্রিয়াণামপি মধ্যে প্রেষ্ঠঃ প্রিয়তমঃ সন্ নিরবদ্যঃ ; যৎকৃতে যদর্থম্ ॥

৪৩। অতস্ত্বং কৃতার্থ এব, তথাপি মৎপ্রিয়ার্থং সৃষ্টিং কুর্ব্বিত্যাহ—সর্ব্বেতি। আত্মা ত্বমিদং সর্ব্বং ত্রৈলোক্যম্, যা ময্যনুশেরতে, তা প্রজাশ্চ সৃজ। কেন ? আত্মনৈবান্যনিরপেক্ষেণ। অত্র জ্ঞাপকাপেক্ষাভাবমাহ—সর্ব্ববেদময়েনেতি। আত্মা অহং, যোনিঃ কারণং যস্যেতি জ্ঞানক্রিয়াশক্ত্যতিশয়ং সূচয়তি—যথাপূর্ব্বমিতি। তবাত্রাভ্যাসোঽপ্যস্তীত্যুক্তম্। ময্যনুশেরত ইতি স্থিতানামভিব্যক্তিমাত্রমেব কর্ত্তব্যমিত্যনায়াসত্বমুক্তম্ ॥

৪৪। ইদং সৃজ্যং ব্যজ্য প্রকাশ্য পদ্মনাভঃ স্বেন শ্রীনারায়ণস্বরূপেণ তিরোদধেঽদৃশ্যো বভূব ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
নবমোঽধ্যায়ঃ ॥ ৯ ॥

দশমোঽধ্যায়ঃ

দশমে কালসম্প্রশ্নং প্রতিবক্তুং তদুদ্ভবঃ।
প্রাকৃতাদিবিভাগেন সর্গস্তু দশধোচ্যতে॥ (১)

২। মে ময়া, বদস্ব বদ ; ভাসয়স্ব ইতি বা পাঠঃ॥

৩। সঞ্চোদিতঃ প্রার্থিতঃ ; হৃদিস্থানেবাহ, ন তু তে প্রশ্নাস্তেন বিস্মৃতা ইত্যর্থঃ॥

৪। আত্মনি শ্রীনারায়ণে, আত্মানং মন আবেশ্য॥

৫। অব্জসম্ভূতো ব্রহ্মা যদধিষ্ঠায় স্থিতঃ ; কর্ত্তরি ক্তঃ। তৎ পদ্মম্, অন্তশ্চ বিলোক্য। কথম্ভূতম্? পদ্মমন্তশ্চ, তেন প্রলয়কালেন কৃতং বীর্য্যং যস্য, তেন বায়ুনা কম্পিতং বিলোক্য ন্যপাদিত্যুত্তরেণান্বয়ঃ॥

৬। বিবৃদ্ধং বিজ্ঞানং বলঞ্চ যস্য ; ন্যপাৎ সর্ব্বং পীতবান্॥

৭। পুষ্করং পদ্মম্, প্রাক্ লীনান্ ত্রীন্ লোকান্ কল্পিতাস্মি স্রক্ষ্যামি॥

৮। ভগবতা স্বয়ং করণীয়ে কর্ম্মণি চোদিতো নিযুক্তঃ সন্ তদা পদ্মকোষং প্রবিশ্য তমেকমেব পদ্মং ত্রিধা লোকত্রয়রূপেণ ব্যভাঙ্ক্ষীদ্ বিবভাজ। একেন কমলকুসুমেন[১] কথং লোকত্রয়সৃষ্টিরিত্যসম্ভাবনাং বারয়িতুং তস্য বিশালতামাহ—দ্বিসপ্তধা চতুর্দ্দশলোকরূপেণ, উরুধা ততোঽপি বহুপ্রকারেণ ভাব্যং ভাবয়িতুং যোগ্যম্, অতো ন তেন ত্রিলোকীকরণং চিত্রমিত্যর্থঃ॥

৯। ত্রিলোকীরূপেণৈব বিভাগে হেতুমাহ—এতাবান্ ত্রিলোকীরূপো জীবলোকস্য জীবানাং ভোগস্থানস্য প্রত্যহং সৃজ্যস্য সংস্থাভেদো রচনা-বিশেষ উক্তঃ। ননু পরমেষ্ঠিনোঽপি জীবত্বাবিশেষাদ্‌ব্রহ্মলোকস্যাপি কিমিতি প্রত্যহং সৃষ্টির্ন ভবতি? তত্রাহ—হি যস্মাদনিমিত্তস্য নিষ্কামস্য

১। কমলমুকুলেন (ঘ)।

ধর্ম্মস্য বিপাকঃ ফলরূপোঽসৌ ; উপলক্ষণমেতৎ। সত্যলোকস্য মহঃ-প্রভৃতিলোকানাং তদ্বাসিনাঞ্চ, ত্রৈলোক্যস্য কাম্যকর্ম্মফলত্বাৎ প্রতিকল্প-মুৎপত্তিবিনাশৌ ভবতঃ, মহঃপ্রভৃতীনান্তূপাসনাসমুচিতনিষ্কামধর্ম্মফলত্বাদ্-দ্বিপরার্দ্ধপর্য্যন্তং ন নাশঃ। তত্রস্থানাঞ্চ ততঃ পরং প্রায়েণ মুক্তিরিতি ভাবঃ॥

১০। কালভেদেন লোকসৃষ্টিভেদং শ্রুত্বা তমেব কালং জিজ্ঞাসুঃ পৃচ্ছতি—যৎ কালাখ্যং লক্ষণং স্বরূপমাথ অব্রবীঃ ; কথং কালঃ কল্প্যতে, কিং বা তস্য সূক্ষ্মং স্থূলং বা রূপমিতি যথাবদ্বর্ণয়েত্যর্থঃ ॥

১১। তত্র সামান্যতঃ কালস্য স্বরূপমত্রোচ্যতে, উত্তরাধ্যায়ে তু বিশেষতঃ। গুণানাং ব্যতিকরো মহদাদিপরিণামস্তেনৈবাক্রিয়তে যঃ, স কাল ইতি শেষঃ ; বক্ষ্যতে চৈকাদশে—'গুণব্যতিকরঃ কালঃ স্বভাবঃ সূত্রমেব চ' ইতি। স্বতস্তু নির্ব্বিশেষঃ, অপ্রতিষ্ঠিতঃ ক্বাপ্যপর্য্যবসিতঃ, আদ্যন্তশূন্য ইত্যর্থঃ। এতদেব দর্শয়িতুমীশ্বরঃ সৃষ্ট্যাদি তেন নিমিত্তভূতেন করোতীত্যাহ—পুরুষ ইতি। উপাদীয়তে নিমিত্ততয়া স্বীক্রিয়ত ইত্যু-পাদানম্। স এব কাল উপাদানং নিমিত্তং যস্মিন্, তমাত্মানমেব বিশ্ব-রূপেণাসৃজৎ, স্বব্যতিরেকেণ সৃজ্যাস্যাভাবাৎ। এতচ্চ বস্তুকথনমাত্রম্, কালেন নিমিত্তভূতেনাসৃজদিত্যেতাবদেব বিবক্ষিতম্ ॥

১২। স্বব্যতিরিক্তসৃজ্যাভাবং দর্শয়ন্ কালস্য সৃষ্টিনিমিত্ততাং দর্শয়তি —বিশ্বমিতি। বিষ্ণুমায়য়া সংস্থিতং সংহৃতং ব্রহ্মতন্মাত্রং সৎ বিশ্ব-মীশ্বরেণ কর্ত্রা কালেন নিমিত্তেন পরিচ্ছিন্নং পৃথক্ প্রকাশিতম্। অব্যক্তা মূর্ত্তিঃ স্বরূপং যস্যেতি স্বতো[১] নির্ব্বিশেষতা দর্শিতা ॥

১৩। অপ্রতিষ্ঠিতত্বং দর্শয়িতুং তৎকার্য্যবিশ্বপ্রবাহস্যাপ্রতিষ্ঠামাহ—যথেদানীমস্তি, তথাগ্রে পূর্ব্বমপ্যাসীৎ, পশ্চাদপি তথা ভবিষ্যতি ॥

১। অতো (ক)।

১৪। এবং সামান্যতঃ কালং নিরূপ্য বিশেষতো নিরূপয়িষ্যন্ তন্নিমিত্তস্য সর্গস্য পূর্ব্বোক্তানেব ভেদাননুবদতি—সর্গ ইতি। যস্ত প্রাকৃতো বৈকৃতশ্চ, স তু দশমঃ। তন্নিমিত্তমেব ত্রিবিধং প্রলয়মাহ—কালেনৈব কেবলেন নিত্যঃ প্রলয়ঃ, দ্রব্যেণ সঙ্কর্ষণমুখাগ্ন্যাদিনা নৈমিত্তিকঃ, গুণৈঃ স্বস্বকার্য্যং গ্রসদ্ভিঃ প্রাকৃতিকঃ ॥

১৫—৩১। তানেব সর্গান্ প্রপঞ্চয়তি—আদ্য ইত্যাদিনা যাবদধ্যায়-সমাপ্তি। মহতো লক্ষণম্—আত্মনো হরেঃ সকাশাদ্‌গুণানাং বৈষম্যমিতি। অহমঃ অহঙ্কারস্য; তস্য লক্ষণম্—যত্রেতি। দ্রব্যাদয়ো বক্ষ্যমাণাস্ত্রয়ঃ সর্গাঃ ॥ (১৬) তন্মাত্রো ভূতসর্গঃ, ভূতসূক্ষ্মসর্গ ইত্যর্থঃ। দ্রব্যশক্তিমান্ মহাভূতোৎপাদকঃ; জ্ঞানকর্ম্মেন্দ্রিয়াত্মকশ্চতুর্থঃ ॥ (১৭) পঞ্চমো বৈকারিক ইন্দ্রিয়াধিষ্ঠাতারো দেবা মনশ্চ, ষষ্ঠস্তু তমসঃ পঞ্চপর্ব্বাবিদ্যায়াঃ। অবুদ্ধির্জীবানামাবরণং বিক্ষেপশ্চ, তাং করোতীত্যবুদ্ধিকৃৎ, তস্য ॥ (১৮) মে মত্তঃ শৃণু। অনুদ্বেগেন শ্রোতব্যতামাহ—যদ্বিষয়া মেধা সংসারং হরতি, তস্য হরেলীলা, যদ্বা, ইয়মিতি তমআদিসর্গরূপা, রজোভাজ ইতি ব্রহ্মরূপস্যেত্যর্থঃ। অস্মিন্ পক্ষে অবুদ্ধিকৃত ইতি প্রথমান্তোঽনব-ধানকৃত ইত্যর্থঃ ॥ (১৯) মুখমিব প্রথমং কৃতো মুখ্যসর্গঃ। তস্থুষাং স্থাবরাণাং, ষড়্‌বিধত্বমেবাহ—যে পুষ্পং বিনা ফলন্তি, তে বনস্পতয়ঃ; ওষধয়ঃ ফলপাকান্তাঃ, লতা আরোহণাপেক্ষাঃ, ত্বক্‌সারা বেণ্বাদয়ঃ, লতা এব কাঠিন্যেনারোহণানপেক্ষা বীরুধঃ; যে পুষ্পৈঃ ফলন্তি, তে দ্রুমাঃ; তেষাং সাধারণং লক্ষণমাহ—উর্দ্ধং স্রোত আহারসঞ্চারো যেষাম্, তমঃপ্রায়া অব্যক্তচৈতন্যাঃ, অন্তঃস্পর্শাঃ স্পর্শমেব জানন্তি, নান্যৎ, তদপ্যন্তরেব, ন বহিঃ; বিশেষিণঃ অব্যবস্থিতপরিণামাদ্যনেকভেদবন্তঃ ॥ (২০) তির্য্যক্-স্রোতসাং সর্গমাহ—তিরশ্চামিতি, স চাষ্টাবিংশতিভেদঃ। তিরশ্চাং লক্ষণম্—অবিদঃ শ্বস্তনাদিজ্ঞানশূন্যাঃ, ভূরিতমস আহারাদিমাত্রনিষ্ঠাঃ,

ঘ্রাণজ্ঞা ঘ্রাণেনাঘ্রাণেনৈবেষ্টমর্থং জানন্তি ; হৃদি অবেদিনো দীর্ঘানুসন্ধান-শূন্যাঃ ; তথা চ শ্রুতিঃ—'অথেতরেষাং পশূনামশনাপিপাসে এবাভিবিজ্ঞানং ন বিজ্ঞাতং বদন্তি, ন বিজ্ঞাতং পশ্যন্তি, ন বিদুঃ শ্বস্তনম্, ন লোকালোকৌ' ইতি ॥ (২১—২৪) অষ্টাবিংশতিভেদানেবাহ—গবাদয় উষ্ট্রান্তা দ্বিশফাঃ দ্বিখুরা নব, খরাদয়শ্চমর্য্যন্তা একশফাঃ ষট্, শ্বাদয়ো গোধান্তাঃ পঞ্চনখা দ্বাদশম্, এবমেতে ভূচরাঃ সপ্তবিংশতিঃ । মকরাদয়ো জলচরাঃ, কঙ্কাদয়শ্চ খগাঃ, অভূচরত্বেনৈকীকৃত্য গৃহীতাঃ ; তদেবমষ্টাবিংশতিভেদা ভবন্তি । তেষু কৃষ্ণরুরুগৌরগবয়া মৃগবিশেষাঃ । অন্যেষামপি, তির্য্যক্প্রাণিনা-মেতেম্বেব যথাযথমন্তর্ভাবঃ ॥ (২৫) অধ আহারসঞ্চারো যস্য, সোঽর্ব্বাক্-স্রোতাঃ ; হ্রস্বত্বমার্ষম্ । নৃণাং সর্গো নৃণাং লক্ষণম্—রজঃ অধিকং যেষু তে ॥ (২৬) এতে ত্রয়ো বৈকৃতা এব, ন কৌমারবদুভয়াত্মকাঃ । দেবসর্গশ্চ বৈকৃত ইত্যনুষঙ্গঃ । বৈকারিকস্তু দেবসর্গঃ প্রাকৃতেষু পূর্ব্বমেব প্রোক্তঃ, অয়ন্তু ততো ন্যূনত্বাদ্বৈকৃতঃ, দেবসর্গত্বাৎ তদন্তর্ভূতশ্চ । সনৎ-কুমারাদীনাং সর্গস্তু প্রাকৃতো বৈকৃতশ্চ দেবত্বেন মনুষ্যত্বেন চ সৃজ্যত ইত্যর্থঃ ॥ (২৭—২৮) বৈকৃতশ্চ দেবসর্গোঽষ্টবিধঃ । তত্র বিবুধাদয়-স্ত্রয়ো ভেদাঃ, গন্ধর্ব্বাপ্সরস একঃ, যক্ষরক্ষাংস্যেকঃ, ভূতপ্রেতপিশাচা একঃ, সিদ্ধচারণবিদ্যাধরা একঃ, কিন্নরাদয় একঃ, আদিশব্দাৎ কিম্পুরুষাশ্বমুখাদয়ঃ । এতচ্চ বিংশাধ্যায়ে স্পষ্টং ভবিষ্যতি ॥ (৩০) গুণব্যত্যয়ে সর্গে ভ্রাম্যন্ ভ্রমণশীলো ভ্রমিঃ, স তু অবিশেষো ভ্রাম্যদ্ভ্রমিঃ, তস্যাং নদ্যাং ভ্রমতো নাদির্নান্তঃ, তদ্বৎ সৃষ্টিসংহারাদিরিত্যর্থঃ ॥ (৩১) ত এবেতি, তন্নামানস্ত-দ্রূপাশ্চেত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে

দশমোঽধ্যায়ঃ ॥ ১০ ॥

একাদশোঽধ্যায়ঃ

তত একাদশে কালঃ পরমাণ্বাদিলক্ষণৈঃ।
যুগমন্বন্তরাদিভ্যঃ কল্পমানাদি বর্ণ্যতে॥ (১)

১—২। তদেবং সামান্যতঃ কালস্যোপলক্ষণভূতং গুণব্যতিকরং দশবিধং নিরূপ্যেদানীং তস্যৈব বিশেষং নিরূপয়িতুং তৎপরিচ্ছেদ্যং বস্তু লক্ষয়তি দ্বাভ্যাম্। সতঃ কার্য্যস্য বিশেষাণামংশানাং যশ্চরমোঽন্ত্যঃ যস্যাংশো নাস্তি; অনেকঃ কার্য্যাবস্থামপ্রাপ্তঃ; অসংযুতঃ সমুদায়াবস্থাঞ্চ প্রাপ্তঃ। অতএব সদা কার্য্যসমুদায়াবস্থয়োরপগমেঽপ্যাস্তি স পরমাণুর্বিজ্ঞেয়ঃ। কিং তত্র প্রমাণম্? অত আহ—যতো যেভ্যঃ সমুদিতেভ্যঃ নৃণাং ব্যবহর্ত্তৃণামৈক্যভ্রমোঽবয়বিবুদ্ধিঃ; তথা চ পঞ্চমে অবয়বিনিরাকরণে বক্ষ্যতি—'যেষাং সমূহেন কৃতো বিশেষঃ' ইতি। কার্য্যানুপপত্ত্যা কল্প্যত ইতি ভাবঃ॥ (২) সূক্ষ্মমুক্ত্বা স্থূলমাহ—সত এবেতি। যস্য চরমোঽংশঃ পরমাণুস্তস্যৈব সতঃ কার্য্যমাত্রস্য স্বরূপাবস্থিতস্য পরিণামান্তরমপ্রাপ্তস্য যৎ কৈবল্যমৈক্যং, স পরমমহান্, পুংস্ত্বন্তু পরমাণুপ্রতিযোগিত্বাৎ। ননু নানাবিশেষবান্ পরস্পরং ভিন্নশ্চ সর্ব্বঃ পদার্থঃ. কথমৈক্যং তস্য? তত্রাহ—অবিশেষো বিশেষবিবক্ষারহিতঃ, নিরন্তরো ভেদবিবক্ষারহিতশ্চ সর্ব্বোঽপি প্রপঞ্চঃ পরমমহানিত্যর্থঃ॥

৩। যথা সূক্ষ্মঃ স্থূলশ্চায়ং পদার্থঃ, এবং কালোঽপ্যনুমিতঃ; চকারান্মধ্যমাবস্থা গৃহ্যতে। সংস্থানং পরমাণ্বাদ্যবস্থা, তস্য ভুক্তির্ব্ব্যাপ্তিস্তয়া ভগবানিতি হরেঃ শক্তিঃ, স্বতোঽব্যক্তঃ ব্যক্তং ভুঙ্‌ক্তে বাপ্নোতি পরিচ্ছিনত্তীতি তথা; বিভুঃ—উৎপত্ত্যাদিষু দক্ষঃ॥

৪। এতদেব প্রপঞ্চয়তি—স ইত্যাদিনা; সতঃ প্রপঞ্চস্য পরমাণুতাং পরমাণ্বস্থাং যো ভুঙ্‌ক্তে, স কালঃ পরমাণুঃ। তস্যৈবাবিশেষং সাকল্যং

যো ভুঙ্‌ক্তে, স পরমমহান্। অয়মর্থঃ—'গ্রহর্ক্ষতারাচক্রস্থঃ' ইত্যাদিনা যৎ সূর্য্যপর্য্যটনং বক্ষ্যতে, তত্র সূর্য্যো যাবতা পরমাণুদেশমতিক্রামতি, তাবান্ কালঃ পরমাণুঃ; যাবতা চ দ্বাদশরাশ্যাত্মকং সর্ব্বং ভুবনকোষমতিক্রামতি, স পরমমহান্ সংবৎসরাত্মকঃ কালঃ, তস্যৈবাবৃত্ত্যা যুগমন্বন্তরাদিক্রমেণ দ্বিপরার্দ্ধান্তত্বমিতি; তথা চ পঞ্চমে সূর্য্যগত্যৈব কালাদিবিভাগং বক্ষ্যতি ॥

৫। ইদানীং দ্ব্যণুকাদিলক্ষণপূর্ব্বকং মধ্যকালাবস্থাং কথয়তি—দ্বৌ পরমাণূ অণুঃ স্যাৎ, ত্রয়োঽণবঃ ত্রসরেণুঃ, স তু প্রত্যক্ষ ইত্যাহ—জালার্কেতি; গবাক্ষপ্রবিষ্টেষ্বর্করশ্মিষু অবগতঃ। কোঽসৌ? যোঽতিলঘুত্বেন খমেবানুপতন্ অগাৎ গতঃ; ন গামিতি পাঠে খমেবানুপতন্ অবগতঃ, ন তু গাং পৃথ্বীম্ ॥

৬। শতং ভাগাঃ ত্রুটিরূপা যস্মিন্, স বেধঃ; তৈর্বেধৈঃ ॥

৭। তে নিমেষাস্ত্রয়ঃ ক্ষণ ইত্যাম্নাতাঃ, তাঃ কাষ্ঠাঃ পঞ্চদশ, একং লঘু ॥

৮। নাড়িকাঃ ষট্ সপ্ত বা প্রহরঃ, স এব যামোঽপি, দিনস্য রাত্রেশ্চ চতুর্থো ভাগঃ। হ্রাসে ষট্, বৃদ্ধৌ সপ্ত, সন্ধ্যাংশমুহূর্ত্তদ্বয়ং বিনেতি জ্ঞাতব্যম্। তত্রাপ্যনিয়মার্থো বাশব্দঃ, প্রত্যহং তদ্ভেদানাং গণয়িতুমশক্যত্বাৎ ॥

৯। নাড়িকায়া উন্মানমাহ—উন্মীয়তে অনেনেতি উন্মানং পাত্রং ষট্‌পলতাম্রবিরচিতম্; পঞ্চ গুঞ্জা মাষঃ, তৈশ্চতুর্ভিশ্চতুরঙ্গুলায়ামশলাকারূপেণ রচিতৈঃ কৃতমূলচ্ছিদ্রম্, তেন চ্ছিদ্রেণ যাবৎ প্রস্থপরিমিতং জলং প্রবিশতি, তেন চ প্লুতং নিমগ্নং ভবতি, তাবান্ কালো নাড়িকা। তত্র পলচ্ছিদ্রয়োরাধিক্যে শীঘ্রং নিমজ্জেৎ, অল্পত্বে চ বিলম্বেনেতি পলশলাকয়োর্নিয়মঃ ॥

১০। অহনী অহোরাত্রম্ ॥

১১। ষণ্মাসা অয়নম্, দিবীত্যস্যোত্তরেণান্বয়ঃ ॥

১২। দেবানামহোরাত্রে প্রাহুঃ। দ্বাদশ মাসাঃ ॥

১৩। অনেন ক্রমেণাসৌ সূর্য্যো নিত্যমায়ুঃ ক্ষপয়তীত্যাহ—গ্রহাশ্চন্দ্রাদয়ঃ, ঋক্ষাণ্যশ্বিন্যাদীনি, তারা অন্যানি নক্ষত্রাণি, তদুপলক্ষিতং যৎ কালচক্রম্, তত্র স্থিতঃ অনিমিষঃ কালাত্মা বিভুরীশ্বরঃ সূর্য্যঃ জগৎ দ্বাদশরাশ্যাত্মকং ভুবনকোষং পর্য্যেতি পর্য্যটতি ॥

১৪। সংবৎসরাদিভেদশ্চ সৌরবার্হস্পত্যসাবনচান্দ্রনাক্ষত্রমাসভেদেন দ্রষ্টব্যঃ। কেচিৎ পুনরেবমাহুঃ,—যদা শুক্লপ্রতিপদি সংক্রান্তির্ভবতি, তদা সৌরচান্দ্রমাসয়োর্যুগপদুপক্রমো ভবতি, স সংবৎসরঃ। ততঃ সৌরমানেন বর্ষে ষট্ দিনানি বর্দ্ধন্তে, চান্দ্রমানেন ষট্ দিনানি হ্রসন্তীতি দ্বাদশদিন-ব্যবধানাদুভয়োরগ্রপশ্চাদ্ভাবো ভবতি; এবং ব্যবধানতারতম্যেন পঞ্চ বর্ষাণি গচ্ছন্তি, তন্মধ্যে দ্বৌ মলমাসৌ ভবতঃ। ততঃ পুনঃ ষষ্ঠং সংবৎসরো ভবতীতি ॥

১৫। এবম্ভূতঃ কালাত্মা নিত্যমপ্রমত্তৈঃ পূজনীয় ইত্যাহ—য ইতি। সৃজ্যং কার্য্যমঙ্কুরাদি তদ্বিষয়াং বীজাদীনাং শক্তিং কালরূপয়া স্বশক্ত্যা বহুধা উচ্ছ্বসয়ন্ কার্য্যাভিমুখীকুর্ব্বন্ দিব্যন্তরীক্ষে ধাবতি। কোঽসৌ ভূতভেদো মহাভূতবিশেষস্তেজোমণ্ডলরূপী সূর্য্যঃ? কিমর্থং ধাবতি? পুংসঃ পুরুষস্যা-ভ্রমায়, ভ্রমো মোহস্তন্নিবৃত্তয়ে; আয়ুরাদিব্যয়েন বিষয়াসক্তিং নিবর্ত্তয়-ন্নিত্যর্থঃ। সকামানান্তু গুণময়ং স্বর্গাদিফলং ক্রতুভির্বিস্তারয়ন্; তস্মৈ বৎসরপঞ্চকপ্রবর্ত্তকায় পূজাং কুরুত ॥

১৬। ইদং স্বস্বমানেন বর্ষশতং গণিতমায়ুর্মানম্। প্রত্যহং কল্প্যতে সৃজ্যত ইতি কল্পস্ত্রৈলোক্যম্, তস্মাদ্বাহ্যতঃ, বিদো জ্ঞানিনঃ ॥

১৭। যোগরাদ্ধেন যোগসিদ্ধেন ॥

১৮। দ্বাদশভির্বর্ষসহস্রৈরিত্যুত্তরশ্লোকসামর্থ্যাজ্জ্ঞাতব্যম্। অবধীয়ত ইতি অবধানম্, সন্ধ্যা সন্ধ্যাংশশ্চ, তৎসহিতম্ ॥

১৯। কৃতযুগে চত্বারি সহস্রাণি, সন্ধ্যাসন্ধ্যাংশয়োশ্চত্বারি চত্বারি শতানি ইত্যষ্টৌ শতানি চ ; এবং ত্রেতাদিম্বপি যোজ্যম্ ॥

২০। যুগস্যাদৌ সন্ধ্যা, অন্তেঽংশঃ সন্ধ্যাংশঃ ; উক্তানি শতানি সংখ্যা যয়োস্তয়োরন্তর্মধ্যে যুগম্। তস্য বিশেষমাহ—যত্রেতি ; গবালম্ভাদিধর্ম্ম-বিশেষো যত্র বিধীয়ত ইত্যর্থঃ। সাধারণধর্ম্মস্তু সন্ধ্যাসন্ধ্যাংশয়োরপ্যস্ত্যেব ॥

২১। চতুষ্পাৎ সম্পূর্ণঃ ; ত্রেতাদিষু পাদেন পাদেন ব্যেতি হ্রসতি। পাদেন পাদেন বর্দ্ধমানেনাধর্ম্মেণ হেতুনা। এতচ্চ স্বরূপকথনমাত্রং বৈরাগ্যার্থম্, ন তু ধর্ম্মসঙ্কোচনার্থম্ ॥

২২। ত্রিলোক্যা বহির্মহর্লোকপ্রভৃতি ব্রহ্মলোকমভিব্যাপ্য চতুর্যুগ-সহস্রমেকং দিনম্। যদ্‌যস্মাৎ, বিশ্বসৃক্ ব্রহ্মা, নিমীলতি স্বপিতি ॥

২৩—২৬। তত্র দিনস্থিতিমাহ—নিশাবসান ইত্যাদিসার্দ্ধৈশ্চতুর্ভিঃ। চতুর্দ্দশ মনূন্ ভুঞ্জন্ পালয়ন্ ব্যাপ্নুবন্নিত্যর্থঃ ॥ (২৪) কিঞ্চিদধিকাং যুগানামেকসপ্ততিম্। মনুবংশ্যাঃ পৃথ্বীপালকাঃ ক্রমেণ ভবন্তি, সপ্তর্ষি-প্রভৃতয়স্তু যুগপৎ সমকালমেব ভবন্তি ; সুরেশাঃ ইন্দ্রাঃ, তাননুবর্ত্তন্তে যে গন্ধর্ব্বাদয়স্তেঽপি ॥ (২৫) ত্রৈলোক্যং বর্ত্তয়তীতি তথা ॥ (২৬) স্বমূর্ত্তিভির্মন্বন্তরাবতারৈর্মন্বাদিভির্দ্বারভূতৈরাবিষ্কৃতপুরুষকারঃ সন্নিদং বিশ্বং রক্ষতি ॥

২৭—৩১। রাত্রিগতাং স্থিতিমাহ পঞ্চভিঃ। তমসো মাত্রাং লেশম্, প্রতিসংরুদ্ধঃ প্রত্যাহৃতঃ বিক্রমো যেন ; অনুগতমনুপ্রবিষ্টমশেষং যস্মিন্ ॥ (২৮) তদেব স্পষ্টয়তি—তমেবেতি। অন্বপিধীয়ন্তে ইতি কর্ম্মকর্ত্তরি প্রয়োগঃ ; তিরোহিতা ভবন্তীত্যর্থঃ। কথম্? নির্ম্মুক্তো রহিতঃ শশী ভাস্করশ্চ যথা ভবতি তথা ॥ (২৯) ভগবচ্ছক্তিরূপো যঃ সঙ্কর্ষণমুখাগ্নিস্তেন উষ্মণা অর্দ্দিতাঃ সন্তঃ জনলোকং যান্তি ॥ (৩০) কল্পান্তৈনৈধিতা বর্দ্ধিতাঃ সিন্ধবঃ সমুদ্রাঃ, উৎকট আটোপঃ ক্ষোভো যেষাং তে চ তে চণ্ডবাতৈ-

রীরিতোর্ম্ময়শ্চ ॥ (৩১) জনলোক আলয়ো যেষাং মহর্লোকাদ্‌গতানা-মন্যেষাঞ্চ তৈঃ ॥

৩২ । বৈরাগ্যার্থমাহ—এবংবিধৈরহোরাত্রৈর্ব্বর্ষশতং সর্ব্বেষাং প্রাণিনা-মায়ুবঃ পরমধিকমস্য ব্রহ্মণো যদায়ুঃ, তদপ্যপক্ষিতমপক্ষীণমিবেতি লোকোক্তিঃ, গতপ্রায়মিবেত্যর্থঃ ॥

৩৩ । তদেবাহ—যদিতি ॥

৩৪ । পূর্ব্বস্য পরার্দ্ধস্যাদাবিতি ত্রিভির্বস্তুকথনমাত্রম্ ॥

৩৫ । পাদ্মত্বে হেতুঃ—যদিতি ॥

৩৬ । অয়ন্তু দ্বিতীয়স্যাদৌ কথিতঃ ॥

৩৭—৪১ । তদেবং কালেন নিমিত্তেন সৃজ্যানামায়ুঃপরিমাণমুক্ত্বা কালপরিচ্ছেদরহিতং তত্ত্বমাহ—কালোঽয়মিতি পঞ্চভিঃ । উপচর্য্যতে কেবলম্, ন ত্বনেনাপি ক্রমেণায়ুর্গণনং তস্যেত্যাহ—অব্যাকৃতস্য কার্য্যো-পাধিশূন্যস্য, অতএবানন্তস্য অনাদেশ্চ, জগদাত্মনো জগৎকারণস্য ॥ (৩৮) তৎপরিচ্ছেদে কালস্যাসামর্থ্যাদিত্যাহ—কালোঽয়মীশ্বরঃ সমর্থোঽপি ভূম্নঃ পরিপূর্ণস্য ঈশিতুং নৈব প্রভুর্ন সমর্থঃ, যতো ধামমানিনাং দেহ-গেহাদ্যভিমানিনামেবেশ্বরঃ ॥ (৩৯) ভূম ইত্যুক্তম্, তৎ প্রপঞ্চয়ন্নাহ—বিকারৈঃ ষোড়শভির্যুক্তৈঃ, অষ্টপ্রকৃতিসংযুক্তৈঃ সহিতস্তদারব্ধ ইত্যর্থঃ । অয়মণ্ডকোষো যত্র প্রবিষ্টঃ পরমাণুবল্লক্ষ্যতে ইত্যুত্তরেণান্বয়ঃ । কীদৃশঃ ? অন্তঃ পঞ্চাশৎকোটিযোজনবিস্তৃতঃ, বহিশ্চ বিশেষাদিভিঃ পৃথিব্যাদিভিঃ সপ্তভিরাবৃতঃ ॥ (৪০) কীদৃশৈঃ ? অণ্ডকোষপ্রমাণাদ্দশগুণোত্তরোঽধিকো যেষু তৈঃ, ন কেবলময়মেক এব, অপি তু অন্যেঽপি লক্ষ্যন্তে ॥ (৪১) সর্ব্বেষাং কারণানাং কারণম্, ধাম স্বরূপম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
একাদশোঽধ্যায়ঃ ॥ ১১ ॥

দ্বাদশোঽধ্যায়ঃ

দ্বাদশে তু কুমারাদিমনঃসর্গাসমেধনাৎ ।
কায়দ্বৈধেন যৌনস্তু মনুসর্গোঽনুবর্ণ্যতে ॥ (১)

২। অগ্র ইতি ব্রহ্মা স্বসৃষ্টৌ প্রথমমবিদ্যাবৃত্তীঃ সসর্জ্জ। তত্র তমো নাম স্বরূপাপ্রকাশঃ, মোহো দেহাত্মহংবুদ্ধিঃ, মহামোহো ভোগেচ্ছা, তামিস্রং তৎপ্রতিঘাতে ক্রোধঃ, অন্ধতামিস্রং তন্নাশেঽহমেব মৃতোঽস্মীতি বুদ্ধিঃ। তদেবোক্তং বৈষ্ণবে—'তমোঽবিবেকো মোহঃ স্যাদন্তঃকরণ-বিভ্রমঃ। মহামোহস্তু বিজ্ঞেয়ো গ্রাম্যভোগসুখৈষণা। মরণং হ্যন্ধতামিস্রং তামিস্রঃ ক্রোধ উচ্যতে। অবিদ্যা পঞ্চপর্ব্বৈষা প্রাদুর্ভূতা মহাত্মনঃ॥' ইতি। পাতঞ্জলেঽপ্যেত এবোক্তাঃ—'অবিদ্যাস্মিতারাগদ্বেষাভিনিবেশাঃ পঞ্চ ক্লেশাঃ' ইতি; শ্রীবিষ্ণুস্বামিপ্রোক্তা বাজ্ঞানবিপর্য্যাসভেদভয়শোকাঃ। তদুক্তং প্রথমটীকায়াম্—'স্বাদৃগুত্থবিপর্য্যাসঃ' ইত্যাদি॥

৩। ন বহ্বমন্যত নাভ্যনন্দৎ॥

৪। যদ্যপি প্রতিকল্পং সনকাদিসৃষ্টির্নাস্তি, তথাপি ব্রাহ্মসর্গত্বাদিহো-চ্যতে। বস্তুতস্তু মুখ্যসর্গাদয় এব প্রতিকল্পং ভবন্তি, সনকাদয়স্তু ব্রাহ্মকল্প-সৃষ্টা এবানুবর্ত্তন্তে॥

৫। স্বভূর্ব্রহ্মা॥

৬। অবধ্যাতঃ অবজ্ঞাতঃ; প্রত্যাখ্যাতমনঙ্গীকৃতমনুশাসনং যৈঃ॥

৭। স চাসৌ মন্যুশ্চ তন্মন্যুঃ॥

১০। বালক ইব॥

১১। অগ্রে পূর্ব্বমেব, মে ময়া কৃতানি॥

১৪। সযোষণঃ সস্ত্রীকঃ; এভিঃ স্থানৈর্নামভিশ্চ যুক্তঃ প্রজাঃ সৃজ॥

১৫। সত্ত্বং বলম্, আকৃতিঃ নীললোহিততা, স্বভাবঃ তীব্রতা, তেন॥

১৬। রুদ্রাণাং যূথানি দৃষ্ট্বা, অশঙ্কত ত্রাসং প্রাপ্তঃ ॥

১৮। স্রষ্টা স্রক্ষ্যতি ॥

২৬। অধরচ্ছদাৎ অধরোষ্ঠাৎ ॥

২৮। দেহান্তরেণ কৃতং সর্গং বক্তুং তদ্দেহত্যাগে কারণমাহ—বাচমিত্যাদিনা ॥

৩০। ত্বং ত্বত্তো যে পূর্ব্বে ব্রহ্মাদয়োঽন্যে বা তৈরেতন্ন কৃতম্ ; অঙ্গজং কামম্ ॥

৩১। তেজীয়সামিতি তেজস্বিনামপি, সুশ্লোক্যং সৎকীর্ত্তিদং ন ভবতি ; যেষাং তেজীয়সাং বৃত্তম্ ॥

৩৩। তন্বং তনুম্ ॥

৩৪। কথং স্রক্ষ্যামীত্যভিধ্যায়তঃ স্রষ্টুর্ব্রহ্মণঃ চতুঃসংখ্যাযুক্তান্মুখাৎ, সমবেতান্ সুসঙ্গতান্, যথা পুরা প্রাক্‌কল্পে ॥

৩৫। চাতুর্হোত্রং হোত্রাদীনাং চতুর্ণাং কর্ম্ম, কর্ম্মতন্ত্রং যজ্ঞবিস্তারঃ, উপবেদৈঃ ন্যায়ৈশ্চ[1] সহ ; আশ্রমাস্তদ্‌বৃত্তয়শ্চাসন্ ॥

৩৬। মুখতঃ—মুখেভ্যঃ ॥

৩৭। চাতুর্হোত্রসৃষ্টিক্রমমাহ—শস্ত্রমপ্রগীতমন্ত্রস্তোত্রং হোতুঃ কর্ম্ম, ইজ্যামধ্বর্য্যোঃ কর্ম্ম, স্তুতিস্তোমং স্তুতিঃ সঙ্গীতং, স্তোত্রং স্তোমং তদর্থমৃক্[2]-সমুদায়ম্ ; 'ত্রিবিৎ স্তোমো ভবতি' ইত্যাদিবিহিতমুদ্গাতৃপ্রযোজ্যম্, প্রায়শ্চিত্তং ব্রাহ্মম্ ॥

৩৮। উপবেদক্রমমাহ—আয়ুর্ব্বেদমিতি। আত্মনো মুখৈঃ ; স্থাপত্যং বিশ্বকর্ম্মশাস্ত্রম্ ॥

৪০। কর্ম্মতন্ত্রক্রমমাহ—ষোড়শ্যুক্থাবিতি। পুরীষি চয়নম্, অগ্নিষ্টুৎ অগ্নিষ্টোমঃ ॥

১। নয়ৈশ্চ (খ) ; ২। তদর্থানুকূল- (ক, গ)।

৪১। বিদ্যেতি, শৌচম্—'ক্ষেত্রজ্ঞস্যেশ্বরজ্ঞানাদ্বিশুদ্ধিঃ পরমা মতা' ইতি স্মৃতেঃ। দানমিতি, দয়া 'ভূতাভয়প্রদানস্য কলাং নার্হন্তি ষোড়শীম্' ইত্যাদি-বচনাৎ। এবঞ্চ—'তপঃ শৌচং দয়া সত্যমিতি পাদাঃ কৃতে কৃতাঃ' ইতি প্রথমস্কন্ধোক্তেরবিরোধঃ ॥

৪২। ব্রহ্মচর্য্যাদ্যাশ্রমেষু একৈকস্য চাতুর্ব্বিধ্যমাহ—সাবিত্রং ব্রহ্মচর্য্যম্, উপনয়নাদারভ্য গায়ত্রীমধীয়ানস্য ত্রিরাত্রম্, প্রাজাপত্যং ব্রতান্যাচরতঃ সংবৎসরম্, ব্রাহ্মং বেদগ্রহণান্তম্, বৃহৎ নৈষ্ঠিকম্, বার্ত্তা অনিষিদ্ধকৃষ্যাদি-বৃত্তিঃ, সঞ্চয়ো যাজনাদিবৃত্তিঃ, শালীনমযাচিতবৃত্তিঃ, শিলোঞ্ছঃ পতিত-কণিশকণবৃত্তিঃ, একবচনমার্ষম্ ; ইত্যেতা গৃহিবৃত্তয় ইতি ; যদ্বা, শিলোঞ্ছ ইতি দ্বন্দ্বৈক্যে সপ্তমী ; এবং বৃত্তিভেদে সতি গৃহে স্থিতা ভবন্তীত্যর্থঃ ॥

৪৩। বনে স্থিতাশ্চত্বারঃ, তত্র বৈখানসা অকৃষ্টপচ্যবৃত্তয়ঃ, বালখিল্যা নবেহন্নে লব্ধে পূর্ব্বসঞ্চিতান্নত্যাগিনঃ, ঔড়ুম্বরাঃ প্রাতরুত্থায় যাং দিশং প্রথমং পশ্যন্তি, তত আহৃতৈঃ ফলাদিভির্জীবন্তঃ ; ফেনপাঃ স্বয়ং পতিতৈঃ ফলাদিভির্জীবন্তঃ, কুটীচকঃ স্বাশ্রমধর্ম্মপ্রধানঃ[১], বহ্বোদঃ কর্ম্মোপসর্জ্জনী-কৃত্য জ্ঞানভ্যাসপ্রধানঃ, হংসো জ্ঞানাভ্যাসনিষ্ঠঃ, নিষ্ক্রিয়ঃ প্রাপ্ততত্ত্বঃ ; এতে চ সর্ব্বে যথোত্তরং শ্রেষ্ঠাঃ ॥

৪৪। ন্যায়াদীনাং পূর্ব্বাদি-ক্রমেণোৎপত্তিমাহ — আন্বীক্ষিকীতি। আন্বীক্ষিক্যাদ্যা মোক্ষধর্ম্মকামার্থবিদ্যাঃ, ব্যাহৃতয়ো ভূর্ভুবঃস্বরিতি ব্যস্তা-স্তিস্রঃ সমস্তা চতুর্থী। যথাহ আশ্বলায়নঃ—'এবং ব্যাহৃতয়ঃ প্রোক্তা ব্যস্তাঃ সমস্তাঃ' ইতি। যদ্বা, মহ ইতি চতুর্থী। তথা চ শ্রুতিঃ—'ভূর্ভুবঃস্বরিতি বা এতাস্তিস্রো ব্যাহৃতয়ঃ। তাসাং মহঃ স্মৈতাং চতুর্থীং মাহাচমস্য প্রবে-দয়তে মহ ইতি।' ইতি। দহ্রতঃ হৃদয়াবকাশাৎ[২] ॥

৪৫। স্নুতঃ স্নায়ুতঃ 'অনুষ্টুপ্ স্নাবান্' ইতি শ্রুতেঃ ॥

১। স্বাশ্রমকর্ম্মপ্রধানঃ (ঘ) ; ২। হৃদয়াকাশাৎ (ঘ)।

৪৬। মহাকল্পে ব্রহ্মা শব্দব্রহ্মরূপোঽভবদিত্যুক্তম্, তদেব দর্শয়ন্ বর্ণানামুৎপত্তিমাহ—স্পর্শ ইতি সার্দ্ধেন ; স্পর্শঃ কাদিবর্গপঞ্চকম্, স্বরঃ অকারাদিঃ, উষ্মাণঃ শ-ষ-স-হ-চতুষ্কম্, অন্তস্থাঃ য-র-ল-বাঃ, সপ্ত স্বরাঃ ষড়্জাদয়ঃ, বিহারেণ ক্রীড়য়া ॥

৪৭। অতএব শব্দতনুত্বাদ্‌ব্রহ্মণঃ পরমেশ্বরো নিত্যং প্রকাশতে, ইত্যাহ—ব্যক্তা বৈখরী, অব্যক্তঃ প্রণবঃ, তদাত্মনস্তস্য ব্রহ্মণঃ পরঃ পরমেশ্বরঃ অবভাতি। কীদৃশঃ? ব্রহ্ম পরিপূর্ণঃ। তত্রাব্যক্তাত্মনো ব্রহ্মরূপো বিততোঽবভাতি, ব্যক্তাত্মনো নানাশক্ত্যুপবৃংহিত ইন্দ্রাদি[1]-রূপোঽবভাতি ॥

৪৮। যা পূর্ব্বং বিসৃষ্টা সতী নীহারং তমোঽভবৎ ; ততোঽপরাম্ অনিষিদ্ধকামাসক্তাং তনুম্ ; শব্দব্রহ্মতনুস্তু সদাস্ত্যেব ॥

৪৯। তন্বন্তরগ্রহণে কারণমাহ—ঋষীণামিত্যাদিনা ॥

৫০। চিন্তামেবাহ—অহো ইতি। ব্যাপৃতস্য ব্যাপারং কুর্ব্বাণস্য ॥

৫১। যুক্তকৃতো যথোচিতং কুর্ব্বতঃ, অতএব কস্য ব্রহ্মণ ইদং রূপং দ্বিধাভূতমিত্যাশ্চর্য্যাৎ কায়মত্যাপি অভিচক্ষ্যতে ॥

৫৩। যা স্ত্রী সা অস্য মহীষ্যাসীৎ ॥

৫৪। এধাম্বভূবিরে বৃদ্ধিং প্রাপ্তাঃ ॥

৫৫। তদেবাহ—স চাপীতি ॥

৫৬। যতঃ যাসাং সন্ততিভিঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

১। ইন্দ্রিয়াদি- (ক)।

ত্রয়োদশোঽধ্যায়ঃ

ত্রয়োদশে সিসৃক্ষায়াং মনোরাকস্মিকাপ্লুতাম্।
ধরামুদ্ধর্ত্তুমুদ্ভূতাৎ ক্রোড়াদ্দৈত্যেন্দ্রসূদনম্ ॥ (১)

২। স্বয়ম্ভুবঃ পুত্রঃ, তদ্দেহাংশত্বাৎ ॥

৩। বিষ্বক্সেনো হরিরেবাশ্রয়ো যস্য সঃ ॥

৪। অতস্তস্য চরিতং শ্রোতব্যমিত্যাহ—সুচিরং শ্রমো যস্মিন্, তস্য; পুংসাং শ্রুতস্য অঞ্জসা মুখ্যত্বেন অয়মেবার্থ ঈড়িতঃ স্তুতঃ। ননু মুকুন্দ-পাদারবিন্দং যেষাং যেষাং হৃদয়েষ্বস্তি, তেষাং তেষাং ভাগবতানাং গুণানু-শ্রবণমিতি যৎ ॥

৫। সহস্রশীর্ষা শ্রীকৃষ্ণস্তস্য চরণাবুপধীয়েতে যস্মিন্; শ্রীকৃষ্ণঃ প্রীত্যা যস্যোৎসঙ্গে চরণৌ প্রসারয়তীত্যর্থঃ। মুনিঃ মৈত্রেয়ঃ, তমভ্যচষ্ট অভ্য-ভাষত, প্রণীয়মানস্তেন প্রবর্ত্ত্যমানঃ ॥

৬। বেদগর্ভং—ব্রহ্মাণম্ ॥

৭। ত্বমেবৈকঃ পিতা সর্ব্বেষাং, যতো জন্মকৃৎ, বৃত্তিপ্রদঃ পোষকশ্চ ত্বমেব; অতস্তব যদ্যপি অন্যাপেক্ষা নাস্তি, তথাপ্যস্মাকং তে শুশ্রূষা কেন কর্ম্মণা ভবেৎ, তদ্বিধেহীত্যুত্তরেণান্বয়ঃ ॥

৮। হে ঈড্য! আত্মশক্তিষু অস্মচ্ছক্যেষু কর্ম্মসু মধ্যে কেন কর্ম্মণা ভবেৎ, তদ্বিধেহি—ইদং কর্ত্তব্যমিতি কথয়, যৎ কৃত্বা যস্মিন্ কৃতে সতি বিষ্বক্ সর্ব্বতঃ, অমুত্র পরলোকে ॥

৯। বাং যুবাভ্যাং স্বস্তি ভদ্রং স্তাৎ ভূয়াৎ; যদ্‌যতো মা মাং শাধি অনুশিক্ষয়েতি আত্মনা স্বয়মেবার্পিতং নিবেদিতম্; অতঃ প্রীতোঽস্মি ॥

১০। অপচিতিঃ পূজা, গৃহ্যেত ইতি আজ্ঞেতি শেষঃ। সনকাদয়ো ন কুর্ব্বন্তি, বয়ং কিমিতি করিষ্যাম ইত্যেবম্ভূতো গতো মৎসরো যেভ্যঃ ॥

১১। গাং শাস শাধি পালয়েত্যর্থঃ ; পুরুষং হরিম্ ॥

১২। প্রজাপালকস্ত তে তুষ্টো ভবিষ্যতি ॥

১৩। উদাসীনস্ত ভগবতোঽতোষে মে কো দোষঃ? তত্রাহ—যেষামিতি। যজ্ঞলিঙ্গো যজ্ঞমূর্ত্তিঃ, অপগতঃ অর্থো যস্মাৎ কেবলং শ্রমায়ৈবেত্যর্থঃ। যদ্‌যস্মাৎ আত্মৈব স্বয়ং নাদৃতঃ, তস্মিন্নতুষ্টে স্বার্থ স্যৈবাসিদ্ধেঃ, সর্ব্বাত্মত্বাচ্চ তস্য ॥

১৪। বর্ত্তেয় বর্ত্তিষ্যে, হে অমীবস্থদন! পাপনাশন! অনুজানীহি অত্র স্থাতব্যমিতি অনুজ্ঞাং দেহি ॥

১৫। মহীতি চেৎ, অত আহ—যদোকঃ স্থানং সা মহী। হে দেব! অস্যা দেব্যাঃ ॥

১৬। পূর্ব্বং পানে কৃতেঽপি পুনরকাণ্ড এব উদ্ভূতানামপাং মধ্যে সন্নামবসন্নাং নিমগ্নাং কথমুন্নেষ্যে উদ্ধরিষ্যামি ?

১৭। চিন্তামেবাহ—সৃজতঃ সতঃ, বার্ভিঃ অদ্ভিঃ, রসাং রসাতলম্ ; ঈশ্বরেণ সর্গে নিযুক্তৈরস্মাভিঃ, মেঽনুষ্ঠেয়ং স এব বিদধাতু সম্পাদয়তু ॥

১৮। বরাহতোকঃ—সূক্ষ্মো বরাহঃ ॥

১৯। খস্থ আকাশে স্থিতঃ সন্ ॥

২০। চিত্রধা—অনেকধা ॥

২২। পূর্ব্বমঙ্গুষ্ঠাগ্রপ্রমাণো দৃষ্টঃ, গণ্ডশিলা স্থূলপাষাণস্তৎসমঃ, যজ্ঞো বিষ্ণুঃ, নিজরূপতিরোধানেন মে মনঃ খেদয়ন্ ॥

২৩। ইতি মীমাংসমানস্য সতঃ, জগর্জ্জ অগর্জ্জৎ ; গিরীন্দ্রতুল্যঃ ॥

২৪। গর্জ্জনপ্রয়োজনমাহ—ব্রহ্মাণমিতি ॥

২৫। ঘর্ঘরিতং তজ্জাত্যনুকরণধ্বনিম্ ; অনিশ্চয়েন যঃ স্বখেদঃ, তস্য ক্ষয়িষ্ণু ক্ষপয়িষ্ণু নাশকম্। তে ইতি পুনরুক্তিঃ প্রসিদ্ধিখ্যাপনার্থা। ত্রিভিঃ পবিত্রৈঃ ঋগ্‌-যজুঃসামমন্ত্রৈঃ, অগৃণন্ অস্তবন্ ॥

২৬। বেদৈর্বিতন্যতে স্তূয়তে মূর্ত্তির্যস্য সঃ, অতএব আত্মনো গুণাননু-বদতীতি তথা তৎ, তেষাং ব্রহ্ম উচ্চারিতবেদমবধার্য্য জ্ঞাত্বা ॥

২৭—২৮। কথম্ভূতঃ সন্নাবিবেশ? ইত্যপেক্ষয়ামাহ দ্বাভ্যাম্। উচ্চৈঃ ক্ষিপ্তো বালঃ পুচ্ছং যেন, খচরঃ আকাশচারী, কঠোরঃ কঠিনঃ, সটাঃ স্কন্ধবালান্; খরাণি তীব্রাণি[১] রোমাণি যস্যাঃ সা ত্বক্ যস্য, খুরৈরাহতানি অবভ্রাণি যেন, সিতদংষ্ট্রঃ অতিশুক্লদংষ্ট্রঃ, ঈক্ষা নিরীক্ষণমেব জ্যোতি আলোকো যস্য, তদা প্রকাশান্তরাভাবাৎ, বভাসে অশোভত। মহীধ্রঃ পৃথিব্যা উদ্ধর্ত্তা ॥ (২৮) ক্রোড়াপদেশঃ বরাহচ্ছদ্মা, অতঃ স্বয়মধ্বরা-ঙ্গোঽপি পশুরিব ঘ্রাণেন বিজিঘ্রন্, গণতঃ স্তোতৄন্ বিপ্রানুদ্বীক্ষ্য ঊর্দ্ধং বীক্ষ্য কং জলমবিশৎ ॥

২৯। তদানীন্তনং সমুদ্রধ্বনিমুৎপ্রেক্ষতে—স উদন্বান্ সমুদ্র আর্ত্ত ইব স্তনয়ন্ শব্দং কুর্ব্বন্ 'ভো যজ্ঞেশ্বর! মা মাং পাহি, মা ভিন্ধি'—ইত্যেবং চুক্রোশ ইব। আর্ত্তসাদৃশ্যমাহ—উৎসৃষ্টাঃ প্রসারিতা দীর্ঘা উর্ম্ময় এব ভুজাঃ, তৈর্বিশিষ্টঃ। আর্ত্তত্বে হেতুঃ—বজ্রকূটো বজ্রময়পর্ব্বতঃ, তদ্বদঙ্গং যদ্ভগবতস্তস্য নিপাতবেগেন বিশীর্ণা কুক্ষির্যস্য ॥

৩০। তদা রসায়াং রসাতলে গাং পৃথ্বীং দদর্শ। কঃ? ত্রিপরুঃ ত্রিণি পরূংষি সবনাত্মকানি পর্ব্বাণি যস্য যজ্ঞমূর্ত্তিরিত্যর্থঃ। কিং কুর্ব্বন্? ক্ষুরপ্রা আয়তাগ্রাঃ শরাস্তাদৃশৈঃ খুরৈঃ অপো দরয়ন্। কথম্? উৎপারপারম্, উৎপারাণাং পারশূন্যানামপি অপাং পারমবসানং যথা ভবতি তথা, তজ্জলং বিদারয়ন্। কথম্ভূতাম্? অগ্রে প্রলয়সময়ে তত্র তাস্বপ্সু স্বষুপ্সুঃ শিশয়িষুঃ সন্ জীবা আধীয়ন্তে যস্যাম্, সর্ব্বজীবাধারভূতাং যাং স্বয়মভ্যধত্ত আভিমুখ্যেন দধার, জঠরে ধৃতবানিত্যর্থঃ। অনেন তদুদ্ধরণেঽনায়াসং দ্যোতয়তি ॥

১। তীক্ষ্ণাণি (ঘ)।

৩১। রসায়াঃ সকাশাদুত্থিতঃ সন্ সংরুরুচে সম্যক্ অশোভত ॥

৩২। তত্রাপি অন্তসি গদামুদ্যম্যাগচ্ছন্তং রুন্ধানং প্রতিঘ্নন্তম্, ন সহ্যঃ সহনানর্হো বিক্রমো যস্য তং দৈত্যম্ ; সুনাভং চক্রং, তদ্বৎ সন্দীপিতঃ তীব্রো মন্যুর্যস্য, যদ্বা, 'ময়ি বিদ্যমানে কিমিতি পরিভবং সহসে ?' ইতি সুনাভেন সন্দীপিতস্তীব্রমন্যুঃ স ভগবান্ সিংহো গজমিব লীলয়া জঘান। গজেন্দ্রো জগতীং ক্রীড়য়া বিদারয়ন্ গৈরিকয়া যথারুণবর্ণগণ্ডতুণ্ডো ভবতি, তথা তস্য রক্তমেব পঙ্কস্তেনাঙ্কিতৌ গণ্ডৌ তুণ্ডঞ্চ যস্য স জঘানেতি পূর্ব্বেণৈবান্বয়ঃ ॥

৩৩। প্রজ্ঞায় আলক্ষ্য, অনুবাকো বৈদিকং সূক্তম্, তৎসদৃশৈর্বাক্যৈস্তুষ্টুবুঃ ॥

৩৪। ভো অজিত ! তে ত্বয়া জিতং জিতমিতি সম্ভ্রমে বীপ্সা। যজ্ঞৈর্ভাব্যতে আক্রিয়তে ইতি তথা, ত্রয়ীং বেদময়ীম্, নিলিল্যুঃ লীনপ্রায়াঃ; কারণং পৃথিব্যুদ্ধরণং তেন শূকরায় ॥

৩৫—৩৮। যজ্ঞাত্মতাং প্রপঞ্চয়ন্তঃ স্তুবন্তি—রূপমিত্যাদিচতুর্ভিঃ। ছন্দাংসি গায়ত্র্যাদীনি, যজ্ঞাঙ্গভূতচ্ছন্দআদ্যনুবাদেন ভগবদবয়বতা বিধীয়তে। বর্হিঃশব্দে দীর্ঘাভাব আর্ষঃ। দৃশি চক্ষুষি, চাতুর্হোত্রং হোত্রাদিকর্ম্ম-চতুষ্টয়ম্॥ (৩৬) স্রুক্ জুহূঃ, তুণ্ডে মুখাগ্রে, স্রুবো নাসিকয়োঃ, ইড়া ভক্ষণপাত্রম্, চমসা গ্রহাশ্চ সোমপাত্রাণি, প্রাশিত্রং ব্রহ্মভাগপাত্রম্, গ্রস্যতেঽনেনেতি গ্রসনং মুখান্তর্বর্ত্তি ছিদ্রম্, চর্ব্বণং ভক্ষণম্॥ (৩৭) দীক্ষা দীক্ষণীয়েষ্টিঃ, অনুজন্ম বারংবারমভিব্যক্তিঃ, উপসদস্তিস্র ইষ্টয়ঃ, শিরোধরং গ্রীবা। প্রায়ণীয়া দীক্ষানন্তরেষ্টিঃ, উদয়নীয়া সমাপ্তীষ্টিঃ, তে এব দংষ্ট্রে যস্য। প্রবর্গ্যো মহাবীরঃ, প্রত্যুপসদং পূর্ব্বং ক্রিয়তে সভ্যো হোমরহিতোঽগ্নিঃ, আবসথ্যঃ ঔপাসনাগ্নিঃ, তয়োর্দ্বৈন্দ্বৈক্যম্ ; তৎ তব ক্রতুরূপস্য শীর্ষং শিরঃ ; চিতয় ইষ্টকাচয়নানি পঞ্চ অসবঃ প্রাণাঃ ॥

(৩৮) প্রাতঃসবনাদীনি অবস্থিতিরাসনং বাল্যাদ্যবস্থা বা ; 'অগ্নিষ্টোমো-ঽত্যগ্নিষ্টোম উক্থ্যঃ ষোড়শী বাজপেয়োঽতিরাত্র আপ্তোর্যামঃ' ইতি সংস্থাবি-ভেদাস্তণ্ড্মাংসাদি সপ্ত ধাতবঃ ; সত্রাণি দ্বাদশাহাদীনি বহুযাগসঙ্ঘাত-রূপাণি, অসোমা যজ্ঞাঃ, সসোমাঃ ক্রতবঃ ; তদ্রূপস্ত্বম্ ইষ্টির্যজনমনুষ্ঠানম্, তদেব বন্ধনং যস্য সঃ ॥

৩৯। পূর্ব্বোক্তমেব সপরিকরং কীর্ত্তয়ন্তঃ প্রণমন্তি—নমো নম ইতি। অখিলমন্ত্রাদিরূপায়, ক্রিয়াত্মনে সামান্যব্যাপাররূপায়, কিঞ্চ, বৈরাগ্যযুক্ত-কর্ম্মসাধ্যা সত্ত্বশুদ্ধিঃ, ততো ভক্তিঃ, তত আত্মজয়ঃ চিত্তস্থৈর্য্যম্, তেনানু-ভাবিতং সাক্ষাৎকৃতং যজ্জ্ঞানং তস্মৈ, এবম্ভূতজ্ঞানপ্রদায় গুরবে চ ॥

৪০। হে ভূধর ! সভূধরা সপর্ব্বতা, বনাদুদকান্নির্গচ্ছতো গজেন্দ্রস্য দতা দন্তেন ॥

৪১। ত্বয়া ধৃতা ভূর্বিরাজত ইত্যুক্তম্, ইদানীং ভূমণ্ডলেন ত্বদ্রূপং বিরাজত ইত্যাহুঃ—ত্রয়ীতি। অথেত্যর্থান্তরে, তে ইদং রূপং দন্তেন ধৃতং যদ্ভূমণ্ডলম্, তেন চকাস্তি শোভতে ; শৃঙ্গেণ উঢ়ো ধৃতো যো ঘনস্তেন ভূয়সা অতিমহতা। বিভ্রমো বিলাসঃ ॥

৪২। জগতাং জঙ্গমানাং সতস্থুষাং স্থাবরৈঃ সহ বর্ত্তমানানাং লোকায় বাসস্থানার্থং তে পত্নীং জগতাং মাতরম্, যতস্ত্বং পিতাসি। এবং সতি তত্র স্থিতাঃ সন্তস্ত্বয়া পিত্রা সহ অস্যৈ মাত্রে নমসা বিধেম, নমনং করি-ষ্যামঃ, নমস্কারেণ পরিচরেমেতি বা। স্বতেজঃ ধারণশক্তিং যাজ্ঞিকাঃ মন্ত্রেণাগ্নিমরণাবিব অধাঃ নিহিতবানসি ॥

৪৩। ইদঞ্চ ত্বয়া অতিদুষ্করং কৃতমিত্যাহুঃ—ক ইতি। হে প্রভো ! তব ত্বয়া কৃতং ভুব উদ্বিবর্হণমুদ্ধরণং ত্বদন্যঃ কঃ শ্রদ্দধীত স্পৃহয়েৎ, অধ্যবস্যেদিত্যর্থঃ। ত্বয়ি পুনরসৌ বিস্ময়ো ন ভবতি। যতো বিশ্বে সর্ব্বে

বিস্ময়া যস্মিন্। কুতঃ? যো ভবানতিবিস্ময়মত্যদ্ভুতমিদং বিশ্বম্, ক্রিয়াবিশেষণং বা সসৃজে সৃষ্টবান্॥

৪৪—৪৫। বিস্ময়ং দর্শয়ন্তঃ প্রার্থয়ন্তে—বিধুন্বতেতি দ্বাভ্যাম্। সটানাং শিখাভিরগ্রৈরুদ্ধৃতা উচ্চলিতা যে শিবা অম্বুবিন্দবস্তৈঃ সিচ্যমানা বয়ং পবিত্রীকৃতাঃ॥ (৪৫) তব কর্ম্মণাং পারং য এষতে অবলোকয়তি জ্ঞাতুমিচ্ছতীত্যর্থঃ। যস্য তব যোগমায়য়া গুণৈঃ সহ যো যোগস্তেন মোহিতম্। অতো বিশ্বস্য শং মঙ্গলং বিধেহি—যথা ত্বামচিন্ত্যানন্তশক্তিং জ্ঞাত্বা ভজেত্তথানুগৃহাণেত্যর্থঃ॥

৪৬। উপস্থীয়মানঃ স্তূয়মানঃ, স্বখুরাক্রান্ত ইতি জলেঽপি ধারণশক্ত্যাধানং দর্শয়তি। অবিতা রক্ষকঃ॥

৪৮। কথনীয়ানি মায়ীনি মায়াবন্তি চরিত্রাণি যস্য, শ্রবয়েত শ্রাবয়েৎ, হ্রস্বত্বমার্ষম্। উশতীং কমনীয়াম্; হৃদি প্রসীদতি স্বমনসি সন্তুষ্যতীত্যর্থঃ॥

৪৯। আশিষো যদ্যপি সুলভাস্তথাপি তা ন প্রার্থনীয়া ইত্যাহ—তাভিরাশীর্ভিরলম্, লবাত্মভিঃ তুচ্ছাভিঃ; ন চ তদা ভজনস্য বৈফল্যং শঙ্কনীয়মিত্যাহ—ভগবদ্ভজনব্যতিরেকেণ ফলান্তরদৃষ্টিং বিনা ভজতাং স্বপদপ্রাপ্তিং স্বয়মেব বিধত্তে, গুহাশয়ত্বাদহৈতুকীং ভক্তিং জানন্॥

৫০। অতঃ কো নাম পুরাকথানাং পূর্ব্ববৃত্তানাং মধ্যে কথঞ্চিদাপীয় বিরজ্যেত বিরমেৎ, নরেতরং পশুং বিনা?

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে

ত্রয়োদশোঽধ্যায়ঃ॥ ১৩॥

চতুর্দ্দশোঽধ্যায়ঃ

চতুর্দ্দশে নিদানন্তু তদ্বধে বক্তুমুচ্যতে।
সন্ধ্যায়াং কশ্যপাদ্গর্ভসম্ভবঃ কামতোঽদিতেঃ॥ (১)

২। তেনৈব যেন ভূমিরুদ্ধৃতা। অনুশুশ্রুম ত্বন্মুখাৎ॥

৩। মৃধো যুদ্ধম্॥

৫। সাধুত্বে হেতুঃ—যদ্‌যস্মাৎ ত্বং হরেরবতারকথাং পৃচ্ছসীতি। মৃত্যোঃ পাশং বিশাতয়তি মোচয়তীতি তথা॥

৬। তদেব দর্শয়তি—যয়া কথয়া, উত্তানপদঃ পুত্রো ধ্রুবঃ, মুনিনা নারদেন, অর্ভক এব, যদা ধ্রুবায় সুনন্দাদিভির্বিমানমানীতং, তদাস্য দেহত্যাগোঽপেক্ষিতঃ স্যাদিতি মত্বা মৃত্যাবাসন্নেঽপি দেহং ন তত্যাজ, কিন্তু সোপান ইব তস্য মৃত্যোর্মূর্দ্ধ্নি পদং দত্ত্বা বিমানমারুহ্য বিষ্ণুপদমারূঢ়ঃ। বক্ষ্যতি হি—'পরীত্যাভ্যর্চ্চ্য ধিষ্ণ্যাগ্র্যং কৃতস্বস্ত্যয়নো দ্বিজৈঃ। ইয়েষ তদধিষ্ঠাতুং বিভ্রদ্রূপং হিরণ্ময়ম্॥' ইতি॥

৭। তয়োঃ সংগ্রামে হেতুং বক্তুমিতিহাসং প্রস্তৌতি—অথেতি। অনুপৃচ্ছতাং দেবানাং ব্রহ্মণা বর্ণিত ইতিহাসো ময়া শ্রুতঃ॥

৮। দেবপ্রশ্নপ্রস্তাবায় প্রথমং হিরণ্যাক্ষহিরণ্যকশিপূৎপত্তি-প্রসঙ্গমাহ—দিতিরিত্যাদিনা যাবদধ্যায়সমাপ্তি (৮—৫১)। মরীচেঃ পুত্রং কশ্যপম্; হৃচ্ছয়ঃ কামস্তেনার্দ্দিতা, অতঃ সন্ধ্যায়ামেব কামিতবতী॥

৯। তদপ্যগ্নিহোত্রশালায়াং, তত্রাপি সমাহিতম্। অগ্নির্জিহ্বা যস্য। যজুষাং যজ্ঞানাং পতিং পুরুষং শ্রীবিষ্ণুম্॥

১০—১৫। কৃপণাং বহুভাষিণীম্, ইতি বক্ষ্যতি হি। তত্র 'এষ মাম্' ইতি দ্বাভ্যাং কার্পণ্যম্, 'ভর্ত্তরি' ইতি চতুর্ভির্বহুভাষণং বর্ণ্যতে; দুনোতি পীড়য়তি, বিক্রম্য শৌর্য্যমাবির্ভাব্য, রম্ভাং কদলীম্॥ (১১)

আযুঙ্‌ক্তাং সর্ব্বতো যুনক্তু, সম্যক্‌ করোতু॥ (১২) ভর্ত্তরি প্রাপ্ত-বহুমানানাং স্ত্রীণাং যশঃ লোকানাবিশতে ব্যাপ্নোতি; প্রজয়া পুত্ররূপেণ, 'তজ্জায়া জায়া ভবতি, যদস্যাং জায়তে পুনঃ' ইতি শ্রুতেঃ॥ (১৩—১৪) নোঽস্মাকং পিতা নোঽস্মান্‌ পৃথক্‌ পৃথক্‌ অপৃচ্ছৎ। অয়ং ভাবঃ—ত্রয়োদশানামপ্যস্মাকং ত্বয়ি ভাবসাম্যে বৈষম্যাচরণং তবানুচিতমিতি॥ (১৫) মহীয়সি ত্বাদৃশে মহত্তমে মোঘং ন ভবতি হি॥

১৬। প্রবৃদ্ধানঙ্গেন কশ্মলং মোহো যস্যাস্তাম্‌॥

১৭—২১। সন্ধ্যাকালবঞ্চনায় ভার্য্যাপ্রশংসা—এষ ইতি পঞ্চভিঃ। যতঃ যস্যাঃ সকাশাৎ॥ (১৮) সর্ব্বাশ্রমানুপাদায়েতি; তানপ্যন্নাদি-দানেন কৃচ্ছ্রতস্তারয়ন্‌ স্বয়ং তরতীত্যর্থঃ॥ (১৯) আত্মনো দেহস্যার্দ্ধম্‌, কর্ম্মসু দ্বয়োঃ সমাধিকারাৎ। তচ্ছব্দানাং তাং ত্বামিতি তৃতীয়শ্লোকেন সম্বন্ধঃ। স্বধুরং দৃষ্টাদৃষ্টকর্ম্মভারম্‌, বিজ্বরঃ নিশ্চিন্তঃ॥ (২০) হেলাভি-র্লীলাভির্জয়েমেতি। সভার্য্যস্য ইন্দ্রিয়াণি প্রায়েণ ইতস্ততো ন সর্পন্তীতি ভাবঃ॥ (২১) তামনেকোপকারকর্ত্রীং ত্বাং কাৎস্ন্যেনানুকর্ত্তুং প্রত্যুপকারৈস্ত্বৎসদৃশীভবিতুং ন প্রভবো ন সমর্থাঃ, যে চান্যে গুণগৃধ্নবো গুণপ্রিয়াস্তেঽপি ন সমর্থাঃ, সম্পূর্ণেনাপ্যায়ুষা; বা-শব্দাৎ জন্মান্তরৈরপি ন প্রভব ইত্যুক্তম্‌॥

২২। যদ্যপি ত্বদনুকরণমশক্যম্‌, প্রজাত্যৈ পুত্রোৎপত্ত্যৈ, নাতিবোচন্তি ন নিন্দন্তি; প্রতিপালয় প্রতীক্ষস্ব॥

২৩—২৯। স্বনিন্দামগণয়ন্তীং ভীষয়মাণঃ শ্রীরুদ্রমনুবর্ণয়তি—এষেতি সপ্তভিঃ। ঘোরাণামেষা বেলা, স্বয়ঞ্চ ঘোরদর্শনা॥ (২৪) ভূতপর্ষদ্ভিঃ ভূতগণৈঃ॥ (২৫) তর্হি তৎসম্মুখত্বমাত্রং বর্জ্জনীয়মিতি চেৎ, তত্রাহ—শ্মশানেতি, শ্মশানে যশ্চক্রানিলঃ বাতমণ্ডলী, তস্মিন্‌ যা ধূলিঃ, তয়া ধূম্রো বিকীর্ণো বিক্ষিপ্তো বিদ্যোতো দ্যুতিমান্‌ জটাকলাপো যস্য, ভস্মনাবগুণ্ঠঃ

প্রাবৃতোঽমলো রুক্মবদ্দেহো যস্য, স দেবস্ত্রিভিঃ সোমার্কাগ্নিনেত্রৈঃ পশ্যতীত্যস্যোত্তরশ্লোকত্রয়েঽপ্যনুষঙ্গঃ। একস্য জামাতরঃ পরস্পরং ভ্রাতরো ব্যবহ্রিয়ন্তে, অতো মম ভ্রাতাসৌ তব দেবর ইতি লজ্জার্থমুক্তম্॥ (২৬) ননু তথাপি মহত্ত্বেনাদরণীয়স্য স্বজনস্য তব স সর্ব্বং ক্ষমেতৈব, তত্রাহ—যস্য স্বজনাদির্নাস্তি, সমত্বাদীশ্বরস্য। ঐশ্বর্য্যমেবাহ—যেন চরণেনাপবিদ্ধাং নির্ম্মাল্যবদ্দূরতস্ত্যক্তাং, তেন ভুক্তভোগামজাং মায়াং তন্ময়ীং বিভূতিং মহাপ্রসাদ ইত্যাশাস্মহে॥ (২৭—২৮) অনিষিদ্ধ-সুখত্যাগাদসৌ পিশাচ ইতি উপহাসো ন কার্য্য ইত্যাহ দ্বাভ্যাম্। যস্য অনবদ্যং বিষয়াসক্তিশূন্যমাচরিতম্; বিভিৎসবঃ ভেত্তুমিচ্ছবঃ॥ (২৮) সমীহিতমভিপ্রেতং লোকশিক্ষারূপম্, অবিদুষঃ অবিদ্বাংসঃ, যদ্বা, ন বিদ্বান্ যস্মাদিতি তস্য, সর্ব্বজ্ঞস্যেত্যর্থঃ। দুর্ভগানেবাহ—যৈরিতি; শ্ব-ভোজনং শুনাং ভোজ্যং শরীরং স্বাত্মতয়া অয়মেবাত্মেতি বুদ্ধ্যা॥ (২৯) অহো অতর্ক্যং তস্যাচরণমিত্যাহ—ব্রহ্মাদয়ো যেন কৃতান্ সেতূন্ স্বস্বাধিকারান্ পালয়ন্তি। যঃ কারণং যস্য, যেন কৃতমিদং বিশ্বম্, মায়া চ যস্যাজ্ঞাকরী, বিভূম্নঃ পরমেশস্য, বিড়ম্বনমতর্ক্যমিত্যর্থঃ॥

৩০। ভর্ত্রা নিরূপকেণ[১] এবং সংবিদিতে জ্ঞাপিতেঽপি সতি, বৃষলীব বেশ্যেব॥

৩১। বিকর্ম্মণি নিষিদ্ধে কর্ম্মণি, দিষ্টায় দৈবরূপায় ঈশ্বরায়, উপ-বিবেশেতি মৈথুনং লক্ষ্যতে॥

৩২। উপস্পৃশ্য স্নাত্বা ভর্গঃ-শব্দবাচ্যং বিরজং জ্যোতির্ধ্যায়ন্ সনাতনং ব্রহ্ম গায়ত্রীং প্রণবং বা জজাপ॥

৩৩। কর্ম্মাবদ্যেন কর্ম্মদোষেণ॥

৩৪। নাবধীৎ মা হন্ত্বিত্যর্থঃ[২]। বধশঙ্কাবীজমাহ—রুদ্র ইতি। অংহস-মংহোঽপরাধমকরবং কৃতবত্যস্মি॥

১। নিষ্কপটেন (ক); ২। ন দহত্বিত্যর্থঃ (ক)।

৩৫। রুৎ দুঃখম্, তৎ দ্রাবয়তীতি রুদ্রস্তস্মৈ, উগ্রায় অনতিলঙ্ঘ্যায়, মীঢ়ুষে সকামেষু ফলসেচনকর্ত্রে, নিষ্কামেষু শিবায়, বস্তুতো ন্যস্তদণ্ডায়, দুষ্টেষু ধৃতদণ্ডায়, সংহারে মন্যবে ॥

৩৬। ভামো ভগিনীপতিঃ; উরুরনুগ্রহো যস্য সঃ; ব্যাধস্য নির্দ্দয়স্যাপি। সতীপতিরিত্যনেন স্ত্রীণাং স্বভাবং স্বয়মপি বেত্তীতি সূচয়তি ॥

৩৭। স্বসর্গস্য স্বসন্তানস্যাশিষং শুভম্, লোক্যাং লোকদ্বয়ার্হাম্। সন্ধ্যায়াং যো নিয়মঃ, স নিবৃত্তো যস্য সঃ ॥

৩৮। তে আত্মনশ্চিত্তস্যাপ্রায়ত্যাদশুচিত্বাৎ; মৌহূর্ত্তিকাদ্ দোষাৎ সন্ধ্যারূপাৎ; উত অপি মম নিদেশস্যাজ্ঞায়া অতিচারেণ অতিক্রমেণ; দেবানাং রুদ্রানুচরাণাম্ ॥

৩৯। এতৈশ্চতুর্ভির্হেতুভিঃ জাঠরাধমৌ পুত্রাপসদৌ; হে চণ্ডি! হে কোপনে ॥

৪০। হন্যমানানাং সতাম্ ॥

৪১। শতপর্ব্বধৃগ্ বজ্রধর ইন্দ্রঃ ॥

৪২। সুনাভেনোদারো বাহুর্যস্য; মহ্যং মম, কোপিতেষ্বিত্যুক্তত্বাৎ শঙ্কিতচিত্তা সতী প্রার্থয়তে—'ব্রাহ্মণাস্মা ভূৎ' ইতি ॥

৪৩। নারকা অপি তথা যাং যাং যোনিমসৌ গতো ভবতি, তত্রস্থাশ্চ নানুগৃহ্নন্তি, কৃপাং ন কুর্ব্বন্তি ॥

৪৪। কৃতো যোঽপরাধস্তেন যঃ শোকঃ, ততোঽনুতাপস্তেন; প্রত্যবমর্ষণাদ্ যুক্তাযুক্তবিচারাৎ; ভগবতি হরৌ, ভবে শ্রীরুদ্রে, এতৈঃ পঞ্চভিঃ কারণৈঃ ॥

৪৫—৫০। পুত্রস্য হিরণ্যকশিপোঃ পুত্রাণাং মধ্যে একঃ সতাং মতো ভবিষ্যতি; তমেব বর্ণয়তি—গাস্যন্তীতি সার্দ্ধৈঃ পঞ্চভিঃ। সমং সহ সদৃশং বা ॥ (৪৬) হীনবর্ণং হেম যথা যোগৈর্দাহাদিভিরুপায়ৈঃ

শোধ্যতে, তথা যস্য শীলং স্বভাবমনুবর্ত্তিতুমনুগন্তুং প্রাপ্তুং নির্ব্বৈরাদিভি-র্যোগৈরাত্মানং ভাবয়িষ্যন্তি শোধয়িষ্যন্তি ॥ (৪৭) বিশ্বপ্রসাদে হেতুঃ—যদাত্মকম্। স্বদৃক্ আত্মসাক্ষী; যস্যানন্যয়া ভগবানেব সত্য ইত্যেবম্ভূতয়া দৃশা তোষ্যতে তোষং প্রাপ্স্যতে॥ (৪৮) তত্র হেতুঃ—স বা ইতি। মহাত্মা অপরিচ্ছিন্নদৃষ্টিঃ, মহানুভাবো মহাপ্রভাবঃ, মহতামপি মধ্যে মহিষ্ঠঃ, অতিশয়েন মহান্; প্রবৃদ্ধয়া ভক্ত্যা অনুভাবিতে সংশোধিতে চিত্তে বৈকুণ্ঠং হরিং নিবেশ্য দেহাদ্যভিমানং ত্যক্ষ্যতি॥ (৪৯) মহাভাগবতত্বমেবাহ—অলম্পট ইতি। শীলধরঃ সুস্বভাবঃ, গুণানাং ধৈর্য্যাদীনামাকরো জন্মভূমিঃ, পরেষাং সমৃদ্ধ্যা হৃষ্টঃ, পরেষু দুঃখিতেষু সৎসু দুঃখিতঃ, ন ভূতো ন জাতঃ শত্রুর্যস্য, নিদাঘভবং তাপং চন্দ্রো যথা হরতি, এবং জগতঃ শোকহর্ত্তা ভবিষ্যতি ॥ (৫০) অপরিচ্ছিন্নদৃষ্টিত্বমাহ—অন্তরিতি। স্বপুরুষাণামিচ্ছয়া পুনঃপুনর্গৃহীতানি রূপাণি যেন, শ্রীরেব ললনা সুন্দরী, তস্যা ললামং মণ্ডনম্, দ্রষ্টা দ্রক্ষ্যতি ॥

৫১। মহামনা মহোৎসাহচিত্তা, হরিণা সহ যুদ্ধেন মরণে পুত্রয়োঃ কীর্ত্তিঃ সদ্গতিশ্চ ভবেদিতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ ॥ ১৪ ॥

পঞ্চদশোঽধ্যায়ঃ

হতপ্রভৈঃ সুরৈঃ পৃষ্টঃ প্রাহ পঞ্চদশে বিধিঃ।
তদ্বীজং বিপ্রশাপাদি বৈকুণ্ঠে বিষ্ণুভৃত্যয়োঃ॥ (১)

১। তদেবং দেবানাং ব্রহ্মণশ্চ সংবাদপ্রস্তাবমুক্ত্বা ইদানীং তং সংবাদং বক্তুমাহ—প্রাজাপত্যং কাশ্যপং তেজো বীর্য্যং পরেষাং তেজো হন্তীতি

তথা ; পুংস্ত্বমার্ষঃ। স্বপুত্রাভ্যাং করিষ্যতে যৎ সুরাণামর্দ্দনং পীড়নম্, তস্মাচ্ছঙ্কমানা ॥

২। তেন গর্ভতেজসা, আহতালোকে নিরস্তসূর্য্যাদিপ্রকাশে, হতৌজসো হতপ্রভাবাঃ ; ধ্বান্তেন ব্যতিকরং সঙ্করম্ ॥

৩। বেত্থ জানাসি বিচারয়সি, যদ্‌যতো বয়ং সংবিগ্না জাতা ভীতাঃ ; অব্যক্তমজ্ঞাতম্, ন স্পৃষ্টং বর্ত্ম জ্ঞানপ্রচারো যস্য ॥

৪—১০। ব্রহ্মাণং পরমেশ্বরত্বেন স্তুবন্তঃ প্রার্থয়ন্তে—দেবদেবেতি সপ্তভিঃ। লোকনাথানাং[১] শিখামণে ! ভাববিদভিপ্রায়জ্ঞোঽসি—কেনাভিপ্রায়েণ দিতের্গর্ভো বর্দ্ধত ইতি জানাসীত্যর্থঃ ॥ (৫) বিজ্ঞানং বীর্য্যং বলং যস্য ; ইদং ব্রহ্মদেহমুপেয়ুষে প্রাপ্তবতে ; গৃহীতো গুণভেদো রজোগুণো যেন ; ব্যক্তস্য প্রপঞ্চস্য যোনয়ে কারণায়, ন ব্যক্তা কেনাপি প্রমাণেন বিজ্ঞাতা যোনির্যস্যেতি বা ॥ (৬—৭) সকামতয়া প্রতিক্ষণং দুঃখমনুভবন্তো নিষ্কামভক্তান্ স্তুবন্ত আহুর্দ্বাভ্যাম্—যে ত্বা ত্বামনন্যেন নিষ্কামেণ ভাবেন ভক্ত্যা[২] ধ্যায়ন্তি, আত্মনো জীবান্ ভাবয়তীতি তথা, স্বস্মিন্ প্রোতানি প্রথিতানি ভুবনানি যেন, চেতনাচেতনপ্রপঞ্চকারণমিত্যর্থঃ। তত্র হেতুঃ—সদসদাত্মকং কার্য্যকারণরূপম, বস্তুতস্তাভ্যাং পরম্ ॥ (৭) জিতঃ শ্বাস ইন্দ্রিয়াণি আত্মা মনশ্চ যৈঃ, অতঃ সুপক্বযোগানাম্, অতএব প্রাপ্তো যুষ্মৎপ্রসাদো যৈস্তেষাম্ ॥ (৮) অন্যে তু নিত্যং কর্ম্মক্লেশিন ইত্যাহুঃ—যস্যেতি। তন্ত্যা দামন্যা, আয়ত্তা অধীনাঃ, মুখ্যায় নিয়ন্ত্রে, প্রাণরূপায় ইতি বা ; তথা চ শ্রুতিঃ—'যস্য[৩] বাক্ তন্তির্নামানি দামানি' ইত্যাদি ॥ (৯) তমসা অহোরাত্রবিভাগাভাবেন লুপ্তানি কর্ম্মাণি যেষাম্, আপন্নান্ আপদ্গতানস্মান্ ॥ (১০) আপৎ-

১। লোকপালানাং (ক) ; ২। ভক্তা (ক) ; ৩। তস্য (ঘ)।

কারণমাহুঃ—এষ গর্ভঃ; তস্ত বিশেষণম্—অর্পিতং নিক্ষিপ্তং কাশ্যপমোজো বীর্য্যম্, দিশস্তিমিরয়ন্ তমোব্যাপ্তাঃ কুর্ব্বন্॥

১১। দিতেঃ কুচেষ্টিতং জ্ঞাত্বা প্রহস্য দেবানাং যে শব্দা বিজ্ঞপ্তিবাক্যানি, তেষাং গোচরো বিষয়ভূতঃ প্রত্যভাসত॥

১২। যুষ্মৎসকাশাৎ পূর্ব্বং জাতাঃ॥

১৩। বৈকুণ্ঠাখ্যং লোকং যযুঃ॥

১৪—২৫। তং বর্ণয়তি—বসন্তীত্যাদিদ্বাদশভিঃ। বৈকুণ্ঠস্য হরেরিব মূর্ত্তির্যেষাং তে; নিমিত্তং ফলম্, ন নিমিত্তং প্রবর্ত্তকং যস্মিন্, নিষ্কামেণ ধর্ম্মেণেত্যর্থঃ; আরাধয়ন্ আরাধিতবন্তঃ॥ (১৫) শব্দগোচরো বেদান্তৈকবেদ্যো বিরজং সত্ত্বং মূর্ত্তিং বিষ্টভ্য ধৃত্বা, বৃষো ধর্ম্মমূর্ত্তিঃ, স্বানাং স্বান্॥ (১৬—১৯) তত্রত্যং বনং বিশিনষ্টি—যত্রেতি চতুর্ভিঃ। সর্ব্বেষ্বপি ঋতুষু শ্রীঃ পুষ্পাদিসম্পদ্যেষাং তৈঃ॥ (১৭) চরিতানি চরিত্রাণি, ভর্ত্তুঃ প্রভোঃ, অনুবিকসন্ত্যো মধু মকরন্দস্তদ্যুক্তা মাধব্যো বাসন্ত্যো লতাঃ, যদ্বা, অনুবিকসন্মধবঃ প্রসরন্মকরন্দা মাধব্যো মধুকালীনাঃ সুমনসঃ, তাসাং গন্ধেন খণ্ডিতা বিঘ্নিতং ধীর্যেষাম্, তেঽপি তদ্গন্ধপ্রাপকমনিলং ক্ষিপন্তস্তং তিরস্কুর্ব্বন্তো গায়ন্তি। অনেন ভগবৎপার্ষদানাং নিরতিশয়বিষয়সুখেঽপি ভগবদ্ভজনানন্দাসক্তির্দর্শিতা॥ (১৮) অন্যভৃতাঃ কোকিলাঃ, দাত্যূহাশ্চাতকাঃ, অচিরমাত্রং ক্ষণমাত্রং বিরমতি, অনেন তত্রত্যপক্ষিণামপি হরিকথাশ্রবণাদিপরমানন্দো দর্শিতঃ॥ (১৯) মন্দারপারিজাতৌ সুরতরুবিশেষৌ, কুরবঃ তিলকবৃক্ষঃ, উৎপলং রাত্রিবিকাসি, অম্বুজং দিনবিকাসি; নাগো নাগকেশরঃ, এতাঃ সুমনসঃ পুষ্পজাতয়ঃ সুগন্ধয়োঽপি তুলসিকাভরণেন শ্রীহরিণা তুলস্যা গন্ধেঽর্চ্চিতে সতি যস্মিন্ বনে তুলস্যাস্তপো বহু মানয়ন্তি। অনেন তত্রত্যা গুণগ্রাহিণ এব, ন মৎসরিণ ইত্যুক্তম্। এবম্ভূতং বনং যত্র, তদ্বৈকুণ্ঠং যযুরিতি পূর্ব্বেণৈবান্বয়ঃ॥ (২০) পুনর্বৈকুণ্ঠমেব বিশিনষ্টি

—তৎ সঙ্কুলং ব্যাপ্তং ভবতি। কৈঃ ? হরিপদয়োরানতিঃ প্রণামস্তাবন্মাত্রেণ দৃষ্টৈর্ভক্তানাং বিমানৈঃ, ন কর্ম্মাদিপ্রাপ্যৈঃ। বৈদূর্য্যমারকতৈর্হৈমময়ৈশ্চ বিমানৈঃ। বৃহন্তি কটিতটানি যাসাম্, স্মিতশোভীনি মুখানি যাসাম্, তা অপি, কৃষ্ণে আত্মা যেষাম্, রজঃ কামমুৎস্ময়াদ্যৈঃ পরিহাসাদিভির্ন আদধুঃ, ন জনয়ামাসুঃ॥ (২১) শ্রীর্লক্ষ্মীঃ রূপিণী মনোহরমূর্ত্তিধারিণী সতী শ্রীহরেঃ সদ্মনি সম্মার্জ্জনং কুর্ব্বতীব যস্মিন্ লোকে সংলক্ষ্যতে। চরণারবিন্দং ক্বণয়তী নূপুরেণ শব্দয়ন্তী। মুক্তো দোষশ্চাপল্যং যয়া, যদ্বা, মুক্তেন দোষা প্রসারিতেন বাহুনা। কীদৃশে সদ্মনি ? স্ফটিকময়ানি কুড্যানি যস্মিন্, মধ্যে মধ্যে চ শোভার্থমুপেতং সংযুক্তং হেম যস্মিন্; যস্যা অনুগ্রহেণ শ্রীরনুগ্রহং করোত্বিত্যেতদর্থমন্যেষাং ব্রহ্মাদীনাং যত্নঃ, সা। অয়ং ভাবঃ—যদ্যপি তত্র মার্জ্জনায় রজো নাস্ত্যেব, তথাপি স্বর্ণ-পট্টিকাবচ্ছিন্নভিত্তিভাগেষু বহুধা প্রতিবিম্বিতা সতী, লীলাম্বুজং ভ্রাময়ন্তী বিনয়ভক্তিভ্যাং তথা লক্ষ্যত ইতি॥ (২২) অঙ্গ ! হে দেবাঃ ! যদ্ যস্মিন্ লোকে; শ্রীরেবমমত অমংস্ত মেনে। কিং কুর্ব্বতী ? বিক্রম-ময়ানি তটানি যাসাম্, অমলা অমৃততুল্যা আপো যাসাম্, তাসু বাপীষু, নিজবনে লক্ষ্মীবনে পরিচারিকাভিরন্বিতা, তুলসীভিঃ শ্রীবিষ্ণুং পূজয়ন্তী। তদা উদকে প্রতিবিম্বিতং শোভনালকযুক্তমুৎকৃষ্টনাসিকঞ্চ স্ববক্ত্রং বীক্ষ্য ভগবতা উচ্ছেষিতং চুম্বিতমিত্যমন্যত। অনেন লক্ষ্ম্যা অপি সৌভাগ্যসুখং ভগবদনুগ্রহেণৈবেতি দ্যোতিতম্॥ (২৩) পুনঃ কথম্ভূতং তৎ ? যদ্বৈকুণ্ঠং ন ব্রজন্তি। কে ? যে কুকথাঃ শৃণ্বন্তি। কাস্তাঃ ? অঘং ভিনত্তীত্যঘভিৎ, তস্য হরেঃ রচনা সৃষ্ট্যাদিলীলা, তস্যা অনুবাদাদন্যবিষয়া অর্থকামাদিবার্ত্তা মতিভ্রংশিকাঃ। তেষামব্রজনে হেতুঃ—যাস্তু হতভাগ্যৈ-র্নরৈঃ শ্রুতাঃ সত্যঃ তাংস্তান্ শ্রোতৃন্ অশরণেষু নিরাশ্রয়েষু তমঃসু নরকেষু ক্ষিপন্তি। হন্তেতি খেদে। কথম্ভূতাঃ ? আত্তঃ সারঃ শ্রোতৄণাং পুণ্যং

যাভিস্তাঃ ॥ (২৪) প্রসঙ্গাৎ তাননুশোচন্তি—নোঽস্মাভির্ব্রহ্মাদিভির-ভ্যর্থিতাং নৃগতিং মনুষ্যজাতিং প্রপন্নাঃ প্রাপ্তাঃ সন্তোঽপি হরেরারাধনং ন কুর্ব্বন্তি। কীদৃশীং নৃগতিম্? যত্র যস্যাং ধর্ম্মসহিতং তত্ত্বজ্ঞানং ভবতি, তদুভয়সাধকত্বাত্তস্যাঃ। তেঽমুষ্য ভগবতো বিস্তৃতয়া মায়য়া সম্মোহিতাঃ। বতেতি খেদে। যদি বা এবং সম্বন্ধঃ—কেবলং ত এব ন ব্রজন্তি, কিন্তু যে ভগবদারাধনং ন কুর্ব্বন্তি, তেঽপি, তেষাং মায়াবিমোহিতত্বাদিতি ॥ (২৫) পুনঃ কথম্ভূতম্? যচ্চ নঃ উপরিস্থিতং ব্রজন্তি। কে? অনিমিষাং দেবানামৃষভঃ শ্রেষ্ঠো হরিস্তস্যানুবৃত্ত্যা দূরে যমো যেষাম্, যদ্বা, দূরী-কৃতযমনিয়মাঃ; দূরেঽহমা ইতি পাঠে দূরীকৃতাহঙ্কারা ইত্যর্থঃ। স্পৃহণীয়ং করুণাদি শীলং যেষাম্, কিঞ্চ, ভর্ত্তুর্হরের্যৎ সুযশস্তস্য মিথঃকথনে যোঽনু-রাগস্তেন বৈক্লব্যং বৈবশ্যং, তেন বাষ্পকলা, তয়া সহ পুলকীকৃতমঙ্গং যেষাম্; যদ্বা, নঃ উপরীতি ব্রজতাং বিশেষণম্, নিরহঙ্কারত্বাৎ অস্মত্তোঽপি যেঽধিকাস্তে যদ্‌ব্রজন্তীত্যর্থঃ ॥ (২৬) তত্তদা তদপূর্ব্বং বিকুণ্ঠম্। অথোঽনন্তরমুপেত্য মুনয়ঃ পরামুৎকৃষ্টাং মুদমাপুঃ। অপূর্ব্বত্বে হেতবঃ—বিশ্বগুরুণা হরিণা অধিকৃতমধিষ্ঠিতম্; ভুবনানামেকমেব বন্দ্যম্; দিব্যমলৌকিকম্; বিচিত্রাণি বিবুধাগ্র্যাণাং বিমানানি, তেষাং শোচি-র্দীপ্তির্যস্মিন্। যোগমায়াবলেনেতি অষ্টাঙ্গযোগপ্রভাবেণোপেত্য পরমেশ্বরে তু যোগমায়েতি চিচ্ছক্তিবিলাস ইতি দ্রষ্টব্যম্ ॥ (২৭) তস্মিন্ বৈকুণ্ঠে ষট্ কক্ষাঃ প্রাকারদ্বারাণি, অসজ্জমানা ভগবদ্দর্শনোৎকণ্ঠয়া তত্তদদ্ভুতদর্শনে আসক্তিমকুর্ব্বাণাঃ, দ্বারপালৌ দেবাবপশ্যন্। সমানং বয়ো যয়োঃ, গৃহীতে গদে যাভ্যাম্, পরার্দ্ধ্যৈঃ কেয়ূরাদিভির্বিটঙ্কৈঃ সুন্দরো বেশো যয়োঃ ॥ (২৮) তাবেব বর্ণয়তি—মত্তা দ্বিরেফা ভ্রমরা যস্যাং তয়া বনমালয়া নিবীতৌ কণ্ঠলম্বিন্যা অলঙ্কৃতৌ; অসিতা নীলাঃ, চতুষ্টয়ে চতুঃ-সংখ্যাকা বাহবস্তেষাং মধ্যে বিন্যস্তয়া; বক্ত্রঞ্চ মনাগ্রভসং কিঞ্চিৎ

ক্ষুব্ধং দধানৌ; স্ফুটৌ উৎফুল্লৌ নির্গমৌ শ্বাসমার্গৌ নাসাপুটে, তাভ্যাম্ ॥

২৯। এতয়োর্মিষতোঃ পশ্যতোঃ, তাবনাদৃত্য অপৃষ্ট্বৈব, যাঃ পূর্ব্বাঃ ষট্ দ্বারঃ, পুরটালঙ্কৃতবজ্রময্যঃ কবাটিকা যাসু, তা যথা বিবিশুস্তথা সপ্তম্যামপি দ্বারি বিবিশুঃ। অপ্রশ্নে হেতুঃ—সর্ব্বত্র যেঽবিহতা অনিবারিতাঃ সঞ্চরন্তি ; নিঃশঙ্কত্বে হেতুঃ—অবিষময়া স্বদৃষ্ট্যেতি ॥

৩০। বাতবসনান্ নগ্নান্ বৃদ্ধানপি পঞ্চবর্ষবালকবৎ প্রতীয়মানান, চকারাদাজ্ঞয়া চ, অস্খলয়তাং নিবারিতবন্তৌ। ন তৎ স্খলনমর্হন্তীতি তথা তান্। অহো অত্রাপি ধার্ষ্ট্যমিত্যেবং তেষাং তেজো বিহস্য ভগবতো ব্রহ্মণ্যদেবস্য প্রতিকূলং শীলং যয়োঃ ॥

৩১। হরের্দ্বারপালপতিভ্যাং দেবেষু পশ্যৎসু বার্য্যমাণাস্তে মুনয়ঃ 'কো বাম্' ইত্যাদিশ্লোকত্রয়ীমূচুঃ। সুহৃত্তমঃ শ্রীহরিঃ, তস্য দিদৃক্ষিতং দর্শনেচ্ছা, তস্য ভঙ্গে সতি ; কামস্যানুজঃ ক্রোধস্তেন, সহসা অকস্মাদেব উপপ্লুতানি ক্ষুভিতানি অক্ষীণি যেষাং তে। সুষ্ঠু পূজ্যতমা অপীতি নিষেধানর্হত্বে ক্রোধানর্হত্বে বা হেতুঃ ॥

৩২—৩৪। উচ্চৈর্মহত্যা ভগবৎপরিচর্য্যয়া এত্য প্রাপ্য ইহ বৈকুণ্ঠে নিবসতাং তদ্ধর্ম্মিণাং ভগবদ্ধর্ম্মিণাং সমদর্শিনাং মধ্যে বাং যুবয়োরেব কোঽয়ং বিষমঃ স্বভাবঃ ? কৈশ্চিৎ প্রবেষ্টব্যং কৈশ্চিন্নেত্যেবম্ভূতঃ। ননু স্বামিরক্ষার্থং দ্বারপালয়োরেষ স্বভাবো গুণ এব ইতি চেদত আহুঃ—তস্মিন্নিতি। কুহকয়োঃ কপটয়োঃ, আত্মবৎ স্বদৃষ্টান্তেন, যথা আবাং কপটৌ, তথান্যোঽপি কশ্চিৎ কপটঃ প্রবেক্ষ্যতীতি। অয়ং ভাবঃ—ন হ্যত্র ভগবদ্‌ভক্তং বিনা কশ্চিদাগচ্ছতি, ন চেশ্বরে প্রশান্তত্বাদবিদ্যমানবিরোধে ভয়শঙ্কা, অতো যুবাং কেবলং ধূর্ত্তাবেবেতি ॥ (৩৩) ভয়শঙ্কাবীজঞ্চ ভেদঃ, স চ কস্যাপ্যস্মিন্ নাস্তীত্যাহুঃ—ন হীতি। সমস্তং বিশ্বং কুক্ষৌ যস্য, যত্র যদা

ইহ ভগবতি ধীরা বিদ্বাংস আত্মনোঽন্তরং ভেদং ন পশ্যন্তি, কিন্ত্বস্মিন্ পরমাত্মন্যাত্মানমন্তর্ভূতং পশ্যন্তি, মহাকাশে ঘটাকাশমিব, তদা, যথান্যস্য রাজাদেরুদরভেদি উদরভেদযুক্তং ভয়ং ভবতি, তথাস্য শ্রীহরেস্তাদৃগ্-ভয়ম্, যতো যেন কারণেন সুরবেশধারিণোর্যুবয়োর্বিশেষেণোৎপাদিতম্। তৎ কিম্? ন কিঞ্চিদিত্যর্থঃ॥ (৩৪) তত্তস্মাদমুষ্য বৈকুণ্ঠনাথস্য ভৃত্যাভ্যাং বাং যুবাভ্যাং প্রকৃষ্টং ভদ্রমেব কর্ত্তুমিহাস্মিন্নপরাধে যদ্যুক্তং, তদ্ধীমহি চিন্তয়েম। তদেবাহুঃ—অন্তরস্য ভেদস্য ভাবঃ সত্ত্বা, তদ্দর্শনেন, ইতো বৈকুণ্ঠলোকাৎ লোকান্ দেহান্ ব্রজতম্। যত্র যেষু লোকেষু অস্য পাপীয়সোঽন্তরভাবদ্রষ্টুঃ ইমে 'কামঃ ক্রোধস্তথা লোভঃ' ইতি গীতোক্তাস্ত্রয়ো রিপবো ভবন্তি; পাপীয়সো লোকানিতি বা॥

৩৫। ইতি তেষামীরিতং ভাষণং ঘোরমবধার্য্য, তঞ্চ ব্রহ্মদণ্ডং ব্রহ্মশাপমবধার্য্য, তঞ্চাস্ত্রসমূহৈরনিবারণমবধার্য্য, হরেরনুচরৌ অতিকাতরেণ অতিকাতর্য্যেণ ভয়েন তৎপাদগ্রহং কুর্ব্বন্তৌ সন্তৌ দণ্ডবদপততাম্। কথম্ভূতস্য হরেঃ? এবম্ভূতেভ্যো মুনিভ্যস্তাভ্যামপি উরু অধিকং বিভ্যতো ভয়ং ভাবয়তঃ॥

৩৬। অহো অপরাদ্ধমস্মাভিরিত্যনুতপ্যমানান্ প্রত্যূচতুঃ। অঘোনি অঘবতি য উচিতো দণ্ডঃ, স এব ভগবদ্ভিরকারি। নাত্র ভবতামপরাধঃ কশ্চিদতোঽসৌ নৌ আবয়োর্ভূয়াৎ। যঃ অশেষমপি সুরহেলনমীশ্বরাজ্ঞাতিক্রমরূপং পাপং হরেৎ, কিন্তু যুষ্মাকং যঃ কৃপানিমিত্তোঽনুতাপঃ, তস্য লেশেন নৌ আবয়োঃ অধোঽধো মূঢ়যোনীর্ব্রজতোরপি ভগবৎস্মৃতিপ্রতিঘাতকো মোহো মা ভবেৎ, কিন্তু মোহোঽপি ভগবৎস্মৃতিমেব প্রবহতাদিতি প্রার্থনা॥

৩৭। এবং স্বানাং সৎসু মহৎস্বতিক্রমমপরাধং তৎক্ষণমেব বিবুধ্য, তস্মিন্ যত্র তে রুদ্ধাস্তং দেশং যযৌ। আর্য্যাণাং হৃদ্যঃ মনোজ্ঞঃ; চরণৌ

চলয়ন্নিত্যয়ং ভাবঃ—মচ্চরণদর্শনপ্রতিঘাতজং ক্রোধং তৌ দর্শয়ন্ শময়িষ্যামীতি ত্বরাব্যাজেন পদ্ভ্যামেব যযৌ, শ্রীসাহিত্যঞ্চ নিষ্কামানপি বিভূতিভিঃ পূরয়িত্বা ক্ষমাপয়িতুম্ ॥

৩৮—৪২। তত্র তৈর্দৃষ্টং দেবমনুবর্ণয়তি পঞ্চভিঃ। তন্তু আগতং তে অচক্ষত অপশ্যন্। আ পঞ্চমাদিদমেব ক্রিয়াপদম্। স্বপূত্তিঃ শীঘ্রং প্রতিহৃতানীতমৌপয়িকং গমনোচিতং ছত্রপাদুকাদি যস্য। কথম্ভূতম্? স্বসমাধিনা ভাগ্যং ভজনীয়ং ফলং যদ্ব্রহ্ম, তদেবাক্ষবিষয়ম্। হংসবৎ শ্রীর্যয়োস্তয়োরুভয়তশ্চলতোর্ব্যজনয়োর্যঃ শিবোঽনুকূলো বায়ুস্তেন লোলন্তশ্চলন্তঃ শুভ্রাতপত্রশশিকেশরাঃ শুভ্রং যদাতপত্রং তদেব শশিসাদৃশ্যাচ্ছশী, তস্য কেশরা মুক্তাহারবিলম্বাস্তেভ্যো গলন্তি শীকরাম্বূনি যস্মিন্ তস্য; শীকরোঽম্বুকণা ॥ (৩৯) কৃৎস্নস্য দ্বারপালমুনিবৃন্দস্য প্রসাদে সুমুখম্; স্পৃহণীয়ানাং গুণানাং ধাম স্থানম্, স্নেহাবলোকানাং কলয়া সপ্রেমকটাক্ষেণ হৃদি সংস্পৃশন্তং সুখয়ন্তম্, ত্রৈলোক্যবিবক্ষাপক্ষে সত্যলোকপর্য্যন্তঃ স্বঃ স্বর্গঃ, তস্য চূড়ামণিবৎ স্থিতং স্বধিষ্ণ্যং বৈকুণ্ঠং সুভগয়ন্তং শোভয়ন্তম্ ॥ (৪০) পৃথুনিতম্ব আশ্রয়ত্বেন বিস্তৃতে যস্য তস্মিন্ পীতাংশুকে, অলিভির্নাদিতয়া বনমালয়া চ যুক্তম্। সুভগয়ন্তমিতি পূর্ব্বেণৈব বা সম্বন্ধঃ। বল্গুষু প্রকোষ্ঠেষু বলয়ানি যস্য; গরুড়স্য স্কন্ধে বিন্যস্ত একো হস্তো যেন, ইতরেণান্যেনাব্জং ধুনানং লীলাকমলং ভ্রাময়ন্তম্; বিন্যস্তেতি পাঠে বল্গ্বাদিহস্তস্য বিশেষণম্ ॥ (৪১) স্বকান্ত্যা বিদ্যুতঃ ক্ষিপন্তী যে মকরাকারে কুণ্ডলে, তয়োর্মণ্ডনস্যার্হে গণ্ডস্থলে যস্মিন্ তচ্চ তদুন্নসঞ্চ মুখং যস্য, মণিযুক্তং কিরীটং যস্য, দোর্দ্দণ্ডানাং ষণ্ডঃ সমূহস্তস্য বিবরে মধ্যে বক্ষঃস্থলে স্থিতেন হরতা মনোহরেণ বিহরতেতি বা। পরার্দ্ধ্য উৎকৃষ্টস্তেন হারেণ, কন্ধরায়াং স্থিতেন ॥ (৪২) কিং বহুনা সৌন্দর্য্যবর্ণনেন, ইন্দিরায়া যদুৎস্মিতম্ 'অহমেব সর্ব্বসৌন্দর্য্যনিধিঃ' ইত্যহঙ্করণম্, তত্র ভগবৎসৌন্দর্য্যে উপসৃষ্ট-

মস্তং গতমিতি[১] স্বানাং ভক্তানাং ধিয়া বিরচিতং ভৃত্যৈঃ স্বমনস্যেবং বিতর্কিতমিত্যর্থঃ। কুতঃ? বহুনা সৌষ্ঠবেন সৌন্দর্য্যেণাঢ্যং যুক্তম্, কিঞ্চ, মহ্যং মম ভবস্য ঈশ্বরস্য ভবতাঞ্চ কৃতেঽঙ্গং ভজন্তং মূর্ত্তিং প্রকটয়ন্তমচক্ষত; নিরীক্ষ্য চ কৈঃ শিরোভিমূর্দ্ধা নেমুর্নমশ্চক্রুঃ; ন বিশেষেণ তৃপ্তা দৃশো নেত্রাণি যেষাং তে॥

৪৩। স্বরূপানন্দাদপি তেষাং ভজনানন্দাধিক্যমাহ—তস্য পদারবিন্দয়োঃ কিঞ্জল্কৈঃ কেশরৈর্মিশ্রা যা তুলসী, তস্যা মকরন্দেন যুক্তো বায়ুঃ, স্ববিবরেণ নাসাচ্ছিদ্রেণাক্ষরজুষাং ব্রহ্মানন্দসেবিনামপি সংক্ষোভং চিত্তেঽতিহর্ষং, তনৌ রোমাঞ্চম্॥

৪৪—৪৫। হর্ষকারিতং সম্ভ্রমমাহ দ্বাভ্যাম্। তে বৈ কিল বদনমেবাসিতপদ্মস্য কোশঃ অন্তর্ভাগস্তম্; অসিতপদ্মকোশমিত্যভূতোপমা। সুন্দরতরে অরুণে অধরৌষ্ঠে কুন্দবদ্‌হাসো যস্মিন্ তম্; উৎ ঊর্দ্ধং বীক্ষ্য লব্ধমনোরথাঃ সন্তঃ, নখা এবারুণমণয়স্তেষাং শ্রয়ণমাশ্রয়ভূতমঙ্ঘ্রিদ্বন্দ্বং পুনরবেক্ষ্য অধোদৃষ্ট্যা বীক্ষ্য পুনঃপুনরেবং বীক্ষ্য, যুগপৎ সর্ব্বাঙ্গলাবণ্যগ্রহণাশক্তেঃ পশ্চান্নিদধ্যুর্ধ্যাতবন্তঃ॥ (৪৫) যোগমার্গৈর্গতিং মৃগয়তাং পুংসাম্; ধ্যানস্য বিষয়ভূতম্, বহুমতমত্যাদরাস্পদং বহূনাং তত্ত্বদৃশাং সম্মতমিতি বা; পৌংস্নং পৌরুষং বপুর্দর্শয়ন্তম্, অন্যৈস্বসিদ্ধৈরসাধারণৈরোৎপত্তিকৈর্নিত্যৈরণিমাদ্যষ্টৈশ্বর্য্যৈর্যুতম্; সমগৃণন্ সম্যগস্তবন্॥

৪৬। নিত্যং ব্রহ্মরূপেণ প্রকাশসে, ন তচ্চিত্রম্; ইদানীন্তু পরমঙ্গলবিশুদ্ধসত্ত্বমূর্ত্ত্যা প্রত্যক্ষোঽসি; অহো ভাগ্যমস্মাকমিত্যাহুঃ—হে অনন্ত! যস্ত্বং হৃদ্গতোঽপি দুরাত্মনামন্তর্হিতো ন স্ফুরসি, স নোঽস্মাকমন্তর্হিতো ন স্ফুরসি, স নোঽস্মাকমন্তর্হিতো ন ভবসি; নয়নমূলং ত্বত্তৈব রাদ্ধঃ প্রাপ্তোঽসি। অন্তর্দ্ধানাভাবে হেতুঃ—ভবতঃ সকাশাদুদ্ভবো

১। গতমিব (খ)।

যস্ত, তেনাস্মৎপিত্রা, যর্হি যদৈবানুবর্ণিতরহা উপদিষ্টরহস্তঃ, তদৈব নঃ কর্ণমার্গেণ গুহাং বুদ্ধিং গতঃ প্রাপ্তোঽসীতি ॥

৪৭। নন্নু পিত্রোপদিষ্টং ভবতামদৃশ্য[১]মাত্মতত্ত্বম্, অহন্তস্ত এব স্থাম্, দৃশ্যত্বাৎ ? নৈবম্ ; অস্মৎপ্রত্যভিজ্ঞয়া ভেদনিরাসাদিত্যাহুঃ—তমিতি। হে ভগবন্! আত্মতত্ত্বমেব পরং তত্ত্বং ত্বাং বিদাম বিদ্মঃ প্রত্যভিজানীমঃ। নন্নু নিরুপাধেরাত্মতত্ত্বস্ত কথমীদৃশমৈশ্বর্য্যং স্থাদত আহুঃ—সত্ত্বেন বিশুদ্ধসত্ত্ব-শ্রীমূর্ত্ত্যা এষাং ভক্তানাং সম্যক্ প্রতিক্ষণং যা রতিঃ প্রীতিস্তাং রচয়ন্তম্। আত্মতত্ত্বমেবাহুঃ—তেঽনুতাপঃ কৃপা, তেন বিদিতৈস্তত্তত্তৈদৃ ঢৈর্ভক্তি-যোগৈঃ শ্রবণাদিভিমু নয়ো হৃদি যদ্বিদুঃ। কীদৃশাঃ? উদ্‌গ্রন্থয়ো নিরহঙ্কারাঃ, অতএব বিগতরাগাঃ ॥

৪৮। স্বয়মপি ভক্তিং প্রার্থয়িতুং ভক্তানাং সুখাতিশয়মাহুঃ—আত্যন্তিকং মোক্ষাখ্যমপি তব প্রসাদং তে ন বিগণয়ন্তি নাদ্রিয়ন্তে, কিমু কিমুত অন্যদিন্দ্রাদিপদম্। তে ভ্রুব উন্নয়ৈরুজ্জ্বৃম্ভৈরর্পিতং নিহিতং ভয়ং যস্মিন্ তৎ। তে কে? অঙ্গ! হে ভগবন্! যে ভবতঃ কথায়া রসজ্ঞাঃ। কথম্ভূতস্ত ? রমণীয়ত্বেন চ পাবনত্বেন চ কীর্ত্তন্যং কীর্ত্তনার্হং তীর্থঞ্চ যশো যস্ত, তস্ত ॥

৪৯। ইদানীং স্বাপরাধং দ্যোতয়ন্তো ভক্তিং প্রার্থয়ন্তে—কামমিতি। হে ভগবন্! ইতঃ পূর্ব্বমস্মাকং বৃজিনং নাভবৎ, ইদানীন্ত সর্ব্বাণ্যপি জাতানি, যতস্ত্বদ্ভক্তৌ শপ্তৌ, অতস্তৈঃ স্ববৃজিনৈর্নিরয়েষু কামং নোঽস্মাকং ভবো জন্ম স্তাৎ স্থাৎ। নু বিতর্কে। যদি তু নশ্চেতস্তে পদয়ো রমেত, অলির্যথা কণ্টকৈরাবিধ্যমানোঽপি পুষ্পেষু রমতে, তদ্বদ্বিঘ্নমবিগণয্য যদি রমেত, তর্হি। অজ্ঘ্রিভ্যাং শোভা যাসাম্ ; যথা চ তুলসী স্বগুণৈনরপেক্ষ্যেণ ত্বদজ্ঘ্রি-সম্বন্ধেনৈব শোভতে, তথা যদি নো বাচঃ শোভেরন্ ; যদি চ তে

১। ভবতামন্যাদৃশ- (ঘ)

গুণ-গণৈঃ পূর্য্যেত। কর্ণরন্ধ্র ইত্যল্পস্ত পূরণমিব যাচকরীত্যা প্রার্থয়ন্তে। অয়ন্ত গূঢ়োঽভিপ্রায়ঃ—কর্ণরন্ধ্রস্তাকাশত্বাদ্‌গুণগণানাঞ্চামূর্ত্তত্বান্ন কদাচিৎ পূরণম্‌, অতো নিত্যমেব শ্রবণং ফলিষ্যতীতি॥

৫০। অস্ত বয়ং কৃতার্থাঃ স্ম ইত্যাহুঃ—হে পুরুহূত! বিপুলকীর্ত্তে! যদিদং রূপং প্রাদুশ্চকর্থ প্রকটিতবানসি। দৃশো নেত্রাণি, অনাত্মনামজিতেন্দ্রিয়াণাং ত্বরুদয়োঽপ্রকটোঽপি, ইৎ ইত্থম্‌, যঃ প্রতীতোঽসি, তস্মৈ তুভ্যমিদং নমো বিধেম॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং তৃতীয়স্কন্ধে

পঞ্চদশোঽধ্যায়ঃ॥ ১৫॥

ষোড়শোঽধ্যায়ঃ

হরিণা সাত্ত্বিতৈর্বিপ্রৈরনুতপ্তৈস্ত ষোড়শে।

তয়োরসুরভাবেঽপি কৃতোঽনুগ্রহ ঈর্য্যতে॥ (১)

২—১২। ইতি গৃণতাং তেষাং তদ্বাক্যং প্রতিনন্দ্যেদং জগাদ—এতাবিত্যেকাদশভিঃ। যদস্মান্মাং কদর্থীকৃত্য তুচ্ছীকৃত্য বহু যথা ভবতি, তথাতিক্রমং বঃ কৃতবন্তৌ অক্রান্তাম্‌॥ (৩) তস্মাৎ স এব দণ্ডোঽঙ্গীকৃতঃ॥ (৪) হি যস্মাদ্‌ব্রহ্ম ব্রাহ্মণ এব মে পরং দৈবং দৈবতং, তৎ তস্মাৎ অস্ত বঃ প্রসাদয়ামি। তব কোঽপরাধ ইতি চেত্তত্রাহ—তদ্ধীতি। মদীয়ৈঃ পুম্ভিরসৎকৃতাস্তিরস্কৃতা ইতি যৎ, তদাত্মকৃতমেব মন্যে॥ (৫) কিঞ্চ, মমৈবৈতাভ্যামনিষ্টং কৃতমিত্যাহ—যস্ত স্বামিনো নামানি, তস্ত কীর্ত্তিম্‌। আময়োঽত্র শ্বেতকুষ্ঠম্‌॥ (৬) যস্ত মেঽমৃতরূপেঽমলে যশসি শ্রবণেনাবগাহঃ প্রবেশঃ শ্বপচমভিব্যাপ্য জগৎ সন্তস্তৎক্ষণমেব পুনাতি, সোঽহং বিকুণ্ঠঃ, ভবদ্ভ্যো হেতুভূতেভ্য উপলব্ধা প্রাপ্তা সুশোভনা তীর্থ-

ভূতা কীর্ত্তির্যেন সঃ। স্ববাহুস্থানীয়ং লোকেশ্বরমপি হন্যাং, কান্যস্য বার্ত্তে-ত্যর্থঃ; স্বগুণানুবর্ণনন্তু ব্রাহ্মণোৎকর্ষার্থমেব॥ (৭) চরণপদ্ময়োঃ স্থিতঃ পবিত্রো রেণুর্যস্য, অতএব ক্ষতো নিরস্তোঽখিলস্য লোকস্য মলো যেন; যদ্বা, চরণপদ্মাল্লগ্নঃ পবিত্রো রেণুর্যস্মিন্নিতি; ক্ষতোঽখিলো মলো যস্যেতি চ বিগ্রহঃ। প্রতিলব্ধং প্রাপ্তং শীলং যেন, যেষাং সেবয়া এতে গুণা মম, অতএব শ্রীর্মাং ন বিজহাতি। প্রেক্ষালবার্থমবলোকন-লেশার্থম্, ইতরে ব্রহ্মাদয়ঃ, তেষাং বা প্রতিকূলবৃত্তিং ছিন্দ্যামিতি পূর্ব্বেণৈব সম্বন্ধঃ॥ (৮) কিঞ্চ, ব্রাহ্মণো মমৈব শ্রেষ্ঠং মুখম্, অতো যুষ্মদবজ্ঞয়া মন্মুখতিরস্কার এব কৃত ইত্যাহ—নাহমিতি। বিতানে যজ্ঞে যজমানস্য হবিশ্চরু-পুরোডাশাদি, হুতভুগগ্নিস্তেন মুখেনাদন্নশ্নন্নপি তথা নাদ্মি নাশ্নামি, যদ্‌যথা শ্চ্যোততা ক্ষরতা ঘৃতেন প্লুতং বিলোড়িতং পায়সাদি প্রতিগ্রাসং রসাস্বাদপূর্ব্বকং চরতো ভুঞ্জানস্য জ্ঞানিনো ব্রাহ্মণস্য মুখতোঽশ্নামি; ময়ি সমর্পিতৈঃ কর্ম্মফলৈস্তুষ্টস্য নিষ্কামস্যেত্যর্থঃ॥ (৯) কিঞ্চ, যেষামমল-মঙ্ঘ্রিরজোঽহং কিরীটৈঃ বিভর্ম্মি, তান্ বিপ্রানপকুর্ব্বতোঽপি কোঽন্যো ন বিষহেত। কথম্ভূতোঽহম্? অখণ্ডা অনবচ্ছিন্না বিকুণ্ঠা অপ্রতিহতা চ যোগমায়াবিলাসভূতা বিভূতির্যস্য সঃ, তথা যস্য মমার্হণান্তঃ পাদোদকং চন্দ্রললামেনেশ্বরেণ সহিতান্ লোকান্ সদ্যঃ পুনাতি, এবং পরমেশ্বরঃ পরমপাবনোঽপি সন্নহং বিভর্ম্মীতি॥ (১০) কিঞ্চ, মে তনূরধিষ্ঠানানি। কাস্তাঃ? দ্বিজবরান্, দুহতীঃ দোগ্ধ্রীর্গা ইত্যর্থঃ; দুহিতৃরিতি পাঠেঽপি গা এব, বিষ্ণুরূপাৎ সূর্য্যাৎ উৎপন্নত্বাৎ, 'সূর্য্যসুতাশ্চ গাবঃ' ইতি বচনাৎ। অলব্ধশরণানি রক্ষকহীনানি ভেদবুদ্ধ্যা মদধিষ্ঠানং ন ভবন্তীতি পৃথগ্‌দৃষ্ট্যা যে দ্রক্ষ্যন্তি ঈক্ষন্তে; অঘেন ক্ষতা নষ্টা দৃষ্টির্যেষাং তান্, মদীয়োঽধিকৃতো দণ্ডনেতা যো যমঃ[১], তস্য গৃধ্রাকারা যে দূতাঃ; অহিবন্মন্যুর্যেষাং তে

১। অন্তকঃ (খ)।

রুষা ক্রোধেন কুষন্তি চঞ্চুভিশ্ছিন্দন্তি ॥ (১১) এবম্ভূতাস্ত মাং বশীকুর্ব্বন্তীত্যাহ—যে ক্ষিপতঃ পরুষভাসমাণানপি ব্রাহ্মণান্ সম্বোধয়ন্তি, ময়ি যা ধীস্তয়া বাসুদেবদৃষ্ট্যা অর্চ্চয়ন্তঃ সন্তস্তম্যদ্ধদঃ প্রীয়মাণচিত্তাঃ, স্মিতমেব সুধা, তয়া উক্ষিতং সিক্তং পদ্মতুল্যং বক্তং যেষাম্, অনুরাগকলয়া প্রেমশোভয়া বাচা গৃণন্তঃ স্তবন্তঃ ; যথা কুপিতমাত্মজং স্নিগ্ধঃ পিতা সৎপুত্রো বা পিতরমহমিব ভৃগুং যুষ্মান্ বা তৈরহমুপাকৃতো বশীকৃতঃ ॥ (১২) তত্তস্মান্মেহবসায়মভিপ্রায়মলক্ষমাণৌ অজানন্তৌ ; যুষ্মদপরাধোচিতাং গতিং সদ্যঃ প্রাপ্য মৎসমীপমিতাং প্রাপ্নুতাম্। তদিতি স মেহনুগ্রহঃ ; তমেবাহ—যদ্ভৃতয়োর্বিবাসোহচিরতঃ শীঘ্রং কল্প্যতাং সম্পাদ্যতাং সমাপ্যতামিতি ॥

১৩। উশতীং কমনীয়াং প্রিয়াং দেবীং দ্যোতমানাম্ ; ঋষিকুল্যামৃষয়ো মন্ত্রাঃ, তৎপ্রবাহরূপাম্, ঋষিকুলযোগ্যামিতি বা ; সরস্বতীং বাচম্, আস্বাদ্য তন্মাধুর্য্যমনুভূয়, সর্পপ্রায়েণ মন্যুনা দষ্টানামপি ক্রোধবিষয়ব্যাপ্তানাং হি মনো রসানুভবাভাবাৎ প্রিয়ভাষণমপি ন সহতে, তেষান্ত আত্মা মনো নাতৃপ্যদলমিতি নামন্যত ॥

১৪। সতীং শ্রেষ্ঠাম্, ব্যাদায় প্রসার্য্য কর্ণং দত্ত্বেত্যর্থঃ। লঘ্বীং মিতাক্ষরাম্[১], গুরুভিরর্থৈর্গহ্বরাং দুষ্প্রবেশাম্, অগাধামভিপ্রায়তঃ, গম্ভীরামর্থতঃ, বিগাহ্য বিচার্য্যাপি কিমস্মানভিনন্দতি নিন্দতি বা, অস্মৎকৃতং দণ্ডং বা সঙ্কোচয়তীতি ন বিদুঃ ॥

১৫। ততশ্চাভিনন্দতীতি জ্ঞাত্বা তে প্রহৃষ্টাঃ সন্তঃ প্রোচুঃ, কুপিতা ক্ষুভিতা রোমাঞ্চিতা ত্বগ্ যেষাম্ ; কূপিতেতি পাঠে সঞ্জাতরোমকূপোক্ত্যা রোমাঞ্চিতত্বমেবোক্তম্। আরব্ধ আবিষ্কৃতঃ পারমেষ্ঠ্যস্য পরমৈশ্বর্য্যস্য মহোদয়ঃ পরমোৎকর্ষো যেন তম্ ; অধিরাজত্বমাবিষ্কৃত্য রাজশিক্ষার্থং ব্রাহ্মণান্ মানয়তীতি জ্ঞাত্বেত্যর্থঃ ॥

১। লঘ্বক্ষরাম্ (ক)।

১৬। অধ্যক্ষঃ সর্ব্বেশ্বরঃ সন্ 'তদ্ধি হ্যাত্মকৃতং মন্যে' ইত্যুক্ত্যা ময়াপরাধঃ কৃত ইতি। তথা 'তদনুগ্রহো মে' ইত্যাদি-বচনেন মমানুগ্রহশ্চেতি যৎ প্রভাষসে, তেন যচ্চিকীর্ষিতং, তন্ন বিদ্মঃ॥

১৭। কিলেতি লোকশিক্ষার্থত্বং সূচিতম্। পরমার্থমাহুঃ—বিপ্রাণামিতি। দেবদেবানাং দেবপূজ্যানামপি ভগবান্ ত্বম্; আত্মা চ দৈবতঞ্চ॥

১৮—২৫। লোকশিক্ষার্থতাপ্রপঞ্চঃ—ত্বত্ত ইত্যষ্টভিঃ। ধর্ম্মস্ত্বত্ত এব ভবতি, রক্ষ্যতে চ ত্বদবতারৈঃ, পরমঃ ফলরূপোঽতএব গুহ্যো গোপ্যঃ। ন চ স্বর্গাদিফলবদ্বিকারী, কিন্তু নির্ব্বিকারো মতঃ; অত এবম্ভূতস্ত তব ইদং লোকশিক্ষামাত্রমিতি ভাবঃ॥ (১৯) বিপরীতঞ্চেদমিত্যাহুঃ—তরন্তীতি। যস্যানুগ্রহাদেব নিবৃত্তা বিরক্তা যোগিনশ্চ সন্তঃ মৃত্যুং তরন্তি, স ভবান্ পরৈরনুগৃহ্যেতেতি যৎ, তৎ কিংস্বিৎ? ন কিঞ্চিদিত্যর্থঃ। (২০—২১) যচ্চোক্তং 'যৎসেবয়া চরণপদ্মপবিত্ররেণুং, সদ্যঃক্ষতাখিলমলং প্রতিলব্ধশীলম্' ইত্যাদি, তদত্যন্তমসম্ভাবিতমিত্যাহুর্দ্বাভ্যাম্। যং বৈ বিভূতির্লক্ষ্মীরনুবেলমবসরে অবসরে উপযাতি সেবতে। ধৃতঃ পাদরেণুর্যস্যাঃ; ধন্যৈঃ সুকৃতিভিরর্পিতং অঙ্‌ঘ্রৌ যৎ তুলস্যা নবং দাম মালা, তদ্ধাম তদুদ্গমস্থানং যস্য, তস্য মধুব্রতপতের্ভ্রমরমুখ্যস্য লোকং স্থানমঙ্‌ঘ্রিং কাময়মানেব॥ (২১) বিবিক্তচরিতৈঃ, বিশুদ্ধৈঃ পরিচরণৈরনুবর্ত্তমানাং সেবমানামপি যো নাত্যাদ্রিয়ন্নাতীবাদৃতবান্; স এবম্ভূতস্ত্বম্। অয়ং ভাবঃ—ইত্থং নামাতিলম্পটতয়া লক্ষ্মীস্ত্বাং সেবতে। কথম্? এবং হি সা মেনে, অয়ং হি সারগ্রাহী মধুব্রতশ্চঞ্চলশ্চ স চাঙ্‌ঘ্রিগতায়াং তুলস্যাং সপরিবারো নিশ্চলঃ সন্ রমতে, অতোঽঙ্‌ঘ্রিলাবণ্যমত্যধিকং স্যাৎ; ততোঽহং বক্ষসি স্থিতাপি যোগিজনাদিবহুসেবকসজ্ঘসজ্ঘর্ষমঙ্গীকৃত্যাপি তুলস্যা সহ সাপত্ন্যেনাপি চরণৌ সেবিষ্যে ইতি। তদেবমৌৎসুক্যেনানুবর্ত্তমানামপি তাং ত্বং নাতীবাদ্রিয়সে, যতঃ পরমভাগবতেষ্বেব

প্রকৃষ্টসঙ্গবান্। স এব পরমসৌভাগ্যনিধিস্ত্বম্, অতো ব্রাহ্মণপ্রসাদাৎ মাং শ্রীর্ন বিজহাতীত্যলভ্যলাভত্বেন নির্দ্দেশো ন সমঞ্জস ইতি। কিঞ্চ স্বত এব ত্বং ভগভাজনো ভজনীয়ানাং গুণানামাশ্রয়ঃ পরমশুদ্ধশ্চ, তং ত্বাং দ্বিজানামনুপথং পথি পথি লগ্নং যৎ পুণ্যং রজঃ, তথা শ্রীবৎসলক্ষ্ম চ কিং পুনীতঃ, পবিত্রীকুরুতঃ? কিং কিমর্থঞ্চ তে উভে অগাঃ প্রাপ্তো ভূষণত্বেন স্বীকৃতবানসি? অতো 'যৎসেবয়া' ইত্যাদি বচনং লোকসংগ্রহার্থমাত্রমিত্যর্থঃ ॥ (২২—২৪) ধর্ম্মমূর্ত্তেশ্চ তবেদমুচিতমেবেত্যাহুঃ—ধর্ম্মস্যেতি ত্রিভিঃ। ত্রিষ্বেব যুগেষ্বাবির্ভবতীতি ত্রিযুগঃ, যদ্বা, ত্রীণি যুগানি যুগলানি ষড়্গুণা ভগবচ্ছব্দবাচ্যাঃ সন্ত্যস্যেতি ত্রিযুগঃ। হে ত্রিযুগ! ধর্ম্মরূপস্য তব ত্রিভিঃ পদ্ভিঃ স্বৈরসাধারণৈস্তপঃশৌচদয়াদিভিঃ, সত্যস্য ধর্ম্মবিপ্লবেঽপি কলাবনুবর্ত্তমানত্বাৎ ত্রিভিরিত্যুক্তম্। ভৃতং পালিতম্। কিং কৃত্বা? নোঽস্মাকং বরদয়া সত্ত্বেন তনুবা তন্বা সত্ত্বমূর্ত্ত্যা, তদভিঘাতি তেষাং পাদানামভিঘাতকং রজশ্চ তমশ্চ নিরস্য নিরাকৃত্য দ্বিজানাং দেবতানাঞ্চ প্রয়োজনায় নূনং ভৃতম্; যদ্বা, হিলোপে রূপং নিরস্যেতি, অস্মাকং তন্নিবর্ত্তয়েত্যর্থঃ ॥ (২৩) আত্মগোপং ত্বয়ৈব রক্ষণীয়ং দ্বিজোত্তমানাং কুলং, যদি হ স্ফুটম্, ত্বং ন গোপ্তা রক্ষিতা, তৃন্প্রত্যয়ান্তত্বাৎ ন ষষ্ঠীপ্রয়োগঃ। বৃষঃ শ্রেষ্ঠঃ, হে দেব! পন্থা বেদমার্গো নঙ্ক্ষ্যতি, নাশং যাস্যতি, ঋষভস্য শ্রেষ্ঠস্য, হি যস্মাৎ তদনর্হণমসূনৃতঞ্চ অগ্রহীষ্যৎ। তদুক্তং শ্রীগীতাসু—'যদ্ যদাচরতি শ্রেষ্ঠস্তত্তদেবেতরো জনঃ। স যৎ প্রমাণং কুরুতে লোকস্তদনুবর্ত্ততে ॥' ইতি ॥ (২৪) নশ্যত্বিতি চেত্তত্রাহুঃ—তদ্বেদমার্গনাশনম্, অনভীষ্টমিবেতি লোকোক্তিঃ; সত্ত্বনিধিত্বাজ্জনায় ক্ষেমং শং বিধাতুমিচ্ছোঃ, অতএব নিজশক্তিভী রাজাদিভিরুৎপাটিতধর্ম্মপ্রতিপক্ষস্য, অতস্তব ব্রহ্মকুলেঽবনতির্যুক্তৈব। ননু মহতোঽল্পেষ্ববনতিস্তেজোহানিকরী? তত্রাহুঃ—এতাবতা তু ধর্ম্মত্রাণপ্রয়োজনেন, অবনতস্য নমনং কৃতবতস্তব তেজঃ প্রভাবো ন ক্ষতং

ন ক্ষীণম্, যতঃ স নমনাদিস্তে বিনোদঃ ॥ (২৫) শাপাগ্রহং পরিত্যজ্য বিজ্ঞাপয়ন্তি—যং বা অন্যং দণ্ডং বিধাস্যতি ভবান্, বৃত্তিং নু অধিকাং জীবিকাং বা, তৎ সর্ব্বমনুমন্যামহে। যে বয়ং নিরপরাধাবেতৌ কিল্বিষেণ শাপেনাযুঙ্ক্ষ্মহি যোজিতবন্তঃ ॥

২৬। মৎকারিতত্বাচ্ছাপস্য যুষ্মাকং নাপরাধ ইত্যাশ্বাসয়ন্নাহ—এতৌ সদ্য এব আসুরীং যোনিং প্রাপ্যাশু ভূয়ো মৎসমীপমাগমিষ্যতঃ। সংরম্ভেণ ক্রোধাবেশেন সংভৃতঃ সম্বন্ধো যঃ সমাধিঃ একাগ্রতা, তেনানুবদ্ধো দৃঢ়ীকৃতো যোগো যয়োঃ ; হে বিপ্রাঃ ! যো বঃ শাপঃ, যুষ্মৎকৃতঃ শাপঃ, তদিতি সঃ, ময়ৈব নিমিতঃ নির্ম্মিত ইত্যবৈত জানীত ॥

২৭। নেত্রোৎসবজনকং বিকুণ্ঠং হরিম্, তন্নিবাসঞ্চ বৈকুণ্ঠং লোকং স্বয়ম্প্রভং প্রকাশান্তরানপেক্ষং, সত্ত্বপরিণামত্বাৎ ॥

২৮। অনুমান্য অনুজ্ঞাপ্য, পরিক্রম্য প্রদক্ষিণীকৃত্য ॥

২৯। ময়ৈব তু মতং সম্মতম্। ইদমত্র তত্ত্বম্—যদ্যপি সনকাদীনাং ক্রোধো ন সম্ভবতি, ন চ ভগবৎপার্ষদয়োস্তয়োর্ব্রাহ্মণপ্রাতিকূল্যং, ন চ ভগবতঃ স্বভক্তোপেক্ষা, ন চ বৈকুণ্ঠগতানাং পুনর্জন্ম, তথাপি ভগবতঃ সিসৃক্ষাদিকং কদাচিৎ যুযুৎসা সমজনি ; তদান্যেষামল্পবলত্বাৎ স্বপার্ষদানাঞ্চ তুল্যবলত্বেঽপি প্রাতিপক্ষ্যানুপপত্তেঃ, এতৌ এব ব্রাহ্মণনিবারণে প্রবর্ত্ত্য তেষু চ ক্রোধমুদ্দীপ্য তচ্ছাপব্যাজেন প্রতিপক্ষৌ বিধায় যুদ্ধকৌতুকং সম্পাদনীয়মিতি ভগবতৈব ব্যবসিতমতঃ সর্ব্বং সঙ্গচ্ছতে। তদিদমুক্তম্—'শাপো ময়ৈব নিমিতঃ' ইতি, 'মা ভৈষ্টমস্ত শম্' ইতি, 'হন্তুং নেচ্ছে মতং তু মে' ইত্যাদি চ ॥

৩০। যদা ময্যুপারতে যোগনিদ্রাং গতবতি সতি, দ্বারি বিশন্তী যুবাভ্যাং পুরাপবারিতা, তদা ক্রুদ্ধয়া রময়া ন তদ্যদ্ব্রাহ্মণৈরিদানীমুক্তং, তৎ পুরৈব নির্দ্দিষ্টম্ ॥

৩১। প্রত্যেষ্যতং প্রত্যেষ্যথঃ ; নিকাশং সমীপম্ ॥

৩৩। তুস্তরাদ্‌ব্রহ্মশাপাৎ হরিলোকতঃ পতন্তাবিতি শেষঃ, হরি-লোকত এব হতশ্রিয়াবভূতামিতি বা ; বিগতস্ময়ৌ নষ্টগর্ব্বৌ চ ॥

৩৪। বিকুণ্ঠস্য ধিষণাৎ স্থানাৎ, পুত্রকাঃ ! হে দেবাঃ ॥

৩৫। কাশ্যপং তেজো বীর্য্যং প্রাপ্তৌ ॥

৩৬। সহৈব গর্ভে প্রবিষ্টৌ যমৌ, তয়োস্তেজসা বস্তেজ আক্ষিপ্তং তিরস্কৃতম্ ; ন চাত্র প্রতিবিধিঃ শক্যঃ, যত এতর্হি ইদানীং ভগবানেব তদেবং বিধাতুমিচ্ছতি ॥

৩৭। তথাপি কোঽপ্যুপায়ো বিচার্য্যতামিতি চেত্তত্রাহ—বিশ্বস্যেতি। ত্রয়াণাং গুণানামধীশঃ, স এব সত্ত্বোকর্ষকালে নঃ ক্ষেমং বিধাস্যতি। বিমৃশেন বিমর্শনেন ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং তৃতীয়স্কন্ধে
ষোড়শোঽধ্যায়ঃ ॥ ১৬ ॥

সপ্তদশোঽধ্যায়ঃ

ততঃ সপ্তদশে জন্ম তয়োর্লোকভয়ঙ্করম্ ।
হিরণ্যাক্ষপ্রভাবশ্চ বর্ণ্যতে দিগ্‌জয়েঽদ্ভুতঃ ॥ (১)

১। ক্ষেমং বিধাস্যতীতি ব্রহ্মবচনাৎ শঙ্কয়া ত্যক্তাঃ ।

২। ভর্ত্তুরাদেশাৎ—'লোকান্ সপালাংস্ত্রীংশ্চণ্ডি মুহুরাক্রন্দয়িষ্যতে' ইতি ব্যাক্যাৎ। স্বাপত্যাভ্যাং পরিশঙ্কিনী দেবোপদ্রবং শঙ্কমানা ॥

৩। তত্র তদা নিপেতুরুদ্ভবুঃ। উরুভয়মা সমন্তাদ্বহন্তীতি ॥

৪। অচলৈঃ সহিতা ভুবঃ ভূপ্রদেশাঃ, কেতব উদয়াঞ্চক্রুরিতি শেষঃ॥

৫। ফুৎকারানিতি তীব্রবায়ুশব্দানুকরণম্, নগপতীন্ মহাবৃক্ষান্, বাত্যা এবানীকং যস্য, রজ এব ধ্বজো যস্য॥

৬। উচ্চৈর্হসন্ত্য ইব তড়িতো যেষু তেষামম্ভোদানাং ঘটয়া সমূহেন নষ্টো ভাগণঃ সূর্য্যাদিপ্রভাসমূহো যস্মিন্, পদং স্থানম্, ন ব্যাদৃশ্যতে স্ম, ঈষদপি নাদৃশ্যত॥

৭। বার্দ্ধিঃ সমুদ্রঃ, বিমনা ইব উদ্গতা ঊর্ম্ময়ো যস্মাৎ, ক্ষুভিতা উদরস্থা মকরাদয়ো যস্মিন্, উদপানৈর্বাপীকূপাদিভিঃ সহিতাঃ, শুষ্কাণি পঙ্কজানি যাসু॥

৮। পরিধয়ঃ পরিবেশাঃ, সরাহ্বোঃ রাহুগ্রস্তয়োঃ, নির্ঘাতা নিরভ্রগর্জ্জিতানি; রথনির্হ্রাদতুল্যা ধ্বনয়ঃ, বিবরেভ্যঃ গিরিগুহাভ্যঃ॥

৯। শৃগালানামুলূকানাঞ্চ টঙ্কারৈর্ধ্বনিভিঃ সহ, শিবাঃ শৃগাল্যঃ॥

১০। গ্রামসিংহাঃ—শ্বানঃ॥

১১। কর্কশৈস্তীক্ষ্ণৈঃ, হে ক্ষত্তঃ! খার্কারো গর্দ্দভজাতিশব্দস্তস্মিন্ রভসঃ সম্ভ্রমো যেষাম্, বরূথশঃ সঙ্ঘশঃ॥

১২। রাসভ-শব্দাৎ ত্রস্তাঃ সর্ব্বতঃ ক্রোশন্তঃ॥

১৩। গাবোঽত্রসন্ ত্রস্তাঃ অসৃগ্দোহাশ্চ বভূবুঃ। দেবলিঙ্গানি ব্যরুদন্, প্রতিমানামশ্রুস্রাব আসীদিত্যর্থঃ॥

১৪। পুণ্যতমান্ গুরুশুক্রাদীন্[১] ভগণান্ বহূনি নক্ষত্রাণি বা অন্যে ক্রূরগ্রহা মঙ্গলাদয়ঃ অতিচেরুঃ অতিক্রম্য জগ্মুঃ, বক্রগত্যা প্রত্যাবৃত্য যুযুধুশ্চ॥

১৫। ব্রহ্মপুত্রান্ ঋতে বিনা, তেষাং স্বশাপাদিজ্ঞানাৎ॥

১৬। ব্যজ্যমানমাত্মপৌরুষং পূর্ব্বসিদ্ধং স্বপৌরুষং যয়োঃ॥

১। গুরুবুধাদীন্ (ঘ)।

১৭। নিরুদ্ধা ব্যাপ্তাঃ কাষ্ঠা দিশো যাভ্যাম্ ; স্ফুরন্ত্যঙ্গদানি যেষু, তে ভুজা যয়োঃ। অঙ্গদেতি টাবন্তত্বমার্ষম্। শোভনা কাঞ্চী যস্যাম্, তয়া কট্যা ॥

১৮। যময়োর্মধ্যে যঃ স্বদেহাৎ প্রথমমজায়ত, তং তথা হিরণ্যকশিপুং বিদুঃ ; সা দিতিঃ প্রথমং যমসূত, তং হিরণ্যাক্ষং যথা বিদুস্তথা নাম কৃতবানিত্যর্থঃ। অয়ং ভাবঃ—যদা হি গর্ভাধানসময়ে যোনিপুষ্পং বিশদ্বীর্য্যং দ্বিধা বিভক্তমাদিপশ্চাদ্ভাবেন প্রবিশতি, তদা যমৌ ভবতঃ। তয়োশ্চ পিতৃতঃ প্রবেশক্রমবিপর্য্যয়েণ মাতৃতঃ প্রসূতিঃ ; 'যদা বিশেদ্দ্বিধাভূতং বীর্য্যং পুষ্পং পরিক্ষরৎ। দ্বৌ তদা ভবতো গর্ভৌ সূতির্বেশবিপর্যয়াৎ॥' ইতি পিণ্ডসিদ্ধিস্মরণাৎ। অতঃ স্বদেহাৎ পূর্ব্বং যো জাতঃ, তস্য হিরণ্যকশিপুরিতি ; দিতিঃ প্রথমং যমসূত, তস্য হিরণ্যাক্ষ ইতি নাম কৃতবানিতি ॥

১৯। দোর্ভ্যামুদ্ধতঃ ; ব্রহ্মবরেণাকুতোমৃত্যুঃ ॥

২০। রণম্—যুদ্ধম্ ॥

২১। দুঃসহো জবো বেগো যস্য, রণন্তৌ কাঞ্চনময়ৌ নূপুরৌ যস্য, অংসে ন্যস্তা মহতী গদা যেন ॥

২২। মনসা শৌর্য্যেণ বীর্য্যেণ বলেন বরেণ চ উৎসিক্তং গর্ব্বিতম্ ; অস্মৃণ্যং নিরঙ্কুশম্ ; নিলিল্যিরে লীনা বভূবুঃ ॥

২৩। স্বেন মহসা তেজসা তিরোহিতান্ দৃষ্ট্বা জ্ঞাত্বা, ক্ষীবান্ মত্তান-পশ্যন্ সন্। ক্লীবানিতি পাঠে পৌরুষহীনান্ ॥

২৫। সন্না অবসন্না ধীর্যেষাম্ ; বর্চ্চসা তেজসা প্রধর্ষিতা অভিভূতাঃ সন্তঃ ॥

২৬। মহোর্ম্মীন্ অভিজঘ্নে। মৌর্ব্ব্যা মারয়তীতি মূর্ব্বং কার্ষ্ণায়সম্, তন্ময্যা ; যদ্বা, মূর্ব্বা নাম তৃণবিশেষঃ, তন্ময়রজ্জ্বা দৃঢ়নিবদ্ধয়েত্যর্থঃ। বিভাবরীসংজ্ঞামাসেদিবান্ প্রাপ্তঃ ॥

২৭। অসুরাণাং লোকঃ পাতালং, তৎপালকম্, প্রলব্ধুমুপহসিতুম্, প্রণিপত্য ॥

২৮। যদ্‌যস্মাদ্রাজসূয়েন ভবানযজৎ ॥

২৯। উপশমং যুদ্ধাদিকৌতুকাদুপরমম্ ॥

৩০। যুদ্ধমার্গনিপুণং ত্বাং যস্তোষয়িষ্যতি, ইতো[১] গচ্ছ; গৃণতে স্তবন্তি ॥

৩১। আরাৎ শীঘ্রম্, বিস্ময়ো নষ্টগর্ব্বঃ, বীরশয়ে রণাঙ্গনে, রূপাণি বরাহাদ্যবতারান্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
সপ্তদশোঽধ্যায়ঃ ॥ ১৭ ॥

অষ্টাদশোঽধ্যায়ঃ

অষ্টাদশে হিরণ্যাক্ষ-ধরোদ্ধর্ত্তৃবরাহয়োঃ।
নির্ব্বিশেষং মহাযুদ্ধং দেবক্ষোভি নিরূপ্যতে॥ (১)

১। প্রতিযোদ্ধারং শ্রুত্বা মহামনাঃ। 'শয়িষ্যসে' ইতি যদুক্তম্, তদ্বিগণয্য অগণয়িত্বা, যতো দুর্ম্মদঃ ॥

২। অভিতো জয়তীতি অভিজিৎ, তং শ্রীহরিম্। প্রকর্ষেণোর্দ্ধং নীয়মানা অবনির্যেন; অগ্রদংষ্ট্রয়া দংষ্ট্রাগ্রেণ; স্বরুচো হিরণ্যাক্ষতেজাংসি, অরুণশ্রিয়া যুক্তং যৎ, তেনাক্ষ্ণা নেত্রেণ মুষ্ণন্তং তিরস্কুর্ব্বন্তম্। অহো চিত্রম্, বনগোচরো মৃগঃ, বারিচরো বরাহঃ ॥

১। ইতি (খ), ইহ (ঘ)।

৩। এহি আগচ্ছ, রসৌকসাং পাতালবাসিনাং নোঽস্মাকং সমর্পিতা, অন্যথা পাতালাবতরণমস্যা ন ঘটেত ইতি ভাবঃ। হিরণ্যাক্ষেণাধিক্ষেপার্থং প্রযুক্তাপি ভারতী বস্তুতো ভগবন্তং স্তৌতি—তথা হি বনগোচরঃ জল-শয়নঃ শ্রীনারায়ণঃ, স এব যোগিভির্মৃগ্যতে, দুষ্টান্ বা হন্তুং মৃগয়তে ইতি মৃগঃ। অজ্ঞ! নাস্তি জ্ঞো যস্মাৎ, হে সর্ব্বজ্ঞ! ইত্যর্থঃ। সুরা অধমা যস্মাৎ, হে সুরোত্তম! মমেক্ষমাণস্যাপি সতঃ মামনাদৃত্যাপি ত্বমনয়া সহ বর্ত্তমানঃ, নোঽস্মদীয়ং স্বস্তি সমস্তং মঙ্গলং রাজ্যং যাস্যসি প্রাপ্স্যসি, নাত্র সন্দেহঃ, তথাপ্যস্মৎকৃপয়া বিমুঞ্চেত্যর্থঃ; আসাদিতা লীলয়া স্বীকৃতা শূকরা-কৃতির্যেন॥

৪। অভবায় নাশায় ভৃতঃ পুষ্টঃ, বস্তুতস্তু মোক্ষায় ভৃতো ধৃত আশ্রিত ইত্যর্থঃ। যো ভবান্ পরোক্ষেণ চৌর্য্যেণ জয়তীতি তথা, বস্তুতস্তু দূরত এব স্থিত্বা জয়তীতি; সংস্থাপ্য হত্বা, বস্তুতস্তু যোগমায়ারূপমচিন্ত্যং বলং যস্য; অল্পং পৌরুষং যস্মাত্তং ত্বাং সম্যক্ স্থাপয়িত্বা ভক্ত্যা হৃদি স্থিরীকৃত্য ইত্যর্থঃ। হে মূঢ়! প্রমূঢ়ান্ প্রতি আপ্যায়তীতি তথা; প্রা পূর্ত্তাবিতি ধাতুঃ। সুহৃদাং শুচঃ সংসারদুঃখানি, মৃজে নাশয়ামি; যতস্ত্বং স্মর্ত্তুর্বান্ধবানপি মোচয়সীতি ভাবঃ॥

৫। অস্মদ্ভুজচ্যুতয়াপি গদয়া অশীর্ণং শীর্ষং যস্য, তথাভূতে ত্বয়ি সুখং স্থিতে সতি, যে তুভ্যমধুনা বলিং হরন্তি, নবীনা ভক্তাঃ, যে চ পূর্ব্বে ভক্তা ঋষয়ো দেবাশ্চ, তে সর্ব্বে স্বয়মেব উদ্যমং বিনৈব অমূলা ন ভবিষ্যন্তি, কিন্তু দৃঢ়মূলা ভবিষ্যন্তীত্যর্থঃ॥

৬। স হরিঃ, অরেদুরুক্তান্যেব তোমরাঃ শস্ত্রবিশেষাস্তৈস্তুদ্যমানো ব্যথ্যমানোঽপি দংষ্ট্রাগ্রগতাং পৃথ্বীং ভীতামালক্ষ্য তোদং দুরুক্তব্যথাং মৃষন্ সহমান এব নির্গতঃ; করেণুঃ হস্তিনী, বস্তুতস্তু অরিদুরুক্ততস্তোমরৈ-

নিমিত্তভূতৈস্তস্তমানঃ ; যথাশ্রুতার্থগ্রাহিণাং ব্রহ্মাদীনাং ব্যথাং দৃষ্ট্বা অনুকম্পয়া পীড্যমান ইত্যর্থঃ ; তোদং মৃষন্ ইত্যস্যাপ্যয়মেবার্থঃ ॥

৭। সলিলান্নির্গচ্ছন্তমনুগতঃ সন্, হিরণ্যবৎ কপিশাঃ কেশা যস্য দৈত্যস্য, ঝষঃ মকরঃ ; করালা দংষ্ট্রা যস্য, অশনিবৎ নিস্বনো যস্য। নির্লজ্জানামসতাং কিং বিগর্হিতমস্তি, নিন্দাভয়াভাবাৎ ; পলায়নং নাযুক্ত-মিত্যর্থঃ। বস্তুতস্তু গতহ্রিয়ঃ প্রাপ্তহ্রিয়ঃ, ন সন্তো যেভ্যস্তেষাং কৃপালূনাং কিং বিগর্হিতম্? ন কিঞ্চিৎ। অতঃ কৃপালুত্বাদ্দংষ্ট্রাশ্রিতভূরক্ষণার্থং কিঞ্চিৎ পলায়নমপি ন নিন্দিতমিত্যর্থঃ ; যদ্বা, লোকোপকারায় ভুব-মুদ্ধরতোঽনুদ্রবণমনুচিতং মন্বানো দৈত্য আত্মানমেবাধিক্ষিপতি। গতহ্রিয়াং স্বার্থৈকপরাণামসতামস্মাকং কিং বিগর্হিতগণনাস্তি? অপি তু নাস্ত্যেব ; ধিগস্মানিত্যব্রবীদিত্যর্থঃ ॥

৮। স ভগবান্ বিশ্বসৃজাভিষ্টুতো বিবুধৈশ্চ প্রসূনৈরাপূর্য্যমাণঃ ; বিশ্বসৃজাং প্রসূনৈরিতি পাঠে বিশ্বসৃজাং প্রসূনৈর্বিবুধৈরভিষ্টুত ইতি। সলিলস্যোদস্তাৎ উপরি ব্যবহারগোচরে দেশে গাং বিন্যস্য তস্যাং স্বসত্ত্ব-মাধারশক্তিং নিহিতবান্, অরেস্তস্য পশ্যত এব ॥

৯। পরা পরাক্ পৃষ্ঠতোঽনুষক্তং লগ্নম্, তপনীয়োপকল্পং সুবর্ণা-ভরণম্, কাঞ্চনময়ং চিত্রং দংশঃ কবচং যস্য, তং দৈত্যম্। প্রচণ্ডমন্যুত্ব-মধিক্ষেপাদিকঞ্চানুকরণমাত্রং, দৈত্যবাক্যভীতানাং দেবানাং ভয়নিবৃত্তয়ে, বস্তুতস্তেন তথানুক্তত্বেন কোপাদিহেতুত্বাভাবাৎ ॥

১০। গ্রামসিংহান্ শুনঃ, প্রতিমুক্তস্য বদ্ধস্য, বিকত্থনং শ্লাঘনম্ ॥

১১। ন্যাসহরা নিক্ষেপহরাঃ, দ্রাবিতাঃ পলায়নং কারিতাঃ, তথাপি অসমর্থা অপি তিষ্ঠামঃ। তৎ কিম্? যতঃ স্থেয়ং স্থাতব্যমস্মাভিস্তৎ কিমিত্যত আহ—ক্ব যামঃ, গন্তব্যদেশাভাবাৎ ॥

১২। পত্ত্রথানাং পদাতীনাং যে যূথপাস্তেষামধিপো মুখ্য ইত্যর্থঃ। অস্বস্তয়ে পরাভবার্থমাশু ঘটস্ব যতস্ব। অনূহো নির্বিতর্কঃ, যো নাতিপিপর্ত্তি ন পূরয়তি পালয়তি বা, অসাবসভ্যঃ সভায়ামনর্হঃ ॥

১৩। সোঽধিক্ষিপ্তঃ 'সত্যং বয়ম্' ইতি শ্লোকেন। রুষা প্রলব্ধঃ উপহসিতঃ 'এতে বয়ম্' ইতি দ্বাভ্যাম্। ক্রীড়াং কার্য্যমাণোঽহিরাট্ মহাসর্প ইব ॥

১৪। মন্যুনা প্রচলিতানি ক্ষুভিতানীন্দ্রিয়াণি যস্য সঃ ॥

১৫। অন্তকম্—মৃত্যুম্ ॥

১৭। হে সৌম্য ! বিদুর ! তাং গদামপ্রাপ্তামেবাহনৎ ॥

১৮। হর্য্যক্ষো হিরণ্যাক্ষঃ ॥

১৯। স্পৃধোঃ স্পর্দ্ধমানয়োস্তিগ্মাভ্যাং গদাভ্যামাহতানি অঙ্গানি যয়োঃ, ক্ষতাদাস্রবতীতি ক্ষতাস্রবং রুধিরম্, তস্য ঘ্রাণমবঘ্রাণম্, তেন বিবৃদ্ধো মন্যুর্যয়োঃ; বিচিত্রান্ মার্গান্ গদাযুদ্ধভ্রমণপ্রভেদান্; ইলা গৌঃ, তস্যাং নিমিত্তভূতায়াম্, শুষ্মিণোর্মত্তয়োঃ বৃষভয়োঃ; প্রস্তুতেঽপি ইলা পৃথ্বী, তদর্থম্। বৃষভৌ হি খলু বহূনি দিনানি সংগ্রথিতোত্তুঙ্গশৃঙ্গসঙ্ঘর্ষ-বিদীর্ণাঙ্গগলদ্রুধিরৌ পরস্পরোপমর্দ্দব্যগ্রোগ্রসংরম্ভৌ চমৎকারিতগজ-যূথপৌ যুধ্যমানৌ তিষ্ঠত ইতি প্রসিদ্ধম্ ॥

২০। যজ্ঞা এব অবয়বা যস্য, তস্য চ, মহ্যাং মহীনিমিত্তং দ্বিষতোঃ, এবংবিধং বিমর্দ্দনং যুদ্ধং দিদৃক্ষুঃ স্বরাট্ ব্রহ্মা তত্রাগাৎ ॥

২১। আগত্য চ নারায়ণমাহ। কিং কৃত্বা ? দৈত্যং বিলক্ষ্য। কথম্ভূতম্ ? আসন্নং প্রাপ্তং শৌণ্ডীরং শৌর্য্যং মদো বা যেন, অপেতং সাধ্বসং যস্মাৎ, কৃতঃ প্রতীকারো যেন, অহার্য্যোঽপ্রতিকার্য্যো বিক্রমো যস্য, সহস্রণীঃ সহস্রাণামৃষিসহস্রাণাং নেতা ॥

২২। হে দেব! তেঽঙ্ঘ্রিমূলং প্রাপ্তানাং দেবাদীনামেষোঽসুর আগস্কৃদ্‌বৃথৈবাপরাধারোপকঃ, তৎপরিহারায় প্রবৃত্তৌ ভয়কৃৎ ভীতং জ্ঞাত্বা, তুস্কৃৎ অর্থপ্রাণাদিহর্ত্তা, অস্মত্তো রাদ্ধো বরো যেন, অন্বেষন্‌ প্রতিরথমবলোকয়ন্‌, অপ্রতিরথঃ প্রতিপক্ষশূন্যঃ ॥

২৩। যদ্‌যস্মাদেবম্ভূতোঽয়ং, তস্মাদেনং মা ক্রীড় মা ক্রীড়য়। হে দেব! যথা উত্থিতং ক্ষুভিতমাশীবিষং সর্পং বালঃ পুচ্ছাকর্ষণাদিনা ক্রীড়য়তি, তদ্বৎ ॥

২৪। স্বাম্‌ আসুরীম্‌, হে দেব! স্বাং মায়াম্‌, অঘং পাপরূপম্‌ ॥

২৫। বেলামেবাহ—এষেতি। লোকানাং ছম্বট্‌করী বিনাশকরী; ছম্বড়িত্যব্যয়ং বিনাশে বর্ত্ততে ॥

২৬। অভিজিন্মধ্যাহ্নঃ, স এব মৌহূর্ত্তিকো যোগঃ সন্‌ মুহূর্ত্ত-শুভদঃ কালঃ অগাৎ গতপ্রায়ঃ; অতো যাবন্মুহূর্ত্তশেষোঽস্ত, তাবদেবাশু সুদুস্তরমেনং নিস্তর জহি ॥

২৭। ত্বাং মৃত্যুং ত্বয়ৈব শাপানুগ্রহকালে বিহিতং নির্ম্মিতম্‌, আসাদিতঃ প্রাপ্তঃ, শর্ম্মণি সুখে, আধেহি স্থাপয় ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
অষ্টাদশোঽধ্যায়ঃ ॥ ১৮ ॥

ঊনবিংশোঽধ্যায়ঃ

ঊনবিংশে বিরিঞ্চ্যাদিপ্রার্থিতেন মহামৃধে।
বরাহেণ হিরণ্যাক্ষবধঃ শ্লাঘ্যোঽনুবর্ণ্যতে॥ (১)

১। নির্ব্যলীকঞ্চ তদমৃতঞ্চ। নির্ব্যলীকমৃতমিতি পাঠান্তরে নিষ্কপটাভিপ্রায়ঞ্চ ঋতঞ্চ। কালাত্মনোঽপি মম মুহূর্ত্তবলমুপদিশতীতি প্রহস্য অপাঙ্গাবলোকনেন স্বীকৃতবান্॥

২। মুখতঃ অভিমুখে, হনৌ কপোলস্যাধোভাগে, অক্ষজো ব্রহ্মণো ঘ্রাণেন্দ্রিয়াদাবির্ভূতঃ॥

৩। সা স্বগদয়া তেন হতা, ততো বিহতা বিচ্যুতা সতী বিঘূর্ণিতা ভূত্বা অপতৎ রেজে চ। তদ্‌ভগবৎকরাৎ পতনম্; যদ্বা, তৎপদস্যাবৃত্ত্যা রেজে ইত্যনেনাপি সম্বন্ধঃ; তদ্দৈত্যপৌরুষং রেজে ইত্যর্থঃ॥

৪। লব্ধতীর্থো লব্ধাবসরোঽপি সন্ ন ববাধে ন প্রাহরৎ। স মানয়ন্ বভূবেতি বাক্যভেদাৎ স ইত্যস্যাপৌনরুক্ত্যম্॥

৬। ব্যগ্রং সসম্ভ্রমং চক্রং যস্য; বিষজ্জমানং বিশেষেণ সঙ্গং প্রাপ্নুবন্তং তং প্রতি। অতদ্বিদাং তৎপ্রভাবমজানতাম্, আ সমন্তাদাসন্ স্ম॥

৭। স দৈত্যস্তমাত্তচক্রং নিশাম্য দৃষ্ট্বা অগ্রতো ব্যবস্থিতঞ্চ বিলোক্য অমর্ষেণ ক্রোধেন পরিপ্লুতানি ক্ষুভিতানি ইন্দ্রিয়াণি যস্য সঃ, আদশৎ দষ্টবান্॥

৮। চক্ষুর্ভ্যাং দহন্নিব সঞ্চক্ষাণঃ পশ্যন্। ইবেতি বস্তুতঃ ক্রোধাভাবমাহ, হতোঽসি জ্ঞাতোঽসীতি বাস্তবার্থঃ॥

৯। বাতরংহসম্—বায়ুবেগম্॥

১০। ঘটস্ব উদ্যমং কুরু, যতস্ত্বং জেতুমিচ্ছসি॥

১২। হতো মানো গর্ব্বো যস্য॥

১৩। জ্বলন্ যো জ্বলনস্তদ্বল্লোলুপং গ্রসনব্যগ্রম্, যজ্ঞায় বিষ্ণুমালক্ষ্য। অকার্য্যকরত্বে দৃষ্টান্তঃ—বিপ্রমুদ্দিশ্যাভিচারং কুর্ব্বন্ যথা ॥

১৪। অন্তঃখে আকাশমধ্যে চকাসৎ প্রকাশমানম্, উদীর্ণা উৎকটা দীধিতির্দীপ্তির্যস্য, নিশাতনেমিনা নিশিতধারেণ হরিরিন্দ্রো যথা তার্ক্ষ্যস্য পতত্রমুজ্ঝিতং চিচ্ছেদ, দেবান্ বিনির্জিত্যামৃতকলসং নয়তা গরুড়েন ইন্দ্রপ্রযুক্তস্য বজ্রস্যামোঘস্য মানং দাতুং পিচ্ছমেকং ত্যক্তম্, তদ্যথা ইন্দ্রশ্চিচ্ছেদ, ছিন্নঞ্চ তদ্যথা খে প্রচকাশে, তদ্বৎ প্রকাশমানমিত্যপি সম্বন্ধঃ ॥

১৫। অরাঃ সন্ত্যস্মেতি অরি চক্রম্, তেন বহুধা বৃকৃণে ছিন্নে সতি প্রত্যেত্য অভিমুখমাগত্য হরেরুরো বক্ষঃ প্রহৃত্য ॥

১৬। মানাগীষদপি ক্বাপ্যংশে ॥

১৭। অস্য জগত উপসংযমং প্রলয়ম্ ॥

১৮। পাংশুকৃতং তমশ্চ প্রেরিতবন্তঃ, ক্ষেপণৈর্যন্ত্রৈঃ ॥

১৯। নষ্টো ভগণো নক্ষত্রসমূহো যস্যাম্, অনেন দৈত্যবলাতিরেকাদব্রহ্মদত্তমুহূর্ত্তাতিক্রমো গম্যতে, অহ্নি নক্ষত্রাণামসম্ভবাৎ ॥

২০। নানা আয়ুধানি মুঞ্চন্তীতি তথা; যাতুধান্যশ্চ প্রত্যদৃশ্যন্ত ॥

২১। হিংস্রাঃ ছিন্ধি ভিন্ধীত্যেবম্ভূতাঃ, অতিবৈশসা অত্যুগ্রা বাচ উৎসৃষ্টা ইত্যত্রৈব বাক্যসমাপ্তিঃ ॥

২২। প্রাদুষ্কৃতানামিতি, প্রকটিতা মায়া বিনাশয়ন্। বিনাশনমিতি পাঠে যথাশ্রুতৈব ষষ্ঠী। ত্রিপাৎ ত্রীণি সবনানি পাদা যস্য, যজ্ঞমূর্ত্তিরিত্যর্থঃ; 'ত্রয়োঽস্য পাদাঃ' ইতি শ্রুতেঃ ॥

২৩। ভর্ত্তুরাদেশম্ 'ত্বৎপুত্রৌ ভগবান্ হনিষ্যতি' ইত্যেবম্ ॥

২৪। উপগূহমানো বাহ্বোরন্তর্নিধায় সজ্ঘট্টয়ন্ ॥

২৫। অহন্ জঘান, ত্বাষ্ট্রং বৃত্রম্, মরুৎপতিরিন্দ্রঃ ॥

২৬। পরিতো ভ্রমদ্‌গাত্রং শরীরং যস্ত, উদস্তে বহির্নির্গতে লোচনে যস্ত, বিশীর্ণা বাহ্বাদয়ো যস্ত ; নগেন্দ্রো মহাদ্রুমঃ, লুলিত উন্মূলিতঃ, নভস্বতা বায়ুনা ॥

২৭। সংস্থিতিম্—মৃত্যুম্ ॥

২৮। অসত আরোপিতাল্লিঙ্গাল্লিঙ্গশরীরান্মোক্তুমিচ্ছয়া। বরাহস্ত পূর্ব্বপাদয়োরেব করত্বাৎ করেণাহন্নিতি পদাহত ইতি চাবিরুদ্ধম্ ॥

৩০। অখিলযজ্ঞানাং তন্তবে বিস্তারায় কারণায়েতি বা। অরুন্তুদঃ মর্ম্মভেত্তা ॥

৩১। সাদয়িত্বা হত্বেত্যর্থঃ। পুষ্করবিষ্টরাদিভির্ব্রহ্মাদিভিঃ সংস্তুতঃ ॥

৩২। যথানূক্তং গুরুক্তমনতিক্রম্য, ময়া অবাদি ; তব কথিতম্—'হে সুমিত্র !' যথা যেন প্রকারেণ ॥

৩৩। হে দ্বিজ ! শৌনক ॥

৩৪। কথামুপশ্রুত্য ॥

৩৫—৩৬। ভক্তিমাত্রেণ পশূনামপি সুলভং, অন্যথা দেবানামপি দুর্লভ ইতি তৎকথাশ্রবণে কস্য নন্দো ন স্যাদিত্যাহ—য ইতি দ্বাভ্যাম্। ঝষো গ্রাহঃ ; ক্রোশন্তীনাং সতীনামিতি কৃপালুত্বমুক্তম্ ; সঙ্কটাদমোচয়ৎ ॥

৩৭। কারণেন পৃথিব্যুদ্ধরণাদিনা, শূকররূপস্য ॥

৩৮। এতদ্ধরেবিক্রীড়িতং শৃণ্বতামন্তে শ্রীনারায়ণো গতির্ভবতি। মহাপুণ্যং স্বর্গাদিপ্রদম্, অলং পবিত্রমতিশয়েন শোধকম্, ধন্যং ধনাবহম্, যশস্যং কীর্ত্তিকরম্, আয়ুষশ্চ আশিষাঞ্চ পদং স্থানম্, পরিত্রাণং বা, প্রাণানামিন্দ্রিয়াণাঞ্চ পদং স্থানম্, অঙ্গ ! হে শৌনক ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং তৃতীয়স্কন্ধে

একোনবিংশোহধ্যায়ঃ ॥ ১৯ ॥

বিংশোঽধ্যায়ঃ

বিংশে বরাহজন্মাদিব্যবধানাদথাদিতঃ।
সর্গোঽনুস্মার্য্যতে বক্তুমন্বয়ং প্রস্তুতং মনোঃ॥ (১)

১। প্রতিষ্ঠাং স্থানম্, অধ্যস্থ প্রাপ্য, সৌতে! সূতস্থ রোমহর্ষণস্থ পুত্র! অবরমর্ব্বাচীনং জন্ম যেষাম্, তেষামীশ্বরে লীনানাং মার্গায় নির্গমায় কানি দ্বারাণি কৃতবান্, অর্ব্বাচীনান্ প্রাণিনঃ কৈরুপায়ৈঃ সৃষ্টবানিত্যর্থঃ॥

২—৬। বিদুরমৈত্রেয়সংবাদেনৈবৈতৎ জ্ঞাস্যত ইতি তমেব সংবাদং প্রষ্টুমাহ—ক্ষত্তেতি পঞ্চভিঃ। শ্রীকৃষ্ণসুহৃত্ত্বে হেতুঃ—য ইতি। দুর্য্যোধনাদিভিরপত্যৈঃ সহিতমগ্রজং ধৃতরাষ্ট্রম্, অঘবান্ কৃতাপরাধ ইতি হেতোঃ শ্রীকৃষ্ণোক্তমন্ত্রানাদরাদ্‌যস্তত্যাজ॥ (৩) অনবরোঽন্যূনঃ, মহিত্বে মহিম্নি॥ (৪) কুশাবর্ত্তে গঙ্গাদ্বারে[১]॥ (৫) যৎ কিমপি পৃচ্ছতু, কিং তবেতি চেত্তত্রাহ—তয়োরিতি। অঘঘ্নীঃ অঘঘ্ন্যঃ কথা নূনং প্রবৃত্তাঃ॥ (৬) কীর্ত্তন্যানি কীর্ত্তনার্হাণি উদারাণি কর্ম্মাণি, যস্থ হরেঃ॥

৭। এবমিতি ব্যাসবাক্যম্; উগ্রশ্রবা রোমহর্ষণপুত্রঃ, নৈমিষময়নমাশ্রয়ো যেষাম্, অর্পিতমধ্যাত্মং মনো যেন॥

৮। গোরুদ্ধরণলীলাং হিরণ্যাক্ষঞ্চাবজ্ঞয়া হতং নিশম্য, ভারতো বিদুরঃ॥

৯। যস্মাত্ত্বমব্যক্তমার্গবিৎ; ব্রহ্মণো বা বিশেষণম্॥

১০। এতজ্জগদভাবয়ন্নুৎপাদয়ামাসুঃ॥

১১। সদ্বিতীয়াঃ সভার্য্যাঃ, স্বতন্ত্রা ভার্য্যানপেক্ষাঃ, কর্ম্মসু প্রজাসর্গাদিষু সংহতাঃ পরস্পরাপেক্ষাঃ, ইদং জগৎ॥

১। গঙ্গাতীরে (গ)।

১২—১৮। ব্রহ্মা কিমারভতেতি প্রশ্নস্য যক্ষাদীন্ স্সৃষ্টবানিত্যুত্তরং বক্তুং পূর্ব্বোক্তাং স্সৃষ্টিমনুস্মারয়তি—দৈবেনেতি সপ্তভিঃ। মন্বাদিপ্রশ্নানান্ত্বুত্তরাধ্যায়মারভ্য উত্তরং ভবিষ্যতি। দুর্ব্বিতর্ক্যেণ দৈবেন জীবাদৃষ্টেন, পরেণ প্রকৃত্যধিষ্ঠাত্রা মহাপুরুষেণ, অনিমিষেণ কালেন চ হেতুনা; ভগবতো নির্ব্বিকারাজ্জাতক্ষোভং যদ্গুণত্রয়ং প্রধানম্, তস্মাৎ মহানাসীৎ। তদুক্তং তন্ত্রেঽপি—'বিষ্ণোস্তু ত্রীণি রূপাণি পুরুষাখ্যান্যথো বিদুঃ। প্রথমং মহতঃ স্রষ্টৃ দ্বিতীয়ন্ত্বণ্ডসংস্থিতম্। তৃতীয়ং সর্ব্বভূতস্থং তানি জ্ঞাত্বা বিমুচ্যতে॥' ইতি॥ (১৩) মহতো জাতো ভূতাদিরহঙ্কারস্ত্রিলিঙ্গস্ত্রিগুণো রজঃপ্রধানাদিতি, স্বতঃ স্বত্ত্বপ্রধানস্যাপি মহতোঽহঙ্কারোৎপত্তিকালে কার্য্যানুরূপং রজঃপ্রধানত্বং ভবতীতি ভাবঃ। পঞ্চশঃ তন্মাত্রাণি মহাভূতানি, জ্ঞানেন্দ্রিয়াণি কর্ম্মেন্দ্রিয়াণি চ তত্তদ্দেবতাশ্চেতি পঞ্চ পঞ্চ সসর্জ্জেত্যর্থঃ॥ (১৪) ভৌতিকং হৈমমণ্ডমেকৈকশঃ প্রত্যেকং স্রষ্টুমসমর্থানি সন্তি সংহত্য সসৃজুঃ॥ (১৫) অন্ববাৎসীদধিষ্ঠিতবান্॥ (১৬) সহস্রার্কাণামিব উরুর্দীধিতির্যস্য, তৎ সর্ব্বজীবনিকায়ানামোকঃ স্থানং পদ্মম্, স্বরাট্ ব্রহ্মা॥ (১৭) যঃ সলিলাশয়ে গর্ভোদকস্যান্তঃ শেতে, তেন ভগবতানুবিষ্টোঽধিষ্ঠিতঃ সন্ স স্বরাট্। স্বয়া সংস্থয়া নামরূপাদিক্রমেণ॥ (১৮) ছায়া প্রভাপ্রতিযোগিনী, তয়া অবুদ্ধ্যেত্যর্থঃ, যস্ত্ববুদ্ধিকৃতঃ প্রভোরিত্যুক্তত্বাৎ। মহাতম ইতি মহামোহঃ, স্বরূপনির্দ্দেশমাত্রবিবক্ষয়া মোহ ইতি প্রথমান্তঃ প্রয়োগঃ॥

১৯। তদেবং প্রথমোক্তাং[১] সাধারণীং স্সৃষ্টিমনূদ্য কেনচিদ্বিশেষেণাসাধারণীং স্সৃষ্টিমাহ—বিসসর্জ্জেত্যাদিনা যাবৎসমাপ্তি। তদ্বিসৃষ্টং কায়ং রাত্রিরূপম্, তত এব জাতানি যক্ষরক্ষাংসি জগৃহুঃ। ক্ষুত্তৃষোঃ সমুদ্ভবো যস্যাং তাম্; অত্র চ—'যাস্য তনুরাসীত্তামপাহরৎ, সা তমিস্রাভবৎ' ইতি শ্রুতিরনুসন্ধেয়া॥

১। পূর্ব্বোক্তাং (গ)।

২০। উপসৃষ্টা অভিভূতাঃ, জগ্ধুং ভক্ষয়িতুম্, যতো বয়ং ক্ষুত্তৃড়্‌ভ্যা-মর্দ্দিতাঃ, অত এনং পিতেতি কৃপয়া মা রক্ষতেত্যেকে, অন্যে তু জক্ষধ্বং ভক্ষয়তেত্যব্রুবন্; 'জক্ষ ভক্ষহসনয়োঃ' ইতি ধাতুঃ॥

২১। দেবো ব্রহ্মা সংবিগ্নো ভীতঃ সন্, মা মাং মা জক্ষত, ন ভক্ষয়ত, কিন্তু রক্ষত। অহো! হে যক্ষরক্ষাংসি! যূয়ং মে প্রজাঃ পুত্রা বভূবিথ জাতাঃ স্থ। এবমুগ্রস্বভাবা যক্ষরাক্ষসা জাতা ইত্যর্থঃ। তত্র যে জক্ষধ্ব-মিত্যূচুস্তে যক্ষাঃ, যে তু মা রক্ষতেতি, তে রাক্ষসা ইতি জ্ঞেয়ম্। এতচ্চ তির্য্যগাদি-তামসসর্গস্যাপ্যুপলক্ষণম্॥

২২। প্রভয়া দীব্যন্ দ্যোতমানঃ, যা যা দেবতা দ্যুতিমত্যঃ সাত্ত্বিক্যঃ, তাস্তাঃ প্রমুখতঃ প্রাধান্যেনাসৃজৎ। তে দেবা দেবতা ইতি স্ত্রীত্বেন নির্দ্দিষ্টানামপ্যর্থমাত্রবিবক্ষয়া ত ইতি পুংস্ত্বেন প্রতিনির্দ্দেশঃ; এবং যক্ষরক্ষাংসীত্যত্রাপি জ্ঞেয়ম্। তেন বিসৃষ্টাং ত্যক্তাং প্রভামহর্দিবসরূপাং সতীং দেবয়ন্তঃ ক্রীড়য়ন্তঃ অহার্ষুর্জগৃহুঃ॥

২৩। অদেবানিতি চ্ছেদঃ, 'স জঘনাদসুরানসৃজত' ইতি শ্রুতেঃ। অতিলোলুপান্ স্ত্রীলম্পটান্; অভিপেদিরে প্রাপ্তাঃ॥

২৪। পরাপতৎ—পলায়ত॥

২৫—২৬। ভক্তেচ্ছানুরূপমাত্মানং দর্শয়তীতি তথা তমুপব্রজ্য পাহীতি দ্বাভ্যাং প্রার্থিতবান্॥ (২৬) জভিতুং মৈথুনেন ধর্ষয়িতুম্॥

২৭। লোকানাং জনানাম্, তব অনাসন্নৌ অনাশ্রিতৌ পাদৌ যৈ-স্তেষাম্॥

২৮। বিবিক্তমসন্দিগ্ধমধ্যাত্মদর্শনং পরচিত্তজ্ঞানং যস্য হরেঃ; ঘোরাং কামকশ্মলাং স্বতনুং বিমুঞ্চেতি উক্তবানিতি শেষঃ। ইত্যুক্তশ্চ ব্রহ্মা তাং তনুং বিমুমোচ। সর্ব্বত্র তনুত্যাগো নাম তত্তন্মনোভাবত্যাগো বিবক্ষিতঃ, গ্রহণঞ্চ তত্তদ্ভাবাপত্তিরিতি দ্রষ্টব্যম্॥

২৯—৩১। 'সাহোরাত্রয়োঃ সন্ধিরভবৎ' ইতি শ্রুতেঃ, সা তেন বিসৃষ্টা তনুঃ সায়ন্তনী সন্ধ্যা বভূব। সা চ কামোদ্রেকবেলা, অসুরাশ্চ রাজসত্বাৎ স্ত্রীলম্পটাঃ, অতস্তাং সন্ধ্যামেব স্ত্রিয়ং কল্পয়িত্বা তে সম্মোহং প্রাপ্তা ইত্যাহ —তামিতি ত্রিভিঃ। নূপুরাভ্যাং ক্বণন্তী চরণাম্ভোজে যস্যাঃ, মদেন বিহ্বলে লোচনে যস্যাঃ, কাঞ্চীকলাপেন বিলসদ্দুকূলম্, তেন চ্ছন্নং রোধঃ কটিতটং যস্যাস্তাম্॥ (৩০) অন্যোহন্যং শ্লেষয়া উপমর্দ্দেন হেতুনা উত্তুঙ্গৌ নিরন্তরৌ চ পয়োধরৌ যস্যাঃ, সুদ্বিজাং সুদতীম্, স্নিগ্ধো হাসো লীলাবলোকনঞ্চ যস্যাঃ॥ (৩১) গূহন্তীং বস্ত্রাঞ্চলেনাবৃণ্বানাম্, নীলানামলকানাং বরূথঃ স্তোমো বিদ্যতে যস্যাঃ ; হে ধর্ম্ম ! বিদুর ! তাং স্ত্রিয়মুপলভ্য মত্বা॥

৩২। সংমূঢ়ানাং বিভাবনাক্রমমাহ—অহো ইতি॥

৩৩—৩৬। অভিসম্ভাব্য সংকৃত্য, বিশ্রম্ভাৎ প্রণয়াৎ কুবুদ্ধয়স্তে তাং পপ্রচ্ছুঃ—কাসীতি ত্রিভিঃ॥ (৩৪) কাসি জাত্যা ? কস্য বা কন্যা ? হে ভামিনি ! কোপনে ! রূপমেব দ্রবিণমনর্ঘং বস্তু, তদেব পণ্যং ক্রয়ার্হম্, তেন তদসমর্পণেন নো বিবাধসে পীড়য়সি॥ (৩৫) কিং জাতিকুলাদিপ্রশ্নেন, যা বা কাচিদ্ভব, দিষ্ট্যা ইদং তাবদ্ভদ্রং জাতম্, যত্তব দর্শনম্। কিন্তু কেবলং নো মন উৎসুনোষি বিমথ্নাসি॥ (৩৬) ক্ষুভিতচিত্তানাং বাক্যম্—নৈকত্রেতি। হে শালিনি ! শ্লাঘ্যে ! একত্র ন জয়তি, ন স্থিরীভবতি, যদ্বা, নৈকত্র অনেকগতিবিলাসেষু জয়তি, সর্ব্বোৎকর্ষেণ বর্ত্ততে, পতৎপতঙ্গমুচ্চলন্তং কন্দুকম্, বৃহতোঃ স্তনয়োর্ভারাদ্ভীতং তব কৃশং মধ্যং বিষীদতি শ্রাম্যতি, শ্রান্তা মন্থরেব প্রসরতি সুশিখাসমূহঃ শোভনঃ কেশকলাপস্তে ; সুশিখাঃ সমূহেতি পাঠান্তরে সুশিখাঃ শোভনান্ কেশানবকীর্যমাণান্ সমূহ বধানেতি। অত্র চাস্তং গচ্ছন্ সূর্য্য এব পতৎপতঙ্গঃ, মেঘবিচ্ছেদো মধ্যবিষাদঃ, তারকারূপা দৃষ্টিঃ, তম এব কেশা ইত্যাদ্যূহ্যম্॥

৩৭। প্রমদেবাচরন্তীঃ স্ত্রিয়ং মত্বা জগৃহুঃ ॥

৩৮। প্রহস্ত্যাত্মানমাত্মনা জিঘ্রন্ত্যা কান্ত্যা সৌন্দর্য্যেণ, প্রহসনমাত্মাবঘ্রাণঞ্চ সৌন্দর্য্যানুভাবচাতুর্য্যবিকারঃ ॥

৩৯। জ্যোৎস্নাং চন্দ্রিকারূপাম্, ত এব গন্ধর্ব্বাদিগণাঃ, বিশ্বাবসুঃ পুরোগমো মুখ্যো যেষু ॥

৪০। আত্মনস্তন্দ্রিণা আলস্যেন, তাংশ্চ নগ্নান্ মুক্তকেশান্ বীক্ষ্য নেত্রে নিমীলিতবান্ ॥

৪১। ইন্দ্রিয়াণাং বিক্লেদঃ স্রাবো যয়া, তাং নিদ্রাং প্রচক্ষতে। যেনেন্দ্রিয়বিক্লেদেন হেতুনা, উচ্ছিষ্টাংশ্চ সতঃ ধর্ষয়ন্তি ভ্রান্তান্ কুর্ব্বন্তি, তং ভূতাদিগণমুন্মাদং প্রচক্ষতে। তন্দ্রা-জৃম্ভিকা-নিদ্রোন্মাদহেতুত্বেন ভূতাদীনাং তনূনাঞ্চ চাতুর্বিধ্যমুক্তম্ ॥

৪২। ঊর্জ্জস্বন্তং সত্ত্বন্তম্[১], পরোক্ষেণ অদৃশ্যরূপেণ ॥

৪৩। আত্মনঃ সর্গো যস্মাত্তম্, যদ্‌যেন কায়েন সম্প্রদানত্বনিমিত্তেন, কবয়ঃ কর্ম্মকোবিদাঃ, সাধ্যেভ্যঃ পিতৃভ্যশ্চ স্বপিতৃরূপেভ্যো বিতন্বতে শ্রদ্ধাদিনা হব্যং কব্যঞ্চ দদতি ॥

৪৪। তিরোধানেন দৃশ্যত্বে সত্যপি অন্তর্দ্ধানশক্ত্যা ॥

৪৫। প্রত্যাত্ম্যেন প্রতিবিম্বেন, আত্মাভাসং প্রতিবিম্বম্, আত্মনা আত্মনো মানঃ প্রতিবিম্বদর্শিনঃ সুন্দরস্য শিরঃকম্পাদিচেষ্টা, অতএব তৎস্পৃষ্টানাং মিথঃসম্মানেন নিত্যং মিথুনীভাবঃ ॥

৪৬। তৎ প্রতিবিম্বরূপম্, কর্ম্মভিস্তৎপরাক্রমানুবর্ণনৈঃ ॥

৪৭। ভোগ আভোগো বিস্তারঃ পাদাদিপ্রসারণম্, তদ্বতা দেহেন, অনুপচিতে বৃদ্ধিমপ্রাপ্তে, তদ্ভোগক্রোধাদিযুক্তম্ ॥

১। বলবন্তম্ (ঘ)।

৪৮। অমুতোঽমুষ্মাদ্দেহাদ্ যে কেশা অহীয়ন্ত প্রচ্যুতাঃ, তেঽহয়ো জাতাঃ, প্রসর্পতঃ পাদাদ্যাকুঞ্চনৈঃ প্রচলতোঽমুষ্মাৎ সর্পাঃ, অতএব অগা ন ভবন্তীতি নাগা অতিবেগবন্ত ইত্যর্থঃ। ভোগবতো জাতত্বাদ্ভোগেন ফণেন উরুর্বিস্তীর্ণা কন্ধরা যেষাম্। সর্ব্বে চৈতে ক্রোধযোগাৎ ক্রূরাঃ, তেষা-মবান্তরজাতিভেদঃ সর্পসিদ্ধান্তে প্রসিদ্ধঃ॥

৪৯। যদা মন্যমানোঽভূৎ, তদা মনূন্ সসর্জ্জ॥

৫০। তেভ্যঃ স্বীয়ং পুরুষং পুরুষাকারং পুরং দেহমত্যসৃজৎ দদৌ, তান্ মনূন্॥

৫১। তে ত্বয়া যৎ কৃতম্, তৎ সুকৃতম্। সুকৃতত্বমাহুঃ—যস্মিন্ মনুসর্গে, ক্রিয়া অগ্নিহোত্রাদ্যাঃ; অতোঽস্মিন্ সর্ব্বে বয়ং সাকং সহ অন্নং হবির্ভাগাদি অদাম ভক্ষয়াম, হে ব্রহ্মন্॥

৫২। কর্ম্মি[১]-সৃষ্টিমুক্ত্বা ঋষিণাং সৃষ্টিমাহ—তপসেতি। বিদ্যা উপাসনা, যোগোঽত্র আসনাদি, সুসমাধির্বৈরাগ্যৈশ্বর্য্যযুক্তঃ সমাধিঃ, তেন চ যুক্তঃ; হৃষীকেশঃ স্ববশেন্দ্রিয়ঃ সন্, ঋষির্ব্রহ্মা ঋষীন্ প্রজাঃ[২] সসর্জ্জ॥

৫৩। কিং তদ্দেহং, যস্যাংশমদাৎ? ইত্যত আহ—যদিতি; সমাধিশ্চ যোগশ্চ ঋদ্ধিরৈশ্বর্য্যঞ্চ তপশ্চ বিদ্যা চ বিরক্তিশ্চ বিদ্যন্তে যস্মিন্, তৎ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
বিংশোঽধ্যায়ঃ॥ ২০॥

১। কায়-(য); ২। প্রজাপতীন্(ক)।

একবিংশোঽধ্যায়ঃ

একবিংশে তপোবিদ্যা-তোষিতেন তু বিষ্ণুনা।
কর্দ্দমস্থ মনোঃ পুত্র্যা বিবাহঘটনোচ্যতে॥ (১)

১। এধিরে—এধাঞ্চক্রিরে॥

২—৪। ধর্ম্মং মহীঞ্চ যথা জুগুপতু ররক্ষতুঃ, তন্মে বদেতি তৃতীয়েনান্বয়ঃ॥ (৩) তস্থ—মনোঃ॥ (৪) যোগলক্ষণৈর্যমাদিভির্যুক্তায়াং কতিধা বীর্য্যং সসর্জ্জ, কতি পুত্রানুৎপাদয়ামাসেত্যর্থঃ॥

৫। মানবীং মনোঃ কন্থামাকূতিং প্রসূতিঞ্চ ভার্য্যাং লব্ধ্বা, যথা ভূতানি সসর্জ্জ, তচ্চ বদেতি চকারস্থার্থঃ॥

৬। সহস্রাণাং সমা দশ—দশ সহস্রাণি সংবৎসরাণীত্যর্থঃ॥

৭। ততস্তস্মিন্ তপসি, ক্রিয়াযোগেন পূজাপ্রকারেণ, সম্প্রপেদে সিষেবে, প্রপন্নেভ্যো ভক্তেভ্যো বরদাতারম্॥

৮। শব্দৈকবেন্থং যদ্ ব্রহ্ম, তন্ময়ং বপুর্দধৎ, তং প্রত্যাত্মানং দর্শয়ামাস॥

৯—১২। স কর্দ্দমস্তং খেঽবস্থিতং দৃষ্ট্বা মূর্দ্ধ্না ক্ষিতাবপতৎ, গীর্ভিশ্চাভ্যগৃণাদিতি চতুর্ণামন্বয়ঃ। পদ্মোৎপলে দিনরাত্রিবিকাশে, সিতানাং পদ্মানামুৎপলানাঞ্চ স্রগ্‌যস্থ তম্, স্নিগ্ধা নীলাশ্চ যে অলকাস্তেষাং ব্রাতো বক্ত্রাব্জে যস্থ॥ (১০) শ্বেতোৎপলং ক্রীড়নকং যস্থ, মনঃস্পর্শং মনস্থানন্দজনকং স্মিতমীক্ষণঞ্চ যস্থ॥ (১১) বক্ষসি শ্রীর্যস্থ, কৌস্তুভং কন্ধরায়াং যস্থ॥ (১২) প্রীতিরেব স্বভাবঃ স্বতঃসিদ্ধো ধর্ম্মো যস্থ, তথাবিধ আত্মা মনো যস্থ॥

১৩। ত্বামৃতে পরমানন্দং ধিগন্থবরকামুকম্।
তথাপি কৃপণং মানুগৃহাণ বরদানতঃ॥

বতেতি হর্ষে ; হে ঈড্য ! নোঽস্মাভিঃ সমগ্রসত্ত্বনিধেস্তব দর্শনাদস্ত অক্ষ্ণোঃ সাংসিদ্ধ্যং সাফল্যং জুষ্টং সেবিতম্। ত্বদ্দর্শনমেব মহাফলমিত্যুপপাদয়তি—যস্ত তব দর্শনং সদ্ভিরুত্তরমাপাদিতপ্রকর্ষৈর্জন্মভী রূঢ়োঽধিরূঢ়ো[১] যোগো যৈস্তেঽপি ॥

১৪। সকামভক্তান্ বিগর্হয়ন্নাহ—য ইতি; হে ঈশ ! যে নিরয়েঽপি স্যুস্তেষাং কামানাং লবায়, যে ত্বন্মায়য়া নষ্টবুদ্ধয়স্ত এবোপাসতে, ত্বন্তু তান্ তেষাং কামানপি রাসি দদাসি ॥

১৫। যঃ সকামান্ নিন্দামি, সোঽহমপি তাদৃশ এবেত্যাহ—তথেতি। গৃহমেধো গৃহাশ্রমঃ, তত্র ধেনুং ত্রিবর্গদোগ্ধ্রীং ভার্য্যাং পরিবোঢ়ুকামঃ পরিণেতুমিচ্ছন্ কামতুঘাজ্ঘ্রিপস্ত কল্পদ্রুমস্ত তব মূলমজ্ঘ্রিমুপেয়িবানুপগতোঽস্মি। নন্বু কামাত্থর্থমন্যৎ কিমপ্যুপাস্ততাম্ ? ন ; যতঃ অশেষস্ত পুরুষার্থস্থ মূলমেতদেব ॥

১৬। নন্বু তর্হি মুক্ত্যর্থমেব কিং ন ভজসি ? অনধিকারাদিত্যাহ—হে অধীশ ! যস্ত্বং প্রজাপতিস্তস্ত তব বচসা তন্ত্র্যা অয়ং কামহতো লোকঃ পশুবদ্বদ্ধঃ। হে শুক্ল ! ধর্ম্মমূর্ত্তে ! অহঞ্চ কিল লোকানুগতঃ, অতস্তুভ্যং বলিং বহামি হরামি, কর্ম্মময়ীং ত্বদাজ্ঞামনুবর্ত্তে, অনিমিষায় কালাত্মনে, তদর্থং ভার্য্যাঞ্চেচ্ছামীতি চকারস্থার্থঃ। ন কেবলং লোকানুগতো বলিং বহামি, কিন্তু ঋণত্রয়াপাকরণার্থমিতি কিলেত্যুক্তম্ ॥

১৭—১৮। অনিমিষায়েত্যনেন কালাত্মকাৎ ত্বত্তো ভীতঃ কর্ম্ম করোমীত্যুক্তম্ ; এতত্তু ভয়ং ত্বদ্ভক্তানাং নাস্তীত্যাহ দ্বাভ্যাম্। লোকান্ কামাভিভূতান্, তাননুগতান্ পশূংশ্চ, বিবেকে সত্যপি পুনঃ কর্ম্মজড়ান্ মাদৃশান্ হিত্বা অনাদৃত্য যে তব চরণরূপমাতপত্রং শ্রিতাঃ, তানেবাহ। ত্বদ্‌গুণানাং বাদঃ কথা, তদেব সীধু মদিরা সংসারবিস্মারকত্বাৎ, পীযূষং

১। বিরূঢ়ো (ঘ)।

রুচিকরত্বাৎ, তেন নির্যাপিতা বিলাপিতা দেহধর্ম্মাঃ ক্ষুৎপিপাসাদয়ো যৈঃ, এষামিত্যুত্তরেণান্বয়ঃ॥ (১৮) তব যৎ ত্রিনাভি কালচক্রম্, তৎ জগদাচ্ছিন্ত্বাকৃষ্য ধাবদপি এষাং ত্বদ্ভক্তানামায়ুরাচ্ছিন্ত ধাবন্ন ভবতি। কথম্ভূতম্? অজরং ব্রহ্ম, তস্মিন্নক্ষরূপে ভ্রমির্ভ্রমণম্; ভ্রমদিতি বক্তব্যে অতিভ্রমণশীলত্বাদুপচারেণ ভ্রমিরিত্যভেদনির্দ্দেশঃ। অধিমাসেন সহ ত্রয়োদশ মাসা অরা যস্য, ত্রিশতং ষষ্টিশ্চাহোরাত্রাঃ পর্ব্বাণি যস্য; শতশব্দে বিভক্তেরলুগার্ষঃ। ষট্ ঋতবো নেময়ো যস্য, অনন্তাঃ ক্ষণলবাদয়শ্ছদাঃ পত্রাণি পত্রাকারা ধারাঃ সন্তি যস্য, ত্রীণি চাতুর্ম্মাস্যানি নাভয় আধার-ভূতানি বলয়ানি যস্য, করালস্রোতস্তীব্রবেগম্; এতৈর্বিশেষণৈরেব বৎসরাত্মকং চক্রমুক্তমিতি দ্রষ্টব্যম্॥

১৯। ননু নিরুপাধিমুদাসীনং কিং মাং যাচসে? তথাপি মায়য়া বিশ্বসৃষ্ট্যাদিকর্তৃত্বাৎ ত্বমেব যাচ্য ইত্যাহ—স্বয়মেক এব সন্নপি, আত্মন্যধি-কৃতয়া যোগমায়য়া হেতুভূতয়া যাঃ স্বীকৃতাঃ শক্তয়ঃ সত্ত্বাদ্যাস্তাভিঃ; অদো বিশ্বম্। স্বব্যতিরিক্তসাধনানপেক্ষত্বে দৃষ্টান্তঃ—যথেতি॥

২০। যদ্যপি মায়িকত্বাদ্ভক্তেভ্যো বিষয়সুখং দাতুং নেচ্ছসি, তথাপ্য-স্মদভিপ্রায়ানুসারেণ তৎ সম্পাদয়েত্যাহ—নৈতদিতি। হে অধীশ! নোঽস্মাকং ভজতাং ভূতসূক্ষ্মরূপং পদং শব্দাদি-বিষয়সুখং মায়য়া তনুষে বিস্তারয়সীতি যৎ, এতত্তব যদ্যপীপ্সিতং ন ভবতি, তথাপ্যস্মদনুগ্রহায়াস্তু; ঋণত্রয়াপাকরণানন্তরমেবাপবর্গায় ভবত্বিত্যর্থঃ। যর্হি যতো মায়য়া পরিচ্ছিন্ন ইব লসন্ত্যা তুলস্যা যুক্তস্ত্বং বিলক্ষিতোঽসি; এবম্ভূতস্য তব দর্শনং যতো ভুক্তিমুক্তিপ্রদমিত্যর্থঃ॥

২১। তং ত্বা ত্বাং ভুক্তিমুক্তিপ্রদং নমামি। মুক্তিদত্বে হেতুঃ—অনুভূত্যা জ্ঞানেন উপরতঃ ক্রিয়ার্থঃ কর্ম্মফলভোগো যস্মিন্, ভোগপ্রদত্বে হেতুঃ—স্বমায়য়া আবর্ত্তিতং লোকতন্ত্রং বিশ্বোপকরণং যেন। অতঃ

সকামৈর্নিষ্কামৈশ্চ নমনীয়ং পাদসরোজযুগ্মং যস্য তম্। তত্রাপ্লীয়সি সকামে পুংসি ভজনে বা কামান্ বর্ষতীতি তথা তম্॥

২২। অমৃতেন সুখকরেণ, প্রেমস্মিতাভ্যামীক্ষণেন বিভ্রমন্তী ভ্রূর্যস্য॥

২৩। চৈত্ত্যং হার্দ্দং ভাবম্, মে ময়া সমযোজি সঙ্ঘটিতম্, যদর্থমেবাহং সমর্চ্চিতস্ত্বং॥

২৪। ময়ি সংগৃভিতঃ সংগৃহীতঃ একাগ্রীকৃত আত্মা চিত্তং যৈঃ, তেষাং মন্দর্হণম্, তাদৃশেষু অতিতরাং সর্ব্বথা মৃষা নিষ্ফলং ন স্যাৎ॥

২৫। বিখ্যাতং মঙ্গলমভ্যুদয়-সদাচারাদি লক্ষণং যস্য॥

২৬। হে বিপ্র! ; মহিষ্যা সহ॥

২৮। যত্র যস্যাং ভার্য্যায়াং সমাহিতমভিসন্ধানেন[১] স্থিতম্, নৃপবধূঃ রাজকন্যা॥

২৯। তে বীর্য্যং বীজমাত্মনি ভৃতং ধৃতং যা প্রসবিষ্যতি, সা ভজিষ্যতি ; বীর্য্যে বীর্য্যপ্রসূতাসু কন্যাসু অঞ্জসা আত্মনঃ পুত্রানাধাস্যন্তি॥

৩০। নিদেশমাজ্ঞাম্, উশত্তমঃ শুদ্ধসত্ত্বঃ, তীর্থং পাত্রম্, তেন দানং লক্ষ্যতে ; ময়ি সমর্পিত-সর্ব্বকর্ম্মফল ইত্যর্থঃ॥

৩১। গার্হস্থ্যেন দয়াং কৃত্বা, সন্ন্যাসেন চাভয়ং দত্ত্বা, ময়ি আত্মানং জগচ্চ সহৈকীভূতং দ্রক্ষ্যসি॥

৩২। তদ্বীর্য্যেণ সহ দেবহূত্যামবতীর্য্যেতি শেষঃ॥

৩৩। প্রত্যগ্ ভূতেষক্ষেষু জায়তে আবির্ভবতীতি প্রত্যগক্ষজঃ। সরস্বত্যা নদ্যা পরিশ্রিতাৎ পরিবেষ্টিতাৎ॥

৩৪। অশেষৈস্তপোমন্ত্রাদিসিদ্ধেশ্বরৈরভিষ্টুতঃ, সিদ্ধমার্গো বৈকুণ্ঠমার্গো যস্য, যদ্বা, অশেষসিদ্ধেশ্বরাভিষ্টুতশ্চাসৌ সিদ্ধৈর্মৃগ্যত ইতি সিদ্ধ-

---

১। -ধ্যানেন (গ)।

মার্গশ্চ স যযৌ, পত্ররথেন্দ্রো গরুড়স্তস্য পক্ষৈরুদীর্ণমভিব্যক্তং সাম আকর্ণয়ন্, 'বৃহদ্রথন্তরে পক্ষৌ' ইতি শ্রুতেঃ। উচ্চারিতং স্তোমঞ্চ সামাধারভূতানামৃচাং সমুদায়ং শৃণ্বন্; 'স্তোম আত্মা' ইতি শ্রুতেঃ। সমাস-পাঠে উচ্চারিতঃ স্তোমঃ স্তোত্রীয়সমুদায়ো যস্য সাম্ন ইতি॥

৩৫। তং কালং পরশ্ব ইত্যুক্তং প্রতীক্ষমাণঃ॥

৩৬। শাতকৌম্ভাঃ সৌবর্ণাঃ পরিকরা যস্মিংস্তং রথমাস্থায় দুহিতরঞ্চারোপ্য বরান্বেষণার্থং পর্য্যটন্ ॥

৩৭। হে সুধন্বন্! বিদুর; যৎ অহঃ॥

৩৮—৪৪। তৎ প্রবেশমাত্রেণ পরমানন্দং প্রাপ্ত ইতি দর্শয়িতুমাশ্রমং বর্ণয়তি—যস্মিন্নিত্যাদিভিঃ সপ্তভিঃ শ্লোকৈঃ। প্রপন্নে কর্দ্দমে॥ (৩৯) শিবমারোগ্যম্, অমৃতবৎ স্বাদু জলং যস্মিন্॥ (৪০) কূজন্তঃ পুণ্যা মৃগা দ্বিজাশ্চ যেষু তৈঃ, পুণ্যদ্রুমলতানাং জালৈঃ সমূহৈর্যুক্তম্॥ (৪১) ঘুষ্টং নাদিতম্, মত্তভ্রমরাণাং বিভ্রমো বিনোদো যস্মিন্; মত্তা বর্হিণ এব নটাস্তেষামাটোপো নৃত্যসম্ভ্রমো যস্মিন্; আহ্বয়ন্তো মিথো মত্তাঃ কোকিলা যস্মিন্॥ (৪২) কদম্বাদিভির্বৃক্ষৈরলঙ্কৃতম্॥ (৪৩) কারণ্ডবাদিভিঃ পক্ষিভির্বল্গু যথা তথা কূজিতম্॥ (৪৪) হরিণাদিভির্বৃতম্, তত্র ক্রোড়ঃ শূকরঃ, শ্বাবিৎ শল্লকঃ, মর্কো মর্কটঃ, তদ্বিশেষা গোপুচ্ছাঃ, হরির্বানরঃ সিংহো বা; নাভিঃ কস্তূরীমৃগঃ॥

৪৫। হুতঃ হুতাশনো ব্রহ্মচারিযোগ্যো যেন॥

৪৬। উগ্রো যুক্ যোগো যস্য, তেন বপুষা বিদ্যোতমানম্; তস্য ভগবতো ব্যাহৃতং ভাষণমেবামৃতকলা অমৃতময়স্য[1] চন্দ্রস্য কলা, তন্ময়ং পীযূষম্, তস্য শ্রবণেন চ নাতিক্ষামং তপসা কৃশং তথাপ্যকৃশম্॥

১। অমৃতমণ্ডলস্য (খ)।

৪৭। প্রাংশুমুন্নতম্, উপসংসৃত্য সমীপং গত্বা, মলিনং দদর্শেতি পূর্ব্বেব ক্রিয়া। অর্হ্যতেঽনেনেতি অর্হণং মহারত্নং, তদসংস্কৃতমনির্ণিক্তং যথা মলিনং দৃশ্যতে, তদ্বৎ ॥

৪৮। উটজং পর্ণশালাপ্রাপ্তম্, পুরঃ পাদসমীপে প্রণতম্, আশীর্ভিরভিনন্দ্য সপর্য্যয়া পূজয়া প্রত্যগৃহ্লাৎ সৎকৃতবান্ ॥

৫০। তে চংক্রমণং পর্য্যটনম্ ; হি যস্মাৎ ॥

৫১। মনুস্থং বিষ্ণুং প্রণমতি—য ইতি। স্থানে তত্তৎকার্য্যাবসরে, শুক্লায় বিষ্ণবে ॥

৫২—৫৬। ন যদেতি পঞ্চানাময়মর্থঃ—যদ্যপি ধর্ম্মরক্ষার্থং সর্ব্বতঃ পর্য্যটতস্তব প্রসঙ্গাদত্রাপ্যাগমনং সম্ভবতি, তথাপি বিশেষকার্য্যং চেদস্তি, তৎ কথ্যতামিতি। জৈত্রং জয়প্রদং, মণিগণা অর্পিতা যস্মিন্, তং রথমারুহ্য ত্বং যদা ভুবো মণ্ডলং ন পর্য্যটসি, তদা সেতবো ভিদ্যেরন্নিতি ত্রয়াণামন্বয়ঃ। বিস্ফূর্জ্জৎ নাদং কুর্ব্বচ্চণ্ডং কোদণ্ডং ধনুর্যস্য ॥ (৫৩) স্বসৈন্যস্য চরণৈঃ ক্ষুণ্ণং সঙ্ঘটিতম্ ॥ (৫৪) বর্ণাশ্রমাণাং নিবন্ধনং যৈঃ ; বত অহো ॥ (৫৫) নিরঙ্কুশৈর্নৃভির্নিমিত্তভূতৈঃ, শয়ানে নিশ্চিন্তে ॥ (৫৬) নির্ব্যলীকেন, সহর্ষেণ প্রতিপদ্যামহে স্বীকুর্ম্মহে ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
একবিংশোঽধ্যায়ঃ ॥ ২১ ॥

দ্বাবিংশোঽধ্যায়ঃ

দ্বাবিংশে কর্দ্দমায়াদাদ্‌যথাদিষ্টং হি বিষ্ণুনা ।
মনুর্দু হিতরং দেবহূতিমিত্যনুবর্ণ্যতে ॥ (১)

১ । এবমাবিষ্কৃতোঽভিষ্টুতোঽশেষাণাং গুণানাং কর্ম্মণাঞ্চোদয় উৎকর্ষো যস্য, স সম্রাট্ মনুঃ । সব্রীড় ইব স্বকীর্ত্তিশ্রবণাৎ প্রত্যাখ্যানশঙ্কয়া বা, তং মুনিমুবাচ ; উপারতং নিবৃত্তিনিরতম্ ॥

২—৪ । মদীয়া কন্যা ত্বয়া পরিণেয়েতি বিজ্ঞাপয়িষ্যন্ যুষ্মদস্মৎসম্বন্ধস্তাবদীশ্বরেণ পূর্ব্বমেব ঘটিত ইত্যাহ—ব্রহ্মেতি সার্দ্ধদ্বাভ্যাম্ । আত্মনঃ পরীপ্সয়া পর্য্যাপ্তুমিচ্ছয়া, ছন্দোময়স্যাত্মনঃ পর্য্যাপ্তিঃ পালনং বেদপ্রবর্ত্তনম্, তস্যেচ্ছয়া যুষ্মান্ ব্রাহ্মণান্ অসৃজৎ ॥ (৩) তত্ত্রাণায় ব্রাহ্মণপালনায় ; ব্রহ্ম ব্রাহ্মণজাতিঃ ; ক্ষত্রং ক্ষত্রিয়জাতিঃ ॥ (৪) এবং স দেব এব রক্ষতি স্ম । কোঽসৌ ? যঃ সদসদাত্মকঃ সর্ব্বাত্মকঃ, তথাপ্যব্যয়ো নির্ব্বিকারঃ ॥

৫—৭ । তং বিজ্ঞাপয়িতুমেব তদ্দর্শনাদিকমভিনন্দতি—তবেতি ত্রিভিঃ ॥ (৬) অকৃতাত্মনামবশীকৃতচিত্তানাম্ ॥ (৭) অনুগ্রহোঽনুশাসনাদিরূপ এব । উশতীঃ উশত্যঃ ॥

৮—১৪ । বিজ্ঞাপয়তি—স ভবানিতি সপ্তভিঃ । দুহিতুঃ স্নেহেন পরিক্লিষ্ট আত্মা যস্য, শ্রাবিতং বিজ্ঞাপিতম্ ॥ (৯) প্রিয়ব্রতোত্তানপদোঃ স্বসেতি পুত্রিকাকরণশঙ্কা নিরস্তা । মম সুতেতি ক্ষত্রিয়কন্যা তব যোগ্যেতি দর্শিতম্ ॥ (১০) এষা দেবহূতিঃ ॥ (১১) প্রতীচ্ছ স্বীকুরু ॥ (১২) উদ্যতস্য স্বতঃ প্রাপ্তস্য, কামস্য বিষয়স্য, প্রতিবাদঃ প্রত্যাখ্যানম্ ॥ (১৩) কীনাশং কৃপণম্, অবজ্ঞয়া পরাপমানেন ॥ (১৪) যস্য সাবধি ব্রহ্মচর্য্যং, স উপকুর্ব্বাণঃ ; মে প্রত্তাং ময়া দত্তাম্ ॥

১৫। অপ্রত্তা চেতি, ময্যেবকৃতনিশ্চয়ত্বাৎ কস্মৈচিৎ প্রতিশ্রুতা চ ন ভবতীত্যর্থঃ। আন্তঃ প্রথমঃ, ততঃ পূর্ব্বং বিবাহাভাবাৎ মুখ্য ইতি বা ॥

১৬। ভূয়াৎ ভবেৎ ; প্রতীতঃ—'গৃভ্ণামি তে সৌভগত্বায় হস্তং ময়া পত্যা' ইত্যাদি-মন্ত্রপ্রসিদ্ধঃ। স্বয়াঙ্গকান্ত্যৈব শ্রিয়ং বিভূষণাদিশোভাম্ ॥

১৭। যাং বিলোক্য ন্যপতৎ, সম্মোহেন বিমূঢ়ং ব্যাকুলং চেতো যস্য, ক্বণন্ত্যামঙ্ঘ্রিভ্যাং শোভা যস্যাঃ ॥

১৮। ললনানাং ললামং ভূষণভূতাম্, অসেবিতৌ শ্রিয়শ্চরণৌ যৈস্তৈরদৃষ্টাং দ্রষ্টুমপ্যযোগ্যাম্, উচ্চপদঃ উত্তানপাদস্য, অভিযাতাং স্বয়ং-প্রাপ্তাম্ ॥

১৯। ভজিষ্যে স্বীকরিষ্যে, 'যাবদপত্যোৎপত্তিস্তাবদ্গার্হস্থ্যম্, ততঃ পরং সন্ন্যাসঃ' ইতি ভাষাবন্ধঃ সময়ঃ ; তমেবাহ—'যাবদাত্মনো মম চ তেজো গর্ভং বিভৃয়াৎ; যদ্বা, মমাত্মনো দেহাচ্চ্যুতং তেজো বীর্য্যং বিভৃয়াৎ' ইতি। অতঃপরং পারমহংস্যং জ্ঞানং, তস্মিন্ মুখ্যান্, শুক্লেন বিষ্ণুনা সাক্ষাৎ প্রকর্ষেণোক্তান্, অবিহিংস্রান্ হিংসারহিতান্ শমাদীন্, বহু যথা ভবতি, এবমনুষ্ঠেয়ান্ মন্যে ॥

২০। ননু তব পিতুঃ প্রজাপতে রাজ্ঞা সৃষ্টাবেব, ন সন্ন্যাসে, তত্রাহ—যত ইতি। সংস্থাস্যতে চ লয়ং যাস্যতি, বাবেতি এবার্থে, ঋণত্রয়াপা-করণানন্তরং সন্ন্যাস এব মাদৃশানাং ভগবতোক্ত ইত্যর্থঃ ॥

২১। হে উগ্রধন্বন্, বিদুর! লুলুভে মুনের্মুখেন প্রলোভ্যতে স্ম ; যদ্বা, মুখেন প্রলোভিতবান্ ॥

২২। স মনুঃ অনু অনন্তরং, মহিষ্যাশ্চ ব্যবসিতং নিশ্চয়ং জ্ঞাত্বা ॥

২৩। পারিবর্হান্ বিবাহকালে প্রদেয়ান্, ভূষা ভূষণানি চ বাসাংসি চ, পরিচ্ছদান্ গৃহোপকরণাদি চ ॥

২৪। প্রত্তাং প্রদত্তাম্; সদৃক্ষায় সদৃশায়; গতা ব্যথা চিন্তা যস্য, ঔৎকণ্ঠ্যেন উন্মথিতঃ ক্ষুভিত আশয়ো যস্য ॥

২৫। তস্যা বিরহং সোঢ়ুম্। হে অম্ব! হে বৎসে! ইতি ব্রুবন্, সন্ধিরার্ষঃ; শিখাঃ কেশানাসিঞ্চৎ ॥

২৭। ঋষিকুলহিতায়া উভয়োঃ সুরোধসোঃ শোভনতটয়োঃ ॥

২৮। অভিপ্রেত্য জ্ঞাত্বা, ব্রহ্মাবর্ত্তাৎ দেশাৎ প্রজাঃ পতিং প্রত্যুজ্জগ্মুঃ ॥

২৯। কোঽসৌ ব্রহ্মাবর্ত্তঃ? ইত্যপেক্ষায়ামাহ—যত্র বর্হিষ্মতী নাম পুরীতি। সাপি কুত্র? যত্র যজ্ঞস্য যজ্ঞবরাহস্য রোমাণি ন্যপতন্নিতি। যত্রেতি সর্ব্বত্র সম্বধ্যতে ॥

৩০—৩১। বর্হিষ্মতীনামনিরুক্তিং ব্রুবন্ প্রসঙ্গাদ্দেশস্য শ্রৈষ্ঠ্যমাহ দ্বাভ্যাম্। কুশাঃ কাশাশ্চাসন্। শশ্বৎ নিত্যং হরিতং বর্চ্চো বর্ণো যেষাম্, যজ্ঞঘ্নান্ রাক্ষসাদীন্ পরাভবং নীত্বা; যজ্ঞং বিষ্ণুম্ ॥ (৩১) যত ইতি যত্রাযজৎ, ভুবং স্থানং লব্ধেতি, তৃন্‌প্রত্যয়ান্তং লব্ধবান্ সন্নিত্যর্থঃ। যতো লব্ধবান্ তং যজ্ঞপুরুষমিতি বা। এতেন স্বর্গাদপি ভূমিঃ শ্রেষ্ঠা, তত্রাপি তৎ স্থানং শ্রেষ্ঠমিত্যুক্তং ভবতি ॥

৩২। প্রস্তুতমাহ—যাং বর্হিষ্মতীং নাম পুরীং সমাবসৎ, পূর্ব্বং যস্যাম্ উষিতস্তস্যাং নিবিশ্য ভবনং প্রবিষ্টঃ সন্, ভোগান্ বুভুজে ইত্যন্বয়ঃ ॥

৩৩। অন্বেষাং ধর্ম্মাদীনামবিরোধেন। প্রত্যূষেষু উষঃসু সংগীয়মানা সৎকীর্ত্তির্যস্য। তথাপি স্বয়ং হরেরেব কথাঃ শৃণ্বন্ ভোগান্ বুভুজে ॥

৩৪। যোগমায়াসু ঐচ্ছিকভোগরচনাসু, যৎ যতঃ, আভ্রংশয়িতুম্ ঈষদপি ভ্রংশয়িতুমভিভবিতুম্ ॥

৩৫। অতঃ যাতো যামো যস্য পক্বস্যান্নস্য, তৎ গতসারং ভবতি, অতোঽন্যদপি গতসারং যাতযামমুচ্যতে। অযাতযামা অগতসারা আসন্।

স্বান্তরং তদীয়ং মন্বন্তরং নয়ন্তি যাপয়ন্তি গময়ন্তি যে যামাঃ কালাবয়বাঃ, কুর্ব্বতঃ স্ববাক্যৈরুপনিবধ্নতঃ ॥

৩৬। পরিভূতং গতিত্রয়ং জাগ্রদাদি সাত্ত্বিকাদি বা যেন ॥

৩৭। দিব্যাস্ত্বান্তরীক্ষাঃ, মানুষাঃ শত্রুপ্রভবাঃ, ভৌতিকাঃ শীতোষ্ণাদি-প্রভবাঃ। বৈয়াসে! বিদুর ॥

৩৮। তস্ত জ্ঞানাতিশয়মাহ—য ইতি। নৃণাং সাধারণধর্ম্মান্ ॥

৩৯। তস্ত যদপত্যং দেবহূতিঃ, তস্যা উদয়ং প্রভাবম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
দ্বাবিংশোঽধ্যায়ঃ ॥ ২২ ॥

ত্রয়োবিংশোঽধ্যায়ঃ

ত্রয়োবিংশে তপোযোগ-নির্ম্মিতে সর্ব্বসম্পদি।
বিমানে কামগে চিত্রা তয়ো রতিরুদীর্য্যতে ॥ (১)

১। প্রস্থিতে গমনে কৃতে সতি ॥

৩। দম্ভং কপটম্, অঘং নিষিদ্ধাচরণম্, তেজীয়াংসমতিতেজস্বিনম্ ॥

৪। দৈবাদ্গরীয়সো দৈবাদপি গুরুতরাৎ, দৈবমপ্যন্যথাকর্ত্তুং সমর্থা-দিত্যর্থঃ ॥

৫। ব্রতচর্য্যয়া কর্শিতাম্, তত্রাপি ভূয়সা কালেনাতিক্ষামামিত্যর্থঃ ॥

৬। সুহৃৎ প্রিয়ঃ, মদর্থে ক্ষপয়িতুং নাবেক্ষিতঃ, ন গণিতঃ, সমুচিতঃ শ্লাঘ্যোঽপি মৎসেবাসক্তয়োপেক্ষিত ইত্যর্থঃ ॥

৭। তপশ্চ সমাধিশ্চ বিদ্যা চ উপাসনা চ, তাসু য আত্মযোগশ্চিত্তৈ-কাগ্র্যম্, তেন বিজিতাঃ প্রাপ্তা ভগবৎপ্রসাদা দিব্যা ভোগাঃ, তানেব তে অবরুদ্ধান্ ত্বয়াপি বশীকৃতান্ প্রপশ্য। তে দিব্যাং দৃষ্টিং বিতরামি, যয়া দৃষ্ট্যা দ্রক্ষ্যসি॥

৮। অন্যে পুনর্ভোগাঃ কিম্? ন কিমপি, অতিতুচ্ছা ইত্যর্থঃ। অত্র হেতুঃ—ভগবত উরুক্রমস্য যা ভ্রূঃ, তস্যা উদ্বিজৃম্ভো বক্রীভাবঃ, তেন বিভ্রংশিতা অর্থরচনা মনোরথা যেষু; নিজধর্ম্মেণ পাতিব্রত্যেন দুহন্ত ইতি তথা তান্, দুরধিগান্ দুষ্প্রাপান্, নৃপা বয়মিতি যা বিক্রিয়াস্তত্তদ্ভোগ-বিকৃতয়স্তাভিঃ॥

৯। অখিলা যোগমায়াশ্চ বিদ্যাশ্চ তত্তদুপাসনাঃ, তাসু বিচক্ষণং নিপুণম্, এবং ব্রুবাণং পতিমবেক্ষ্য গতাধির্নিশ্চিন্তা জাতা। সম্প্রশ্রয়ো বিনয়ঃ, প্রণয়ঃ প্রেম, তাভ্যাং বিহ্বলা গদ্‌গদা, তয়া গিরা, ঈষদ্ ব্রীড়া-সহিতো যোঽবলোকস্তেন বিলসদ্‌বিকসিতং হসিতমাননং যস্যাঃ সা, আহ জগাদ॥

১০। বতেতি হর্ষে; দ্বিজবৃষ! দ্বিজশ্রেষ্ঠ! হে ভর্ত্তঃ! ত্বয়ি এতৎ সর্ব্বং রাদ্ধং সিদ্ধমেব, তদহমবৈমি জানামি। কিন্তু যস্তে ত্বয়া সময়োঽ-ভিহিতঃ, স তাবদ্ভূয়াৎ। সকৃদিতি গর্ভসম্ভবমাত্রপর্য্যন্ত ইত্যর্থঃ। যস্মাদ্ গরীয়সি শ্রেষ্ঠে ভর্ত্তরি হেতুভূতে স্ত্রীণাং প্রসবো গুণো মহান্ লাভঃ। সমাসপাঠে গরীয়সি পত্যৌ সতি, সতীনাং যতো গুণপ্রসবো গুণবিস্তারো ভবতি, অতঃ পুত্রোৎপত্ত্যা মম গুণবিস্তারে জাতে পশ্চাত্তদুক্তং সর্ব্বং ভবত্বিতি ভাবঃ॥

১১। অঙ্গসঙ্গার্থঞ্চ প্রথমমিতিকর্ত্তব্যতাং সম্পাদয়েত্যাহ—হে ঈশ! তত্রাঙ্গসঙ্গে ইতিকৃত্যং সাধনং যথোপদেশং কামশাস্ত্রানুসারেণ উপশিক্ষ সংজানীহি, উপকল্পয়েত্যর্থঃ; যেন সাধনেন অভ্যঙ্গভোজনপানাদিনা অতীব

রন্তুমিচ্ছয়া কর্শিতো দীনশ্চ মমৈব আত্মা দেহঃ সিধ্যেত রতিসমর্থো ভবেৎ। কথম্ভূতায়াঃ? তে ত্বয়ৈব কৃতঃ ক্ষোভিতো যো মনোভবস্তেন ধর্ষিতায়াঃ। তত্ততোঽনুরূপং ভবনঞ্চ বিচক্ষ্ব বিতর্কয়, বিচারয়েতি যাবৎ॥

১২। তর্হি তৎক্ষণমেব আবিরচীকরদাবির্ভাবয়াম্বভূব॥

১৩—২১। তদেব বিশিনষ্টি—সর্ব্বকামদুঘমিতি নবভিঃ। সর্ব্বৈশ্চ রত্নাদিভিঃ সমন্বিতম্, সর্ব্বর্দ্ধীনাং সর্ব্বসম্পদাং য উপচয়স্তস্য উদর্ক উত্তরোত্তরাতিবৃদ্ধির্যস্মিন্, উপস্কৃতং শোভিতম্॥ (১৪) উপস্করণং পরিকরঃ, পট্টিকা অল্পবিস্তারপট্টবস্ত্রবিশেষাঃ, পতাকা বিস্তৃতাঃ, তাভিঃ॥ (১৫) বিচিত্রাণি মাল্যানি পুষ্পাণি যাসু, মঞ্জু যথা ভবত্যেবং সিঞ্জন্তঃ কূজন্তঃ ষড়ঙ্ঘ্রয়ো যাসু, তাভিঃ স্রগ্ভিঃ॥ (১৬) উপর্য্যুপরিবিরচিতগৃহেষু কশিপুভিঃ শয্যাভিঃ কান্তং কমনীয়ম্, পর্য্যঙ্কাদিভিশ্চ কান্তম্॥ (১৮) দ্বার্ষু দ্বারেষু বিদ্রুমরচিতা দেহলী উড়ুম্বরস্তয়া ভাতং শোভিতম্, বজ্রখচিত-কবাটযুক্তম্; ইন্দ্রনীলমণিময়েষু শিখরেষু প্রাসাদাগ্রভাগেষু॥ (১৯) চক্ষুষ্মন্ত ইব যে পদ্মরাগাগ্র্যাস্তৈঃ; যদ্বা, চক্ষুষ্মদিব। কৈঃ? পদ্মরাগাগ্র্যৈঃ; বিচিত্রৈর্বৈতানৈর্বিতানসমূহৈঃ॥ (২০) কৃত্রিমানপি হংসাদীন্ স্বান্ স্বজাতীয়ান্ মন্যমানৈস্তত্র তত্রাধিরুহ্যাধিরুহ্য নিকূজিতম্॥ (২১) বিহারস্থানং ক্রীড়াপ্রদেশঃ, বিশ্রামঃ শয়নগৃহম্, সংবেশ উপভোগস্থানম্, প্রাঙ্গণং গৃহাদ্বহিঃ, অজিরং প্রাকারাদ্বহিঃ। যথোপজোষং যথাসুখমাত্মনঃ স্বস্য মায়াবিনোঽপি বিস্ময়জনকমিব[1]॥

২২। নাতিপ্রীতেন, মলিনদেহত্বাৎ পরিচারিকাভাবাচ্চ॥

২৩। অস্মিন্ হ্রদে বিন্দুসরসি, আরুহ অধিরোহ, শুক্লেন বিষ্ণুনা কৃতমানন্দবিন্দুপাতেন; যাপকং প্রাপকম্॥

১। মোহজনকমিব (ক)।

২৪। সমাদায় আদৃত্য, সরজং মলিনম্, বেণীভূতান্ জটিলান্ ॥

২৫। শবলৌ বিবর্ণৌ স্তনৌ যস্মিন্ তৎ ; সরস্বত্যাঃ শিবানি জলানি আশেরতে যস্মিন্, শিবা জলাশয়া জলচরা যস্মিন্ ইতি বা ॥

২৬—৩৫। সা তত্র নিমগ্না সতী বিস্ময়ং দদর্শ, তমাহ—সান্তঃ-সরসীতি দশভিঃ। উৎপলগন্ধয়ঃ স্ত্রিয়ঃ প্রোচুঃ—'তুভ্যং তব কর্ম্মকরীঃ পরিচারিকা বয়ম্, অস্মানাজ্ঞাপয়' ইতি॥ (২৮) ততশ্চ স্নানেন স্নান-যোগ্যতৈলাদিনা॥ (২৯) পরার্দ্ধ্যানি উৎকৃষ্টানি, বরীয়াংসি তৎপ্রিয়াণি, দ্যুমন্তি দীপ্তিমন্তি চ, পানং পেয়ম্, অমৃতং স্বাদু, আসবং মাদকম্ ॥ (৩০—৩৩) আদর্শে স্বমাত্মানং দদর্শেতি শেষঃ ; আত্মানং বিশিনষ্টি চতুর্ভিঃ। কৃতং স্বস্ত্যয়নং মঙ্গলং যস্ত ; পুংস্ত্বমাত্মশব্দসামানাধিকরণ্যাৎ ॥ (৩১) বিরজমিত্যস্ত প্রপঞ্চঃ—স্নাতমুদ্বর্ত্ত্য ক্ষালিতম্ ; কৃতং শিরঃস্নান-মভ্যঙ্গো যেন। ভূষিতত্বমেবাহ—নিষ্কং পদকং গ্রীবায়াং যস্ত ॥ (৩২) বহূনি রত্নানি যস্যাং তয়া, রুচকেন মঙ্গলদ্রব্যেণ কুঙ্কুমাদিনা ; তদুক্তং বিশ্বপ্রকাশে—'রুচকং মঙ্গলদ্রব্যে গ্রীবাভরণদন্তয়োঃ' ইতি॥ (৩৩) সুদতা সুভ্রুবা চক্ষুষেতি চ জাতাবেকবচনানি, এতৈর্লসৎ শোভমানং মুখং যস্ত। কথম্ভূতেন চক্ষুষা? শ্লক্ষ্ণো মনোহরঃ স্নিগ্ধোঽপাঙ্গো নেত্রপ্রান্তো যস্ত, পদ্মকোষেণ স্পর্দ্ধত ইতি পদ্মকোষস্পৃৎ, তেন ॥

৩৪। দৃষ্ট্বা চ যদা পতিং সস্মার, তদা যত্রাসৌ, তত্রৈব স্বয়মপ্যাস্তে ॥

৩৫। আত্মানং নিশাম্য দৃষ্ট্বা, তাঞ্চ তস্য যোগগতিং যোগপ্রভাবং দৃষ্ট্বা, সংশয়ম্—কিমিদমিতি বিস্ময়ম্ ॥

৩৬। স মুনির্বিবাহাৎ প্রাগাত্মনো যদ্রূপং, তদেব পুনর্বিভ্রতীম্, সংবীতৌ প্রাবৃতৌ রুচিরৌ স্তনৌ যস্যাঃ। সংবীতরুচিরস্তনমিতি পাঠে রূপবিশেষণম্ ॥

৩৭। শোভনে বাসসী যস্যাঃ, জাতো ভাবঃ প্রেম যস্য, হে অমিত্র-হন্! জিতকাম ॥

৩৮। তস্মিন্ বিমানে মুনির্বভ্রাজে। ন লুপ্তো মহিমা স্বাতন্ত্র্যং যস্য, উপচীর্ণং শুশ্রূষিতং বপুর্যস্য, বিকসিতকুমুদ্গণবান্। অপীব্যোঽতিসুন্দরঃ, পূর্ণচন্দ্র ইব মুনিঃ, নভ ইব বিমানম্, তারা ইব তাঃ স্ত্রিয়ঃ, কুমুদানীব তাসাং নেত্রাণীতি জ্ঞেয়ম্ ॥

৩৯। তেন বিমানেন, অষ্টলোকপালানাং বিহারো যস্মিন্ কুলাচলেন্দ্রে মেরৌ, তস্য দ্রোণীষু দরীষু, অনঙ্গস্য সখা যো মারুতঃ শীতসুগন্ধমন্দানিলঃ, তেন সৌভগং সৌন্দর্য্যং যাসু ; সিদ্ধৈর্নুতঃ স্তুতঃ সন্ , দ্যুধুনির্গঙ্গা, তস্যাঃ পাতেন শিবঃ স্বনো যাসু, তাসু রেমে। ললনাবরূথী স্ত্রীরত্নসমূহবান্ ॥

৪০। বৈশ্রম্ভকাদিষু দেবোদ্যানেষু, মানসে চ সরসি, রতঃ প্রীতঃ সন্ ॥

৪১। অত্যশেত অতিক্রম্য স্থিতঃ ॥

৪২। উদ্দামচেতসাং ধীরাণাম্, ব্যসনং সংসারঃ, তস্যাত্যয়ো যস্মাৎ ॥

৪৩। প্রেক্ষয়িত্বা দর্শয়িত্বা, গোলং মণ্ডলম্, স্বসংস্থয়া দ্বীপবর্ষাদি-রচনয়া যাবান্ তাবন্তম্ ; বহূনি আশ্চর্য্যাণি যস্মিন্, তম্ ॥

৪৪। বিভজ্য নবধা নবপ্রভেদমাত্মানং কৃত্বা ॥

৪৬। শরদঃ সংবৎসরাঃ, মনাক্ ঈষদিব ব্যতীয়ুঃ ॥

৪৭। আত্মনা স্বদেহার্দ্ধরূপেণ অতিপ্রীত্যা ভাবয়ন্ , তথা সতি সদপত্যং ভবেদিতি। নোধা নবধা, সর্ব্বসঙ্কল্পবিদিতি তস্যা বহ্বপত্য-সঙ্কল্পং জানন্নিত্যর্থঃ ; বিভুস্তথা কর্ত্তুং সমর্থশ্চ ; আত্মবিদিতি চ তস্যা-মনাসক্তত্বাৎ স্ত্রিয়ো জাতা ইতি ভাবঃ। 'পুমান্ পুংসোঽধিকে শুক্রে স্ত্রী ভবেদধিকে স্ত্রিয়াঃ' ইতি স্মৃতেঃ ॥

৪৮। অতোঽনন্তরমেব, সদ্যঃ একস্মিন্নেবাহনি, চারূণি সর্ব্বাণ্যঙ্গানি যাসাম্ ॥

৪৯—৫০। প্রব্রজিষ্যন্তমালক্ষ্য বিতর্ক্য, স্ময়মানা বহিঃ, অন্তস্তু বিক্লবেন ব্যাকুলেন, বিদূয়তা সন্তপ্যমানেন, হৃদা উবাচেত্যুত্তরেণান্বয়ঃ॥ (৫০) নখা এব মণয়স্তৈঃ শ্রীঃ শোভা যস্য, তেন পদা ভুবং লিখন্তীতি দুরন্ত-চিন্তালক্ষণম্॥

৫১। উপোবাহ সম্পাদিতবান্, অভয়মিতি ভাবিনো দৈন্যাৎ সংসারাচ্চ যদ্ভয়ম্, তন্নিবর্ত্তয়েত্যর্থঃ॥

৫২। তত্র দৈন্যং নিবেদয়তি—তুভ্যং তব দুহিতৃভিঃ স্বয়মেবাত্মনঃ সমা যোগ্যাঃ পতয়ো বিমৃগ্যা ইতি দৈন্যং প্রাপ্তম্। সংসারভয়মুররী-কৃত্যাহ—কশ্চিদিতি। বিশোকায় জ্ঞানোপদেশায়। স্ত্রীভিঃ ঋণানপা-করণাৎ, কঞ্চিৎ কালং তদবস্থানেন ব্রহ্মবিৎ পুত্রঃ কশ্চিৎ কিং ন স্যাদিত্যর্থঃ॥

৫৩। বিষায়ন্ ভুঙ্ক্ষ্ব, কিং ব্রহ্মবিদ্যয়েতি চেৎ, তত্রাহ—এতাবতা অলং পূর্য্যতে[১]। পরিত্যক্তঃ পর আত্মা যয়া, তস্যা মম॥

৫৪—৫৭। স্বকৃতমনুশোচন্ত্যাহ—ইন্দ্রিয়ার্থেম্বিতি চতুর্ভিঃ। মে ময়া পরং ভাবং তত্ত্বম্, ত্বং ব্রহ্মবিদিতি॥ (৫৫) প্রসঙ্গঃ কথমভয়য়াস্তু? তত্রাহ—সঙ্গ ইতি। অধিয়া অজ্ঞানেন॥ (৫৬) স্বভাবতঃ প্রবৃত্তং যস্য কর্ম্ম ধর্ম্মার্থং ন কল্পতে, ধর্ম্মাভিমুখং ন ভবেৎ; তত্রাপি নিষ্কামধর্ম্মদ্বারা বিরাগায় ন কল্পতে; তদ্দ্বারা চ তীর্থপদস্য হরেঃ সেবার্থং ন পর্য্যবস্যে-দিত্যর্থঃ॥ (৫৭) ন মুমুক্ষেয়, মোক্তুমিচ্ছাং ন কৃতবত্যস্মি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
ত্রয়োবিংশোঽধ্যায়ঃ॥ ২৩॥

---

১ পূর্য্যতাম্ (ঘ)।

চতুর্ব্বিংশোঽধ্যায়ঃ

চতুর্ব্বিংশে ততো জন্ম কপিলস্যাহ তৎপিতুঃ।

প্রব্রজ্যাং তমনুজ্ঞাপ্য ঋণত্রয়বিমোক্ষতঃ॥ (১)

১। শালিনীং শ্লাঘ্যাম্, শুক্লেনাভিব্যাহৃতম্—'সহাহং স্বাংশকলয়া' ইত্যাদি॥

২। ইত্থং মা খিদঃ, খেদং মা কার্ষীঃ, আত্মানং প্রতি অহং ভাগ্য-হীনেতি; অদূরাৎ শীঘ্রম্॥

৩। দমেনেন্দ্রিয়সংযমেন, নিয়মেন স্বধর্ম্মেণ, তপাংসি দ্রবিণদানানি চ, তৈঃ॥

৪। হৃদয়গ্রন্থিং চিজ্জড়াত্মকমহঙ্কারলক্ষণং বন্ধং ছেত্তা ছেৎস্যতি। ঔদর্য্যঃ পুত্রঃ সন্, ব্রহ্ম ভাবয়তি উপদিশতীতি তথা॥

৫। শ্রদ্ধায় বিশ্বস্য॥

৬। বহুতিথে বহুতরে কালে অতিক্রান্তে সতি। কার্দ্দমং কর্দ্দম-সম্বন্ধি॥

৭। ঘনাঘনা ইত্যেকং পদম্, বর্ষন্তো মেঘাঃ, গায়ন্তি স্ম নৃত্যন্তি স্ম॥

৮। অপবর্জ্জিতা মুক্তাঃ॥

৯। পরিশ্রিতং পরিবেষ্টিতম্॥

১০—১১। আগত্য কিং কৃতবান্? তদাহ—ভগবন্তমিতি দ্বাভ্যাম্। তত্ত্বানাং পরিসংখ্যানং যস্মিন্, তস্য সাংখ্যস্য বিজ্ঞপ্ত্যৈ বিশেষেণ জ্ঞাপনায়; ভগবন্তং জাতং বিদ্বান্ অজো ব্রহ্মা, স্বরাট্ স্বতঃসিদ্ধজ্ঞানঃ॥ (১১) তস্য চিকীর্ষিতং সভাজয়ন্ পূজয়ন্, প্রহৃষ্যমাণৈরসুভিরিন্দ্রিয়ৈরুপলক্ষিতঃ। 'কর্দ্দমঞ্চেদমভ্যধাৎ' ইতি দ্বয়োরন্বয়ঃ; চকারাদ্দেবহূতিঞ্চ॥

১২—১৬। তত্র ত্বয়েতি পঞ্চভিঃ কর্দ্দমং প্রত্যাহ—অপচিতিঃ পূজা কৃতা, যদ্ যস্মাৎ নির্ব্ব্যলীকতো নিষ্কপটং সম্যগ্‌গৃহীতবান্॥ (১৩)

অনুমন্যেতেতি যৎ এতাবত্যেব ॥ (১৪) অনেকধা প্রভাবৈর্বংশৈর্বৃংহয়িষ্যন্তি বর্দ্ধয়িষ্যন্তি॥ (১৫) ঋষিমুখ্যেভ্যো মরীচ্যাদিভ্যঃ ॥ (১৬) পুত্রস্তু সাক্ষাদীশ্বর এবেত্যাহ—বেদাহমিতি। শেবধিং নিধিং সর্ব্বাভীষ্টদম্॥

১৭—১৯। দেবহূতিং প্রত্যাহ ত্রিভিঃ। জ্ঞানং শাস্ত্রোত্থম্, বিজ্ঞানমপরোক্ষঞ্চ, তে এব যোগ উপায়স্তেন কর্ম্মণাং জটা মূলানি বাসনাঃ উদ্ধরন্ উৎপাটয়িষ্যন্, পদ্মমুদ্রাযুক্তং পদাম্বুজং যস্য ॥ (১৮) হে মানবি ; অবিদ্যা স্বরূপাজ্ঞানম্, সংশয়া মিথ্যাজ্ঞানানি, তন্ময়ং তব হৃদয়গ্রন্থিম্ ॥ (১৯) সুসম্মতঃ সুপূজিতঃ সন্, গন্তা প্রাপ্স্যতি ॥

২০। কুমারৈঃ সহেতি শেষঃ। সহনারদঃ নারদসহিতশ্চ, মরীচ্যাদীন্ বিবাহার্থমবস্থাপ্য নৈষ্ঠিকৈরেতৈঃ পঞ্চভিঃ সহিতো হংসো ব্রহ্মা যযৌ। ত্রিধাম তৃতীয়ং ধাম স্বর্গঃ, তস্য পরাং কাষ্ঠাং সত্যলোকম্ ॥

২১। শতধৃতৌ ব্রহ্মণি ॥

২৩। যুক্তাং যোগ্যাম্, অযচ্ছৎ অদাৎ ॥

২৪। বিতন্যতে সমৃদ্ধঃ ক্রিয়তে, শান্ত্যধিষ্ঠাত্রীং দেবতামিত্যর্থঃ। সমলালয়ৎ সন্তোষিতবান্ ॥

২৫। নিমন্ত্র্য পৃষ্ট্বা, নন্দিং হর্ষং প্রাপ্তাঃ সন্তঃ ॥

২৬। স চ মুনিঃ ; ত্রিযুগং বিষ্ণুম্, বিবিক্তে রহসি ॥

২৭। পাপচ্যমানানাং ভৃশং দহ্যমানানাম্, নিরয়ে সংসারে, স্বীয়ৈরমঙ্গলৈঃ পাপৈঃ ॥

২৮—২৯। কুতঃ সর্ব্বা দেবতাঃ প্রসন্না ইতি জ্ঞাতম্? অলভ্যলাভাদিত্যাহ দ্বাভ্যাম্। বহুষু জন্মসু বিপক্বেন সুসিদ্ধেন, সম্যগ্‌যোগো ভক্তিযোগঃ, তস্মিন্ সমাধিরৈকাগ্র্যং তেন, শূন্যাগারেষু বিবিক্তস্থানেষু, যস্য তব পদম্ ॥ (২৯) হেলনমবজ্ঞাং লাঘবং ন গণয্য অগণয়িত্বা। উচিতমেব তবৈতদিত্যাহ—যস্ত্বং স্বানাং ভক্তানাং পক্ষং পুষ্ণাসীতি তথা সঃ ॥

৩০—৩১। এতৎ প্রপঞ্চয়তি দ্বাভ্যাম্। স্বয়মেবাতীর্ণোঽসি, স্ববাক্যং 'তব পুত্রো ভবিষ্যামি' ইতি যৎ, তৎ সত্যং কর্ত্তুম্, জ্ঞানং জ্ঞানসাধনং সাংখ্যঞ্চ চিকীর্ষুঃ সন্॥ (৩১) যানি তবালৌকিকানি চতুর্ভুজাদীনি রূপাণি, তান্যেব তেঽভিরূপাণি যোগ্যানি রূপাণি; যানি চ স্বজনানাং রোচন্তে মনুষ্যস্বরূপাণি, তান্যপি তে রোচন্ত ইত্যর্থঃ; অরূপিণঃ প্রাকৃতরূপরহিতস্য॥

৩২। অভিবাদার্হণং পাদপীঠং যস্য, ঐশ্বর্য্যাদিভিঃ পূর্ত্তং পূর্ণম্॥

৩৩। ঐশ্বর্য্যাদিকং বিবৃণ্বন্নাহ—পরং পরমেশ্বরম্। তত্র হেতুঃ—স্বচ্ছন্দাঃ স্বাধীনাঃ শক্তয়ো যস্য। তা এবাহ—প্রধানং প্রকৃতিরূপম্, পুরুষং তদধিষ্ঠাতারম্, মহান্তং মহত্তত্ত্বরূপম্, কালং তেষাং ক্ষোভকম্, ত্রিবৃতমহঙ্কাররূপম্, লোকাত্মকং তৎপালাত্মকঞ্চ। তদেবং মায়য়া প্রধানাদিরূপতামুক্ত্বা চিচ্ছক্ত্যা নিষ্প্রপঞ্চতামাহ—আত্মানুভূত্যা চিচ্ছক্ত্যানুগতঃ স্বস্মিন্ লীনঃ প্রপঞ্চো যস্য তম্, কবিং সর্ব্বজ্ঞম্, প্রধানাদ্যাবির্ভাবলয়-সাক্ষিণমিত্যর্থঃ॥

৩৪। সন্ন্যাসানুজ্ঞাং প্রার্থয়তে—আ স্মাভিপৃচ্ছে যৎকিঞ্চিদপি পৃচ্ছামীত্যর্থঃ। ত্বয়া পুত্ররূপেণ অবতীর্ণানি নিবৃত্তানি ঋণানি দৈবাদি-রূপাণি যস্য সঃ, আপ্তকামশ্চাহং পরিব্রজতাং সন্ন্যাসিনাং পদবীং মার্গমাশ্রিতঃ সন্, ত্বা ত্বাং যুঞ্জন্ স্মরন্ বিচরিষ্যামি॥

৩৫—৪০। অহং তাবজ্জ্ঞানোপদেশায়ৈব ত্বদ্‌গৃহে অবতীর্ণঃ, অতস্তব গৃহে বসতোঽপি মুক্তিঃ সুলভৈব, যদ্যপ্যবশ্যং গন্তব্যমেব ইত্যাগ্রহঃ, তথাপি মামেবানুস্মরন্ গচ্ছেত্যাশয়েনাহ—ময়েতি ষড়্‌ভিঃ। সত্যলৌকিকে বৈদিকে লৌকিকে চ কৃত্যে। স্বোক্তস্য সত্যত্বে প্রমাণমভিদর্শয়তি—যদ্‌যস্মাৎ তুভ্যং তব পুত্রো ভবিষ্যামীত্যবোচম্, অথ অতএব তদৃতং সত্যং যথা ভবতি তথা, ময়া অজনি জন্ম স্বীকৃতম্॥ (৩৬) দুরাশয়াল্লিঙ্গাৎ

মুমুক্ষূণাং মুনীনামাত্মদর্শনে সম্মতায় তত্ত্বানাং প্রসংখ্যানায় বিদ্ধীত্যুত্তরস্যানুষঙ্গঃ ॥ (৩৭) নন্বয়মাত্মজ্ঞানমার্গঃ পূর্ব্বসিদ্ধ এব, নেদানীমপূর্ব্ববৎ প্রবর্ত্তনীয়ঃ ? তত্রাহ—এষ ইতি। অব্যক্তঃ সূক্ষ্মঃ ॥ (৩৮) কামং যথেচ্ছম্, আপৃষ্টঃ অনুজ্ঞাতঃ, যদ্বা, যথা ত্বং গন্তুং মাং পৃষ্টবান্, তথাত্রাবস্থাতুং ময়াপি ত্বমাপৃষ্ট ইত্যর্থঃ। ময়ি সন্ন্যস্তেন সমর্পিতেন কর্ম্মণা, বিদ্যয়া মৃত্যুং তীর্ত্বা 'বিদ্যয়ামৃতমশ্নুতে' ইতি শ্রুতেঃ ॥ (৩৯) ততশ্চ মাং পরমাত্মানমাত্মনি স্বস্মিন্, আত্মনা মনসা অন্বীক্ষমাণোঽভয়ং মোক্ষং প্রাপ্স্যসি ॥ (৪০) মাত্রে দেবহূত্যৈ, শমনীমুন্মূলনীম্। ভয়মতিশয়েন তরিষ্যতি, পরমানন্দঞ্চ প্রাপ্স্যতীতি চকারস্যার্থঃ ॥

৪১। সমুদিতঃ সম্যগুক্তঃ সন্; তং প্রদক্ষিণীকৃত্য ॥

৪২। মুনীনামিদং মৌনম্, ব্রতমহিংসাদিলক্ষণম্ ॥

৪৩। সদসতঃ পরং যত্তস্মিন্ ব্রহ্মণি, গুণাবভাসকে নির্গুণে, একভক্ত্যা অব্যভিচারিণ্যা ভক্ত্যা অনুভাবিতে অপরোক্ষীকৃতে ॥

৪৪। অতো দেহাদিষু অহঙ্কারাদিরহিতঃ, অতএব নির্দ্বন্দ্বঃ শীতোষ্ণাদ্যনাকুলঃ, সমদৃক্ ভেদাগ্রাহকঃ, কিন্তু স্বদৃক্ স্বয়মেব পশ্যন্; প্রত্যক্ প্রবণা প্রশান্তা বিক্ষেপরহিতা ধীর্যস্য ॥

৪৫—৪৭। তদেবং কল্পিতোপাধিনিবৃত্তিমুক্ত্বা পরমেশ্বরপদপ্রাপ্তিমাহ—বাসুদেব ইতি ত্রিভিঃ। প্রতীচো জীবস্যাত্মনি লব্ধ আত্মা চিত্তং যেন, যতো মুক্তং বন্ধনমজ্ঞানং যস্য ॥ (৪৬) লব্ধাত্মতামেবাহ—আত্মানমিতি। (৪৭) তদেবং তেন ভাগবতী গতিঃ প্রাপ্তা। 'প্রাপ্তো ভাগবতীং গতিম্' ইতি পাঠে স একস্তাং গতিং প্রাপ্ত ইতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
চতুর্ব্বিংশোঽধ্যায়ঃ ॥ ২৪ ॥

পঞ্চবিংশোঽধ্যায়ঃ

পঞ্চবিংশে জনন্যা তু পৃষ্টো বন্ধবিমোচনম্।
আদাবাহ পরং ভক্তিলক্ষণং কপিলঃ সুতঃ॥ (১)

কপিলেনার্পিতা মাত্রে গূঢ়ভাবনিয়ন্ত্রিতা।
যোগমাণিক্যমঞ্জুষা স্ফুটমুদ্ঘাট্যতেঽধুনা॥ (২)

১—৩। উক্তানুবাদপূর্ব্বকং কাপিলং যোগং পৃচ্ছতি—কপিল ইতি ত্রিভিঃ। তত্ত্বানাং সংখ্যাতা গণকঃ, সাংখ্যপ্রবর্ত্তক ইত্যর্থঃ। অতএব স্বয়ং জাতঃ, আত্মপ্রজ্ঞপ্তয়ে আত্মতত্ত্বজ্ঞাপনায়॥ (২) পুংসাং মধ্যে বর্ষ্মণঃ বৃদ্ধস্য উত্তমস্যেত্যর্থঃ। সর্ব্বযোগিনাং মধ্যে বরিম্নঃ, বরস্য ভাবো বরিমা, ভবিতৃপ্রধানোঽয়ং নির্দ্দেশঃ, বরিষ্ঠস্যেত্যর্থঃ; যদ্বা, বরীয়স্ত্বাদিত্যর্থঃ। বিশ্রুতৌ কীর্ত্তৌ অসবঃ ইন্দ্রিয়াণি ভূরি অলং ন তৃপ্যন্তি। শ্রুতেন শ্রবণেন দীব্যতি দ্যোতত ইতি তথা তস্য; যদ্বা, ভূরি বহুশোঽপি শ্রুতো দেবো যেন, তস্যাপি মেঽসব ইতি সম্বন্ধঃ॥ (৩) স্বানাং পুংসাং ছন্দেন ইচ্ছয়া আত্মা দেহো যস্য সঃ। যদ্ যৎ কর্ম্ম বিধত্তে, তানি কর্ম্মাণি কীর্ত্তনার্হাণি অনুকীর্ত্তয়॥

৪। যথা ত্বং মাং প্রচোদয়সি, এবং প্রচোদিতঃ সন্। তথা তৎ-প্রশ্নানুসারেণ, আন্বীক্ষিক্যামাত্মবিদ্যায়াম্॥

৫। বিন্দুসরে বিন্দুসরসি॥

৬। তত্ত্বমার্গস্যাগ্রং পারং দর্শয়তীতি তথা তম্। 'এষ মানবি! তে গর্ভং প্রবিষ্টঃ কৈটভার্দ্দনঃ' ইত্যাদি ধাতুর্বচঃ সংস্মরন্তী প্রাহ॥

৭। অসতামিন্দ্রিয়াণাং তর্ষণাৎ বিষয়াভিলাষাৎ নির্ব্বিণ্ণা শ্রান্তাস্মি। যেন সম্ভাব্যমানেন পূর্য্যমাণেন॥

৮। পারং গময়তীতি পারগম্, ত্বমেব শ্রেষ্ঠং চক্ষুর্মে ময়া লব্ধম্। ত্বদনুগ্রহাৎ জন্মনামন্তে ভাব্যে সতি ॥

৯। এতৎ প্রপঞ্চয়তি—য ইতি। স ভবান্ চক্ষূরূপ উদিতঃ, সূর্য্যো যথা ॥

১০। অপাক্রষ্টুমপনেতুম্। কোঽসৌ সম্মোহঃ? তমাহ—এতস্মিন্ দেহাদৌ ত্বয়ৈব যোজিতো যোঽহংমমেত্যবগ্রহ আগ্রহঃ। দ্বিতীয় ইতিশব্দঃ তৎকার্য্যরাগাদিগ্রহণার্থঃ ॥

১১। প্রকৃতেঃ পুরুষস্য চ জিজ্ঞাসয়া ত্বামহং শরণং গতা সতী নমামীত্যন্বয়ঃ। কুঠারং ছেত্তারম্ ॥

১২। অপবর্গবর্দ্ধনং মোক্ষে রতিজনকম্; ঈষৎস্মিতেন শোভিত-মাননং যস্য ॥

১৩। আধ্যাত্মিক আত্মনিষ্ঠঃ; যত্র যস্মিন্ ॥

১৫। তত্তু সর্ব্বাঙ্গনৈপুণ্যং চিত্তসংযমাধীনমিতি দর্শয়ন্নাহ—চেত ইতি। অস্যাত্মনো জীবস্য, গুণেষু বিষয়েষু, পুংসি পরমেশ্বরে, বাশব্দস্তু-শব্দার্থে ॥

১৬—১৮। যথা চ চিত্তসংযমে পুরুষার্থসিদ্ধিস্তদ্দর্শয়তি—অহমিতি ত্রিভিঃ। মলৈর্বীতং বিরহিতং যদা শুদ্ধং মনো ভবতি। মনঃশুদ্ধের্জ্ঞাপক-মাহ—অদুঃখমিতি ॥ (১৭) নিরন্তরং নির্ভেদম্, অণিমানং সূক্ষ্মম্, অখণ্ডিতমপরিচ্ছিন্নম্ ॥ (১৮) হতৌজসং ক্ষীণবলম্ ॥

১৯। মনঃশুদ্ধৌ চ ভক্তিরেবান্তরঙ্গসাধনমিত্যাহ—নেতি ॥

২০। অস্য সর্ব্বস্যাপি সৎসঙ্গো মূলমিত্যাহ—প্রসঙ্গমিতি। অপাবৃতং নিরাবরণম্ ॥

২১—২৪। সাধূনাং লক্ষণমাহ—তিতিক্ষব ইতি চতুর্ভিঃ। সাধবঃ শাস্ত্রানুবর্ত্তিনঃ, সাধু সুশীলম্, তদেব ভূষণং যেষাম্ ॥ (২৩) এতানুক্ত-

লক্ষণান্ ভক্তান্ তাপা আধ্যাত্মিকাদয়ো ন তপন্তি, ন ব্যথয়ন্তি। কুতঃ? মদ্গতং চেতো যেষাং তান্॥ (২৪) যে তাপৈর্নাভিভূয়ন্তে, তে সাধব ইত্যর্থঃ॥

২৫। সৎসঙ্গস্য ভক্ত্যঙ্গতামুপপাদয়তি—সতামিতি। বীর্য্যস্য সম্যগ্বেদনং যাসু তা বীর্য্যসংবিদঃ, হৃৎকর্ণয়ো রসায়নাঃ সুখদাঃ; তাসাং জোষণাৎ সেবনাদপবর্গোঽবিদ্যানিবৃত্তির্বর্ত্ম যস্মিন্ তস্মিন্ হরৌ প্রথমং শ্রদ্ধা, ততো রতিস্ততো ভক্তিরনুক্রমিষ্যতি, ক্রমেণ ভবিষ্যতীত্যর্থঃ॥

২৬। ততঃ কিম্? অত আহ—ভক্ত্যেতি। মম রচনা যা সৃষ্ট্যাদি-লীলা, তস্যা অনুচিন্তয়া যা ভক্তিস্তয়া, ঐন্দ্রিয়াৎ সুখাৎ জাতবিরাগঃ সন্, দৃষ্টশ্রুতাৎ ঐহিকামুষ্মিকাৎ, ততো যত্ত উদ্‌যুক্তঃ সন্ চিত্তস্য গ্রহণে যতিষ্যতে। ঋজুভির্ভক্তিপ্রধানত্বাদনায়াসৈঃ॥

২৭। তদেবং প্রকৃতের্গুণানামসেবয়া জ্ঞানাদিভিশ্চায়ং জীব ইহৈব দেহে মামবরুন্ধে প্রাপ্নোতি॥

২৮। কাচিদিতি, কাস্বিদিত্যর্থঃ। উচিতা যোগ্যা, তত্রাপি মম স্ত্রিয়াঃ কীদৃশী গোচরা যোগ্যা। নির্ব্বাণং মোক্ষাত্মকং তব পদং স্বরূপ-মন্বাশ্নবৈ, অনন্তরমেব সর্ব্বাত্মনা প্রাপ্স্যামি। অঞ্জসা ত্বিতি পাঠে অহন্ত্বিতি সম্বন্ধঃ॥

২৯। ভগবদ্বাণো যো ভগবন্তং লক্ষীকরোতীত্যর্থঃ; যতো যস্মাদ্ যোগাৎ॥

৩০। বিজানীহি বিশেষেণ জ্ঞাপয়, সুখমনায়াসেন॥

৩১। ইত্থং মাতুরর্থং প্রয়োজনং বিদিত্বা; জাতস্নেহত্বে হেতুঃ—যত্র যস্যাং তন্বা দেহেনাবির্ভূতঃ। তত্ত্বান্যাম্নায়ন্তে অনুক্রম্যন্তে যস্মিন্। কিং তৎ? যৎ সাংখ্যং প্রবদন্তি, তৎ প্রোবাচ, ভক্তিবিতানঞ্চ যোগঞ্চ॥

৩২। 'কাচিৎ ত্বয্যুচিতা ভক্তিঃ' ইতি পৃষ্টামুত্তমাং ভক্তিং লক্ষয়তি—গুণা বিষয়া লিঙ্গ্যন্তে জ্ঞায়ন্তে যৈস্তেষাং দেবানাং দ্যোতনাত্মকানামিন্দ্রিয়াণাম্, তদধিষ্ঠাতৃণাং বা সত্ত্বে সত্ত্বমূর্ত্তৌ হরাবেব যা বৃত্তিঃ, সা ভক্তিঃ সিদ্ধের্মুক্তেরপি গরীয়সীত্যুত্তরেণান্বয়ঃ। কথম্ভূতা? অনিমিত্তা নিষ্কামা, স্বাভাবিকী অযত্নসিদ্ধা। তেষামেবংবিধবৃত্তৌ হেতুমাহ—গুরোরুচ্চারণমনুশ্রূয়তে ইত্যনুশ্রবো বেদঃ, তদ্বিহিতমানুশ্রবিকং, তদেব কর্ম্ম যেষাম্; অতএব একরূপমবিকৃতং মনো যস্য পুংসঃ, শুদ্ধসত্ত্বস্যেত্যর্থঃ॥

৩৩। মুক্তিশ্চ প্রাসঙ্গিকী ভবত্যেবেত্যাহ—যা ভক্তিঃ কোশং লিঙ্গশরীরং জরয়তি ক্ষপয়তি। স্বপ্রযত্নং বিনৈব সিদ্ধৌ দৃষ্টান্তঃ—নিগীর্ণং ভুক্তমন্নমনলো জাঠরো যথা জরয়তীতি॥

৩৪—৩৮। ভক্তের্গরিষ্ঠত্বমেবোপপাদয়তি—নৈকাত্মতামিতি পঞ্চভিঃ। একাত্মতাং সাযুজ্যমোক্ষম্, মদর্থমীহা ক্রিয়া যেষাম্, প্রসজ্য আসক্তিং কৃত্বা, পৌরুষাণি বীর্য্যাণি॥ (৩৫) প্রসন্নানি বক্ত্রাণি অরুণাণি লোচনানি চ যেষু, তৈর্মদ্রূপৈঃ সাকং সহ। নিত্যং পরমেশ্বরানুভবসুখং ভক্তাবধিকমিতি ভাবঃ॥ (৩৬) আত্মানন্দস্ত্ববশ্যম্ভাবীত্যাহ—তৈরিতি। দর্শনীয়া মনোহরা অবয়বা মুখনেত্রাদয়ো যেষু তৈঃ। হৃত আত্মা চিত্তং যেষাম্, হৃতা আকৃষ্টা প্রাণাশ্চ ইন্দ্রিয়াণি যেষাং তান্ ভজতোঽনিচ্ছত ইচ্ছাহীনানপি অণ্বীং গতিং মুক্তিং প্রযুঙ্ক্তে প্রাপয়তি। কৈঃ সাধনৈঃ? হৃতাত্মন উদারৈর্বিলাসাদিভিঃ। তত্র বিলাসো লীলা, বামং মনোহরং সূক্তং মধুরভাষণম্॥ (৩৭) বিভূত্যাদিকন্ত তত্রাধিকমিত্যাহ—অথো অবিদ্যানিবৃত্ত্যনন্তরং বিভূতিং সত্যলোকাদিগতাং ভোগসম্পত্তিমণিমাদ্যষ্টাঙ্গমৈশ্বর্য্যমনুপ্রবৃত্তং ভক্তিমনু স্বত এব প্রাপ্তমপি, ভাগবতীঞ্চ শ্রিয়ং বৈকুণ্ঠস্থাং সম্পত্তিমস্পৃহয়ন্তি, তে যদ্যপি ন স্পৃহয়ন্তীত্যর্থঃ, তথাপি লোকে বৈকুণ্ঠে অশ্নুবতে তু প্রাপ্নুবন্ত্যেব॥ (৩৮) নন্বেবং, তর্হি লোকত্বাবিশেষাৎ

স্বর্গাদিবদ্‌ভোক্তৃভোগ্যানাং কদাচিদ্‌বিনাশঃ স্যাৎ? তত্রাহ—হে শান্তরূপে! মাতঃ! যদ্বা, শান্তং শুদ্ধং সত্ত্বং তদ্রূপে বৈকুণ্ঠে। মৎপরা কদাচিদপি ন নঙ্ক্ষ্যন্তি, ভোগ্যহীনা ন ভবন্তি, অনিমিষো মে হেতির্মদীয়ং কালচক্রঞ্চ নো লেঢ়ি, তান্ ন গ্রসতি। তত্র হেতুঃ—যেষামিতি। সুত ইব স্নেহ-বিষয়ঃ, সখেব বিশ্বাসাস্পদম্, গুরুরিব উপদেষ্টা, সুহৃদিব হিতকারী, ইষ্টং দৈবমিব পূজ্যঃ। এবং সর্ব্বভাবেন যে মাং ভজন্তি, তান্ মদীয়ং কালচক্রং ন গ্রসতীত্যর্থঃ॥

৩৯—৪০। এবম্ভূতাস্তু মুক্তিমেকান্তভক্তেভ্যো দদামীত্যাহ—ইমমিতি দ্বাভ্যাম্। উভযায়িনং লোকদ্বয়গামিনম্, আত্মানং সোপাধিকম্, আত্মান-মনু যে পুত্রকলত্রাদয়ঃ, যে চ পশ্বাদয়ঃ, রায়ো ধনানি॥ (৪০) অন্যাংশ্চ পরিগ্রহান্, মৃত্যোঃ সংসারাদতিপারয়ে অতিতারয়ামি॥

৪১। অভক্তানান্তু ন কথঞ্চিদপি মোক্ষ ইত্যাহ—নেতি। মদ্ভগবতো-ঽন্যত্র, ভগবতো মত্তো বিনা, সর্ব্বভূতানামাত্মনঃ, ভগবদাদিবিশেষণত্রয়েণ সামর্থ্যং নিরপেক্ষত্বং হিতকারিত্বঞ্চোক্তম্॥

৪২। ঐশ্বর্য্যং স্ফুটয়তি—মদ্ভয়াদিতি। শ্রুতিশ্চ— 'ভীষাস্মাদ্বাতঃ পবতে, ভীষোদেতি সূর্য্যঃ। ভীষাস্মাদগ্নিশ্চেন্দ্রশ্চ, মৃত্যুর্ধাবতি পঞ্চমঃ॥' ইতি॥

৪৩। মদ্ভজনাদেব মোক্ষ ইত্যত্র সদাচারং প্রমাণয়তি—জ্ঞানেতি॥

৪৪। উপসংহরতি—এতাবানিতি। ময়ি অর্পিতং সন্মনঃ স্থিরং ভবতীতি যৎ, এতাবানেব॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে

পঞ্চবিংশোঽধ্যায়ঃ॥ ২৫॥

ষড়্বিংশোঽধ্যায়ঃ

ষড়্বিংশে পুংপ্রকৃত্যোস্ত বিবেকায়োপবর্ণ্যতে।
সাংখ্যেন সর্ব্বভাবানাং জন্মলক্ষণভেদতঃ॥ (১)

ধাত্রা পুত্রায় যৎ প্রোক্তং ক্ষত্রে মিত্রাসুতেন যৎ।
মাত্রে সাংখ্যং তদধ্যাত্মং প্রাধান্যেনাহ তত্ত্ববিৎ॥ (২)

১। 'তত্ত্বাম্নায়ং যৎ প্রবদন্তি সাংখ্যম্' ইত্যত্র সাংখ্যং ভক্তিযোগশ্চেতি ত্রয়মুপক্ষিপ্তম্, তত্র ভক্তিমুক্ত্বা ইদানীং সাংখ্যমাহ—অথেতি॥

২। ননু মুক্তিরাত্মজ্ঞানাদেব, ন তু তত্ত্বলক্ষণজ্ঞানাৎ—'তমেব বিদিত্বা অতিমৃত্যুমেতি' ইতি শ্রুতেঃ। অত আহ—জ্ঞানমিতি। আত্মদর্শনরূপং জ্ঞানম্, অতএব হৃদয়গ্রন্থিভেদনমহঙ্কারনিবর্ত্তকম্। নিঃশ্রেয়সপ্রয়োজনায় যদাহুঃ, তৎ তে বর্ণয়ামি। তত্ত্বলক্ষণজ্ঞানাদেব বিবিক্তাত্মজ্ঞানং ভবতীতি ভাবঃ॥

৩। তত্র প্রথমং পুরুষং লক্ষয়তি—অনাদিরিতি। আত্মৈব পুরুষঃ। কোঽসাবাত্মা? প্রত্যক্ প্রতিলোমং ধাম স্ফূর্ত্তির্যস্য। ক্ষণিকপক্ষং ব্যাবর্ত্তয়তি—অনাদিরিতি; সংসারিত্বপক্ষং ব্যাবর্ত্তয়তি—প্রকৃতেঃ পরোঽন্যঃ অসঙ্গঃ; জ্ঞানাদিগুণত্বং বারয়তি—নির্গুণঃ; মীমাংসকাভ্যভিমতজ্ঞানবিষয়ত্বং বারয়তি—স্বয়ংজ্যোতিঃ। অনেনৈব প্রভাকরাদিমতং[১] জ্ঞানাধারত্বেন স্ফুরণমপি নিরস্তম্। স্বয়ংজ্যোতিষ্ট্বে হেতুঃ—বিশ্বং যেন সমন্বিতং প্রকাশত ইতি শেষঃ। এতৈরেব হেতুভিঃ পুরুষস্য প্রকৃতেঃ পরত্বমপি সিদ্ধম্॥

৪—৮। তত্র[২] চাবরণবিক্ষেপশক্তিভেদেন প্রকৃতির্দ্বিধা। তত্রাবরণশক্ত্যা সৈব জীবোপাধিরবিদ্যা, বিক্ষেপশক্ত্যা সৈব মায়া পারমেশ্বরী।

১। প্রভাকরাভিমতং (ঘ); ২। অত্র (ঘ)।

পুরুষশ্চ জীবেশ্বররূপেণ দ্বিবিধঃ। তত্র যঃ প্রকৃত্যবিবেকেন সংসরতি, স জীবঃ ; যস্তু প্রকৃতিং বশীকৃত্য বিশ্বসৃষ্ট্যাদি করোতি, স পরমেশ্বরঃ। তত্র প্রকৃত্যবিবেকেন জীবস্য সংসারপ্রকারমাহ—স এষ ইতি পঞ্চভিঃ। সূক্ষ্মাম-ব্যক্তাম্, দৈবীং দেবস্য বিষ্ণোঃ শক্তিম্, লীলয়া উপগতাং যদৃচ্ছয়ৈবাভ্য-পদ্যত ইত্যন্বয়ঃ॥ (৫) তস্যা লীলামাহ—গুণৈরিতি। জ্ঞানং গূহতে[১] আ-বৃণোতীতি জ্ঞানগূহা, তয়া। তথা চ শ্রুতিঃ—'অজামেকাং লোহিতশুক্লকৃষ্ণাং, বহ্বীঃ প্রজা জনয়ন্তীং সরূপাঃ। অজো হ্যেকো জুষমাণোঽনুশেতে, জহাত্যেনাং ভুক্তভোগামজোঽন্যঃ॥' ইতি। মুমুহে আত্মানং বিস্মৃতবান্॥ (৬) পরাভিধ্যানং প্রকৃত্যধ্যাসঃ, তেন প্রকৃতেগুণৈঃ কর্ম্মসু ক্রিয়মাণেষু কর্ত্তৃত্বমাত্মনি মন্যতে॥ (৭) তদিতি কর্ত্তৃত্বমননমেব অস্য পুরুষস্য সাক্ষি-মাত্রত্বাদকর্ত্তুরেব সতঃ কর্ম্মভির্বন্ধঃ। ঈশস্যাপরতন্ত্রস্যৈব কর্ম্মবন্ধকৃতং ভোগপারতন্ত্র্যম্। নির্বৃতাত্মনঃ সুখাত্মকস্যৈব, সংসৃতিঃ জন্মমৃত্যুপ্রবাহঃ। প্রকৃত্যবিবেককৃতমেতৎ সর্ব্বং জন্মমরণাদিকং ভবতীত্যর্থঃ॥ (৮) ননু চৈতন্যসামানাধিকরণ্যেনৈব কর্ত্তৃত্বাদিপ্রতীতেস্তস্যৈব[২] তদঙ্গীক্রিয়তাম্? নেত্যাহ—কার্য্যং শরীরম্, কারণমিন্দ্রিয়ম্, কর্ত্তা দেবতাবর্গঃ। তদ্ভাবাপত্তৌ পুরুষস্য প্রকৃতিং কারণং বিদুঃ। কূটস্থস্য স্বতো বিকারাভাবাৎ প্রকৃতি-পরিণামভূত-দেহাদ্যহঙ্কারকৃতমেব কর্ত্তৃত্বাদিকমিত্যর্থঃ। ভোক্তৃত্বে তু পুরুষং কারণং বিদুরিত্যস্যায়ং ভাবঃ—যদ্যপ্যহঙ্কারগতমেব কার্য্যত্বাদিকং[৩] ভোক্তৃত্বঞ্চ, তথাপি বিকারস্য জড়াবসানত্বাদুপাধিপ্রাধান্যম্, ভোগস্য চিদবসানত্বাদুপহিতপ্রাধান্যমিতি॥

৯। তদেবং সংসারিণং পুরুষং তদ্ধেতুং প্রকৃতিঞ্চ জ্ঞাত্বেদানীং জগৎ-কারণমীশ্বরং তৎপ্রকৃতিঞ্চ পৃচ্ছতি—প্রকৃতেরিতি। অস্য বিশ্বস্য সদসচ্চ স্থূলং সূক্ষ্মঞ্চ কার্য্যং যদাত্মকম্, তয়োঃ প্রকৃতিপুরুষয়োঃ॥

১। গূহয়তি (ঘ); ২। -প্রতীতেঃ স্বস্যৈব (ঘ); ৩। কর্ত্তৃত্বাদিকং (ঘ)।

১০। তত্র প্রকৃতিং লক্ষয়তি—যৎ প্রধানম্, তদেব প্রকৃতিং প্রাহুঃ। কিং তৎ প্রধানম্ ? স্বতোঽবিশেষং বিশেষবদ্ বিশেষাণামাশ্রয়াঃ। তর্হি কিং ব্রহ্ম ? ন ; ত্রিগুণম্। কিং মহত্তত্ত্বাদি ? ন ; অব্যক্তমকার্য্যম্। কিং কালাদি ? ন ; সদসদাত্মকং কার্য্যকারণরূপম্। কিং জীবঃ প্রকৃতিঃ ? ন ; নিত্যম্ ॥

১১। অন্যেষাং তত্ত্বানাং লক্ষণং বক্তুং তানি গণয়তি—পঞ্চভিরিত্যাদি-সংখ্যাভেদেন। এতচ্চতুর্বিংশতিকম্, এতানি চতুর্ব্বিংশতির্যস্মিন্ গণে, তং গণং প্রাধানিকং প্রধানকার্য্যাত্মকং ব্রহ্ম বিদুঃ ॥

১২—১৪। এতদ্বিবৃণোতি—মহাভূতানীতি ত্রিভিঃ। তাবন্তি পঞ্চৈব ॥ (১৪) অন্তরাত্মকমন্তঃকরণম্ ; লক্ষণরূপয়া ব্যবচ্ছেদিকয়া ॥

১৫। যাবান্ ময়া প্রোক্তঃ, এতাবানেব সংখ্যাতো গণিতস্তত্ত্বজ্ঞৈঃ। কালে তু মতদ্বয়মাহ—যঃ কালঃ, স পঞ্চবিংশকঃ, অল্পার্থে ক-প্রত্যয়ঃ, প্রকৃতেরেবাবস্থাবিশেষ ইত্যর্থঃ ॥

১৬। একে তু পৌরুষং পুরুষস্যেশ্বরস্য প্রভাবং বিক্রমং কালমাহুঃ। তমেব কালং দ্বেধা লক্ষয়তি। যতো ভয়ং ভবতি। কস্য ? প্রকৃতিমীয়ুষঃ প্রাপ্তস্য, অতএব দেহেঽহঙ্কারেণ বিমূঢ়স্য কর্ত্তুর্জীবস্য। অনেন সংহারকত্বেন লক্ষিতঃ ॥

১৭। সৃষ্টিহেতুত্বেন লক্ষয়তি—প্রকৃতেরিতি ॥

১৮। কোঽসৌ ভগবান্ ? তমাহ—অন্তরিতি। অন্তঃ সর্ব্বপ্রাণিনাং যঃ পুরুষরূপেণ নিয়ন্তৃত্বেন সমন্বেতি, সম্যক্ তদ্বিকাররহিত এবানুস্যূতো বর্ত্ততে, বহিশ্চ কালরূপেণ, এষ ভগবান্। যদ্বা, যঃ পুরুষ ইতি প্রসিদ্ধঃ কালঃ, স পঞ্চবিংশকঃ। একে তু পুরুষস্য প্রভাবং কালমাহুঃ। প্রভাবস্যৈব লক্ষণম্—যত ইতি। পুরুষস্যৈব কালত্বে হেতুঃ—প্রকৃতেরিতি। উভয়থা বিবক্ষায়াং হেতুঃ—অন্তরিতি। শেষং সমানম্। তদেবং

প্রকৃতেশ্চতুর্ব্বিংশতিভেদাঃ, জীবেশ্বরয়োশ্চৈক্যবিবক্ষা, অতঃ পঞ্চবিংশতি-তত্ত্বানি ভবন্তি। তয়োর্ভেদবিবক্ষয়া তু ষড়্বিংশতির্ভবন্তি ॥

১৯—২২। ইদানীং তত্ত্বানামুৎপত্তিপূর্ব্বকং লক্ষণান্যাহ—দৈবাদি-ত্যাদিনা 'এতান্যসংহত্য' ইত্যতঃ প্রাক্তনেন গ্রন্থেন (৫০)। তত্র চিত্তস্যোৎ-পত্তিপূর্ব্বকং লক্ষণমাহ চতুর্ভিঃ। দৈবাৎ জীবাদৃষ্টাৎ ক্ষুভিতা ধর্ম্মা গুণা যস্যাঃ, যোনৌ অভিব্যক্তিস্থানে প্রকৃতৌ বীর্য্যং চিচ্ছক্তিম্। সা প্রকৃতির্মহত্তত্ত্ব-মসূত। মহতঃ স্বরূপমাহ—হিরণ্ময়ং প্রকাশবহুলম্॥ (২০) বিশ্বমহঙ্কারা-দিপ্রপঞ্চম্, আত্মগতং স্বস্মিন্ সূক্ষ্মরূপেণ স্থিতং ব্যঞ্জন্ প্রকটয়ন্ মহান্ তীব্রং প্রলয়কালীনং তমোঽপিবৎ। কূটস্থো লয়বিক্ষেপশূন্যঃ। কথম্ভূতং তমঃ? আত্মানং প্রস্বাপয়তি প্রচ্ছাদয়তীতি তথা যৎ পূর্ব্বং প্রলয়সময়ে মহান্তং প্রকৃতৌ বিলাপয়ামাসেত্যর্থঃ॥ (২১) প্রসঙ্গাচ্চতুর্ব্ব্যূহো-পাসনামাহ—যত্তদিতি। সর্ব্বাগমপ্রসিদ্ধত্বমাহ—স্বচ্ছং বিশদম্, শান্তং রাগাদিরহিতম্, ভগবতঃ পদমুপলব্ধিস্থানম্, অতএব বাসুদেবাখ্যং যদাহুঃ। অয়মর্থঃ—অধিভূতরূপেণ তস্যৈব মহানিতি সংজ্ঞা, অধ্যাত্ম-রূপেণ চিত্তমিতি, উপাস্যরূপেণ বাসুদেব ইতি, অধিষ্ঠাতা তু তস্য ক্ষেত্রজ্ঞঃ। এবমহঙ্কারে সঙ্কর্ষণ উপাস্যঃ, রুদ্রোঽধিষ্ঠাতা; মনসি অনিরুদ্ধ উপাস্যঃ, চন্দ্রোঽধিষ্ঠাতা; বুদ্ধৌ প্রদ্যুম্ন উপাস্যঃ, ব্রহ্মাধিষ্ঠাতেতি জ্ঞাতব্যম্॥ (২২) স্বচ্ছত্বং ভগবদ্বিম্বগ্রাহিত্বম্, অবিকারিত্বং লয়বিক্ষেপরাহিত্যম্, অপাং প্রকৃতিঃ ফেনতরঙ্গাদিরহিতাবস্থা, পরা ভূমি-সংসর্গাৎ প্রাক্তনী সা যথা মধুরা স্বচ্ছা শান্তা চ, তদ্বদিত্যর্থঃ॥

২৩—২৬। অহঙ্কারস্যোৎপত্তিপূর্ব্বকং লক্ষণমাহ—মহত্তত্ত্বাদিতি চতুর্ভিঃ। ক্রিয়াসু শক্তির্যস্য, স ক্রিয়াশক্তিঃ॥ (২৪) ত্রৈবিধ্যমাহ—বৈকারিক ইতি। তস্য কার্য্যমাহ—যতো যস্মাৎ মন-আদীনাং ভব উৎপত্তিঃ॥ (২৫) তস্মিন্নুপাস্যব্যূহমাহ—সহস্রশিরসমিতি॥ (২৬) লক্ষণমাহ—

কর্ত্তৃত্বমিতি, কর্ত্তৃত্বং দেবতাদিরূপেণ, করণত্বমিন্দ্রিয়রূপেণ, কার্য্যত্বং ভূতরূপেণ, শান্তত্বাদিকন্তু তত্তৎকারণগুণত্রয়রূপেণ ॥

২৭—২৮। মনস উৎপত্তিপূর্ব্বকং লক্ষণমাহ—বৈকারিকাদিতি দ্বাভ্যাম্। সঙ্কল্পশ্চিন্তনম্, বিকল্পো বিশেষচিন্তনম্। যস্ত মনসঃ সঙ্কল্পবিকল্পাভ্যাং কামসম্ভবো বর্ত্ততে ইতি কামরূপা বৃত্তির্লক্ষণত্বেনোক্তা ; ন তু প্রদ্যুম্ন-ব্যূহোৎপত্তিঃ ; তস্য সঙ্কল্পাদিকার্য্যত্বাভাবাৎ ; উপাস্যব্যূহস্য চানিরুদ্ধ-স্যোক্তেঃ॥ (২৮) শারদং শরৎকালীনমিন্দীবরং নীলোৎপলম্, তদিব শ্যামম্। যচ্ছনৈঃ সংরাধ্যং বশীকর্ত্তুং যোগ্যং, দুগ্র্হত্বাৎ ॥

২৯—৩০। বুদ্ধেরুৎপত্তিপূর্ব্বকং লক্ষণমাহ—তৈজসাদিতি দ্বাভ্যাম্। হে সতি! দ্রব্যস্ফুরণরূপং বিজ্ঞানমিতি চিত্তব্যাবৃত্ত্যর্থমুক্তম্। ইন্দ্রিয়াণামনুগ্রহ ইতি সবিকল্পকজ্ঞানে, হৃষীকাণামধীশ্বরমিতি যদুক্তম্, তত্ত্ নির্ব্বিকল্পকজ্ঞানে॥ (৩০) দ্রব্যস্ফুরণস্যৈব প্রপ্রঞ্চঃ—সংশয়াদিঃ, বিপর্য্যাসো মিথ্যাজ্ঞানম্, নিশ্চয়ঃ প্রমাণজ্ঞানম্, স্বাপো নিদ্রা, 'প্রমাণবিপর্য্যয়-বিকল্পনিদ্রাস্মৃতয়ঃ' ইতি পাতঞ্জলোক্তেঃ॥

৩১। ইন্দ্রিয়াণামুৎপত্তিমাহ—তৈজসানি তৈজসাহঙ্করাজ্জাতানি। জ্ঞানেন্দ্রিয়াণাং বৈকারিকত্বশঙ্কানিবৃত্ত্যর্থমেবকারঃ। দ্বিবিধান্যপি ইন্দ্রিয়াণি তৈজসান্যেবেত্যন্বয়ঃ। তত্র হেতুঃ—প্রাণস্যেতি। হি যস্মাৎ, প্রাণস্য ক্রিয়াশক্তিঃ, বুদ্ধেশ্চ বিজ্ঞানশক্তিতা ; অতঃ প্রাণস্য তৈজসত্বাৎ তদীয়-ক্রিয়াশক্তিমতামপি ইন্দ্রিয়াণাং তৈজসত্বম্, তথা বুদ্ধেস্তৈজসত্বাৎ তদীয়-জ্ঞানশক্তিমতামপি ইন্দ্রিয়াণাং তৈজসত্বমিত্যর্থঃ ॥

৩২—৪৬। তন্মাত্রোৎপত্তিপূর্ব্বকমাকাশাদিমহাভূতোৎপত্তিং তল্ল-ক্ষণঞ্চাহ—তামসাদিতি পঞ্চদশভিঃ। শ্রোত্রস্তু শব্দগমিত্যাদিভির্বিষয়োৎ-পত্ত্যনন্তরং তৎসম্বন্ধমাত্রং কথ্যতে, ন তূৎপত্তিঃ, প্রাগেবোৎপন্নত্বাৎ। শব্দং গচ্ছতি প্রাপ্নোতীতি শব্দগম্॥ (৩৩) শব্দস্য লক্ষণমাহ—অর্থাশ্রয়ত্বম

অর্থবাচকত্বম্, দ্রষ্টুর্লিঙ্গত্বং কুড্যান্তরিতস্য বক্তুর্জ্ঞাপকত্বম্। তদুক্তম্—'লিঙ্গং যদ্‌দ্রষ্টৃদৃশ্যয়োঃ' ইতি। নভসস্তন্মাত্রত্বং সূক্ষ্মত্বং শব্দস্য লক্ষণমিত্যন্বয়ঃ ॥ (৩৪) নভসো লক্ষণমাহ—ভূতানামিতি। ছিদ্রদাতৃত্বমবকাশদাতৃত্বম্, বহিরন্তরব্যবহারাস্পদত্বম্, আত্মা মনঃ, প্রাণাদীনাং ধিষ্ণ্যত্বমাশ্রয়ত্বং নাড্যাদিচ্ছিদ্ররূপেণ; বৃত্তিঃ কার্য্যমেব লক্ষণং বৃত্তিলক্ষণম্। এবমুত্তরত্রাপি একেন শ্লোকেন তন্মাত্রমহাভূতয়োরুৎপত্তিঃ, দ্বিতীয়েন তন্মাত্রলক্ষণম্, তৃতীয়েন মহাভূতলক্ষণমিত্যনুসন্ধেয়ম্ ॥ (৩৫) সা ত্বক্, স্পর্শস্য সংগ্রহঃ সম্যগ্ গ্রহণং যয়া, পুংস্ত্বং নিয়তলিঙ্গত্বাৎ; যদ্বা, স্পর্শস্য সংগ্রহস্ততো ভবতীতি শেষঃ। শব্দতন্মাত্রাদিত্যাদি তন্মাত্রাণামুত্তরোত্তরান্বয়ার্থমুক্তম্ ॥ (৩৬) স্পর্শলক্ষণমাহ—মৃদুত্বমিতি। স্পর্শত্বং স্বরূপলক্ষণমিত্যর্থঃ। নভস্বতো বায়োস্তন্মাত্রত্বঞ্চ ॥ (৩৭) চালনং বৃক্ষশাখাদেঃ, ব্যূহনং মেলনং তৃণাদেঃ, প্রাপ্তিঃ সংযোগঃ, দ্রব্যস্য গন্ধবতো ঘ্রাণং প্রতি; তথা শৈত্যাদিমতঃ স্পর্শনং প্রতি, শব্দস্য শ্রোত্রং প্রতি নেতৃত্বম্। সর্ব্বেন্দ্রিয়াণামাত্মত্ব উপোদ্বলকত্বম্, কর্ম্মণা কার্য্যেণাভিলক্ষণং, ভাবে ল্যুট্; কর্ম্মৈবাভিলক্ষণমিতি বিগ্রহে তু করণে ॥ (৩৯) দ্রব্যাকৃতিত্বং দ্রব্যস্যাকারসমর্পকত্বম্; গুণতা দ্রব্যোপসর্জ্জনতয়া প্রতীতিঃ, শব্দস্য তু স্বাতন্ত্র্যেণৈব প্রতীতিঃ। অপ্রত্যক্ষদ্রব্যস্য স্পর্শাদেরপি স্বাতন্ত্র্যেণৈব প্রতীতিঃ, রূপস্য তু নৈবমিতি তস্যায়ং বিশেষ উক্তঃ। ব্যক্তিসংস্থাত্বম্—দ্রবস্য যা সংস্থা সন্নিবেশঃ, সৈব সংস্থা সন্নিবেশো যস্য দ্রব্যপরিণামতয়া প্রতীতিরিত্যর্থঃ। তেজসস্তেজস্ত্বমসাধারণত্বম্ ॥ (৪০) দ্যোতনং প্রকাশনম্, পচনং তণ্ডুলাদেঃ, ক্ষুত্তৃট্ অশনা পিপাসা চ, তদ্দ্বারেণ পানমদনঞ্চ ॥ (৪১) জিহ্বা রসনেন্দ্রিয়ম্, রসো গৃহ্যতে অনয়েতি রসগ্রহঃ, যদ্বা, রসগ্রহস্ততো ভবতীতি শেষঃ ॥ (৪২) কষায়াদিষু লবণোঽপি দ্রষ্টব্যঃ। ভৌতিকানাং সংসর্গিদ্রব্যাণাং য একো মধুর এব সন্নেবমনেকধা ভিদ্যতে, স রস

ইত্যর্থঃ ॥ (৪৩) ক্লেদনমার্দ্রীকরণম্, পিণ্ডনং মৃদাদেঃ পিণ্ডীকরণম্, তৃপ্তিস্তৃপ্তিদাতৃত্বম্, প্রাণনং জীবনম্ ; 'আপোময়ঃ প্রাণঃ' ইতি শ্রুতেঃ[১]। আপ্যায়নং তৃড়্‌বৈক্লব্যনিবর্ত্তনম্ ; উন্দনং মৃদুকরণম্, ওদনমিতি পাঠেঽপি স এবার্থঃ। ভূয়স্ত্বং কূপাদাবুদ্ধৃতস্যাপি পুনঃপুনরুদ্গমঃ ॥ (৪৪) গন্ধগঃ গন্ধং প্রাপ্নোতি ॥ (৪৫) করম্ভো মিশ্রগন্ধঃ, যথা ব্যঞ্জনাদীনাং হিঙ্গ্বাদিসংস্কারেণ, পূতির্দুর্গন্ধঃ, সৌরভ্যং কর্পূরাদেঃ ; শান্তঃ শতপত্রাদেঃ, উগ্রো লশুনাদেঃ, অম্লস্তিন্তিড়্যাদেঃ। সংসর্গিণাং দ্রব্যাবয়বানাং বৈষম্যাদ্ য এবং বিভিদ্যতে, স গন্ধ ইত্যর্থঃ ॥ (৪৬) ব্রহ্মণো ভাবনং প্রতিমাদিরূপেণ সাকারতাপ্রতিপাদনম্ ; স্থানং জলাদিবিলক্ষণতয়া আশ্রমান্তর[২]-নৈরপেক্ষ্যেণ স্থিতিঃ ; ধারণং জলাদ্যাধারত্বম্, সতামাকাশাদীনাং বিশেষণমবচ্ছেদকত্বম্। সর্ব্বেষাং সত্ত্বানাং প্রাণিনাং তদ্‌গুণানাঞ্চ পুংস্ত্বাদীনামুদ্ভেদঃ পরিণামবিশেষৈঃ প্রকটীকরণম্ ॥

৪৭—৪৮। শ্রোত্রাদীনাং শব্দাদিগ্রাহকত্বমুক্তম্, তেষাঞ্চ লক্ষণম্, তদেবেত্যাহ পঞ্চভিঃ শ্লোকার্দ্ধৈঃ। নভসো গুণবিশেষঃ শব্দো যস্যার্থো বিষয়ঃ ॥

৪৯। গুণবিশেষশব্দব্যাবর্ত্ত্যং[৩] দর্শয়তি—পরস্যেতি ; পরস্য কারণস্য ধর্ম্মঃ শব্দাদিঃ, অপরস্মিন্ কার্য্যে বায়্বাদৌ কারণান্বয়াদ্দৃশ্যতে। অতো ভাবানামাকাশাদীনাং বিশেষো গুণঃ সর্ব্বোঽপি শব্দাদিঃ ভূমাবেবোপলভ্যতে, চতুর্ণাং তত্রান্বয়াৎ। জলাদিষু যথান্বয়মেব, ন সর্ব্বঃ। আকাশে তু অন্যান্বয়াভাবাদেক এব ॥

৫০—৫২। এবং কারণোৎপত্তিমুক্ত্বা কার্য্যোৎপত্তিমাহ—সার্দ্ধৈস্ত্রিভিঃ। এতানি অসংহত্য অমিলিত্বা যদা স্থিতানি, তদা জগদাদিরীশ্বরঃ প্রাবিশৎ।

১। স্মৃতেঃ (ঘ) ; ২। আশ্রয়ান্তর- (ঘ) ; ৩। -ব্যাবৃত্ত্যর্থং (ক)।

সপ্তেতি চ প্রাধান্যাভিপ্রায়েণোক্তম্, প্রবেশস্তু সর্ব্বেষ্বপি বিবক্ষিত এব ॥ (৫১) অনুবিদ্ধেভ্যঃ ক্ষুভিতেভ্যঃ, যস্মাদণ্ডাদসৌ বিরাট্ পুরুষ উদতিষ্ঠৎ ॥ (৫২) ভগবতো রূপমিতি পুরুষাভেদাভিপ্রায়েণ ॥

৫৩—৬১। তস্মিন্নধ্যাত্ম্যাদিবিভাগমাহ—হিরণ্ময়াদিতি নবভিঃ। উত্থায় ঔদাসীন্যং বিহায়, তমাবিশ্য অধিষ্ঠায়। মহাংশ্চাসৌ দেবশ্চ। খং ছিদ্রম্ ॥ (৫৪) বাণ্যা সহ বহ্নিরভবৎ প্রাবিশৎ, নাসে নিরভিদ্যেতাম্, প্রাণোতঃ প্রাণেন উতঃ স্যূতঃ সন্ ঘ্রাণ এতয়োর্নাসিকয়োরভবদিত্যনুষঙ্গঃ ॥ (৫৫) ঘ্রাণাদনন্তরং বায়ুশ্চ। প্রাণোত ইতি বিশেষণং সর্ব্বেন্দ্রিয়েষ্বপি দ্রষ্টব্যম্। ন্যভিদ্যেতামন্বভিদ্যেতামিতি পাঠদ্বয়েঽপ্যেক এবার্থঃ। ততো দিশঃ প্রাবিশন্ ॥ (৫৬) আদিশব্দেন কেশাঃ ॥ (৫৮) স্বরাড়িন্দ্রঃ, হরির্বিষ্ণুঃ ॥ (৫৯) আভৃতং জাতম্ ॥ (৬১) বুদ্ধ্যাদিষু হৃদয়মেবাধিষ্ঠানম্, গিরাংপতির্ব্রহ্মা, চৈত্ত্যঃ ক্ষেত্রজ্ঞঃ ॥

(৬২—৭০) অন্বয়ব্যতিরেকাভ্যাং ক্ষেত্রজ্ঞং বিবেক্তুং সর্ব্বেষাং পুনঃপ্রবেশমাহ—এত ইতি নবভিঃ ॥

(৭১—৭২) বিরাড়্দেহস্য ব্যষ্টিদেহং দৃষ্টান্তত্বেন দর্শয়ন্ সাংখ্যানুকথনস্য প্রয়োজনমাহ—যথেতি দ্বাভ্যাম্। প্রথমং পরমেশ্বরে ভক্তিঃ, ততোঽন্যত্র বিরক্তিঃ, ততো যোগপ্রবৃত্তা ধীঃ, একাগ্রং চিত্তম্, ততো যজ্জ্ঞানম্, তেন প্রত্যগাত্মানং ক্ষেত্রজ্ঞমস্মিন্নাত্মনি কার্য্যকারণসংঘাতে বিবিচ্য চিন্তয়েৎ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
ষড়্বিংশোঽধ্যায়ঃ ॥ ২৬ ॥

সপ্তবিংশোঽধ্যায়ঃ

সপ্তবিংশে ততঃ সম্যগ্ বহু-[১]সাধনযোগতঃ।
পুংপ্রকৃত্যোর্বিবেকেন মোক্ষরীতির্নিরূপ্যতে ॥ (১)

১—৩। বিবেকজ্ঞানেন মোক্ষমুপপাদয়িতুং শুদ্ধস্যৈব পুরুষস্য প্রকৃত্যবিবেকতঃ পূর্ব্বোক্তং সংসারমনুস্মারয়তি—প্রকৃতিস্থোঽপীতি ত্রিভিঃ। প্রকৃতিস্থোঽপি দেহস্থোঽপি, নাজ্যতে ন লিপ্যতে, গুণৈস্তৎকৃতৈঃ সুখদুঃখাদিভিঃ; নির্গুণত্বাদকর্ত্তৃত্বম্, ততোঽবিকারিত্বম্, তস্মাৎ॥ (৩) অনির্বৃতঃ সন্ প্রাসঙ্গিকৈঃ প্রকৃতিসঙ্গকৃতৈঃ; সদসন্মিশ্রযোনিষু দেবতির্য্যঙ্ নরাদিষু সংসারপদবীং প্রাপ্নোতি॥

৪। নন্বু তর্হ্যবাস্তবত্বাৎ সংসৃতেঃ, কিং তন্নিবৃত্তিপ্রয়াসেন? তত্রাহ—অর্থে হীতি॥

৫। যতো বিষয়ধ্যানমনর্থহেতুঃ, অতো মনো নিয়ন্তব্যমিত্যাহ—অত এবেতি। অসতামিন্দ্রিয়াণাং পথি বিষয়মার্গে, তীব্রেণ দৃঢ়েন, বিরক্ত্যা চ তীব্রয়া॥

৬—১১। ভক্তিবিরক্ত্যোস্তীব্রত্বে কারণানি বর্ণয়ন্ জ্ঞানেন মোক্ষপ্রকারমাহ—ষড়্ভিঃ। যমাদিভির্যোগমার্গৈশ্চিত্তমভ্যসন্ পুনঃ পুনরেকাগ্রীকুর্ব্বন্, আত্মানমুপলভ্য সর্ব্বানুস্যূতমদ্বয়ং পরমাত্মানং প্রতিপদ্যত ইতি ষষ্ঠেনান্বয়ঃ। সত্যেন নিষ্কপটেন, ভাবেন প্রেম্ণা॥ (৭) অপ্রসঙ্গতঃ সঙ্গত্যাগেন, মহীয়সা[২] ঈশ্বরেঽর্পিতেন॥ (৮) বিবিক্তশরণ একান্তবাসী॥ (৯) অসদাগ্রহম্—অহংমমতাম্, প্রকৃতেঃ পুরুষস্য চ দৃষ্টং তত্ত্বং যেন, তেন জ্ঞানেন॥ (১০) নিবৃত্তানি বুদ্ধ্যবস্থানানি জাগ্রদাদীনি যস্য সঃ, অতএব দূরীভূতমন্যদর্শনং যস্য। আত্মনা অহঙ্কারাবচ্ছিন্নেন আত্মানং শুদ্ধমুপলভ্য। একস্যৈবাবচ্ছেদাভ্যাং করণত্বকর্ম্মত্বে দৃষ্টান্তমাহ—চক্ষুষা

১। গ্রন্থ-(ক); ২। বলীয়সা গ)।

চক্ষুরবচ্ছিন্নেন অর্কেণ গগনস্থমর্কমিব। এবমাত্মদৃক্ শুদ্ধমাত্মানং পশ্যন্॥ (১১) মুক্তলিঙ্গং নিরুপাধিকম্, অসতি মিথ্যাভূতেঽহঙ্কারে সদাভাসং সদ্রূপেণাভাসমানং ব্রহ্ম প্রাপ্নোতি। শুদ্ধজীবস্বরূপাদ্বিশেষমাহ—সতঃ কারণস্য প্রধানস্য বন্ধুমধিষ্ঠানম্, অসতঃ কার্য্যস্য চক্ষুরিব প্রকাশকম্। সর্ব্বেষু কার্য্যকারণেষু অনুস্যূতম্, অদ্বয়ং পরিপূর্ণম্॥

১২। অহঙ্কারোপহিতেন শুদ্ধব্রহ্মপ্রতিপত্তিং সদৃষ্টান্তমাহ—যথেতি। জলে স্থিত আভাসঃ সূর্য্যপ্রতিবিম্বো যদা গৃহান্তর্বর্ত্তিভিত্তৌ স্ফুরতি, তদা গৃহকোণস্থিতৈঃ পুরুষৈর্ভিত্ত্যাদৌ স্থলেঽপি তেন স্বাভাসেন সূর্য্যপ্রতিবিম্বেন, যথা প্রথমং জলস্থ আভাসোঽবদৃশ্যতে লক্ষ্যতে, গগনস্থস্য গৃহমধ্যে প্রতিবিম্বাযোগাৎ; চার্থে তথাশব্দঃ, যথা চেত্যর্থঃ; যথা চ জলস্থেন দিবিস্থিতঃ সূর্য্যো লক্ষ্যতে॥

১৩। এবং ভূতেন্দ্রিয়মনোময়ৈর্দেহেন্দ্রিয়মনোভিরবিচ্ছিন্নৈঃ স্বাভাসৈরাত্মপ্রতিবিম্বৈস্ত্রিবৃৎ ত্রিগুণোঽহঙ্কারঃ, সতো ব্রহ্মণ আভাসো যস্মিন্, তেন রূপেণ লক্ষিতঃ, অহঙ্কারস্যাভাসং বিনা বিষয়াভাসানুপপত্তেঃ। অনেন চাহঙ্কারেণ সদাভাসবতা সত্যদৃক্ পরমার্থজ্ঞপ্তিরূপ আত্মা লক্ষিত ইত্যর্থঃ॥

১৪—১৬। ইদানীং সুষুপ্তিসাক্ষিত্বেন শুদ্ধাত্মপ্রতিপত্তিমনুভবতো দর্শয়তি ত্রিভিঃ। ভূতাদিষু অসতি অসত্তুল্যে দেহে অব্যাকৃতে নিদ্রয়া লীনেষু সৎসু, যস্তত্র তদা বিনিদ্রো নিরহংক্রিয়ঃ, তমাত্মানং প্রতিপদ্যত ইতি তৃতীয়েনান্বয়ঃ॥ (১৫) ননু যদি তদা বিনিদ্রোঽসাবস্তি, তর্হি জাগ্রৎস্বপ্নয়োরিব স্ফুটঃ কিং নাবভাসতে? তত্রাহ—পূর্ব্বং স দ্রষ্টা, অতো দ্রষ্টৃত্বেন সবিকল্পতয়া স্ফুটং প্রতীতঃ, সুষুপ্তৌ তু ভূতাদেরহঙ্কারবিষয়স্য লীনত্বাত্তদ্বিষয়েঽহঙ্কারে নষ্টে সতি স্বয়মনষ্টোঽপি মৃষৈবাত্মানং নষ্টবন্মন্যমানো যঃ। অন্যস্য নাশে অন্যস্য নষ্টতুল্যত্বে দৃষ্টান্তঃ—নষ্টবিত্তো যথা আতুরো বিবশো নষ্টবদ্ভবতীত্যর্থঃ॥ (১৬) ননু সুষুপ্তৌ ন কিঞ্চিদনুভূয়তে?

নৈবম্ ; 'সুখমহমস্বাপ্সম্, ন কিঞ্চিদবেদিষম্' ইতি বিশেষজ্ঞানং বিনা কেবলস্যাত্মনঃ প্রতিসন্ধানাদিত্যাহ—এবমিতি। ননু প্রতিসন্ধানে সাহঙ্কারস্য প্রতীতেঃ, কথং নিরহঙ্ক্রিয়ত্বম্? তত্রাহ—সাহঙ্কারস্য দ্রব্যস্য কার্য্যকারণসংঘাতস্যানুগ্রহঃ প্রকাশকোঽবস্থানঞ্চ ; দ্রব্যস্য বিশেষণতয়া অহঙ্কারস্যাপি দৃশ্যত্বাচ্চ তদ্দ্রষ্টা আত্মা তদ্ব্যতিরিক্তঃ। তমাত্মানমিত্যন্বয়ঃ ॥

১৭—২০। ভক্তিবিরক্তিভ্যাং সত্যপি বিবেকে প্রকৃতিপুরুষয়োঃ পরস্পরত্যাগাভাবাৎ, কথং মুক্তিরিতি পৃচ্ছতি—পুরুষমিতি চতুর্ভিঃ। পুরুষব্যতিরেকেণ প্রকৃতেঃ স্বরূপলাভাভাবাৎ, প্রকৃতিব্যতিরেকেণ পুরুষস্যাভিব্যক্ত্যভাবাদিত্যন্যোঽন্যাপাশ্রয়ত্বান্নিত্যত্বাচ্চ পুরুষং প্রকৃতিঃ কদাচিন্ন মুঞ্চতীত্যর্থঃ ॥ (১৮) ব্যতিরেকাভাবমাত্রে দৃষ্টান্তঃ—যথা ব্যতিরেকতো ভাবঃ সত্তা নাস্তি, গন্ধস্য কদাচিদপক্ষয়দর্শনাৎ। দৃষ্টান্তান্তরম্—অপামিতি, বুদ্ধেঃ প্রকৃতেঃ, পরস্য পুরুষস্য চ ॥ (১৯) ততঃ কিম্? অত আহ—অকর্ত্তুরিতি। যে গুণা আশ্রয়ো যস্য সঃ। তেষু প্রকৃতেগুর্ণেষু সৎসু পুরুষস্য কৈবল্যং কথম্? (২০) অতএব ক্বচিন্নিবৃত্তপ্রায়স্যাপি সংসারভয়স্য পুনরুদ্ভবো দৃশ্যত ইত্যাহ—ক্বচিদিতি ॥

২১—২৩। ন প্রকৃতিসম্বন্ধমাত্রং বন্ধহেতুঃ, কিন্তু গুণবুদ্ধ্যা তদাসক্তিঃ ; তন্নিবৃত্তৌ সত্যাং মোক্ষোঽপি ঘটতে। ক্বচিদুদ্ভবস্তু সাধনবৈকল্যাদিত্যভিপ্রেত্য সাধনাতিশয়ং কথয়ন্ পরিহরতি ত্রিভিঃ। নিমিত্তং ফলম্, তন্ন নিমিত্তং প্রবর্ত্তকং যস্মিন্, তেন নিষ্কামেণ ধর্ম্মেণ। অমলাত্মনা নির্ম্মলেন মনসা, শ্রুতেন কথাশ্রবণেন, সংভৃতয়া পুষ্টয়া ॥ (২৩) দহ্যমানা অভিভূয়মানা তিরোহিতা ভবতি ॥

২৪। এবঞ্চ সতি পুনরুদ্ভবো নাস্তীত্যাহ—ভুক্তো ভোগো যস্যাঃ ; নিত্যশঃ সদা দৃষ্টো দোষো যস্যাঃ ; অতএব পরিত্যক্তা সতী ঈশ্বরস্যাপরতন্ত্রস্য স্বে মহিম্নি স্থিতস্য স্বানন্দং প্রাপ্তস্য ॥

২৫—২৬। অবিবেকাবস্থায়ামনর্থহেতুরপি বিবেকানন্তরং ন ভবতীতি সদৃষ্টান্তমাহ—যথেতি দ্বাভ্যাম্। প্রস্বাপঃ স্বপ্নঃ, বহ্বনর্থান্ বিভর্ত্তি পুষ্ণাতি; প্রতিবুদ্ধস্য সংস্কারবশেন স্ফুরন্নপি ॥

২৭—২৯। উপসংহরতি—যদৈবমিতি ত্রিভিঃ। বহূনি জন্মানি যস্মিন্ কালে॥ (২৮) প্রতিবুদ্ধার্থো বিদিতাত্মতত্ত্বঃ, কৈবল্যাখ্যং স্বসংস্থানং দেহাদিব্যতিরিক্তং স্বরূপম্; মদাশ্রয়ং নিঃশ্রেয়সং নিরতিশয়ানন্দম্॥ (২৯) স্বদৃশা আত্মজ্ঞানেন, ছিন্না সংশয়া মিথ্যাজ্ঞানানি যস্য; লিঙ্গাদ্বিনির্গমে লিঙ্গশরীরনাশে সতীত্যর্থঃ॥ (৩০) তদা তু অণিমাদিসিদ্ধয়োঽন্তরায়রূপা ভবন্তি; তাসু যোগেনোপচিতাসু সমৃদ্ধাসু, ন যোগাদন্যো হেতুর্যাসাং তাসু, যদা সিদ্ধস্য চেতো ন বিষজ্জতে; অঙ্গ! হে মাতঃ! অথ তদা অন্তমতিক্রান্তোঽত্যন্তো যোঽহং, তৎসম্বন্ধিনী। যত্র যস্যাং গতৌ মৃত্যোর্হাসো ন ভবতি; বিষয়াসক্তৌ তু সিদ্ধোঽপি ময়া বশীকৃত ইতি মৃত্যোর্হাসো গর্ব্বো ভবতীত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
সপ্তবিংশোঽধ্যায়ঃ ॥ ২৭ ॥

অষ্টাবিংশোঽধ্যায়ঃ

অষ্টাবিংশে ততোঽষ্টাঙ্গযোগেন ধ্যানশোভিনা।
সর্ব্বোপাধিবিনির্ম্মুক্তং স্বরূপজ্ঞানমীর্য্যতে॥ (১)
ভক্তিং সংক্ষেপতঃ প্রোচে[১] সাংখ্যমাখ্যায় বিস্তৃতম্।
অথাহ বৈষ্ণবং যোগমষ্টাঙ্গং কপিলো হরিঃ॥ (২)

১। প্রোচ্য (ঘ)।

১। সবীজস্য সাবলম্বনস্য, প্রসন্নং সৎ ॥

২—৪। তত্র যমনিয়মানাহ ত্রিভিরক্ষরদ্বয়াধিকৈঃ। শক্ত্যা স্বধর্ম্মাচরণম্ ॥ (৩) গ্রাম্যস্ত্রৈবর্গিকো ধর্ম্মঃ, তস্মান্নিবৃত্তিঃ ; মিতঞ্চ তন্মেধ্যং, শুদ্ধঞ্চ তস্যাদনম্ ; তত্র মিতং নাম—'দ্বৌ ভাগৌ পূরয়েদন্নৈস্তোয়েনৈকঞ্চ পূরয়েৎ[১]। মারুতস্য প্রচারার্থং চতুর্থমবশেষয়েৎ ॥' ইতি স্মৃতিপ্রসিদ্ধম্। বিবিক্তং বিজনম্, ক্ষেমং নির্ব্বাধম্, তস্য স্থানস্য সেবনম্ ॥ (৪) যাবতা অর্থঃ প্রয়োজনম্, তাবন্মাত্রস্য পরিগ্রহঃ ॥

৫—৭। আসনাদীনি অঙ্গান্যাহ ত্রিভিঃ। সত আসনস্য জয়েন স্থৈর্য্যম্ ॥ (৬) স্বধিষ্ণ্যানাং প্রাণস্থানানাং মূলাধারাদীনাং মধ্যে একস্মিন্ দেশে মনসা সহ প্রাণস্য ধারণং ধারণা ; আত্মনো মনসঃ সমাধানমাত্মাকারতা ॥ (৭) অন্যৈশ্চ ব্রতদানাদিভিঃ, পথিভিরুপায়ৈঃ ॥

৮। আসনাদীনি প্রপঞ্চয়তি—শুচাবিতি যাবৎসমাপ্তি। আসনং কুশাজিনচেলোত্তরম্, প্রতিষ্ঠাপ্য স্বস্তিকাসনেন যথাসুখমিতি বা, সমভ্যসেৎ প্রাণমিতি শেষঃ। 'উরু-জঙ্ঘান্তরাধায় পাদাগ্রে জানুমধ্যগে। যোগিনো যদবস্থানং স্বস্তিকং তদ্বিদুর্বুধাঃ ॥'

৯। বাহ্যবায়োরন্তঃপ্রবেশনং পূরকঃ, প্রবেশিতস্য ধারণং কুম্ভকঃ, ধৃতস্য বহির্নিঃসারণং রেচকঃ। প্রতিকূলেন বা রেচককুম্ভকপূরকৈঃ। যদ্বা, ঈড়য়া আপূর্য্য পিঙ্গলয়া রেচনম্, পিঙ্গলয়া আপূর্য্য ঈড়য়া রেচনমিত্যেবং প্রতিকূলেন। বা-শব্দশ্চার্থে। স্থিরং সৎ পুনরপি চঞ্চলং যথা ন ভবতি, তথা শোধয়েৎ ॥

১০। ধ্মাতং সন্তপ্তমিত্যর্থঃ, লৌহং সুবর্ণং যথা মলং ত্যজতি, তথা মনো বিরজং স্যাৎ ; ততশ্চাচঞ্চলং স্যাদিতি ভাবঃ ॥

১। প্রপূরয়েৎ (ঘ)।

১১। প্রাণায়ামাদীনাং সমাধৌ চত্বারি কার্য্যাণ্যাহ[১]—প্রাণায়ামৈরিতি। দোষান্ বাতশ্লেষ্মাদীন্, সংসর্গান্ বিষয়সঙ্গান্[২], অনীশ্বরান্ রাগাদীন্, বায়ুনা সহ মনসঃ স্থিরীকরণং ধারণা, স্থিরস্য বৃত্তিসন্ততির্ধ্যানম্, বৃত্তিনিরোধঃ সমাধিরিতি ভেদঃ ॥

১২। সুসমাহিতং স্থিরজাতম্; কাষ্ঠাং কলাম্, মূর্ত্তিমিত্যর্থঃ; স্বনাসাগ্রেঽবলোকনং যস্য; এতচ্চ লয়বিক্ষেপয়োঃ পরিহারায় ॥

১৩—১৯। ধ্যেয়ং হরিমাহ সপ্তভিঃ। প্রসন্নং বদনাম্ভোজং যস্য, তম্, 'ধ্যায়েৎ' ইতি ষষ্ঠেনান্বয়ঃ। পদ্মগর্ভবৎ অরুণে ঈক্ষণে নেত্রে যস্য; নীলোৎপলদলবৎ শ্যামম্ ॥ (১৪) লসৎপঙ্কজস্য কিঞ্জল্কবৎ পীতে কৌশেয়ে বাসসী যস্য, শ্রীবৎসো লাঞ্ছনং বক্ষসি যস্য, ভ্রাজৎকৌস্তুভেন আমুক্তা সংশ্লিষ্টা কন্ধরা যস্য ॥ (১৫) মত্তদ্বিরেফাণাং কলো মধুরধ্বনির্যস্যাং, তয়া পরীতং ব্যাপ্তম্; পরার্দ্ধ্যানি অমূল্যানি হারাদীনি যস্য ॥ (১৬) কাঞ্চীগুণেনোল্লসন্তী শ্রোণির্যস্য; ভক্তানাং হৃদয়াম্ভোজমেব বিষ্টরমাসনং যস্য; ভক্তানাং মনোনয়নানি বর্দ্ধয়তি হর্ষয়তীতি তথা ॥ (১৭) অপীব্যমতিসুন্দরং ভক্তবিষয়ং দর্শনং যস্য; কৈশোরে তারু[illegible] বয়সি সন্তং স্থিতম্; ভৃত্যানামনুগ্রহে কাতরং ব্যগ্রম্ ॥ (১৮) কীর্ত্ত[illegible] কীর্ত্তনার্হং তীর্থং যশো যস্য; পুণ্যশ্লোকা বলিপ্রমুখাস্তেষাং যশস্করম্; সমগ্রাণ্যঙ্গানি যস্মিন্; ন চ্যবতে, নাপযাতি, ন পর্য্যেতি বা ॥ (১৯) প্রেক্ষণীয়মীহিতং লীলা যস্য, তম্ ॥

২০। তদেবং সমগ্রধ্যানমুক্ত্বা একৈকাবয়বধ্যানমাহ—তস্মিন্ লব্ধং পদং স্থিতির্যেন, তচ্চিত্তং বিলক্ষ্য বিশেষেণ লক্ষ্যীকৃত্য; একত্র একৈকস্মিন্নঙ্গে ইত্যর্থঃ ॥

১। দ্বারকার্য্যাণ্যাহ (ঘ); ২। বিষয়সংসর্গান্ (ঘ)।

২১—৩৩। তদেব পাদাদিক্রমেণাহ ত্রয়োদশভিঃ। সম্যক্ চিন্তয়েৎ, পাদতলে রেখাত্মকানি বজ্রাদীনি লাঞ্ছনানি, তৈরাঢ্যং যুক্তম্; উত্তুঙ্গাশ্চ রক্তাশ্চ বিলসন্তো যে নখাস্তেষাং চক্রবালং মণ্ডলম্, তস্য জ্যোৎস্নাভিরাহৃতো মহতাং ধাতৄণাং হৃদয়ান্ধকারো যেন ; এতচ্চ সর্ব্বমুপাদেয়ং বিশেষণং ধ্যেয়ত্বেনৈবোচ্যতে ॥ (২২) কিঞ্চ, যস্য শৌচেন ক্ষালনেন নিঃসৃতায়াঃ সরিৎপ্রবরায়া গঙ্গায়া উদকেন তীর্থেন সংসারতারকেণ, মূর্দ্ধ্নি অধিকৃতেন ধৃতেন শিবোঽপি শিবোঽভূৎ, অত্যধিকং সুখং প্রাপেত্যর্থঃ ; ধ্যাতুর্মনসি যঃ শমলশৈলঃ পাপপর্ব্বতঃ, তস্মিন্ নিসৃষ্টং ক্ষিপ্তং বজ্রমিব যৎ ; যদ্বা, শমলশৈলে নিসৃষ্টং স্বলাঞ্ছনরূপং বজ্রং যেন, তৎ ॥ (২৩) বিভোর্জানুদ্বয়ং তৎপর্য্যন্তং জঙ্ঘাদ্বয়ম্, অখিলস্য বিধাতুর্ব্রহ্মণো জনন্যা লক্ষ্ম্যা সংলালিতং স্পর্শচাতুর্য্যেণ সংসেবিতম্; সংসারিত্বমিব প্রতীতং বারয়তি—অভবস্যেতি। হৃদি কুর্য্যাৎ ধ্যায়েৎ ॥ (২৪) সুপর্ণস্য ভুজয়োঃ স্কন্ধয়োরধি উপরি, ওজসো বলস্য নিধী আধারৌ, অতসিকায়াঃ কুসুমবৎ কান্ত্যা অবভাসমানৌ ; ব্যালম্বি আগুল্ফং লম্বমানং যৎ পীতাম্বরং বাসস্তস্মিন্ বর্ত্তমানো যঃ কাঞ্চীকলাপঃ, তেন পরিরম্ভঃ সংশ্লেষো বিদ্যতে যস্য, তদ্বিভোর্নিতম্ববিম্বঞ্চ হৃদি কুর্য্যাদিতি পূর্ব্বেণৈবান্বয়ঃ ॥ (২৫) অমুষ্য হরের্নাভিহ্রদং ধ্যায়েৎ। কথম্ভূতম্ ? ভুবনানাং কোশস্য সমূহস্য গুহা অধিষ্ঠানং যদুদরম্, তত্র স্থিতম্ ; যত্র নাভিহ্রদে আত্মযোনের্ব্রহ্মণো ধিষণং ধিষ্ণ্যমখিললোকাত্মকং পদ্মং ব্যূঢ়মুত্থিতম্ ; তথা হরিন্মণিবৃষৌ মরকতমণিশ্রেষ্ঠাবিব যৌ স্তনৌ, তয়োর্দ্বয়ং ধ্যায়েৎ, বিশদহারাণাং ময়ূখৈর্গৌরং শ্বেতম্ ॥ (২৬) ঋষভস্য শ্রেষ্ঠস্য, মহাবিভূতের্মহালক্ষ্ম্যা অধিবাসং স্থানং বক্ষঃ, কণ্ঠঞ্চ মনসি কুর্য্যাৎ। কথম্ভূতং কণ্ঠম্ ? কৌস্তুভমণির্যো ভূষণার্থং ধৃতঃ, তস্যাধিকং ভূষণমর্থঃ প্রয়োজনং যস্য, কৌস্তুভমণিমেব স্বয়মলঙ্কুর্ব্বন্তমিত্যর্থঃ। পুংসাং স্মর্ত্তৄণাং দ্রষ্টৄণাঞ্চ মনোনয়নানাং নির্বৃতিমাদধানমিত্যুভয়োর্বিশেষণম্ ॥

(২৭) নির্ণিক্তান্যুজ্জ্বলীকৃতানি বাহুবলয়ানি অঙ্গদানি যেষু, অধিশ্রিতা লোকপালা যেষু, দশশতারং চক্রম্, ন সহ্যং তেজো যস্য, তস্য কর-সরোরুহে রাজহংসমিব ॥ (২৮) অরাতয়ো যে ভটা যোদ্ধারঃ, তেষাং শোণিতমেব কর্দ্দমস্তেন দিগ্ধাং লিপ্তাম্ ; অস্য কণ্ঠে মালাং মণিঞ্চ স্মরেৎ। মধুব্রতানাং বরূথস্য গিরা উপঘুষ্টাং নাদিতাম্; চৈতন্যস্য জীবস্য তত্ত্বম্ ; তদুক্তং বৈষ্ণবে—'আত্মানমস্য জগতো নির্লেপমগুণামলম্। বিভর্ত্তি কৌস্তুভ-মণিস্বরূপং[১] ভগবান্ হরিঃ॥' ইতি॥ (২৯) ভৃত্যেষু অনুকম্পিতা কৃতানুকম্পা যা ধীস্তয়া গৃহীতা মূর্ত্তির্যেন তস্য। বিস্ফুরন্তী যে মকরকুণ্ডলে, তয়োর্বল্গিতেন প্রচলনেন বিদ্যোতিতৌ অমলৌ কপোলৌ যস্মিন্ তৎ, উদারা উন্নতা নাসা যস্মিন্ তৎ ॥ (৩০) যচ্চ মুখং স্বয়া ভূত্যা শোভয়া অলিভিশ্চ পরিষেব্যমাণং মীনদ্বয়াশ্রয়ঞ্চ, শ্রীনিকেতনং পদ্মমধিক্ষিপৎ বর্ত্ততে, তদ্ধ্যায়েৎ। অত্র কুন্তলৈরলীনামধিক্ষেপঃ, নেত্রদ্বয়েন মীনদ্বয়-স্যেতি দ্রষ্টব্যম্। অব্জে ইব নেত্রে যস্মিন্, ইত্যুপমানান্তরম্। উল্লসন্তৌ ভ্রুবৌ যস্মিন্ ; মনোময়ং মনসি আবির্ভবৎ ॥ (৩১) কৃপয়া অধিক-মত্যর্থমক্ষিভ্যাং নিসৃষ্টং প্রযুক্তম্, স্নিগ্ধস্মিতেনানুগুণিতং সংযুক্তম্, বিপুলঃ প্রসাদো যস্মিন্; গুহায়াং হৃদি॥ (৩২) অবনতা যে অখিললোকাঃ, তেষাং তীব্রশোকেন যানি অশ্রূণি, তেষাং সাগরং বিশোষয়তীতি তথা, তং হরের্হাসম্[২]। অস্য অত্যুদারং ভ্রূমণ্ডলঞ্চ ধ্যায়েৎ। কথম্ভূতম্? নিজ-মায়য়া মকরধ্বজস্যাপি সম্মোহনায় রচিতম্ ; মুনিকৃতে মুনীনামুপকারায়, মুনীনাং সম্মোহনে প্রবৃত্তং কামমেব সম্মোহয়িতুমিত্যর্থঃ॥ (৩৩) মন্দহাসধ্যানমুক্ত্বা স্ফুটহাসধ্যানমাহ— বিষ্ণোঃ প্রহসিতমুচ্চৈঃ হসিতং ধ্যায়েৎ। কীদৃশম্? ধ্যানায়নমতিসুন্দরতয়া প্রযত্নং বিনৈব ধ্যানস্য বিষয়ভূতম্। সৌন্দর্য্যমেবাহ—বহুলয়া অধিকয়া অধরৌষ্ঠস্য ভাসা কান্ত্যা

১। কৌস্তুভমণিং স্বরূপং (ঘ) ; ২। -র্হসিতম্ (গ)।

অরুণীভূতাস্তনবঃ সূক্ষ্মা দ্বিজা এব কুন্দমুকুলানি, তেষাং পঙ্‌ক্তিঃ স্ফুরতি যস্মিন্, তৎ। দহ্রকুহরে হৃদয়াবকাশেঽবসিতস্য জ্ঞাতস্য। প্রেমরসেনার্দ্রয়া ভক্ত্যা তস্মিন্নেবাপিতমনাঃ সন্, পৃথক্ তদ্ব্যতিরিক্তং দ্রষ্টুং নৈবেচ্ছেৎ, চিত্তং ন বিচালয়েদিত্যর্থঃ ॥

৩৪—৩৫। সমাধিমাহ—এবমিতি দ্বাভ্যাম্। নির্বীজঃ সবীজশ্চেতি দ্বিবিধো যোগঃ; তত্র নির্বীজযোগে 'যতো যতো নিশ্চলতি মনশ্চঞ্চলমস্থিরম্। ততস্ততো নিয়ম্যৈতদাত্মন্যেব বশং নয়েৎ॥' ইতি গীতাদ্যুক্তমার্গেণ ক্রিয়মাণোঽপি দুষ্করঃ সমাধিঃ। সবীজে তু সুকরঃ; তত্র হি পরমানন্দমূর্ত্তৌ হরৌ ধ্যায়মানেঽযত্নত এব চিত্তোপরমো ভবতি। তদুক্তম্ —'হৃতাত্মনো হৃতপ্রাণাংশ্চ ভক্তি,-রনিচ্ছতো গতিমণ্বীং প্রযুঙ্‌ক্তে' ইতি। অতঃ স এবোপক্ষিপ্তঃ, 'যোগস্য লক্ষণং বক্ষ্যে সজীবস্য' ইতি। তদেবাযত্নসিদ্ধত্বং দর্শয়তি—এবং ধ্যানমার্গেণ হরৌ প্রতিলব্ধো ভাবঃ প্রেমা যেন, তথা ভক্ত্যা দ্রবদ্ধৃদয়ং যস্য, প্রমোদাদুদ্গতানি পুলকানি যস্য, ঔৎকণ্ঠ্যপ্রবৃত্তাশ্রুকলয়া চ মুহুরর্দ্দ্যমানঃ, আনন্দসংপ্লবে নিমজ্জমানঃ, দুগ্রর্হস্য ভগবতো গ্রহণে বড়িশং মৎস্যবেধনমিবোপায়ভূতং চিত্তমপি ধ্যেয়াদ্‌বিযুঙ্‌ক্তে, তদ্ধারণে শিথিলপ্রযত্নো ভবতীত্যর্থঃ॥ (৩৫) যর্হি যদা এবং নির্ব্বিষয়ং ভবতি, অতএব মুক্তাশ্রয়ঞ্চ ধ্যেয়সম্বন্ধং বিনা ধ্যাতর্য্যবস্থানাসম্ভবাৎ। ন চ পূর্ব্ববৎ শব্দাদিবিষয়ঃ স্যাৎ; যতস্তত্র বিরক্তং পরমানন্দানুভবেন। অতো নির্ব্বাণং লয়মৃচ্ছতি, বৃত্তিরূপতাং পরিত্যজ্য স্বাকারেণ পরিণমত ইত্যর্থঃ, যথা অর্চ্চির্জ্বালা আশ্রয়বিষয়াপগমে মহাভূতজ্যোতীরূপেণ পরিণমতে। অত্র অস্যাং দশায়ামব্যবধানং ধ্যাতৃধ্যেয়বিভাগশূন্যম্, একমখণ্ডম্, আত্মানমনুগতমীক্ষতে। অত্র হেতুঃ—প্রতিনিবৃত্তোঽপগতো গুণপ্রবাহো দেহাদ্যুপাধির্যস্য ॥

৩৬। ন চ সুপ্তোত্থিত ইব পুনঃ সংসরতীত্যাহ—সোঽপি, স চ পুরুষস্তস্মিন্ মহিম্নি ব্রহ্মরূপেঽবসিতঃ অবসানো নিষ্ঠাং প্রাপ্তঃ। কয়া? মনসো নিবৃত্ত্যা, চরময়া অবিদ্যারহিতয়েতি সুষুপ্তাদ্বিশেষঃ। তত্র হি অবিদ্যাস্তি, ন ত্বিদানীম্। তত্র হেতুঃ—এতয়া, যোগাভ্যাসকৃতয়েত্যর্থঃ। নন্বেবমপি সুখদুঃখয়োরাত্মধর্ম্মত্বে কুতো ব্রহ্মৈক্যম্? তত্রাহ—দুঃখয়োঃ সুখদুঃখয়োর্হেতুত্বং ভোক্তৃত্বঞ্চ যৎ পূর্ব্বমাত্মনি আসীৎ, তদপি অসতি অবিদ্যয়া কৃতে কর্ত্তরি অহঙ্কারে বিধত্তে, তন্নিষ্ঠমেব পশ্যতীত্যর্থঃ; যত উপলব্ধপরাত্মকাষ্ঠঃ অপরোক্ষীকৃতাত্মতত্ত্বঃ ॥

৩৭-৩৮। তস্য জীবন্মুক্ততামাহ—দেহঞ্চেতি দ্বাভ্যাম্। চরম উক্তলক্ষণঃ সিদ্ধো দেহমপি ন বিপশ্যতীতি; কুতঃ সুখদুঃখে? আসনা-দুত্থিতমুত্থায় তত্রৈব স্থিতম্, তৎস্থানাদপেতং, ততো দৈববশাৎ পুনরপি উপেতং বা ন বিপশ্যতি, যতঃ স্বরূপং প্রাপ্তঃ, যতো দেহাৎ স্বরূপমধ্যগমৎ, তং দেহমিতি বা। সতোঽপ্যননুসন্ধানে দৃষ্টান্তঃ—বাসঃ পরিকৃতং কটিতটে পরিবেষ্টিতং স্থিতং গতং বা, মদিরামদেনান্ধো যথা ন পশ্যতীত্যর্থঃ॥ (৩৮) নন্বু কথং তর্হি দেহস্য প্রবৃত্তিনিবৃত্তী জীবনং বা? তত্রাহ—দেহোঽপীতি। দৈবং পূর্ব্বসংস্কারঃ, তদ্বশেন গচ্ছন্ যাবৎ স্বারম্ভকং কর্ম্মাস্তি, তাবৎ প্রতি-সমীক্ষতে জীবত্যেব, সাসুঃ সেন্দ্রিয়ঃ। নন্বু তর্হি তস্মিন্ পুনঃ সঙ্গঃ স্যাৎ? তত্রাহ—তং দেহং স্বাপ্নদেহাদিতুল্যং সপ্রপঞ্চপুত্রাদিসহিতং পুনর্ন ভজতে, অহং মমেতি নাভিমন্যতে। অধিরূঢ়ঃ প্রাপ্তঃ সমাধিপর্য্যন্তো যোগো যেন; অতএব প্রতিবুদ্ধং বস্তু আত্মতত্ত্বং যেন, সঃ ॥

৩৯—৪৪। প্রতিবোধপ্রকারমাহ—যথেতি ষড়্ভিঃ। অতিস্নেহ-বশাদাত্মত্বেনাভিমতাদপি পুত্রাদের্মর্ত্ত্যঃ পিত্রাদিঃ। পুরুষো দেহাদের্দ্রষ্টা॥ (৪০) পৃথগবস্থানাভাবেঽপি ভেদং সদৃষ্টান্তমাহ—যথোল্মুকাৎ ইদানীং জ্বলতঃ কাষ্ঠাৎ স্বসম্ভবাদগ্নেঃ সম্ভূতাৎ, আত্মত্বেনাগ্নেঃ স্বরূপত্বেন অভি-

মতাদপি ; অত্যন্তাবিবেকিনো হি ধূমেঽপ্যগ্ন্যভিমানোঽস্তি, উল্মুকাৎ পূর্ব্ব-সিদ্ধাদপি দাহকঃ প্রকাশকশ্চাগ্নিঃ পৃথগেব ॥ (৪১) ভূতাদের্দ্রষ্টা তেভ্যঃ পৃথক্, তস্মাদপি জীবসংজ্ঞিতাদ্ব্রহ্মসংজ্ঞিতঃ পৃথক্, তথা প্রধানাদপি তৎ-প্রবর্ত্তকো ভগবান্ পৃথগিত্যর্থঃ ॥ (৪২) উপাধিতো বিবেকমুক্ত্বা তদৈক্য-মাহ—সর্ব্বভূতেম্বিতি। ভূতেষু চতুর্ব্বিধেষু, তদাত্মতাং মহাভূতাত্মতাম্ ॥ (৪৩) ধর্ম্মভেদস্তৌপাধিকত্বং সদৃষ্টান্তমাহ—স্বযোনিষু কাষ্ঠেষু, জ্যোতিরগ্নিঃ, গুণবৈষম্যাদ্ দীর্ঘহ্রস্বাদিভেদাৎ, প্রকৃতৌ দেহে ॥ (৪৪) স্বাং স্বাংশস্য জীবস্য বন্ধহেতুং দৈবীং দেবস্য বিষ্ণোঃ শক্তিং পরভাব্য, তৎপ্রসাদেনৈব জিত্বা স্বরূপেণ ব্রহ্মত্বেনাবতিষ্ঠতে ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
অষ্টাবিংশোঽধ্যায়ঃ ॥ ২৮ ॥

একোনত্রিংশোঽধ্যায়ঃ

একোনত্রিংশকে ভক্তিযোগস্ত বহুধোচ্যতে।
কালস্য চ বলং ঘোরা সংসৃতিশ্চ বিরক্তয়ে ॥ (১)

১-২। উক্তানুবাদপূর্ব্বকং ভক্তিমার্গভেদান্ পৃচ্ছতি দ্বাভ্যাম্। লক্ষণং মহদাদীনাং যথা সাংখ্যেষু, তথা ত্বয়া কথিতম্, যেন লক্ষণেন, তৎ পারমার্থিকং পরস্পরবিভক্তমিত্যর্থঃ। যো ভক্তিযোগো মূলং প্রয়োজনং যস্য, তদ্যন্মূলং তৎ কথিতম্। তস্য ভক্তিযোগস্য মার্গং প্রকারং বিস্তরতো মে ব্রূহি ॥

৩। যেন সংসৃতীনামাখ্যানেন বিগতরাগো ভবেৎ ॥

৪। ঈশ্বরস্বরূপস্য মহাপ্রভাবস্য তে তদাত্মকস্য, যদ্ধেতোর্যদ্ভয়াৎ কুশলং পুণ্যং কুর্ব্বন্তি ॥

৫। অচক্ষুষঃ অজ্ঞস্য, অতো মিথ্যাভূতে দেহাদৌ অভিমতিরহঙ্কারো যস্য, অতঃ কর্ম্মস্বনুবিদ্ধয়া আসক্তয়া ধিয়া শ্রান্তস্য, অতএব অনাশ্রয়েঽপারে তমসি সংসারে চিরং প্রসুপ্তস্য লোকস্য প্রবোধনায়, ত্বং যোগ-প্রকাশকো ভাস্করঃ কিলাবির্ভূতোঽসি ॥

৬। শ্লক্ষ্ণম্—সুন্দরম্ ॥

৭। মার্গৈঃ প্রকারবিশেষৈঃ ; তানেবাহ—স্বভাবভূতা যে গুণাস্তেষাং মার্গেণ বৃত্তিভেদেন, ভাবঃ অভিপ্রায়ঃ, ফলসঙ্কল্পভেদাদ্ভক্তিভেদ ইত্যর্থঃ ॥

৮। অভিসন্ধায় সঙ্কল্প্য, সংরম্ভী ক্রোধী, ভিন্নদৃক্ ভেদদর্শী, যো ভাবং ভক্তিং কুর্য্যাৎ, স ত্রিবিধোঽপি তামসঃ ॥

৯। পৃথগ্ভাবঃ—ভেদদর্শী ॥

১০। কর্ম্মনির্হারং পাপক্ষয়ম্, পরস্মিন্ পরমেশ্বরে তদর্পণং কর্ম্মার্পণম্, ভগবৎপ্রীতিমুদ্দিশ্যেত্যর্থঃ, যষ্টব্যমিতি বিধিসিদ্ধিমুদ্দিশ্যেত্যর্থঃ। ভেদ-দর্শিত্বমর্চ্চাদাবর্চ্চনঞ্চ ত্রিষ্বপি সমানম্। তদেবং তামসাদিভক্তিষু ত্রয়-স্ত্রয়ো ভেদাঃ, তাসু যথোত্তরং শ্রৈষ্ঠ্যম্, এবঞ্চ শ্রবণকীর্ত্তনাদয়ো নবাপি প্রত্যেকং নব নব ভেদাঃ ; তদেবং সগুণা ভক্তিরেকাশীতিভেদা ভবতি ॥

১১—১২। নির্গুণা তু ভক্তিরেকবিধৈব, তামাহ—মদ্গুণশ্রুতি-মাত্রেণেতি দ্বাভ্যাম্। মদ্গুণশ্রুতিমাত্রেণ ময়ি পুরুষোত্তমে মনোগতিরিতি যা ভক্তিঃ, সা নির্গুণস্য ভক্তিযোগস্য লক্ষণমিত্যন্বয়ঃ। অবিচ্ছিন্না সন্ততা ॥ (১২) অহৈতুকী ফলানুসন্ধানশূন্যা, অব্যবহিতা ভেদদর্শনরহিতা চ ; লক্ষণং স্বরূপম্ ॥

১৩। ভক্তানাং নিষ্কামতাং কৈমুতিকন্যায়েনাহ—সালোক্যং ময়া সহ একস্মিন্ লোকে বাসম্, সার্ষ্টিং সমানৈশ্বর্য্যম্, সামীপ্যং নিকট-

বর্ত্তিত্বম্, সারূপ্যং সমানরূপতাম্, একত্বং সাযুজ্যম্, উত অপি, দীয়মানমপি ন গৃহ্ণন্তি, কুতস্তৎকামনেত্যর্থঃ ॥

১৪। কিমিতি তর্হি ভজন্তে? ভক্তেরেব পরমফলত্বাদিত্যাহ—স এবেতি। ননু ত্রৈগুণ্যং হিত্বা ব্রহ্মপ্রাপ্তিঃ পরমফলং প্রসিদ্ধম্? সত্যম্, তত্তু ভক্তাবানুষঙ্গিকমিত্যাহ—যেন ভক্তিযোগেন, মদ্ভাবায় ব্রহ্মত্বায় ॥

১৫—১৯। এবম্ভূতায়া ভক্তেঃ সাধনান্যাহ পঞ্চভিঃ। নিষেবিতেন সম্যগনুষ্ঠিতেন, অনিমিত্তেন স্বধর্ম্মেণ নিত্যনৈমিত্তিকেন, মহীয়সা শ্রদ্ধাদিযুক্তেন, ক্রিয়াযোগেন পঞ্চরাত্রাদ্যুক্ত-পূজাপ্রকারেণ, শস্তেন নিষ্কামেণ ॥ (১৬) মদ্ধিষ্ণ্যং মৎপ্রতিমাদি, তস্য দর্শনাদিভিঃ; সত্ত্বেন ধৈর্য্যেণ, অসঙ্গমেন বৈরাগ্যেণ ॥ (১৮) আর্জ্জবেন অকৌটিল্যেন ॥ (১৯) মদ্ধর্ম্মণো ভগবদ্ধর্ম্মানুষ্ঠাতুঃ পুরুষস্যাশয়শ্চিত্তম্ ॥

২০। প্রযত্নং বিনৈব প্রাপ্তৌ দৃষ্টান্তঃ—বাতো রথঃ প্রাপকো যস্য গন্ধস্য, আশয়াৎ স্থানাৎ আবৃঙ্‌ক্তে আত্মসাৎ করোতি, অবিকারি সমং যচ্চেতঃ ॥

২১—২৭। চিত্তশুদ্ধিশ্চ সর্ব্বভূতাত্মদৃষ্ট্যৈব ভবতীতি বক্তুং কেবলপ্রতিমাদিনিষ্ঠাং নিন্দন্নাহ—অহমিতি সপ্তভিঃ। অর্চ্চৈব বিড়ম্বনমনুকরণম্, অর্চ্চায়াং পূজাবিড়ম্বনমিতি বা। অবজ্ঞোপেক্ষাদ্বেষনিন্দাঃ ক্রমেণ চতুর্ভির্নিষিধ্যন্তে ॥ (২২) হিত্বা উপেক্ষ্য ॥ (২৪) দ্রব্যৈরুৎপন্নয়া ক্রিয়য়া, ভূতগ্রামাবমানিনস্তন্নিন্দকস্য ॥ (২৫) তর্হি কিমর্চ্চাদাবর্চ্চনমনর্থকমেব? নেত্যাহ—অর্চ্চাদাবিতি। সর্ব্বভূতেষ্ববস্থিতং মাং স্বহৃদি যাবন্ন বেদ, স্বকর্ম্মকৃৎ কর্ম্মাবিরোধেন, যথাবকাশম্; অনেন কর্ম্মনিষ্ঠায়া অপি স এবাবধিরিত্যুক্তং ভবতি ॥ (২৬) অন্তরা অন্তরং ভেদম্, উৎ অপি, অরম্ অল্পম্, অল্পমপি ভেদং যঃ পশ্যতীত্যর্থঃ; যদ্বা, অন্তরা মধ্যে উদরং শরীরম্, মৃত্যুরহং তস্য ভয়ং বিদধে করোমি ॥ (২৭) অথ অতঃ

সর্ব্বভূতেষু কৃতালয়ং কৃতাবাসম্। অত্র হেতুঃ—ভূতানামাত্মানমন্তর্য্যামিণম্, অভিন্নেন চক্ষুষা সমদর্শনেন॥

২৮—৩৪। তত্রাপি যথোত্তরং মানাদ্যতিশয়ঃ কার্য্য ইতি বক্তুং তারতম্যমাহ—জীবা ইতি সার্দ্ধৈঃ ষড়্ভিঃ। অজীবানামচেতনেভ্যঃ, ততস্তেভ্যোঽপি প্রাণভৃতঃ প্রাণবৃত্তিমন্তঃ, সচিত্তা জ্ঞানবন্তঃ, ইন্দ্রিয়াণাং বৃত্তয়ো যেষু, বৃক্ষাণামপি সূক্ষ্মা ইন্দ্রিয়াণাং বৃত্তয়ঃ সন্ত্যেব; তথা হি মহাভারতে মোক্ষধর্ম্মেষু স্মর্য্যতে—'তস্মাৎ পশ্যন্তি পাদপাঃ, তস্মাজ্জিঘ্রন্তি পাদপাঃ' ইত্যাদি প্রসিদ্ধা তু স্পর্শনেন্দ্রিয়বৃত্তিরেব॥ (২৯) প্রভূতা তু তরুষু স্পর্শনেন্দ্রিয়বৃত্তিরেব, অতস্তেভ্যঃ স্পর্শবেদিভ্যো রসবেদিনো মৎস্যাদয়ঃ শ্রেষ্ঠাঃ, গন্ধবিদো ভ্রমরাদয়ঃ, শব্দবিদঃ সর্পাদয়ঃ॥ (৩০) রূপভেদবিদঃ কাকাদয়ঃ, উভয়তো দন্তা যেষাং তে, অপাদেভ্যস্তেভ্যো বহুপদাঃ, তেভ্যশ্চতুষ্পাদ ইত্যর্থঃ, ততো দ্বিপান্মনুষ্যঃ॥ (৩১) ততস্তেষু বর্ণাঃ॥ (৩২) সংশয়চ্ছেত্তা মীমাংসকঃ, ততোঽপি কেবলাৎ স্বধর্ম্মকৃৎ[১]। মুক্তসঙ্গস্য লক্ষণম্—অদোগ্ধেতি; আত্মনো ধর্ম্মমদোগ্ধা নিষ্কাম ইত্যর্থঃ॥ (৩৩) অর্পিতা অশেষাঃ ক্রিয়া অর্থাস্তৎফলানি আত্মা দেহশ্চ যেন, অতএব নিরন্তরঃ অব্যবহিতঃ, অকর্ত্তুঃ কর্ত্তৃত্বাভিমানশূন্যাৎ॥ (৩৪) জীবানাং কলয়া পরিকলনেন, অন্তর্য্যামিতয়া প্রবিষ্ট ইতি দৃষ্ট্বেত্যর্থঃ॥

৩৫। উক্তং হি ভক্তিযোগং পূর্ব্বোক্তেনাষ্টাঙ্গযোগেন সহোপসংহরতি—ভক্তিযোগশ্চেতি। হে মানবি! পুরুষং পরমেশ্বরম্॥

৩৬—৩৭। যদন্যৎ পৃষ্টং 'জীবস্য সংসৃতীঃ, কালস্য স্বরূপঞ্চ আচক্ষ্ব' ইতি, তদাহ—এতদিতি সার্দ্ধেন। এতৎ সর্ব্বনিয়ন্তৃ, যদ্ভগবতো রূপম্। কীদৃশম্? প্রধানপুরুষাত্মকম্, পরং তদ্ব্যতিরিক্তঞ্চ, এতদেব দৈবমিত্যভিধীয়তে। কীদৃশম্? কর্ম্মণো বিচেষ্টিতং নানাসংসৃতিলক্ষণং যস্মাৎ, তদ্দৈবপ্রেরিত-

১। স্বকর্ম্মকৃৎ (ঘ)।

কর্ম্মকৃতাঃ সংসৃতয়ো বিচিত্রা ইত্যর্থঃ ॥ (৩৭) এতদেব ভগবতো রূপং কাল ইতি চাভিধীয়তে। কীদৃশম্? রূপভেদস্য বস্তূনামন্যথাত্বস্য আস্পদ-মাশ্রয়ঃ কারণম্; উক্তং হি—'কালাদ্‌গুণব্যতিকরঃ' ইতি; বক্ষ্যতে চ—'গুণব্যতিকরঃ কালঃ' ইতি। দিব্যমদ্ভুতপ্রভাবম্; তদেবাহ—ভূতানামিতি যাবৎসমাপ্তি। মহদাদীনাং তত্তদভিমানিনাং জীবানাম্ ॥

৩৮। ভয়হেতুত্বমাহ—য ইতি। ভূতৈরেব ভূতান্যত্তি সংহরতি, অধি-যজ্ঞো যজ্ঞফলদাতা, কলয়তাং বশীকুর্ব্বতাম্ ॥

৪১। যদ্ যস্মাদ্ভীতাঃ ॥

৪২। যতো ভীতাঃ সরিতঃ স্রবন্তি, ইন্ধে দীপ্যতে, সহ গিরিভির্ভূঃ ॥

৪৩। অদো নভো যন্নিয়মাদ্‌যস্যাজ্ঞয়া, মহান্ মহত্তত্ত্বমহঙ্কারাত্মকং স্বদেহং লোকত্বেন তনুতে বিস্তারয়তি ॥

৪৪। গুণাভিমানিনো গুণনিয়ন্তারো দেবা ব্রহ্মাদয়ঃ অস্য বিশ্বস্য সর্গাদিষু প্রবর্ত্তন্তে। অনুযুগং বারংবারমিত্যর্থঃ ॥

৪৫। জনেন পিত্রাদিনা, জনং পুত্রাদিং জনয়ন্ আদিকৃৎ, মৃত্যুনা অন্তকমপি মারয়ন্নন্তকরঃ, স্বয়ন্তু অনাদিরনন্তোঽব্যয়শ্চ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে

একোনত্রিংশোঽধ্যায়ঃ ॥ ২৯ ॥

ত্রিংশোঽধ্যায়ঃ

ত্রিংশে তু কায়কান্তাদি-লালনাকুলচেতসাম্ ।
কামিনাং তামসী পাপাদধোগতিরুদীর্য্যতে ॥ (১)

১। কালপ্রভাববর্ণনপূর্ব্বকং বৈরাগ্যায় বিচিত্রকর্ম্মকৃতাং সংসৃতি-মধ্যায়ত্রয়েণ প্রপঞ্চয়তি। তস্যৈতস্য বলিনঃ কালস্য, বলিনেতি বা পাঠঃ। কাল্যমানো বিচাল্যমানোঽপি, বায়োর্বিক্রমং যথা মেঘপঙ্ক্তির্ন বেদ ॥

২। বিক্রমমেবাহ—যং যমর্থং দুঃখেন প্রয়াসেন উপাদত্তে আপাদয়তি, তং তমর্থং ভগবান্ কালো ধুনোতি বিনাশয়তি; যৎকৃতে যন্নিমিত্তম্ ॥

৩। শোকে হেতুঃ—যদ্‌যস্মাৎ সানুবন্ধস্য কলত্রাদিসহিতস্য দেহস্য সম্বন্ধীনি গৃহাদীনি, বসু দ্রব্যম্, অনুক্তসমুচ্চয়ার্থশ্চকারঃ ॥

৪—১৭। দুর্ম্মতিত্বং দর্শয়ন্ দুঃখং প্রপঞ্চয়তি—জন্তুরিতি চতুর্দ্দশভিঃ ॥ (৫) নারক্যাং নরকাহারাদিভির্জাতায়াম্ ॥ (৬) নিরূঢ়মূলং প্রসৃত-মনোরথং হৃদয়ং যস্য, বহু মন্যতে কৃতার্থোঽহমিতি শ্লাঘতে ॥ (৭) উদ্বহনাধিনা পোষণচিন্তয়া ॥ (৮) দুরাশয়ত্বমাহ—আক্ষিপ্ত আত্মা ইন্দ্রিয়াণি চ যস্য। কয়া? অসতীনাঞ্চ পুংশ্চলীনামপি রহসি রচিতয়া সম্ভোগাদিরূপয়া, মধুরভাষিণাং শিশূনামালাপৈশ্চ সুখবন্মন্যত ইত্যুত্তরে-ণান্বয়ঃ ॥ (৯) কূটা বিত্তশাঠ্যাদিবহুলা ধর্ম্মা যেষু, দুঃখপ্রধানেষু ॥ (১০) যেষাং পোষণেনাধো যাতি, তান্ পুষ্ণাতি। শেষভুগিতি ভোগোঽপি তস্য দুর্লভ ইত্যর্থঃ ॥ (১১) বার্ত্তায়াং জীবিকায়াম্, নিঃসত্ত্বঃ অশক্তঃ; পরার্থে পরস্বে ॥ (১২) অকল্যঃ[১] অসমর্থঃ ॥ (১৩) পূর্ব্বং যথাদ্রিয়ন্তে, তথা আদরং ন কুর্ব্বন্তি, কীনাশাঃ কৃপণাঃ কৃষীবলাঃ, গোজরং

১। অকল্পঃ (ঘ)।

বৃদ্ধবলীবর্দ্দম্ ॥ (১৪) ভ্রিয়মাণঃ পুষ্যমাণঃ ॥ (১৫) অবমত্যা অবজ্ঞয়া উপন্যস্তং সমীপে প্রক্ষিপ্তম্, গৃহপালঃ শ্বা, আহরন্ ভুঞ্জানঃ, আময়াবী রোগী ॥ (১৬) উত্তারো বহির্নির্গতনেত্রঃ, কফেন সংরুদ্ধা নাড়য়ো মার্গভূতা যস্য তেন, কাসশ্বাসাভ্যাং কৃত আয়াসো যস্য, ঘুরঘুর ইতি শব্দং করোতি ॥ (১৭) পরিবীতঃ পরিবেষ্টিতঃ, বাচ্যমানঃ—'বন্ধো ! তাত !' ইত্যাহূয়মানঃ ॥

১৮। অস্তধীর্নষ্টমতিঃ ॥

১৯। মৃতস্য পুণ্যপাপাভ্যাং দ্বে গতী, তত্র পাপগতিমাহ—যমদূতাবিত্যাদি যাবৎসমাপ্তি। সরভসং সক্রোধমীক্ষণং যয়োস্তৌ দৃষ্ট্বা ॥

২০। আবৃত্য—নিরুধ্য ॥

২১। তয়োস্তর্জ্জনৈর্নির্ভিন্নং হৃদয়ং যস্য ; আর্ত্তঃ সন্ চলতীতি দ্বিতীয়েনৈবান্বয়ঃ ॥

২২। ক্ষুত্তৃড়্ভ্যাং পরীতো ব্যাপ্তঃ, তপ্তা বালুকা যস্মিন্, নির্গত আশ্রমো বিশ্রামস্থানমুদকঞ্চ যস্মিন্ ॥

২৩। যমসাদনং নীতো ভবতি ॥

২৪। তত্রৈব বিশেষমাহ—অধ্বনঃ সম্বন্ধিনাং যোজনানাং নবতিং নব চ সহস্রাণি, পাপাধিক্যে দ্বাভ্যাং বা নীতঃ সন্ ॥

২৫—২৮। যাতনাঃ সংক্ষেপতো দর্শয়তি চতুর্ভিঃ। আদীপনং প্রজ্বলনং প্রাপ্নোতি, স্বেন কৃতমন্যেন বা কৃত্তং ছিন্নং যৎ স্বস্য মাংসম্, তস্য ভক্ষণমিত্যর্থঃ ॥ (২৬) আত্মনো বৈশসং পীড়াম্ ॥ (২৭) ভিদাপনং ভেদপ্রাপণম্ ॥

২৯। ন চেদমসম্ভাবিতমত্রাপি দৃশ্যমানত্বাদিত্যাহ—অত্রৈবেতি ॥

৩০। উভয়ং কুটুম্বং স্বদেহঞ্চ ॥

৩১। পাপার্জ্জিতং ধনং ভুঞ্জতে বহবঃ, কর্ত্তৈব তু নরকং যাতীত্যাহ—এক ইতি। ভূতদ্রোহেণ যদ্‌ভৃতং, তৎ স্থূলং স্বং কলেবরং ধনঞ্চ ইহৈব হিত্বা, কুশলাদিতরৎ পাপম্, তদেব পাথেয়ং ভোগ্যং যস্য ॥

৩২। ননু পাপমপি বিহায় গচ্ছতু? তত্রাহ—দৈবেনেতি। তস্য কুটুম্বপোষণস্য শমলং পাপং দৈবেনেশ্বরেণ প্রাপিতং ভুঙ্‌ক্তে ॥

৩৩। ননু কুটুম্বপোষণং বিহিতমেব? তত্রাহ—কেবলেনেতি। তমসো নরকস্য চরমং পদং স্থানম্ ॥

৩৪। পুনর্মনুষ্যশরীরপ্রাপ্তিপ্রকারমাহ—নরলোকস্য মনুষ্যদেহপ্রাপ্তে-রধস্তাৎ অর্ব্বাগ্ যাবত্যো যাতনাঃ, যাবচ্ছব্দেন শ্বশূকরাদিযোনয়শ্চ যাস্তাঃ সর্ব্বা অনুক্রমেণ সম্প্রাপ্য ভোগেন ক্ষীণপাপঃ শুচিঃ সন্, অত্র পুনর্নরত্বং প্রাপ্নোতীত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
ত্রিংশোঽধ্যায়ঃ ॥ ৩০ ॥

একত্রিংশোঽধ্যায়ঃ

একত্রিংশে বিমিশ্রৈস্তু পুণ্যপাপৈরিহান্তরা।
মনুষ্যযোনিসম্প্রাপ্তির্বর্ণ্যতে রাজসী গতিঃ ॥ (১)

১। পুনরত্রাব্রজেদিত্যুক্তম্, তদেব বিশেষতো দর্শয়তি—কর্ম্মণা পূর্ব্বকৃতেন দৈবমীশ্বরঃ, তদেব নেত্রং নেতৃ প্রবর্ত্তকং যস্য; প্রবিষ্টো ভবতি ॥

২। কললং শুক্রশোণিতমিশ্রিতং ভবতি; বুদ্‌বুদং বর্ত্তুলাকারং ভবতি; কর্কন্ধুর্বদরীফলম্, তদাকারং কঠিনম্; পেশী মাংসপিণ্ডাকারমণ্ডং বা যোন্যন্তরে ॥

৩। বাহ্বঙ্‌ঘ্র্যাদীনামঙ্গানাং বিগ্রহো বিভাগঃ, লিঙ্গঞ্চ ছিদ্রাণি চ, তেষামুদ্ভবঃ ॥

৪। জরায়ুণা গর্ভবেষ্টনেন বীতঃ প্রাবৃতঃ ॥

৫। মাতুর্জগ্ধেন ভক্ষিতেনান্নেন পানাদ্যৈশ্চ এধমানা ধাতবো যস্য; জন্তূনাং সম্ভবো যস্মিন্, ন সম্মতে গর্ত্তে শেতে। তথা চ মার্কণ্ডেয়পুরাণম্—'নাড়ী চাপ্যায়নী নাম নাভ্যাং তস্য নিবধ্যতে। স্ত্রীণাং তথান্ত্রশুষিরেষ্বানিবদ্ধোপজায়তে॥ ক্রমন্তে ভুক্তপীতানি স্ত্রীণাং গর্ভোদরে তথা। তৈরাপ্যায়িতদেহোঽসৌ জন্তুর্বৃদ্ধিমুপৈতি বৈ ॥' ইতি ॥

৬। তত্রত্যৈঃ ক্রিমিভিস্তু খাদদ্ভিঃ, সৌকুমার্য্যাৎ কোমলত্বেন, ক্ষতানি সর্ব্বাঙ্গাণি যস্য ॥

৭। উল্বণৈর্দুঃসহৈঃ, সর্ব্বেষ্বঙ্গেষু উত্থিতা বেদনা যস্য; আস্তে ইত্যুত্তরেণান্বয়ঃ ॥

৮। উল্বেন জরায়ুণা, ভুগ্নং কুটিলীভূতং পৃষ্ঠং শিরোধরা গ্রীবা চ যস্য ॥

৯। দৈবাৎ পূর্ব্বকর্ম্মবশাৎ লব্ধা স্মৃতির্যেন সঃ; দীর্ঘং দুরন্তম্, অনুচ্ছ্বাসং যথা ভবতি তথা তত্র স্থিতঃ সন্ ॥

১০। সূতিহেতুভির্বাতৈর্বেপিতঃ, সোদরঃ সমানোদরজন্মা, বিষ্ঠাভূঃ ক্রিমিরিব ॥

১১। নাথমানো যাচমান উপতপ্যমান ইতি বা; ঋষির্দেহাত্মদর্শী, ভীতঃ পুনর্গর্ভবাসাৎ, সপ্ত বধ্রয়ো বন্ধনভূতা ধাতবো যস্য সঃ; বিক্লবয়া আকুলয়া ॥

১২। উপসন্নং জগদ্ রক্ষিতুং স্বেচ্ছয়া গৃহীতনানামূর্ত্তের্ভগবতশ্চরণারবিন্দমকুতোভয়ম্, সোঽহং শরণং ব্রজামি। ভুবি চলদিতি শ্রীকৃষ্ণাবতারাভিপ্রায়েণ। অসতো মেঽনুরূপা যোগ্যা, যেন ঈদৃশী গর্ভবাসলক্ষণা গতির্দর্শিতা, তস্য ॥

১৩। ননু কোঽসৌ, যং শরণং ব্রজসি? কো বা তব তস্য চ বিশেষঃ যেন সেব্যসেবকত্বমিত্যপেক্ষায়ামাহ—অত্র মাতুর্দেহে ভূতেন্দ্রিয়াশয়ময়ীং দেহাকারপরিণতাং মায়ামবলম্ব্য আশ্রিত্য কর্ম্মভিরাবৃতস্বরূপ ইব বদ্ধ ইব চ য আস্তে, সোঽহং যস্ত অত্রৈবাস্তে, তং নমামি; কথম্ভূতমিত্যপেক্ষায়াং তুশব্দোক্তং বিশেষং দর্শয়তি—আতপ্যমানহৃদয়েঽবসিতং প্রতীতম্; এবমপি অবিকারম্। কুতঃ? বিশুদ্ধং নিরুপাধিম্। তৎ কুতঃ? অখণ্ডো বোধো যস্য, তম্ ॥

১৪। ননু ত্বমপি বস্তুতঃ শুদ্ধ এব, 'অসঙ্গো হ্যয়ং পুরুষঃ' ইত্যাদিশ্রুতেঃ; তৎ কথং যুবয়োরয়ং বিশেষঃ? তত্রাহ—যঃ পঞ্চভির্ভূতৈ রচিতে শরীরে অযথা মিথ্যৈব চ্ছন্নঃ, ন বস্তুতঃ, যতস্তেন শরীরেণ রহিতোঽসঙ্গঃ, অতোঽযথৈব ইন্দ্রিয়গুণার্থচিদাত্মক ইন্দ্রিয়াণি চ গুণাশ্চ অর্থাশ্চ চিদাভাসশ্চ তদাত্মকঃ; সোঽহং তং বন্দে। কথম্ভূতম্? তেন শরীরেণ অবিকুণ্ঠো মহিমা যস্য তম্; অবগুণ্ঠেতি পাঠে অব অবসন্নো গুণ্ঠো গুণ্ঠনমাবরণং যস্য, স মহিমা যস্যেত্যর্থঃ। অত্র হেতুঃ—প্রকৃতিপুরুষয়োঃ পরং নিয়ন্তারম্। কুতঃ? ঋষিং সর্ব্বজ্ঞং বিদ্যাশক্তিমিত্যর্থঃ। বিদ্যাঽবিদ্যাকৃতো বিশেষ ইতি ভাবঃ ॥

১৫। ননু জ্ঞানেনায়ং বন্ধো নিবর্ত্তয়িষ্যতে, কিং পরমেশ্বরবন্দনেন? তত্রাহ—যস্য মায়য়া নষ্টস্মৃতিঃ সন্ সংসারসম্বন্ধীনি পথি তদতিশ্রমেণ তৎকৃতেন ক্লেশেন চরন্নয়ং জীবো মহতস্তস্যৈব ঈশ্বরস্যানুগ্রহং বিনা পুনঃ

কয়া যুক্ত্যা লোকং নিজস্বরূপং প্রবৃণীত সন্তজেৎ? অতিশ্রমহেতুত্বেন পন্থানং বিশিনষ্টি—উরূণি গুণনিমিত্তানি কর্ম্মাণি নিতরাং বন্ধনানি যস্মিন্, ঈশ্বরপ্রসাদং বিনা জ্ঞানাভাবাৎ স এব সেব্য ইত্যর্থঃ ॥

১৬। ঈশ্বর এব জ্ঞানদ ইত্যুপপাদয়ন্নাহ—যদেতৎ ত্রিকালবিষয়-জ্ঞানম্, তৎ তং বিনা কতমো ময্যদধাৎ? ন কোঽপি, কিন্তু স দেব ঈশ্বর এব। ননু অন্যঃ প্রকৃষ্টো জীবো দধাতু? নেত্যাহ—জীবরূপাং কর্ম্ম-পদবীমনুবর্ত্তমানা বয়মিতি তদ্ব্যতিরেকেণ ন কোঽপি সমর্থ ইত্যর্থঃ। অন্যস্যাত্রাসম্ভবমুক্ত্বা তস্য সম্ভবমাহ—স্থিরেষু চরেষু চান্তর্যামিরূপোঽনু-বর্ত্তিতোঽংশো যেন, তং ভজেম ॥

১৭। স্বদুঃখং বিজ্ঞাপয়ন্নাহ—দেহীতি। অন্যদেহবিবরে মাতুরুদর-কুহরে যোঽস্গ্‌বিন্মূত্রকূপঃ, তস্মিন্ পতিতস্তত্র জঠরাগ্নিনা ভৃশং তপ্তো দেহো যস্য, অতএব কৃপণধীঃ; ইতো বিবরাদ্‌বিবসিতুং নির্গন্তুমিচ্ছন্, স্বমাসান্ গণয়ন্নসৌ কদা নু অহো বহির্নির্ব্বাস্যতে ॥

১৮। তৎকৃতমুপকারং স্মরন্নাহ—যেন ঈদৃশীং গতিং জ্ঞানম্; ভবা-দৃশেনেতি নিরুপমেনেত্যর্থঃ। স্বকৃতেনৈব স্বয়ং তুষ্যতু, অঞ্জলিমাত্রং বিনা তৎকৃতে উপকারে প্রত্যুপকারং কঃ কুর্য্যাদিত্যর্থঃ ॥

১৯। ঈদৃশীং গতিমিত্যনেন জাত্যন্তরবিলক্ষণং জ্ঞানং প্রাপিত-বানিত্যুক্তম্, তদেব বৈলক্ষণ্যমাহ—পশ্যতীতি। অয়মপরঃ পশ্বাদিঃ; সপ্তবধ্রিজীবঃ, স্বদেহে শারীরকে শরীরভবে সুখদুঃখে কেবলং ননু পশ্যতি। অহং পুনর্যৎস্পষ্টয়া ধিষণয়া, যদ্দত্তেন বিবেকজ্ঞানেন দমশরীরী, দম ইত্যুপ-লক্ষণম্, শমদমাদিযুক্ত-শরীরবানাসমভবম্, তমেব চ পুরাণমনাদিং পুরুষং পূর্ণং বহিশ্চ হৃদি চ পশ্যে পশ্যামীত্যন্বয়ঃ। কথম্? অপরোক্ষতয়া প্রতীতং চৈত্যমিবাহঙ্কারাস্পদং ভোক্তারমিবেত্যর্থঃ ॥

২০—২১। বিবেকজ্ঞানকৃতং সংসারোদ্বেগমনুবদন্ মোক্ষমার্গমেবাধ্য-বস্যতি—সোঽহমিতি দ্বাভ্যাম্। হে বিভো! বহুদুঃখবাসং যথা ভবতি, তথা গর্ভে বসন্নপি, সোঽহং গর্ভাদ্বহির্নির্গন্তুং নেচ্ছামি। তত্র হেতুঃ—অন্ধকূপপ্রায়ে যত্র বহিরুপযাতং গতং প্রাণিনং দেবস্য তব মায়া উপসর্পতি ব্যাপ্নোতি। যদনু যাং মায়ামনু মিথ্যামতিঃ, দেহেঽহংবুদ্ধিঃ সংসৃতিচক্রঞ্চ কলত্রপুত্রাদিসম্বন্ধাদুপসর্পতি॥ (২১) তস্মাদত্রৈব স্থিতোঽপি বিগত-বিক্লবোঽব্যাকুলঃ সন্ সুহৃদা আত্মনা সারথিরূপয়া বুদ্ধ্যৈবাত্মানং তমসঃ সংসারাদুদ্ধরিষ্যামি। অনেকরন্ধ্রং নানাগর্ভবাসরূপমেতদ্ব্যসনং দুঃখং যথা মে মা ভবিষ্যন্ন ভবিষ্যতি তথা। কা তত্র তব সাধনসামগ্রী? তত্রাহ—উপসাদিতৌ হৃদয়ং প্রাপিতৌ বিষ্ণোঃ পাদৌ যেন ময়া, সঃ॥

২২। দশমাসাঃ পরিচ্ছেদকা যস্যেতি প্রসূতিপূর্ব্বক্ষণোপলক্ষণম্। ঋষির্জীবঃ, সদ্যস্তৎক্ষণমেব, অবাচীনমবাঙ্মুখম্, সূতিহেতুর্মারুতঃ ক্ষিপতি নুদতি॥

২৩। অবসৃষ্টঃ—অধঃক্ষিপ্তঃ সন্॥

২৪। রোরূয়তি রোরূয়তে॥

২৫। পরস্য চ্ছন্দমভিপ্রায়মবিদুষা। অনভিপ্রেতং স্তন্যার্থং রোদনে উদরব্যথাং প্রকল্প্য নিম্বরসপানম্, উদরব্যথয়া রোদনে স্তন্যপানমিত্যাদি॥

২৬। আসনোত্থানচেষ্টনে চানীশঃ সন্ রোরূয়তীত্যনুষঙ্গঃ॥

২৭। আমা কোমলা ত্বক্ যস্যেতি তম্, বিগতং গর্ভে জাতং জ্ঞানং যস্য॥

২৮—৩১। শৈশবং পঞ্চ বর্ষাণি, ততঃ পৌগণ্ডং যৌবনাদর্ব্বাক্, তত্র চাধ্যয়নাদিদুঃখম্। যৌবনে দুঃখমাহ—সার্দ্ধৈস্ত্রিভিঃ। অলব্ধাভীপ্সিতত্বেন শুচার্পিতো ব্যাপ্তঃ, অজ্ঞানাদিদ্ধো দীপ্তো মন্যুর্যস্য সঃ॥ (২৯) দেহেন

স ৈহব বর্দ্ধমানেনাভিমানেন মন্যুনা চ বিগ্রহং বিরোধং করোতি, আত্ম-নোঽন্তায় নাশায় ॥ (৩০) অজ্ঞানং প্রপঞ্চয়তি—ভূতৈরারব্ধে দেহে অসদাগ্রহোঽহং মমেতি মতিং করোতি ॥ (৩১) তদর্থং দেহার্থম্, যদ্‌যেন কর্ম্মণা বদ্ধঃ, যো দেহোঽনুযাতি পুনঃপুনরুপযাতি অনুবর্ত্তত ইতি বা। কুতঃ ? অবিদ্যাকর্ম্মভ্যাং বধ্যত ইতি তথা ॥

৩২। যদ্যসদ্ভিরাস্থিতঃ অধিষ্ঠিতঃ সন্, তেষাং পথি রমতে ; পথি সন্মার্গে আস্থিতোঽপি যদ্যসদ্ভিঃ সহ রমতে ইতি বা, তর্হি 'যাতনাদেহ আবৃত্য' ইত্যাদিপূর্ব্বোক্তপ্রকারেণ তমো নরকং বিশতি ॥

৩৩—৩৫। অসৎসঙ্গং নিন্দতি—সত্যমিতি ত্রিভিঃ। বুদ্ধিঃ পরম-পুরুষার্থবিষয়া, হ্রীর্লজ্জা, শ্রীর্ধনধান্যলক্ষণা, যশঃ কীর্ত্তিঃ, ক্ষমা সহিষ্ণুত্বম্, শমো বাহ্যেন্দ্রিয়নিগ্রহঃ, দমো মনোনিগ্রহঃ, ভগ উন্নতিঃ, যৎসঙ্গাদ্‌-যেষামসতাং সঙ্গাৎ ॥ (৩৪) খণ্ডিতাত্মসু দেহাত্মবুদ্ধিষু, যোষিতাং ক্রীড়া-মৃগবদধীনেষু ॥ (৩৫) যথা চ যোষিৎসঙ্গিনাং সঙ্গতো বন্ধঃ, তথা অন্যপ্রসঙ্গতো ন ভবেৎ ॥

৩৬—৪২। যোষিৎসঙ্গস্যানর্থহেতুত্বং প্রপঞ্চয়তি—প্রজাপতিরিতি সপ্তভিঃ। রোহিদ্ভূতাং মৃগীরূপাং সতীমৃক্ষরূপী মৃগাকারঃ সন্, হতত্রপো নির্লজ্জঃ ॥ (৩৭) তেন ব্রহ্মণা সৃষ্টা মরীচ্যাদয়ঃ, তৈঃ সৃষ্টাঃ কশ্যপাদয়ঃ, তৈরপি সৃষ্টা দেবমনুষ্যাদয়স্তেষু কো নু পুমানখণ্ডিতধীরনাকৃষ্টমনাঃ ? (৩৮) দিশাং জয়িনঃ শূরানপি ॥ (৩৯) প্রতিলব্ধ আত্মরূপো লাভো যেন। অস্য মুমুক্ষোর্যাঃ প্রমদাঃ, নিরয়দ্বারং বদন্তি যোগিনঃ ॥ (৪০) শনৈঃ শুশ্রূষাদিমিষেণ উপযাতি যা যোষিদ্রূপা মায়া, তাং মৃত্যুং প্রতিকূলামীক্ষেত ॥ (৪১—৪২) মুমুক্ষুং স্ত্রিয়ং প্রত্যেতদেবাহ—যাং মন্যতে ইতি দ্বাভ্যাম্। ঋষভায়তীং পুরুষবদাচরন্তীং যাং মম মায়াং বিত্তাদিপ্রদং

পতিং মন্যতে। তদা তাং পুরুষরূপাং মায়াং মৃত্যুং বিদ্যাদিত্যুত্তরেণান্বয়ঃ। যতঃ পূর্ব্বজন্মনি স্বয়ং পুমান্ স্ত্রীসঙ্গতোঽন্তকালে স্ত্রীধ্যানেন স্ত্রীত্বং প্রাপ্তো জীবঃ॥ (৪২) তাং পত্যাদিরূপং মৃত্যুং বিজানীয়াৎ, মৃগয়োর্লুব্ধকস্য গায়নমনুকূলত্বেন প্রতীয়মানমপি, যথা মৃগস্য মৃত্যুঃ॥

৪৩। তদেবং জীবস্য সংসৃতিঃ প্রপঞ্চিতা, তত্র চ তস্য কর্ম্মবশেন লোকাল্লোকান্তরগমনং জন্মমরণঞ্চোক্তম্। তত্রৈবং শঙ্ক্যতে— নন্বু ব্যাপকস্য কথং লোকাল্লোকান্তরগমনম্, নিত্যস্য চ কথং জন্মমরণে? ভোগেন কর্ম্মক্ষয়ে সতি জন্মমরণঞ্চ নেষ্যতে; তৎ কুতঃ পুনরপি তস্য কর্ম্মসম্ভবঃ? ইতি। তত্র লোকান্তরগমনং কর্ম্ম চ সম্ভবতীত্যাহ—দেহেনেতি। জীবস্যো-পাধিতয়া ভূতেন জাতেন লিঙ্গদেহেন লোকান্তরমনুব্রজন্নবিরতং কর্ম্মাণি করোতীতি কর্ম্মণামসমাপ্তিরুক্তা॥

৪৪। জন্মমরণসম্ভবমাহ—জীবো জীবোপাধির্লিঙ্গদেহঃ, অস্যাত্মনোঽ-নুগঃ অনুবর্ত্তী, ভূতেন্দ্রিয়মনোময়ঃ স্থূলভূতাদিবিকারো দেহো ভোগায়তনম্, তয়োর্নিরোধঃ কার্য্যাযোগ্যতা, তদস্য জীবস্য মরণমুচ্যতে; আবির্ভাবস্তু সম্ভবো জন্ম উচ্যতে॥

৪৫—৪৬। এতদেব দৃষ্টান্তেন স্পষ্টয়তি—দ্রব্যোপলব্ধিস্থানস্য নেত্রগোল-কাদের্দ্রব্যেক্ষায়াং রূপাদিদর্শনে কাচকামলাদিদোষেণ যদা অযোগ্যতা ভবতি, তদৈব চক্ষুষ ইন্দ্রিয়স্যাপ্যযোগ্যতা। অনয়োঃ স্থানচক্ষুষোর্যদা অযোগ্যতা, তদৈব দ্রষ্টুর্জীবস্য দ্রষ্টৃত্বাযোগ্যতা। এবং স্থূলদেহবৈকল্যে লিঙ্গস্য বৈকল্যম্, তদেব জীবস্য মরণম্, ন স্বত ইত্যর্থঃ। ক্বচিদেকশ্লোকোঽধিকঃ পঠ্যতে। তত্রায়মর্থঃ—দ্রব্যোপলব্ধিস্থানস্য স্থূলশরীরস্য দ্রব্যেক্ষায়াং যদা অযোগ্যতা, তদা তৎপঞ্চত্বং মরণম্—অহম্মানাৎ ইদমেবাহমিত্যভিমানেন দ্রব্যস্য স্থূলশরীরস্য দর্শনমুৎপত্তিঃ। অক্ষ্ণোর্গোলকয়োর্দ্রব্যাবয়বস্য রূপা-বয়বাদের্দর্শনেঽযোগ্যতা। শেষং সমানম্॥

৪৭। যস্মান্ন বস্তুতো জীবস্য জন্মমরণাদি, তস্মান্মরণাৎ সন্ত্রাসো ন কার্য্যঃ, জীবনে চ ন কার্পণ্যং দৈন্যং কার্য্যম্, সম্ভ্রমশ্চ জীবনপ্রযত্নে ॥

৪৮। নন্থ সর্ব্বথা মুক্তসঙ্গত্বে, কথং জীবিতম্? অত আহ—সম্যক্ পশ্যতি বিচারয়তীতি সম্যগ্দর্শনা, তয়া বুদ্ধ্যা মায়াবিরচিতে লোকে কলেবরং ন্যস্য নিক্ষিপ্য তস্মিন্নাসক্তিং ত্যক্ত্বা চরেদিত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
একত্রিংশোঽধ্যায়ঃ ॥ ৩১ ॥

দ্বাত্রিংশোধ্যায়ঃ

দ্বাত্রিংশে সাত্ত্বিকী[১] ধর্ম্মৈরূর্দ্ধা গতিরুদীর্য্যতে।
তত্ত্বজ্ঞানবিহীনস্য ততশ্চ পুনরাগতিঃ ॥ (১)

১—৪। তদেবং পাপকর্ম্মণো গতিরুক্তা, ইদানীং কাম্যকর্ম্মণো গতিমাহ—অথেতি চতুর্ভিঃ। যো গৃহ এবাবসন্ স্বান্ ধর্ম্মান্ দোগ্ধি; দোহমাহ—কামমর্থঞ্চ। তান্ দুগ্ধান্ ধর্ম্মান্ পুনঃ[২] পিপর্ত্তি পূরয়তি অনুতিষ্ঠতি ॥ (২) সোঽপি ভগবদারাধনরূপাদ্ধর্ম্মাৎ পরাঙ্মুখঃ সন্, প্রাকৃতানপি দেবান্ পিতৄংশ্চ যজতে ॥ (৩) ততঃ কিম্? অত আহ—তেষাং শ্রদ্ধয়া আক্রান্তা ব্যাপ্তা মতির্যস্য, পিত্রর্থং দেবতার্থঞ্চ ব্রতং নিয়মো যস্য, সোমপাস্তত্র সোমং পীত্বেত্যর্থঃ ॥ (৪) লোকে তিষ্ঠত্যপি পুণ্যক্ষয়াৎ পাতমুক্ত্বা লোকানামপি লয়মাহ—যদা চ অহরহঃপ্রলয়ে ॥

১। স্বাত্ত্বিকৈঃ (ক, ঘ); ২। ভূয়ঃ (ঘ)।

৫—৭। ভগবদ্ধর্ম্মনিষ্ঠানাং তৎপ্রাপ্তিমেব গতিমাহ ত্রিভিঃ। যে তু কামার্থপ্রয়োজনায় স্বধর্ম্মং ন দুহন্তি ন দুহন্তি, নিঃসঙ্গা অনাসক্তাঃ, ন্যস্তানি ঈশ্বরে সমর্পিতানি কর্ম্মাণি যৈঃ॥ (৭) বিশ্বতোমুখং পরিপূর্ণং পুরুষং যান্তি ; তথা চ শ্রুতিঃ—'সূর্য্যদ্বারেণ তে বিরজাঃ প্রয়ান্তি, যত্রামৃতঃ পুরুষো হ্যব্যয়াত্মা' ইতি। প্রকৃতিমুপাদানকারণম্, উৎপত্ত্যন্তভাবনং নিমিত্তকারণম্॥

৮—১০। পরমেশ্বরদৃষ্ট্যা হিরণ্যগর্ভোপাসকানামপি ক্রমেণ তৎপ্রাপ্তি-মাহ—দ্বিপরার্দ্ধাবসান ইতি ত্রিভিঃ। পরস্য হিরণ্যগর্ভস্য পরিচিন্তকা পরমেশ্বরদৃষ্ট্যা হিরণ্যগর্ভোপাসকাঃ॥ (৯) ক্ষ্মাদীনি পঞ্চমহাভূতানি মনশ্চ ইন্দ্রিয়াণি চ অর্থাশ্চ শব্দাদয়ো ভূতাদিশ্চাহঙ্কারঃ, এবমাদিভিঃ পরিবৃতং যুক্তং ব্রহ্মাণ্ডং প্রতিসংহর্ত্তুমিচ্ছুঃ সন্, অব্যাকৃতমীশ্বরম্, পরাখ্যং দ্বিপরার্দ্ধ-লক্ষণং কালম্॥ (১০) পরেত্য দূরং গত্বা, ভগবন্তং হিরণ্যগর্ভমনুপ্রবিষ্টা যে যোগিনঃ, অমৃতং পরমানন্দরূপং প্রধানমুৎকৃষ্টং ব্রহ্ম, তেনৈব সহ উপযান্তি, ন তু পূর্ব্বম্ ; যতস্তদা অগতাভিমানাঃ। তথা চ স্মৃতিঃ — 'ব্রহ্মণা সহ তে সর্ব্বে সম্প্রাপ্তে প্রতিসঞ্চরে। পরস্যান্তে কৃতাত্মানঃ প্রবিশন্তি পরং পদম্॥' ইতি॥

১১। ভগবদুপাসকাস্তু সাক্ষাদেব তং প্রাপ্নুবন্তি, ন তু ক্রমেণ ; অতস্ত্বং সাক্ষাৎ তমেব ভজেত্যাহ—অথ তস্মাৎ, ভাবেন প্রেম্ণা॥

১২—১৫। এবং তাবদ্ভগবদ্ভক্তানাং নিরন্তরমেব তৎপ্রাপ্তিঃ ; ভগবদ-ভেদেন হিরণ্যগর্ভোপাসকানাস্তু ক্রমেণেত্যুক্তম্। ভেদেনোপাসনে তু ব্রহ্মাদয়োঽপ্যাবর্ত্তন্তে, কিমুতান্যঃ ? ইত্যাহ—আদ্য ইতি চতুর্ভিঃ। যো বেদগর্ভঃ, সোঽপি গুণব্যতিকরে জাতে, যথাপূর্ব্বং ব্রহ্মপদাধিকৃতঃ সন্ প্রজায়তে ইতি তৃতীয়েনান্বয়ঃ। ন কেবলং স এবৈকঃ, কিন্তু ঋষিভি-র্মরীচ্যাদিভির্যোগেশ্বরাদিভিশ্চ সহ॥ (১৩) জন্মনি হেতুদ্বয়ম্—ভেদদৃষ্ট্যা

অভিমানেন কর্ত্তৃত্বাদিতি চ যথাপূর্ব্বত্বে হেতুঃ—নিঃসঙ্গেন নিষ্কামেণ কর্ম্মণেতি ॥ (১৪—১৫) কিং কৃত্বাত্র প্রজায়তে ? প্রথমং পারমেষ্ঠ্যমৈশ্বর্য্যং নিষেব্য, পশ্চাৎ প্রলয়ে সগুণং গুণাধিষ্ঠাতারং পুরুষং প্রথমাবতাররূপং সংস্থত্য প্রাপ্য, তেঽপি ঋষিপ্রমুখাঃ স্বকর্ম্ম[১]-নির্ম্মিতমৈশ্বর্য্যং নিষেব্য পুরুষঞ্চ সংস্থত্য যথাপূর্ব্বং স্বস্বাধিকারেণ পুনরায়ান্তীত্যন্বয়ঃ ॥

১৬—২১। যদা ব্রহ্মোপাসকানামপি ভেদদর্শনাভিমানাভ্যামেবমাবৃত্তিস্তদা কাম্যকর্ম্মিণাং কিং বক্তব্যমিতি তান্ নিন্দন্নাহ ষড়্ভিঃ—যে ত্বিহ কর্ম্মস্বাসক্তমনসঃ সন্তোঽপ্রতিষিদ্ধানি কাম্যানি নিত্যানি চ কর্ম্মাণি কৃৎস্নানি কুর্ব্বন্তি, তেঽর্য্যম্ণো দক্ষিণেন পথা ধূমমার্গেণ পিতৃলোকং ব্রজন্তীতি পঞ্চমেনান্বয়ঃ। মধ্যে তন্নিন্দা ॥ (১৮) হরতি সংসারং মেধা যস্য, কথনীয়া উরবো বিক্রমা যস্য, তস্য মধুদ্বিষঃ কথায়াং বিমুখাঃ সন্তো যে ত্রৈবর্গিকাঃ ॥ (১৯) যে চাচ্যুতকথাসুধাং হিত্বা অসত্যং গাথাঃ শৃণ্বন্তি, তে নূনং দৈবেন বিহতা ইত্যন্বয়ঃ ॥ (২০) পিতৃলোকাৎ পুনঃ প্রজামনু স্বপুত্রাদিষু প্রজায়ন্তে। গর্ভাধানাদারভ্য শ্মশানান্তাঃ ক্রিয়াঃ কৃতবন্তঃ, যথোক্তকারিণ ইত্যর্থঃ ॥ (২১) কথং প্রজায়ন্তে ? তদাহ—ততস্তে পুনরিমং লোকং প্রতি পতন্তি, বিভ্রংশিত উদয়ো ভোগসাধনং যেষাম্ ॥

২২। পরমেষ্ঠিনং পরমেশ্বরম্, সর্ব্বভাবেন অতিপ্রীত্যা, তস্য গুণানাশ্রয়তে যা ভক্তিস্তয়া ॥

২৩। ভজনে চ জ্ঞানবৈরাগ্যে স্বত এব ভবত ইত্যাহ—বাসুদেব ইতি ॥

২৪। তদেবোপপাদয়তি—যদাস্য ভক্তস্য চিত্তং ভগবদ্গুণানুরাগেণ তস্মিন্নেব নিশ্চলং সৎ, ইন্দ্রিয়বৃত্তিভির্বৈষম্যমর্থেষু ন বিগৃহ্ণাতি ॥

২৫। তদৈবাত্মনা আত্মানং স্বপ্রকাশমীক্ষতে। কথম্ভূতম্ ? সমঞ্চ তদ্দর্শনঞ্চ। তৎ কুতঃ ? নিঃসঙ্গম্, সঙ্গাদ্ধি বৈষম্যং ভবতি। নিঃসঙ্গত্বে

১। স্বধর্ম্ম- (ক)।

হেতুঃ—হেয়োপাদেয়রহিতম্। তৎ কুতঃ? পদং ব্যবসিতমারূঢ়ং পরমানন্দোঽহমিতি নিশ্চয়ং প্রাপ্তমিত্যর্থঃ ॥

২৬। সমেষ্বর্থেষ্বিত্যুক্তম্; তদেব সাম্যং দর্শয়তি—জ্ঞানমাত্রমেব পরংব্রহ্মাদিশব্দৈঃ প্রসিদ্ধম্, দৃশ্যাদিভিঃ দৃশ্যদ্রষ্টৃকরণরূপেণ পৃথক্ প্রতীয়তে, জ্ঞানমাত্রত্বেন সমেষ্বিত্যর্থঃ ॥

২৭। নন্থ জ্ঞানমাত্রমাত্মনঃ স্বরূপত্বান্নিত্যপ্রাপ্তমেবেতি, কিমনেক-সাধনসাধ্যেন যোগেন প্রাপ্যতে? তদাহ—এতাবানিতি। যুজ্যতে প্রাপ্যতে, প্রপঞ্চসঙ্গব্যুদাস এব যোগফলমিত্যর্থঃ ॥

২৮। নন্থ কথং প্রত্যক্ষাদিপ্রতীতঃ প্রপঞ্চো ব্যুদসিতুং শক্যতে? প্রতীতের্ভ্রান্তিত্বাদিত্যাহ—জ্ঞানমিতি। পরাচীনৈঃ পরাঙ্মুখৈঃ। শব্দাদি-ধর্ম্মো যস্য, তেনার্থরূপেণ জ্ঞানরূপং নির্গুণং ব্রহ্মৈবাবভাতি, ন ত্বর্থঃ পৃথগস্তীত্যর্থঃ ॥

২৯। অর্থরূপত্বমেব উদাহৃত্য দর্শয়তি—যথেতি। অহংরূপঃ অহ-ঙ্কারঃ, স চ ত্রিবৃৎ ত্রিগুণাত্মকঃ, পুনশ্চ ভূতরূপেণ পঞ্চবিধঃ, ইন্দ্রিয়রূপেণ একাদশবিধশ্চ, স্বরাট্ জীবরূপস্তস্য, জীবস্য বপুরণ্ডং জগচ্চ, যতো যেভ্যো মহদাদিভ্যঃ, তথা অবভাতি ॥

৩০। নন্থ তর্হি জনঃ কিমেবং ন প্রত্যেতি? তত্রাহ—এতদ্‌ব্রহ্ম ॥

৩১। উক্তমেবার্থং সুখপ্রতিপত্ত্যর্থং সংক্ষেপেণানুবদতি—ইতীতি। হে গুর্ব্বি! পূজ্যে ॥

৩২। অনেন চ জ্ঞানযোগেন ভগবানেব প্রাপ্যো যথা তথা, ভক্তি-যোগেনেত্যাহ—নৈর্গুণ্যো জ্ঞানযোগশ্চ, মন্নিষ্ঠো ভক্তিলক্ষণশ্চ যোগঃ, তয়োর্দ্বয়োরপ্যেক এবার্থঃ প্রয়োজনম্। কোঽসৌ? ভগবচ্ছব্দো লক্ষণং জ্ঞাপকো যস্য। তদুক্তং গীতাসু—'তে প্রাপ্নুবন্তি মামেব সর্ব্বভূতহিতে রতাঃ' ইতি ॥

৩৩। নন্থ জ্ঞানযোগস্থাত্মলাভঃ ফলং শাস্ত্রেণাবগম্যতে[১], ভক্তিযোগস্থ তু ভজনীয়েশ্বরপ্রাপ্তিঃ, কুতস্তয়োরেকার্থত্বমিত্যাশঙ্ক্য দৃষ্টান্তেনোপপাদয়তি —যথা বহূনাং রূপরসাদীনাং গুণানামাশ্রয়ো গুড়ক্ষীরাদিরেক এবার্থো মার্গভেদপ্রবৃত্তৈরিন্দ্রিয়ৈর্নানা প্রতীয়তে—চক্ষুষা শুক্ল ইতি, রসেন মধুর ইতি, স্পর্শনেন শীত ইত্যাদি, তথা ভগবানেক এব তত্তদ্রূপেণাবগম্যতে ॥

৩৪—৩৬। শাস্ত্রমার্গানেব প্রপঞ্চয়তি—ক্রিয়য়েতি ত্রিভিঃ ; ক্রিয়য়া পূর্ত্তরূপয়া, ক্রতুভির্যাগৈঃ, দর্শনং মীমাংসা, আত্মেন্দ্রিয়জয়ো নিষিদ্ধবর্জ্জনম্॥ (৩৫) উভয়চিহ্নেন সকামনিষ্কামলক্ষণেন ; তমেবাহ—য ইতি। সকাম-ধর্ম্মপ্রাপ্যং স্বর্গাদ্যপি ভগবত এব সগুণং স্বরূপমিতি ভাবঃ॥ (৩৬) এভির্বর্ত্মভিঃ স্বদৃক্ স্বপ্রকাশঃ ॥

৩৭—৩৮। তদেবং জ্ঞানযোগমুপসংহৃত্য, তস্য চ ভক্তিযোগেন সমানার্থত্বমুক্ত্বা ভক্তিযোগাদ্যপসংহরতি—প্রাবোচমিতি দ্বাভ্যাম্। চতু-র্ব্বিধং ত্রিগুণনির্গুণভেদেন, অন্তর্ধাবতি উৎপত্তিনিধনাদি করোতি॥ (৩৮) অঙ্গ ! হে মাতঃ ॥

৩৯—৪০। উপদেশেঽনধিকারিণো দর্শয়তি—নৈতদিতি দ্বাভ্যাম্। খলায় পরোদ্বেজকায়, ভিন্নায় দুরাচারায়, ধর্ম্মধ্বজায় দাম্ভিকায় ॥

৪১—৪২। অধিকারিণ এবাহ—শ্রদ্দধানায়েতি দ্বাভ্যাম্ ॥

৪৩। এতচ্ছ্রবণকীর্ত্তনপরস্যাপি মৎপদপ্রাপ্তিরেব ফলমিত্যাহ—য ইতি। অপ্যর্থে চকারঃ, সোঽপি মৎপদবীমেতি, হি নিশ্চিতম্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং তৃতীয়স্কন্ধে
দ্বাত্রিংশোঽধ্যায়ঃ ॥ ৩২ ॥

১। -জ্ঞায়তে (গ)।

ত্রয়স্ত্রিংশোঽধ্যায়ঃ

ত্রয়স্ত্রিংশে স্তুতস্তৈব[১] কপিলস্তোপদেশতঃ ।
জ্ঞানলাভেন[২] তন্মাতুর্জীবন্মুক্তিরুদীর্য্যতে ॥ (১)

১। বিস্রস্তং মোহরূপং পটলমাবরণং যস্যাঃ সা। তত্ত্বান্যেব বিষয়ঃ, তেনাঙ্কিতা সিদ্ধিঃ সাংখ্যজ্ঞানম্, তস্যা ভূমিং ক্ষেত্রং প্রবর্ত্তকম্ ॥

২—৪। অথেতি বাক্যারম্ভে[৩]। অজোঽপি তব বপুঃ কেবলং দধ্যৌ, ন তু দৃষ্টবান্; ন চ স্বয়ং সাক্ষাৎ যস্য তব জঠরাজ্জাতঃ স ভবানেব বিশ্বস্য সর্গাদি বিধত্তে, ন তু তব সর্গাদিকর্ত্তা কশ্চিদস্তি। স এবম্ভূতস্ত্বং মে ময়া কথং জঠরেণ ভৃতঃ[৪] ? ইতি ত্রয়াণামন্বয়ঃ। কথম্ভূতং বপুঃ ? সং ব্যক্তম্, তত্র হেতুঃ—অন্তঃসলিলে শয়ানম্। পুনঃ কীদৃশম্ ? ভূতানি চ ইন্দ্রিয়াণি চ অর্থাশ্চ শব্দাদয় আত্মা মনশ্চ, এতন্ময়মেতৈর্ব্যাপ্তমিত্যর্থঃ। কুতঃ ? গুণানাং প্রবাহো যস্মিন্ তৎ। কুতঃ ? অশেষস্য কার্য্যস্য কারণস্য[৫] বীজং কারণম্ ॥ (৩) কথম্ভূতো ভবান্ সর্গাদি বিধত্তে ? গুণপ্রবাহরূপেণ বিভক্তং বীর্য্যং শক্তির্যেন সঃ, শক্তিদ্বারেণ বিধত্তে, ন সাক্ষাদিত্যর্থঃ ; যতোঽনীহো নিষ্ক্রিয়ঃ। কথং তর্হি শক্তিদ্বারেণাপি সর্গাদিবিধানম্[৬] ? তত্রাহ—অবিতথাভিসন্ধিঃ সত্যসঙ্কল্পঃ। কিমর্থং বিধত্তে ? আত্মনাং জীবানামীশ্বরঃ, জীবানাং ভোগার্থমিত্যর্থঃ। নন্বু কথং বিচিত্রান্[৭] ভোগানেক এব বিদধ্যাৎ ? তত্রাহ—অতর্ক্যাঃ সহস্রমপরিমিতাঃ শক্তয়ো যস্য ॥ (৪) কিঞ্চ প্রলয়ে যস্যোদরে এতদ্বিশ্বমাসীৎ, স ত্বং কথং ময়া জঠরেণ ভৃতঃ ? নন্বু শিশৌ ময়ি কিমেতদুচ্যতে ? তত্রাহ—বটপত্র ইতি। অঙ্ঘ্রিং পাদাঙ্গুষ্ঠং পিবতীত্যঙ্ঘ্রিপানঃ। ইদমপি শিশুত্বং তদ্বদেব মায়েতি ভাবঃ ॥

১। তু তস্যৈব (ঘ); ২। জ্ঞানভাবেন (ঘ); ৩। বাক্যান্তরে (ঘ); ৪। ধৃতঃ (ঘ); ৫। কার্য্যকারণস্য (ঘ); ৬। সর্গাদি বিধত্তে (ঘ); ৭। বিরচিতান্ (গ)।

৫। অথবা ন ময়া ত্বমপত্যান্তরবৎ জঠরে ভৃতঃ, কিন্তু বরাহাদ্যবতারবদিচ্ছয়ৈবাবিভূর্তোঽসীত্যাহ—ত্বং দেহতন্ত্রো দেহপরিকরঃ[১] স্বীকৃতমূর্ত্তিরসি। পাপ্মনাং দুষ্টানাম্, নিদেশভাজামাজ্ঞানুবর্ত্তিনাম্, বিভূতয়ে সমৃদ্ধয়ে, আত্মপথোপলব্ধয়ে জ্ঞানমার্গপ্রদর্শনায় ॥

৬। অতস্ত্বদ্দর্শনাদহং কৃতার্থাস্মীতি কৈমুত্যন্যায়েনাহ—যন্নামধেয়স্য শ্রবণমনুকীর্ত্তনঞ্চ তস্মাৎ, ক্বচিৎ কদাচিদপি, শ্বানমত্তীতি শ্বাদঃ শ্বপচঃ, সোঽপি সবনায় সোমযাগায় কল্পতে যোগ্যো ভবতি; অনেন পূজ্যত্বং লক্ষ্যতে ॥

৭। তদুপপাদয়তি—অহোবতেত্যাশ্চর্য্যে। যস্য জিহ্বাগ্রে তব নাম বর্ত্ততে, স শ্বপচোঽপি অতোঽস্মাদেব হেতোর্গরীয়ান্; যদ্‌যস্মাৎ বর্ত্ততে, অত ইতি বা। কুত? ইত্যত আহ—ত এব[২] তপস্তেপুঃ কৃতবন্তঃ, জুহুবুঃ হোমং কৃতবন্তঃ, সস্নুঃ তীর্থেষু স্নাতাঃ, আর্য্যাস্ত এব সদাচারাঃ, ব্রহ্ম বেদমনূচুরধীতবন্তঃ; ত্বন্নামকীর্ত্তনে তপআদ্যন্তর্ভূতম্, অতস্তে পুণ্যতমা ইত্যর্থঃ। যদ্বা, জন্মান্তরে তৈস্তপোহোমাদি সর্ব্বং কৃতমস্তীতি ত্বন্নামকীর্ত্তনমহাভাগ্যোদয়াদবগম্যত ইত্যর্থঃ ॥

৮। প্রত্যক্‌স্রোতসি প্রত্যাহৃতে আত্মনি মনসি, সংবিভাব্যং সঞ্চিন্ত্যম্; বেদা গর্ভে যস্য, তম্ ॥

৯। অবিক্লবয়া গম্ভীরয়া বাচা ॥

১০। তে তব সুসেব্যেন সুখং সেব্যেন, মে ময়া উদিতেন, আস্থিতেন অনুষ্ঠিতেন, পরাং কাষ্ঠাং জীবন্মুক্তিমবরোৎস্যসি প্রাপ্স্যসি ॥

১১। যাস্নাঃ যাস্যসি, অতদ্বিদো মন্মতমবিদ্বাংসঃ ॥

১২। অনুমতঃ—অনুজ্ঞাতঃ ॥

১। দেহোপাধিকঃ (গ); ২। অতএব (খ)।

১৩। সরস্বত্যা আপীড়ে পুষ্পমুকুটতুল্যে। সরস্বত্যেতি পাঠে মুকুটেনেব সংবেষ্টিতে বিন্দুসরসি সমাহিতা বভূব ॥

১৪। কথম্ভূতা সতী? সমাহিতা, তদাহ—অভীক্ষ্ণং ত্রিসবনমবগাহঃ স্নানম্, তেন কপিশান্ পিশঙ্গান্, স্বত এব কুটিলানলকান্ কেশান্, তথা আত্মানঞ্চ দেহং চীরধারিণং কৃশঞ্চ বিভ্রতী সতী ॥

১৫—২০। প্রজাপতেঃ কর্দ্দমস্য, তপোযোগাভ্যাং বিজৃম্ভিতমতিশয়িতং স্বগার্হস্থ্যং হিত্বা পুত্রভূতেশ্বরবিরহাতুরা সতী বদনং কিঞ্চিদনির্ব্বাচ্যং শোক-ব্যাকুলং চকারেতি ষষ্ঠেনান্বয়ঃ ॥ (১৬) যত্র গার্হস্থ্যে ক্ষীরফেননিভা মৃদুশুভ্রাঃ শয্যা আস্তরণানি আভান্তি, দন্তঘটিতা মঞ্চকাশ্চ, স্বর্ণময়াঃ পরিকরাঃ, আসনানি পীঠাদীনি, সুস্পর্শান্যাস্তরণানি যেষু ॥ (১৮) বহুভিরমরদ্রুমৈ রম্যম্ ॥ (১৯) যত্রোদ্যানে প্রবিষ্টমাত্মানং দেবহূতিম্ ॥ (২০) আখণ্ডল ইন্দ্রঃ, তস্য যা যোষিতস্তাসামপি ঈপ্সিততমং প্রাপ্তু-মিষ্টতমম্, তৎ হিত্বা তত্রাভিমানং ত্যক্ত্বা ॥

২১। সুহৃদ্বিয়োগস্য দুঃসহতামাহ—বনমিতি। নষ্টে বৎসে বৎসলা গৌরিবাভূৎ ॥

২২। বিরহকৃতধ্যানফলমাহ—নিঃস্পৃহা নির্ব্বাসনা; বৎস! হে বিদুর ॥

২৩। ততশ্চ সুতঃ কপিলো যদাহ, তদ্ভগবতো রূপং ধ্যায়ন্তী, তদা আত্মানঞ্চ বিশ্বতোমুখং সর্ব্বগতং ধ্যায়ন্তী, ব্রহ্মণ্যবস্থিতমতির্বভূবেতি পূর্ব্ব-স্যৈবানুষঙ্গঃ। কেন ধ্যায়ন্তী? বিশুদ্ধেনাত্মনা মনসা ॥

২৪। বিশুদ্ধৌ কারণান্যাহ—ভক্তিপ্রবাহরূপেণ যোগেন বৈরাগ্যেণ চ, যুক্তানুষ্ঠানেন জাতং যজ্জ্ঞানম্, তেন চ। যুক্তানুষ্ঠানঞ্চ গীতাসূক্তম্ —'যুক্তাহারবিহারস্য যুক্তচেষ্টস্য কর্ম্মসু। যুক্তস্বপ্নাববোধস্য যোগো ভবতি দুঃখহা ॥' ইতি। ব্রহ্মহেতুনা ব্রহ্মত্বাপাদকেন ॥

২৫। বিশ্বতোমুখত্বে হেতুঃ—স্বানুভূত্যা স্বরূপপ্রকাশেন তিরোভূতং মায়াগুণৈর্বিশেষণং পরিচ্ছেদো যস্য ॥

২৬। কথম্ভূতে ব্রহ্মণি? আত্মনাং জীবানাং সংশ্রয়ে ভগবতি ॥

২৭—৩০। তস্যা জীবন্মুক্তিমাহ সার্দ্ধৈস্ত্রিভিঃ। তদা চ নিবৃত্তা জীবাপত্তির্জীবভাবো যস্যাঃ, তস্যা ভাবস্তত্ত্বং তস্মাদ্বিগতক্লেশা প্রাপ্তনির্বৃতিশ্চ সতী, আত্মানং দেহং ন সম্মারেত্যুত্তরেণান্বয়ঃ। নন্ তথাপি গুণানাং বিদ্যমানত্বাৎ কথমস্মরণম্? তত্রাহ—নিত্যারূঢ়ো লব্ধপ্রতিষ্ঠঃ সমাধির্যস্যাস্তস্যা ভাবস্তত্ত্বম্, তস্মাৎ পরাবৃত্তঃ শান্তো গুণনিমিত্তো ভ্রমো যস্যাঃ, সা ॥ (২৮) পরতঃ পরাভিরেব কর্দ্দমসৃষ্টবিদ্যাধরীভিঃ পোষঃ পোষণং যস্য; আধির্মনোগ্লানিস্তদসম্ভবাদকৃশঃ; মলৈরবচ্ছন্নোঽপি বভৌ ॥ (২৯) দৈবগুপ্তমারব্ধকর্ম্মপালিতম্ ॥ (৩০) নির্ব্বাণম্—নিত্যমুক্তম্ ॥

৩১। হে বীর! হে বিদুর! উপেয়ুষী প্রাপ্তা ॥

৩২। হে সৌম্য! তস্যাস্তন্মর্ত্ত্যং শরীরং সরিদভূৎ। কথম্ভূতম্? যোগেন বিধূতা বিলীনা মার্ত্ত্যা দৈহিকা ধাতুমলা যস্য ॥

৩৩—৩৫। কপিলোঽপি যথাবিত্যুক্তম্, তদেব প্রপঞ্চয়তি—কপিলোঽপীতি ত্রিভিঃ। সম্যগনুজ্ঞাপ্য অনুজ্ঞাং সম্প্রার্থ্য ॥ (৩৪) দত্তমর্হণমর্ঘ্যং নিকেতনঞ্চ যস্মৈ ॥ (৩৫) উপশান্ত্যর্থং সমাহিত আস্তে ॥

৩৬। প্রকরণার্থমুপসংহরতি—এতদিতি; তব ত্বয়া ॥

৩৭। এতচ্ছ্রবণকীর্ত্তনফলমাহ—য ইতি। সুপর্ণকেতৌ গরুড়ধ্বজে, উপলভতে প্রাপ্নোতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং শ্রীধরস্বামি-বিরচিতায়াং তৃতীয়স্কন্ধ-টীকায়াং ত্রয়স্ত্রিংশোঽধ্যায়ঃ ॥ ৩৩ ॥

তৃতীয়স্কন্ধঃ সম্পূর্ণঃ।

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

চতুর্থঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

অথৈকত্রিংশতাধ্যায়ৈর্বিসর্গস্তুর্য্য ঈর্য্যতে।
বিসর্গস্ত্বীশ্বরাধীনৈর্ব্রহ্মমন্বাদিভিঃ কৃতঃ ॥ (১)

তত্র তু প্রথমেঽধ্যায়ে[১] মনুকন্যান্বয়াঃ পৃথক্।
বর্ণ্যন্তে যত্র যজ্ঞাদি-মূর্ত্তিভিঃ প্রভবো হরেঃ ॥ (২)

১। মনুকন্যান্বয়ং বিস্তরেণ বক্তুমাহ—মনোস্ত্বিতি। চকারাৎ দ্বৌ পুত্রৌ চ; তুশব্দাদন্যতোঽপি পুত্রলাভঃ সূচিতঃ ॥

২। তদ্দর্শয়িতুমাহ—পুত্রিকাধর্ম্মমাশ্রিত্যেতি। 'অভ্রাতৃকাং প্রদাস্যামি তুভ্যং কন্যামলঙ্কৃতাম্। অস্যাং যো জায়তে পুত্রঃ স মে পুত্রো ভবেদিতি ॥' ভাষাবন্ধেন কন্যাদানং পুত্রিকা ইতি ধর্ম্মঃ; সা চা ভ্রাতৃকায়াং কন্যায়াং পুত্রার্থিন এব প্রসিদ্ধঃ, তথাপি পুত্রবাহুল্যকামস্তথা কৃতবানিত্যাহ —ভ্রাতৃমতীমপীতি ॥

৩। মিথুনং পুরুষং স্ত্রিয়ঞ্চ; সমাধিনা ঈশ্বরধ্যানেন ॥

৪। ভূতের্লক্ষ্ম্যা অংশভূতা, অতস্তয়োর্বিবাহো ন বিরুদ্ধ ইতি ভাবঃ ॥

৫। পুত্র্যা আকূতেঃ, পুত্রং যজ্ঞম্ ॥

৬। যজুষাং যজ্ঞানাং মন্ত্রাণাং বা পতির্বিষ্ণুঃ ॥

৭। দ্বিষট্—দ্বাদশ ॥

৮। প্রসঙ্গাৎ স্বায়ম্ভুবমন্বন্তরগতং ষট্কমাহ—তুষিতা ইতি দ্বাভ্যাম্। 'মন্বন্তরং মনুর্দ্দেবা মনুপুত্রাঃ সুরেশ্বরাঃ। ঋষয়োঽংশাবতারাশ্চ হরেঃ

১। প্রথমাধ্যায়ে (ঘ)।

ষড়্বিধমুচ্যতে ॥' ইতি বক্ষ্যতি। তত্র স্বায়ম্ভুবো মনুঃ, তুষিতা দেবাঃ, মরীচিপ্রমুখাঃ সপ্তর্ষয়ঃ, যজ্ঞো হরেরবতারঃ, স এব সুরগণেশ্বর ইন্দ্রঃ ॥

৯। প্রিয়ব্রতোত্তানপাদৌ মনুপুত্রৌ পৃথ্বীপালকৌ, তদেবং যজ্ঞস্য দ্বৈরূপ্যেণ ষড়্বিধত্বম্। তয়োঃ পুত্রপৌত্রনপ্তৄণাং বংশৈরনুবৃত্তং ব্যাপ্তং পালিতং তন্মন্বন্তরম্ ॥

১০। শ্রুতপ্রায়ং বাহুল্যেন শ্রুতম্, তৎকন্যাবংশানামশ্রুতত্বাৎ প্রায়-গ্রহণম্ ॥

১২। প্রসূতিপ্রসবম্—পুত্রপৌত্রাদিবিস্তারম্ ॥

১৩। যয়োর্বংশেনাপূরিতম্ ॥

১৪। কশ্যপবংশং ষষ্ঠে বক্ষ্যতি। দ্বিতীয়স্য বংশমাহ—পূর্ণিমেতি। দেবকুল্যা নাম কন্যা হরেঃ পাদক্ষালনাজ্জন্মান্তরে যা দিবঃ সরিদ্গঙ্গাভূৎ, তাম্ ॥

১৫। আত্মেশব্রহ্মসম্ভবান্ বিষ্ণুরুদ্রব্রহ্মণামংশৈঃ সম্ভূতান্ ॥

১৬। কিঞ্চিৎ কিংস্বিৎ, কিং কর্ত্তুমিচ্ছব ইত্যর্থঃ ॥

১৭। ঋক্ষং নাম কুলাদ্রিম্, তপসি স্থিতঃ সন্ ॥

১৮। তস্মিন্ কুলাদ্রৌ, প্রসূনানাং স্তবকা যেষু পলাশাশোকেষু, তেষাং কাননে। নির্ব্বিন্ধ্যা নাম নদী, তস্যাঃ স্রবদ্ভির্ব্বাভিরুদ্ঘুষ্টে নাদিতে ॥

২১। প্রাণায়াম এব এধঃ সন্দীপকো যস্য তেন, মুনের্মূর্দ্ধ্নো নির্গতেনাগ্নিনা তপ্যমানং সমীক্ষ্য তদাশ্রমপদং যযুরিত্যুত্তরেণান্বয়ঃ ॥

২২। অপ্সরঃপ্রমুখৈর্বিতায়মানং বিস্তার্য্যমাণং যশো যেষাং তে ॥

২৩। তেষাং প্রাদুর্ভাবঃ প্রাকট্যম্, তস্য সংযোগঃ সন্নিধিঃ, তেন বিদ্যোতিতং মনো যস্য, উত্তিষ্ঠন্ উৎকর্ষেণ তিষ্ঠন্ ॥

২৪। অর্হণং পুষ্পাদিকমঞ্জলৌ যস্ত, উপতস্থে পূজয়ামাস, বৃষাস্থারূঢ়ান্ স্বৈঃ স্বৈশ্চিহ্নৈস্ত্রিশূলকমণ্ডলু-চক্রাদিভিঃ, কৃপয়াবলোকো যস্মিন্, হসচ্চ তদ্বদনঞ্চ, তেনোপলক্ষিতান্ প্রসন্নত্বেন জ্ঞাপিতান্ ॥

২৫। তেষাং শোচিষা[1] দীপ্ত্যা, শ্লক্ষয়া মধুরয়া, সূক্তয়া গরম্ভীরার্থয়া ॥

২৬। অনুযুগং কল্পে কল্পে, বিভজ্য গৃহীতো দেহো যৈঃ, তে প্রসিদ্ধা ব্রহ্মবিষ্ণুগিরিশা যূয়ম্; বো যুষ্মান্ প্রণতোঽস্মি। তেভ্যঃ সকাশাদেক এব মে ময়োপহূতঃ, শরণং তং প্রপদ্য ইত্যেকস্তৈব নির্দ্দিষ্টত্বাৎ। স চ যুষ্মাসু ক ইতি যুষ্মাভিরেব কথ্যতামিত্যর্থঃ ॥

২৭। অস্য প্রপঞ্চ এক ইতি, বিবিধৈঃ প্রধানৈরুপচারৈঃ; বিবুধ-প্রধান ইতি বা পাঠঃ; প্রজননায় পুত্রোৎপত্ত্যৈ, চিত্তীকৃতঃ চিত্তেনৈক্যং নীতঃ, মনসোঽপি দূরা অগোচরাঃ সন্তঃ, কথং নু ত্রয়োঽপ্যত্রাগতাঃ ?

২৯। তে ত্বয়া যথা কৃতঃ সঙ্কল্পঃ, তেন তথৈব ভাব্যম্, নান্যথা; যতঃ সৎসঙ্কল্পস্য তে সঙ্কল্পঃ, তর্হি কথমেকস্মিন্ ধ্যায়মানে ত্রয়ঃ প্রতীতাঃ স্থঃ? তত্রাহুঃ—যদেকং জগদীশ্বরাখ্যং তত্ত্বং ভবান্ ধ্যায়তি, তত্র তে বয়ম্। ত্রয়োঽপি তদেব একং তত্ত্বম্, নাস্মাকং ভেদোঽস্তীত্যর্থঃ ॥

৩০। বিস্রপ্স্যন্তি বিস্তারয়িষ্যন্তি, অন্তর্ভূত-ণিজর্থস্য সৃপ্‌ৣগতা-বিত্যস্য রূপম্ ॥

৩১। তাভ্যাং সম্যক্ সভাজিতাঃ পূজিতাঃ সন্তঃ, ততঃ স্থানাৎ প্রতিজগ্মুঃ ॥

৩২। অঙ্গিরসো ব্রহ্মণস্তৃতীয়পুত্রস্য, নিবোধ বুধ্যস্ব ॥

৩৩। তাঃ কন্যা নির্দিশতি—সিনীবালীতি ॥

৩৫। পুলস্ত্যশ্চ হবির্ভুবি পত্ন্যামিত্যন্বয়ঃ। সোঽগস্ত্যো দহ্রাগ্নি-র্জঠরাগ্নিঃ, বিশ্রবাশ্চ পুলস্ত্যস্য সুত ইতি শেষঃ ॥

১। রোচিষা (ঘ)।

৩৬। তস্য বিশ্রবস ইলবিলায়াং জাতঃ সুতঃ কুবেরঃ, অন্যস্যাং ভার্য্যায়াং কেশিন্যাং রাবণাদয়স্ত্রয়ঃ সুতাঃ ॥

৩৮। জ্বলতঃ—প্রকাশমানান্ ॥

৩৯। চিত্রকেতুপ্রমুখা জজ্ঞিরে, তে চ সপ্তর্ষয়ো জাতাঃ ॥

৪০। তানেবাহ—চিত্রকেতুরিতি। বসুভৃদ্‌যানো নামৈকঃ, শক্ত্যাদয়োঽপরেঽন্যস্যাঃ পুত্রাঃ ॥

৪১। অথর্ব্বণো বংশমাহ—চিত্তিরিতি। ধৃতব্রতং তপোনিষ্ঠং দধ্যঞ্চং দধীচিম্ ॥

৪২। খ্যাত্যাং পত্ন্যাম্; পুত্রান্ পুত্রৌ পুত্রীঞ্চ, তানেবাহ—ধাতারমিতি ॥

৪৩। তয়োর্ধাতৃবিধাত্রোঃ ॥

৪৪। কবিশ্চ ভার্গবো ভৃগোঃ পুত্রঃ; যস্য কবেঃ সুত উশনা ॥

৪৬। অজাত্মজঃ ব্রহ্মপুত্রঃ, ন তু প্রাচেতসঃ ॥

৪৭। যুক্তেভ্যঃ সংযতেভ্যঃ সম্মিলিতেভ্যো বা ॥

৫০। সর্ব্বেষাং গুণানামুৎপত্তির্যস্যাং সা ॥

৫৩। উপতস্থুর্ভেজুঃ ॥

৫৪। নিজয়া মায়য়া, যস্মিন্নাত্মনি, খে গগনে, রূপভেদং গন্ধর্ব্বনগরমিবেদং বিশ্বং বিরচিতম্, তস্যাত্মনঃ প্রতিচক্ষণায় প্রকাশনায়, আত্মানং যোঽস্য প্রাদুশ্চকার প্রকটিতবান্, তস্মৈ পুরুষায় নমঃ। কেন রূপেণ প্রাদুশ্চকার? ঋষের্মূর্ত্তিরাকারো যস্মিন্, তেনৈতেন রূপেণ ॥

৫৫। সোঽয়ং নোঽস্মান্ সুরগণাননল্পকরুণাযুক্তেন বিলোকনেন বিশিষ্টনেত্রেণ দৃশ্যাৎ পশ্যতু। কথম্ভূতেন? যচ্ছ্রীনিকেতমমলমরবিন্দং তৎ ক্ষিপতা তিরস্কুর্ব্বতা। কথম্ভূতঃ? অনুমেয়ং শাস্ত্রতো বিচার্য্যম্, ন ত্বস্মাক-

মপরোক্ষং তত্ত্বং যস্ত। কথম্ভূতানস্মান্? স্থিতের্জগন্মর্য্যাদায়া ব্যতিকরোঽন্যথাত্বম্, তস্য উপশমায় সত্ত্বেন গুণেন সৃষ্টান্॥

৫৬। লব্ধোঽবলোকো যৈঃ সুরগণৈঃ, তৈরভিষ্টুতৌ অর্চ্চিতৌ সন্তৌ যযতুঃ॥

৫৭। ভুবো ভারস্য ব্যয়ায় নাশায়, চকার একবাক্যত্বার্থঃ; তৌ চ সাম্প্রতমিহাগতাবিত্যর্থঃ। তদুক্তং তন্ত্রে—'অর্জ্জুনে তু নরাবেশঃ কৃষ্ণো নারায়ণঃ স্বয়ম্' ইতি। যদূদ্বহঃ শ্রীকৃষ্ণঃ, কুরূদ্বহোঽর্জ্জুনঃ, উভাবপি কৃষ্ণনামানৌ॥

৫৮। অগ্ন্যভিমানিনো দেবাৎ। স্বাহা নাম তস্য ভার্য্যা, হুতভোজনমিতি ত্রয়াণাং বিশেষণম্॥

৫৯। পিতরস্ত্রয়ঃ, পিতামহ একঃ, তৈঃ সাকং সহ॥

৬০। বৈতানিকে বৈদিকে কর্ম্মণি যজ্ঞে, যেষাং নামভিরগ্নিদেবতাকা ইষ্টয়ো নিরূপ্যন্তে ক্রিয়ন্তে, ত এতে অগ্নয়ঃ, ন লৌকিকাঃ; অতো বহূনাং ন বৈয়র্থ্যমিতি ভাবঃ॥

৬১। সৌম্যাঃ সোমপাঃ; যেষামগ্নৌ করণমস্তি তে সাগ্নয়ঃ, তদ্রহিতাস্ত্বনগ্নয়ঃ॥

৬২। তয়োস্তু সন্ততির্নাভবৎ; জীবন্মুক্তত্বাদিত্যাহ—উভে তে ইতি॥

৬৩। গুণশীলত আত্মনঃ সদৃশং দেবমনুব্রতাপি সতী পুত্রং ন লেভে॥

৬৪। তত্র হেতুঃ—স্বে পিতরি দক্ষেঽপ্রতিরূপে অসদৃশে, প্রতিকূলে সতীত্যর্থঃ। আত্মনা স্বয়মেব আত্মানং দেহম্, অজহাৎ ত্যক্তবতী, যোগসংযুতা যোগমাশ্রিত্যেত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে

প্রথমোঽধ্যায়ঃ॥ ১॥

দ্বিতীয়োঽধ্যায়ঃ

দ্বিতীয়ে প্রথমাধ্যায়োপক্ষিপ্তে ভবদক্ষয়োঃ।
বিদ্বেষে বর্ণ্যতে হেতুর্বিশ্বসৃগ্‌যজ্ঞসম্ভবঃ ॥ (১)

১। সতীম্—সতীনাম্নীম্ ॥

২। ন চাসৌ কস্যদ্বিদ্বেষার্হ ইত্যাহ—ক ইতি। চরাচরগুরুং জগতো দৈবতঞ্চ তং কো দ্বেষ্টি? কথঞ্চ নির্ব্বৈরং দ্বেষ্টি? নির্ব্বৈরত্বে হেতুঃ, শান্তং ভাবে ক্তঃ, শান্তিরেব বিগ্রহো যস্য; কুতঃ? আত্মন্যেবারামো রতির্যস্য তম্; যদ্বা, কঃ প্রজাপতির্দক্ষঃ। কথং দ্বেষ্টি? এবম্ভূতে তস্মিন্ দ্বেষোঽযুক্তোঽশক্যশ্চেত্যর্থঃ ॥

৩। যতো হেতোর্বিদ্বেষঃ, যতো বিদ্বেষাৎ প্রাণাংস্তত্যাজ, এতদাখ্যাহি ॥

৪। তদেবাখ্যাতুমিতিহাসং প্রস্তৌতি—পুরেতি। সমেতা আসন্ ॥

৫। প্রবিষ্টং দক্ষমিতি শেষঃ। মহৎ সদঃ, মহতীং সভাম্ ॥

৬। স্বধিষ্ণেভ্যঃ—স্বীয়াসনেভ্যঃ ॥

৮। প্রাক্ স্বোপবেশাৎ পূর্ব্বমেব, নিষণ্ণমুপবিষ্টং মৃড়ং শিবম্; তদনাদৃতঃ তেনানভ্যুত্থানাদিভিরকৃতাদরঃ, নামৃষ্যৎ নাসহত, বামং বক্রং যথা ভবতি, তথাভিবীক্ষ্য ॥

৯। মে বচনং শ্রূয়তাম্, অজ্ঞানান্মৎসরাচ্চ ন ব্রুবতঃ ॥

১০। স্তব্ধেন উচিতক্রিয়াশূন্যেন, ধ্বস্তেনেতি পাঠে ভ্রষ্টেন ॥

১১। তদেবাহ—এষ ইতি। যদ্‌যস্মাদ্ বিপ্রাগ্নিসমক্ষং সাবিত্রীতুল্যায়া মে দুহিতুঃ পাণিমগ্রহীৎ ॥

১২। মৃগশাবকস্য হরিণবালকস্যাক্ষিণী ইবাক্ষিণী যস্যাঃ। প্রত্যুত্থানাভিবাদার্হে ময়ি উচিতং সম্মানং বাচাপি নাকরোৎ ॥

১৩—১৬। অনর্হায় কন্যা দত্তেত্যনুতপ্যমান আহ—লুপ্তক্রিয়ায়েতি সার্দ্ধৈশ্চতুর্ভিঃ। উশতীং বেদলক্ষণাং গিরম্॥ (১৪) প্রেতাবাসেষু শ্মশানেষু, ব্যুপ্তা বিকীর্ণাঃ কেশা যস্য॥ (১৫) চিতাভস্মনা কৃতং স্নানং যেন; প্রেতানাং স্রজো মাল্যানি যস্য, স প্রেতস্রক্; নৃণামস্থীনি ভূষণানি যস্য; শিব ইত্যপদেশো নামমাত্রং যস্য। তমোমাত্রাত্মকঃ কেবলতমোরূপ আত্মা স্বভাবো যেষাম্॥ (১৬) উন্মাদা ভূতবিশেষাস্তেষাং নাথায়, দুর্হৃদে দুষ্টচিত্তায়, বতেতি খেদে। বাস্তবস্ত্বয়মর্থঃ—লুপ্তা ক্রিয়া যস্মিন্, পরব্রহ্মরূপত্বাৎ, অতএব নাস্তি শুচির্যস্মাৎ; অমানিনে অভিন্নসেতবে ইতি চ পদচ্ছেদঃ; তস্য পরমেশ্বরস্য মদীয়া মানুষী কন্যা কথং যোগ্যা স্যাদিতি লজ্জাদিনা দাতুমনিচ্ছন্নপি তৎসম্বন্ধলোভেন দত্তবান্। শূদ্রায়েতি অনর্হত্বমাত্রে দৃষ্টান্তঃ, ন হীনত্বে, পূর্ব্বাপরস্ববচনবিরোধাপত্তেঃ। এতদুক্তং ভবতি—যথা কশ্চিৎ শূদ্রায় বেদমর্থলোভেন দদাতি, তদ্বদিতি। প্রেতাবাসেষ্বিত্যাদি, সর্ব্বং বিড়ম্বনমাত্রমিতি স্বয়মেবাহ—উন্মত্তবদিতি; অন্যথা উন্মত্ত ইত্যেবাবক্ষ্যৎ। অশিবঃ নাস্তি শিবো যস্মাৎ; অমত্তঃ অমত্তজনপ্রিয় ইতি চ চ্ছেদঃ। পতিঃ প্রমথনাথানামিতি, ভক্তবাৎসল্যমাহ—তামসানপি দোষমশেষমপনীয় পাতীতি, নষ্টানামপি শৌচং শুদ্ধির্যস্মাৎ, দুষ্টেষ্বপি 'এতে ময়া অনুকম্প্যাঃ' ইতি দুষ্টং মনো যস্য, স দুর্হৃৎ; তস্মৈ, বতেতি হর্ষে, ব্রহ্মণো বাক্যাল্লজ্জাভয়াদিকং পরিত্যজ্য দত্তেত্যর্থঃ॥

১৭। অপ্রতীপমপ্রতিকূলং যথা ভবত্যেবমবস্থিতমপি বিনিন্দ্য॥

১৮। দেবানাং যজনসময়ে দেবৈঃ সহ ভাগং ন লভতাম্, কিন্তু তেভ্যঃ পূর্ব্বমেব লভতাম্, অগ্রভোজিত্বাৎ; যদ্বা, তেষু ভুক্তবৎসু লভতাম্, সর্ব্বপোষকত্বাৎ। তত্র হেতুঃ—দেবগণোঽধমো যস্মাৎ, সঃ॥

১৯। স দক্ষস্তস্মাৎ স্থানাদ্বিনিক্রম্য জগাম, হে কৌরব্য॥

২০। গিরিশস্থানুগানামগ্রণীর্মুখ্যঃ, রোষ এব কষায়স্তেন দূষিতঃ, আরক্তনেত্র ইত্যর্থঃ। তত্র গিরিশস্য বাচ্যতাং, বচনানর্হতাং নিন্দ্যতামিত্যর্থঃ ; তেভ্যোঽপি শাপং বিসসর্জ্জ ॥

২১—২৪। দক্ষং শপতি সার্দ্ধৈস্ত্রিভিঃ। এতন্মর্ত্ত্যং দক্ষশরীরমুদ্দিশ্য শ্রেষ্ঠং মত্বা, অপ্রতিদ্রুহি প্রতিদ্রোহমকুর্ব্বতি, পৃথগ্‌দৃষ্টিঃ ভেদদর্শী, তত্ত্বতঃ পরমার্থাৎ ॥ (২২) অজ্ঞত্বমেবাহ—গৃহেষিতি। কর্ম্মতন্ত্রং কর্ম্মপরিকরম্, বেদে যে বাদা অর্থবাদাঃ 'অক্ষয্যং হ বৈ চাতুর্ম্মাস্যযাজিনঃ সুকৃতং ভবতি' ইত্যাদয়ঃ, তৈর্বিপন্না বিনষ্টা ধীর্যস্যেতি ॥ (২৩) পরো দেহাদিঃ, তমেবাত্মত্বেনাভিধ্যাতুং শীলং যস্যাস্তয়া বুদ্ধ্যা বিস্মৃতা আত্মনো গতিস্তত্ত্বং যেন, অতঃ পশুতুল্যঃ। অতিতরাং স্ত্রীকামোঽস্ত্বিতি দ্বিতীয়ঃ শাপঃ। বস্তস্য মুখস্যেব মুখমস্যেতি তৃতীয়ঃ শাপঃ ॥ (২৪) অয়ন্তু শাপোঽস্যানুরূপ এবেত্যাহ—বিদ্যাবুদ্ধিরিয়মেব তত্ত্ববিদ্যেতি বুদ্ধির্যস্য ; অতোঽসৌ জড় এব ॥

২৪—২৬। বিপ্রান্ শপতি—সংসরন্ত্বিতি সার্দ্ধদ্বাভ্যাম্। শর্ব্বমবমন্যত ইতি ; তথা তমমুং দক্ষং যে চানুবর্ত্তন্তে, তে সংসরন্তু জন্মমরণাদ্যনুভবন্ত্বিতি একঃ শাপঃ॥ (২৫) শ্রুতায়া বেদরূপায়াঃ, পুষ্পিণ্যাঃ পুষ্পাণীবার্থবাদা মনঃক্ষোভকত্বাৎ, তানি সন্তি যস্যাম্, অর্থবাদবহুলায়া ইত্যর্থঃ ; মধুগন্ধতুল্যেন প্ররোচনেন, মথ্যা মনঃক্ষোভকেণোন্মথিত আত্মা মনো যেষাং তে, সংমুহ্যন্তু কর্ম্মস্বাসক্তা ভবন্ত্বিতি দ্বিতীয়ঃ শাপঃ॥ (২৬) সর্ব্বভক্ষা ভক্ষ্যাভক্ষ্যবিচারশূন্যাঃ, বৃত্ত্যৈ দেহাদিপোষণায় ধৃতানি বিদ্যাতপোব্রতানি যৈঃ, বিত্তাদিষ্বেবারামো রতির্যেষাং তে, যাচকাঃ সন্তো বিচরন্ত্বিতি চ শাপচতুষ্টয়ম্ ॥

২৭। প্রত্যসৃজৎ প্রত্যদাৎ, শাপরূপং ব্রহ্মদণ্ডম্ ॥

২৮। সচ্ছাস্ত্রস্য পরিপন্থিনঃ প্রতিকূলাঃ ॥

২৯। সুরা গৌড়ী পৈষ্টী মাধ্বী চ আসবঃ, তালাদিসম্ভবং মদ্যম্, দ্বন্দ্বৈকত্বাৎ ষণ্ঢত্বম্। যৎ যত্র, দৈবং পূজ্যং দেবতাবদাদরণীয়মিতি বা ॥

৩০। ব্রহ্ম বেদম্। কথম্ভূতম্? সেতুং মর্য্যাদারূপম্। তদেবাহ—পুংসাং বর্ণাশ্রমাচারবতাং বিধরণং ধারকম্ ॥

৩১—৩২। হেতুত্বং[1] প্রপঞ্চয়তি দ্বাভ্যাম্—এষ বেদলক্ষণ এব শিবঃ পন্থাঃ, যং পূর্ব্বে ঋষয়ঃ অনুসন্তস্তুরাশ্রিতবন্তঃ, যদ্‌যস্মিন্ জনার্দ্দনঃ প্রমাণং মূলম্ ॥ (৩২) ভূতরাট্ ভূতানাং তামসানাং পতিঃ ॥

৩৩। অন্যোঽন্যশাপেন উভয়োর্বিনাশাদ্‌বিমনা ইবেতি। তথাপি ভগবদনুগৃহীতানাং নাশো ন স্যাদিতি ভাবঃ ॥

৩৪। ঋষভঃ সর্ব্বশ্রেষ্ঠো হরিঃ, যত্র ইজ্যঃ পূজ্যঃ, তৎ সত্রং সম্যগ্বিধায়। হে মহেষ্বাস! হে বিদুর ॥

৩৫। যত্র প্রয়াগে গঙ্গা যমুনয়া অন্বিতা, তত্রাবভৃথস্নানং কৃত্বা, ততঃ স্থানাদ্‌যযুঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

১। সেতুত্বং (ঘ)।

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে তু সতী তাত-যজ্ঞোৎসবদিদৃক্ষয়া।
গমিষ্যন্তী মহেশেন বারিতা নীতিহেতুভিঃ॥ (১)

১। ধ্রিয়মাণয়োঃ অবতিষ্ঠমানয়োঃ ; ধৃঙ্ অবস্থান ইত্যস্মাৎ॥

২। যদ্যপি রুদ্রবিহীনো যজ্ঞো নাস্ত্যেব, তথাপি দক্ষস্য রুদ্র-পরিত্যাগো দ্বেষাদ্ গর্ব্বাচ্চ ; তত্র দ্বেষে হেতুরুক্তঃ। গর্ব্বহেতুমাহ—যদা তু প্রজাপতীনামাধিপত্যেঽভিষিক্তঃ, তদা তস্য স্ময়ো গর্ব্বোঽভবৎ॥

৩। গর্ব্বাদেব ব্রহ্মিষ্ঠান্ সেশ্বরানভিভূয় তিরস্কৃত্য। 'বাজপেয়েনেষ্ট্বা বৃহস্পতিসবেন যজেত' ইতি শ্রুতের্বাজপেয়েনেষ্ট্বা সমারেভে॥

৪। কৃতস্বস্ত্যয়নাঃ কৃতমঙ্গলাঃ, সভর্তৃকা ইতি দক্ষিণাদিভিঃ, প্রথম-মর্হিতানামপি পত্ন্যর্হণে পুনরর্হণমুক্তম্॥

৫—৭। তৎ তদা, খেচরাণাং প্রজল্পতাং সতাম্, পিতৃযজ্ঞমহোৎসবং শ্রুত্বা, তত্র ব্রজন্তীরুপদেবতানাং গন্ধর্ব্বাদীনাং বরাঃ স্ত্রিয়শ্চ স্বস্য নিলয়স্যা-ভ্যাসে সমীপে দৃষ্ট্বা, ঔৎসুক্যাৎ পতিমভ্যভাষতেতি ত্রয়াণামন্বয়ঃ। কথম্ভূতাঃ স্ত্রিয়ো দৃষ্ট্বা? বিমানানি যানানি যাসাং তাঃ, প্রেষ্ঠৈঃ সহিতাশ্চ, নিষ্কাণি পদকানি কণ্ঠেষু যাসাং তাঃ, শোভনানি বাসাংসি যাসাম্, লোলানি চঞ্চলানি অক্ষীণি যাসাম্, মৃষ্টানি উজ্জ্বলানি কুণ্ডলানি যাসাং তাঃ॥

৮। নির্যাপিতঃ প্রবর্ত্তিতঃ। বাম! হে শিব! তে যদ্যর্থিতা ইচ্ছা, তর্হি বয়ঞ্চ তত্রাভিসরাম গচ্ছাম। নাদ্যাপি যাগো নিবৃত্তঃ, যতোঽমী বিবুধা ব্রজন্তি॥

৯—১৪। ঔৎসুক্যং প্রকটয়ন্ত্যাহ—তস্মিন্নিতি ষড়্ভিঃ। পিতৃভ্যামুপ-নীতং দত্তং পরিবর্হমলঙ্কারাদি দ্রব্যং ভবতা সহ অর্হিতুং স্বীকর্ত্তু-মভিকাময়ে। অর্হিতমিতি পাঠে সৎকৃতং পরিবর্হমিচ্ছামীতি॥ (১০)

স্বসৃর্ভগিনীর্ভর্তৃভিঃ সম্মিতাঃ সদৃশীঃ, ক্লিন্নধিয়ং স্নেহার্দ্রচিত্তাম্, চিরমুৎকণ্ঠ-মুৎসুকং মনো যস্যাঃ, সাহং দ্রক্ষ্যামি। হে মৃড়! উন্নীয়মানং প্রবর্ত্ত্যমানম্ অধ্বরেষু ধ্বজমিব দৃশ্যং শ্রেষ্ঠমধ্বরম্; যদ্বা, উৎক্ষিপ্যমাণং যজ্ঞে কেতুং যূপং বা॥ (১১) অহো কিং তত্রাশ্চর্য্যম্, যেন তবৈতদৌৎসুক্যমিতি চেৎ? অত আহ—ত্বয়ীতি। হে অজ! এতদ্বিশ্বমাশ্চর্য্যরূপং ত্বয্যেব ত্বন্মায়য়ারচিতং বিভাতি, অতো যদ্যপি তব নাশ্চর্য্যবুদ্ধিঃ, তথাপ্যহং যোষিত্বৎসুকস্বভাবা তব তত্ত্বঞ্চ ন জানামি, অতো দীনা কৃপণা সতী, হে ভব! মে ভবক্ষিতিং জন্মভূমিং দিদৃক্ষে দ্রষ্টুমিচ্ছামি॥ (১২) দিদৃক্ষামেব কৈমুতিকন্যায়েন ব্যনক্তি—পশ্যেতি দ্বাভ্যাম্। হে অভবেতি সুহৃদ্বিয়োগ-দুঃখং ত্বয়া নাস্বাদিতমিতি ভাবঃ। অন্যা যোষিতঃ সম্বন্ধরহিতা অপি প্রয়ান্তীঃ পশ্য, কান্তসখাঃ ভর্তৃসহিতাঃ, বরূথশঃ সঙ্ঘশঃ। কথম্ভূতাঃ? যাসাং বিমানৈর্নভো মণ্ডিতম্, তাঃ। হে শিতিকণ্ঠ, হে নীলকণ্ঠ! ইতি পরানু-গ্রহার্থং ত্বয়া বিষমপি ভক্ষিতমিতি সূচয়তি॥ (১৩) তদা হে সুরশ্রেষ্ঠ! পিতৃগেহোৎসবং নিশম্য সুতায়া দেহং কথং দ্রষ্টুং নেঙ্গতে, ন প্রচলতি? তথাপ্যনাহূতাঃ সন্তঃ কথং গচ্ছামঃ? তত্রাহ—সৌহৃদং সুহৃদঃ সম্বন্ধি কেতনং গৃহম্, তথা ভর্ত্ত্রাদীনাঞ্চ গৃহমনাহূতা অপি অভিযন্তি। হ্রস্বত্বমার্ষম্॥ (১৪) হে অমর্ত্ত্য! তৎ তস্মাৎ প্রসীদ, ইদং মে বাঞ্ছিতং কর্ত্তুং ভবানর্হতি। কারুণিকত্বমেবাহ—অদভ্রচক্ষুষা অনল্পজ্ঞানেনাপি ত্বয়া আত্মনো দেহস্যার্দ্ধে অহং নিরূপিতা ধৃতা; যতোঽর্দ্ধনারীশ্বর ইতি খ্যাতোঽসি, অতো মা মামনুগৃহাণ যাচিতঃ সন্॥

১৫। অভিভাষিতোঽভিযাচিতঃ। কঃ দক্ষো যানাহ, মর্ম্ম ভিন্দন্তি যে, তান্ কুবাগিষূন্, দুরুক্তিবাণান্ সংস্মারিতঃ সন্॥

১৬। অনাহূতা অপীতি ত্বয়া যদুদিতমুক্তম্, তচ্ছোভনমেব; কিন্তু অনাত্ম্যং দেহাত্মহঙ্কারঃ, তৎকৃতেন মদেন মন্যুনা চ তে বন্ধবো যদ্যনুৎ-

পাদিতদোষদৃষ্টয়ো ভবন্তি, তর্হি ন উৎপাদিতে আরোপিতে দোষে দৃষ্টির্যেষাং তে ॥

১৭। ননু বিদ্যাদিগুণযুক্তো দক্ষস্ত্বাদৃশেষু মহৎসু কথং দোষদৃষ্টির্ভবেৎ? তত্রাহ—বিদ্যাদিভিরেব স্মৃতৌ হতায়াং বিবেকজ্ঞানে নষ্টে সতি, ভূয়সাং মহত্তমানাং ধাম তেজো ন পশ্যন্তি হি। ননু গুণৈঃ কথং বিবেকনাশঃ? তত্রাহ—সতাং গুণৈর্বিবেকহেতুভিরপি অসত্তমানামিতরৈর্দোষভূতৈঃ, অতএব তৈর্ভৃতো ধৃতঃ পুষ্টো বা অহং বিদ্বান্ তাপস ইত্যাদির্মানো গর্ব্বস্তেন দুষ্টা দৃষ্টির্যেষাং তে ॥

১৮। স্বজনব্যপেক্ষয়া বন্ধুদৃষ্ট্যা গৃহান্ ন প্রতীয়ান্নাবলোকয়েৎ। অনবস্থিতচিত্তত্বমেবাহ—যে বক্রধিয়া কুটিলবুদ্ধ্যা পশ্যন্তি, আরোপিতা উত্তম্ভিতা ভ্রূর্যেষু তান্যারোপিতভ্রূণি তৈঃ, আরোপিতাভির্ভ্রূভিরিতি বা, অমর্ষণৈঃ সক্রোধৈরক্ষিভিঃ ॥

১৯। ননু স্বজনানাং গৃহং সুহৃদ্ভির্গন্তব্যম্, তেষাং দুশ্চেষ্টিতঞ্চ সোঢ়ব্যম্? ন; তস্য দুঃসহত্বাদিত্যাহ—তথেতি। অরিভিঃ শিলীমুখৈর্বাণৈরর্দ্দিতাঙ্গঃ খণ্ডিতগাত্রোঽপি তথা ন ব্যথতে, যতঃ শেতে স্বপিতি; স্বানাং দুরুক্তিভির্মর্ম্মসু তাড়িতো যথা, দূয়তা ব্যথমানেন হৃদা দিবানিশং তপ্যতি ॥

২০। ময়ি তত্র গতায়াং নেয়ং শঙ্কেতি চেৎ? তত্রাহ—ব্যক্তং নিশ্চিতম্, উৎকৃষ্টা গতিঃ স্থিতির্যস্য তস্য, আত্মজানাং কন্যানাং মধ্যে ত্বং প্রিয়েতি মে সম্মতাসি, তথাপি পিতুঃ সকাশান্মানং ন লপ্স্যসে, মদাশ্রয়াৎ মৎসম্বন্ধাৎ ॥

২১। ননু ভগবন্! ত্বয়া কিমিতি দক্ষস্তিরস্কৃতঃ, যতোঽসৌ ত্বাং দ্বেষ্টি? ইত্যত আহ—পাপচ্যমানেন অলং দহ্যমানেন হৃদা মনসা দুঃখিতেন্দ্রিয়ঃ। কাভিঃ? পুরুষো জীবঃ, তস্য বুদ্ধিশ্চিত্তম্, তৎসাক্ষিণাং নিরহঙ্কারাণামিত্যর্থঃ, সমৃদ্ধিভিঃ পুণ্যকীর্ত্ত্যাদিভিঃ। এষাং পদং স্থানমৈশ্বর্য্যং প্রাপ্তু-

মকল্যো[১]ঽশক্তঃ সন্ পরং কেবলং দ্বেষ্টি, অসুরা যথা হরিং কেবলং দ্বিষন্তি ॥

২২। নন্থ ত্বয়া প্রত্যুত্থানবিনয়াদ্যকরণাদবজ্ঞাত এবাসৌ? তত্রাহ—হে সুমধ্যমে! প্রত্যুদ্গমাদিকং মিথো জনৈর্যদ্বিধীয়তে, তৎ প্রাজ্ঞৈঃ সাধু বিধীয়তে। সাধুত্বমেবাহ—পরস্মৈ শ্রীবাসুদেবায়, গুহাশয়ায় অন্তর্য্যামিণে এব; তচ্চ চেতসৈব, পরিপূর্ণে তস্মিন্ কায়িকব্যাপারাযোগাৎ। অতোঽন্তর্য্যামিদৃষ্ট্যা মনসা ময়া সর্ব্বং কৃতমিতি ভাবঃ ॥

২৩। কিঞ্চ, ন কেবলমভ্যাগতেষ্বেব বাসুদেবদৃষ্ট্যা নমনং ক্রিয়তে, কিন্তু নিত্যমেব মনসি বাসুদেবশ্চিন্ত্যত ইত্যাহ—বিশুদ্ধং সত্ত্বমন্তঃকরণং সত্ত্বগুণো বা, বসুদেবশব্দিতং বসুদেবশব্দেনোক্তম্। কুতঃ? যদ্‌যস্মাৎ তত্র তস্মিন্ সত্ত্বে পুমান্ বাসুদেব ঈয়তে প্রকাশতে। অপগতমাবৃতমাবরণং যস্মাৎ সঃ। অয়মর্থঃ—বসুদেবে ভবতি প্রতীয়তে ইতি, বাসুদেবঃ পরমেশ্বরঃ প্রসিদ্ধঃ, স চ বিশুদ্ধে সত্ত্বে প্রতীয়তে, অতঃ প্রত্যয়ার্থেন প্রসিদ্ধেন প্রকৃত্যর্থো নির্দ্ধার্য্যতে। ততশ্চ বাসয়তি দেবমিতি ব্যুৎপত্ত্যা বসত্যস্মিন্নিতি বা বসু, দীব্যতি দ্যোততে ইতি দেবঃ; বসুভিঃ পুণ্যৈর্দীব্যতি প্রকাশতে ইতি বা বসুদেবশব্দবাচ্যং শুদ্ধং সত্ত্বম্। ততঃ কিম্? অত আহ—সত্ত্বে চ তস্মিন্ মে ময়া নমসা নমস্কারেণানুবিধীয়তে সেব্যত ইত্যর্থঃ; মনসেতি পাঠে মনসা বিশেষেণ ধীয়তে ধার্য্যতে চিন্ত্যত ইত্যর্থঃ। যতঃ অধোভূতেষু প্রত্যাহৃতেষু অক্ষেষু জায়তে প্রকাশতে, ইন্দ্রিয়াগোচর ইত্যর্থঃ ॥

২৪। তৎ তস্মাৎ ত্বয়া ন নিরীক্ষ্যঃ। দেহকৃদপীতি পোষকত্বাদিভিরৌপচারিক-পিতৃত্বব্যাবৃত্ত্যর্থম্। দ্বিট্ শত্রুঃ; তদেবাহ—হে বরোরু!

১। অকল্পো (ঘ)।

যো দক্ষো বিশ্বসৃজাং যজ্ঞগতং মাং নিরপরাধং তিরোঽকরোৎ তিরস্কৃতবান্॥

২৫। বিপক্ষে দোষমাহ—যদীতি। মদ্বচঃ অতিহায় অতিক্রম্য। যতঃ সম্ভাবিতস্য সুপ্রতিষ্ঠিতস্য যদা পরাভবো ভবতি, তদা স পরাভবস্তস্য মরণায় কল্পতে॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
তৃতীয়োঽধ্যায়ঃ॥ ৩॥

চতুর্থোঽধ্যায়ঃ

চতুর্থে তু পতিং হিত্বা গতা পিত্রাবমানিতা।
রুষা নির্ভর্ৎস্য তং যজ্ঞে জহৌ দেহমিতীর্য্যতে॥ (১)

১। উভয়ত্র—অনুজ্ঞানে বলান্নিবারণে চ। সুহৃদ্দিদৃক্ষুঃ নিষ্ক্রামন্তী, ভবাৎ পরিশঙ্কিতা পুনর্নিবিশতী চ তদা সা সতী দ্বিধা আন্দোলিতচিত্তা আস বভূব, ন গতা ন চ স্থিতা, আন্দোলাবদ্গতিরভবৎ॥

২। সুহৃদাং দিদৃক্ষায়াঃ প্রতিঘাতেন দুর্ম্মনাঃ, অশ্রূণাং কলাভির্লেশৈঃ অতিবিহ্বলা ব্যাকুলা, অপ্রতিপুরুষং স্বসমানপুরুষান্তররহিতম্, প্রধক্ষ্যতীব ভস্মীকরিষ্যতীব; রুষা জাতো বেপথুঃ কম্পো যস্যাঃ॥

৩। ততস্তং বিহায় পিত্রোর্গৃহানগাৎ। কথম্ভূতম্? যঃ প্রীত্যা তস্যৈ আত্মনো দেহস্যার্দ্ধমদাৎ। ত্যাগে হেতুঃ—স্ত্রৈণ্যং স্ত্রীস্বভাবঃ, তেন বিমূঢ়া ধীর্যস্যাঃ সা॥

৪। দ্রুতবিক্রমাং শীঘ্রং গচ্ছন্তীম্, সহ পার্ষদৈর্যক্ষৈশ্চ বর্ত্তমানাঃ ; মণিমান্ মদশ্চ আদির্যেষাং তে, পুরঃ পুরতো বৃষেন্দ্রো যেষাং তে, গতব্যথা নির্ভয়াঃ, রুদ্রাতিক্রমেণ তস্যা গমনাদাগতব্যথা ইতি বা ॥

৫। তাং বৃষেন্দ্রমারোপ্য সারিকাদিভিঃ ক্রীড়োপকরণৈঃ, শ্বেতাতপত্রাদিভিশ্চ মহারাজবিভূতিভিঃ সহ বিটঙ্কিতাঃ শোভিতাঃ যযুঃ। সারিকা পঠননিরূপিতা পক্ষিণী। গীতায়নৈঃ গীতাশ্রয়ৈঃ ॥

৬। আ সমন্তাদ্যো বেদঘোষঃ, তেন উর্জ্জিতং শোভমানং যজ্ঞসম্বন্ধি পশুবিশসনং যস্মিন্ ; যদ্বা, তেন উর্জ্জিতমতিশয়িতং যজ্ঞবৈশসং পরস্পরস্পর্দ্ধা যস্মিন্, তদ্যজনং যজ্ঞস্থানং সমাবিশদ্দেবী ; বিবুধৈশ্চ জুষ্টম্ ; মৃদাদিভির্নিসৃষ্টানি নির্ম্মিতানি ভাণ্ডানি পাত্রাণি যস্মিন্ ॥

৭। কশ্চন নাদ্রিয়ৎ নাদৃতবান্, যজ্ঞকৃতো দক্ষাদ্যদ্ভয়ং তস্মাৎ। তত্র হেতুঃ—তেন বিমানিতাম্। স্বসৄর্জননীঞ্চ ঋতে বিনা তাস্তু সাদরাঃ পরিষস্বজুরালিঙ্গিতবত্যঃ, প্রেমাশ্রুভির্নিরুদ্ধঃ কণ্ঠো যাসাং তাঃ ॥

৮। অপ্রতিনন্দিতা অনাদৃতা সতী নাদত্ত ন গৃহীতবতী। কথম্? সৌদর্য্যেণ সোদরত্বেন ভগিনীনাং যঃ সম্প্রশ্নঃ, তত্র সমর্থা যোগ্যা যা বার্ত্তা তয়া সহ, তাঞ্চ নাদত্ত নাশৃণোদিত্যর্থঃ ॥

৯। ন বিদ্যতে রুদ্রস্য ভাগো যস্মিন্, তম্। দেবে রুদ্রে কৃতং হেলনমবজ্ঞাম্, আহ্বানাদ্যকরণাৎ ॥

১০। জগর্হ নিন্দিতবতী। অমর্ষেণ কোপেন বিপন্না অব্যক্তা গীস্তয়া শিবং দ্বেষ্টীতি শিবদ্বিট্, তম্ ; ধূমপথঃ কর্ম্মমার্গঃ, তত্র শ্রমোঽভ্যাসঃ, তেন স্ময়ো গর্ব্বো যস্য। দক্ষবধায় সমুত্থিতান্ স্বাজ্ঞয়া নিগৃহ্য নিবার্য্য ॥

১১—২৩। নিন্দামেবাহ—ন যস্যেতি ত্রয়োদশভিঃ। মুক্তবৈরকে ত্যক্তবিরোধে তস্মিন্ শ্রীশিবে ভবন্তমৃতে বিনা কতমঃ প্রতীপয়েৎ, প্রতি-

কূলমাচরেৎ ? বৈরাভাবে হেতবঃ—যস্ত লোকে অতিশায়নোঽতিশয়িতো নাস্তি ; তথা প্রিয়শ্চাপ্রিয়শ্চ নাস্তি, সমাসপাঠে অতিশয়েন প্রিয়ো নাস্তি ; দেহভৃতাং প্রিয়ো য আত্মা তস্য ; সমস্তস্য আত্মনি কারণভূতে, সমস্তরূপ ইতি বা ॥ (১২) তস্য চ প্রতিকূলকরণং দ্বেধা—মহত্তমদ্রোহেণ, সাক্ষাত্তদ্দ্রোহেণ চ। তত্র পুরুষাণাং চাতুর্ব্বিধ্যং বদন্তী মহত্তমদ্রোহমাহ—দোষানিতি দ্বাভ্যাম্ ; হে দ্বিজ ! ইত্যধিক্ষেপঃ, ভবাদৃশাস্ত্বধিা অসূয়কাঃ পরেষাং গুণেষু দোষানেব গৃহ্ণন্তি, ন তু গুণান্। কেচিন্মধ্যস্থা গুণেষু দোষান্ ন গৃহ্ণন্তি, কিন্তু যথাস্থিতান্ গুণদোষান্ বিবেকেন গৃহ্ণন্তি, তে তু মহান্ত উচ্যন্তে। সাধবস্তু কেবলং গুণানেব গৃহ্ণন্তি, ন দোষান্, তে তু মহত্তরা উচ্যন্তে। মহত্তমাস্তু দোষান্ ন গৃহ্ণন্ত্যেব, প্রত্যুত ফল্গূন্ তুচ্ছানপি গুণান্ বহুলীকুর্ব্বন্তি করিষ্ণবো ভবন্তি, তেষু ভবানঘমবিদৎ বিদিতবান্, কল্পিতবানিত্যর্থঃ ; তচ্চ 'ব্রহ্মিষ্ঠানভিভূয়' ইত্যনেন সূচিতম্ ॥ (১৩) এতচ্চ দুর্জ্জনেষু যুক্তমেবেত্যাহ—নেতি। কুণপং জড়ং শরীরম্, তদেবাত্মেতি বদন্তি যে, তেষু ; ঈর্ষ্যা অসূয়া অক্ষান্তিঃ, সের্ষ্যং যথা ভবত্যেবং মহতাং বিনিন্দেতি যৎ, এতদাশ্চর্য্যং ন ভবতি ; সের্ষ্যং নিরস্তং তেজঃ প্রভাবো যেষামিতি বা। যদ্যপি মহাপুরুষাঃ স্বনিন্দাং সহন্তে, তথাপি তৎপাদ-রেণবস্তদসহমানাস্তেষাং তেজো নিরস্যন্তি ; অতোঽসৎসু (অশক্তেষু) মহন্নিন্দনমুচিতমেবেতি ভাবঃ ॥ (১৪—১৫) তদেবং মহত্তমদ্রোহমুক্ত্বা তস্মিন্নেব কৃতং দ্রোহমাহ—যদিতি দ্বাভ্যাম্। যদ্যস্য দ্ব্যক্ষরমাত্রং শিব ইতি তৎ প্রসিদ্ধং নাম নৃণাং সর্ব্বেষামাশু অঘং সর্ব্বং হন্তি ; কেবলং গিরৈবেরিতমুচ্চারিতম্, ন তু মনঃপূর্ব্বকম্, তচ্চ সকৃদপি, প্রসঙ্গাদপি ; তং শিবং দ্বেষ্টি ; ন লঙ্ঘ্যং শাসনমাজ্ঞা যস্য। অহো ! শিবেতরঃ অমঙ্গলরূপঃ ॥ (১৫) পাপহরত্বমুক্ত্বা ভুক্তিমুক্তিপ্রদত্বেন শ্রীশিবং বর্ণয়ন্ত্যাহ—যস্য পাদপদ্মম্ ; মনাংস্যেবালয়স্তৈঃ, ব্রহ্মরসো ব্রহ্মানন্দঃ, স

এবাসবো মকরন্দঃ, তদর্থিভিঃ; যচ্চ অর্থিনঃ সকামস্ত লোকস্ত তাস্তা আশিষো বর্ষতি॥ (১৬) যদুক্তং 'শিবাপদেশো হ্যশিবঃ' ইতি, যচ্চোক্তং 'প্রেতাবাসেষু' ইত্যাদি, তদাক্ষিপন্ত্যাহ—কিং বেতি। যো জটা অবকীর্য্য শ্মশানে অবসৎ বসতি স্ম; তস্ত শ্মশানস্ত ম্যাল্যানি ভস্মানি নৃকপালানি চ ভূষণত্বেন সন্তি যস্ত। তং ত্বত্তোঽন্যে ন বিদুঃ কিম্? বিদন্ত্যেবেতি চেৎ, ন। তথাপি সতি তেষাং তদ্ধাস্যানুপপত্তেরিত্যাহ—তচ্চরণাদবস্পৃষ্টং গলিতং নির্ম্মাল্যং যে মূর্দ্ধভির্ধারয়ন্তি, তে॥ (১৭) ইদানীং দেহং ত্যক্তুকামা ধর্ম্মতত্ত্বমাহ—কর্ণাবাচ্ছাদ্য নির্গচ্ছেৎ, যদ্যদি মর্ত্তুং মারয়িতুং বা কল্পো ন ভবতি। কদা? ধর্ম্মাবিতরি ধর্ম্মরক্ষকে ঈশে স্বামিনি অশৃণিভির্নিরঙ্কুশৈর্নৃভিরস্তমানে অধিক্ষিপ্যমাণে, প্রভুঃ শক্তশ্চেৎ, রুষতীমকল্যাণবাদিনীম্, প্রসহ্য বলাৎ ছিন্দ্যাৎ। ততোঽপি স্বয়ং প্রাণান্ বিসৃজেদিতি যৎ, স ধর্ম্মঃ॥ (১৮) তব ত্বত্ত উৎপন্নম্। শিতিকণ্ঠো নীলকণ্ঠঃ, তন্নিন্দকাৎ। প্রমাদাদাপন্নস্যাপবিত্রস্ত ত্যাগং বিনা ন শুদ্ধিরিতি দৃষ্টান্তেনাহ—জগ্ধস্ত ভক্ষিতস্যান্নস্ত উদ্ধরণং বমনমেব পুংসঃ শুদ্ধিং প্রচক্ষতে॥ (১৯) যদুক্তং 'লুপ্তক্রিয়ায়াশুচয়ে' ইতি, তৎ প্রত্যাহ—নেতি। বেদবাদান্ বিধিনিষেধরূপান্; স্ব এব লোকে স্বাত্মন্যেব রমমাণস্ত মহতো মুনেঃ সম্যগ্বিরক্তস্ত মতির্নানুবর্ত্ততে, নিবৃত্তাধিকারিত্বাৎ। অধি-কারিভেদে দৃষ্টান্তঃ—যথা দেবানাং গতিরাকাশ এব, মনুষ্যাণাং পৃথিব্যামেব; অতঃ স্ব এব ধর্ম্মে প্রবৃত্তিলক্ষণে নিবৃত্তিলক্ষণে বা স্থিতঃ সন্ পরমন্যং ধর্ম্মং পুরুষং বা ন ক্ষিপেৎ, ন নিন্দেৎ; ব্যবস্থিতাধিকারত্বেন উভয়োঃ সত্যত্বাৎ; ন ক্ষিপেদেবেতি বান্বয়ঃ॥ (২০) এতদেবোপ-পাদয়ন্ত্যাহ—প্রবৃত্তমগ্নিহোত্রাদি, নিবৃত্তং শমদমাদি, ঋতং সত্যমেব, যতো বেদে স্বাশ্রিতং বিহিতম্। তচ্চ বিবিচ্য ব্যবস্থয়া আশ্রিতম্, ন ত্ববিশেষেণ। ব্যবস্থামেবাহ—উভয়ং রাগবৈরাগ্যলক্ষণং লিঙ্গং চিহ্নম্, অধিকারিবিশেষণং

যস্মিন্ তৎ। নন্ু 'যাবজ্জীবমগ্নিহোত্রং জুহোতি, শান্তো দান্তঃ' ইত্যাদি-শ্রুতিষু নৈবং ব্যবস্থা প্রতীয়তে? সত্যম্, তথাপি উভয়োরেকাধিকার-বিরোধাত্তথা পর্য্যবস্যতীত্যাহ—যুগপদ্ভাবো যৌগপদম্, যৌগপদেনৈকস্মিন্ কর্ত্তরি তৎ কর্ম্মদ্বয়ং বিরোধি। নন্ু তর্হি নিবৃত্তং কর্ম্ম শিবেনাপি কর্ত্তব্যমেব? নেত্যাহ—ব্রহ্মণি সদাশিবে কিঞ্চিদপি কর্ম্ম ন ঋচ্ছতি, ন প্রাপ্নোতি। অতো যথা প্রবৃত্তনিবৃত্তয়োঃ পরস্পরধর্ম্মাকরণে ন দোষঃ, তথেশ্বরে তদুভয়ধর্ম্মাকরণেঽপীতি ভাবঃ॥ (২১) 'চিতাভস্মকৃতস্নানঃ' তথা 'নগ্নঃ' ইত্যাদিনা যো ভোগাভাব উক্তঃ, তত্রাহ—হে পিতঃ! অস্মাভিরাস্থিতা আশ্রিতাঃ পদব্যোঽণিমাদিসমৃদ্ধয়ো বো যুষ্মাকং মা, ন সন্তীত্যর্থঃ; যতো বঃ পদব্যো যজ্ঞশালাস্বেব ভবন্তি, তাশ্চ তদন্নেন যজ্ঞগতেনান্নেন তৃপ্তৈঃ কেবলমীড়িতা ধূমবর্ত্মভিশ্চ ভুজ্যন্তে। যা অস্মৎপদব্যঃ, তাস্তু নৈবম্ভূতাঃ, কিন্তু অব্যক্তলিঙ্গাঃ, ন ব্যক্তং লিঙ্গং হেতুর্যাসাম্, ইচ্ছামাত্রপ্রভবত্বাৎ। অবধূতৈর্ব্রহ্মবিদ্ভিঃ সেবিতাঃ; অতোঽহমাঢ্যো রুদ্রো দরিদ্র ইতি গর্ব্বং মা কৃথা ইতি ভাবঃ॥ (২২—২৩) কিং বহুনোক্তেন, ইদন্তু দেহং ত্যক্ষ্যাম্যেবেত্যাহ দ্বাভ্যাম্। এতেন নালং ন পূর্য্যতে কিম্? অপি ত্বলমেব। কথম্ভূতেন? কুজন্মনা। তদেবাহ—হরে কৃতাপরাধস্য তব দেহাদুদ্ভূতেন উৎপন্নেন। নন্ু শ্লাঘ্যোঽয়ং দেহঃ কথং ত্যাজ্যঃ? তত্রাহ—কুজনস্য তব প্রসঙ্গতঃ সম্বন্ধান্মম লজ্জাভূৎ। অতো যো মহতামপ্রিয়কর্ত্তা, তস্মাদ্ যজ্জন্ম, তদ্ধিক্, তৎসম্বন্ধাদশ্লাঘ্যমিত্যর্থঃ॥ (২৩) কিঞ্চ, পরিহাসাদিষু বিনোদেনাপি দাক্ষায়ণীতি সম্বোধয়ন্ ত্বদীয়ং ত্বৎসম্বন্ধবাচকং গোত্রং নাম যদা বৃষধ্বজ আহ গৃহ্লাতি, তদাহং ব্যপেতনর্ম্মস্মিতং যথা ভবতি, এবং সুদুর্ম্মনা অতিদুঃখিতচিত্তা ভবামি। তত্তস্মাৎ হি নিশ্চিতম্, এতৎ কুণপপ্রায়ং ব্যুৎস্রক্ষ্যে ত্যক্ষ্যামি॥

২৪। দক্ষং প্রতি অনূশ্য অনুবাদং কৃত্বা। হে শত্রুহন্! ক্রোধাগ্ন্যরিঘাতিন্! উদীচীমুদীচ্যাং দিশি। উদীচীতি পাঠান্তরে উদঙ্মুখী; শান্তবাক্ গৃহীতমৌনা, জলং স্পৃষ্ট্বা আচম্য। দৃক্ দৃশম্ ॥

২৫। যোগমার্গমেবাহ—কৃত্বেতি। অনিলৌ প্রাণাপানৌ ঊর্দ্ধাধোবৃত্তিকরৌ নিরোধেন সমানৌ একরূপৌ নাভিচক্রে কৃত্বা, তত উদানমুত্থাপ্য ধিয়া সহ হৃদি স্থাপয়িত্বা কণ্ঠমার্গেণ ভ্রুবোর্মধ্যমনয়ৎ ॥

২৬। মহতাং পূজ্যতমেন শ্রীরুদ্রেণ ॥

২৭। চরণাম্বুজে আসবং ভজনানন্দম্, ভর্ত্তুরপরং ন দদর্শ। দেহশ্চ সদ্যঃ প্রজ্বলিতোঽভূৎ, সমাধিনা জাতোঽগ্নিস্তেন ॥

২৮। খে ভুবি চ হাহেত্যাদিবাদঃ। তমেবাহ—হন্তেতি বিষাদে। দৈবতমস্য পূজ্যতমস্য প্রিয়া, কেন দক্ষেণ প্রকোপিতা সতী ॥

২৯। মহদনাত্ম্যং দৌর্জ্জন্যম্। অস্য সর্ব্বত্র স্নেহ এব ন্যায্য ইত্যাহুঃ—যস্যেতি। যেন বিমতা অবজ্ঞাতা ॥

৩০। দুর্ম্মর্ষমত্যসহনং হৃদয়ং যস্য। লোকে জনমধ্যে। চ-শব্দান্নরকঞ্চ। যদ্যতঃ স্বীয়ামঙ্গজাং সুতামপরাধতঃ স্বাবজ্ঞাতো মৃতয়ে মরণায় উদ্যতাং ন নিবারিতবান্। পুরুষদ্বিট্ শিবদ্বেষী ॥

৩১। অদ্ভুতং দৃষ্ট্বা চ ॥

৩২। যজ্ঞঘ্নান্ হন্তীতি যজ্ঞঘ্নঘ্নঃ, তেনাপহতং রক্ষ ইত্যাদিনা ॥

৩৩। অধ্বর্য্যুণা ভৃগুণা, যে তপসা সোমং প্রাপ্তাঃ, তে ঋভবো নাম দেবা উত্থিতাঃ ॥

৩৪। ব্রহ্মতেজসা উশদ্ভির্দ্দেদীপ্যমানৈঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে

চতুর্থোঽধ্যায়ঃ ॥ ৪ ॥

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে তু সতীদেহত্যাগমাকর্ণ্য শঙ্করঃ।
বীরভদ্রং রুষোৎপাদ্য তেন দক্ষমঘাতয়ৎ ॥ (১)

১। প্রজাপতের্হেতোর্নিধনম্। কুতঃ? তেনাসৎকৃতায়াঃ। তস্যা-ধ্বরে যে ঋভবো দেবাস্তৈঃ ॥

২। স ধূর্জ্জটী রুদ্রঃ, ঘোরঃ সন্ জটামুৎকৃত্য উৎপাট্য, উত্থিতঃ সন্ তাং ভুবি বিসসর্জ্জ। সুদষ্ট ওষ্ঠপুটো যেন; তড়িতাং বহ্নীনাঞ্চ সটা জ্বালাঃ, তদ্বদুগ্রং রোচির্যস্যাস্তাম্ ॥

৩। ততো জটায়াঃ[১] সকাশাদতিকায়ো বীরভদ্রো জাত ইতি শেষঃ। তন্বা তন্বা দেহেন দিবং স্পৃশন্, অত্যুচ্চ ইত্যর্থঃ। ঘনরুক্ কৃষ্ণবর্ণঃ, ত্রয়ঃ সূর্য্যা ইব দৃশো যস্য, করালাস্তঙ্গা দংষ্ট্রা যস্য, জ্বলদগ্নিরিব মূর্দ্ধজা যস্য, কপালমালাযুক্তঃ, বিবিধান্যুদ্যতানি আয়ুধানি যস্য ॥

৪। হে রুদ্র! হে ভট! যুদ্ধকুশল! মদ্ভটানাং ত্বমগ্রণীঃ সন্, সযজ্ঞং দক্ষং জহি। ব্রহ্মতেজো দুর্জ্জয়মিতি মা মংস্থাঃ, যতস্ত্বং মে অংশকঃ ॥

৫। মন্যুনা শ্রীরুদ্রেণ, পরিচক্রমে প্রদক্ষিণীচকার, অসঙ্গমপ্রতি-ঘাতং যদ্রংহো বেগস্তেন। ভো তাত! মহীয়সাং বলীয়সামপি সহঃ সহিষ্ণুম্, বলং সোঢ়ুং ক্ষমং মেনে ॥

৬। জগদন্তকো মৃত্যুস্তস্যাপ্যন্তকং শূলম্। ঘোষয়ন্তি শব্দং কুর্ব্বন্তীতি ঘোষণানি নূপুরাদীনি ভূষণানি যয়োস্তাবঙ্ঘ্রী যস্য সঃ ॥

৭। ককুভি দিশি, তমো ন ভবতি, কিন্তু রজ ইতি জ্ঞাত্বাহুঃ—রজ এতৎ কুতোঽভূৎ? দধ্যুশ্চিন্তয়ামাসুঃ ॥

১। সটায়াঃ (গ)।

৮। হেত্বন্তরাসম্ভবেন ঔৎপাতিকত্বং কল্পয়ন্তি—বাতা ইতি। দস্যু-নামসত্ত্বে হেতুঃ—প্রাচীনবর্হিস্তদানীন্তনো রাজা জীবতীতি। ন কাল্যন্তে, ন শীঘ্রং নীয়ন্তে ॥

৯। প্রসূতির্দক্ষস্য পত্নী, সা মিশ্রা মুখ্যা যাসাম্; বিপাকঃ ফলম্; পশ্যন্তীনামিতি তস্যা দুঃখাধিক্যে হেতুঃ, অবদধ্যৌ অবজ্ঞাতবান্; অনাগা-মনাগসম্ ॥

১০—১১। ন চেদং সুতাবজ্ঞামাত্রম্, কিন্তু শ্রীরুদ্রাবজ্ঞানঞ্চ, অতো নাস্য ভদ্রং ভবিষ্যতীত্যাহুঃ—যস্ত্বিতি দ্বাভ্যাম্। ব্যুপ্তো বিকীর্ণো জটা-কলাপো যস্য, স্বশূলস্য সূচ্যামগ্রে অর্পিতাঃ প্রোতা দিগ্‌গজেন্দ্রা যেন, উদিতানি উন্নমিতানি অস্ত্রাণি যৈঃ, তে দোষো বাহব এব ধ্বজাস্তান্ বিতত্য হর্ষেণ নৃত্যতি। উচ্চঃ অট্টহাসঃ কঠোরহাসঃ, স এব স্তনয়িত্নু-গর্জ্জিতম্, তেন ভিন্না বিদীর্ণা দিশো যেন সঃ ॥ (১১) অমর্ষয়িত্বা অসহন-যুক্তং কৃত্বা। মন্যুপ্লুতং ক্রোধব্যাপ্তম্। উদস্ত উৎক্ষিপ্তো ভগণো নক্ষত্র-সমূহো যেন; পুনশ্চ তং কোপয়তো বিধাতুরপি কিং স্বস্তি স্যাৎ? ন স্যাদেব। কান্যস্য কথা? ॥

১২। উদ্বিগ্না প্রচলিতা দৃগ্ যস্য, তেন জনেন বহু যথা ভবত্যেব-মুচ্যমানে সতি উৎপাততমা মহোৎপাতা উত্থিতাঃ; পর্য্যক্ সর্ব্বতঃ। কথম্ভূতাঃ? মহাত্মনোঽপি দক্ষস্য ভয়াবহাঃ ॥

১৩। নানা আয়ুধানি যেষাম্; বামনকৈঃ হ্রস্বৈঃ, উদ্যতায়ুধৈঃ, পিঙ্গৈঃ কপিলৈঃ, পিশঙ্গৈঃ পীতৈঃ, মকরস্যেবোদরমাননঞ্চ যেষাং তৈঃ, পরি পরিতঃ, আ সর্ব্বতঃ, ধাবদ্ভিরবরুদ্ধঃ ॥

১৪। যজ্ঞশালায়াঃ পূর্ব্বপশ্চিমস্তম্ভয়োরুপর্য্যর্পিতং পূর্ব্বপশ্চিমায়তং কাষ্ঠং প্রাগ্বংশস্তম্। যজ্ঞশালায়াঃ পশ্চিমতঃ পত্নী-শালা, তাম্; যজ্ঞ-শালায়াঃ পুরতঃ স্থিতং সদোমণ্ডপম্ সদসঃ পুরতো হবির্দ্ধানম্, তস্য

উত্তরত অগ্নীধ্রশালাম্। তদ্বিহারং যজমানগৃহম্; মহানসং পাকভোজন-শালাম্॥

১৫। রুরুজুর্বভঞ্জুঃ, উত্তরবেদ্যা মেখলাঃ সীমাসূত্রাণি। 'আজ্ঞা গুরূণাং হ্যবিচারণীয়া' ইতি হেতোর্ন তে দোষভাগিন ইতি ভাবঃ॥

১৬। প্রত্যাসন্নান্ পলায়িতান্, সমীপস্থান্ পলায়িতানপি জগৃহুঃ॥

১৮। গ্রাবভির্ভিদ্যমানা নৈকধা অনেকধা দুদ্রুবুঃ॥

১৯। স্রুবো হস্তে যস্য; ভবো বীরভদ্রঃ, লুলুঞ্চে উৎপাটিতবান্॥

২০। উজ্জহার উদ্ধৃতবান্; যঃ সদঃস্থঃ সভায়াং স্থিতঃ সন্, শপন্তং শিবনিন্দাং কুর্ব্বন্তং দক্ষমক্ষ্ণা অক্ষিকোণেন অসূসুচৎ প্রেরিতবান্॥

২১। কলিঙ্গদেশরাজস্যানিরুদ্ধোদ্বাহে বলভদ্রো যথা দ্যূতে দন্তান্ পাতিতবান্। গরিমণি গুরুতরে রুদ্রে নিন্দ্যমানে, দতো দন্তান্ দর্শয়ন্ যো জহাস; পূষ্ণোরিতি পাঠে দ্বিবচনম্; 'ঐন্দ্রাপৌষ্ণশ্চরুর্ভবতি' ইত্যত্র তৎসহিতস্যাপি[১] পূষ্ণো দন্তপাতপ্রাপ্ত্যর্থং সূচিতবান্। তথা হি[২] 'পূষা পিষ্টভাগোঽদন্তকো হি, তং দেবা অস্তুবন্[৩]' ইতি বিহিতস্য পেষণস্য দ্বিদৈবত্যাভাবাৎ, তত্র তস্য দন্তাঃ সন্তীতি বক্তব্যং স্যাৎ। ন চৈতৎ সংগচ্ছতে, ইত্যাশঙ্ক্য তত্রাপি তস্য দন্তপাতোঽবস্থাভেদপ্রবৃত্তেন দ্বিবচনেন জ্ঞাপ্যতে। অতএব পূষ্ণোঽনুগ্রহং দ্বেধা বক্ষ্যতি—'পূষা তু যজমানস্য দদ্ভির্জক্ষতু পিষ্টভুক্' ইতি। কেবলশ্চেৎ পিষ্টভুগ্ ভবিষ্যতি, অন্যসহিতশ্চেৎ যজমানস্য দদ্ভির্ভক্ষয়িষ্যতীত্যর্থঃ॥

২২। ছিন্দন্নপীত্যত্র 'শিরঃ' ইত্যুপরি ব্যক্তীভবিষ্যতি; ত্র্যম্বকো বীরভদ্রঃ॥

২৩। অস্ত্রান্বিতৈর্মন্ত্রসহিতৈঃ, ন নির্ভিন্না ত্বক্ যস্য, তথাভূতং দৃষ্ট্বেতি শেষঃ॥

১। অন্যসহিতস্যাপি (ঘ); ২। তথাপি (খ); ৩। অব্রুবন্ (ঘ)।

২৪। স পশূনাং পতিঃ, মখে সংজ্ঞপনং যোগং কণ্ঠপীড়নাদিরূপং মারণোপায়ং দৃষ্ট্বা, তেনোপায়েনাহরৎ ॥

২৫। অন্যেষাং ব্রাহ্মণাদীনাং তদ্বিপর্য্যয়োঽসাধুবাদোঽভূদিতি শেষঃ ॥

২৬। গুহ্যকালয়ম্—কৈলাসম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে

পঞ্চমোঽধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠে তু দেবসঙ্ঘেন সহ গত্বা ভবং বিধিঃ।

সান্ত্বয়ামাস দক্ষাদি-জীবিতাদ্যর্থমাদরাৎ ॥ (১)

১—২। অথ দেবগণাঃ স্বয়ম্ভুবে ন্যবেদয়ন্নিতি দ্বিতীয়েনান্বয়ঃ॥ (২) শূলাদিভিঃ সঞ্ছিন্নানি ত্রুটিতানি, ভিন্নানি বিদীর্ণানি অঙ্গানি যেষাম্; সহ ঋত্বিগ্‌ভিঃ সভ্যৈশ্চ বর্ত্তমানাঃ ॥

৩। কস্য দক্ষস্য যজ্ঞে ব্রহ্মা বিষ্ণুশ্চ নেয়তুঃ, ন জগ্মতুঃ। যত্রারুদ্রকো যজ্ঞস্তত্র নারায়ণবিরিঞ্চাবপি নাগতৌ ॥

৪। বিভুর্ব্রহ্মা; তেজীয়স্যতিতেজস্বিনি পুরুষে কৃতাগসি সত্যপি স্বয়ং তত্র কৃতাগসাং বুভূষতামপরাধং কর্ত্তুমিচ্ছতাম্, সা তথা বুভূষা তেষাং ক্ষেমায় ন ভূয়াৎ, প্রায়েণেতি লোকোক্তিঃ, ন ভবেদেবেত্যর্থঃ; যদ্বা, কৃতমাগো যস্য তাদৃশে তেজীয়সি সতি, তত্র বুভূষতাং জিজীবিষূণাং সা জিজীবিষা ন ভূয়াৎ, জীবনাশাপি ন ভূয়াদিত্যর্থঃ ॥

৫। অথাপি প্রসাদয়ধ্বং ক্ষমাপয়ত; যে ভবন্তো বর্হিষো যজ্ঞস্য ভাগভাজং পরাহুঃ দূরাদেব খণ্ডিতবন্তঃ; প্রগৃহীতাঙ্ঘ্রিপদ্মং পাদৌ প্রগৃহ্যেত্যর্থঃ ॥

৬। অধ্বরস্য জীবিতং পুনঃ সন্ধানং প্রার্থয়মাণাঃ সন্তঃ; যস্মিন্ কুপিতে সতি, সপালো লোকো ন ভবেৎ, নশ্যেদিত্যর্থঃ॥

৭। বয়ং তত্র গন্তুং বিভীমঃ, ত্বমেব কঞ্চিদুপায়ং বিধৎস্বেতি চেৎ, অত আহ—নেতি। যজ্ঞস্তদানীন্তন ইন্দ্রঃ। যস্য তত্ত্বং, বলবীর্য্যয়োঃ প্রমাণমিয়ত্তাঞ্চ ন বিদুঃ। বীর্য্যং পরাক্রমঃ; পাপমিতি পাঠে অপরাধম্॥

৯-২২। কৈলাসং বর্ণয়তি—জন্মৌষধীত্যাদি-চতুর্দ্দশভিঃ। নরেতরৈর্দৈবৈর্জুষ্টম্॥ (১০) শৃঙ্গৈ রমণং রতিপ্রদমিত্যুত্তরেণান্বয়ঃ। কথম্ভূতৈঃ? নানাধাতুভির্বিচিত্রিতৈঃ; নানা দ্রুমলতা গুল্মাশ্চ যেষু॥ (১১) নানা অমলানি প্রস্রবণানি যেষু; নানা কন্দরাঃ সানবশ্চ যেষু। রমণৈঃ সহ ক্রীড়ন্তীনাম্॥ (১২) ময়ূরাণাং কেকাভিঃ স্বনৈর্নাদিতম্; মদান্ধৈরলিভির্বিমূর্চ্ছিতম্; মূর্চ্ছনা রাগগতিবিশেষঃ, তদ্ব্যাপ্তং কৃতম্। রক্তকণ্ঠানাং কোকিলানাং প্লাবিতৈঃ, প্লুতত্বং নীতৈঃ স্বরৈঃ; অন্যেষাং পতত্রিণাঞ্চ কূজিতৈঃ॥ (১৩) উদ্ধৈস্তৈরুন্নতশাখৈদ্রু‍র্মৈর্দ্বিজান্ পক্ষিণ আহ্বয়ন্তমিব; লোকা হি হস্তমুৎক্ষিপ্য উচ্চৈঃস্বরেণাহ্বানমর্থিনাং কুর্ব্বন্তি, অদ্রিশ্চোৎক্ষিপ্তহস্তাকারৈদ্রু‍র্মৈস্তত্রত্যপক্ষিস্বনৈশ্চ তথা লক্ষিত ইত্যর্থঃ; ব্রজদ্ভির্মাতঙ্গৈর্গর্জৈর্গর্জন্তমিব; নির্ঝরধ্বনিভির্গৃণন্তং ভাষমাণমিব॥ (১৫—১৮)-চূতাম্রয়োর্নীপকদম্বয়োরবান্তরজাতিবিশেষঃ; বেণুকীচকয়োশ্চ নীরন্ধ্র-সরন্ধ্রত্বেন ভেদঃ; স্বর্ণার্ণৈঃ স্বর্ণবর্ণৈঃ শতপত্রৈর্মণ্ডিতম্; রেণুকজাতিভিরিত্যত্র রেণুকা এলা, জাতির্মালতী, হিঙ্গুভির্গুগ্‌গুলবৃক্ষৈঃ, দ্রুমজাতিভিরিত্যত্র জাতিরবান্তরভেদসামান্যম্॥ (১৯) কুমুদাদিভেদসমৃদ্ধিভির্হেতুভির্নলিনীষু সরঃসু কলং মধুরং যথা ভবত্যেবং কুজন্তি যানি পক্ষিবৃন্দানি, তৈরুপশোভিতম্॥ (২০) মৃগাদিভির্নির্জ্জুষ্টং নিষেবিতম্, পূর্ব্বং মৃগগণাঃ শৃঙ্গবিশেষণত্বেনোক্তাঃ, ইদানীং স্বাতন্ত্র্যেণেত্যপৌনরুক্ত্যম্; নাভিঃ কস্তূরীমৃগঃ॥ (২১) কদলীষণ্ডৈঃ সংরুদ্ধান্যাবৃতানি নলিনীনাং

পুলিনানি, তৈঃ শ্রীঃ শোভা যস্মিন্॥ (২২) নন্দয়া গঙ্গয়া পর্য্যস্তং পরিবেষ্টিতম্ ; সত্যা ভবান্যাঃ স্নানেন পুণ্যতরমতিসুগন্ধমুদকং যস্যাস্তয়া ॥

২৩। তত্র গিরৌ বনঞ্চ দদৃশুঃ ; যত্র বনে তন্নাম সৌগন্ধিকং নাম পঙ্কজং ভবতি ; জাতাবেকবচনম্॥

২৪—২৭। পুরীং বর্ণয়তি—নন্দা চেতি চতুর্ভিঃ। সরিতৌ পুরঃ পুরাদ্বাহ্যতো ভবতঃ ; তীর্থপাদস্য হরেঃ পদাম্ভোজস্য রজসা॥ (২৫) যয়োর্বিগাহ্য প্রবিশ্য ক্রীড়ন্তি॥ (২৬) যয়োরন্তো বিগততৃষোঽপি গজাঃ পিবন্তি। তত্র হেতুঃ—তাসাং সুরস্ত্রীণাং স্নানেন বিভ্রষ্টং গলিতং যন্নবং কুঙ্কুমং, তেন পিঞ্জরং পীতবর্ণম্ ; গজীঃ করিণীঃ॥ (২৭) তারং রূপ্যম্ ; তারাদিময়বিমানানাং শতৈঃ সঙ্কুলাম্ ; তড়িদ্ভিঃ স্ত্রীণাম্, ঘনৈর্বিমানানাং খেন, পুর্য্যাঃ সাদৃশ্যম্ ॥

২৮—৩১। যক্ষেশ্বরপুরীং হিত্বাতিক্রম্য, তদ্বনঞ্চ দৃষ্ট্বা তে দেবা আরাদ্দূরাদ্বটং দদৃশুরিতি চতুর্থেনান্বয়ঃ। কথম্ভূতম্ বনম্? চিত্রাণি মাল্যানি, ফলানি, ছদাশ্চ পত্রাণি যেষু, তৈর্দ্রুমৈর্হৃদ্যং সুখকরম্॥ (২৯) রক্তকণ্ঠখগানামনীকস্য স্বরৈর্মণ্ডিতাঃ ষট্পদাঃ ষট্পদস্বরা যস্মিন্; কলহংসানাং কুলস্য প্রেষ্ঠানি খরদণ্ডানি পদ্মানি, তৈর্যুক্তা জলাশয়া যস্মিন্॥ (৩০) বনকুঞ্জরৈঃ সংঘৃষ্টা যে হরিচন্দনদ্রুমাঃ, তৎসম্বন্ধিনা বায়ুনা পুণ্য-জনস্ত্রীণাং মনঃ অধি অধিকমুন্মথয়ৎ॥ (৩১) যত্র চেৎপলমালিন্যো বাপ্যঃ, তৎ কিম্পুরুষৈঃ প্রাপ্তং বনং দৃষ্ট্বা প্রাপ্তা ইতি ; পাঠান্তরে কিম্পুরুষৈঃ প্রাপ্তা বাপীশ্চ দৃষ্টেত্যর্থঃ॥

৩২। যোজনশতমুৎসেধ উচ্ছ্রায়ো যস্য ; পাদোনৈঃ সর্ব্বতঃ পঞ্চ-সপ্ততিযোজনপ্রমাণৈর্বিটপৈঃ শাখাভিরায়তো বিস্তৃতঃ ; পর্য্যক্ সর্ব্বতঃ কৃতাচলা ছায়া যেন ; নির্গতং নীড়ং যস্মাৎ॥

৩৩। মুমুক্ষূণাং শরণে আশ্রয়ে ; ত্যক্তামর্ষো যোঽন্তকস্তত্তুল্যম্ ॥

৩৪—৩৮। তং বিশিনষ্টি—সনন্দনাদ্যৈরিতি পঞ্চভিঃ। সখ্যা চ কুবেরেণোপাস্যমানম্ ॥ (৩৫) বিদ্যা উপাসনা, তপশ্চিত্তৈকাগ্র্যং, যোগঃ সমাধিঃ, তেষাং পন্থানম্ ; প্রবর্ত্তনদ্বারা লোকস্য মঙ্গলং হিতং তপো-বাৎসল্যাৎ স্নেহাদাচরন্তম্ ॥ (৩৬) সন্ধ্যাভ্ররুচা রক্তবর্ণেনাঙ্গেন ভস্মাদি লিঙ্গং চন্দ্ররেখাঞ্চ বিভ্রতম্ ॥ (৩৭) ব্রতিনামাসনং বৃষী তস্যাম্, ব্রহ্ম প্রবোচন্তম্ ॥ (৩৮) সব্যং পাদপদ্মং দক্ষিণে উরৌ কৃত্বা বিন্যস্য, জানুনি চ সব্যে সব্যং বাহুং কৃত্বা দক্ষিণবাহুপ্রকোষ্ঠে মণিবন্ধস্থানে অক্ষমালাঞ্চ কৃত্বা, দক্ষিণহস্তকৃতয়া তর্কমুদ্রয়োপলক্ষিতমাসীনমিত্যর্থঃ। তদুক্তং যোগশাস্ত্রে—'একং পাদমথৈকস্মিন্ বিন্যসেদূরুসংস্থিতম্। ইতরস্মিন্ তথা বাহুং বীরাসনমিদং স্মৃতম্ ॥' তর্কমুদ্রা চোক্তা—'তর্জ্জন্যঙ্গুষ্ঠয়োরগ্রে মিথঃ সংযোজ্য চাঙ্গুলীঃ। প্রসার্য্য বন্ধনং প্রাহুস্তর্কমুদ্রেতি মান্ত্রিকাঃ॥' ইতি॥

৩৯। ব্রহ্মনির্ব্বাণং ব্রহ্মানন্দঃ, তত্র সমাধিরৈকাগ্র্যম্, তমাশ্রিতম্ ; যোগকক্ষাং যোগপট্টঞ্চ বামজানুদৃঢ়ীকরণায় বিশেষেণোপাশ্রিতবন্তম্ ; মননশীলা মনবঃ, তেষামাদ্যং মুখ্যম্ ॥

৪০। অর্হত্তমো বিষ্ণুর্বামনমূর্ত্তির্যথা কস্য কশ্যপস্য ॥

৪১। মহর্ষিভিঃ সহিতা যে নীললোহিতমনুবর্ত্তন্তে, তেঽপি তস্মৈ বন্দনং চক্রুঃ ; এবং সর্ব্বৈর্নমস্কৃতঃ প্রাহ—কৃতঃ প্রণামো দেবৈর্যস্মৈ তম্ ॥

৪২। যদ্যপি নীচবন্মাং ত্বং নমস্করোষি, তথাপি তবৈশ্বর্য্যমহং বেদ্মীত্যাহ—জানে ইতি ; ত্বাং বিশ্বস্য ঈশং জানে ; তত্র হেতুঃ—জগতো যোনির্যা শক্তিঃ প্রকৃতিঃ, বীজঞ্চ যঃ শিবঃ পুরুষঃ, তয়োঃ কারণম্ ; তথাপি নিরন্তরং নির্ভেদং যদ্ব্রহ্ম নির্ব্বিকারম্, তদেব ত্বমিতি জানে ॥

৪৩। নন্থ বিরুদ্ধমেতৎ, তত্রাহ—ত্বমেব সরূপয়োরবিভক্তয়োঃ শিব-শক্ত্যোঃ ক্রীড়ন্ বিশ্বসৃষ্ট্যাদি করোষি ঊর্ণনাভিরিব; স্বরূপয়োরিতি পাঠে স্বাংশয়োঃ, অতো ন বিরোধঃ ॥

৪৪। ধর্ম্মমর্থঞ্চ দোগ্ধি য ত্রয়ী, তস্যা অভিপত্তয়ে রক্ষণায়াধ্বরং সৃষ্টবানসি; যদ্বা, হে ধর্ম্মার্থদুঘ! ধর্ম্মাদ্যভিপত্তয়ে তৎপ্রাপ্তয়ে; দক্ষেণ সূত্রেণ নিমিত্তেন সেতবো বর্ণাশ্রমমর্য্যাদাশ্চাবসিতা নিবদ্ধা নির্ণীতা ইতি বা; শ্রদ্দধতে শ্রদ্ধয়ানুতিষ্ঠন্তি ॥

৪৫। সর্ব্বকর্ম্মফলদাতাপি ত্বমেবেত্যাহ—হে মঙ্গল! মঙ্গলানাং শুভানাং কর্ম্মণাং কর্ত্তুঃ স্বঃ স্বর্গম্, পরং মোক্ষং বা তনুষে। অমঙ্গলানা-মশুভানাং কর্ম্মণাং কর্ত্তুশ্চ তমিস্রং নরকং তনুষে। তত্র কেন হেতুনা? তদেব তস্মিন্নেব কর্ম্মণি কস্যচিদ্বিপর্য্যয়ো ভবতি?

৪৬। ত্বৎকোপোঽত্র হেতুরিত্যসম্ভাবিতমিতি কৈমুত্যন্যায়েনাহ—ন বৈ সতাং সতঃ রোষোঽভিভবেৎ, তব তাম্, দ্বিতীয়ার্থে ষষ্ঠ্যৌ; পশু-মন্তুং যথাভিভবতি, ন তদ্বৎ, বৈধর্ম্ম্যে দৃষ্টান্তঃ ॥

৪৭। অতো যে পৃথগ্ধিয়ো ভেদদৃশঃ, অতঃ কর্ম্মণ্যেব দৃষ্টির্যেষাম্, দুষ্ট আশয়ো যেষাম্; পরেষামুদয়েন সম্পাদাপিতা হৃদি রুগ্ যেষাম্; অরুন্তুদা মর্ম্মভেত্তারঃ; দৈবেনৈব বধো যেষাম্, তান্ ভবদ্বিধো নিরুপমঃ সাধুর্মাবধীৎ ন হন্যাৎ ॥

৪৮—৪৯। প্রত্যুত সাধূনাং বৃত্তমালোক্যানুগ্রহমেব কর্ত্তুমর্হসীত্যাহ দ্বাভ্যাম্। যস্মিন্ দেশে, যদা কালে, স্পৃষ্টধিয়ো মোহিতচিত্তাঃ পৃথগ্দৃশো ভবন্তি, তত্রাপরাধে সাধবো হ্যনুকম্পয়ানন্তরমেব পরদুঃখাসহিষ্ণুতয়া চিত্তপ্রকম্পনেন কৃপাং কুর্ব্বন্তি, ন তু ক্রমং পরাক্রমম্। কুতঃ? দৈববলাৎ কৃতেঽর্থে; ময়ৈব দৈবমেবম্ভূতম্, কোঽত্রাপরাধস্তেষামিতি মত্বা হননং ন কুর্ব্বত ইত্যর্থঃ॥ (৪৯) ভবাংস্তু অস্পৃষ্টমতিঃ, অতঃ সমস্তদৃক্

সর্ব্বজ্ঞঃ, তয়া মায়য়া হত আত্মা যেষাং তে তেষু, অতএব কর্ম্মানুগত-চিত্তেম্বিহাপরাধে অনুগ্রহং কর্ত্তুমর্হসি ॥

৫০—৫২। এবং সামান্যেনোক্ত্বা প্রস্তুতমাহ—কুর্ব্বিতি ত্রিভিঃ। ত্বয়া হতস্য অতএবাসমাপ্তস্য প্রজাপতেরধ্বরস্য; হে মনো! যত্রাধ্বরে কুযাজ্ঞিকা ভাগিনোঽপি তব ভাগং ন দদুঃ। ভাগার্হত্বমাহ—যেন ত্বয়া মখো নিনীয়তে ফলং প্রাপ্যতে ॥ (৫২) হে মন্যো! অনাতুর-মারোগ্যমস্তু ॥

৫৩। ভাগশ্চ তবাস্ত্বিত্যাহ—এষ ইতি। হে রুদ্র! যাবদিত্যর্থে যদিত্যব্যয়ম্। যজ্ঞে কৃতে যাবানুচ্ছিষ্টোঽবশিষ্টোঽর্থঃ, তাবানেব তে তব ভাগোঽস্তু। হে রুদ্র! তে ভাগেনাস্য যজ্ঞঃ কল্পতাং সম্পদ্যতাম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
ষষ্ঠোঽধ্যায়ঃ ॥ ৬ ॥

সপ্তমোঽধ্যায়ঃ

সপ্তমে বিষ্ণুরদ্ভুতঃ স্তুতো দক্ষভবাদিভিঃ।
যজ্ঞং প্রবর্ত্তয়ামাস দক্ষেণেতি নিরূপ্যতে ॥ (১)

১। অজেন যোঽনুনীতঃ প্রার্থিতো ভবস্তেনাভিহিতম্; হে মহা-বাহো! বিদুর! ॥

২। অঘমপরাধম্; স্বাপরাধং পরিহৃত্যানুগৃহ্লাতি ॥

৩। দগ্ধং শীর্ষং যস্য, তস্য প্রজাপতেরজস্য মুখং যস্মিন্, তথাভূতং শিরোঽস্তু। বর্হিষঃ সম্বন্ধিনং ভাগম্; মিত্রনাম্নো দেবস্য ॥

৪। প্রকর্ষেণ কৃতানি লগ্নানি সর্ব্বাণি ভগ্নান্যঙ্গানি যেষাম্, তে ভবন্তু। উচ্ছেষণম্—যজ্ঞাবশিষ্টম্ ॥

৫। যেষান্ত্বঙ্গানি নষ্টানি, তে ত্বশ্বিনোর্বাহুভ্যাং কৃতবাহবঃ, পূষ্ণো হস্তাভ্যাং কৃতহস্তাশ্চ ভবন্তু। অধ্বর্য্যবঃ, অন্যে চ ঋত্বিজঃ; বস্তস্য শ্মশ্রূণ্যেব শ্মশ্রূণি যস্য ॥

৬। মীঢ়ুষ্টমঃ শিবঃ, তেনোক্তম্, পরিতুষ্টৈশ্চিত্তৈঃ ॥

৭। মীঢ় াংসং শিবং 'ত্বয়াগত্য সর্ব্বং কার্য্যম্' ইত্যামন্ত্র্য সংপ্রার্থ্য, সুনাসীরা দেবাঃ, সহ মীঢ়ুষা বেধসা চ বর্ত্তমানাঃ সমীঢ়্বেধসঃ ॥

৮। কাৎস্ন্যেন বক্তৃহস্তবাহ্বাদিসাধারণ্যং বিধায় ॥

১০। পূর্ব্বং বৃষধ্বজদ্বেষেণ কলিলঃ কলুষীকৃত আত্মা যস্য সঃ; তদা শরৎকালীনো হ্রদ ইবামলোঽভবৎ ॥

১৩। যদপি যদ্যপি প্রলব্ধঃ পরাভূতো ময়া ভবান্, তথাপি ত্বয়া দণ্ডো ভৃতঃ শিক্ষা কৃতা, ন তূপেক্ষিতোঽস্মি। যুক্তমেবৈতদিত্যাহ—ব্রহ্মবন্ধুষু চ ব্রাহ্মণাভাসেষ্বপি তুভ্যং তব হরেশ্চেতি বাং যুবয়োরবজ্ঞোপেক্ষা নাস্তি ॥

১৪। তত্র হেতুমাহ—বিদ্যেতি; ব্রহ্মা ভূত্বা ত্বমস্রাগস্রাক্ষীঃ। কিমর্থম্? আত্মতত্ত্বমবিতুম্; যদ্বা, ব্রহ্ম বেদমাত্মতত্ত্বঞ্চাবিতুম্, সম্প্রদায়-প্রবর্ত্তনেন বিজ্ঞাপয়িতুমিত্যর্থঃ। তত্তস্মাৎ হে পরম! উৎকৃষ্ট! ॥

১৫। অত্র চ প্রত্যুপকারো নাস্তীত্যাহ—যোঽসাবিতি। অবিদিত-তত্ত্বদৃশাপ্রাপ্ততত্ত্বজ্ঞানেন তদ্বিগণয্য বিস্মৃত্য, অর্হত্তমস্য নিন্দয়ার্ব্বাগধঃ পতন্তং মামপাদ্ রক্ষিতবান্; স্বকৃতেনৈব পরানুগ্রহেণৈব তুষ্যেৎ; ন ময়া তৎ প্রতিকর্ত্তুং শক্যমিত্যর্থঃ ॥

১৬। অনুমন্ত্রিতোঽনুজ্ঞাতঃ, উপাধ্যায়সহিতৈঃ ঋত্বিগাদিভিরনু-বর্ত্তয়ামাস ॥

১৭। বীরাণাং প্রমথাদীনাং সংসর্গকৃতদোষস্য শুদ্ধয়ে নিবৃত্ত্যর্থম্ ॥

১৮। আত্তহবিষাধ্বর্য্যুণা সহ বিশুদ্ধয়া বুদ্ধ্যা দধ্যৌ। হে বিশাম্পতে ! হে বিদুর ! ॥

১৯। স্বয়া প্রভয়া তেষাং তেজো মুষ্ণন্ তিরস্কুর্ব্বন্নুপানীতঃ সমীপং প্রাপিতঃ ; স্তোত্রে বৃহদ্রথন্তরে বাজৌ পক্ষৌ, তদ্বতা 'বৃহদ্রথন্তরে পক্ষৌ' ইতি শ্রুতেঃ ॥

২০—২১। তমেবানুবর্ণয়তি—শ্যাম ইতি দ্বাভ্যাম্। হিরণ্যবদ্ রশনা যস্তেতি বস্ত্রং লক্ষ্যতে ; অর্কতুল্যেন কিরীটেন জুষ্টঃ ; নীলালকা এব ভ্রমরাঃ, তৈর্মণ্ডিতং কুণ্ডলযুক্তমাস্যং যস্য ; শঙ্খাদিভিরায়ুধৈর্ভৃত্যরক্ষণার্থং ব্যগ্রৈ-র্হিরণ্ময়ৈর্ভুজৈঃ পুষ্পিতকর্ণিকার ইব শোভমানঃ ; ভুজানাং হিরণ্ময়ত্বং কেয়ূরকঙ্কণমুদ্রিকাদ্যলঙ্কারৈঃ ॥ (২১) বক্ষসি আধিশ্রিতা বধূর্লক্ষ্মীর্যস্য সঃ ; উদারো হাসোঽবলোকশ্চ তয়োঃ কলয়া লেশেন ; পার্শ্বে উভয়তো ভ্রমন্তী ব্যজনচামরে, ত এব রাজহংসৌ যস্মিন্ সঃ ; রজ্যমানঃ শোভাতি-শয়ং নীয়মানঃ ॥

২২। ব্রহ্মেন্দ্রত্র্যক্ষা নায়কা মুখ্যা যেষাং তে ॥

২৩। হতরুচস্তিরস্কৃতপ্রভাঃ, সন্নজিহ্বা, গদ্গদবাচঃ, সসাধ্বসাঃ, তন্মহিম্না ক্ষুভিতচিত্তাঃ, উপতস্থুস্তুষ্টুবুঃ ॥

২৪। যস্য মহিমানং প্রতি তু অর্ব্বাগেব বৃত্তির্যেষাম্, তেঽপি যথামতি গৃণন্তি স্ম অস্তুবন্। কৃতঃ প্রকটীকৃতোঽনুগ্রহার্থং বিগ্রহো যেন তম্ ; যদ্বা, তেষামর্ব্বাগ্‌বৃত্তিত্বে হেতুঃ—তে তু যস্য মহি মহিমানঃ, বিভূতি-মাত্ররূপা ইত্যর্থঃ ॥

২৫। তত্র তাবদ্দক্ষস্তুতিপ্রকারমাহ—দক্ষ ইতি। গৃহীতমর্হণসাদনো-ত্তমং যেন তম্ ; উত্তমে পাত্রে আসনাদ্যর্হণেষু সমর্পিতেষু প্রীত্যা সার্হণং পাত্রং স্বয়মেব যেন গৃহীতমিত্যর্থঃ। যদ্বা, কথং প্রপেদে ? গৃহীতমর্হণ-

সাদনোত্তমং যথা ভবতি, তথা তদ্গৃহীত্বা প্রপেদ ইত্যর্থঃ; গৃহীত্বেতি পাঠস্তু সুগমঃ। গৃণন্ স্তবন্ প্রপেদে শরণং জগাম ॥

দক্ষঋত্বিক্সদস্যেশ-ভৃগুব্রহ্মেন্দ্রযোষিতঃ।
ঋষয়শ্চ তথা সিদ্ধা যজমানী চ লোকপাঃ ॥ (২)
যোগিব্রহ্মাগ্নিদেবাশ্চ স্তুবন্তি জগদীশ্বরম্।
তথা গন্ধর্ব্ববিদ্যাধ্রব্রাহ্মণাশ্চ পৃথঙ্মতৈঃ ॥ (৩)

২৬। ননু সাক্ষাৎ পরমেশ্বর এব রুদ্রঃ, তস্য তু ব্রহ্মপুত্রত্বেন জীবত্বমনুকরণমাত্রম্, 'হন্ত কিমিতি ত্বয়া ভেদদৃষ্ট্যাঽসাববজ্ঞাত ?' ইতি মাং ভগবানাক্ষেপ্স্যতীত্যাশঙ্ক্যাপ্রচ্যুতস্বরূপস্য জীবধর্ম্মনাট্যং তবৈব সংগচ্ছতে, নান্যস্যেত্যাহ—শুদ্ধমিতি। স্বধাম্নি স্বস্বরূপে তিষ্ঠন্ ভবান্ শুদ্ধং চিন্মাত্রং চৈতন্যঘনঃ; শুদ্ধত্বে হেতুঃ—উপরতা নিত্যনিবৃত্তা অখিলা বুদ্ধ্যবস্থা যস্মাৎ; অত একং ভেদশূন্যম্; অতএবাভয়ম্, 'দ্বিতীয়াদ্বৈ ভয়ং ভবতি' ইতি শ্রুতেঃ। জীবস্যাপি বস্তুত এবম্ভূতত্বাত্তদ্বৈলক্ষণ্যার্থমুক্তম্। মায়াং প্রতিষিধ্যাভিভূয় স্বতন্ত্র এব সন্, তয়া মায়য়া পুরুষত্বং মনুষ্যনাট্যমুপেত্য তস্যাং মায়ায়াং তিষ্ঠন্নপরিশুদ্ধ ইব রাগাদিমানিবাস্তে; রামকৃষ্ণাদ্যবতারেষু তথা প্রতীয়তে ভবানিত্যর্থঃ। অন্যে ত্ববিদ্যোপাধয়ো মায়াভিভূতাঃ সংসরন্তি, অতস্ত্বমেবেশ্বরঃ, ন রুদ্রাদয় ইতি ভাবঃ। অতএব ইমাং ভেদদৃষ্টিং ভগবান্ বারয়িষ্যতি—'অহং ব্রহ্মা চ শর্ব্বশ্চ জগতঃ কারণং পরম্' ইত্যাদিনা ॥

২৭। ঋত্বিজোঽপি স্বস্যাপরাধং পরিহরন্তঃ স্তুবন্তি—ভো অনঞ্জন! উপাধিমলশূন্য! যদ্যপি ত্বমেব রুদ্রাদিদেবতারূপঃ, তথাপি নন্দীশ্বরশাপাৎ কর্ম্মণ্যেব দুরাগ্রহধিয়ঃ সন্তস্তব তত্ত্বং ন বিদ্মঃ, কিন্তু ধর্ম্মস্যাপূর্ব্বস্যোপলক্ষণভূতং ত্রিবৃত্ত্রয়ীপ্রতিপাদ্যমধ্বরাখ্যং তব রূপমস্মাভির্জ্ঞাতম্। কীদৃশম্? যদর্থং যস্য সিদ্ধয়ে অধিদৈবং দেবতাধিকরণে[১] অদো ব্যবস্থাঃ অমূর্ব্যবস্থাঃ।

১। দেবতাধিকারেণ (ঘ)।

অত্র ইয়মেব দেবতা নান্যেত্যেবম্ভূতা নিয়মা ইত্যর্থঃ ; যদ্বা, ব্যবস্থা ইত্যাখ্যাতম্, অড়াগমাভাব আর্ষঃ, যদর্থমদঃ ইদমিন্দ্রাগ্ন্যধিদৈবরূপং বিশেষেণাস্থিতবানসীত্যর্থঃ ॥

২৮। সদস্যাস্তু নিরীশ্বরে দক্ষাধ্বরে ধনলোভেন স্বপ্রবৃত্তিমনুচিন্ত্যা-নুতপ্তা বিরক্তিমাশাসানাঃ স্তুবন্তি—হে শরণদ ! আশ্রয়প্রদ ! উৎপত্ত্য-ধ্বনি সংসারমার্গে বর্ত্তমানোঽজ্ঞানাং সার্থঃ সমূহস্তে পাদৌকস্ত্বৎপাদরূপং নিবাসং কদা যাস্যতি ? কথম্ভূতে সংসারমার্গে ? অশরণে বিশ্রামস্থান-শূন্যে ; উরুক্লেশা এব দুর্গমস্থানানি যস্মিন্ ; অন্তক এবোগ্রব্যালঃ, তেনান্বিষ্টে লক্ষ্যীকৃতে ; বিষয়রূপা মৃগতৃট্ মৃগতৃষ্ণিকা যস্মিন্। আত্মা অহঙ্কারাস্পদং শরীরং, মমত্বাস্পদং গেহঞ্চ, স এবোরুভারো যস্য সঃ। দ্বন্দ্বানি সুখদুঃখাদীন্যেব শ্বভ্রাণি গর্ত্তা যস্মিন্ ; খলা এব মৃগা ব্যাঘ্রাদয়ঃ, তেভ্যো ভয়ং যস্মিন্ ; শোক এব দাবাগ্নির্যস্মিন্। কামেনোপস্পৃষ্টঃ পীড়িতঃ ॥

২৯। শ্রীরুদ্রস্তু, পূর্ব্বং মম নিন্দা দুঃসহাসীৎ, ইদানীন্তু তাং ন গণয়া-মীত্যাহ—তবেতি। আশিষা কামেনাসক্তৈর্নিষ্কামৈঃ ; রচিতধিয়মভি-নিবেশিতচিত্তং মা মামবিদ্যো বিদ্যাহীনো লোকো যদি অপবিদ্ধং জপতি, আচারভ্রষ্টং জল্পতি, তজ্জল্পনমহং ন গণয়ে। তত্র হেতুঃ—তব যঃ পরোঽনুগ্রহঃ, ত্বৎপরাণাং বা যোঽনুগ্রহস্তেন ॥

৩০। ভৃগুস্তু, স্বভাবতস্তত্ত্বজ্ঞানহীনা জীবাঃ, অতোঽজ্ঞানকৃতং মম দুশ্চেষ্টিতং ক্ষমস্বেত্যাহ—যন্মায়য়েতি ; আত্মন্নাত্মনি শ্রিতমনুগতং তব তত্ত্বং ন বিদন্তি ; প্রণতানামাত্মা বন্ধুশ্চ ॥

৩১। ব্রহ্মাদয়ো ন বিদন্তীতি ভৃগুণোক্তে তদসহমানো ব্রহ্মা তত্ত্ব-জ্ঞানমাবিষ্কুর্ব্বন্নিবাহ—নৈতদিতি। পদার্থভেদগ্রাহকৈরিন্দ্রিয়ৈঃ, গুণস্য ইন্দ্রিয়স্য ; যদ্বা, জ্ঞানার্থয়োঃ কারণস্য সত্ত্বাদেঃ, অতএব অসতো মায়া-ময়াদ্ব্যতিরিক্তো ভবান্ ॥

৩২। ইন্দ্রস্তু, ইন্দ্রিয়বিষয়ঃ সর্ব্বোঽপি মিথ্যেতি ব্রহ্মণোক্তমসহমান আহ—ইদং তব বপুরপ্যুপপন্নমেব, ন তু প্রপঞ্চবদনির্ব্বচনীয়তয়ানুপপন্নম্ ; সুরাণাং বিদ্বিষঃ ক্ষপয়ন্তীতি, তথা তৈর্ভুজদণ্ডৈরুপলক্ষিতম্ ॥

৩৩। ঋত্বিজাং পত্ন্যঃ স্তুবন্তি—যজ্ঞোঽয়ং তব যজনায় ত্বাং যষ্টুং কেন ব্রহ্মণা পূর্ব্বং সৃষ্টঃ। হে যজ্ঞাত্মন্ ! তং নো যজ্ঞং নলিনকান্ত্যা দৃশা নেত্রেণ পুনীহি পবিত্রং কুরু। কথম্ভূতং যজ্ঞম্ ? শবাঃ শেরতে যস্মিন্নিতি শবশয়নং শ্মশানম্, তদ্বদাভা প্রতীতির্যস্য, স চাসৌ শান্তমেধশ্চোপরতোৎসবঃ ; মেধশব্দেন পশুহিংসাদ্যুৎসবো লক্ষ্যতে ; শবমুদকম্, তত্র শেতে ইতি তথা পদ্মম্, তন্নাভেতি সম্বোধনং বা ॥

৩৪। ঋষয়স্তু, কর্ম্মাণ্যনুতিষ্ঠন্তস্তৎপুণ্যেন তৎফলেন চ যুজ্যন্তে। ভগবতি তু তদভাবমালক্ষ্য বিস্মিতাঃ স্তুবন্তি। অনন্বিতমদঘটমানম্, যদ্-যস্মাদাত্মনা স্বয়ং কর্ম্মাচরসি অনুতিষ্ঠসি, ন ত্বজ্যসে লিপ্যসে ; যতশ্চান্যে বিভূতয়ে সম্পদে ঈশ্বরীং লক্ষ্মীমুপসেদুর্ভেজুঃ ; যদ্বা, যত ইতি 'সার্ব্ববিভক্তিকস্তসিঃ', যামিত্যর্থঃ। ভবাংস্তু স্বয়মেবানুবর্ত্তমানাং তাং ন মন্যতে, নাদ্রিয়তে ॥

৩৫। সিদ্ধাস্তু, ত্বৎকথামৃতমভিনন্দন্তঃ[১] স্তুবন্তি। অয়ং নোঽস্মাকং মনোগজস্ত্বৎকথৈব মৃষ্টং শুদ্ধং পীযূষং তন্ময়ী যা নদী, তস্যামবগাঢ়ঃ প্রবিষ্টঃ, দাবাগ্নিতুল্যং সংসারতাপং ন স্মরতি স্ম, ন চ ততো নির্গচ্ছতি। ব্রহ্মসম্পন্নবদ্ ব্রহ্মৈক্যং প্রাপ্ত ইব ॥

৩৬। যজমানী দক্ষপত্নী স্তৌতি—তে স্বাগতং ভদ্রমাগমনং জাতম্। হে অধীশ ! যথা শিরসা হীনঃ কবন্ধমাত্রঃ পুরুষোঽঙ্গৈঃ করচরণাদ্যবয়বৈঃ শোভনৈরপি ন শোভতে, তথা ত্বাং বিনা কেবলং প্রযাজাদ্যঙ্গৈর্মখো ন শোভতে ; অতো নঃ শ্রিয়া সহ ত্রায়স্ব ত্বদ্ভক্তান্ কুর্ব্বিত্যর্থঃ ॥

১। তৎকথাসুখমভিনন্দন্তঃ (ঘ)।

৩৭। লোকপালাস্ত্বীশ্বরাভিমানারূঢ়া ভগবতস্তত্ত্বমপশ্যন্ত উচুঃ। দৃষ্টঃ কিম্? ন দৃষ্ট ইত্যর্থঃ। কুতঃ? অসদ্‌গ্রহৈঃ, পুংস্ত্বমাবিষ্টলিঙ্গত্বাৎ, অসৎপ্রকাশকরূপাভিদৃ'গ্‌ভিরিন্দ্রিয়ৈঃ। অয়ং ভাবঃ—শুদ্ধচিত্তানাং ত্বং শুদ্ধসত্ত্বমূর্ত্তির্ভাসি, অস্মাকন্তু বহির্ম্মুখেন্দ্রিয়াণাং পঞ্চভূতোপলক্ষিতো জীববিশেষ ইবাবভাসি, অতস্ত্বমস্মদাদীনামিন্দ্রিয়গোচরো ন ভবসি, ধিগস্মজ্জীবিতমিতি ॥

৩৮—৩৯। যোগেশ্বরাস্ত্বভেদেন ভজতামনুগ্রহভাক্ত্বং মন্যমানাঃ, স্বামি-ভৃত্যভাবেন ভজতামপ্যনুগ্রহং প্রার্থয়মানাঃ স্তবন্তি—প্রেয়ানিতি দ্বাভ্যাম্। বিশ্বাত্মনি পরব্রহ্মণি ত্বয়ি য আত্মনঃ পৃথক্ত্বং নেক্ষেত, অমুতঃ অমুষ্মা-দন্যস্তে প্রেষ্ঠো নাস্তি; আত্মনো জীবান্ পৃথঙ্‌নেক্ষেতেতি বা। হে বৎসল! ভক্তপ্রিয়! অনন্যবৃত্ত্যাব্যভিচারিণ্যা ভক্ত্যা ভজতোঽনু-গৃহাণেত্যর্থঃ ॥ (৩৯) অব্যভিচারিণী ভক্তিঃ কথং স্যাৎ? ভজনীয়ানাং বহুত্বাদিত্যাশঙ্ক্যাহুঃ—জগতামুদ্ভবাদিষু নিমিত্তেষু দৈবতো জীবাদৃষ্টাদ্‌-বহুধা ভিদ্যমানা গুণা যস্যাস্তয়া স্বমায়য়াত্মনি স্বস্বরূপে রচিতা ব্রহ্মাদি-ভেদমতির্যেন তস্মৈ; স্বসংস্থয়া কেবলস্বরূপাবস্থানেন চ বিনিবর্ত্তিতো ভেদভ্রমো গুণাশ্চ তদ্ধেতব আত্মনি যেন, তস্মৈ ॥

৪০। শব্দব্রহ্ম স্তৌতি—নমস্ত ইতি। শ্রিতং স্বীকৃতং সত্ত্বং যেন, অতো ধর্ম্মাদিফলপ্রসবিত্রে। ননু সত্ত্বগুণত্বং নির্গুণত্বঞ্চৈকস্য কথ-মিত্যাশঙ্ক্যাহ—যস্য কাষ্ঠাং তত্ত্বং নাহং বেদ্মি, অপরে রুদ্রাদয়শ্চ ন বিদুঃ, তস্মৈ ॥

৪১। অগ্নিস্তু যজ্ঞমূর্ত্তিং প্রণমতি—যস্য তেজসা সুষ্ঠু সমিদ্ধং প্রদীপ্তং তেজো যস্য, সোঽহং প্রশস্তাধ্বরে হবির্বহামি; তং যজ্ঞিয়ং যজ্ঞায় হিতং পালকম্, যজ্ঞং যজ্ঞমূর্ত্তিম্। পঞ্চবিধত্বমৈতরেয়কে উক্তম্—'স এব যজ্ঞঃ পঞ্চবিধোঽগ্নিহোত্রং দশপৌর্ণমাসৌ চাতুর্ম্মাস্যানি পশুঃ সোমঃ' ইতি ॥

পঞ্চভির্যজুর্ভির্যজ্ঞমন্ত্রৈঃ স্বিষ্টং সুপূজিতম্ ; তথা চ শ্রুতিঃ—'আশ্রাবয়েতি চতুরক্ষরম্, অস্তু শ্রৌষড়িতি চতুরক্ষরম্, যজে ইতি দ্ব্যক্ষরম্, যে যজামহ ইতি পঞ্চাক্ষরম্, দ্ব্যক্ষরো বষট্কারঃ' ইতি। স্মৃতিশ্চ—'চতুর্ভিশ্চ চতুর্ভিশ্চ দ্বাভ্যাং পঞ্চভিরেব চ। হূয়তে চ পুনর্দ্বাভ্যাং স মে বিষ্ণুঃ প্রসীদতু॥' ইতি॥

৪২। দেবাস্তু, সত্যং বয়মপি দেবাঃ, তথাপি জগদাদ্যন্তয়োস্ত্বমেব, নান্যঃ কশ্চিদিত্যাহুঃ—পুরেতি। কল্পাপায়ে প্রলয়ে বিকৃতং কার্য্যজাতমুদরীকৃত্য সংহৃত্য ত্বমেবাদ্যঃ পুমানুরগেন্দ্র এবাধিকং শয়নং শয্যা তস্মিন্ শেষে, শয়নং করোষি। সিদ্ধৈর্জনলোকাদিবাসিভির্বিমৃশিতা বিচিন্তিতা অধ্যাত্মপদবী জ্ঞানমার্গো যস্য, স এব ত্বম্, য ইদানীমক্ষ্ণোঃ পথি চরসি, প্রত্যক্ষোঽসি ; অবসি রক্ষসি॥

৪৩। গন্ধর্ব্বাপ্সরসস্তু, বয়ং ভিয়া কেবলং সর্ব্বানপি পরমেশ্বরত্বেনোপশ্লোকয়ামঃ, ত্বমেব তু পরমেশ্বরোঽন্যে তু ত্বদংশা এবেত্যাহুঃ—অংশাংশা ইতি। হে বিভূমন্! মহত্তম! ক্রীড়াভাণ্ডং ক্রীড়োপকরণং বিশ্বং ব্রহ্মাণ্ডং যস্য, তস্মৈ তে নমনং কুর্ম্মঃ॥

৪৪। বিদ্যাধরাস্তু, কেবলং বিদ্যাভিঃ সম্পদঃ প্রাপ্যন্তে, অহঙ্কারাদিব্যামোহনিবৃত্তিস্তু ত্বৎকথাশ্রবণং বিনা নাস্তীত্যাহুঃ—অর্থং পুরুষার্থসাধনং কলেবরমভিপদ্য প্রাপ্য তন্মায়য়াস্মিন্ মমেত্যহমিতি চাভিমানং কৃত্বেমমাত্মমোহং যুষ্মৎকথামৃতনিষেবক উদুচ্চৈর্ব্যদস্যেৎ পরিত্যজেৎ, নান্যঃ। ননু স্বৈঃ পুত্রাদিভিরধিক্ষিপ্তো দুঃখিতঃ সন্ পরিত্যজেদেব। নেত্যাহুঃ—ক্ষিপ্তোঽপি দুর্ম্মতিঃ, অসৎসু বিষয়েষ্বেব লালসা তৃষ্ণা যস্য সঃ॥

৪৫—৪৭। ব্রাহ্মণাঃ স্তুবন্তি—ত্বমিতি ত্রিভিঃ ; সদস্যাশ্চ ঋত্বিজশ্চ॥ (৪৬) গাং পৃথ্বীং রসায়া রসাতলাদ্দংষ্ট্রয়া ব্যুজ্জহর্থ বিশেষেণোদ্ধৃতবানসি, যোগিভিঃ স্তূয়মানঃ। হে ত্রয়ীগাত্র! বেদমূর্ত্তে! যজ্ঞো যাগঃ সযূপঃ, তদ্বিশেষঃ ক্রতুস্তদ্রূপী, যজ্ঞসঙ্কল্পরূপ ইতি বা, যজ্ঞঃ ক্রতুঃ কর্ম্ম যস্যেতি বা॥

(৪৭) স ত্বমস্মাকং ত্বদ্দর্শনমাকাঙ্ক্ষতাং প্রসীদাস্মদ্‌যজ্ঞমপ্যুদ্ধরেত্যর্থঃ। ন চাশক্যং তবৈতৎ, যতস্তব নাম্নি কীর্ত্ত্যমান এব যজ্ঞবিঘ্নাঃ ক্ষয়ং যান্তি, এবং প্রভাবো যস্য, তস্মৈ নমঃ ॥

৪৮। ইত্যনেন প্রকারেণ সর্ব্বৈঃ কীর্ত্ত্যমানে, হে ভদ্র ! বিদুর ! সংনিষ্ঠে প্রবর্ত্তয়ামাস ॥

৪৯। সর্ব্বাত্মতয়া সর্ব্বভাগভোক্তাপি ভগবান্ নিজানন্দতৃপ্তোঽপি স্বেন ভাগেন ত্রিকপালপুরোডাশেন প্রীয়মাণ ইব দক্ষমাভাষ্য সম্বোধ্য বভাষে ॥

৫০। যোঽহং জগতঃ কারণমাত্মা চেশ্বরশ্চ, উপদ্রষ্টা সাক্ষী চ, স্বয়ং প্রকাশশ্চ, নিরুপাধিশ্চ, স এব ব্রহ্মা চ শর্ব্বশ্চেত্যন্বয়ঃ ॥

৫১। কুত ইত্যত আহ—অহমেবাত্মমায়ামধিষ্ঠায় জগৎসৃষ্ট্যাদি কুর্ব্বন্ স চ, স চ, স চ সন্, সর্ব্বশক্তিক্রিয়োচিতাং সংজ্ঞাং ধারয়ামি ॥

৫২। তস্মিন্ কেবলে অদ্বিতীয়ে সমানাসমানজাতীয়ভেদরহিতে ব্রহ্মণি ময়ি ব্রহ্মরুদ্রৌ ভূতানি চ ভেদেনাজ্ঞঃ পশ্যতীত্যর্থঃ ॥

৫৩। বিদ্বাংস্তু ভেদং ন পশ্যতীতি সদৃষ্টান্তমাহ—যথেতি ॥

৫৪। তস্মাদেবমৈক্যং পশ্যন্ কৃতার্থো ভবতীত্যাহ—ত্রয়াণামেকো ভাবঃ স্বরূপং যেষাম্ ॥

৫৫। স্বেন ক্রতুনা ত্রিকপালেষ্ট্যা ; উভয়তোঽঙ্গৈঃ প্রধানেন চ ॥

৫৬ স্বেন ভাগেন যজ্ঞাবশিষ্টেন ; উদবস্যতে সমাপ্যতেঽনেনেত্যুদ-বসানম্, তেন কর্ম্মণা সোমপানিতরানপ্যুপাধাবদিত্যনুষঙ্গঃ ; ততশ্চ উদবস্য কর্ম্ম সমাপ্যাবভৃথরূপং যথা ভবতি, তথা স্নাতবান্ ॥

৫৭। স্বেনৈবানুভাবেনাবাপ্তরাধসে প্রাপ্তসিদ্ধয়ে, তস্মা অপি ॥

৫৯। আবৃঙ্‌ক্তে ভজতে স্ম ; অনন্যভাবানামেকৈব গতির্যস্তম্ ; প্রলয়কালে সুপ্তা শক্তিরীশ্বরমিব ॥

৬০। বৃহস্পতেঃ শিষ্যান্মে ময়া শ্রুতম্ ॥

৬১। পরং পবিত্রং য আকর্ণ্য তথানুকীর্ত্তয়েৎ, স আত্মনঃ পরস্থাপ্যঘং সংসারব্যসনং সর্ব্বদা ধুনোতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
সপ্তমোঽধ্যায়ঃ ॥ ৭ ॥

অষ্টমোঽধ্যায়ঃ

দক্ষকন্যান্বয়ে প্রাপ্তা দক্ষযজ্ঞকথোদিতা ।
মনুপুত্রান্বয়ে প্রাপ্তা ধ্রুবচর্য্যাথ পঞ্চভিঃ ॥ (১)

অষ্টমে গুরুদারোক্তি-রোষমৎসরতঃ পুরাৎ ।
নির্গতেন ধ্রুবেনাহ তপসা তোষণং হরেঃ ॥ (২)

১। এবং তাবন্মনুকন্যান্বয়োক্ত্যৈব মরীচ্যাদীনাং ব্রহ্মপুত্রাণাং বংশা বর্ণিতাঃ, অত্রাবশিষ্টং কিঞ্চিদাহ—সনকাদ্যা ইতি। নাবসন্নাশ্রিতাঃ; ঊর্দ্ধরেতসো নৈষ্ঠিকাঃ, অতস্তেষাং বংশো নাস্তি ॥

২—৫। অধর্ম্মোঽপি ব্রহ্মপুত্রঃ, তস্য বংশমাহ—মৃষেতি চতুর্ভিঃ। দম্ভঃ পরপ্রতারণম্, মায়া তদুচিতা চেষ্টা, তয়োঃ সোদরয়োরপি দাম্পত্য-মধর্ম্মাংশতয়া; এবমুপর্য্যপ্যপ্রজাঃ অপুত্রাঃ নিঋর্তিঃ; তন্মিথুনম্ ॥ (৩) নিকৃতিঃ শঠতা; যদ্‌যাভ্যাং কলিঃ, তস্য স্বসা দুরুক্তিশ্চেত্যর্থঃ ॥ (৪) যাতনা তীব্রবেদনা ॥ (৫) প্রতিসর্গোঽনুসর্গ এব; যদ্বা, প্রতিসর্গঃ প্রলয়ঃ, অধর্ম্মস্য প্রলয়হেতুত্বাৎ প্রতিসর্গত্বম্। এতৎ এতদন্ত-মধর্ম্মবংশম্; পুণ্যমিতি বর্জ্জনদ্বারা পুণ্যহেতুত্বাৎ ॥

৬। মনোঃ পুত্রবংশম্ ; হরেরংশো ব্রহ্মা, তস্যাংশাৎ দেহার্দ্ধাৎ জন্ম যস্য ॥

৭। জগতো রক্ষায়াং স্থিতৌ ॥

৮। সুনীতিঃ সুরুচিশ্চ জায়ে ; তয়োর্মধ্যে ইতরা সুনীতিঃ ॥

৯। তয়োঃ প্রিয়াপ্রিয়ত্বে প্রপঞ্চয়ন্ ধ্রুবচরিতমাহ পঞ্চভিরধ্যায়ৈঃ। সুরুচেঃ পুত্রমুত্তমসংজ্ঞং লালয়ন্ ॥

১০। তথা অঙ্কারোহণং চিকীর্ষমাণম্ ॥

১১—১৩। গর্ব্বোক্তিমেবাহ—নেতি ত্রিভিঃ। নৃপতের্ধিষ্ণ্যমাসনং নৃপাত্মজোঽপি ভবান্ নারোঢ়ুমর্হতি ॥ (১৩) পুরুষমীশ্বরম্ ॥

১৪। মিষন্তং পশ্যন্তম্ ; সন্নবাচং কুণ্ঠিতবাচম্, স্ত্রীভয়াৎ ॥

১৫। উত্থাপ্য ; অন্তঃপুরজনমুখাৎ শ্রুত্বা ॥

১৬। শোক এব দাবাগ্নিস্তেন, দাবাগ্নিগতা লতেব স্থিতা সা বালা বিললাপ বিলাপং চকার ॥

১৭। বৃজিনস্য দুঃখস্য ; অমঙ্গলমপরাধং পরেষু মা মংস্থাঃ, যদ্-যতঃ পরেভ্যো যো দুঃখং দদাতি, স স্বদত্তমেব দুঃখং ভুঙ্ক্তে ॥

১৮। দুর্ভগয়া ময়োদরে গৃহীতঃ, তস্যা এব স্তন্যেন বৃদ্ধশ্চ ; দুর্ভগত্ব-মেবাহ—যাং মামিড়স্পতির্ভূপতির্ভার্য্যেতি বোঢ়ুং স্বীকর্ত্তুং বিলজ্জতে, বাশব্দাদ্দাসীত্যপি ॥

১৯। পিতৃভার্য্যাত্বেন মাত্রা সমা মাতুঃ সপত্নী, তয়াপি যদুক্তং 'তপসারাধ্য পুরুষম্' ইত্যাদি, তদাতিষ্ঠ কুরু, অধ্যাসনং যদীচ্ছসি ॥

২০। পরিচর্য্য নিষেব্য, বিশ্বস্য বিভাবনায় পালনায় আত্তা স্বীকৃতা গুণাভিপত্তিঃ সত্ত্বগুণাধিষ্ঠানং যেন, তস্য ; জিত আত্মা মনঃ শ্বসনঃ প্রাণশ্চ যৈস্তৈরভিবন্দ্যম্ ॥

২১। একমত্যা—সর্ব্বান্তর্যামিদৃষ্ট্যা ॥

২২। মৃগ্যা পদাব্জয়োঃ পদ্ধতির্মার্গো যস্য, তমেবাশ্রয় শরণং ব্রজ; ততো ভজস্ব; নান্যস্মিন্ ভাবো যস্য তস্মিন্; নিজধর্ম্মৈর্ভাবিতে শোধিতে ॥

২৩। তমেবেত্যনেন স্থচিতং সর্ব্বোত্তমত্বং প্রপঞ্চয়তি—নান্যমিতি। হস্তেন গৃহীতং দীপবৎ পদ্মং যয়া; ইতরৈর্ব্রহ্মাদিভিঃ ॥

২৪। সংজল্পিতং বিলাপম্, ততোঽর্থস্যাগমো যস্মাৎ, তথাভূতং বচশ্চাকর্ণ্য ॥

২৬। 'বিস্মিতঃ' ইত্যুক্তম্, তদেবাহ—অহো তেজঃ প্রভাবঃ ॥

২৮। বিকল্পে মানাপমানবিবেকে সত্যপি ভিন্না ন সন্তি, কিন্তু মোহকল্পিতা এব ত ইত্যর্থঃ। কুতঃ? যৎ সুখং দুঃখং বা তন্নিজকর্ম্মভিরেব ভবতি যতঃ ॥

২৯—৩৪। উপশমোপদেশেন নিবর্ত্তয়তি—পরিতুষ্যেদিতি ষড়্‌ভিঃ। ঈশ্বরগতিং বীক্ষ্য, ঈশ্বরানুকুল্যং বিনা নোদ্যমাঃ ফলহেতব ইতি জ্ঞাত্বা পরিতুষ্যেৎ, সন্তোষমেব কুর্য্যাৎ ॥ (৩০—৩১) দুষ্করশ্চ তবায়মুদ্যম ইত্যাহ—অথেতি দ্বাভ্যাম্; যস্য প্রসাদমবরোদ্ধুং প্রাপ্তুমিচ্ছসি; নিঃসঙ্গেন তীব্রযোগযুক্তেন সমাধিনা মৃগয়ন্তোঽপি যস্য পদবীং মার্গং ন বিদুঃ, স দেবো দুরারাধ্য ইতি পূর্ব্বেণৈবান্বয়ঃ ॥ (৩২) শ্রেয়সাং কালে বৃদ্ধত্বে ॥ (৩৩) সুখদুঃখয়োর্মধ্যে সুখে সতি পুণ্যং ক্ষীয়তে, দুঃখে সতি পাপং ক্ষীয়ত ইত্যাত্মানং তোষয়ন্, তমসঃ পারং মোক্ষং প্রাপ্নোতি ॥

৩৪। কিঞ্চ, গুণৈরধিকাৎ পুংস ইতি ল্যব্লোপে পঞ্চমী। তং দৃষ্ট্বা প্রীতিং কুর্য্যাৎ, ন ত্বসূয়ামিত্যর্থঃ। অনুক্রোশং কৃপাং লিপ্সেৎ, ন তু তিরস্কারম্; সমানাৎ মৈত্রীম্, ন তু স্পর্দ্ধাম্॥

৩৬। ক্ষাত্রং স্বভাবং প্রাপ্তবতঃ, অতএবাবিনীতস্য দুর্ব্বাক্যবাণৈর্ভিন্নে হৃদি ন শ্রয়তে, ন তিষ্ঠতি ॥

৩৭। অন্যৈরনধিষ্ঠিতং ত্রিভুবনে উৎকৃষ্টং পদং জেতুমিচ্ছোর্মে, সাধুবর্ত্ম মার্গং ব্রূহি ॥

৩৮। অঙ্কজ ইতি পাঠে উৎসঙ্গাজ্জাতো যো নারদঃ, স ভবান্। তত্র লিঙ্গম্—বীণাং বিনুদন্ বাদয়ন্ হিতায়াটতি ॥

৪০। নিঃশ্রেয়সস্য অভিপ্রেতার্থস্য পন্থাঃ। কোঽসাসিত্যত আহ—ভগবান্ বাসুদেব এব, অতস্তং ভজ ॥

৪২। মধুবনাখ্যং যমুনায়াস্তটং গচ্ছ। যত্র মধুবনে ॥

৪৩। অধ্যয়নাদ্যভাবেঽপি আত্মন উচিতানি যোগ্যানি দেবতানমস্কারাদীনি কৃত্বেতি যমনিয়মা উক্তাঃ। আসনকল্পনঞ্চ কুশাদিভিঃ স্বস্তিকাদিভিশ্চ ॥

৪৪—৪৯। প্রাণেন্দ্রিয়মনসাং মলং চাঞ্চল্যং ব্যুদস্যেতি, প্রাণায়ামপ্রত্যাহারৌ। ধারণামাহ—অভিধ্যায়েদিত্যাদিষড়্ভিঃ। গুরুণা ধীরেণ মনসা; গুরুং শ্রীহরিম্ ॥ (৪৫) সুরেষু সুন্দরম্ ॥ (৪৬) রমণীয়ান্যঙ্গানি যস্য। ওষ্ঠশ্চ ঈক্ষণা ঈক্ষণঞ্চ ওষ্ঠেক্ষণে, অরুণে ওষ্ঠেক্ষণে ধারয়তীতি তথা তম্, অরুণমোষ্ঠমীক্ষম্ণঞ্চাধারয়তীতি বা। নৃম্ণং সুখকরম্; যদ্বা, নৃম্ণং ধনম্, সর্ব্বপুরুষার্থনিধিমিত্যর্থঃ ॥ (৪৭) পুরুষং পুরুষলক্ষণযুক্তম্ ॥ (৪৮) কৌস্তুভস্যাভরণং গ্রীবা যস্য ॥ (৪৯) কাঞ্চীকলাপেন পর্য্যস্তং পরিবেষ্টিতম্; মনোনয়নয়োর্বর্দ্ধনং হর্ষকরম্ ॥

৫০। হৃৎপদ্মকর্ণিকায়া ধিষ্ণ্যং মধ্যস্থানম্, তদাক্রম্য সমর্চ্চতামাত্মনি মনসি স্থিতম্ ॥

৫১। ধ্যানমাহ—স্ময়মানমিতি। নিয়তেন প্রাগুক্তয়া ধারণয়া সুস্থিরেণ, অতএব একভূতেন একাগ্রেণ। ধারণোক্তানি বিশেষণানি ধ্যানেঽপি দ্রষ্টব্যানি; যদ্বা, যথোক্তমাত্রমেব। তদুক্তমেকাদশস্কন্ধে—'নান্যানি চিন্তয়েদ্ভূয়ঃ সুস্মিতং ভাবয়েন্মুখম্' ইতি ॥

৫২। সমাধিমাহ—এবমিতি। তূর্ণং শীঘ্রং সম্পন্নং সৎ॥

৫৩। জপো মন্ত্রঃ॥

৫৫। দ্রব্যাণ্যেবাহ—সলিলৈরিতি। শস্তৈর্দূর্ব্বাঙ্কুরৈঃ, বন্যৈরেবাংশুকৈ-ভূর্জ্জত্বগাদিভিঃ॥

৫৬—৫৮। পূজায়া অধিষ্ঠানমাহ—লব্ধ্বা সম্পাদ্য, দ্রব্যময়ীং শিলা-দিভির্নির্ম্মিতাম, অর্চ্চাং প্রতিমাম্। পূজাসাদ্গুণ্যহেতূনাহ সার্দ্ধাভ্যাম্—আভৃতাত্মা ধৃতচিত্তঃ। মিতং বন্যং ভুঙ্ক্তে ইতি তথা॥ (৫৭) যৎ করিষ্যতীতি, তদানীমবতারপ্রাচুর্য্যাভাবাৎ॥ (৫৮) পূর্ব্বসেবিতাঃ সেবনং কারিতাঃ, কার্য্যত্বেন বিহিতা ইত্যর্থঃ। মন্ত্রহৃদয়েন দ্বাদশাক্ষরেণ॥

৫৯—৬০। এবমুক্তরীত্যা মনোগতং যথা ভবতি, তথা কায়াদিভি-র্ভক্তিমত্যা পরিচর্যায়া পরিচর্য্যমাণঃ ধর্ম্মার্থকামেষু যদভিমতম্, তৎ শ্রেয়ো দিশতীতি দ্বয়োরন্বয়ঃ॥

৬১। বিরক্তঃ সন্ ভজেৎ। কিমর্থম্? বিমুক্তয়ে॥

৬২। হরেশ্চরণাভ্যাং চর্চ্চিতং মণ্ডিতম্॥

৬৩। অর্হিতং সৎকৃত্য সমর্পিতমর্হণমর্ঘ্যাদিস্তদ্‌যস্মৈ॥

৬৪। কিং বা ন রিষ্যতে, ন নশ্যতীতি সবিতর্কঃ প্রশ্নঃ॥

৬৫। মাত্রা সহ নির্ব্বাসিত ইতি তস্যা অপ্যনাদৃতত্বাৎ॥

৬৬। মাস্ম অদন্তি, কিং স্বিৎ ন খাদন্তীত্যর্থঃ॥

৬৮। দেবেন শ্রীহরিণা গুপ্তমাত্মসাৎ কৃত্বা রক্ষিতম্। যস্য যশো জগৎ প্রাবৃঙ্‌ক্তে ব্যাপ্নোতি॥

৬৯। বিপুলয়ন্—বিস্তারয়ন্॥

৭১। ধ্রুবো মধুবনে কিমকরোদিত্যপেক্ষায়ামাহ—তত্রেত্যাদিনা। অভিষিক্তঃ স্নাতঃ। যস্যাং প্রাপ্তস্তাম্॥

৭২। কপিত্থানি বদরাণি চ অশনং যস্য, আত্মবৃত্তির্দেহস্থিতিঃ, তদনুসারেণ ॥

৭৪। তৃতীয়ঞ্চ আনয়ন্ ঈষদিব নয়ন্, উপাধাবদিত্যন্বয়ঃ ॥

৭৫—৭৬। প্রতিমাসমাহারসঙ্কোচং তপোঽতিরেকঞ্চ কৃতবানিত্যর্থঃ ॥

৭৭। ভূতানি শব্দাদীনি, ইন্দ্রিয়াণি চ আশেরতে যস্মিন্ তন্মন আকৃষ্য ব্রহ্ম ধ্যায়ন্ ॥

৭৮। ধারয়মাণস্য সতস্তস্য তেজঃ সোঢ়ুমশকুবন্তঃ কম্পিতাঃ ॥

৭৯। তস্যাঙ্গুষ্ঠেন নিপীড়িতা আক্রান্তা সতী মহী তত্র তদা অর্দ্ধং ননাম। সমেঽংশকেঽর্দ্ধশব্দস্য নপুংসকত্বাৎ, অংশাংশিনোরভেদাচ্চ এবং সামানাধিকরণ্যম্। ইভেন্দ্রেণাধিষ্ঠিতা তরী নৌর্যথা পদে পদে সব্যতো দক্ষিণতশ্চ নমতি তদ্বৎ ॥

৮০। অন্যদপ্যাশ্চর্য্যমাহ—তস্মিন্ ধ্রুবে বিশ্বং বিশ্বাত্মকং বিষ্ণুমাত্মনঃ সকাশাদনন্যয়া ধিয়া আত্মাভেদদৃষ্ট্যা অভিধ্যায়তি সতি। কিং কৃত্বা? অসুং প্রাণং তদ্দ্বারঞ্চ নিরুধ্য। বিশ্বমাত্মনি একীকৃত্য স্বপ্রাণনিরোধে কৃতে বিশ্বস্য প্রাণনিরোধো জাত ইতি ভাবঃ ॥

৮১। এবং প্রাণনিরোধং কদাচিদপি ন বিদ্মঃ। অখিলসত্ত্বধাম্নঃ সর্ব্বপ্রাণিশরীরস্য। তৎ তস্মাৎ, বৃজিনাৎ ক্লেশাৎ॥

৮২। যতো বালাৎ। কোঽসৌ বালঃ, কথঞ্চ তস্মাৎ প্রাণনিরোধ? ইত্যত আহ—উত্তানপাদস্য পুত্রো ময়ি বিশ্বরূপে সঙ্গতাত্মা ঐক্যং প্রাপ্তো বর্ত্তত ইতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে

অষ্টমোঽধ্যায়ঃ ॥ ৮ ॥

নবমোঽধ্যায়ঃ

নবমে তু হরিং স্তুত্বা লব্ধ্বা তস্মাদ্বরান্ ধ্রুবঃ।

প্রত্যাগত্যাকরোদ্রাজ্যং পিত্রা দত্তমিতীর্য্যতে॥ (১)

১। এবং ভগবদ্বাক্যেন গতভয়াঃ॥

২। স বৈ ধ্রুবো যোগস্য বিপাকেন দার্ঢ্যেন তীব্রয়া নিশ্চলয়া। গরুড়াধিরূঢ়ং পুরঃ স্থিতমপি যদান্তর্দৃষ্টিত্বাদসৌ নাপশ্যৎ, তদা ভগবতৈবান্তঃস্থং রূপমাকৃষ্টম্, অতস্তিরোহিতমুপলক্ষ্য ব্যুত্থিতঃ সন্। তদবস্থং যাদৃগন্তঃস্ফুরিতং তাদৃশম্॥

৩। আগতসাধ্বসঃ জাতসম্ভ্রমঃ। বিনময্যানতং কৃত্বা। সম্ভ্রমমেবাহ—দৃগ্ভ্যাং প্রপিবন্নিব পশ্যন্নবন্দত। আস্যেন চুম্বন্নিবাবন্দত, ভুজাভ্যামাশ্লিষন্নিবাবন্দতেত্যর্থঃ॥

৪। বিবক্ষন্তং তদ্‌গুণান্ বক্তুমিচ্ছন্তম্, অতদ্বিদং স্তুত্যাম্ন্যজানন্তম্, অস্য ধ্রুবস্য সর্ব্বস্য চ হৃদ্যবস্থিতত্বাৎ জ্ঞাত্বা। ব্রহ্মময়েন বেদাত্মকেন শঙ্খেন॥

৫। ভগবতা প্রতিপাদিতাং গিরং প্রতিপদ্যেতি শেষঃ। প্রতিপদ্যতামিতি পাঠে তাং বেদাত্মিকাম্। পরিজ্ঞাতঃ পরাত্মনোরীশ্বরজীবয়োর্নির্ণয়ো যেন সঃ, অতএব ভক্ত্যা ভাবঃ প্রেমা যস্য। অসত্বরং ধৈর্য্যেণ। পরিতঃ শ্রুতং বিখ্যাতম্, উরুশ্রবঃ কীর্ত্তির্যস্য তম্। ধ্রুবা ক্ষিতিঃ স্থানং যস্যেতি ভাবিনির্দ্দেশঃ॥

৬। ঈশানুগ্রহসংপ্রাপ্ত-বাগাদ্যদ্ভুতবৃত্তিভিঃ।

দ্বাদশাদিত্যসঙ্কাশৈঃ শ্লোকৈরস্তৌদ্ধরিং ধ্রুবঃ॥ (২)

যো মে প্রসুপ্তাং লীনাং বাচম্, অন্যাংশ্চ প্রাণানিন্দ্রিয়াণি স্বধাম্না চিচ্ছক্ত্যা সঞ্জীবয়তি ; যতঃ —অখিলাশ্চক্ষুরাদিজ্ঞানক্রিয়াশক্তীর্ধারয়তীতি তথা, পুরুষায় অন্তর্যামিনে॥

৭। নম্নু বাগাদীন্দ্রিয়শক্তিধরা বহ্ন্যাদয়ঃ প্রসিদ্ধাঃ, নাহমিত্যত আহ—এক ইতি। অনুবিশ্য পুরুষোঽন্তর্য্যামী ত্বমেক এব। তস্যা মায়য়া অসদ্‌গুণেষু ইন্দ্রিয়াদিষু স্থিতঃ সন্ তত্তদ্দেবতারূপো নানেব ভাসি, ন তু ত্বদ্ব্যতিরেকেণ জ্ঞানক্রিয়াশক্তিধরঃ কশ্চিদস্তীত্যর্থঃ ॥

৮। অপি চ কিং বক্তব্যম, বহ্ন্যাদয়ো জ্ঞানাদিশক্তিধরা ন ভবন্তীতি, যস্মাৎ ব্রহ্মণোঽপি জ্ঞানং ত্বদধীনমেবেত্যাহ—ত্বদ্দত্তয়া বয়ুনয়া জ্ঞানেন, ভবন্তং শরণং প্রপন্নো ব্রহ্মা ইদং বিশ্বমচষ্ট অপশ্যৎ। কথম্? সুপ্তঃ পুরুষঃ প্রবুদ্ধঃ সন্ যথা পশ্যতি তদ্বৎ। অতঃ—আপবর্গ্যা মুক্তাঃ, তেষামপি শরণম্। কৃতবিদা সর্ব্বেন্দ্রিয়জীবনেন তৎকৃতমুপকারং জানতা কথং বিস্মর্য্যতে? এবম্ভূতং ত্বামভজন্তঃ কৃতঘ্না ইত্যর্থঃ ॥

৯। যে চ মাদৃশাঃ কামাদ্যর্থং ভজন্তি, তেঽপি মূঢ়া ইত্যাহ—নূনমিতি। ভবাপ্যয়ৌ জন্মমরণে, তদ্বিমোক্ষহেতুং ত্বাম্, অন্যহেতোঃ কামাদ্যর্থং যে ভজন্তি, তে নূনং বিমুষ্টমতয়ো বঞ্চিতচিত্তাঃ; যতস্তে কল্পতরুং ত্বামর্চ্চন্তি, ততঃ কুণপতুল্যেন দেহেনোপভোগ্যং সুখমিচ্ছন্তি। ন চেচ্ছা-যোগ্যং তদিত্যাহ—যৎ স্পর্শজং বিষয়সম্বন্ধজন্যং সুখম্, তন্নরকেঽপি ভবতি ॥

১০। নম্নু স্বর্গাদিসুখং সকামৈঃ প্রাপ্যতে, নিষ্কামভজনে চ তন্ন স্যাদিত্যত আহ—যেতি, স্বমহিমনি নিজানন্দরূপেঽপি মা ভূৎ, ন ভবতী-ত্যর্থঃ। অন্তকস্যাসিনা কালেন লুলিতাৎ খণ্ডিতাৎ, বিমানাৎ পততাং সা নাস্তীতি, কিমু বক্তব্যম্ ॥

১১। অতস্তে কথাশ্রবণায় সৎসঙ্গং দেহীত্যাহ—ভক্তিং ত্বয়ি প্রব-হতাং সাতত্যেন কুর্ব্বতাম্। নম্নু মোক্ষং কিং ন যাচসে? অত আহ—যেন মহৎপ্রসঙ্গেন অঞ্জসা অযত্নত এব উরূণি ব্যসনানি যস্মিন্ তম্, নেষ্যে পারং গমিষ্যামি; ভবদ্‌গুণকথৈবামৃতম্, তস্য পানেন মত্তঃ সন্ ॥

১২। কথামৃতপানস্য মাদকত্বমাহ—তেঽতিতরাং প্রিয়মপি মর্ত্ত্যং দেহং ন স্মরন্তি, তন্নানুসন্দধতে; যে চ সুতাদয়োঽদো মর্ত্ত্যমনু সম্বদ্ধাস্তানপি। কে তে ন স্মরন্তি? যে কৃতপ্রসঙ্গাঃ; কেষু? ভবদীয়পদারবিন্দ-সৌগন্ধ্যে লুব্ধং হৃদয়ং যেষাং তেষু। তু-শব্দেনান্যেষাং কেবলযোগাদি-নিষ্ঠানাং দেহাদ্যভিমানানিবৃত্তিং দর্শয়তি ॥

১৩। নন্বেবং ত্বং বিদ্বানপি কিমিত্যভিমানং বহসি? অত আহ—তির্য্যগাদিভিঃ পরিচিতং ব্যাপ্তম্; সন্তোঽসন্তশ্চ বিশেষা যস্য; মহদাদীন্য-নেকানি কারণানি যস্য। হে পরম! অজ! ইদং তে[১] স্থবিষ্ঠং বিরাড়্-রূপং কেবলং বেদ্মি, অতঃ পরমীশ্বরস্বরূপং ন বেদ্মি; যত্র বাদঃ শব্দ-ব্যাপারো নাস্তি, তদ্ব্রহ্মস্বরূপঞ্চ ন বেদ্মি; অতোঽভিমানো ন নিবর্ত্তত ইতি ভাবঃ ॥

১৪। তদেবং ভগবদনুকম্পয়া রূপদ্বয়ং জ্ঞাত্বেশ্বরস্বরূপমনুবর্ণয়ন্ নমস্করোতি—কল্পান্ত ইতি। এতৎ ত্রৈলোক্যং গৃহ্ণন্ যঃ পুমান্ শেতে; স্বস্মিন্নেব দৃক্, ন বহির্যস্য, যোগনিদ্রারূঢ়ত্বাৎ; অনন্তসখঃ শেষসহায়-স্তদঙ্কে শেষোৎসঙ্গে। যস্য নাভিরেব সিন্ধুঃ সমুদ্রস্তস্মিন্ রোহতীতি তথা, তস্য কাঞ্চনলোকপদ্মস্য গর্ভে কর্ণিকায়াং দ্যুমানতিতেজস্বী ব্রহ্মা ভবতি, তং প্রণতোঽস্মীত্যর্থঃ ॥

১৫। নন্থ মমাপি স্বাপাদ্যবস্থাবত্ত্বে কো জীবাদ্বিশেষ ইত্যত আহ—ত্বন্তু ব্যতিরিক্তো জীববিলক্ষণ এবাস্সে তিষ্ঠসি। বৈলক্ষণ্যমেবাহ—ত্বং নিত্য-মুক্তঃ, জীবস্তু ত্বৎপ্রসাদান্মুচ্যতে; ত্বং পরিশুদ্ধঃ, স তু মলিনঃ; ত্বং বিবুদ্ধঃ সর্ব্বজ্ঞঃ, স ত্বজ্ঞঃ; ত্বমাত্মা, স তু জড়ঃ; ত্বং কূটস্থঃ, স তু বিকারী; ত্বমাদিপুরুষঃ, স ত্বাদিমান্; ত্বং ভগবান্, স তু ভগহীনঃ; ত্বং ত্রয়াণাং

১। পরমং (গ)।

গুণানামধীশঃ, স তু পরতন্ত্রঃ। কুত এতদ্বৈলক্ষণ্যম্? যদ্‌যতো বুদ্ধ্যবস্থিতিং বুদ্ধেস্তাং তামবস্থামখণ্ডিতয়া স্বদৃষ্ট্যা চিচ্ছক্ত্যা দ্রষ্টা পশ্যসি; দ্রষ্টেতি তৃন্‌প্রত্যয়ান্তম্; অতো বুদ্ধ্যবস্থিতিমিত্যত্র ষষ্ঠ্যভাবঃ। তথাভূত এব ত্বং স্থিতৌ পালনেঽধিমখো যজ্ঞাধিষ্ঠাতা শ্রীবিষ্ণুঃ॥

১৬। তমেব ব্রহ্মরূপেণ জ্ঞাতং নমস্করোতি—যস্মিন্নিতি, পতন্ত্যকস্মাদুদ্ভবন্তি; বিশ্বস্য ভবো যস্মাৎ; একমখণ্ডম্; আদ্যমনাদি॥

১৭। সকামভজনাদপি মোক্ষমাশাসান আহ—হে ভগবন্! পুরুষার্থঃ পরমানন্দঃ, স এব মূর্ত্তির্যস্য তস্য তব পাদপদ্মম্, আশিষো রাজ্যাদেঃ সকাশাৎ সত্যা আশীঃ পরমার্থফলং হি নিশ্চিতম্। কস্য? তথা তেন প্রকারেণ ত্বমেব পুরুষার্থ ইত্যেবং নিষ্কামতয়া অনুভজতঃ। যদ্যপ্যেবম্, তথাপি হে অর্য্য! স্বামিন্! দীনান্ সকামানপ্যস্মান্ ভগবান্ ভবান্ পরিপাতি, সংসারভয়াদ্রক্ষত্যেব; যতোঽনুগ্রহে হিতাচরণে কাতরঃ পরবশঃ; যথা বাশ্রা ধেনুর্বৎসং ক্ষীরং পায়য়তি, বৃকাদিভ্যো রক্ষতি চ, তদ্বৎ॥

১৯। ব্যবসিতং সঙ্কল্পিতম্॥

২০—২১। তৎ প্রযচ্ছামীত্যুক্তম্; কিং তদিত্যপেক্ষায়ামাহ—নান্যৈরিতি সার্দ্ধদ্বাভ্যাম্। (২০) হে ভদ্র! ধ্রুবা ক্ষিতির্নিবাসো যস্মিন্; আহিতমর্পিতম্; ধান্যাক্রমণায় ভ্রাম্যমাণানাং পশূনাং বন্ধনস্তম্ভো মেধী, তস্যাং বলীবর্দ্দসমূহবৎ। অবান্তরকল্পবাসিনাং পরস্তাদপি স্থাস্নু লোকত্রয়নাশেঽপ্যনশ্বরম্॥ (২১) ধর্ম্মাগ্ন্যাদয়ো নক্ষত্ররূপাঃ, বনৌকসঃ সপ্তর্ষয়ো যৎ প্রদক্ষিণীকৃত্য ভ্রমন্তশ্চরন্তি॥

২২। এতচ্চ রাজ্যানন্তরং ভবিষ্যতীত্যাহ—প্রস্থিত ইতি। তুভ্যং পৃথিবীং দত্ত্বা বনং প্রস্থিতে,—ভাবে ক্তঃ; বনং প্রতি দীর্ঘগমনে কৃতে সতি; রক্ষিতা রক্ষিষ্যসি॥

২৩। ত্বয়াসঙ্কল্পিতমপি মদ্ভক্তস্য তব দ্রোহাদেবং ভবিষ্যতীত্যাহ—ত্বদ্ভ্রাতরীতি। সা সুরুচির্দাবাগ্নিং প্রবেক্ষ্যতি॥

২৪। কিঞ্চ, ইষ্ট্বা মামিতি। যজ্ঞো হৃদয়ং প্রিয়া মূর্ত্তির্যস্য তম্॥

২৫। যতঃ স্থানাৎ॥

২৬। অতিদিশ্য দত্ত্বা॥

২৭। সঙ্কল্পজং মনোরথম্, পাদসেবয়া প্রাপিতম্। সঙ্কল্পস্য নির্ব্বাণং সমাপ্তির্যস্মাৎ॥

২৮। মায়াবিনঃ সকামস্য যৎ সুদুর্লভং হরেঃ পদম্, তদেকেনৈব জন্মনা লব্ধ্বাপি স্বমাত্মানং মনোঽসিদ্ধার্থমপ্রাপ্তমনোরথমিব কথমমন্যত পুরুষার্থবিদপি?

২৯—৩৫। তাপমেবাহ—সমাধিনেতি সার্দ্ধৈঃ ষড়্ভিঃ। (৩০) নৈকে অনেকে ভবা যস্মিন্, বহুজন্মাভ্যস্তেনেত্যর্থঃ। প্রণামস্তুত্যাদিসময়ে গরুড়াধিরূঢ়স্য হরেঃ পাদচ্ছায়ায়াং স্থিতমাত্মানং স্মরন্নাহ—ছায়ামুপেত্যেতি; পৃথঙ্‌মতির্ভেদদৃষ্টিঃ সন্। হা কষ্টমিতি ভাবঃ॥ (৩১) অনাত্ম্যমাত্মশূন্যত্ব-মন্তত্বম্; ভবচ্ছেত্তুর্যদন্তবৎ, তদযাচে যাচিতবানস্মি॥ (৩২) অজ্ঞত্বে কারণং সম্ভাবয়তি—মতিরিতি। পতদ্ভির্মদপেক্ষয়াধঃ প্রাপ্নুবদ্ভিরত এবা-সহনশীলৈঃ, 'নাধুনাপ্যবমানং তে' ইত্যাদি সত্যমপি নারদস্য বচো যো ন গৃহীতবানস্মি, তস্য মে মতির্বিদূষিতা॥ (৩৩) কিঞ্চ, দৈবীমিতি। প্রসুপ্তঃ স্বপ্নানিব পশ্যন্, দ্বিতীয়েঽসত্যপি ভ্রাতৈব ভ্রাতৃব্যঃ শত্রুরিতি দৃষ্ট্যা হৃদ্রুজা হৃদয়শোকেন তপ্যে তাপমনুভবামি॥ (৩৪) কিঞ্চ, ময়া প্রসাদ্য যৎ প্রার্থিতম্, তদ্ব্যর্থম্। প্রার্থিতমাহ—ভবচ্ছিদমিতি॥ (৩৫) এতদেব সদৃষ্টান্তমাহ—স্বারাজ্যং নিজানন্দং প্রযচ্ছতঃ সকাশাদভিমানঃ ক্ষীণপুণ্যেন ময়া ভিক্ষিতো যাচিতঃ; ক্ষীণেন পুণ্যেনেতি বা দৃষ্টান্ত এব

সম্বন্ধঃ। যথা অধন ঈশ্বরাচ্চক্রবর্ত্তিনঃ ফলীকারান্ সতুষতণ্ডুলকণান্ যাচতে, তদ্বৎ ॥

৩৬। এবং নিস্পৃহত্বং তস্য যুক্তমিত্যাহ—নেতি। তস্য দাস্যং বিনান্য-মর্থমাত্মনো নৈব বাঞ্ছন্তি ; যদৃচ্ছয়ৈব লব্ধেন বস্তুনা মনসঃ সমৃদ্ধির্যেষাং তে ॥

৩৭। প্রস্তুতমাহ—আকর্ণ্যেতি। সম্পরেত্য মৃত্বাগতমাকর্ণ্য যথা, তথা ন শ্রদ্দধে—বিশ্বাসং ন চকার। 'অভদ্রস্য মে কুতো ভদ্রম্?' ইতি মত্বা ॥

৩৮। 'এষ্যত্যচিরতঃ' ইতি দেবর্ষের্বাক্যং শ্রদ্ধায় ॥

৩৯। ব্রাহ্মণাদিভিঃ পর্য্যস্তঃ পরিবৃতঃ ॥

৪১। অস্য রাজ্ঞো মহিষ্যৌ মধ্যে উত্তমং নিধায়ৈকামেব শিবিকাং নরবিমানমারুহ্য ॥

৪২। উপবনস্যাভ্যাসে সমীপে ॥

৪৩। বিষ্বক্সেনাঙ্ঘ্রিসংস্পর্শেন হতমশেষমঘং বন্ধনঞ্চ যস্য ॥

৪৪। জাত উদ্দামো মহান্ মনোরথো যস্য ॥

৪৫। অভিমন্ত্রিতঃ পিতুরাশীর্ভিঃ সহ তেন কৃতসম্ভাষণঃ ॥

৪৭। সুরুচ্যাঃ প্রীতির্নাসম্ভাবিতেত্যাহ—যস্যেতি। নমন্তি অনুসরন্তি ; আপো যথা স্বয়মেব নিম্নং দেশমবতরন্তি ॥

৪৮। ঊহতুর্দধতুঃ ॥

৫০। হে বীর! বীরসুবো ধ্রুবমাতুরভিষিচ্যমানাভ্যাং স্তনাভ্যাং পয়স্তদা সুস্রাব ॥

৫১। চিরং নষ্টো দর্শনমপ্রাপ্তঃ ; রক্ষিতা রক্ষিষ্যতি ॥

৫৩। এবমিতি ব্যবহিতং পিত্রাদিলালনং পরামৃশ্যতে ॥

৫৪—৫৭। পুরং বর্ণয়তি—তত্র তত্রেতি চতুর্ভিঃ। (৫৪) সবৃন্তৈঃ ফলমঞ্জরীযুক্তৈঃ, পূগানাং পোতৈর্বালবৃক্ষৈস্তদ্বিধৈঃ সবৃন্তৈরুপস্কৃতং প্রতি-

দ্বারমিত্যুত্তরেণান্বয়ঃ ॥ (৫৫) চূতপল্লবাশ্চ, বাসাংসি চ, স্রজশ্চ মুক্তাদামানি চ, তেষাং বিশিষ্টো লম্বো লম্বনমস্তি যেষু কুম্ভেষু ॥ (৫৬) গোপুরৈরগারৈশ্চ ; শাতকুম্ভাঃ স্বর্ণময়াঃ পরিচ্ছদাঃ পরিকরা যেষু ; বিমানানামিব শিখরৈর্দ্যোতির্যেষাম্ ॥ (৫৭) চত্বরমঙ্গনম্, রথ্যা মহামার্গঃ ; অট্ট উচ্চস্তোপরি নির্ম্মিতা ভূমিকা মার্গোঽবান্তরঃ ; মৃষ্টাঃ সম্মার্জ্জিতাশ্চত্বরাদয়ো যস্মিন্ ॥

৫৮। সিদ্ধার্থঃ শ্বেতসর্ষপঃ, অক্ষতা যবাঃ, উপজহ্রুর্ব্যাকিরন্ ; সতীঃ সত্যঃ ॥

৬২। যত্র ভবনোত্তমে ॥

৬৪। কুমুৎ কুমুদম্ ; পদ্মাদিমত্যো বাপ্যঃ ॥

৬৬। ঊঢ়বয়সং প্রাপ্তযৌবনম্ ; অনুরক্তাঃ প্রজা যস্মিন্ ॥

৬৭। প্রবয়সং বৃদ্ধম্ ॥

ইতি শ্রীমদ্ভাগবতভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
নবমোঽধ্যায়ঃ ॥ ৯ ॥

দশমোঽধ্যায়ঃ

দশমে ভ্রাতৃহন্তৄণাং যক্ষাণামকরোদ্বধম্ ।
এক এবালকাং গত্বেত্যস্ত বিক্রম উচ্যতে ॥ (১)

২। যোষিতাং রত্নমিবাতিমনোহরম্, কন্যারত্নঞ্চেতি বা ॥

৩। যক্ষেণাদ্রৌ হিমবতি হতঃ। আজাবিতি পাঠে যুদ্ধে ; অস্ত গতিং গতা মৃতেত্যর্থঃ ॥

৪। কোপামর্ষশুচাং দ্বন্দ্বৈক্যম্, তেনার্পিতো ব্যাপ্তঃ; জৈত্রং জয়-হেতুম্; পুণ্যজনালয়মলকাম্ ॥

৫। রুদ্রানুচরা ভূতাদয়ঃ ॥

৬। দধ্মৌ বাদিতবান্, যেন শঙ্খবাদনেন। হে ক্ষত্তঃ! উপদেব্যো যক্ষস্ত্রিয়ঃ ॥

৮। একৈকং ত্রিভিস্ত্রিভিরিত্যেবং সর্ব্বান্ ত্রয়োদশাযুতানি যক্ষান্ যুগপদহন্ জঘান ॥

৯। নিরস্তং পরাজিতম্; তস্য ধ্রুবস্য তৎ কর্ম্ম আশংসন্ তুষ্টুবুঃ ॥

১০। তেঽপি তৎ কর্ম্মাসহমানা অমুমবিধ্যন্; দ্বিগুণং যথা ভবত্যেবং ষড়্ভিঃ ষড়্ভিঃ প্রতিকর্ত্তুমিচ্ছবঃ ॥

১১। চিত্রবাজৈশ্চিত্রপক্ষৈঃ ॥

১৩। ধারাসম্পাতেনাচ্ছন্নো গিরিরিব নৈবাদৃশ্যত ॥

১৪। সূর্য্যতুল্যঃ ॥

১৫। যাতুধানেষু রাক্ষসেষু জয়কাশিষু, জিতং জিতমিতি জয়-প্রকাশকেষু সৎসু ॥

১৬। ব্যধমৎ—সংচূর্ণয়ামাস ॥

১৭। বর্ম্মাণি—কবচানি ॥

১৮—১৯। শিরঃপ্রমুখৈরাস্তৃতাঃ প্রকীর্ণা রেজুরিতি দ্বয়োরন্বয়ঃ ॥

২০। প্রায়ো বাহুল্যেন বিবৃক্ণাঃ সংছিন্না অবয়বা যেষাম্ ॥

২১। আততায়িনং শস্ত্রপাণিম্ ॥

২২। ইতি ব্রুবন্নিত্যত্রাপি 'ন মায়িনাম্' ইত্যাদেরনুষঙ্গঃ। চিত্ররথো ধ্রুবো যত্তঃ যত্নবান্; প্রতিযোগঃ পুনরুদ্যোগস্তস্মাচ্ছঙ্কিতঃ। নভস্বতো বায়োর্হেতোঃ ॥

২৩। বিস্ফুরন্ত্যস্তড়িতো যস্মিন্, তেন ত্রাসয়ন্তঃ স্তনয়িত্নবোঽশনয়ো যস্মিন্ ॥

২৪। ববৃষুর্নিপেতুরিত্যর্থঃ। ন সৃজতি শরীরমিত্যসৃগিহ শ্লেষ্মাদি ; মেদসঃ পুংস্ত্বমার্ষম্ ; মেদাংস্যস্যাগ্রতো নিপেতুঃ ॥

২৫। সাশ্মবর্ষিণোঽশ্মসহিতং যদ্বর্ষম্, তদ্বন্তঃ ॥

২৬। অশনিবন্নিঃশ্বাসা যেষাম্ ॥

২৮। ত্রাসনানি ভয়ঙ্করাণি ; তিগ্মা ক্রূরা গতিঃ প্রবৃত্তির্যেষাম্। অসুররাক্ষসাদিশব্দৈরদূরান্তরত্বেন যক্ষা এবোচ্যন্তে ॥

২৯। তস্য শং কল্যাণমাশংসন্ প্রার্থিতবন্তঃ ॥

৩০। তব বিপক্ষান্ শত্রূন্ নাশয়তু ; অদ্ধা সাক্ষাৎ অঞ্জসা সুখেনৈব মৃত্যুং তরতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
দশমোঽধ্যায়ঃ ॥ ১০ ॥

একাদশোঽধ্যায়ঃ

একাদশে তু যক্ষাণাং ক্ষয়ং দৃষ্ট্বা মনুঃ স্বয়ম্।
আগত্য বারয়ামাস ধ্রুবং তত্ত্বোপদেশতঃ ॥ (১)

১। এবং গদতাং বচনমুপদেশমিব নিশম্য ; উপস্পৃশ্যাচম্য ; যন্নারায়ণ-নির্মিতং নারায়ণাস্ত্রম্, তৎ সন্দধে ॥

২। ক্লেশা রাগাদয়ো যথা ॥

৩। কিঞ্চ, তস্যার্ষাস্ত্রম্, ঋষের্নারায়ণাদুদ্ভূতমস্ত্রং প্রযুঞ্জতঃ সন্দধতঃ সতঃ; সুবর্ণময়াঃ পুঙ্খা মূলপ্রান্তা যেষাম্, কলহংসানাং বাসাংসি পক্ষা যেষাম্, তে শরা বিনিঃসৃতা ইতি দ্রষ্টব্যম্; উপরিষ্টাৎ শিলীমুখগ্রহণাৎ॥

৪। প্রধনে—যুদ্ধে; উন্নদ্ধা উচ্ছ্রিতাঃ ফণা যেষাং তে সর্পাঃ॥

৫। পৃষৎকৈর্বাণৈর্নিকৃত্তা বাহ্বাদয়ো যেষাং তান্, পরলোকং নিনায়। কথম্ভূ উর্দ্ধরেতসঃ সন্ন্যাসিনোঽর্কমণ্ডলং নির্ভিদ্য যং ব্রজন্তি, তম্॥

৬। অনাগসো নিরপরাধান্॥

৭। তমসো নরকস্য দ্বারেণ, যেন রোষেণ॥

৯। ননু মদ্ভ্রাতৃহন্তারঃ কথমকৃতৈনসঃ? অত আহ—নন্বিতি॥

১০। সত্যপ্যপরাধে তবৈতদুচিতং ন ভবতীত্যাহ—নায়মিতি। পরাগ্‌গৃহ্য পরাগ্‌ভূতং দেহমাত্মানং গৃহীত্বা পশবো যথা দেহাভিমানাদন্যোঽন্যং ঘ্নন্তি, তথা ভূতানাং বৈশসং হিংসেতি যৎ॥

১১—১২। ত্বঞ্চ বাল্যে সাধুঃ সন্নিদানীং কথমন্যথা কৃতবানিত্যাহ—সর্ব্বভূতাত্মভাবেনেতি দ্বাভ্যাম্। (১২) অনুধ্যাতো হরের্হৃদি স্থিতো বিজ্ঞাতো বা তৎপুংসাং হরিদাসানামপি সাধুত্বেন সম্মতঃ॥

১৩। সতাং ব্রতমেবাহ—মহৎসু তিতিক্ষয়া, নীচেষু করুণয়া, সমেষু মৈত্র্যা, অখিলজন্তুষু সমত্বেন চ॥

১৪। ততঃ কৃতার্থো ভবতীত্যাহ—সম্প্রসন্নে সতি গুণৈর্বিমুক্তোঽতএব তৎকার্য্যেণ জীবেন লিঙ্গশরীরেণ নির্ম্মুক্তঃ সন্ নির্ব্বাণং সুখাত্মকং ব্রহ্ম প্রাপ্নোতি॥

১৫—২৪। ভ্রাতৃহন্তৃত্বমঙ্গীকৃত্যোক্তম্; ইদানীন্তু নাত্মনো ভ্রাতৃপুত্রাদিসম্বন্ধো ন চান্যোঽন্যং হন্তৃত্বাদিকমপীত্যাহ—ভূতৈরিতি দশভিঃ। (১৫) ভূতৈঃ পঞ্চভিরারব্ধৈর্দেহাদ্যাকারেণ পরিণতৈর্যোষিৎ পুরুষশ্চেতি প্রসিদ্ধি-

স্তয়োর্ব্যবায়াম্মৈথুনাৎ সম্ভূতিরন্তয়োর্যোষিৎপুরুষয়োরিহ সংসারে ভবতি ॥ (১৬) এবং তাবৎ সর্গঃ প্রবর্ত্ততে ; এবং পালকাকারেণ পরিণতৈর্ভূতৈরেব স্থিতিঃ ; হন্তৃদেহাকারপরিণতৈঃ সংযমঃ সংহারঃ, স চ পরমাত্মনো মায়য়া গুণানাং ব্যতিকরাৎ, ন তু স্বতঃ ॥ (১৭) নন্বু জড়ানাং দেহানাং গুণানাং বা কথং সর্গাদিহেতুত্বম্ ? তত্রাহ—নিমিত্তমাত্রম্ ; পুরুষর্ষভ ঈশ্বরঃ,—যত্র যস্মিন্ নিমিত্তে সতি কার্য্যকারণাত্মকং বিশ্বং ভ্রমতি পরিবর্ত্ততে, যথা অয়স্কান্তে নিমিত্তে সতি লোহং পরিবর্ত্ততে, তদ্বৎ ॥ (১৮) নন্ব স চেন্নিমিত্তম্ তর্হি তস্যাবিশেষাদ্‌যুগপদেব সর্গাদিত্রয়ং ভবেৎ ? অত আহ—স খল্বিতি। কাল-শক্ত্যা ক্রমেণ গুণানাং প্রবাহঃ ক্ষোভস্তেন বিভক্তং সৃষ্ট্যাদি-বিষয়ং বীর্য্যং শক্তির্যস্য। নন্বু কালোঽপি গুণান্ যুগপদেব ক্ষোভয়তু ? তত্রাহ—চেষ্টা কালশক্তিস্তু র্বিভাব্যাচিন্ত্যা ॥ (১৯) নন্বু সৃজতি পিত্রাদিঃ, পালয়তি রাজাদিঃ, নিহন্তি চ চৌরাদিঃ, ন তু ঈশ্বরঃ ? তত্রাহ—স ইতি। জনেন পিত্রাদিনা জনং পুত্রাদিং জনয়ন্নাদিকৃৎ ; অন্তকং চৌরাদিকম্, তন্মৃত্যুহেতুনা মারয়ন্নন্তকরঃ, স্বয়ন্তু অনন্তোঽনাদিরব্যয়োঽক্ষীণশক্তিশ্চ। অয়ং ভাবঃ—পিত্রাদয়োঽন্তত উৎপত্ত্যাদিমন্তো ন স্বাতন্ত্র্যেণ কারণম্, কিন্ত্বীশ্বর এব তন্নিয়ন্তা সর্ব্বকারণমিতি ॥ (২০—২১) ন চৈবং কুর্ব্বতো-ঽপি বৈষম্যপ্রসক্তিঃ পক্ষপাতাভাবাদিত্যাহ—ন বেতি দ্বাভ্যাম্। (২০) মৃত্যুরূপস্য সমং যথা ভবতি, তথা প্রজাঃ কর্ম্মভূতা বিশতস্তস্য সাম্যেঽপি ভূতেষু ফলবৈষম্যং তৎকর্ম্মণস্তথাত্বাদিতি সদৃষ্টান্তমাহ—তং ধাবন্তমন্বনীশাঃ কর্ম্মাধীনা ভূতসঙ্ঘা ধাবন্ত্যনিলং ধাবন্তমনুরজাংসীব ; তত্র যথা রজসাং তমঃপ্রকাশজলাগ্ন্যাদিপ্রবেশেঽপি নানিলস্য বৈষম্যম্, এবমীশ্বরস্যাপীতি ভাবঃ ॥ (২১) অপচয়মকালমৃত্যুম্, উপচয়ং কালমৃত্যোরপি রক্ষাম্ ; যদ্বা, অপচয়ং মশকাদৌ, উপচয়ং দেবাদৌ ; স্বস্থত্বাদুপচয়াপচয়াভ্যাং রহিতোঽসৌ বিভুর্দ্ভঃস্থস্য কর্ম্মাধীনস্য বিদধাতি ॥ (২২) এবম্ভূতশ্চেশ্বরঃ

সর্ব্ববাদিসম্মতো বিবাদস্তু নামমাত্র ইত্যাহ—কেচিদিতি। পুংসঃ কামং বাৎস্যায়নাদয়ঃ। শ্রুতিশ্চ—"কামোঽকার্ষীৎ কামঃ করোতি, কামঃ কর্ত্তা, কামঃ কারয়িতা" ইত্যাদি ॥ (২৩) নন্বু কর্ম্মাদীনাং জড়ত্বাদিনা স্বরূপতোঽপি ভিন্নত্বাৎ কথমৈকমত্যম্? ইত্যাহ—অব্যক্তস্যাতএবাপ্রমেয়স্য। তথাপি সত্ত্বে হেতুঃ—নানাশক্তীনাং মহদাদীনামুদয়ো যস্মাৎ; চিকীর্ষিতমেব তাবৎ কোঽপি ন বেদ; অথ স্বস্য সম্ভবো যস্মাৎ, তমীশ্বরং কো বেদ? ন কোঽপি। অদ্ধেতি পাঠে সাক্ষাৎ। অতস্তত্ত্বজ্ঞানাভাবাদ্‌বিশেষাংশে বিবাদ ইত্যর্থঃ। তথা চ শ্রুতিঃ—"কোঽদ্ধা বেদ, ক ইহ প্রাবোচৎ, কুত আয়াতা ইয়ং বিসৃষ্টিঃ? অর্ব্বাগ্‌দেবা অস্য বিসর্জ্জনেনাথ কো বেদ, যত আবভূব" ইত্যাদি ॥ (২৪) ঈশ্বরবাদস্য প্রকৃতোপযোগমাহ—ন চৈতে ভ্রাতুর্হন্তারঃ; উক্তমেব হেতুমনুবদতি—বিসর্গাদানয়োর্মৃত্যুজন্মনোঃ; যদ্বা, বিসর্গঃ সৃষ্টিরাদানং সংহারঃ; দৈবমীশ্বর এব হি কারণম্ ॥

২৫। তত্রাপি নির্লেপতামাহ—স এবেতি ॥

২৬। অনহঙ্কারত্বে হেতুমাহ—এষ ইতি ॥

২৭—৩০। সত্যমীশ্বর এব কর্ত্তা, তথাপ্যহঙ্কারাদি ময়া ত্যক্তুং ন শক্যমিতি চেৎ, অত আহ—তমেবেতি চতুর্ভিঃ। (২৭) মৃত্যুমভক্তানাম্, ভক্তানান্তু অমৃতমুপেহি শরণং গচ্ছ; তমেবেত্যবধারণে হেতুঃ—যস্মৈ নসি নাসিকায়ামুতা দামভির্বদ্ধা গাব ইব বিশ্বসৃজোঽপি দামভির্যন্ত্রিতা বদ্ধাঃ সন্তো বলিং হরন্তি, তৎকারিতং কর্ম্ম কুর্ব্বন্তীত্যর্থঃ ॥ (২৮) তদারাধনঞ্চ তব সুশকমিত্যাহ—যঃ পঞ্চবর্ষঃ, স ত্বং যমারাধ্য ত্রিলোক্যা মূর্দ্ধ্নি পদং স্থানং লেভে লব্ধবানসি, ইদানীং তমেবান্বিচ্ছাবলোকয়েত্যুত্তরেণান্বয়ঃ। প্রত্যঞ্চ্যক্ষাণি যস্মিন্, ক্রিয়াবিশেষণং বা ॥ (২৯) হরিং ধ্যায়ন্তং প্রত্যাহ—হে অঙ্গ! ধ্রুব! মুক্তবিরোধে আত্মনি মনসি ব্যপাশ্রিতমবস্থিতম্, আত্মদৃক্ প্রত্যগ্দৃষ্টিঃ সন্; অয়ং ভেদো যস্মিন্, তদিদং ভেদমসদেব বিশ্বং

যস্মিন্ প্রতীয়তে, তম্॥ (৩০) তদন্বেষণফলমাহ—ত্বমিতি। তদা অন্বেষণকাল এব॥

৩১—৩২। উপদেশসারমাহ— সংযচ্ছেতি দ্বাভ্যাম্। (৩১) প্রতীপং প্রতিকূলম্; অগদেনৌষধেন যথা লোকো রোগং নিযচ্ছতি॥ (৩২) যেন রোষেণোপসৃষ্টাদ্ব্যাপ্তাৎ॥

৩৩—৩৪। অন্যচ্চ ত্বয়া কার্য্যমিত্যাহ—হেলনমিতি দ্বাভ্যাম্। (৩৩) যদ্যতো জঘ্নিবান্ ঘাতিতবান্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং চতুর্থস্কন্ধে
একাদশোঽধ্যায়ঃ॥ ১১॥

দ্বাদশোঽধ্যায়ঃ

দ্বাদশে ধনদেনাভিনন্দিতঃ পুরমাগতঃ।
যজ্ঞৈরিষ্ট্বা হরেঃ স্থানমারুরোহেতি কীর্ত্ত্যতে॥ (১)

১। বৈশসাদ্বধান্নিবৃত্তং জ্ঞাত্বা॥

২। হে ক্ষত্রিয়দায়াদ! ক্ষত্রিয়পুত্র! অত্যজস্ত্যক্তবানসি॥

৩। ন চ বৈরস্য কারণমস্তীত্যাহ—ন ভবানিতি। অপ্যয়ভাবয়োর্মৃত্যুজন্মনোঃ॥

৪। কথং তর্হ্যহংবুদ্ধিঃ? তত্রাহ—অহং ত্বমিতি। আভাতি প্রকাশতে, জায়ত ইত্যর্থঃ; অতদ্ধ্যানাদ্ দেহানুসন্ধানাৎ, যয়া ধিয়া বন্ধো বিপর্য্যয়ো দুঃখাদিঃ॥

৫—৬। তত্তস্মাদ্গচ্ছ, গত্বা চ ভগবন্তং ভজস্বেত্যুত্তরেণান্বয়ঃ। সর্ব্বভূতাত্মকো বিগ্রহো যস্য॥ (৬) ভজনীয়াবঙ্ঘ্রী যস্য তম্; গুণময্যা

শক্ত্যা যুক্তম্, কিং তত্ত্বতঃ ? ন আত্মমায়য়াতস্তত্ত্বতস্তয়া বিরহিতম্ ; যদ্বা, মায়য়া যুক্তং বিরহিতঞ্চ সগুণনির্গুণভেদেন ॥

৭। কামমসঙ্কোচেন, অবিশঙ্কিতো নির্ভয়ঃ, অনন্তরমতিনিকটম্ ॥

৮। স বরায় চোদিত ইত্যনুবাদরূপং পৃথগ্ বাক্যম্ ; অতঃ 'স বব্রে' ইতি তচ্ছব্দস্যাপৌনরুক্ত্যম্ ॥

১০। দ্রব্যক্রিয়াদেবতানাং কর্ম্মসাধ্যং ফলরূপম্, কর্ম্মফলপ্রদঞ্চেত্যর্থঃ ॥

১১। সর্ব্বস্যাত্মনি ; অসর্ব্বে সর্ব্বোপাধিবিবর্জ্জিতে ॥

১৩। ভোগৈরৈশ্বর্য্যাদিভিঃ, অভোগৈর্যজ্ঞাদ্যনুষ্ঠানৈঃ ॥

১৪। বহবঃ সবা যাগাঃ সংবৎসরা বা যস্মিন্, তং কালং ত্রিবর্গস্য সাধকং নীত্বা, অবিচলানি সংযতানীন্দ্রিয়াণি যস্য ॥

১৫। ইদং দেহাদি ভগবন্মায়য়াত্মনি স্বস্মিন্ রচিতং মন্যমানঃ ; অত্রা-বিদ্যাসৃষ্টিং দৃষ্টান্তয়তি—অবিদ্যারচিতেতি ॥

১৬। আত্মা দেহঃ, আত্মাদি মায়িকমপি পুনঃ কালেনোপসৃষ্টমনিত্য-মাকলয্য বিচিন্ত্য ; বিশালাং বদরিকাশ্রমম্ ॥

১৭। তত্র তৎকৃতমষ্টাঙ্গযোগমাহ—তস্যাং শিবং বাঃ শুদ্ধমুদকং বিগাহ্য প্রবিশ্যেতি স্নানাদিনিয়মা উক্তাঃ ; বিশুদ্ধকরণ ইতি শমাদয়ো যমাঃ ; আসনাদীনি স্ফুটমেবোক্তানি ; জিতো মরুৎ প্রাণো যেন ; আহৃতান্যক্ষাণি যেন ; ভগবতঃ প্রতিরূপ[১]ভূতে স্থূলে বিরাড়্‌রূপে এতন্মনো দধার ; ধ্যায়ন্নব্যবহিতো ধ্যাতৃ-ধ্যেয়-ভেদশূন্যঃ সন্ সমাধৌ স্থিতস্তৎ স্থূলং ব্যসৃজৎ ॥

১৮। এবমজস্রং নিত্যং হরৌ ভক্তিং প্রকর্ষেণ বহন্নসৌ ধ্রুবোঽহ-মিত্যাত্মানং ন সস্মার ; যতো মুক্তলিঙ্গস্ত্যক্তশরীরাভিমানঃ। অত্র হেতবঃ

১। প্রতিনিধি- (গ, ঘ)।

—আনন্দবাষ্পস্য কলয়া বিন্দুপ্রবাহেণাভিভূয়মানো বিক্লিদ্যমানং দ্রবদ্ধদয়ং যস্য, পুলকৈর্ব্যাপ্তাঙ্গঃ ॥

২০। অনু অনন্তরং দেবপ্রবরৌ দদর্শেত্যনুষঙ্গঃ। গদামবষ্টভ্য স্থিতৌ, কিরীটাদিভিঃ সহিতে চারুণী কুণ্ডলে যয়োঃ ॥

২১। উত্তমগায়ঃ পুণ্যশ্লোকস্তস্য কিঙ্করৌ তৌ বিজ্ঞায়, মধুদ্বিষঃ পার্ষৎ-প্রধানাবিতি হেতোঃ, সাধ্বসেন সম্ভ্রমেণ বিস্মৃতঃ পূজাক্রমো যেন, কেবলং তস্য নামানি গৃণন্ ননাম ॥

২৩। 'সুভদ্রং তে' ইতি সশরীরস্যৈব বিষ্ণুপদারোহণাভিপ্রায়ম্; অতীতৃপৎ তর্পিতবান্ ॥

২৪। আবাং তস্য পার্ষদৌ ॥

২৫। সুদুর্জ্জয়ত্বে হেতুঃ—সূরয়ঃ সপ্তর্ষয়োঽপি যদপ্রাপ্য কেবলমধঃ স্থিতাঃ পশ্যন্তি, যচ্চ চন্দ্রাদয়ঃ প্রদক্ষিণং যথা ভবতি, তথা পরিক্রামন্তি, তদাতিষ্ঠ অধিতিষ্ঠ ॥

২৭। আয়ুষ্মন্নিত্যপি সশরীরযানাভিপ্রায় এব ॥

২৮। মধু চ্যবতে স্রবতীতি মধুচ্যুৎ, তাম্; মধুচ্যুতামিতি পাঠে মধু চ্যুতং যস্যাং তামমৃতস্রাবিণীমিত্যর্থঃ; কৃতং নিত্যং কর্ম্ম মঙ্গলঞ্চা-লঙ্করণং যেন; অভ্যবাদয়দ্বাচয়ামাস ॥

২৯। তদেব রূপং হিরণ্ময়ং প্রকাশবহুলং বিভ্রৎ সন্, ইয়েষ ঐচ্ছৎ ॥

৩০। গৃহং বিমানম্। অয়ং ভাবঃ—যদা ধ্রুবো বিমানমারোঢু-মৈচ্ছৎ, তদা মৃত্যুরাগত্য প্রণম্যোবাচ,—হে মহারাজ! মামঙ্গীকুরু; উবাচ ধ্রুবঃ,—স্বাগতং তে; ক্ষণং তাবদুপবিশ। এবমুক্ত্বা ধ্রুবো বিষ্ণোঃ স্মরণং কৃত্বা মৃত্যোর্মূর্দ্ধ্নি পদং দত্ত্বা বিমানাগ্র্যমারুরোহ ॥

৩২। দীনাং হিত্বা কথমগং দুর্গমং ত্রিপিষ্টপং যাস্যামীত্যন্বস্মরৎ ॥

৩৩। ব্যবসিতমভিপ্রায়ং ব্যবসায় জ্ঞাত্বা ॥

৩৫। দেবযানেন দেবমার্গেণ, বিমানেনেতি বা ; মুনীন্ সপ্তর্ষীনপি, ততঃ পরস্তাৎ যদ্বিষ্ণোঃ পদং তদভ্যগাৎ ; ধ্রুবা গতির্যস্য সঃ ॥

৩৬। যদ্ভ্রাজমানমনু যস্য রুচা লোকা বিভ্রাজন্তে ; জন্তুষু যেঽননুগ্রহা নিষ্কৃপাস্তে যন্নাব্রজন্—ন গতবন্তঃ ॥

৩৭। অচ্যুতপ্রিয়া বান্ধবা যেষাম্ ॥

৩৯। অনিমিষমনলসং জ্যোতিষাং চক্রং যস্মিন্ ; আহিতমর্পিতং সদ্ ভ্রমতি ; মেধ্যামাহিতো গম্ভীরবেগো গবাং গণ ইব ॥

৪০। আতোদ্যং বীণাং বিনুদন্ বাদয়ন্, প্রচেতসাং ব্রহ্মসত্রে ভগবন্মাহাত্ম্যপ্রসঙ্গেন ধ্রুবমহিমপ্রতিপাদনপরাংস্ত্রীন্ শ্লোকানগায়ৎ—'নূনম্' ইত্যাদীন্ ॥

৪১। নূনমিতি। পতিরেব দেবতা যস্যাস্তস্যাঃ, সুতস্য যস্তপঃপ্রভাবস্তস্য তাং গতিং ফলমধিগন্তুং বেদবাদশীলা ব্রহ্মর্ষয়োঽপি নৈব প্রভবন্ত্যভ্যুপায়ান্ ভগবদ্ধর্ম্মান্ দৃষ্ট্বাপি ; কিং পুনর্নৃপাঃ ॥

৪২—৪৩। তপঃপ্রভাবং গতিঞ্চ বিশিনষ্টি দ্বাভ্যাম্। (৪২) গুরুদারাঃ পিতৃপত্নী সুরুচিস্তস্যা বাক্‌শরৈর্ভিন্নেনাতএব দূয়তা হৃদয়েন বনং যাতঃ সন্, অজিতমপি যো জিগায় বশীকৃতবান্ ॥ (৪৩) তস্যাধিরূঢ়ং তেন প্রাপ্তং পদং যো ভুবি ক্ষত্রবন্ধুঃ ক্ষত্রিয়ো ভবেৎ, স তমনু বর্ষসমূহৈরপ্যারোঢ়ুমিচ্ছেদপি কিম্? তৎসঙ্কল্পোঽপ্যশক্যো দূরত আরোহণমিত্যর্থঃ। কথম্ভূতং পদম্? ষড়্ বা পঞ্চ বা বর্ষাণি যস্য সঃ ; অল্পৈরেবাহোভির্বৈকুণ্ঠং প্রসাদ্য যৎ তস্য পদমবাপ, তৎ ॥

৪৪। উদ্দামমুৎকৃষ্টং যশো যস্য ॥

৪৫। ধনাদের্নিমিত্তম্, ধ্রৌব্যং ধ্রুবস্থানপ্রাপকম্ ; প্রশস্যং প্রশংসার্হম্ ; অঘমর্ষণং পাপনাশনম্ ॥

৪৬। অচ্যুতপ্রিয়স্য ধ্রুবস্য চেষ্টিতং শ্রুত্বা যো বর্ত্ততে, তস্য ভক্তির্ভবেৎ॥

৪৭। তীর্থং মহত্ত্বাবাপ্তিস্থানম্ ; গুণা যত্র ভবন্তি ॥

৪৮। সমবায়ে সভায়াম্ ॥

৫০। নেচ্ছন্নিষ্কামঃ ; তত্র শ্রবণে ; আত্মনৈবাত্মানং প্রতি সন্তুষ্টো ভবতীতি হেতোঃ সিদ্ধিং প্রাপ্নোতি ॥

৫১। কিঞ্চ, সৎপথে ভগবন্মার্গেঽমৃতরূপং জ্ঞানং যো দত্থাৎ ॥

৫২। ধ্রুবস্য চরিতং ময়া তেঽভিহিতম্ ; মাতুর্গৃহঞ্চ হিত্বা ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

ত্রয়োদশোঽধ্যায়ঃ

এবং পঞ্চভিরধ্যায়ৈর্ধ্রুবচর্য্যানুবর্ণিতা ।
অথৈকাদশভিশ্চিত্রং পৃথুচারিত্রমুচ্যতে ॥ (১)
তত্র ত্রয়োদশে বক্তুং পৃথোর্জন্ম ধ্রুবান্বয়ে ।
অঙ্গো বেণপিতা পুত্রক্রৌর্য্যাদ্গত ইতীর্য্যতে ॥ (২)

১। প্ররূঢ়ো ভাবো ভক্তির্যস্য ॥

২। অন্ববায়ে বংশে ॥

৩। নারদেন প্রচেতসাং সত্রে বর্ণিতাং কথাং প্রষ্টুং তস্য মহিমানমাহ —মন্য ইতি। দেবস্যেব দর্শনং যস্য, হরেঃ পরিচর্য্যাপ্রকারঃ ক্রিয়াযোগঃ পঞ্চরাত্রে যেন প্রোক্তঃ ॥

৪। স্বধর্ম্মশীলৈঃ পুরুষৈঃ প্রচেতোভিঃ ॥

৬। ধ্রুবস্য বংশে জাতা ইতি বক্তুং ধ্রুবস্য বংশমনুক্রামতি—ধ্রুবস্যেত্যাদিনা। পিতুঃ সার্ব্বভৌমশ্রিয়ং নৈচ্ছদধিরাজাসনঞ্চ ॥

৭—১০। অনিচ্ছায়াং হেতুমাহ—স ইতি চতুর্ভিঃ। (৮—৯) আত্মানং স্বরূপভূতং ব্রহ্মাবরুন্ধান আপ্নুবন্ জানন্, আত্মনো নান্যৎ তদৈক্ষত; স্বয়ন্তু সর্ব্বস্মাদন্যঃ সন্। কথম্ভূতং ব্রহ্ম? নির্ব্বাণং শান্তম্, প্রত্যস্তমিতঃ শান্তো বিগ্রহো ভেদো যস্মিন্, অববোধরসেনৈকাত্ম্যং যস্য। কথম্ভূতঃ? অব্যবচ্ছিন্নো যো যোগঃ, স এবাগ্নিস্তেন দগ্ধঃ কর্ম্মমল আশয়ো বাসনা চ যস্য॥ (১০) জড়াদীনামিবাকৃতির্যস্য, তথাভূতো লক্ষিতঃ, অতন্মতির্ন তেষামিব মতির্যস্য, সর্ব্বজ্ঞত্বাৎ; প্রশান্তানি অর্চীংষি জ্বালা যস্যানলস্য তদ্বৎ স্থিতঃ॥

১১। যবীয়াংসমুৎকলাৎ কনিষ্ঠম্॥

১২। ইষ্টা প্রিয়া ভার্য্যা॥

১৪। নিশিথো নিশীথঃ॥

১৫। স সর্ব্বতেজাশ্চক্ষুঃসংজ্ঞং মনুং সুতমবাপ। মনোর্মহিষী নড্‌লা বিরজান্ শুদ্ধান্ পুরুপ্রমুখান্ দ্বাদশ সুতানসূত॥

১৯। অঙ্গ! হে বিদুর! বাগেব বজ্রং যেষাম্॥

২০। মথনে হেতুঃ—অরাজক ইতি। আদ্যঃ, পুরগ্রামাদীনাং তেন রচিতত্বাৎ॥

২১। যদ্ যস্যাঃ প্রজায়া হেতোর্বিমনাঃ সন্ যযৌ॥

২২। কিঞ্চ, অংহোঽপরাধং বেণে উদ্দিশ্য আলক্ষ্য॥

২৩। যতোঽয়মধর্ম্ম ইত্যাহ—নাবধ্যেয়োঽবজ্ঞেয়োঽপি ন ভবতি॥

২৪। পরাবরবিদাং মধ্যে অতিশ্রেষ্ঠঃ॥

২৫। অভাবী পুত্রঃ কাম্যকর্ম্মণা বলাদাপাদিতো ন সুখায় ভবেদিতি দ্যোতয়ন্নঙ্গস্য পুত্রোৎপত্তিক্রমমাহ—অঙ্গ ইত্যাদিনা॥

২৭। অযাতযামান্যগতবীর্য্যাণি॥

২৯। যজ্ঞে গৃহীতমৌনোঽপি বাচং ব্যসৃজৎ প্রাযুঙ্‌ক্ত॥

৩০। আহুতা আহূতাঃ, গ্রহান্ সোমপাত্রাণীহ যজ্ঞে ন গৃহ্ণন্তি ॥

৩১। ইহ জন্মনি তাবন্মনাগপি ঈষদপ্যঘং ন স্থিতম্, কথঞ্চিজ্জাতস্যাঘস্য সদ্য এব প্রায়শ্চিত্তৈঃ ক্ষালনাৎ, কিন্তু প্রাক্তনমেকমঘমস্তি, যদ্যস্মাদীদৃগ্গুণাধিকোঽপি ত্বং প্রজারহিতঃ ॥

৩২। অতো যথা দেবা হবির্গৃহ্ণন্তি, তথাত্মানং সুপ্রজং সাধয়। কথং সাধনীয়ম্? তত্রাহুঃ—ইষ্ট ইতি ॥

৩৩। তথা সতি স্বভাগান্ গ্রহীষ্যন্তি, যদ্যতো হরিঃ সাক্ষাদ্বৃতঃ স্যাদতস্তেন সহ সর্ব্বে দেবা আগমিষ্যন্তীত্যর্থঃ ॥

৩৪। নন্বতিতুচ্ছান্ কামান্ হরিঃ কথং দদ্যাৎ? তত্রাহ—তাংস্তানিতি ॥

৩৫। প্রজাতয়ে পুত্রোৎপত্তয়ে। শিপিবিষ্টায় শিপিষু পশুষু যজ্ঞরূপেণ প্রবিষ্টায়। তথা চ শ্রুতিঃ—'যজ্ঞো বৈ বিষ্ণুঃ, পশবঃ শিপির্যজ্ঞ এব পশুষু প্রতিতিষ্ঠতি' ইতি ॥

৩৬। তস্মাদিতি যোগ্যতয়াগ্নেঃ ॥

৩৭। পত্ন্যৈ প্রাদাৎ ॥

৩৮। পুমাংসং সূতেঽনেনেতি তথা তৎ প্রাশ্য পত্যুঃ সকাশাদ্গর্ভমাদধে; অপ্রজাঃ সতী ॥

৩৯। মাতামহং মৃত্যুম্, মৃত্যোর্হি পুত্রী সুনীথা ॥

৪০। মৃগয়ুর্লুব্ধকঃ সন্, তং দৃষ্ট্বা বেণোঽসাবাগচ্ছতীতি জনঃ সর্ব্বোঽপ্যরোৎ চুক্রোশ ॥

৪১। আক্রীড়ে ক্রীড়াস্থানে বালান্ পশূনিবামারয়ৎ ॥

৪২। বিচক্ষ্য দৃষ্ট্বা ॥

৪৩—৪৫। দুর্ম্মনসস্তস্য কুপুত্রনিন্দাবাক্যান্যাহ—প্রায়েণেতি ত্রিভিঃ। (৪৩) অপ্রজা যে, তৈরভ্যর্চ্চিতঃ; তত্র হেতুঃ—কুৎসিতৈরপত্যৈরাভৃতং দুর্ভরং ধারয়িতুমশক্যং দুঃখং যে ন বিন্দন্তি॥ (৪৪) সর্ব্বেষাং সর্ব্বৈঃ

সহ আধির্মানসী ব্যথা ॥ (৪৫) তং প্রজাপদেশং পুত্রনামমাত্রমপ্যাত্মনো মোহেন বন্ধনম্, যদর্থা যন্নিমিত্তাঃ ক্লেশদা গৃহা ভবন্তি ॥

৪৬। ইদানীং নির্ব্বেদহেতুত্বেন কুৎসিতমেবাপত্যমভিনন্দতি—কদপত্যমিতি। শুচাং পদাচ্ছোকানাং স্থানাৎ। বরত্বে হেতুঃ—নির্ব্বিঘ্নেতেতি। তৎ কুতঃ? যদ্ যতঃ কদপত্যাদ্ গৃহাঃ ক্লেশনিবহা ভবন্তি ॥

৪৭। মহতামুদয়ানাং বিভূতীনামুদয়ো যস্মিন্, তস্মাদ্ গৃহাদ্ গতঃ; যা বেণং সূতে স্ম তাম্ ॥

৪৮। প্রজাঃ পুরোহিতাদয়শ্চ বিচিক্যুরন্বেষিতবন্তঃ। তন্তু তত্রৈব সন্তমপি নাপশ্যন্নিতি দৃষ্টান্তেনাহ—যথেতি ॥

৪৯। সাশ্রবো রুদন্তঃ; ভর্ত্তুর্বিপ্লবং নাশমদর্শনমিত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
ত্রয়োদশোঽধ্যায়ঃ ॥ ১৩ ॥

চতুর্দ্দশোঽধ্যায়ঃ

চতুর্দ্দশে তু দুষ্পুত্র-ভয়াদঙ্গে গতে দ্বিজৈঃ।
অভিষিক্তস্য বেণস্য রোষাত্তৈর্বধ উচ্যতে ॥ (১)

১। ক্ষেমদর্শিনঃ ক্ষেমচিন্তকাঃ, পশুসমানরূপতাং পশ্যন্তঃ ॥

২। অমাত্যাদীনাং প্রকৃতীনামসম্মতমপি। প্রকৃত্যাসম্মতমিতি পাঠান্তরে প্রকৃত্যা স্বভাবেনৈবাসম্মতম্ ॥

৩। চৌরা লীনা বভূবুঃ ॥

৪। আরূঢ়ং নৃপস্থানং রাজাসনং যেন। অষ্টবিভূতিভির্লোকপালৈশ্বর্য্যৈঃ ॥

৭। সত্রিণো মিলিতাঃ সন্তঃ ॥

৮। মূলতশ্চাগ্রতশ্চ দীপ্তে জ্বলিতে কাষ্ঠে তন্মধ্যবর্ত্তিনাং পিপীলিকাদীনাং যথা উভয়তো ব্যসনম্, এবং তস্করেভ্যঃ পালকাচ্চ দুঃখং প্রাপ্তমিত্যর্থঃ ॥

৯। তদেবাহুঃ—অরাজকভয়াদিতি। অতদর্হণো রাজ্যানর্হঃ। অস্মাকমপ্যনিষ্টং জাতমিত্যাহুঃ—অহের্যথা পয়ঃপোষঃ ক্ষীরেণ পোষণং পোষকস্থাপ্যনর্থং বিভর্ত্তি পুষ্ণাতি ॥

১০। তদেবাহুঃ - বেণ ইতি। নিরূপিতো নিযুক্তোঽস্মাভিঃ ॥

১১। সান্ত্বয়েম, অমুমুপপত্তিভিঃ প্রার্থয়িষ্যামঃ। তস্য পাতকম্ ; স্বস্য তৎপাতকস্পর্শে হেতুঃ—তৎ পাতকং বিদ্বদ্ভিঃ ॥

১৩। গূঢ়ো মন্যুর্যেষাম্ ; সামভিঃ প্রিয়োক্তিভিঃ ॥

১৫। নিষ্কামাণামানন্ত্যং মোক্ষমপি ॥

১৬। মা বিনশেৎ, মা বিনশ্যতু ॥

১৭। অসাধবো যে অমাত্যাস্তেভ্যঃ। যথা যথাশাস্ত্রম্ ॥

২১। সর্ব্বান্ লোকাংশ্চ, তৎপালানমরাংশ্চ, তৎপ্রাপকান্ যজ্ঞাংশ্চ সংগৃহ্লাতি নিযচ্ছতীতি তথা তম্। বিচিত্রৈর্যজ্ঞদ্রব্যাদিভির্ভবায় সমৃদ্ধয়ে, স্বদেশাংস্তদ্বাসিনো জনাননুরোদ্ধুমনুবর্ত্তিতুম্ ॥

২২। যুষ্মদ্বিষয়ে ত্বদ্দেশে ; হরেঃ কলা অংশাঃ সুরাঃ ; তেষাং সুরাণাং হেলনমবজ্ঞাম্ ॥

২৩। বালিশা অজ্ঞাঃ ; বৃত্তিদমন্নাদিপ্রদং মাং হিত্বা ॥

২৫। ভর্ত্তৃস্নেহো বিদূরো যেষাম্ ॥

২৭। যতো দেহে ভবন্তি নৃপতেরতো নৃপতিরেবেশ্বরঃ, ইতরে তদংশা ইতি ভাবঃ ॥

২৮। বলিঞ্চ করাদিকম্ ; অগ্রভুগারাধ্যঃ ॥

৩০। তেনাসৎকৃতাঃ, ভগ্নায়াং ভব্যায়াং যাচ্ঞায়াং চক্রুধুঃ ক্রোধং চক্রুঃ ॥

৩৩। পরিচক্ষীত নিন্দেৎ, অশুভং বেণং বিনা। কৃতঘ্নতামাহুঃ—যদনুগ্রহবিষয়ঃ সন্নীদৃশমৈশ্বর্য্যং যঃ প্রাপ্তঃ॥

৩৪। পূর্ব্বং গূঢ়মন্যবঃ, ইদানীং রূঢ়মন্যবঃ প্রকটকোপাঃ। হুঙ্কৃতৈর্হুঙ্কারৈঃ॥

৩৫। স্বাশ্রমপদং প্রতি ঋষিভির্গতে গমনে কৃতে সতি বিদ্যাযোগেন মন্ত্রসহিতয়া যুক্ত্যা পালয়ামাস॥

৩৬। পুংবদ্ভাব আর্ষঃ; সরস্বত্যাঃ সলিলে আপ্লুতাঃ কৃতস্নানা বিষ্ণুকথাশ্চক্রুঃ॥

৩৭। তদা উত্থিতানুৎপাতান্ বীক্ষ্য ভুবোঽভদ্রং ন ভবেৎ কিমিত্যাহুঃ॥

৩৮। এবং মৃশন্তস্তর্কয়ন্ত ঋষয়ঃ স্থিতাঃ। তদা ধাবতাং চৌরাণাং ভূরিঃ পাংশুঃ সমুত্থিতঃ॥

৩৯। তত্তদা তেষাং লোকস্য ধনং লুম্পতাং জিঘাংসতাঞ্চোপদ্রবমাজ্ঞায়॥

৪০। তদা চৌরপ্রায়মরাজকং হীনসত্ত্বঞ্চ জনপদমাজ্ঞায়, শক্তা অপি, অবারণে দোষদর্শিনোঽপি জনা লুম্পতো লোকান্ নাবারয়ন্নিতান্বয়ঃ॥

৪১। শক্তানাং ক্ষত্রিয়াণামবারণে দোষ ইতি কিং বক্তব্যম্, সমদৃগপি শান্তোঽপি ব্রাহ্মণোঽপি যদি দীনানাং সমুপেক্ষকো ভবেৎ, তর্হি তস্যাপি ব্রহ্ম তপঃ স্রবতি॥

৪২—৪৩। অত উপেক্ষাদোষপরিহারায় নাঙ্গস্যেত্যাদি বিনিশ্চিত্য মহীপতেরূরুং তরসা মমন্থুরিত্যন্বয়ঃ। সংস্থাতুং নাশং গন্তুম্; যদ্বা, ঋষয় এব লুম্পতো লোকান্ নাবারয়ন। কথম্ভূতাঃ? হুঙ্কারৈরেব তান্ নিবারয়িতুং শক্তা অপি। তৎ কিম্? তস্মিন্ নিবারণে তন্মরণাদিদোষদর্শিনঃ। ন চোদাসত, চৌরোপদ্রুতদীনোপেক্ষায়াং তপোহানিপ্রসঙ্গাৎ। ন চান্যং

তন্নিবারকং রাজানমকুর্ব্বন্, অঙ্গবংশোচ্ছেদস্যানর্হত্বাৎ; অতো বেণস্যৈব দেহং মমন্থুরিতি যোজ্যম্। বাহুকো বামনঃ॥

৪৪। তমেবাহ—কাক ইব কৃষ্ণঃ। মহত্যৌ হনূ কপোলপ্রান্তৌ যস্য; হ্রস্বৌ পাদৌ যস্য॥

৪৬। গিরিঃ কাননঞ্চ গোচর আশ্রয়ঃ, ন তু পুরাদিপ্রবেশো যেষাং তে। তত্র হেতুঃ—যেন কারণেনাসাবহরৎ, ততস্তস্য বংশ্যাস্তথাভূতাঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ॥ ১৪॥

পঞ্চদশোঽধ্যায়ঃ

ততঃ পঞ্চদশে বিপ্রৈর্মথনাদ্বেণবাহুতঃ।
জাতস্য তু পৃথোরুক্তমভিষেকার্হণাদিকম্॥ (১)

৩—৬। কিমূচুরিত্যত আহ—এষ ইতি চতুর্ভিঃ। (৩) লক্ষ্ম্যাঃ সম্ভূতিঃ কলা॥ (৪) অত্র যঃ পুমান্, স তু মহারাজো ভবিষ্যতি॥ (৫) সুদতী শোভনদন্তবতী, গুণানাং ভূষণানাঞ্চ ভূষণরূপা, অবরুন্ধতী ভর্ত্তৃত্বেন ভজন্তী ভবিষ্যতি॥ (৬) অত্র হেতুঃ—এষ ইতি। লোকস্য রিরক্ষয়া রিরক্ষিষয়া॥

৭। স্বঃস্ত্রিয়ঃ—অপ্সরসো নৃত্যন্তি স্ম॥

৯। দেবৈঃ সহ আস্থত্য আগত্য। বৈণ্যস্য পৃথোশ্চিহ্নং রেখাত্মকং চক্রম্॥

১০। অপ্রতিহতং রেখান্তরৈরভিন্নং চক্রং যস্য চিহ্নম্, স পরমেশ্বরস্যাংশঃ॥

১১। আভিষেচনিকানি—অভিষেকসাধনানি॥

১৪। হে বীর ! বরমাসনমুত্তমাসনম্। সলিলস্য স্রাবো যস্মাৎ॥

১৫। দ্বে বালব্যজনে॥

১৬। ব্রহ্মময়ং বেদময়ং বর্ম্ম কবচম্। তৎপত্নী শ্রীঃ, শ্রিয়ং সম্পদম্॥

১৭। দশচন্দ্রাকারাণি বিম্বানি কোশে যস্য তমসিং খড়্গম্; শতচন্দ্রং চর্ম্ম; রূপাশ্রয়মতিসুন্দরম্॥

১৮। অজস্য গোশ্চ শৃঙ্গাভ্যাং নির্মিতং চাপম্। যোগময্যৌ পাদ-স্পর্শমাত্রেণাভীষ্টদেশপ্রাপিকে॥

১৯। নাট্যাদিকৌশলং খেচরাঃ। আত্মজং স্বপ্রভবম্॥

২০। তং স্তোতুমুপস্থিতাঃ॥

২১। স্তাবকান্ স্তোতুমুদ্যতানভিপ্রেত্য জ্ঞাত্বা॥

২২। লোকে স্পষ্টগুণস্য সতো মে স্তুতিঃ স্যাৎ, অধুনা তু কিমাশ্রয়ো মে স্তবো যোজ্যতাম্? অতো বো গিরোঽধুনা ময়ি বিতথা মা ভূবন্। যদ্বা, লোকেঽধুনা অস্পষ্টগুণস্য মে কিমাশ্রয়ঃ স্তবঃ স্যাৎ? অত এষ ক্রিয়-মাণঃ স্তবোঽমে মদন্যস্য যোজ্যতাম্, ন তু মে বিতথাভিধানাপত্তেরিত্যর্থঃ॥

২৩। তস্মাৎ পরোক্ষে কালান্তরে স্পষ্টেষু গুণেষু সৎস্বস্মাকমুপশ্রুতানি যশাংসি প্রতি স্তোত্রমলমত্যর্থং করিষ্যথ। হে অপীব্যবাচঃ! মধুরগিরঃ! সভ্যৈঃ প্রেরিতা বয়ং ত্বামেব স্তুম ইতি চেৎ, তত্রাহ—উত্তমঃশ্লোকস্য গুণানুবাদে কার্য্যে সতি জুগুপ্সিতমর্ব্বাচীনং ন স্তাবয়ন্তি॥

২৪। ননু সম্ভাবিতৈরেব গুণৈরাত্মানং জনঃ স্তাবয়তীতি চেৎ, তত্রাহ—মহতাং গুণানাত্মনি সম্পাদয়িতুং শক্তোঽপি অসতো গুণান্ সম্ভাবনা-মাত্রেণ কঃ স্তাবয়তে? যদ্বা, আদাবেব সতোঽপি কঃ স্তাবয়তে? স্বত এব প্রখ্যাতিসিদ্ধেঃ। অন্যস্তু মিথ্যাগুণস্তুতিশ্লাঘী মন্দ ইত্যাহ—ত ইতি। যদ্যয়ং শাস্ত্রাভ্যাসাদিকমকরিষ্যৎ, তর্হি তেঽস্য বিদ্যাদয়ো গুণা অভবিষ্যন্নিতি ক্রিয়াতিপত্ত্যা বিপ্রলব্ধো জনানামবহাসং ন বেদ॥

২৫। কিঞ্চ, প্রভবোঽপি বিশ্রুতা অপি হ্রীমন্তো জুগুপ্সন্তি। বেতি দৃষ্টান্তে। যথাতিস্তুতৌ ক্রিয়মাণায়াং বিগর্হিতং ব্রাহ্মণবধাদি পৌরুষং নিন্দন্তি, তথোচিতামপি স্তুতিং ন সহন্ত ইত্যর্থঃ ॥

২৬। বরীমভিরিতি দীর্ঘত্বমার্ষম্; ভবিতৃপ্রধানশ্চায়ং নির্দ্দেশঃ; বরিষ্ঠৈঃ কর্ম্মভিরবিদিতা ইত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
পঞ্চদশোঽধ্যায়ঃ ॥ ১৫ ॥

ষোড়শোঽধ্যায়ঃ

ষোড়শে সর্ব্বলোকেশৈঃ সৎকৃতং ভার্য্যয়া যুতম্।
মুনিপ্রযুক্তাঃ সূতাদ্যাঃ স্তুবন্তি স্মেতি বর্ণ্যতে ॥ (১)

১। গায়কাঃ—সূতাদয়ঃ ॥

২। নালং ন সমর্থাঃ; যো ভবান্, অবতারেষপ্যস্যাধিক্যমাহুঃ। বেণস্যাঙ্গাজ্জাতস্য তে পৌরুষাণি প্রত্যবিতর্ক্যতয়া ব্রহ্মাদীনামপি ধিয়ো বভ্রমুঃ, কুতঃ পুনর্ব্বয়ং তদ্বর্ণনে সমর্থা ভবেম ?

৩। অথাপি যথাবদ্‌বর্ণয়িতুমশক্তা অপি কথামৃতে সাদরাঃ, মুনিভিঃ কৃত উপদেশো যোগবলেন হৃদি প্রকাশনাৎ, তমনতিক্রম্য, বিতন্মহি বিস্তারয়ামঃ ॥

৫। তনৌ স্বদেহে লোকপালানাং তনূর্মূর্ত্তীঃ কালে কালে বিভর্ত্তি। যথাভাগং পালনপোষণানুরঞ্জনাদিকার্য্যানুসারেণ যজ্ঞাদিপ্রবর্ত্তনেন স্বর্গস্য হিতম্, বৃষ্ট্যাদিপ্রবর্ত্তনেন ভূর্লোকস্য চ হিতং যথা ভবতি তথা ॥

৬—১৩। সূর্য্যাদিতনুধারণমেবাহ অষ্টভিঃ। (৬) বসু ধনং করাদানকাল আদত্তে, দুর্ভিক্ষাদিকালে বিমুঞ্চতি চ। অষ্টৌ মাসান্ সূর্য্যো যথা বসু জলমাদত্তে, বিমুঞ্চতি বর্ষাসু, তদ্বৎ॥ (৭) মস্তকে পাদেনাক্রামতামপ্যার্ত্তানাং ভূতানামতিক্রমং সহিষ্যতে। ক্ষিতের্বৃত্তিঃ সর্ব্বসহনম্, সা বৃত্তির্যস্যাস্তি, স তথা॥ (৮) দেবে অবর্ষত্যেব কৃচ্ছ্রং গতাঃ প্রাণা যাসাং তা প্রজাঃ স্বয়ং বৃষ্টিং কৃত্বা রক্ষিষ্যতি। তত্র হেতুঃ—অসৌ নরদেববপুর্হরিরিতি॥ (৯) বদনমেবামৃতমূর্ত্তিশ্চন্দ্রস্তেন, সানুরাগোঽবলোকো যস্মিন্ তেন, বিশদং যৎ স্মিতং তেন চারুণা। অত্র চ কচিদ্বর্ত্তমাননির্দ্দেশো 'বর্ত্তমানসামীপ্যে বর্ত্তমানবদ্বা' ইতি, ভূতনির্দ্দেশশ্চ 'আশংসায়াং ভূতবচ্চ' ইতি দ্রষ্টব্যঃ॥ (১০) ন ব্যক্তং বর্ত্ম প্রবেশ-নির্গময়োর্মার্গো যস্য, নিগূঢ়ং নিষ্পত্তেঃ পূর্ব্বমবিজ্ঞাতং কার্য্যং যস্য, তচ্চ কার্য্যং গম্ভীরং কিমর্থমেতৎ কৃতমিত্যন্যৈরজ্ঞাতাভিপ্রায়ং বিধত্ত ইতি তথা; উপগুপ্তং সুরক্ষিতং বিত্তং যস্য, অনন্তমাহাত্ম্যশ্চাসৌ গুণানামেকং ধাম বিষ্ণুর্যস্মিন্ সঃ, অনন্তমাহাত্ম্যোপেতা গুণা এবৈকং ধাম স্থানং যস্যেতি বা, সংবৃতাত্মা সংযতমূর্ত্তিঃ, সমুদ্রচরত্বেন বরুণস্যাপ্যেতে গুণা দ্রষ্টব্যাঃ॥ (১১) দুরাসদঃ শত্রোর্মনসাপি প্রাপ্তুমশক্যঃ, দুর্ব্বিষহঃ শত্রুভিঃ সোঢ়ুমশক্যঃ, বিদূরবৎ পৌরুষেণাপ্যভিভবিতুমশক্যঃ; বেণ এবারণিস্তস্মাদুত্থিতঃ॥ (১২) চারৈর্গুপ্তভৃত্যৈঃ পশ্যন্নপি স্বস্তুতিনিন্দাদাবুদাসীন ইব বর্ত্তিষ্যতে। যথা দেহিনামধ্যক্ষোঽধিকৃত আত্মভূতো বায়ুঃ সূত্রাত্মা, তদ্বৎ॥ (১৩) আত্মদ্বিষাং সুতমিতি সুতগ্রহণং স্বাত্মজসাম্যার্থম্। ধর্ম্মপথে যমস্য বৃত্তে স্থিতঃ॥

১৪। চক্রমাজ্ঞা, সেনা বা, রথস্য বা চক্রম্, মানসাচলমভিব্যাপ্য বর্ত্ততে। কিং পর্য্যন্তমিত্যাহ—অর্কো রশ্মিগণৈর্যাবত্তপতি, তাবৎ॥

১৫। যদ্‌যস্মাদ্ রঞ্জয়িষ্যতি, অথ তস্মান্মনোরঞ্জনৈর্হেতুভিরমুং রাজানমাহুঃ; মনোরঞ্জনকৈরিতি চেষ্টিতবিশেষণং বা॥

১৭। মাতরীব ভক্তির্ভজনং যস্য ; আত্মনো দেহস্যার্দ্ধ ইব পত্ন্যাং প্রীতিমান্ ॥

১৮। নন্দিং সুখং বর্দ্ধয়তীতি তথা, মুক্তসঙ্গেষু প্রকৃষ্টঃ সঙ্গো যস্য, দণ্ডপাণিরিত্যপরাধানুপেক্ষণমুচ্যতে, নাদণ্ড্যমিত্যত্র তু পক্ষপাতাভাব উক্তঃ ॥

১৯। অয়স্ত্বিতি 'তু'-শব্দেন নিরুপমত্বং দর্শয়তি। কোঽসাবাত্মা ? তমাহ—যস্মিন্ প্রতীতমপি নানাত্বমর্থশূন্যং পশ্যন্তি ॥

২০। আ উদয়াদ্রেস্তৎপর্য্যন্তং গোপ্তা গোপায়িষ্যতি। তদর্থং পর্য্যেষ্যতে পর্য্যটিষ্যতি, প্রদক্ষিণীকরিষ্যতীত্যর্থঃ ॥

২১। অস্মৈ তথা প্রদক্ষিণং কুর্ব্বতে, মংস্যন্তে জ্ঞাস্যন্তি, তস্য যশ উদ্ধরন্ত্য উদাহরন্ত্যঃ কীর্ত্তয়ন্ত্যঃ ॥

২২। ইন্দ্র ইবাদ্রীন্ ভিন্দন্ ॥

২৩। লাঙ্গুলমুত্থম্যোন্নময্য যথা মৃগেন্দ্রশ্চরতি, তথা ধনুর্বিস্ফূর্জ্জয়ন্ যদা ক্ষ্মামচরৎ ॥

২৪। সরস্বতী যত্র প্রাদুরভাবি প্রাদুর্ভূতা, কর্ম্মকর্ত্তরি চিণ্, তত্রাহার্ষীৎ ॥

২৬। বিশ্রুতা বিক্রমা যস্য, গাথাশ্চ প্রবন্ধান্ ; আত্মাশ্রিতা বিষ্ণ্বাশ্রিতাঃ ॥

২৭। উপগীয়মানো মহানুভাবো যস্য ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে

ষোড়শোঽধ্যায়ঃ ॥ ১৬ ॥

সপ্তদশোঽধ্যায়ঃ

ততঃ সপ্তদশে লোক-ক্ষুধাং প্রশময়ন্ পৃথুঃ।

গ্রস্তবীজাং মহীং হন্তুং যত্তো ভীত্যা তয়া স্তুতঃ॥ (১)

১। ছন্দয়ামাস তোষিতবান্॥

২। ভৃত্যানমাত্যান্, পুরোধসঃ পুরোহিতাংশ্চ, শ্রেণীস্তৈলিকতাম্বূলিকাদীন্ পৌরবিশেষান্, প্রকৃতীর্নিয়োগিনঃ॥

৩। দোহনম্—পাত্রম্॥

৪। মেধ্যম্—যজ্ঞার্হম্॥

৫। সবিজ্ঞানমপরোক্ষজ্ঞানসহিতম্॥

৬। পূর্ব্বদেহঃ পৃথ্ববতারস্তৎকথাশ্রয়ম্, শ্রবো যশঃ, সুষ্ঠু শ্রবো যস্য॥

৭। অদুহৎ—দুগ্ধবান্॥

৯। জনতায়াস্ত্বং পাল ইত্যামন্ত্রিতো নিযুক্তঃ। তদা নিরন্নে ক্ষিতিতলে সতি, ক্ষুধা ক্ষামা ক্ষীণা দেহা যাসাং তাঃ প্রজা এত্য পতিং পৃথুমব্রুবন্॥

১০। জাঠরেণাগ্নিনাভিতপ্তাঃ, যঃ সাধিতো বিপ্রৈর্মন্থনেন সম্পাদিতস্তং ত্বাং শরণং যাতাঃ॥

১১। তত্তস্মান্নোঽস্মাকমন্নং রাতবে রাতুং দাতুমীহতু, ঈহতাং যত্নং করোতু। উজ্ঝিতোর্জ্জাস্ত্যক্তান্নাঃ সত্যঃ। বার্ত্তায়া জীবিকায়াঃ পতিঃ॥

১২। পরিদেবিতম্—বিলাপম্, নিমিত্তং হেতুমন্বপশ্যত জ্ঞাতবান্॥

১৩। পৃথিব্যা ওষধিবীজানি গ্রস্তানীতি ব্যবসিতো নিশ্চিতবান্ সন্॥

১৪। মৃগয়ুণা দ্রুতা অনুগতা মৃগীব॥

১৬। রোদসী দ্যাবাপৃথিব্যৌ, তয়োরন্তরমন্তরীক্ষঞ্চ। অনু পৃষ্ঠত উদ্যতমায়ুধং যেন, তম্॥

১৯। যো ধর্ম্মজ্ঞ ইতি মতঃ, স ভবান্ যোষাং মাং কথমহনিষ্যৎ হনিষ্যতি ?

২১। অজরাং দৃঢ়াম্, ধাস্যসি ধারয়িষ্যসি ॥

২২। বর্হিষি যজ্ঞে যা ভবতী দেবতারূপেণ ভাগং বুঙ্‌ক্তে ভজতে, বসু ধান্যাদিকম্ ॥

২৩। যা গোরূপেণ যবসং তৃণং জগ্ধি অত্তীত্যর্থঃ। পয়স্তু নৈব দোগ্ধি, দুগ্ধং ন স্রবতি, অস্মিন্নপরাধে ॥

২৪। আত্মনি দেহে রুদ্ধানি ॥

২৫। মদ্বধে সর্ব্বথা অন্নং ন স্যাদিতি চেৎ, অত আহ—অমূষাং প্রজানাম্, মেদসা মাংসেন ॥

২৬। যদুক্তং যোষাং কথং হনিষ্যতীতি, তত্রাহ—পুমানিতি। তস্য বধোঽবধ এব ॥

২৭। যচ্চোক্তং কথমম্ভসি ধাস্যতীতি, তত্রাহ—ত্বামিতি। তিলশঃ তিলপ্রমাণানি খণ্ডানীত্যেবম্ভূতামবস্থাং নীত্বা ॥

২৮। মন্যুময়ীং মূর্ত্তিং বিভ্রতঃ কৃতান্ততুল্যত্বমুচ্যতে, ন তু কৃতান্তস্য মন্যুময়ী মূর্ত্তিরতি।

শুদ্ধসত্ত্বতনুং দেবমকস্মাদতিদারুণম্।
বীক্ষমাণা পৃথুং পৃথ্বী তুষ্টাব করুণোক্তিভিঃ ॥ (২)

২৯। মায়য়া বিন্যস্তা রচিতা নানা ঘোরাদিতনবো যেন। গুণাত্মনে গুণময়ত্বেন প্রতীয়মানায়, বস্তুতস্তু নির্দ্ধুতা নিরস্তা দ্রব্যক্রিয়াকারকেষু অধিভূতাধ্যাত্মাধিদৈবেষু বিভ্রমোঽহঙ্কারস্তন্নিমিত্তা ঊর্ম্ময়ো রাগদ্বেষাদয়শ্চ যস্মিন্ তস্মৈ ॥

৩০। অহো সর্ব্বজীবাশ্রয়ত্বেন স্রষ্টাং মাং কথং হন্তুং প্রবর্ত্তস ইত্যাহ—যেন বিধাত্রা আত্মনাং জীবানামায়তনমহং বিনির্মিতা ; যতো যস্যাং ময়ি গুণসর্গস্য চতুর্বিধভূতগ্রামস্য সংগ্রহো ধারণম্, স্বরাট্ স্বতন্ত্রঃ ॥

৩১। স্বষ্টিসংহারাবেক কর্ত্তৃকাবিতি চেৎ, তথাপি প্রজাপালনে প্রবৃত্তস্য মদ্বধোঽনুচিত এবেত্যাহ—য এতদিতি। আত্মাশ্রয়য়া জীববিষয়িণ্যা ॥

৩২। অতো দুর্জ্ঞেয়মীশ্বরচেষ্টিতমিত্যাহ—নূনমিতি। অকৃতাত্মভি-র্বিক্ষিপ্তচিত্তৈঃ। য ঈশ্বরঃ স্বতন্ত্রোঽকরোদ্ ব্রহ্মাণম্। পরত ইতি তেন ব্রহ্মণা চরাচরমকারয়ৎ, যশ্চ স্বত একঃ, পরতো মায়য়া অনেকঃ ॥

৩৩। তস্মা অচিন্ত্যশক্তয়ে কেবলং নম ইত্যাহ—সর্গাদি জন্মস্থিতি-ভঙ্গমস্য জগতোঽনুরুণদ্ধি অনুবর্ত্ততে করোতি। দ্রব্যাণি মহাভূতানি, ক্রিয়া ইন্দ্রিয়াণি, কারকা দেবাঃ, চেতনা বুদ্ধিঃ, আত্মা অহঙ্কারঃ, তৈঃ স্বশক্তিস্বরূপৈঃ, সমুন্নদ্ধাঃ সমুৎকটা নিরুদ্ধাঃ শক্তয়ো যস্য ॥

৩৪—৩৫। প্রাণিনাং ধারণার্থং মাং রসাতলাদুদ্ধৃত্যেদানীং প্রজা-রক্ষণে প্রবৃত্তস্য মদ্বধো ন যুক্ত ইতি সকরুণমাহ দ্বাভ্যাম্। (৩৪) হে অজ! যঃ স্বষ্টবান্, স এব ভবান্ স্বনির্মিতং চরাচরং জগৎ সম্যক্ স্থাপয়িতুমাদি-শূকরঃ সন্ মামভ্যুজ্জহার ॥ (৩৫) স এব ধরাধরো বরাহোঽস্থ অপামুপস্থে উপরি ময়ি নাব্যাধারভূতায়ামবস্থিতাঃ প্রজা রক্ষিতুমিচ্ছুর্বীরমূর্ত্তিঃ পৃথুরূপঃ সমভূৎ। য এবম্ভূতঃ, স তু ত্বং পয়সি নিমিত্তে মাং জিঘাংসসীতি চিত্রমিত্যর্থঃ ॥

৩৬। তস্মাদীশ্বরচেষ্টিতং দুর্জ্ঞেয়মিতি কৈমুত্যন্যায়েনোপসংহরতি—নূনমিতি। তস্যেশ্বরস্য গুণসর্গরূপয়া মায়য়া মোহিতং চিত্তমেব বর্ত্ম যেষাম্, মোহিতানি চিত্তবর্ত্মানি যেষামিতি বা তৈর্জনৈরীশ্বরাণাং হরিভক্তানামেব তাবদীহিতং ন জ্ঞায়তে, কিং পুনস্তস্য পরমেশ্বরস্য, অতঃ পরমেশ্বরবৎ তেভ্যোঽপি নম এব কেবলম্। বীরাণাং জিতেন্দ্রিয়াণাং যশঃ কুর্ব্বন্তি যে তেভ্যঃ, যথা বীরাণাং যশো বর্দ্ধেত, তথা চেষ্টতাম্, ন তু যথেষ্টমিতি ভাবঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে

সপ্তদশোঽধ্যায়ঃ ॥ ১৭ ॥

অষ্টাদশোঽধ্যায়ঃ

অষ্টাদশে মহীবাক্যাদ্‌বৎসপাত্রাদিভেদতঃ।
পৃথ্বাদিভিস্তু ক্রমশঃ সা চ দুগ্ধা ইতীর্য্যতে[১] ॥ (১)

২। হে অভিভো, প্রভো! যদ্বা, ভো দেব! অভি অভয়ং যথা ভবতি এবং মন্যুং সংনিযচ্ছ, শ্রাবিতং বিজ্ঞাপিতম্, ন মদ্বাক্যেঽনাদরঃ কর্ত্তব্য ইত্যাহ—বুধো হি সর্ব্বতঃ সারমাদত্তে ॥

৩—৫। ময়ি জীর্ণা ওষধীরূপা যেন গৃহাণেতি বক্তুমুপায়েন সর্ব্বং সিধ্যতি, নান্যথেত্যাহ—অস্মিন্নিতি ত্রিভিঃ। (৩) পুংসাং শ্রেয়সঃ পুরুষার্থস্য প্রসিদ্ধয়েঽস্মিঁল্লোকে কৃষ্যাদয়ঃ, অমুষ্মিংশ্চ লোকেঽগ্নিহোত্রাদয়ো যোগা উপায়া দৃষ্টাঃ, প্রযুক্তা অনুষ্ঠিতাশ্চ ॥ (৪) পূর্ব্বৈর্দর্শিতান্, অবরোঽর্ব্বাচীনঃ ॥ (৫) অবিদ্বান্, বিদ্বানপীতি বা ব্যভিচরন্তি ন সিধ্যন্তি ॥

৬—১১। সহেতুকমুপায়মাহ—পুরেতি ষড়্‌ভিঃ ॥ (৭) ভবদ্ভিরিতি রাজসামান্যাভিপ্রায়েণ, বেণাদিভিরিতি বা, অপালিতা চৌরাদ্যনিবারণাৎ, অনাদৃতা চ যজ্ঞাদিপ্রবর্ত্তনাভাবাৎ। যজ্ঞার্থে অগ্রসং গিলিতবতী, অন্যথা অধৃতব্রতৈর্ভুক্তা ন প্ৰসোষ্যন্তে, ততশ্চ যজ্ঞাদয়ো ন সিধ্যেরন্নিতি ভাবঃ ॥ (৮) ক্ষীণা জীর্ণা ॥ (৯) বৎসম্, দোহনং দোহপাত্রম, দোগ্ধারঞ্চোপকল্পয়, ধোক্ষ্যে প্রপূরয়িষ্যামি ॥ (১০) ভূতানামভীপ্সিতমন্নম্, উর্জস্বং বলপ্রদম্ ॥ (১১) অপগতেঽপি বর্ষর্ত্তৌ দেবকৃষ্টমুদকং যথা মে ময়ি সর্ব্বতো বর্ত্ততে ॥

১২। মনুং স্বায়ম্ভুবম্; ওষধীর্ব্রীহ্যাদীঃ ॥

১৩। প্রসঙ্গাদর্থান্তরমাহ—তথেতি। যথা পৃথুঃ, এবং সর্ব্বত্র বাক্যে অপরেঽপি সারমাদদতে। প্রস্তুতমনুবর্ণয়তি—ততোঽন্যে চ ঋষ্যাদয়ঃ পঞ্চদশ দুদুহুঃ। পৃথুনা ভাবিতাং বশীকৃতাম্ ॥

১। পৃথ্বাদিভিস্তু সা দুগ্ধা স্বং স্বং দুগ্ধমিতীর্য্যতে। (ঘ)।

১৪। দেবীং পৃথ্বীম্, বাঙ্মনঃশ্রবণৈর্বেদগ্রহণাদিন্দ্রিয়াণাং পাত্রত্বম্ ॥

১৫। সোমমমৃতম্, বীর্য্যং মনঃশক্তিম্, ওজ ইন্দ্রিয়শক্তিম্, বলং দেহ-শক্তিঞ্চ, তদেব পয়ঃ ॥

১৬। সুরামাসবঞ্চ তালাদিসম্ভবং মদ্যম্ ॥

১৭। মধু বাঙ্মাধুর্য্যম্, সৌভগং সৌন্দর্য্যম্, তৎসহিতম্ ॥

১৮। কব্যং পিতৄণামন্নম্, আমপাত্রে অপক্কে মৃন্ময়ে অধুক্ষত দুদুহুঃ ॥

১৯। সঙ্কল্পনাময়ীমণিমাদিসিদ্ধিম্। যে বিদ্যাধরাদয়স্তে চ তমেব বৎসং প্রকল্প্য নভস্যেব পাত্রে খেচরত্বাদিরূপাং বিদ্যাং দুদুহুঃ ॥

২০। অন্যে চ কিম্পুরুষাদয়োঽন্তর্দ্ধানেনাদ্ভুতাত্মনাং সম্বন্ধিনীং মায়াং ধারণাময়ীং সঙ্কল্পমাত্রপ্রভবাম্ ॥

২১। ভূতেশো রুদ্রঃ, স এব বৎসো যেষাম্ ; ক্ষতজং রুধিরং তদেবা-সবম্ ॥

২২। অহয়ো নিষ্ফণাঃ, দন্দশূকা বৃশ্চিকাদয়ঃ, সর্পাঃ সফণাঃ, ত এব কদ্রুসন্ততিজা নাগাঃ। বিলপাত্রে মুখে ॥

২৩। যবসং তৃণম্, গোবৃষং রুদ্রবাহনবৃষভম্, মৃগেন্দ্রেণেত্যুত্তরেণান্বয়ঃ ॥

২৪। ক্রব্যং মাংসম্, চরং কীটাদি, অচরং ফলাদি ॥

২৬। অনুক্তসংগ্রহার্থমাহ—সর্ব্বে স্বজাতৌ যো মুখ্যস্তেন বৎসেন ॥

২৭। উপসংহরতি—এবমিতি। স্বন্নমভীষ্টমন্নম্, তমেব ক্ষীরভেদং দুদুহুঃ, দোহঃ পাত্রম্ ॥

২৮। ইমাং পৃথ্বীম্ ॥

২৯। ধনুষোঽগ্রেণ গিরিশৃঙ্গাণি চূর্ণয়ন্। রাজরাট্ রাজ্ঞাং রাজা, সর্ব্বেষামাজীবিকাদানাৎ ॥

৩১। গ্রামা হট্টাদিশূন্যাঃ ; পুরো হট্টাদিমত্যঃ, তা এব মহত্যঃ পত্তনানি। দুর্গাণি বিবিধানি, যথাহ বৃহস্পতিঃ—‘ঔদকং পার্ব্বতং বার্ক্ষ-

মৈরিণং ধান্বনং তথা' ইতি। ঘোষানাভীরাণাং নিবাসান্, ব্রজান্ গবাং নিবাসান্, শিবিরং সেনানিবাসস্থানম্, তৎসহিতানাকরান্ স্বর্ণাদি-স্থানানি, খেটাঃ কর্ষকগ্রামাঃ, খর্ব্বটাঃ পর্ব্বতপ্রান্তগ্রামাস্তাংশ্চ তাংশ্চ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং চতুর্থস্কন্ধে
অষ্টাদশোঽধ্যায়ঃ ॥ ১৮ ॥

একোনবিংশোঽধ্যায়ঃ

ঊনবিংশেঽশ্বমেধাঙ্গ-হয়াপহরণাৎ পৃথোঃ।
ইন্দ্রং হন্তুং প্রবৃত্তস্য ধাত্রা বারণমুচ্যতে ॥ (১)

১। হয়মেধশতেন নিমিত্তেন অদীক্ষত দীক্ষিতোঽভূৎ, শতাশ্বমেধ-সঙ্কল্পমকরোদিত্যর্থঃ। ব্রহ্মাবর্ত্তে—'সরস্বতীদৃশদ্বত্যোর্দেবনদ্যোর্যদন্তরম্। তং দেবনির্মিতং দেশং ব্রহ্মাবর্ত্তং প্রচক্ষতে ॥' ইত্যুক্তলক্ষণে ॥

২। আত্মনঃ স্বস্য কর্ম্ম অতিশেত ইত্যতিশয়মভিপ্রেত্য জ্ঞাত্বা, তদিতি তং পৃথোর্যজ্ঞমহোৎসবং ন মমৃষে ন সেহে ॥

৩—৯। অতিশয়মেব দর্শয়তি—যত্রেতি সপ্তভিঃ। (৩) যত্র ক্রতৌ সাক্ষাদন্বভূয়ত প্রত্যক্ষেণাদৃশ্যত ॥ (৫—৬) সিদ্ধাদয়শ্চ তং হরিমন্বীযুরি-ত্যুত্তরেণান্বয়ঃ ॥ (৭) ধর্ম্মদুঘা হবির্দোগ্ধ্রী ধেনুঃ সতী ॥ (৮) উহু-র্বহন্তি স্ম, সর্ব্বরসানিক্ষুদ্রাক্ষাদিরসান্। ক্ষীরঞ্চ দধি চ অন্নঞ্চ পানকাদি[১] গোরসো ঘৃতং তক্রঞ্চ তাংশ্চ। ভূরীণি বিস্তৃতানি বর্ষ্মাণি শরীরাণি যেষাং তে, ফলাদি প্রাস্যয়ন্ত। মধুচ্যুতো মধুস্রাবিণঃ সন্তঃ ॥ (৯) চতুর্বিধং ভক্ষ্যং ভোজ্যং চোষ্যং লেহ্যঞ্চ ॥

১। যাবকাদি (ক)।

১০। অধোক্ষজ ঈশো নাথো যস্য। পরম উদয়োঽভিবৃদ্ধির্যস্মিন্ তৎ কর্ম্ম অসূয়ন্নসহমানঃ প্রতিঘাতং বিঘ্নং চকারেত্যর্থঃ ॥

১১। বৈণ্যে যজুষ্পতিং বিষ্ণুং যজমানে সতি স্পর্দ্ধমান ইন্দ্রস্তিরোহিতঃ সন্নশ্বমপহৃতবান্ ॥

১২। ত্বরমাণং ধাবন্তম্; 'আমুক্তঃ প্রতিমুক্তশ্চ পিনদ্ধশ্চাপিনদ্ধবৎ। সন্নদ্ধো বর্ম্মিতঃ সজ্জো দংশিতঃ' ইত্যমরঃ। পাষণ্ডবেশং কবচমিব গৃহীতবন্তমিত্যর্থঃ। অধর্ম্মে ধর্ম্মবিভ্রমো ধর্ম্মোঽয়মিতি ভ্রান্তিকরো যঃ ॥

১৪। ন মুঞ্চতি স্ম ॥

১৫। হন্তবে হন্তুম্, যজ্ঞহনং যজ্ঞং হৃতবন্তম্ ॥

১৬। গৃধ্ররাট্—জটায়ুঃ ॥

১৭। তস্মৈ হিত্বা তদর্থমুৎসৃজ্য ॥

১৮। বিচক্ষ্য—দৃষ্ট্বা ॥

১৯। উপসৃজ্য সৃষ্ট্বা, তেন চ্ছন্নঃ সন্, চষালো যূপাগ্রে নিক্ষিপ্তঃ কাষ্ঠ-কটকঃ, তদ্যুক্তাৎ যূপাৎ, হিরণ্যনির্ম্মিতা রশনা যস্য তম্, রশনায়া দৃঢ়ত্বেন চ্ছেদাশক্ত্যা রশনাসহিতমেবোদ্ধৃত্য যূপাগ্রান্নীতবানিত্যর্থঃ, বিভুঃ সমর্থঃ ॥

২২। অবদ্যং নিন্দিতং রূপং মন্দপ্রজ্ঞা জগৃহুঃ ॥

২৩। তদেব পাষণ্ডনামনিরুক্ত্যা দর্শয়তি—যানীতি। বহুবচনেনান্যান্যপি গৃহীতানীত্যুক্তম্ ॥

২৪—২৫। তৎ-প্রভৃতি পাষণ্ডমার্গাঃ প্রবৃত্তা ইত্যাহ—এবমিতি। (২৪) তেন গৃহীতেষু, পুনর্বিসৃষ্টেষু ॥ (২৫) নগ্না জৈনাঃ, রক্তপটা বৌদ্ধাঃ, 'আদি'-শব্দেন কাপালিকাদয়শ্চ, তেষু উপধর্ম্মেষু ধর্ম্মোপমেষু ধর্ম্ম এবায়মিতি মতিঃ সজ্জত ইতি দ্বয়োরন্বয়ঃ। পেশলেষু আপাততো রম্যেষু, বাগ্মিষু হেতূক্তিচতুরেষু ॥

২৭। শক্রবধে অভিসন্ধিতং কৃতাভিপ্রায়ম্। প্রচোদিতাৎ পশোর্বধাদন্যস্য বধস্তব ন যুজ্যতে ॥

২৮। তদ্বধঞ্চ বয়ং করিষ্যাম ইত্যাহুঃ—বয়মিতি। অর্থনাশনং যজ্ঞনাশকং ত্বৎকীর্ত্ত্যৈব হতপ্রভমিন্দ্রমাহ্বয়ামহে। কৈঃ? অযাতযামৈরগতবীর্য্যৈরাহ্বানমন্ত্রৈঃ। অনন্তরঞ্চ তে তবাহিতং জুহবাম হোষ্যামঃ ॥

২৯। অস্য পৃথোঃ, স্রুক্ হস্তে যেষাং তান্ ॥

৩০। যমিন্দ্রং যজ্ঞেন জিঘাংসথ, যজ্ঞেনেষ্টাঃ সর্ব্বে সুরা যস্য তনবঃ, স ইন্দ্রো ভবতাং বধার্হো ন ভবতি। যদ্‌যস্মাদ্ যজ্ঞো নামায়মিন্দ্রো ভগবতস্তনুরবতারঃ 'ততঃ সপ্তম আকূত্যাং রুচের্যজ্ঞোঽভ্যজায়ত। সযামাদ্যৈঃ সুরগণৈরপাৎ স্বায়ম্ভুবান্তরম্ ॥' ইত্যুক্তত্বাৎ ॥

৩১। অতো বলীয়সানেন সখ্যমেব কর্ত্তব্যম্, অন্যথা ভূয়ঃ পাষণ্ডং স্রক্ষ্যতীত্যাশয়েনাহ—তদিদমিন্দ্রেণানুষ্ঠিতং মহদন্যায্যং পশ্যত। কিমিত্যপেক্ষায়ামাহ—ধর্ম্মস্য ব্যতিকরং বিপর্য্যয়ং পাষণ্ডপথম্ ॥

৩২। তর্হি কিমত্র যুক্তমিত্যত আহ—পৃথুকীর্ত্তেরিতি। একেনোনং শতং যস্মিংস্তাদৃশঃ ক্রতুঃ ক্রতুপ্রয়োগঃ পৃথোর্ভূয়াৎ। পৃথুরিতি পাঠে একোনশতং ক্রতবো যস্য তাদৃশোঽপি মহেন্দ্রাৎ পৃথুকীর্ত্তির্ভূয়াদিত্যর্থঃ। তদেবমৃত্বিজঃ প্রত্যুক্ত্বা পৃথুং প্রত্যেবাহ—অলমিতি ॥

৩৩। আত্মনৈবাত্মনে মহেন্দ্রায় রোষং কর্ত্তুং নার্হসি; তত্র হেতুঃ—উভাবপীতি ॥

৩৪। তথাপি ক্রতুসমাপ্তিমেব ধ্যায়ন্তং প্রত্যাহ—অস্মিন্ যজ্ঞবিঘ্নে চিন্তাং মাস্ম কৃথাঃ, যদ্ যস্মাৎ দৈবহতং কার্য্যং কর্ত্তুং ধ্যায়তো মনো নু নিশ্চিতমতিরুষ্টং সৎ অন্ধং তমো মোহং বিশতি, ন তু শান্তিং লভতে ॥

৩৫। অতএব তব ক্রতুর্বিরমতু। নন্বিন্দ্রঃ কিং ন নিবার্য্যতে? অত আহ—যতো দেবেষু দুরবগ্রহো ভবতীতি; যত্র ক্রতৌ ॥

৩৬। ইন্দ্রস্তুরবগ্রহকৃতমনর্থং পশ্যেত্যাহ—এভিরিন্দ্রেণোপসংসৃষ্টৈরধিষ্ঠিতৈঃ, হারিভিশ্চিত্তাকর্ষকৈঃ। য ইন্দ্রস্তেহশ্বং মুষ্ণাতীতি তথা, যজ্ঞায় দ্রুহ্যতীতি তথা, তেনোপসৃষ্টৈঃ ॥

৩৭—৩৮। ততো মম কিমিতি চেৎ, তত্রাহ—ভবানিতি দ্বাভ্যাম্। (৩৭) সাংখ্যযোগাদি-নানাসিদ্ধান্তানুরূপং ধর্ম্মং বেণস্যান্যায়াদবলুপ্তং পরিত্রাতুং তদ্দেহাদ্বিষ্ণোঃ কলৈব ত্বমবতীর্ণোহসি ॥ (৩৮) হে প্রজাপতে! অস্য বিশ্বস্যোদ্ভবং বিচার্য্য, যৈরুৎপাদিতোহসি, তেষাং বিশ্বসৃজাং সঙ্কল্পং পিপীপৃহি, আর্ষঃ প্রয়োগঃ, পূরয়েত্যর্থঃ। প্রচণ্ডো যঃ পাষণ্ডমার্গঃ, সৈব ঐন্দ্রী মায়া উপধর্ম্মজননী, তাং জহি ॥

৩৯। তথা চ কৃত্বা যজ্ঞাগ্রহঞ্চ হিত্বা, বাৎসল্যং স্নেহঞ্চ কৃত্বা ইন্দ্রেণ সহ সন্ধানঞ্চ কৃতবান্ ॥

৪০। কৃতমবভৃথসম্বন্ধি স্নানং যেন সঃ, তস্মৈ ॥

৪২। তুষ্টানাং বাক্যম্—ত্বয়েতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
একোনবিংশোহধ্যায়ঃ ॥ ১৯ ॥

বিংশোহধ্যায়ঃ

বিংশে তু বিষ্ণুনা সাক্ষাৎ পৃথোর্যজ্ঞেহনুশাসনম্।
বরদানপ্রসঙ্গেন প্রীতিশ্চান্যোহন্যমীর্য্যতে ॥ (১)

১। মঘবতা সাকমিন্দ্রেণ সহ বর্ত্তমানঃ।

২। আত্মানং ত্বাং ক্ষমাং কারয়তোহমুষ্য ত্বমপি ক্ষন্তুমর্হসি ॥

৩। যর্হি যস্মাৎ কলেবরমাত্মা ন ভবতি, অতস্তদভিমানেন ভূতানি নাভিদ্রুহ্যন্তি ॥

৫। অবিদ্যা স্বরূপাজ্ঞানম, ততঃ কামঃ, ততঃ কর্ম্ম, তৈরারব্ধ ইতি বিদ্বান্, অতএব প্রতিবুদ্ধ আত্মজ্ঞোঽস্মিন্নৈবানুষজ্জতে ॥

৬। তথাপি পুত্ত্রাদিমমত্বেন ভূতদ্রোহেণ চ সঙ্গো ভবেৎ, তত্রাহ—অসংসক্ত ইতি ॥

৭—৮। প্রতিবোধক্রমং বিবৃণ্বন্ দেহেঽনুষঙ্গাভাবমাহ—এক ইতি দ্বাভ্যাম্। (৭) অসাবাত্মা, আত্মনো দেহাৎ পরো ভিন্নঃ। তত্র নবধা বৈলক্ষেণ্যেন ভেদং সাধয়তি—এক ইতি নবভিঃ পদৈঃ। দেহো হি বালযুবাদিভেদাদনেকঃ, মলিনশ্চ, জড়শ্চ, সগুণশ্চ, স্বকারণভূতগুণাশ্রিতশ্চ, পরিচ্ছিন্নশ্চ, গৃহাদিভিরাবৃতশ্চ, দৃশ্যশ্চ, সাত্মা চ। আত্মা তু নৈবম্, অতো ভিন্নঃ ॥ (৮) আত্মস্থং স্বস্মিন্ স্থিতম্, প্রকৃতিস্থোঽপি দেহস্থোঽপি তদ্বিকারৈর্ন লিপ্যতে, যতঃ স ময়ি ব্রহ্মণি স্থিতঃ ॥

৯—১২। ইয়মবস্থা কস্যোৎপদ্যতে? ইত্যপেক্ষায়ামাহ—যঃ স্বধর্ম্মেণেতি চতুর্ভিঃ ॥ (১০) ভবতু মনঃপ্রসন্নম্, ততঃ কিম্? তত্রাহ—যর্হি বিশদাশয়ঃ প্রসন্নমনাঃ, তদা পরিত্যক্তগুণঃ সন্ সম্যগ্ দর্শনো ভূত্বা শান্তিমশ্নুতে। শান্তিমেবাহ—মে মম সম্যগৌদাসীন্যেনাবস্থানমেব ব্রহ্ম, তদেব কৈবল্যমশ্নুতে ॥ (১১) সম্যগ্দর্শনমেবাহ—উদাসীনমেবাত্মানং দ্রব্যজ্ঞানক্রিয়াত্মনাং দেহজ্ঞানকর্ম্মেন্দ্রিয়মনসামধ্যক্ষমিব স্থিতমাত্মানং যো বেদ ॥ (১২) সংসারিণঃ কথং কূটস্থত্বম্? অত আহ—ভিন্নস্য লিঙ্গস্য দেহস্য গুণপ্রবাহঃ সংসারঃ। ভিন্নত্বে হেতুঃ—দ্রব্যাদ্যাত্মকস্য। তত্র চেতনা চিদাভাসঃ, অতো দৃষ্টাসু প্রাপ্তাসু, হর্ষশোকাদিভির্ন বিক্রিয়ন্তে ॥

১৩। ত্বঞ্চ সূরিঃ, অতএব সুখে দুঃখে চ সমঃ সন্, সমানা উত্তমমধ্যমাধমা যস্য, জিতানীন্দ্রিয়াণ্যাশয়শ্চ যেন স ত্বমখিললোকরক্ষণং বিধৎস্ব। কথমেকেন ময়া রক্ষণং কর্ত্তুং শক্যম্? তত্রাহ—ময়েশ্বরেণোপকৢপ্তাঃ সম্পাদিতা যে অখিলা লোকা অমাত্যাদয়ঃ, তৈঃ সংযুতঃ ॥

১৪। ননু রক্ষণং দণ্ডাদিসাপেক্ষম্, অতস্তপোঽন্যদ্বা পুণ্যং করিষ্যামীতি চেৎ, অত আহ—শ্রেয় ইতি। যদ্ যস্মাৎ সাম্পরায়ে পরলোকে প্রজাভিঃ কৃতাৎ সুকৃতাৎ ষষ্ঠমংশং হর্ত্তা হরিষ্যতি। অরক্ষণে দোষমাহ—অন্যথা প্রজাভিঃ হৃতং পুণ্যং যস্য স প্রজানামঘমত্তি পাপং ভুঙ্‌ক্তে। অন্যথেত্যস্য বিবরণম্—করহারঃ সন্নরক্ষিতা চেৎ॥

১৫। এবঞ্চ মোক্ষোঽপ্যনায়াসেন ভবিষ্যতীত্যাহ—দ্বিজাগ্র্যাণামনুমতশ্চাসাবনুবৃত্তশ্চ পরম্পরাপ্রাপ্তো যো ধর্ম্মঃ, স এব প্রধানম্, অর্থকামৌ তু প্রাসঙ্গিকৌ যস্য। অন্যতমোঽতিশয়েনান্যো ধর্ম্মাদিষ্বনাসক্ত ইত্যর্থঃ। ধর্ম্মপ্রধানান্যতম ইতি পাঠে ধর্ম্মপ্রধানাবন্যতমাবর্থকামৌ যস্যেত্যর্থঃ। অস্যাঃ পৃথিব্যা অবিতা সন্নল্পেন কালেন গৃহাগতান্ সনকাদীন্ দ্রক্ষ্যসি। অনুরক্তো লোকো যস্মিন্ সঃ॥

১৬। মৎ মত্তঃ সকাশাৎ কঞ্চিৎ বরং বৃণীষ্ব। গুণাঃ সমদমাদয়ঃ, শীলং নির্ম্মৎসরত্বাদিস্বভাবঃ, তৈরহং যন্ত্রিতো বশীকৃতঃ। তদ্রহিতৈস্তু মখাদিভির্নাহং সুলভঃ, যতঃ সমং চিত্তং যেষাং তেষ্বেব বর্ত্তিতুং শীলং যস্য সোঽহম্॥

১৮। ক্ষমাপয়িতুং পাদয়োঃ স্পৃশন্তম্, স্বেন কর্ম্মণা অশ্বাপহরণেন ব্রীড়িতম্। প্রেম্ণা পরিষ্বজ্য॥

১৯—২০। ভগবান্ প্রস্থানাভিমুখোঽপি অনুগ্রহেণ বিলম্বিতঃ সন্ ন প্রতস্থে, প্রয়াণং ন কৃতবানিতি দ্বয়োরন্বয়ঃ। কথম্ভূতঃ? (১৯) উপহৃতমর্পিতমর্হণং যস্মৈ, সমুজ্জিহানয়া সমুদ্গচ্ছন্ত্যা বর্দ্ধমানয়া ভক্ত্যা গৃহীতে চরণাম্বুজে যস্য। (২০) পদ্মপলাশবদক্ষিণী যস্য তথাভূতঃ সন্ এনং পৃথুং পশ্যন্॥

২১—২২। ভগবতস্তৎকৃপাতিরেকমুক্ত্বা তস্য ভক্ত্যুদ্রেকমাহ—স ইতি দ্বাভ্যাম্। (২১) বাষ্পবিক্লবত্বেন তূষ্ণীমবস্থিতঃ সন্নমুং হরিং

হৃদোপগুহ্য অধাদ্ধৃতবান্॥ (২২) অতৃপ্তয়োর্দৃশোর্গোচরঃ বিষয়ভূতম্। পদা ক্ষিতিং স্পৃশন্তমিতি ; অয়ং ভাবঃ—ন খলু দেবাঃ পদা ভুবং স্পৃশন্তি, অতঃ কৃপাপরবশো হরির্নৃনমাত্মানং বিস্মৃতবানিতি ; অতএব স্খলন-পরিহারায়ৈব গরুড়স্যোন্নতে স্কন্ধে বিন্যস্তং হস্তাগ্রং যেন তম্॥

২৩। বরং বৃণীষ্বেতি যদুক্তম্, তদসহমানু আহ—হে বিভো! বরদানাং ব্রহ্মাদীনামীশ্বরাদ্ বরপ্রদাৎ ত্বৎ ত্বত্তঃ সকাশাদ্ বুধঃ কথং বরান্ বৃণীতে? কীদৃশান্? গুণৈর্বিক্রিয়ত ইতি গুণবিক্রিয়োঽহঙ্কারঃ, স এব আত্মা যেষাং তেষাং ব্রহ্মাদীনাং সম্বন্ধিনঃ। দেহাভিমানিনাং ভোগ্যানিতি বা। তথা চেৎ, বুধ এব ন ভবতীত্যর্থঃ। জুগুপ্সিতত্বাদপীত্যাহ—য ইতি। বুধ এবাহমপি ন বৃণে ইতি সমুচ্চয়ায় চকারঃ॥

২৪। 'কৈবল্যপতে' ইতি সম্বোধনাৎ কৈবল্যম্, বরিষ্যতীতি মা শঙ্কীরিত্যাহ—নেতি। মহত্তমানামন্তর্হৃদয়ান্মুখদ্বারা নির্গতো ভবৎপদাম্ভোজ-মকরন্দো যশঃশ্রবণাদিসুখং যত্র নাস্তি, তাদৃশং চেৎ কৈবল্যম্, তর্হি তৎ ক্বচিৎ কদাচিদপি ন কাময়ে। তর্হি কিং কাময়সে? তদাহ—যশঃশ্রবণায় কর্ণানামযুতং বিধৎস্ব। নন্বু কোঽপ্যেবং ন কৃতবান্? কিমপ্যন্যচ্চিন্তয়ে-ত্যাহ—মম ত্বেষ এব বর ইতি॥

২৫। নন্বু তর্হি কৈবল্যাভাবে রাগদ্বেষাদ্যাকুলানাং ভক্তিসুখমপি ন স্যাদিত্যাশঙ্ক্যাহ—স ইতি। 'ভবৎপদাম্ভোজসুধায়াঃ কণা লেশঃ, তৎ-সম্বন্ধী যোঽনিলঃ স এব, দূরাদপি কিঞ্চিদ্যশঃশ্রবণমাত্রমিত্যর্থঃ। বিস্মৃতং তত্ত্ববর্ত্ম যৈঃ কুযোগিভিস্তেষামপি পুনঃ স্মৃতিমাত্মজ্ঞানং বিতরতি। অতো ন খলু ভক্তানাং রাগাদিসম্ভবঃ, অতো নোঽস্মাকং সারগ্রাহিণামন্যৈ-র্বরৈরলম্, ভক্তাবেব মোক্ষাদিসর্ব্বসুখান্তর্ভাবাদিতি ভাবঃ॥

২৬। 'নন্বু ভক্তির্মুক্তিফলৈব, অতঃ ফলং বিহায় সাধনে ভবতঃ কোঽয়মাগ্রহঃ? ইত্যাশঙ্ক্যাহ—হে সুশ্রবঃ! মঙ্গলকীর্ত্তে! তে শিবং

যশঃ সতাং সঙ্গমে যঃ সকৃদপি যদৃচ্ছয়াপি উপশৃণোতি, গুণজ্ঞশ্চেৎ স পশুং বিনা অন্যঃ কথং বিরমেৎ? গুণাতিশয়ং সূচয়তি—শ্রীর্যৎ যশ এব প্রকর্ষেণ বৃতবতী, গুণানাং সর্ব্বপুরুষার্থানাং সংগ্রহঃ স্বস্মিন্ সমাহারঃ, তদিচ্ছয়া ॥

২৭। অতো লক্ষ্মীরিবাস্ত্বরত্যাগেন ত্বামেবাহং ভজ ইত্যাহ—অথেতি। লালস উৎসুকঃ সন্; কর্ম্মণি ক্রিয়মাণে যথেন্দ্রেণ সহ কলিঃ, এবং ভক্তাবপি কিং লক্ষ্ম্যা সহ কলিঃ স্যাদিতি বিতর্কয়তি—একস্মিন্ পত্যৌ স্পর্দ্ধমানয়োরাবয়োরপি কিং কলির্ন স্যাদিতি কাক্কা বিতর্কঃ। ননু পর্য্যায়েণ সেবায়াং ন স্যাৎ? নৈবম্, কৃতস্ত্বচ্চরণয়োরেবৈকস্তানো মনো-বিস্তারো যাভ্যাং তয়োঃ ॥

২৮। ভবতু বা কলিস্তথাপি ভজেয়মেবেত্যাহ—জগজ্জনন্যাং বৈশসং বিরোধঃ স্যাদেব; তত্র হেতুঃ—যস্যাঃ কর্ম্মণি নঃ সমীহিতমিচ্ছা ভবতি; তথাপি ইন্দ্রবিরোধে মৎপক্ষপাতবদত্রাপি তব পক্ষপাত এব স্যাদিত্যাহ—ফল্গু তুচ্ছমপি উরু বহু করোষি, যতো দীনেষু বৎসলো দয়াবান্। স্বে স্বরূপ এবাভিরতস্ত্ব তয়া কিং প্রয়োজনম্? তাং নাদ্রিয়স ইত্যর্থঃ ॥

২৯। যতস্ত্বং দীনবৎসলঃ, অতএব সাধবো নিষ্কামাঃ; অথ জ্ঞানানন্তর-মপি ত্বাং ভজন্তি। কথম্ভূতম্? মায়াগুণানাং বিভ্রমো বিলাসঃ, তস্যোদয়ঃ কার্য্যম্, স নিরস্তো যস্মিংস্তম্। তে কিমর্থং ভজন্তি? তত্রাহ—ভবৎপদানু-স্মরণাদ্বিনা অন্যৎ তেষাং নিমিত্তং ফলং ন বিদ্মঃ ॥

৩০। বরৈঃ প্রলোভনঞ্চ কৃপালোস্তবানুচিতামত্যাশয়েনাহ— মন্য ইতি। নু অহো, তে বাচা তন্ত্র্যা যদি জনোঽয়মসিতোঽবদ্ধঃ স্যাত্তর্হি পুনঃপুনঃ ফলৈর্বিমোহিতঃ সন্ কথং কর্ম্ম করোতি? ন করোত্যেবেত্যর্থঃ ॥

৩১। ত্বন্মায়য়াখণ্ডিতস্ত ত্বয়া পুনঃ খণ্ডনং ন কর্ত্তব্যম্, কিন্তু হিতং চেষ্টিতব্যমিত্যাহ—ত্বন্মায়য়া ঋতাদাত্মনস্ত্বত্তঃ খণ্ডিতঃ পৃথক্কৃতঃ, যদ্-যতোঽন্যৎ পুত্রাদিকমাশাস্তে, অতঃ স্বয়মবিজ্ঞাপিত এব হিতং চেষ্টিতুমর্হসি ॥

৩৬। বাগ্বিত্তাঞ্জলিভির্ভক্তিতঃ পূজিতাঃ সন্তঃ, বৈকুণ্ঠানুগতাঃ পার্ষদাশ্চ॥

৩৭। অমুষ্য রাজ্ঞঃ ; হরন্নিবেতি লোকোক্তিঃ, বস্তুতস্তস্য মনঃ সর্ব্বদৈব তদধীনমস্ত্যেব। স্বধাম রাজ্ঞো হৃদয়ম্ ॥

৩৮। অদৃষ্টায় লোচনপথমতিক্রান্তায়, সন্দর্শিত আত্মা যেন তস্মৈ, বস্তুতোঽব্যক্তায় ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং চতুর্থস্কন্ধে
বিংশোঽধ্যায়ঃ ॥ ২০ ॥

একবিংশোঽধ্যায়ঃ

একবিংশে তু পৃথুনা প্রজানামনুশাসনম্।
মহাসত্রে সুরাদীনাং মহাসদসি বর্ণ্যতে ॥ (১)

১—৩। 'স্বপুরং যযৌ' ইত্যুক্তম্, তৎপুরমনুবর্ণয়তি—মৌক্তিকৈরিতি ত্রিভিঃ ॥ (২) চন্দনাগুরুযুক্তৈস্তোয়ৈরার্দ্রা রথ্যাদয়ঃ, তদ্যুক্তম্, তোক্মৈর্হরিতযবৈঃ, অঙ্কুরৈরিতি বা, অর্চ্চির্ভির্দীপৈঃ ॥ (৩) সবৃন্তৈঃ পুষ্পফলযুক্তৈঃ কদলীস্তম্ভৈঃ পূগানাং পোতৈর্বালবৃক্ষৈস্তথাবিধৈঃ, সর্ব্বতঃ সমলঙ্কৃতং শোভিতম্ ॥

৪। সংভৃতানি অশেষাণি মঙ্গলানি দধ্যাদীনি তৈঃ সহাভিজগ্মুঃ। মৃষ্টা উজ্জ্বলাঃ কন্যাশ্চ ॥

৫। গতস্ময়ো নিরহঙ্কারঃ॥

৬। প্রিয়ান্ বরান্ প্রদদাতীতি তথা ॥

৭। গুণৈর্মহান্, অতএব মহত্তমঃ পূজ্যতমঃ॥

৮। গুণৈর্বিজৃম্ভিতমূর্জ্জিতং গুণবদ্ভিঃ সভাজিতং সৎকৃতং যশো গৃণন্তমর্চ্চয়ন্ প্রাহ—সদস্পতে শৌনক ॥

৯। লব্ধান্যশেষসুরাণামর্হণানি যেন সঃ। কিমকরোদিতি শেষঃ॥

১০। শ্রবণৌৎসুক্যমাবিষ্কুর্ব্বন্ প্রার্থয়তে—কো ন্বিতি। যস্য বিক্রমঃ পৃথ্বীদোহনম্, তস্যোচ্ছিষ্টতুল্যং কামম্, তৎ তস্য কর্ম্ম বদ ॥

১১। প্রাচীনকর্ম্মভিরারব্ধানেব বুভুজে, ন তু ভোগান্তরার্থং কর্ম্মাণি করোতি। তদপি ভোগেন পুণ্যক্ষপণেচ্ছয়া, ন তু সুখাসক্ত্যেত্যর্থঃ॥

১২। অস্খলিতোঽপ্রতিহত আদেশ আজ্ঞা যস্য, সপ্তদ্বীপেষু এক এব দণ্ডং ধারয়তীতি তথা। কিং সর্ব্বত্র ? নেত্যাহ—ব্রাহ্মণকুলব্যতিরেকেণ, অচ্যুতো গোত্রপ্রবর্ত্তকতুল্যো যেষাং বৈষ্ণবানাং তদ্ব্যতিরেকেণ চ ॥

১৩। একদা তস্য মহাসত্রদীক্ষা আসীৎ, তত্র সত্রে দেবাদীনাং সমাজ আসীদিত্যর্থঃ॥

১৪—১৯। তস্মিন্ পূজ্যেষ্বর্চ্চিতেষু সৎসু সদসো মধ্যে উত্থিতঃ সন্ সমন্ততঃ সমৈক্ষতেতি ষষ্ঠশ্লোকেনান্বয়ঃ। (১৫) প্রাংশুরুন্নতঃ, পীনাবায়তৌ ভুজৌ যস্য কঞ্জবদরুণে ঈক্ষণে যস্য, শোভনা দ্বিজাঃ স্মিতঞ্চ যস্য॥ (১৬) ব্যূঢ়ং বিস্তীর্ণং বক্ষো যস্য, বলিভিস্তিস্রভির্বল্গু সুন্দরং দলবদধোঽগ্রমশ্বত্থ-পত্রমিবোপরি বিস্তৃতমধস্তাৎ সঙ্কুচিতমুদরং যস্য, আবর্ত্তবন্নিম্না নাভির্যস্য, কাঞ্চনবদুজ্জ্বলাবুরূ যস্য, উদগ্রৌ উন্নতাগ্রৌ পাদৌ যস্য॥ (১৭) সূক্ষ্মাশ্চ তে বক্রাশ্চ অসিতাশ্চ স্নিগ্ধাশ্চ মূর্দ্ধজা যস্য, কম্বুবৎ ত্রিরেখাঙ্কিতা কন্ধরা যস্য, পরিধায় বসিত্বা, উপবীয় উত্তরীয়ং কৃত্বা॥ (১৮) নিয়মে নিমিত্তে ন্যস্তানি ত্যক্তানি ভূষণানি যেন সঃ; অতএব তৈরনাবৃতত্বাদ্ ব্যঞ্জিতা অশেষ-

গাত্রেষু শ্রীঃ স্বাভাবিকী শোভা যেন, কৃতান্যুচিতানি কর্ম্মাণি যেন ॥ (১৯) শিশিরে সন্তাপহরে স্নিগ্ধে চ তারে যয়োস্তে অক্ষিণী যস্ত ; ইদং বক্ষ্যমাণং বাক্যমুক্তবাংশ্চ ॥

২০। চারু শ্রোত্রপ্রিয়ম্, চিত্রাণি পদানি যস্মিন্, শ্লক্ষ্ণং প্রশস্তম্, মৃষ্টং শুদ্ধম্, গূঢ়ং গম্ভীরার্থম্, অবিক্লবমব্যাকুলম্। উৎপ্রেক্ষতে—স্বয়মনুভূতমনুবর্দন্নিব ॥

২১। ভাষণে হেতুঃ—ধর্ম্মং জিজ্ঞাসুভিঃ পুংভিঃ সৎসু স্বমনীষিতমাবেদ্যং বক্তব্যম্, অতঃ প্রজানুশাসনমিষেণ জিজ্ঞাসৈব ক্রিয়তে, ন যুষ্মান্ প্রতি ধর্ম্মপ্রবচনমিতি ভাবঃ ॥

২২—২৪। ইদানীং প্রজাঃ শিক্ষয়িষ্যন্ প্রজাশিক্ষণাদিকং মমাবশ্যকমিত্যাহ—অহমিতি ত্রিভিঃ। (২২) পৃথক্ সেতুষু স্থাপিতা স্থাপয়িতা ॥ (২৩) দিষ্টদৃক্ প্রাক্কর্ম্মসাক্ষী ঈশ্বরো যস্ত তুষ্যতি, তস্ত বেদবাদিনো যান্ লোকানাহুঃ, প্রজারক্ষণাত্মনুষ্ঠানাত্তে লোকা মে স্যুঃ। কথম্ভূতাঃ ? কামানাং সন্দোহঃ সম্যগ্দোহঃ প্রপূরণং যেষু ॥ (২৪) অন্যথা ত্বনিষ্টং স্যাদিত্যাহ—য ইতি। শমলং পাপম্, ভগমৈশ্বর্য্যম্ ॥

২৫। তৎ তস্মাৎ হে প্রজাঃ! ভর্ত্তুর্মম পিণ্ডার্থং পিণ্ডদানবৎ পরলোকহিতার্থং স্বকার্য্যমেব কুরুত, স্বধর্ম্মমেবানুতিষ্ঠত। অধোক্ষজে ধীর্যেষাং তাদৃশাঃ সন্তঃ, বাসুদেবার্পণদৃষ্ট্যেত্যর্থঃ। অনুগ্রহঃ কৃতো ভবেদিতি শেষঃ ॥

২৬। শাস্তুঃ শিক্ষয়িতুঃ, অনুজ্ঞাতুরনুমোদিতুশ্চ প্রেত্য পরলোকে যৎ ফলং তত্তুল্যম্ ॥

২৭। কর্ম্ম কর্ত্তব্যমিত্যনুমোদামহে, ন তু বাসুদেবার্পণমিতি। বেণাদিভিস্তদনঙ্গীকারাদিত্যেবংবাদিনঃ শনৈঃ সম্বোধয়ন্নাহ—হে অর্হসত্তমাঃ! যজ্ঞপতির্নাম পরমেশ্বরঃ কেষাঞ্চিন্মতে তাবদস্তি। তথাপি বিপ্রতিপত্তের্ন

তৎসিদ্ধিরিত্যাশঙ্ক্য জগদ্বৈচিত্র্যান্যথানুপপত্তিং প্রমাণয়তি। ইহামুত্র চ জ্যোৎস্নাবত্যঃ কান্তিমত্যো ভুবো ভোগভূময়ঃ শরীরাণি চ ॥

২৮—৩০। নন্বিদং কর্ম্মবৈচিত্র্যাদেব সেৎস্যতি, তথাপি বিদ্বদনুভবেন ঈশ্বরসিদ্ধিরিত্যাহ—মনোরিতি ত্রিভিঃ। (২৮) অস্মৎপিতামহস্যাঙ্গস্য ॥ (২৯) কৃত্যমস্তি, অবশ্যং কর্ম্মফলদাত্রা ভাব্যমিতি তেষাং মতামত্যর্থঃ ॥ (৩০) মৃত্যোর্দৌহিত্রাদীন্ বেণাদীন্ বিনা। ধর্ম্মে বিমোহিতান্, অতঃ শোচ্যান্। ননু কর্ম্মৈব ফলং দাস্যতি, বিধ্যুদ্দেশগতা বা দেবতাঃ, কিং পরমেশ্বরেণ? তত্রাহ—বর্গেতি। বর্গোঽত্র ত্রিবর্গঃ, স্বর্গো ধর্ম্মস্য ফলম্, অপবর্গো মোক্ষঃ, তেষামৈকাত্ম্যেনৈকরূপ্যেণ. সর্ব্বানুগতেন হেতুনা, তত্রাপি প্রায়েণ হেতুনা। অয়ং ভাবঃ—ন তাবজ্জড়স্য কর্ম্মণঃ ফলদাতৃত্বং ঘটতে. ন চার্ব্বাগ্ দেবতানাং স্বাতন্ত্র্যম্, অন্তর্যামিশ্রুতেঃ। ন চ তদা কর্ম্মসাম্যে ফলতারতম্যম্, কচিৎ তদসিদ্ধিশ্চ সম্ভবতি। অতঃ স্বাতন্ত্র্যেণ কর্ত্তুমকর্ত্তুমন্যথাকর্ত্তুং সমর্থেন পরমেশ্বরেণ ভাব্যমিতি ॥

৩১—৩৩। কিঞ্চ, জীবানাং মোক্ষদঃ পরমেশ্বর এব নার্ব্বাগ্ দেবতাস্তাসামপি জীবত্বাবিশেষাদিত্যাশয়েনাহ ত্রিভিঃ। (৩১) যস্য পাদয়োঃ সেবায়ামভিরুচিস্তপস্বিনাং সংসারতপ্তানামশেষৈর্জন্মভিঃ সংবৃদ্ধং ধিয়ো মলং সদ্যঃ ক্ষপয়তি, তমেব ভজতেতি তৃতীয়েনান্বয়ঃ। কথম্ভূতা? অহন্যহনি বর্দ্ধমানা, সতী সাত্ত্বিকী। তৎপাদসম্বন্ধস্যৈবৈষ মহিমেতি দৃষ্টান্তেনাহ—যথেতি ॥ (৩২) বিনির্দ্ধূতা অশেষা মনোমলা যস্য; অসঙ্গো বৈরাগ্যম্, তেন বিজ্ঞানস্য বিশেষঃ সাক্ষাৎকারস্তদেব বীর্য্যং বিদ্যতে যস্য। যস্যাঙ্ঘ্রিমূলে কৃতাশ্রয়ঃ সন্ ॥ (৩৩) আত্মবৃত্তিভিরধ্যাপনাদিভিঃ, মনোবচঃকায়ানাং গুণৈর্ধ্যানস্তুতিপরিচর্য্যাভিঃ[১]। অমায়িনো নিষ্কপটাঃ সন্তঃ। ননু ব্রহ্ম-

---

১। -সপর্য্যাভিঃ (ঘ)।

বাদিভিঃ সেব্যে কিমস্মদ্ভক্ত্যা[১] ভবিষ্যতি? তত্রাহ—যথাধিকারমেবা-বসিতা নিশ্চিতা সমাপ্তা বার্থসিদ্ধির্যেষাম্ ॥

৩৪—৩৫। স্বকর্ম্মভির্যাগাদিভির্ভজতেত্যুক্তম্, তত্র 'ব্রহ্মার্পণং ব্রহ্ম-হবিঃ' ইতি ন্যায়েন সর্ব্বেষু যাগ-তদঙ্গতৎফলেষু ভগবদ্দৃষ্ট্যা কর্ম্ম কর্ত্তব্যম্, ন ভিন্নদৃষ্ট্যেতি বক্তুং তেষাং ভগবদ্রূপতামাহ দ্বাভ্যাম্। (৩৪) অসৌ ভগবানেব স্বরূপতো বিশুদ্ধবিজ্ঞানঘনোঽপ্যগুণো নির্বিশেষণোঽপি সন্ ইহ কর্ম্মমার্গেঽনেকগুণো নানাবিশেষণবানধ্বরো যজ্ঞঃ সম্পদ্যতে, 'যজ্ঞো বৈ বিষ্ণুঃ' ইতি শ্রুতেঃ। অনেকগুণত্বমেবাহ—পৃথগ্বিধানি যানি দ্রব্যাদীনি তৈঃ। তত্র দ্রব্যাণি ব্রীহ্যাদীনি, গুণাঃ শুক্লাদয়ঃ ক্রিয়া অবঘাতাদয়ঃ, উক্তয়ো মন্ত্রাঃ, অর্থোঽঙ্গসাধ্য উপকারঃ, আশয়ঃ সঙ্কল্পঃ, লিঙ্গং পদার্থানাং শক্তিঃ, নাম জ্যোতিষ্টোমাদিঃ, তৈশ্চাধ্বরঃ সম্পদ্যতে ॥ (৩৫) যাগ-তদঙ্গানাং ভগবদ্রূপত্বমুক্ত্বা যাগফলস্যাপি ভগবদ্রূপতামাহ—প্রধানেতি। এষ বিভুঃ পরমানন্দোঽপি শরীরে চেতনাং বিষয়াকারাং বুদ্ধিং প্রতিপদ্য তদভিব্যঙ্গ্যা-নন্দরূপঃ সন্ ক্রিয়াফলত্বেন প্রতীয়তে—'এতস্যৈবানন্দস্যান্যানি ভূতানি মাত্রামুপজীবন্তি' ইতি শ্রুতেঃ। যথা অনলো দারুষু স্থিতস্তদ্গুণাত্মকো দারুধর্ম্ম-দৈর্ঘ্যবক্রত্বাদিমান্, তদ্বৎ। কথম্ভূতে শরীরে? প্রধানমব্যক্তম্, কালস্তৎক্ষোভকঃ, আশয়ো বাসনা, ধর্ম্মোঽদৃষ্টম্, তৈঃ সংগৃহ্যতে জন্যত ইতি তথা তস্মিন্ ॥

৩৬। তদেবমপ্রবৃত্তান্ ভগবদ্ভজনে প্রবর্ত্ত্য স্বতঃ প্রবৃত্তানাং প্রবৃত্তি-মভিনন্দনেন দ্রঢ়য়তি—অহো ইতি। বিতরন্তি—কুর্ব্বন্তি ॥

৩৭—৪৪। ইদানীং হরিভক্তিদার্ঢ্যায় ব্রাহ্মণভক্তিং বিধত্তে—মা জাত্বিত্যষ্টভিঃ। (৩৭) মহত্যশ্চ তা ঋদ্ধয়শ্চ তাভিঃ, যদ্রাজকুলস্য তেজঃ, তত্তস্মাৎ সকাশাদ্ দ্বিজানাং কুলে, অজিতো দেবতা যেষাং বৈষ্ণবানাং

১। অস্মচ্ছক্ত্যা (গ)।

তেবাঞ্চ কুলে মা জাতু প্রভবেৎ, কদাচিদপি প্রভাবং ন করোতু। কথম্ভূতে? সমৃদ্ধিভির্বিনাপি স্বয়মেব তিতিক্ষাদিভির্দেদীপ্যমানে॥ (৩৮) ব্রাহ্মণান্ স্তবন্নাহ—যচ্চরণাভিবন্দনাদ্ধরির্লক্ষ্মীং যশশ্চ অবাপ, যৎসেবয়া চ ঈশ্বরস্তুষ্যতি, তদেব ব্রহ্মকুলং নিষেব্যতামিতি দ্বয়োরন্বয়ঃ॥ (৩৯) তস্য হরের্লোকসংগ্রহরূপো যো ধর্ম্মঃ, তৎপরৈঃ॥ (৪০—৪১) ননু ব্রহ্মকুল এব নিত্যং সেব্যমানে সর্ব্বদেবতামুখভূতেঽগ্নৌ যজ্ঞাদ্যনুষ্ঠানং ন স্যাৎ, ন চ তেন বিনা চিত্তশুদ্ধিঃ, ন চ তয়া বিনা মোক্ষঃ স্যাদিত্যাশঙ্ক্যাহ—পুমানিতি দ্বাভ্যাম্। (৪০) যস্য ব্রহ্মকুলস্য নিত্যং সম্বন্ধেন নিষেবয়া পুমান্ স্বয়মেব জ্ঞানাভ্যাসাদিকং বিনাপ্যত্যুত্তমং শমং মোক্ষং লভেত। কুতঃ? যৎসেবযা স্বত এবানতিবেলং শীঘ্রং প্রসীদতঃ শুধ্যত আত্মনশ্চিত্তাৎ। ততঃ পরং শ্রেষ্ঠং দেবানাং কিং সুখমস্তি? ব্রাহ্মণসেবয়ৈব যজ্ঞাদিফলং জ্ঞানফলং তৎ সর্ব্বং ভবতীত্যর্থঃ॥ (৪১) হরেরপি তদেব পরং মুখমিত্যাহ—অশ্নাতীতি। ইজ্যানাং পূজ্যানামিন্দ্রাদীনাং নামভির্যস্য মুখে শ্রদ্ধয়া হুতং হবিরনন্তো যথাশ্নাতি, তথা চেতনয়া রহিতে হুতাশনে হুতং নাশ্নাতি। কৈর্হুতমশ্নাতি? তত্ত্বকোবিদৈঃ সর্ব্বদেবময়শ্চৈতন্যমূর্ত্তিরনন্ত ইতি তত্ত্বং বিদ্বদ্ভিঃ। কুত এবম্ভূতোঽসৌ? তত্রাহ—পারমহংস্যং জ্ঞানম্, তৎপরানর্হন্ত্যধিকুর্ব্বন্তীতি পারমহংস্যপর্য্যাঃ, তা গাবো বাচো যস্মিন্। উপনিষদ্ভির্জ্ঞানঘনত্বেনোক্ত ইত্যর্থঃ। যদ্বা, পরমহংসানাং জ্ঞাননিষ্ঠানাং গম্যঃ পারমহংস্যঃ, পরিতো ন গচ্ছন্তি গাবো বাচো যস্মাৎ, স পর্য্যগুরিন্দ্রিয়নিয়ন্তা, স চাসৌ স চ পারমহংস্যপর্য্যগুর্জ্ঞানরূপঃ সর্ব্বান্তর্যামীত্যর্থঃ॥ (৪২) ন কেবলং চেতনত্বেন হুতাশনাদ্বিশেষঃ, কিন্তু বেদজ্ঞানাদপীত্যাহ—যদিত্যব্যয়ম্। যে ব্রহ্ম বেদং নিত্যং বিভ্রতি, তেষামিত্যুত্তরেণান্বয়ঃ। মঙ্গলং নাম 'প্রশস্তাচরণং নিত্যমপ্রশস্তস্য বর্জ্জনম্। এতদ্ধি মঙ্গলং প্রোক্তমৃষিভিস্তত্ত্বদর্শিভিঃ॥' ইত্যুক্তম্। মৌনমধ্যয়নবিরোধিবার্ত্তাত্যাগঃ; সমাধিনা চিত্তস্থৈর্য্যেণ; অর্থদৃষ্টয়ে বেদার্থ-

মপি বিচারয়ন্তীত্যর্থঃ ; যত্র বেদ ইদং বিশ্বমবভাসতে, যথা আদর্শে মুখম্ ॥ (৪৩) হে আর্য্যাঃ ! আ আয়ুর্যাবজ্জীবম্। অধিকিরীটং মুকুটস্তোপরি ; বহেয়েতি প্রার্থনায়াং লিঙ্ ; যং রেণুম্ ॥ (৪৪) গুণভজনস্থ ফলমাহ— 'গুণায়নম্' ইত্যনু সম্পদঃ সংবৃণতে সম্যগ্-ভজন্তি, তস্মাৎ প্রসীদতাং প্রসীদতু, গবাঞ্চ কুলম্ ॥

৪৬—৫১। সাধুবাদমাহ—পুত্রেণেতি ষড়্ভিঃ। (৪৬) যদ্যতো বেণোঽপি তমো নরকমত্যতরদতিততরে ॥ (৪৯) মুকুন্দনাথাঃ স্মঃ। ত্বন্নাথত্বমেব মুকুন্দনাথত্বে পর্য্যবসিতমিত্যর্থঃ। তত্র হেতুঃ—য ইতি ॥ (৫০) আজীব্যানাং সেবকানাম্, আ সম্যগনুশাসনম্। প্রজাস্বনুরাগঃ প্রকৃতিঃ স্বভাবঃ ॥ (৫১) উপাসাদিতঃ প্রাপিতঃ ; কর্ম্মভির্ভ্রাম্যতাম্ ॥

৫২। ঈশ্বরদৃষ্ট্যা বিপ্রাদয়োঽপি প্রণমন্তি—নম ইতি। ব্রহ্মাবিশ্য ব্রাহ্মণজাতিমধিষ্ঠায় ক্ষত্রং ক্ষত্রিয়ং বিভর্ত্তি, ক্ষত্রঞ্চাবিশ্য ব্রহ্ম বিভর্ত্তি, তদুভয়ঞ্চাবিশ্যেদং বিভর্ত্তি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
একবিংশোঽধ্যায়ঃ ॥ ২১ ॥

দ্বাবিংশোঽধ্যায়ঃ

দ্বাবিংশে তু পরং জ্ঞানং পৃথবে হরিশাসনাৎ।
সনৎকুমারো ভগবানুপাদিশদিতীর্য্যতে ॥ (১)

১। মুনয়ঃ—সনকাদয়ঃ ॥

২। অর্চিষা লক্ষিতান্ সনকাদয় ইতি জ্ঞাপিতান্, অচষ্ট অপশ্যৎ ॥

৩। তেষাং দর্শনেনোদ্গতান প্রাণান্ প্রাপ্তুমিচ্ছুরিব। অয়ং ভাবঃ—'ঊর্দ্ধং প্রাণা হ্যুৎক্রামন্তি যূনঃ স্থবির আয়তি। প্রত্যুত্থানাভিবাদাভ্যাং পুনস্তান্ প্রতিপদ্যতে॥' ইতি স্মৃতেঃ। প্রাণাস্তাবৎ তত্তেজসাক্ষিপ্তাস্তান্ প্রত্যুদ্গচ্ছন্তি, অতঃ স্বয়মনুদ্গচ্ছতঃ প্রাণহানিঃ স্যাদিতি ভয়াদিব সসম্ভ্রমং প্রত্যুদ্গমং চকারেতি; সহ সদস্যৈরনুগৈশ্চ বর্ত্তমানঃ। ইন্দ্রিয়েশো জীবো গুণান্ গন্ধাদীন্ প্রতি যথা উদ্গচ্ছতীত্যৌৎসুক্যে দৃষ্টান্তঃ॥

৪। যন্ত্রিতো বশীকৃতঃ; গৃহীতমধ্যর্হণমর্ঘ্যমাসনঞ্চ যৈস্তান্॥

৫। মার্জ্জিতং ক্ষালিতমলকবন্ধনং কেশবন্ধনং যস্য; মানয়ন্নিব স্বয়ং চকার॥

৬। ভবস্যাপ্যগ্রজত্বেন মান্যান্॥

৭—১৬। প্রীতঃ প্রাহ ইত্যুক্তম্, তদেব প্রীতিপূর্ব্বকং বচনমাহ—অহো ইতি দশভিঃ। (৭) হে মঙ্গলায়নাঃ! মঙ্গলময়নং যেষাম্। ময়া কিং মঙ্গলমাচরিতম্? যস্য মে যোগিভিরপি দুর্দ্দর্শানাং বো দর্শনম্॥ (৯) দুর্দ্দর্শত্বমাহ—নৈবেতি। সর্ব্বদৃশমাত্মানং যথা সর্ব্বে দৃশ্যা ন লক্ষয়ন্তি। যেঽস্য বিশ্বস্য হেতবো মহদাদয়ো মন্বাদয়ো বা। যদ্বা, কথম্ভূতান্? যেঽস্য সর্ব্বদৃগাত্মদর্শনস্য হেতবস্তান্॥ (১০) যেষাং সাধূনাং গৃহা অর্হাণাং পূজ্যানাং বর্য্যা বরণীয়াঃ স্বীকারার্হা অম্বাদয়ো যেষু তাদৃশাঃ। অম্বু চ তৃণঞ্চ ভূমিশ্চেশ্বরো গৃহস্বামী চাবরা ভৃত্যাদয়শ্চ॥ (১১) ব্যালানা-মালয়া দ্রুমা এব তে, অরিক্তাঃ পূর্ণা অখিলাঃ সম্পদো যেষু তাদৃশা অপি; যদ্গৃহা যে গৃহাঃ, তীর্থপাদীয়া বৈষ্ণবাস্তেষাং পাদতীর্থেন বিবর্জ্জিতাঃ॥ (১২) স্বাগতং ভদ্রমাগমনং জাতম্, যদ্যস্মাদ্ বালা এব সন্তো ভবন্তো বৃহন্তি ব্রতানি চরন্তি। যদ্বা, যেষাং বো ব্রতান্যস্যে বালাশ্চরন্তি॥ (১৩) ইন্দ্রিয়ার্থা বিষয়াস্তানেবার্থং পুরুসার্থং যে বিদন্তি, তেষাং নঃ। ব্যসনানি সমন্তাদুপ্যন্তে যস্মিন্ সংসারে॥ (১৪) নন্বভ্যাগতানাং কুশলং পৃচ্ছন্তি

লোকে, ন ত্বাত্মনঃ? তত্রাহ—ভবৎস্বিতি॥ (১৫) তত্তস্মাৎ কৃতবিশ্বাসঃ সন্ তপস্বিনাং সন্তপ্তানাং সুহৃদো বো যুষ্মান্ পৃচ্ছামি॥ (১৬) ন খল্বন্যযোগিতুল্যা যূয়ম্, কিন্তু সাক্ষাদ্‌ভগবানেবেত্যাহ—ব্যক্তং নিশ্চিতম্, আত্মবতাং ধীরাণামাত্মা তেষ্বাত্মত্বেন প্রকাশমানঃ, আত্মানং ভাবয়তি প্রকাশয়তীতি তথা, অজঃ শ্রীনারায়ণ ইমাং পৃথ্বীং চরতি॥

১৭। সূক্তং শোভনং বচনম্, সারং ন্যায্যম্, সুষ্ঠু গম্ভীরার্থং মিতমল্পাক্ষরম্, মধু শ্রোত্রপ্রিয়ম্। মুখপ্রসত্ত্যা স্ময়মান ইব প্রতীয়মানঃ॥

১৮। বিদুষা জানতাপি; ঈদৃশী পরার্থৈকপরা॥

১৯। স্বয়মপি পৃথোঃ সঙ্গমভিনন্দতি—সঙ্গম ইতি। উভয়েষাং বক্তৄণাং শ্রোতৄণাঞ্চ। যেষাং সম্ভাষণসহিতঃ সংপ্রশ্নঃ সর্ব্বেষাং শং সুখং বিস্তারয়তি॥

২০। তদেবং সঙ্গমং প্রশ্নঞ্চাভিনন্দ্যানুবাদমুখেনৈব মোক্ষসাধনমুপদিশতি—অস্ত্যেবেতি। গুণানামনুবাদনে প্রশ্নদ্বারেণানুবাদপ্রবর্ত্তনে, শ্রবণ ইত্যর্থঃ। আত্মনো মনসোঽন্তোঽন্তঃস্থং কামাত্মকং মলং বিধুনোতি। কষায়ং ধাতুরাগবদনিবর্ত্ত্যম্॥

২১। চিত্তশুদ্ধ্যৈব বহির্বৈরাগ্যমাত্মরতিশ্চ ভবতি, ন চ ততোঽধিকং সাধনমস্তি, শাস্ত্রেষু তয়োরেব মোক্ষহেতুত্বনিশ্চয়াদিত্যাহ—শাস্ত্রেষ্বিতি। সধ্র্যগ্বিমৃশেষু সম্যগ্বিচারবৎসু শাস্ত্রেষু ক্ষেমস্য হেতুরেতাবানেব সুনিশ্চিতঃ। কোঽসৌ? আত্মব্যতিরিক্তে দেহাদৌ অসঙ্গো বৈরাগ্যম্, আত্মনি চ দৃঢ়া রতিঃ প্রীতিঃ। আত্মনো বিশেষণম্—নির্গুণে ব্রহ্মণীতি॥

২২—২৫। নন্বেতাবদেব তাবদতিদুর্লভমিত্যাশঙ্ক্য উত্তমাধিকারিণঃ শ্রবণমাত্রেণ ভবতি, অন্যস্য তু চিত্তশুদ্ধ্যনুসারেণ সাধনতারতম্যাদ্‌বর্দ্ধমানয়া ভক্ত্যেত্যভিপ্রেত্যাহ—সেতি চতুর্ভিঃ। (২২) সা ব্রহ্মণি রতিরসঙ্গশ্চ শ্রদ্ধাদিভিঃ স্যাদিতি চতুর্থেনান্বয়ঃ। জিজ্ঞাসয়া তত্ত্বিশেষবুভুৎসয়া। পুণ্যং

শ্রবো যশো যস্য তস্য হরেঃ পুণ্যয়া কথয়া চ॥ (২৩) আর্থারামা অর্থনিষ্ঠাস্তামসাঃ, ইন্দ্রিয়ারামাঃ কামনিষ্ঠা রাজসাস্তৈঃ সহ যা গোষ্ঠী, তস্যামতৃষ্ণয়া। তেষাঞ্চ যে সম্মতা অর্থাঃ কামাশ্চ তেষামপরিগ্রহেণ অনাসক্ত্যা। বিবিক্তে বিজনে যা রুচিস্তয়া, সা চাত্মন্যেব পরিতোষে সতি স্যাৎ, কিন্তু হরেগু´ণপীযূষপানাদ্বিনা। তস্মিন্ সতি বিবিক্তে রুচির্ন কার্য্যা, ন চাত্মনি পরিতোষঃ কার্য্য ইত্যর্থঃ॥ (২৪) পারমহংস্যচর্য্যয়োপশমাদিপ্রধানয়া বৃত্ত্যা স্মৃত্যাত্মহিতানুসন্ধানেন। মুকুন্দাচরিতমেবাগ্র্যং সীধু শ্রেষ্ঠমমৃতং তচ্চরিতস্মৃতিসুখেনেত্যর্থঃ। মার্গান্তরস্যানিন্দয়া; নিরীহয়া যোগক্ষেমার্থক্রিয়ারাহিত্যেন; শীতোষ্ণাদিদ্বন্দ্বসহনেন॥ (২৫) কথয়েত্যত্রোক্তমপি কথনং ভক্তাবন্তরঙ্গত্বেন পুনরুচ্যতে। তৎপরা হরিভক্তাস্তেষাং কর্ণপূরাঃ কর্ণালঙ্কারভূতা যে হরেগু´ণাস্তেষামভিধানেন। সদসতি—কার্য্যকারণরূপে॥

২৬। ভবত্যন্ত্রাসঙ্গ আত্মরতিশ্চ; ততঃ কিম্? অত আহ—যদা নিষ্ঠাপ্রাপ্তা রতির্ভবতি, তদা চাচার্য্যবান্ সন্ জ্ঞানবৈরাগ্যয়োর্বেগেনাবীর্য্যং নির্ব্বাসনং সজ্জীবস্য কোশমাবরকং হৃদয়মহঙ্কারং পুমান্ দহতি। কথম্ভূতম্? পঞ্চমহাভূতপ্রধানম্; যদ্বা, অবিদ্যাস্মিতারাগদ্বেষাভিনিবেশাঃ পঞ্চ, তদাত্মকম্। উত্থিতঃ প্রজ্বলিতোঽগ্নির্যোনিমরণিমিব। যদ্বা, যদা রতিরাচার্য্যানুগ্রহশ্চ, তদা জ্ঞানবিরাগয়োর্বলেন[১] উত্থিতঃ সাক্ষাৎকারোঽবীর্য্যং পুনঃ প্ররোহ-ক্ষমং যথা ন ভবতি, এবং হৃদয়ং দহতি। শেষং সমানম্॥

২৭। ততঃ কিম্? অত আহ—দগ্ধ আশয়ো হৃদয়মুপাধির্যস্য; অতএব মুক্তাঃ সমস্তাস্তদ্গুণাঃ কর্ত্তৃত্বাদয়ো যেন; আত্মনঃ সকাশাদ্বহির্ঘটাদি, অন্তঃ সুখদুঃখাদি নৈব বিচষ্টে, ন পশ্যত্যেব। কুত ইত্যপেক্ষায়াং দ্রষ্টৃদৃশ্যভেদপ্রতীতেরন্তঃকরণহেতুকত্বাদিত্যাহ—পরো দৃশ্যঃ, আত্মা দ্রষ্টা, তয়োর্যদ্ব্যবধানং ভেদকং পূর্ব্বমাসীৎ, তস্য বিনাশে সতি। যথা স্বপ্নে

১। -র্বেগেন (ঘ)।

'রাজাহম্' ইত্যারোপিতং সৈন্যাদিদ্রষ্টারং দৃশ্যং সৈন্যঞ্চ স্বপ্নাবস্থানাশে ন পশ্যতি, তদ্বৎ ॥

২৮। দ্রষ্টৃদৃশ্যভেদ-প্রতীতেরন্তঃকরণহেতুকত্বমন্বয়-ব্যতিরেকাভ্যামুপপাদয়তি—আত্মানমিতি। আত্মানং দ্রষ্টারম্, ইন্দ্রিয়ার্থং দৃশ্যম্, উভয়োস্তয়োঃ পরং সম্বন্ধহেতুমহঙ্কারঞ্চাশয়ে অন্তঃকরণে সত্যেব জাগ্রৎস্বপ্নয়োঃ পশ্যতি, অন্যদা সুষুপ্তৌ ন। তদুক্তম্—'দৃশ্যানুরঞ্জিতং দ্রষ্টৃ দৃশ্যং দ্রষ্ট্রনুরঞ্জিতম্। অহঙ্কৃত্যোভয়ং রক্তং তন্নাশেঽদ্বৈততাত্মনঃ ॥' ইতি ॥

২৯। একস্মিন্নাত্মনি দৃশ্যাদি-ভেদপ্রতীতিরৌপাধিকীতি দৃষ্টান্তেন স্পষ্টয়তি—নিমিত্ত ইতি। লোকেঽপি চ সর্ব্বত্র জলদর্পণাদৌ ভেদনিমিত্তে সত্যেব আত্মনো বিম্বভূতস্য, পরস্য প্রতিবিম্বস্য চ ভেদং পশ্যতি, ন তু জলাদ্যভাবে ॥

৩০—৩৩। তদেবং চতুর্ভিরসঙ্গাত্মরত্যোর্মোক্ষহেতুত্বমুক্তম্, ইদানীমনাত্মরতেঃ সংসারহেতুত্বমাহ—ইন্দ্রিয়ৈরিতি চতুর্ভিঃ। (৩০) ধ্যায়তাং গুণারোপেণ স্মরতাং পুংসামিন্দ্রিয়াণি স্বতৈর্বিষয়ৈরাকৃষ্যন্তে, তৈশ্চ মন আক্ষিপ্যতে[১] বিষয়াসক্তিং প্রাপ্যতে। তচ্চ বুদ্ধেঃ সকাশাত্তদ্ধর্ম্মং চেতনাং বিচারসামর্থ্যং হরতি। এতচ্চাবিবেকিনা ন লক্ষ্যত ইতি দৃষ্টান্তেনাহ—তীরজঃ কুশাদিস্তম্বো যথা মূলৈস্তোয়ং হ্রদাদপহরতি, তদ্বৎ ॥ (৩১) চিত্তং চেতনামনু তস্যামপহৃতায়াং স্মৃতিঃ পূর্ব্বাপরানুসন্ধানং ভ্রশ্যতি। এবং তদ্রোধং জ্ঞানভ্রংশমাত্মন এব হেতোরাত্মনোঽপহ্নবং নাশং প্রাহুঃ ॥ (৩২) এবম্ভূতো নাশো ভবতু, ততশ্চ কিমিত্যত আহ—যদধি যমধিকৃত্য অন্যস্য বিষয়স্য প্রিয়তমত্বম্; 'আত্মনস্তু কামায় সর্ব্বং প্রিয়ং ভবতি' ইতি শ্রুতেঃ। তস্যাত্মনঃ স্বেনৈব যো ব্যতিক্রমোঽপহ্নবস্তস্মাদ্‌যঃ স্বার্থনাশঃ,

---

১। আকৃষ্যতে (ঘ)।

অতঃ পরতরঃ স্বার্থনাশো নাস্তি॥ (৩৩) কুতঃ? ইত্যত আহ—অর্থস্তাভিধ্যানম্, ইন্দ্রিয়ার্থঃ কামস্তস্তাভিধ্যানং সর্ব্বার্থনাশঃ। জ্ঞানং বিজ্ঞানঞ্চ পরোক্ষাপরোক্ষম্। যেন ধ্যানেন মুখ্যতাং স্থাবরতাম্॥

৩৪। অনাত্মরতেরনর্থহেতুত্বমুক্তম্, সঙ্গস্তাপ্যাহ—নেতি। যদ্বস্তু ধর্ম্মাদীনাং বিঘাতকম্, তস্মিন্ সঙ্গম্। তমঃ সংসারম্॥

৩৫। তুল্যবন্নির্দ্দেশাৎ পুরুষার্থসাম্যভ্রান্তিং বারয়তি—তত্রাপীতি। কৃতান্তঃ কালঃ॥

৩৬। ভয়সংযুতত্বমেবাহ—পরে ব্রহ্মাদয়ঃ, অবরে অস্মদাদয়ঃ, গুণক্ষোভাদনু পশ্চাদ্ভবন্তি। ঈশঃ কালস্তেন বিধ্বংসিতা আশিষো যেষাম্॥

৩৭। যস্মাদনাত্মরতিরনর্থহেতুস্তৎ তস্মাৎ জগতাং জঙ্গমানাং তস্থুষাং স্থাবরাণাঞ্চ দেহাদিভিরাত্মনা অহঙ্কারেণ চ আবৃতানাং হৃদি যশ্চকাস্তি প্রকাশতে, তমবেহি। কথম্? সোঽস্মীতি। সোঽস্তীতি পাঠে স এবৈকোঽস্তি, ততোঽন্যদসদিত্যর্থঃ। নন্নু জীবো হৃদি চকাস্তি, নান্যঃ? তত্রাহ—ক্ষেত্রবিদং জীবং তপতি নিয়ময়তীতি ক্ষেত্রবিত্তপঃ, তস্য ভাবস্তত্তা তয়া অন্তর্যামিরূপেণ। যদ্বা, ক্ষেত্রবিত্তে অহংমমতাস্পদে পাতীতি ক্ষেত্রবিত্তপস্তেন রূপেণ, জীবস্তু পারতন্ত্র্যান্ন পাতি। নন্নু কর্ম্ম জীবং নিযচ্ছতি? ন। আবিঃ প্রত্যক্ষঃ; তর্হি বুদ্ধিঃ? ন। প্রত্যক্ প্রতিলোমং চকাস্তি, বুদ্ধিস্তু পরাগ্বিষয়াকারেণ। তর্হ্যহঙ্কারঃ? ন। বিশ্বগ্ব্যাপকত্বেন, স তু পরিচ্ছিন্নঃ। এবম্ভূতো যো ভগবান্, তমবেহীতি॥

৩৮। 'স্থাবরজঙ্গমাদীনাং হৃদি চকাস্তি' ইত্যুক্তে তেষাং সত্ত্বম্, তৎসম্বন্ধাদীশ্বরস্য মালিন্যঞ্চ প্রসক্তং নিরাকুর্ব্বন্নুদ্রিক্তভক্ত্যা তং প্রণমতি—যস্মিন্নিদং বিশ্বং সদসদাত্মতয়োৎকৃষ্টনিকৃষ্টভাবেন কার্য্যকারণভাবেন বা মায়য়ৈব বিভাতি, তং প্রপদ্যে। মায়াত্বে হেতুঃ—বিবেকেন বিধূতির্নিরাকৃতির্যস্য তৎ। স্রজি বেতি, 'বা'-শব্দো দৃষ্টান্তে। নিত্যমুক্তম্, যতঃ পরি-

শুদ্ধম্। তৎ কুতঃ? বিশুদ্ধং তত্ত্বং সত্যম্, অতএব প্রত্যূঢ়া অভিভূতা কর্ম্মভিঃ কলিলা মলিনা প্রকৃতির্যেন তম্॥

৩৯—৪০। তমবেহীতি জ্ঞানমুপদিষ্টম্, তস্য দুঃখকরত্বেন[১] ভক্তিমুপদিশতি দ্বাভ্যাম্। (৩৯) যস্য পাদপঙ্কজয়োঃ পলাশান্যঙ্গুলয়ঃ, তেষাং বিলাসঃ কান্তিঃ, তস্য ভক্ত্যা স্মৃত্যা কর্ম্মাশয়মহঙ্কাররূপং হৃদয়গ্রন্থিং কর্ম্মভিরেব গ্রথিতম্। রিক্তা নির্বিষয়া মতির্যেষাম্, রুদ্ধঃ প্রত্যাহৃতঃ স্রোতোগণ ইন্দ্রিয়বর্গো যৈঃ। অরণং শরণম্॥ (৪০) ননু 'ব্রহ্মবিদাপ্নোতি পরম্' ইতি শ্রুতেঃ, কথং যতয়ো নোদ্গ্রথন্তীত্যুচ্যতে? তত্রাহ—কৃচ্ছ্র ইতি। অপ্লবেশাং ন প্লবস্তরণে হেতুঃ ঈট্ ঈশো যেষাং তেষাম্, মহান্ ইহ তরণে কৃচ্ছ্রঃ ক্লেশঃ। তে হি অসুখেন যোগাদিনেন্দ্রিয়ষড়্বর্গগ্রাহং ভবার্ণবং তিতীর্ষন্তি। তৎ তস্মাৎ, উড়ুপং প্লবম্। দুস্তরার্ণবমিত্যর্থঃ; 'অর্ণ'-শব্দে বকারাভাব আর্ষঃ; যদ্বা, দুস্তরোদকরূপং ব্যসনমিত্যর্থঃ॥

৪১। আত্মমেধসা ব্রহ্মবিদা, দর্শিতা আত্মনো গতিস্তত্ত্বং যস্মৈ সঃ॥

৪২। ব্রহ্মন্নিতি সম্বোধনং প্রাধান্যাদেকস্য। যূয়মিত্যুক্তিঃ সর্ব্বান্ প্রতি॥

৪৩। আত্মনা দেহেন সহ সর্ব্বরাজ্যাদিকং মদীয়ং সাধূচ্ছিষ্টং সাধুভিঃ স্বীকৃতং সৎ স্বয়ং মহ্যং প্রসাদরূপেণ দত্তম্, অতস্তত্র মম স্বত্বাভাবাদ্গুরুদক্ষিণার্থং কিং দদে? ন হি পিত্রা দত্তং মোদকাদি তস্মৈ দানরূপেণ প্রত্যর্প্যতে॥

৪৪। নিবেদনন্তু তদীয়স্যৈব সমর্পণম্। যথা ভৃত্যো রাজ্ঞে সেবারূপেণ তাম্বূলাদিকমর্পয়তি, তথা ময়াপি সর্ব্বং নিবেদিতং স্বীকুরুতেত্যাহ—প্রাণা ইতি॥

১। দুষ্করত্বেন (ঘ)।

৪৫—৪৬। আত্মনঃ স্বত্বাভাবং প্রপঞ্চয়তি—সৈনাপত্যঞ্চেতি দ্বাভ্যাম্॥ (৪৬) বস্তে পরিধত্তে। অন্নমাত্রং কেবলং ভুঞ্জতে, ন তু দানে স্বতন্ত্রাঃ॥

৪৭। সত্যপি স্বত্বে সর্ব্বস্বেনাপি ন গুরোঃ প্রত্যুপকর্ত্তুং শক্যমিত্যাহ—যৈরিতি। আত্মবাদে অধ্যাত্মবিচারে; একান্ততো নিশ্চয়েন; নিগমিভির্বেদবিদ্ভিঃ। তে নিত্যমনল্পকরুণাঃ স্বকৃতেনৈব দীনোদ্ধরণকর্ম্মণা তুষ্যন্তু, কো নাম তৎকৃতমুপকারং প্রতি স্বয়মুপকরোত্যুদপাত্রমঞ্জলিং বিনা? ময়াঞ্জলিরেব তেভ্যো বদ্ধ ইত্যর্থঃ। যদ্বা, বিনোদপাত্রমুপহাসাস্পদম্, প্রত্যুপকারে প্রবৃত্তো জনানামুপহাসাস্পদং ভবেদিত্যর্থঃ॥

৪৮। খেহভূবন্—আকাশমার্গেণোদ্গতাঃ॥

৪৯। ধুর্য্যো মুখ্যঃ, অধ্যাত্মশিক্ষয়া সংস্থিতিরেকাগ্রতা তয়া, আত্মনি অবস্থিতঃ সন্নাপ্তকামং পূর্ণমনোরথং মেনে॥

৫০। ব্রহ্মসাৎকৃতং ব্রহ্মণ্যর্পিতং যথা ভবতি তথা॥

৫১—৫২। নির্ব্বিষঙ্গঃ কর্ম্মস্বনাসক্তঃ; কর্ম্মাধ্যক্ষং কর্ম্মসাক্ষিণমুদাসীনং মন্বানঃ; অকরোদিতি পূর্ব্বেণৈবান্বয়ঃ, নাসজ্জতেত্যুত্তরেণ বা॥

৫৩। অর্চ্চিষি—ভার্য্যায়াম্॥

৫৫। সোমশ্চাসৌ রাজা চ, স ইব॥

৫৬। ভুবো বসু ধনং গৃহ্নন্ বিসৃজংশ্চাসৌ সূর্য্যবৎ। রাজ্ঞঃ প্রতপনমাজ্ঞাকরণম্ অগ্নিরিব দুর্দ্ধর্ষঃ॥

৫৭। দ্যৌঃ স্বর্গ ইব॥

৫৮। সমুদ্রো যথা গাম্ভীর্য্যেণৈতাবানিতি ন বুধ্যতে, তথা অসাবপি অভিপ্রায়তো দুর্ব্বোধঃ। অচলরাট্ মেরুরিব॥

৫৯। সর্ব্বাত্মা—সর্ব্বত্র সঞ্চারশক্তঃ; বলাদিভির্মাতরিশ্বেব॥

৬০। ভূতরাট্—শ্রীরুদ্রঃ॥

৬১। অজো ব্রহ্মেব ; আত্মবত্ত্বে জিতেন্দ্রিয়ত্বে ॥

৬২। ভক্ত্যাদিভিঃ পরার্থোত্তমে চাত্মনৈব তুল্যো নিরুপমঃ ॥

৬৩। পুম্ভিঃ সৎপুরুষৈঃ ; রামঃ সীতাপতিঃ ; যথা সতাং কর্ণরন্ধ্রেষু প্রবিষ্টঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
দ্বাবিংশোঽধ্যায়ঃ ॥ ২২ ॥

ত্রয়োবিংশোঽধ্যায়ঃ

ত্রয়োবিংশে সভার্য্যস্য বনে নিত্যসমাধিতঃ।
বিমানমধিরুহ্যাথ বৈকুণ্ঠগতিরীর্য্যতে ॥ (১)

১—৩। প্রবয়সং বৃদ্ধং দৃষ্ট্বা তপোবনমগাদিতি তৃতীয়েনান্বয়ঃ। (১) স্বকৃতোঽনুসর্গো মন্বাদিসর্গঃ পুরগ্রামাদিসর্গশ্চ, বর্দ্ধিতোঽশেষঃ স্বানুসর্গো যেন ॥ (২) নিষ্পাদিত ঈশ্বরাদেশঃ প্রজাপালনাদির্যেন। জজ্ঞিবান্ জাতঃ ॥ (৩) আত্মজাং পৃথ্বীম্ ; বিমনঃসু চিন্তাতুরাসু ; সদারঃ সভার্য্যঃ ॥

৪। অদাম্যা বিঘ্নৈর্নাশয়িতুমশক্যা নিয়মা যস্য। বানপ্রস্থানাং সুসম্মতে উগ্রে তপস্যারব্ধঃ প্রবৃত্তঃ। কর্ত্তরি ক্তঃ। যথা স্বস্য ধরামণ্ডলস্য বিজয়ে পূর্ব্বং যথা মহতা যত্নেন প্রবৃত্তঃ, তথেতি ॥

৫—৭। উগ্রং তপো দর্শয়তি—কন্দমূলেতি ত্রিভিঃ। (৫) ক্বচিৎ কদাচিৎ ॥ (৬) চতুর্দ্দিক্ষু চত্বারোঽগ্নয় উপরি সূর্য্য ইতি পঞ্চানাং তপঃ সন্তাপো যস্য স পঞ্চতপাঃ। আসারং সহত ইত্যাসারষাট্ ; শিশিরে ঋতৌ, স্থণ্ডিলেশয়ঃ ভূমিশয়নঃ সর্ব্বদা ॥

৮। তেন তপসা, ক্রমানুসিদ্ধেন শনৈঃ প্রাপ্তেন ; ধ্বস্তানি কর্ম্মাণি যস্য, অতঃ অমল আশয়ো যস্য, ছিন্নানি বন্ধনানি বাসনা যস্য ॥

১১। পরিকর্ম্মণা পরিচর্য্যয়া শুদ্ধসত্ত্ব আত্মা মনো যস্য তস্য জ্ঞানমভূৎ। কীদৃশম্? যেন নিজমুপাধিং জীবকোশং হৃদয়গ্রন্থিং সংশয়ানামসম্ভাবনাদীনাং পদমাশ্রয়ং চিচ্ছেদ। কীদৃশেন? অনয়া ভক্ত্যা নিশিতেন তীক্ষ্ণেন। কথম্ভূতয়া? তস্য ভগবতোঽনুসংস্মরণেনানুপূর্ত্তিঃ সম্পূর্ত্তির্যস্যাস্তয়া নিশিতেন॥

১২। কিঞ্চ, ছিন্না অন্যধীর্দেহাত্মবুদ্ধির্যস্য, যতোঽধিগতাত্মগতিঃ, অতএব নিরীহঃ প্রাপ্তাসু সিদ্ধিষু নিঃস্পৃহঃ, যেন বয়ুনেন জ্ঞানেনেদং সংশয়পদং চিচ্ছেদ, তৎ তত্যজে ত্যক্তবান্, তৎপ্রযত্নাদপ্যুপররামেত্যর্থঃ। তস্য যোগসিদ্ধিষ্বপি নিঃস্পৃহত্বং যুক্তমেবেত্যাহ—তাবন্নাপ্রমত্তঃ, কিন্তু প্রমত্তো ভবতি। তস্য শ্রীকৃষ্ণকথারতত্বান্ন তাসু লোভো জাত ইত্যর্থঃ॥

১৪—১৮। দেহত্যাগপ্রকারমাহ—সম্পীড্যেতি পঞ্চভিঃ। (১৪) পায়ুং গুদং সম্পীড্যেতি মুক্তাসনং সূচিতম্। 'সম্পীড্য সীবনীং সূক্ষ্মাং গুল্ফেনৈব তু মধ্যতঃ। সব্যে দক্ষিণগুল্ফেন মুক্তাসনমিতীরিতম্॥' মূলাধারাদ্ বায়ুমুৎসারয়ন্নূর্দ্ধং নয়ন্ নাভ্যামবস্থাপ্য ততঃ কোষ্ঠেষ্ববস্থাপ্য অযূযুজদিত্যুত্তরেণান্বয়ঃ। কোষ্ঠান্যেবাহ—হৃদাদীনাং দ্বন্দ্বৈক্যম্। শীর্ষং ভ্রূমধ্যং তস্মিন্॥ (১৫) তং বায়ুম্। উৎসর্পয়ন্নসূনিতি পাঠান্তরে এবমসূন্ প্রাণানুৎসর্পয়ন্ ক্রমেণ মূর্দ্ধ্নি ব্রহ্মরন্ধ্র আবেশ্য। ততো দেহারম্ভকপঞ্চভূতানি সমষ্টিভূতেষু বিলাপিতবান্, তদাহ—বায়ুং বায়ৌ অযূযুজদেকীকৃতবান্; কায়ং দেহগতং কঠিনাংশং ক্ষিতৌ॥ (১৬) খানি ইন্দ্রিয়চ্ছিদ্রাণি; দ্রবাংশং তোয়ে; তদেবং দেহং প্রবিলাপ্যাদ্বিতীয়াত্মপ্রতিপত্ত্যর্থং মহাভূতানামপি লয়মাহ—ক্ষিতিমম্ভসি একীকৃতবান্। তদম্ভস্তেজসি, অদস্তেজো বায়ৌ, অমুং বায়ুং নভসি॥ (১৭) তদেবং তামসাহঙ্কারকার্য্যস্যাকাশপর্য্যন্তং লয়মুক্ত্বা সাত্ত্বিকরাজসাহঙ্কারকার্য্যাণাং লয়মাহ—ইন্দ্রিয়েষ্বিতি। ইন্দ্রিয়েষু মন ইতি দেবানামপ্যুপলক্ষণম্। সবিকল্পক-জ্ঞানে মনস ইন্দ্রিয়ৈরাকর্ষণাত্তেষু

লয়াভিধানম্. ন তু কার্য্যত্বাৎ। তদুক্তং গীতাসু—'ইন্দ্রিয়াণাং হি চরতাং যন্মনোঽনুবিধীয়তে' ইতি। অত্র চ—'ইন্দ্রিয়ৈর্বিষয়াকৃষ্টৈরাক্ষিপ্তং ধ্যায়তাং মনঃ' ইতি। ইন্দ্রিয়েষু নভ ইতি পাঠেঽপ্যয়মর্থঃ। ভট্টাদীনাং মতে নভশ্চাক্ষুষম্, কেষাঞ্চিন্মানসম্। আনুমানিকত্বমতেঽপীন্দ্রিয়ব্যাপারোঽস্ত্যেব। নভোগুণশ্চ শব্দঃ শ্রোত্রগ্রাহ্যঃ, অত ইন্দ্রিয়গ্রাহ্যত্বাদিন্দ্রিয়েষু নভো বিলাপিতমিতি। তানীন্দ্রিয়াণি যথোদ্ভবম্, উদ্ভবোঽত্র বৃত্তিলাভঃ, স চ বিষয়াধীন ইতি শ্রোত্রাদীনাং বিষয়েষু শব্দাদিষু লয়ঃ। যদ্বা, তন্মাত্রকার্য্যাণ্যেবেন্দ্রিয়াণি, মনোঽপি অপঞ্চীকৃতপঞ্চতন্মাত্রকার্য্যম্, আহঙ্কারিকত্বাভিধানন্তু তদধীনত্ববিবক্ষয়েত্যবিরোধঃ। ভূতাদিনাহঙ্কারেণ, প্রাগবশিষ্টনভঃসহিতানীন্দ্রিয়াণ্যুৎকৃষ্য পরতো নীত্বা ভূতাদৌ ক্ষিপ্ত্বা তেন সহ মহত্তত্ত্বে সন্দধ ইত্যর্থঃ॥ (১৮) সর্ব্বেষাং গুণানাং কার্য্যাণাং বিন্যাসঃ স্থিতির্যস্মিংস্তং মহান্তং মায়াময়ে মায়োপাধিপ্রধানে জীবে। তঞ্চানুশয়মুপাধিম্, যঃ পূর্ব্বমনুশয়ী পুমান্ জীবঃ, অসৌ পৃথুর্ব্রহ্মণি স্থিতঃ সন্নজহাদিত্যর্থঃ॥

১৯—২২। বনপ্রবেশমারভ্য রাজ্ঞ্যাঃ কথামাহ—অর্চ্চির্নামেতি চতুর্ভিঃ। (১৯) অনুগতানুজগাম। অতদর্হা তদপি নার্হতি যা। কিম্? পদ্ভ্যাং ভুবঃ স্পর্শনমিতি যৎ॥ (২০) ভর্ত্তুর্ব্রতং যদ্ভূমিশয়নাদি, তস্মিন্ ধর্ম্মে যা নিষ্ঠা তয়া। ঋষীণামিয়মার্ষী, দেহযাত্রা কন্দ-মূলাদিবৃত্তিঃ, তয়া চ আর্ত্তিং দুঃখং ন প্রাপ। তত্র হেতুঃ—প্রেয়সঃ করেণ স্পর্শনং মানশ্চ তাভ্যাং নির্বৃতির্যস্যাঃ॥ (২১) পৃথিব্যাঃ পত্যুঃ। দুহিতৃত্বন্তু তস্যা দেবতারূপেণ। বিপন্নং নষ্টমাখিলং চেতনাদিকং যস্মিংস্তথাভূতং দেহমালক্ষ্য তং দেহং চিতামারোপয়ৎ॥ (২২) কৃত্যং তৎকালোচিতং বিধায়, হ্রদিন্যা জলে আপ্লুতা স্নাতা সতী ভর্ত্তুরুদকং দত্ত্বা, দিবি অন্তরীক্ষে স্থিতান্ দেবান্ নত্বা, বহ্নিং ত্রিঃ প্রদক্ষিণীকৃত্য॥

২৩। দেবৈঃ সহিতাঃ॥

২৪। গৃণন্তি স্ম অভাষন্ত ॥

২৬। অসতীনাং দুর্বিভাব্যেন কর্ত্তুমশক্যেন কর্ম্মণা ॥

২৭। ভগবান্ পদ্যতে গম্যতেঽনেনেতি তথা, তৎ নৈষ্কর্ম্ম্যং জ্ঞানং যে চঞ্চলায়ুষোঽপি সাধয়ন্তি, তেষামন্যদ্দেবাদিপদং কিমু দুর্লভম্ ? ন কিঞ্চি-দিত্যর্থঃ ॥

২৮। অভক্তং শোচন্তি—স বঞ্চিত ইতি। যত আত্মনে দ্রুহ্যতি, যোঽপবর্গসাধনং মানুষ্যং লব্ধ্বাপি বিষয়েম্বাসক্তিং যাতি ॥

৩২। বিশাং পশ্বাদীনাং বৈশ্যাদীনাং বা পতিঃ স্যাৎ। শূদ্রঃ শৃণ্বন্নিতি শেষঃ, তস্য পাঠানধিকারাৎ ॥

৩৭। যদ্যপি বহূনি ফলানি ভবন্তি, তথাপি মুক্তান্যসঙ্গ এব শ্রবণাদি কুর্য্যাৎ ॥

৩৮। মহতো ভগবতো মাহাত্ম্যস্য সূচকম্। পার্থবীং পৃথুসম্বন্ধিনীম্। পার্থিবীমিতি বা পাঠঃ ॥

৩৯। প্রথয়ন্ কীর্ত্তয়ন্, ভবসিন্ধৌ পোতঃ পাদৌ যস্য ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থদীপিকায়াং চতুর্থস্কন্ধে

ত্রয়োবিংশোঽধ্যায়ঃ ॥ ২৩ ॥

চতুর্বিংশোঽধ্যায়ঃ

একাদশভিরধ্যায়ৈঃ পৃথোশ্চরিতমীরিতম্।

প্রচেতসামথাষ্টাভিস্তন্মধ্যে পঞ্চভিঃ পিতুঃ ॥ (১)

চতুর্ব্বিংশে প্রপৌত্রাত্তু পৃথোঃ প্রাচীনবর্হিষঃ।

প্রচেতসাং জনিস্তেভ্যো রুদ্রগীতঞ্চ বর্ণ্যতে ॥ (২)

১। অধিরাজ আসীদিত্যর্থঃ। যবীয়োভ্যঃ কনিষ্ঠেভ্যঃ, কাষ্ঠা দিশঃ ॥

২। তুর্য্যাং চতুর্থীম্, উত্তরাং দিশম্ ॥

৩। শক্রাল্লব্ধা পৃথোরশ্বমেধে অশ্ববিজয়াবসরে ॥

৪। অপত্যত্রয়মেবাহ—পাবক ইতি। পুরা যঃ শাপস্তস্মান্মনুষ্যেষু উৎপন্নাঃ সন্তো যোগগতিমগ্নিত্বং প্রাপ্তাঃ ॥

৫। নভস্বত্যামন্যস্যাং ভার্য্যায়াম্। অন্তর্দ্ধানস্য বিশেষণম্—য ইতি। এতেন শক্রাদন্তর্দ্ধান-গতিলাভে কারণমুক্তম্ ॥

৬। স চান্তর্দ্ধানো রাজ্ঞাং বৃত্তিং করাদানাদিভির্দারুণাং পরপীড়াত্মিকাং মন্যমানো বিসসর্জ্জ হ ॥

৭। হন্তি স্বানাং ক্লেশমিতি হংসস্তং পুরুষং পূর্ণম্। কুশলং পুণ্যম্, তদ্রূপেণ সমাধিনা ॥

৯। হাবির্দ্ধানির্হবির্দ্ধানস্য পুত্রঃ। যোগেষু প্রাণায়ামাদিষু ॥

১০। ক্রিয়াকাণ্ডনিষ্ণাতত্বমাহ—যস্যেতি। ইদং বসুধাতলম্। দেব-যজনং যজ্ঞবাটং বিতন্বতঃ, যত্রৈকো যজ্ঞঃ কৃতস্তৎসমীপ এব যজ্ঞান্তরং কুর্ব্বতঃ সতঃ। অতএব প্রাচীনবর্হিরিত্যুচ্যতে ॥

১১। সমুদ্রস্য কন্যাং দেব-দেবেন ব্রহ্মণোপদিষ্টাং শতদ্রুতিং নাম। কিশোরীং বালাং পরিক্রমন্তীং প্রদক্ষিণং গচ্ছন্তীম্। শুকীমিবেত্যেবং ব্যাখ্যায়তে[১]—সপ্তর্ষীণাং সত্রে তদ্ভার্য্যাদর্শনেনাগ্নিঃ কামসন্তপ্তোঽভূৎ; পশ্চাৎ তঞ্চ তদ্ভার্য্যা স্বাহা নাম সপ্তর্ষিভার্য্যারূপধারিণী সতী রময়ামাস, রময়িত্বা চ তদ্রেতঃ শুকীরূপেণ শরস্তম্বে নিধায়াগচ্ছৎ। তাং যথা সপ্তর্ষি-ভার্য্যাভ্রান্ত্যাগ্নিঃ কামিতবান্, তদ্বদিতি। স্বকীমিতি পাঠে স্তোকঘৃত-ধারামিবেত্যর্থঃ ॥

১। আখ্যায়তে (ঘ)।

১২। স্বর্য্যয়া নবোঢ়য়ৈব বিবুধাদয়ো বিজিতা অভিভূতাঃ, তচ্চ নূপুরৈঃ পাদৌ ক্বণয়ন্ত্যেব. তদ্ধ্বনিমাত্রেণেত্যর্থঃ ॥

১৩। তুল্যং নাম ব্রতমাচারশ্চ যেষাম্। ধর্ম্মস্নাতাঃ ধর্ম্মপারগাঃ ॥

১৪। তপসা তপসাং পতিং হরিমার্চ্চন্নর্চ্চয়ামাসুঃ ॥

১৭। মুনয়োঽপি সঙ্গত্যাগেনাপ্তুমিষ্টং যং দধ্যুরেব কেবলম্, ন তু প্রাপুঃ ; তেন শিবেন ॥

১৮। নন্থ মুনীনাং কিং তদ্ধ্যানেন ঘোরত্বাদিত্যাশঙ্ক্যাহ—আত্মারামোঽপি লোকরচনায়াঃ পালনায় ॥

১৯। গুর্ব্বাজ্ঞাকারিণাং শিবদর্শনং স্বত এব ভবতীত্যাশয়েনাহ—প্রচেতস ইতি ॥

২০। সমুদ্রমুপ সমুদ্রাৎ কিঞ্চিন্ন্যূনম্, উপোঽধিকে চেতি কর্ম্মপ্রবচনীয়ঃ। প্রসন্নাঃ সলিলাশয়া মৎস্যাদয়ো যস্মিন্ ॥

২১। নীলোৎপলাদীনামাকরং জন্মস্থানম্। উৎপলাম্ভোজকহ্লারাণি রাত্রিদিবাসন্ধ্যাবিকাশীনি। ইন্দীবরং নীলোৎপলম, তস্য পুনরুক্তিঃ প্রাচুর্য্যজ্ঞাপনার্থম্। হংসাদিভির্নিকূজিতম্ ॥

২২। মত্তানাং ভ্রমরাণাং সৌস্বর্য্যেণ হৃষ্টরোমাণো লতাঙ্ঘ্রিপা যস্মিন্ ; পদ্মকোশরজো দিক্ষু বিক্ষিপতা পবনেনোৎসবো যস্মিন্ ॥

২৩। তত্র মৃদঙ্গপণবাদিবাদ্যমনু পশ্চাদ্দিব্যৈর্মার্গৈর্ভেদৈর্মনোহরং গান্ধর্ব্বং গানমাকর্ণ্য বিস্ময়ং প্রাপ্তাঃ। মৃদঙ্গপণবাদ্যবদিতি পাঠে মৃদঙ্গপণবাদি অবদ্রক্ষৎ, তেষাং ধ্বনিমতিরস্কুর্ব্বদিত্যর্থঃ ॥

২৪। তে চ ত্রিলোচনং বীক্ষ্য জাতাশ্চর্য্যাঃ প্রণেমুরিত্যুত্তরেণান্বয়ঃ ॥

২৫। তপ্তহেমরাশিসদৃশকান্তিম্ ; শিতিনীলঃ কণ্ঠো যস্য তম্ ॥

২৭। বেদিষদঃ—বর্হিষদঃ। চিকীর্ষিতং ভগবদারাধনং বিদিতম্ ॥

২৮। অনুগ্রহে কারণমাহ—যঃ সাক্ষাদ্‌বাসুদেবং প্রপন্নঃ, স হি মে প্রিয়ঃ। কথম্ভূতম্? রহসঃ সূক্ষ্মাৎ ত্রিগুণাৎ প্রধানাৎ জীবসংজ্ঞিতাৎ পুরুষাচ্চ পরম্, প্রকৃতিপুরুষয়োর্নিয়ন্তারমিত্যর্থঃ ॥

২৯। তৎ কিম্? তস্য মহত্তমত্বাদিত্যাহ—স্বধর্ম্মনিষ্ঠঃ পুমান্ বহুভির্জন্মভির্বিরিঞ্চতাং প্রাপ্নোতি, ততোঽপি পুণ্যাতিশয়েন মামেতি, ভাগবতস্তথা দেহান্তেঽব্যাকৃতং প্রপঞ্চাতীতং বৈষ্ণবং পদমেতি। যথাহং রুদ্রো ভূত্বা আধিকারিকবদ্‌বর্ত্তমানঃ বিবুধা দেবাশ্চাধিকারিকাঃ কলাত্যয়ে অধিকারান্তে লিঙ্গভঙ্গে সত্যেষ্যন্তি ॥

৩০। অথ ভাগবতত্বাদ্‌যূয়ং মে প্রিয়াঃ স্থ। ভবদ্ভিরপি ময়ি প্রীতিঃ কার্য্যেত্যাশয়েনাহ—মদন্যো ভাগবতানাঞ্চ প্রেয়ান্ নাস্তি ॥

৩১। অত ইদং জপ্তব্যং শ্রূয়তামিতি। বিবিক্তমসঙ্কীর্ণং যথা ভবতি।

স্বষ্ট্যাদৌ ব্রহ্মণা সৃষ্টা পুত্রেভ্যঃ প্রোক্তমিষ্টদম্।
স্তোত্রং প্রাহ প্রচেতোভ্যঃ কৃপয়া ভগবান্ শিবঃ ॥ (৩)

৩৩। তে জিতং তবোৎকর্ষ আত্মবিদ্ধুর্য্যাণাং স্বস্তয়ে শোভনসত্তায়ৈ স্বানন্দলাভায়েত্যর্থঃ। অতো মে স্বস্তিঃ স্বানন্দসত্তাস্ত। ননু মমোৎকর্ষো মদর্থ এব কিং ন স্যাৎ? তত্রাহ—ভবতা রাধসা স্বানন্দরূপেণ রাদ্ধং সিদ্ধম্, ত্বং নিরতিশয়পরমানন্দরূপেণৈব নিত্যং স্থিত ইত্যর্থঃ; অত এবম্ভূতায়াত্মনে তুভ্যং নমঃ; সর্ব্বস্মৈ সর্ব্বরূপায় চ ॥

৩৪—৪৩। সর্ব্বরূপত্বং প্রপঞ্চয়ন্ প্রণমতি সার্দ্ধৈর্দশভিঃ। (৩৪) পঙ্কজং লোকাত্মকং নাভৌ যস্য, তস্মৈ কারণাত্মনে নমঃ। কারণত্বাদেব সৃজ্যানাং প্রাণিনাং যে উপাধয়ো ভূতানি সূক্ষ্মাণি তন্মাত্রাণীন্দ্রিয়াণি চ তেষামাত্মনে নিয়ন্ত্রে। অন্তঃকরণচতুষ্টয়াধিষ্ঠাতৃত্বেন প্রণমতি চতুর্ভিঃ শ্লোকার্দ্ধৈঃ। বাসুদেবায় চিত্তাধিষ্ঠাত্রে, কূটস্থায় নির্ব্বিকারায়, চিত্তস্যৈকরূপত্বাৎ॥ (৩৫—৩৮)

সঙ্কর্ষণায় অহঙ্কারাধিষ্ঠাত্রে, সূক্ষ্মায় অব্যক্তায়, দুরন্তায় অনন্তায়, অন্তকায় মুখাগ্নিনা লোকদাহকায়। বিশ্বস্য প্রকর্ষেণ বোধো যস্মাৎ, অন্তরাত্মনে বুদ্ধ্যধিষ্ঠাত্রে॥ (৩৬) হৃষীকাণামীশং যদিন্দ্রিয়ং মনস্তদাত্মনে; সূর্য্যরূপেণ প্রণমতি— পরমহংসায় সূর্য্যরূপায়। পূর্ণায় তেজসা বিশ্বব্যাপিনে; নিভৃতাত্মনে ক্ষয়বৃদ্ধিশূন্যায়॥ (৩৭) স্বর্গায় অপবর্গদ্বারায় চ। শুচিন্যন্তঃকরণে নিষীদতীতি শুচিষৎ, তস্মৈ 'হংসঃ শুচিষৎ' ইতি শ্রুতেঃ। হিরণ্যং বীর্য্যং যস্য তস্মৈ অগ্নিরূপায়। চাতুর্হোত্রং কর্ম্ম তস্মৈ, তৎসাধনায়েত্যর্থঃ। কুতঃ? তন্তবে তদ্বিস্তারকায়॥ (৩৮) সোমত্বমাহ—ঊর্জ্জে পিতৄণামন্নায়; ইষে দেবানামন্নায়; যজ্ঞরেতসে সোমায়, স হি পিতৄণাং দেবানাঞ্চান্নম্; এবংরূপায় ত্রয্যাঃ পতয়ে হরয়ে নমঃ। সূর্য্যাগ্নিসোমত্বেনৈব তেজস্ত্বমুক্তম্। জলত্বমাহ— সর্ব্বরসাত্মনে জলরূপায়॥ (৩৯) বিশেষায়—পৃথ্বীরূপায়; সর্ব্বেষাং সত্ত্বানাং প্রাণিনাং যে আত্মানঃ, তেষাং দেহায়; স্থবীয়সে বিরাড়্দেহায় চ; ত্রৈলোক্যপালায় বায়বে; সহআদিরূপায়. স হি প্রাণরূপেণ ত্রৈলোক্যং পালয়তি; সহআদিধর্ম্মায় চ॥ (৪০) নভসে—আকাশায় চ; অর্থানাং লিঙ্গায় জ্ঞাপকায়, শব্দগুণত্বাৎ; অন্তর্ব্বহিরাত্মনেঽন্তর্ব্বহির্ব্যবহারালম্বনায়। এবং মহাভূতরূপত্বমুক্তম্। অমুষ্মৈ স্বর্গায় ভূরিবর্চ্চসে, 'এষ বৈ জ্যোতিষ্মন্তং পুণ্যং লোকং প্রয়াতি' ইতি শ্রুতেঃ॥ (৪১) প্রবৃত্তায় নিবৃত্তায় চ কর্ম্মণে; পিতৃদেবায় যথাক্রমং পিতৃদেবপ্রাপ্তিফলায়; অধর্ম্মফলরূপায় চ মৃত্যবে॥ (৪২) হে ঈশ! আশিষাং কারণাত্মনে সর্ব্বকর্ম্মফলদাত্রে; মনবে সর্ব্বজ্ঞায় মন্ত্রাত্মকায়েতি বা। বিষ্ণুত্বেন প্রণমতি—বৃহতে ধর্ম্মায়, পরমধর্ম্মাত্মনে কৃষ্ণায়॥ (৪৩) রুদ্ররূপেণ প্রণমতি—মীঢ়ুষে রুদ্রায়, অহঙ্কৃতমহঙ্কারস্তদাত্মনে। স চ কর্ত্তৃকরণকর্ম্মশক্তিত্রয়সমেতস্তস্মৈ। ব্রহ্মত্বেন প্রণমতি—চেতো জ্ঞানম্, আকূতিঃ ক্রিয়া, তদ্রূপায়। বাচো বিবিধা ভূতিঃ সৃষ্টির্যস্মাৎ, তস্মৈ॥

৪৪—৫২। এবং নমস্কৃত্য দর্শনং প্রার্থয়তে—দর্শনমিতি নবভিঃ। (৪৪) ভাগবতৈঃ সৎকৃতং দর্শনং দেহীত্যস্য বিবরণং রূপমিত্যাদি প্রদর্শয়েত্যন্তম্। স্বানাং ভক্তানাং প্রিয়তমং রূপং প্রদর্শয়েতি নবমেনান্বয়ঃ। সর্ব্বেষামিন্দ্রিয়াণাং যে গুণা বিষয়াস্তেষামঞ্জনং ব্যঞ্জকং সর্ব্বেন্দ্রিয়বিষয়-বিষয়িরূপমিত্যর্থঃ; সর্ব্বেন্দ্রিয়াণি স্বগুণৈরনক্তি রঞ্জয়তীতি বা॥ (৪৫) স্নিগ্ধঃ প্রাবৃষি যো ঘনস্তদ্বচ্ছ্যামম্; সর্ব্বেষাং সৌন্দর্য্যাণাং সংগ্রহো যস্মিন্; চারব আয়তাশ্চত্বারো বাহবো যস্মিন্; সুজাতং যথোচিতং সর্ব্বাবয়বরুচিরমাননং যস্মিন্॥ (৪৬) পদ্মস্য কোশে মধ্যে যানি পলাশানি পত্রাণি তদ্বদক্ষিণী যস্মিন্; সুকপোলমাস্যং যস্মিন্; সমৌ কর্ণৌ বিভূষণং যস্য, কুণ্ডলয়োরগ্রে বক্ষ্যমাণত্বাৎ॥ (৪৭) প্রীত্যা প্রহসিতাবিব অপাঙ্গৌ যস্মিন্॥ (৪৮) স্ফুরন্তি কিরীটাদীনি যস্মিন্, শঙ্খাদিমৎ, উত্তমর্দ্ধির্লক্ষ্মীঃ; যদ্বা, এতৈরুত্তমা ঋদ্ধিরুৎকর্ষো যস্যাস্তি, তৎ॥ (৪৯) সৌভগযুক্তা গ্রীবা যেন, সিংহস্য স্কন্ধে পরিতঃ প্রসরন্তঃ কেশরা এব ত্বিষঃ, তাদৃশীঃ সর্ব্বতস্ত্বিষো বিভ্রচ্চাসৌ সৌভগগ্রীবঃ কৌস্তুভো যস্মিন্; যদ্বা, সিংহস্যেব স্কন্ধৌ, তয়োস্ত্বিষঃ কুণ্ডল-হারাদিদীপ্তীর্বিভ্রদিতি পৃথগ্বিশেষণম্। সৌভগযুক্তা গ্রীবা যেন স কৌস্তুভো যস্মিন্; শ্রিয়া হেতুভূতয়া ক্ষিপ্তস্তিরস্কৃতো নিকষাশ্মা স্বর্ণরেখাঙ্কিতো নিকষণপাষাণো যেন, তাদৃশেনোরসা উল্লসচ্ছোভমানম্॥ (৫০) শ্বাসোচ্ছ্বাসাভ্যাং সংবিগ্নাশ্চঞ্চলা বলয়ঃ, তাভির্বল্গু সুন্দরং দলবদশ্বত্থপত্রসদৃশমুদরং যস্মিন্। প্রতিসংক্রাময়দ্যতো নির্গতং তেনৈব দ্বারেণ পুনঃ প্রবেশয়দিব॥ (৫১) শ্যামশ্রোণ্যাধিকং রোচিষ্ণু যৎ পীতং দুকূলম্, তত্র স্বর্ণময়ী মেখলা যস্মিন্; অঙ্ঘ্রী চ জঙ্ঘে চ ঊরূ চ নিম্নে অনুন্নতে জানুনী চ সমৈশ্চারুভিরেতৈঃ শোভনং দর্শনং যস্য; সমাশ্চারবোঽঙ্ঘ্র্যাদয়ো যস্মিন্, নিম্নে জানুনী যস্মিন্, শোভমানং দর্শনং যস্যেতি পদত্রয়ং বা॥ (৫২) পদা দীপস্থানীয়েন যদ্বা, এবম্ভূতেন পদোপলক্ষিতং রূপং পদং শরণং প্রদর্শয়েত্যর্থঃ। শরদি

যৎ পদ্মম্, তস্য পলাশং তদ্বদ্‌রোচির্যস্য তেন, নখদীপ্তিভিরন্তর্ভবমঘমজ্ঞানং বিধুন্বতা; স্বীয়ং রূপং পদং শরণং প্রদর্শয়। অপাস্তং প্রহ্লাদাদীনাং সাধ্বসং যেন, তৎ। হে গুরো! যতস্ত্বমেব তমোজুষামজ্ঞানামস্মাকং মার্গ-প্রদর্শকো গুরুঃ॥

৫৩। অতিদুর্লভমিদং ময়া প্রার্থিতমিতি স্তোতৈবাহ—এতদ্রূপমনু-ধ্যেয়ং ধ্যানার্হমেব, ন তু প্রত্যক্ষতঃ প্রাপ্যমিত্যর্থঃ॥

৫৪। তর্হি কিং কেনাপি ন প্রাপ্যতে? তত্রাহ—ভবানিতি। দুর্লভত্বমেবাহ—স্বর্গে রাজ্যং যস্য, তস্যাপ্যভিমতঃ স্পৃহণীয়ঃ; কিঞ্চ, একান্তেন য আত্মবিত্তস্যাপি গতির্গম্যঃ॥

৫৫। অতস্ত্বদর্চ্চনব্যতিরেকেণ ন কিঞ্চিদ্‌বাঞ্ছামীত্যাহ—তং ত্বামে-কান্তভক্ত্যা আরাধ্য। বহিঃ—স্বর্গাদিসুখম্॥

৫৬। তত্র হেতুঃ—যত্র পাদমূলে শরণং প্রবিষ্টং কৃতান্তঃ কালো 'মমায়ং বশ্যঃ' ইতি নাভিমানং করোতি। কিং কুর্ব্বন্? বীর্য্যং প্রভাবঃ, শৌর্য্যমুৎসাহঃ, তাভ্যাং বিস্ফূর্জ্জিতয়া ক্ষুভিতয়া ভ্রুবা বিশ্বং বিধ্বংসয়ন্নপি॥

৫৭। ত্বৎপাদমূলে প্রবিষ্টস্য কৃতান্তভয়াভাবঃ কিয়ানয়ং লাভঃ, যতস্ত্ব-দ্ভক্তসঙ্গ এব সকলপুরুষার্থশ্রেণিশিরসি নরীনর্ত্তীত্যাহ—ভগবতস্তব সঙ্গিনাং সঙ্গস্য ক্ষণার্দ্ধেনাপি স্বর্গং ন তুলয়ে সমং ন গণয়ামি, ন চাপুনর্ভবং মোক্ষম্। মর্ত্ত্যানামাশিষো রাজ্যাদ্যাঃ কিমুত?

৫৮। অথ অতো হেতোরনঘৌ অঘহরাবঙ্ঘ্রী যস্য, তস্য তব কীর্ত্তির্যশস্তীর্থং গঙ্গা, তয়োঃ ক্রমেণান্তর্ব্বহিঃস্নানাভ্যাং বিধূতঃ পাপ্মা যেষাম্, অতএব ভূতেষ্বনুক্রোশঃ কৃপা সুসত্ত্বঞ্চ রাগাদিরহিতং চিত্তং শীলঞ্চা-র্জ্জবাদি বিদ্যতে যেষাম্, তেষাং সঙ্গোঽস্মাকং স্যাৎ, এষ এব নঃ ত্বদনুগ্রহঃ॥

৫৯। তত্ত্বজ্ঞানঞ্চ ত্বদ্ভক্তসঙ্গাদেব ভবতীত্যাহ—ন যস্তেতি। যেষাং সতাং ভক্তিযোগেনানুগৃহীতং বিশুদ্ধং সদ্যস্য চিত্তং বাহ্যার্থবিক্ষিপ্তং ন ভবতি, তমোরূপায়াং গুহায়াঞ্চ নাবিশৎ, লয়ং ন প্রাপ, তত্র তদা স মুনিস্তব গতিং তত্ত্বং পশ্যতি ॥

৬০। কীদৃশং তত্ত্বম্? তদাহ—যত্রেতি ॥

৬১। জগত উপাদানত্বেন তত্ত্বং লক্ষিতম্, নিমিত্তত্বেনাপি তদেব লক্ষয়ন্নাহ—য ইদং বিশ্বং সদিব পরমার্থমিব মায়য়াস্জৎ। কথম্ভূতয়া? যয়া ভেদবুদ্ধিরন্যেষাং ভবতি, তয়া; আত্মনি ত্বয়ি দুঃস্থয়া স্বকার্য্যং কর্ত্তুম-সমর্থয়া। তং ত্বাং নিরস্তভেদং প্রতীমহি জানীমঃ॥

৬২। যদ্যপি ত্বমেবং নির্ভেদং ব্রহ্ম, তথাপি প্রাগুক্তং সাকারমিদং তব রূপং যে যজন্তি, ত এব বেদাগমতত্ত্বজ্ঞা ইত্যাহ—ক্রিয়াকলাপৈর্যে কর্ম্মযোগিনঃ পূজয়ন্তি, ত এব কোবিদাঃ, ন ত্বেতদনাদৃত্য কেবলজ্ঞানে প্রবৃত্তাঃ। তন্ত্রে আগমে; কথম্ভূতমিদম্? ভূতেন্দ্রিয়ান্তঃকরণৈরস্বতন্ত্রৈর্যদুপ-লক্ষ্যতে, তন্নিয়ন্তৃ রূপম্ ॥

৬৩। নন্বভিন্নে ময়ি ভেদং কুর্ব্বন্তঃ সন্তঃ কথং তে কোবিদাঃ? ন হি তৈর্ভেদঃ ক্রিয়তেঃ, ত্বয়ৈব ক্রীড়ার্থং চেতনাচেতনাত্মকো ভেদঃ কৃত ইত্যাহ—ত্বমিতি। আদ্যস্ত্বমেক এব, সুপ্তা মায়াখ্যা শক্তির্যস্য। পশ্চাৎ তয়া শক্ত্যা। রজঃসত্ত্বতমসাং দ্বন্দ্বৈক্যম্। যতো রজআদেঃ; মহা-নহঙ্কারঃ, খঞ্চ, মরুদগ্নিবার্দ্ধরাশ্চ; বারিতি উদকম্। সুরাশ্চ ঋষয়শ্চ, ভূতগণাশ্চ, এবমিদং জগদ্যতো ভবতি, তদ্বিভিদ্যত ইত্যন্বয়ঃ ॥

৬৪। এতদুপপাদয়তি—সৃষ্টমিতি। জরায়ুজাণ্ডজস্বেদজোদ্ভিজ্জরূপেণ চতুর্ব্বিধং স্বাংশেন প্রবিষ্টঃ। অথো ইতি হেতোঃ পুরস্থান্তঃ সন্তমংশং চিদাভাসং পুরি শয়নাৎ পুরুষং বিদুঃ। তর্হি কিমীশ্বরমেব সংসারিণং বিদুঃ? নেত্যাহ—সরঘা মধুমক্ষিকাস্তাভিঃ সৃষ্টং মধ্বিব খুল্লকং বিষয়সুখ-

মবিদ্যাবৃতঃ সন্ যো ভুঙ্ক্তে, তং জীবং বিদুঃ। তথা চ শ্রুতিঃ—'তয়োরন্যঃ পিপ্পলং স্বাদ্বত্ত্যনশ্নন্নন্যোঽভিচাকশীতি'; নির্ণীতঞ্চ 'গুহাং প্রবিষ্টাবাত্মানৌ হি তদ্দর্শনাৎ' ইত্যত্র ॥

৬৫। তব তু সর্ব্বনিয়ন্তুঃ কুতঃ সংসারঃ? ইত্যাহ—যঃ স্বশক্ত্যেদং স্রষ্টবান্, স এষ ত্বং খলু ভূতৈরেব ভূতানি, মেঘপঙ্ক্তীর্বায়ুরিব কালয়ন্ বিচালয়ন্ লোকান্ বিকর্ষসি সংহরসি। অনুমেয়তত্ত্বঃ—অলক্ষ্যস্বরূপঃ ॥

৬৬। বিকর্ষণপ্রকারমাহ—প্রমত্তমিতি; ইতিকৃত্যমেবমিদং কর্ত্তব্যমিতি চিন্তয়োচ্চৈঃ প্রমত্তম্। তত্র হেতুঃ—বিষয়েষু লালসমতিকামুকম্, প্রাপ্তেঽপি বিষয়ে প্রবৃদ্ধলোভমন্তকস্ত্বমভিপদ্যস আক্রমসি। ক্ষুধা লেলিহানো জিহ্বয়া ওষ্ঠপ্রান্তৌ স্পৃশন্ সর্পো মূষিকমিব ॥

৬৭। অতঃ কস্তব পদাব্জং ত্যজেৎ পণ্ডিতশ্চেৎ? কথম্ভূতঃ? যস্তবাবমানোঽনাদরস্তেন ব্যয়মানং কেতনং শরীরং যস্য সঃ। যদস্মাকং গুরুর্ব্রহ্মা অর্চ্চতি স্মেতি সর্ব্বেষাং স্তোতৃণাং বাক্যম্। বিশঙ্কয়া নাশশঙ্কয়া; বিনোপপত্তিমিতি দৃঢ়বিশ্বাসেন। মনবশ্চতুর্দ্দশ অর্চ্চন্তি স্ম ॥

৬৮। উপসংহরতি—অথেতি। রুদ্রভয়েন ধ্বস্তম্। অতো ন কুতশ্চিদ্ভয়ং যস্যাং তাদৃশী গতিরসি ॥

৭১। যোগাদেশং নামৈতৎ স্তোত্রমুপাসাদ্য পাঠতঃ প্রাপ্য মনসা ধারয়ন্তঃ, অভ্যসতাভ্যাসেন জপত ॥

৭২। বিশ্বসৃজাং পতির্ব্রহ্মা ॥

৭৩। সিসৃক্ষুঃ—স্রষ্টবন্তঃ ॥

৭৪। যুক্তঃ—একাগ্রচিত্তঃ ॥

৭৫। জ্ঞানমেব নৌর্যস্য ॥

৭৬। যোঽধীয়ানো ভবতি, অসৌ হরিমারাধয়তি ॥

৭৭। অমুষ্মাৎ—হরেঃ। অসত্বরন্ স্থিরঃ সন্; মদ্গীতং স্তোত্রং তেন গীতাৎ স্তুতাৎ[১]। যদ্যদিচ্ছতি, তত্তদ্বিন্দতে। এক এব বল্লভঃ প্রিয় আশ্রয়স্তস্মাৎ ॥

৭৮। কল্যে—উষসি ॥

৭৯। তপশ্চরতঃ, তপসোঽন্তে ঈপ্সিতং প্রাপ্স্যথ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
চতুর্বিংশোঽধ্যায়ঃ ॥ ২৪ ॥

পঞ্চবিংশোঽধ্যায়ঃ

প্রচেতঃসু তপস্যৎসু তৎপিত্রে নারদো ঘৃণী।
প্রাচীনবর্হিষেঽধ্যাত্মং পারোক্ষ্যেণাহ পঞ্চভিঃ ॥ (১)
পুরঞ্জনকথাব্যাজাৎ পঞ্চবিংশে তু নারদঃ।
আত্মনো বুদ্ধিসঙ্গেন বিবিধামাহ সংসৃতিম্ ॥ (২)
প্রচেতঃসু তপস্তীব্রং তপ্যমানেষু নারদঃ ॥
পুরঞ্জনকথাকূটং প্রাহ প্রাচীনবর্হিষে[২] ॥ (৩)

৩। প্রচেতঃসু তপশ্চরৎসু নারদঃ প্রাচীনবর্হিষং বোধিতবান্, অতঃ প্রচেতসাং কথামসমাপ্যৈব তৎপিতুর্বৃত্তমাহ—প্রাচীনবর্হিষমিতি ॥

৪। শ্রেয়ঃ ফলমীহসে ইচ্ছসি; ইহ কর্ম্মণি তদুভয়ং নেষ্যতে বিচারকৈঃ ॥

৫। পরং শ্রেয়ো মোক্ষম্। কর্ম্মভিরপবিদ্ধা বিক্ষিপ্তা ধীর্যস্য ॥

৬। কিঞ্চ, গৃহেষু স্থিতঃ; পুত্রাদিষ্বেব পুরুষার্থধীর্যস্য ॥

১। স্তোত্রাৎ (গ); ২। প্রাচীনবর্হিষম্ (গ)।

৭। কর্ম্মফলেষু বৈরাগ্যমুৎপাদ্য ব্রহ্মবিদ্যামুপদেষ্টুং যোগানুভাবেন যজ্ঞপশূন্ প্রত্যক্ষং প্রদর্শ্যাহ—ভো ভো ইতি। সংজ্ঞাপিতান্—মারিতান্ ॥

৮। এতে ত্বাং সম্পরেতং মৃতং সংপ্রতীক্ষন্তে, বৈশসং ত্বৎকৃতাং পীড়াং স্মরন্তঃ। ততশ্চায়ঃকূটৈর্লৌহময়ৈঃ শৃঙ্গৈশ্ছিন্দন্তি ছেৎস্যন্তি ॥

৯। অত্রাস্মিন্ সঙ্কটে নিস্তারকমমুমিতিহাসং কথয়িষ্যামি ॥

১০। তত্র জীবস্য বিষয়াসক্ত্যা সংসারঃ, স চেশ্বরানুগ্রহান্নিবর্ত্তত ইতি বক্তুং বিপর্য্যয়গ্রহগৃহীতস্য সাক্ষাদ্বোধয়িতুমশক্তে রাজবৃত্তান্তমিবাহ—আসীদিতি। পুরঞ্জনাদীন্ স্বয়মেবেতঃ পঞ্চমেঽধ্যায়ে ব্যাখ্যাস্যতি, তথাপি সুখগ্রহণায় যথোপযোগং কিঞ্চিৎ কিঞ্চিদ্ব্যাখ্যাস্যামঃ। তত্র স্বকর্ম্মভিঃ পুরং শরীরং জনয়তীতি পুরঞ্জনো জীবঃ। ন বিজ্ঞাতং নাম যস্য, ন চ বিজ্ঞাতং চেষ্টিতং যস্য, স ঈশ্বরস্তস্য সখা ; যদ্বা, বিজ্ঞাতং চেষ্টিতং জীবপ্রেরণাদি-লক্ষণং যস্য, জীবপারতন্ত্র্যস্যানুভবসিদ্ধত্বাৎ ॥

১১। শরণং ভোগায়তনং দেহম্ ; পৃথিবীং তদুপলক্ষিতং ব্রহ্মাণ্ডম্ ॥

১২। যাবত্যঃ পুরঃ, তাস্তস্য তস্য কামস্যোপপত্তয়ে প্রাপ্ত্যৈ অসৌ সাধু ন মেনে, গবাদিদেহানামৈহিকপারলৌকিকভোগযোগ্যত্বাভাবাৎ। তথা চ শ্রুতিঃ —'তাভ্যো গামানয়ৎ, তা অব্রুবন্ ন বৈ নোঽয়মলমিতি। তাভ্যোঽশ্বমানয়ৎ, তা অব্রুবন্ ন বৈ নোঽয়মলমিতি' ইতি ॥

১৩। হিমবতো দক্ষিণেষু সানুষু কর্ম্মক্ষেত্রে ভারতবর্ষে পুরং মনুষ্য-শরীরম্। লক্ষিতানি দৃষ্টানি সর্ব্বাণি লক্ষণানি যস্যাম্, অন্ধপঙ্গুত্বাদিদোষ-রহিতামিত্যর্থঃ ॥

১৪—১৬। তামনুবর্ণয়তি ত্রিভিঃ। অত্র কিঞ্চিৎ কিঞ্চিৎ সাদৃশ্যমবলম্ব্য কথাসৌন্দর্য্যায় প্রাকারাদীনি বর্ণ্যন্তে। (১৪) পরিখৈরিতি পুংস্ত্বমার্ষম্। অক্ষাণীন্দ্রিয়াণি গবাক্ষাঃ, ত্বগাদয়ঃ শরীরাবয়বাঃ প্রাকারাদিপুরাবয়বত্বেন নিরূপ্যন্তে। স্বর্ণাদিময়ৈঃ শৃঙ্গৈঃ শিখরৈর্যুক্তা যে গৃহাস্তৈঃ সঙ্কুলামিতি।

আধারাদিচক্রাণি গৃহাঃ, শৃঙ্গাণি চ রাজসাদিস্বভাবা বিবক্ষিতাঃ॥ (১৫) নীলাদিভিঃ কৢপ্তা হর্ম্ম্যস্থলী যস্যাম্। অরুণং মাণিক্যম্; স্থলী হৃদয়ম্। নাড্যো নীলাদিভাবেন নিরূপ্যন্তে, তত্তদ্বিষয়বাসনা বা। ভোগবতীং নাগানাং পুরীমিব॥ (১৬) সভা সমাজস্থানম্, চত্বরং চতুষ্পথঃ, রথ্যা রাজমার্গঃ, আক্রীড়ায়তনং দ্যূতাদিস্থানম্, আপণো হট্টঃ, তৈঃ। চৈত্যং জনানাং বিশ্রামস্থানম্; ধ্বজেষু যাঃ পতাকাস্তাভিশ্চ যুক্তাম্॥

১৭। অত্র চ বিষয়নিষ্ঠবুদ্ধিযোগেন জীবস্য দেহসম্বন্ধ ইতি বিবক্ষয়া বিষয়বর্গং[১] বাহ্যোপবনত্বেন নিরূপয়তি, তদ্বিশেষান্ স্রক্চন্দনাদীন্ দিব্যদ্রুম-লতাদিভাবেন। শেষঃ কথালঙ্কারঃ। বাহ্যোপবনে প্রমদোত্তমাং দদর্শেতি চতুর্থেনান্বয়ঃ। নদতাং বিহঙ্গালিকুলানাং কোলাহলো যেষু তে জলাশয়া যস্মিন্॥

১৮। হিমনির্ঝরাণাং বিপ্রুষো বিন্দবঃ, তদ্বতা কুসুমাকরসম্বন্ধিনা বায়ুনা চলন্তঃ প্রবালা বিটপাঃ শাখাশ্চ যেষাং তৈর্বৃক্ষৈর্নলিনীনাং সরসীনাং তটেষু সম্পৎ সমৃদ্ধির্যস্মিন্॥

১৯। অনাবাধে তৎকৃতবাধারহিতে, মুনিব্রতৈরহিংস্রৈঃ, আত্মানমাহূতং মন্যতে যত্র॥

২০—২৪। তত্র প্রমদোত্তমাং বিষয়বিবেকবতীং বুদ্ধিং দদর্শ। যদৃচ্ছয়া গতামিতি তয়োঃ সম্বন্ধস্য দুর্নিরূপ্যত্বং দর্শয়তি। তামনুবর্ণয়তি সার্দ্ধৈশ্চতুর্ভিঃ। (২০) দশভির্জ্ঞানকর্ম্মেন্দ্রিয়ৈঃ। একৈকং প্রত্যেকং শতমনন্তা বৃত্তয়ঃ, তাসাং নায়কৈঃ পতিভিঃ সহ। একৈকশতনায়িকৈরিতি পাঠে নায়িকাঃ স্ত্রিয়ো যেষাং তৈঃ॥ (২১) পঞ্চ শীর্ষাণি বৃত্তয়ো যস্য তেনাহিনা প্রাণেন প্রতীহারেণ দ্বারপালকেন গুপ্তাম্। ঋষভং ভর্ত্তারম্, অপ্রৌঢ়াং ষোড়শ-বার্ষিকীম্॥ (২২) গন্ধজ্ঞানাদিভির্বুদ্ধ্যবয়বৈঃ সুনাসত্বাদি নিরূপ্যতে।

১। বিষয়মার্গং (গ)।

সমং বিন্যস্তৌ রচিতৌ কর্ণৌ তাভ্যাং কুণ্ডলশোভাং দধতীম্॥ (২৩) 'অন্নময়ং হি সৌম্য মন ইতি যৎ কৢপ্তং তদন্নস্য' ইত্যাদিশ্রুত্যনুসারেণ শ্যামামিত্যুক্তম্। নূপুরৈঃ ক্বণদ্ভ্যাম্ ; নূপুরেণ পাদাঙ্গুলীয়কানামপ্যুপলক্ষণা-দ্বহুবচনম্॥ (২৪) ব্যঞ্জিতং কৈশোরং যৌবনোপক্রমো যাভ্যাম্, সমৌ চ বৃত্তৌ চ॥

২৫। তামাহেতি তয়োঃ সংবাদোক্তিঃ সম্বন্ধদার্ঢ্যায়। অপাঙ্গ এব পুঙ্খো মূলপ্রান্তো যস্য কটাক্ষস্য বাণস্য তেন স্পৃষ্টো বিদ্ধঃ। প্রেম্ণা উচ্চৈর্ভ্রমন্তী ভ্রূর্ধনুঃস্থানীয়া যস্মিন্ তেন॥

২৬। কুতঃ স্থানাদিহাগতাসি ? হে সতি! পূর্য্যাঃ সমীপস্থা উপপুরী ভূঃ, তামালক্ষ্য কিং কর্ত্তুমিচ্ছসীত্যর্থঃ॥

২৭। তব য অনুপথা অনুবর্ত্তিনঃ, এতে কে ? একাদশো মহাভটো বৃহদ্বলত্বেন বক্ষ্যমাণো যেষু দশসু তে। বুদ্ধের্মনসঃ পৃথগুপাদানং বুদ্ধি-পরিচারকেন্দ্রিয়সহায়তয়া তৎপরিচারকত্ববিবক্ষয়া॥

২৮। ত্বং হ্রীঃ কিং পতিং ধর্ম্মং বিচিন্বতী ? অথবা ভবানী পতিং শিবং বিচিন্বতী ? অথবা কিং বাক্ সরস্বতী পতিং ব্রহ্মাণম্ ? রমা পতিং বিষ্ণুম্ ? মুনিরিব সংযতা সতী। কথম্ভূতং পতিম্ ? ত্বদঙ্ঘ্রিকামেনৈব ত্বৎকৃতয়া ত্বদঙ্ঘ্রিকামনয়ৈব প্রাপ্তাঃ সমস্তাঃ কামা যেন তম্॥

২৯। হে বরোরু! আসাং মধ্যে ত্বমন্যতমাপি ন সম্ভবসি, যতো ভুবিস্পৃক্। ন হি দেবতা ভুবং স্পৃশন্তি। বীরবরেণ—ময়া। ননু ত্বম-কর্ম্মা, কথং ত্বয়া সহালঙ্করোমীতি চেৎ, তত্রাহ—অদভ্রমনল্পং কর্ম্ম ত্বৎ-সঙ্গাদ্যস্য মম তেন, স্বতোঽকর্ম্মত্বেন ত্বৎসঙ্গাৎ সকর্ম্মা ভবামীত্যর্থঃ। পরম্ —বৈকুণ্ঠম্॥

৩০। যদ্ যস্মাৎ তবাপাঙ্গেন বিখণ্ডিতমিন্দ্রিয়ং মনো যস্য, তং মাং মনোভবো বাধতে। অথ তস্মাদনুগৃহাণ। সব্রীড়ং যদ্ভাবেন প্রেম্ণা স্মিতম্, তেন বিভ্রমন্তী যা ভ্রূস্তয়োপস্পৃষ্টঃ প্রেরিতঃ ॥

৩১। যদ্ব্রীড়য়া সম্মুখং ন ভবতি, তদাননমুন্নীয় মে দর্শয়। শোভনে ভ্রুবৌ যস্মিন্; সুতারে শোভনকনীনিকে লোচনে যস্মিন্; ব্যালম্বিনো দীর্ঘা যে নীলা অলকাস্তেষাং বৃন্দেন সংবৃতম্; বল্গূনি বাচকানি বাক্যানি যস্মিন্ ॥

৩২। হে বীর! সাপি তং দৃষ্ট্বা মোহিতা সতী তমাহ ॥

৩৩। যৎ পৃষ্টম্, কস্যাসীত্যনেন কস্য পুত্রী গোত্রজা চেতি, কা ত্বমিতি চ কিংনামাসীতি, তত্রাহ—আত্মনো মম, পরস্য তবাপি কর্ত্তারং সম্যঙ্ ন বিদ্মঃ। গোত্রং নাম চ যৎকৃতং ভবতি, তঞ্চ ন বিদ্মঃ ॥

৩৪। আত্মনো মম শরণমিয়ং পুরী যেন নির্মিতা, তঞ্চ ন বিদ্মঃ ॥

৩৫। যৎ পৃষ্টম্—'ক এতেঽনুপথাঃ' ইতি, তত্রাহ—এত ইতি ॥

৩৬। আস্তাং নামগোত্রাদি, যদত্রাগতোঽসি, এতদ্ দিষ্ট্যা ভদ্রং তাবৎ। গ্রাম্যানিন্দ্রিয়গ্রামার্হান্; উদ্বহিষ্যামি সম্পাদয়িষ্যামি; স্ববন্ধুভিঃ সখিভিঃ সখীভিশ্চ ॥

৩৭। সমাঃ সংবৎসরান্; মনুষ্যদেহপ্রবেশাচ্ছতমিত্যুক্তম্ ॥

৩৮—৪২। প্রবৃত্তিস্বভাবত্বান্নিবৃত্তিনিন্দাপূর্ব্বকং তৎসঙ্গমভিনন্দতি—কমিতি পঞ্চভিঃ। (৩৮) ত্বত্তোঽন্যং কং নু রময়ে? অরতিজ্ঞং নৈষ্ঠিকম্; অকোবিদমনিবিদ্ধসুখত্যাগিনম্; সম্পরায়ো মৃত্যুস্তদনভিমুখং পরলোক-চিন্তাশূন্যম্; অশ্বস্তনবিদম্—শ্ব ইদং কর্ত্তব্যমিতীহলোকচিন্তাশূন্যম্, অতএব পশুতুল্যম্ ॥ (৩৯) অত্র গার্হস্থ্যে; প্রজানন্দঃ পুত্রসুখম্; অমৃতং মোক্ষঃ; কেবলিনো যতয়ঃ ॥ (৪০) গৃহাশ্রম ইতি যদেতৎ ক্ষেমার্হং শরণমাশ্রয়ং বদন্তি ॥ (৪২) ভোগিভোগয়োঃ সর্পদেহাকারয়োস্তব

ভুজয়োর্যন্ন সজ্জেত, এবম্ভূতং কস্যাঃ স্ত্রিয়া মনঃ স্যাৎ? ন কস্যা অপীত্যর্থঃ। যো ভবাননাথবর্গা দীনস্তোমাস্তেষামাধিমলমত্যর্থমপোহিতুং সর্ব্বত্র চরতি। কেনাপোহিতুম্? ঘৃণয়োদ্ধতোঽতিশয়িতো যঃ স্মিতপূর্ব্বকোঽবলোকস্তেন॥

৪৩। সমুহ্য—সমুদীর্য্য; সমাঃ—সংবৎসরান্॥

৪৪। তত্র জাগ্রদবস্থাং সংক্ষেপেণাহ—উপগীয়মান ইতি। সুষুপ্ত্য-বস্থামাহ—হ্রদিনীং হৃদয়াকাশং স্বাবস্থানম্। শুচৌ—নিদাঘে॥

৪৫। ইদানীং নব দ্বারঃ প্রদর্শয়ন্ জাগ্রদবস্থাং প্রপঞ্চয়তি—সপ্তেতি যাবদধ্যায়সমাপ্তি। তস্যাঃ পুর উপরি কৃতা দ্বারঃ সপ্ত; বৃতা ইতি পাঠে সংবৃতাঃ। নেত্রে নাসিকে শ্রোত্রে মুখঞ্চেতি সপ্ত। অধো দ্বে দ্বারৌ গুদলিঙ্গে। যঃ কশ্চনেতি আত্মনঃ সম্যগবিজ্ঞানাদনিয়তত্বাচ্চ॥

৪৬। তাসু সপ্তসু পঞ্চ দ্বারঃ পৌরস্ত্যাঃ পূর্ব্বদিগ্‌ভবাঃ॥

৪৭। খদ্যোতবদল্পপ্রকাশা বামনেত্ররূপা আবিঃ প্রকটং মুখং যস্যাঃ সা বহুপ্রকাশা দক্ষিণনেত্রলক্ষণা, 'তস্মাদ্দক্ষিণোর্দ্ধ আত্মনো বীর্য্যবত্তরঃ' ইতি শ্রুতেঃ; স্বানুভবাচ্চ তত্র প্রকাশাধিক্যম্। একত্র সংলগ্নে; বিভ্রাজিতং রূপম্; দ্যুমৎসখশ্চক্ষুঃসহিতঃ॥

৪৮। 'নলনাল'-শব্দৌ ছিদ্রবচনৌ, তদ্বতী নলিনী নালিনী চ বামদক্ষিণনাসিকে। অত্রাপি সংজ্ঞাভেদাদেব কার্য্যে ন্যূনাধিক্যং পূর্ব্ব-বজ্‌জ্ঞেয়ম্। অবধূতো বায়ুধিষ্ঠিতো ঘ্রাণঃ; সৌরভং গন্ধম্॥

৪৯। মুখ্যা প্রধানা—আস্যম্। আপণো ভাষণম্, বহূদনশ্চিত্রমন্নম্, বহ্বোদন ইত্যনুক্তিঃ পরোক্ষবাদত্বায়। রসজ্ঞং রসনেন্দ্রিয়ম্, বিপণো বাগিন্দ্রিয়ম্, তাভ্যামন্বিতঃ॥

৫০—৫১। 'দক্ষিণেন' ইতি ন তৃতীয়া, কিন্তু 'দক্ষিণস্যাং দিশি' ইত্যস্মি-ন্নর্থে তদ্ধিতোঽয়মেনপ্-প্রত্যয়োঽব্যয়সংজ্ঞঃ, এবমুত্তরেণেতি। অয়মর্থঃ—পঞ্চানাং বিষয়াণামন্তোঽনবগতানাং প্রকাশায়ালমিতি পঞ্চালং শাস্ত্রম্।

শাস্ত্রশ্রবণকালে চ বলাধিক্যাৎ দক্ষিণকর্ণঃ প্রথমং প্রবর্ত্ততে, শাস্ত্রে চ প্রথমং শ্রোতব্যং কর্ম্মকাণ্ডমিত্যেতাবতা সাম্যেন প্রবৃত্তসংজ্ঞস্য কর্ম্মকাণ্ডস্য দক্ষিণকর্ণেন শ্রবণমিষ্যতে। অতস্তদর্থমনুষ্ঠায় পিতৃভিরাহূতঃ পিতৃলোক-প্রাপকং পিতৃযানং প্রপদ্যতে। তদনেন প্রকারেণ পিতৃ্ণামাহ্বানমনেন ভবতীতি পিতৃহূর্দক্ষিণকর্ণঃ; এবং তদ্বৈপরীত্যেনোত্তরকর্ণো দেবহূঃ, তথা চ ব্যাখ্যাস্মৃতি—'পিতৃহূর্দক্ষিণঃ কর্ণ উত্তরে দেবহূঃ স্মৃতঃ। প্রবৃত্তঞ্চ নিবৃত্তঞ্চ শাস্ত্রং পঞ্চালসংজ্ঞিতম্। পিতৃযানং দেবযানং শ্রোত্রাচ্ছ্রুতধরাদ্‌ব্রজেৎ॥' ইতি॥

৫২। অসুরা ইন্দ্রিয়ারামাস্তেষামিয়মাসুরী শিশ্নদ্বাঃ। গ্রামকং গ্রামস্থ-জনানাং কং সুখং ব্যবায়ম্। দুর্ম্মদেন—গুহ্যেন্দ্রিয়েণ॥

৫৩। নির্ঋতির্নাম গুদঃ, মৃত্যুদ্বারত্বাৎ। বৈশসং মলবিসর্গম্; লুব্ধকেন পায়ুনা, তেনোৎক্রান্তস্য দুঃখপ্রাপ্তের্লুব্ধকসাম্যম্॥

৫৪। অমীষাং মধ্যে, নির্ব্বাক্ পাদঃ, পেশস্কৃদ্ধস্তঃ, তাবুভাবন্ধৌ ছিদ্রাভাবাৎ স্বতো জ্ঞানক্রিয়াশক্ত্যভাবাচ্চ। অক্ষণ্বতামিন্দ্রিয়বতাং দেহা-নামধিপতিঃ পুরঞ্জনঃ। ত্বগিন্দ্রিয়স্যানুক্তিঃ সর্ব্বেষ্বন্তর্ভাবাৎ॥

৫৫। অন্তঃপুরং হৃদয়ং গতঃ। বিষূচীনং সর্ব্বতোমুখং মনঃ। মোহ-প্রসাদহর্ষাস্তমঃসত্ত্বরজঃকার্য্যাণি। জায়া বুদ্ধিঃ, আত্মজ ইন্দ্রিয়পরিণাম-স্তদুদ্ভবম্॥

৫৭। জক্ষত্যাং মোদকাদি ভক্ষয়ন্ত্যাম্॥

৫৯। আসতীম্—আসীনাম্॥

৬২। সর্ব্বাসঙ্গত্বাদিলক্ষণা প্রকৃতিঃ স্বভাবো বঞ্চিতো যস্য, সর্ব্বথা প্রকৃত্যা বঞ্চিত ইতি বা। নেচ্ছন্—অনিচ্ছন্; ক্লৈব্যাৎ—পারবশ্যাৎ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে

পঞ্চবিংশোঽধ্যায়ঃ॥ ২৫॥

ষড়্বিংশোঽধ্যায়ঃ

ষড়্বিংশে মৃগয়াব্যাজাৎ স্বপ্নজাগরণোক্তিতঃ।
সদ্‌বুদ্ধিত্যাগযোগাভ্যাং সংস্থতিঃ সা প্রপঞ্চ্যতে ॥ (১)

১—১০। তদেবমাত্মন উপাধিকৃতাং সুষুপ্ত্যবস্থাং জাগ্রদবস্থাঞ্চোক্ত্বে-দানীং স্বপ্নাবস্থামাহ—স একদেতি দশভিঃ। (১) মহানিশ্বাসো ধনুঃ কর্ত্তৃত্বভোক্তৃত্বাদ্যভিনিবেশো যস্য সঃ, রথমারুহ্য পঞ্চপ্রস্থং বনমগাদিতি তৃতীয়েনান্বয়ঃ। রথং তদানীমেব বিধৃতং স্বপ্নদেহং জাগ্রদ্দেহস্য শত-সংবৎসরোপভোগ্যপুরত্বেনোক্তত্বাৎ ; পঞ্চ জ্ঞানেন্দ্রিয়াণ্যশ্বা যস্য ; আশুগং শীঘ্রগতিম্ ; দ্বে অহন্তামমতে ঈষে দণ্ডিকে যস্য ; দ্বে পুণ্যপাপে চক্রে যস্য ; একং প্রধানমক্ষো যস্য ; ত্রয়ো গুণা বেণবো ধ্বজা যস্য ; পঞ্চ প্রাণা বন্ধুরাণি বন্ধনানি যস্য ॥ (২) একং মনো রশ্মিঃ প্রগ্রহো যস্য ; একা বুদ্ধির্দমনঃ সূতো যস্য, তঞ্চ তঞ্চ ; একং হৃদয়ং নীড়ং রথিন উপবেশস্থানং যস্মিন্ ; দ্বৌ শোকমোহৌ কূবরৌ যুগবন্ধনস্থানং যস্য ; পঞ্চ শব্দাদয়ো বিষয়াঃ প্রহ্রিয়ন্তে প্রক্ষিপ্যন্তে যস্মিন্। অস্য ব্যাখ্যানং ভবিষ্যতি—পঞ্চেন্দ্রিয়ার্থ-প্রক্ষেপ ইতি। সপ্ত ধাতবো বরূথা রক্ষণার্থং চর্ম্মাদ্যাবরণানি যস্য ; পঞ্চ কর্ম্মেন্দ্রিয়াণি বিক্রমা গতিপ্রকারা যস্য ॥ (৩) হৈমোপস্করং সৌবর্ণা-ভরণম্ ; স্বর্ণবর্ম্মা—বর্ম্ম কবচং যস্য—রজোগুণাবৃতঃ। অক্ষয়েষুধিঃ—ইষুধির্নিষঙ্গঃ—অনন্তবাসনাহঙ্কারোপাধিঃ। একাদশো মনোরূপশ্চমূনাথঃ সেনাপতির্যস্য বাসনাময়স্য মনসঃ প্রগ্রহত্বম্, সঙ্কল্পবিকল্পাত্মকস্য বৃহদ্বলত্বেন বক্ষ্যমাণস্য চমূনাথত্বমিতি বিভাগঃ। পঞ্চ শব্দাদয়ো বিষয়াঃ প্রস্থাঃ সানবো যস্মিংস্তদ্বনং ভজনীয়ং দেশমগাৎ ॥ (৪) আত্তা গৃহীতা ইষবো রাগদ্বেষাদি-রূপাঃ কার্ম্মুকঞ্চ ভোগাদ্যভিনিবেশরূপং যেন। জায়াং বিবেকবতীং বুদ্ধিং বিহায়, অতদর্হাং ত্যাগানর্হাম্। ত্যাগে হেতুঃ—মৃগ্যন্ত ইতি মৃগা বিষয়াস্তেষু ব্যসনং ভোগাসক্তিস্তেন লালসাতিস্পৃহা যস্য ॥ (৫) বাণৈ রাগাদিভিঃ।

বনেষু ভজনীয়দেশেষু ; বনগোচরান্ ভজনীয়বিষয়ান্। ন্যহনদাত্মসাৎ কৃতবান্ ভজনীয়দেশাৎ। কথাপক্ষে তু স্পষ্টমেব॥ (৬-৮) নম্বাসুরীং বৃত্তিমাশ্রিত্যেতি কিমিতি মৃগয়া নিন্দ্যতে ? কথাপক্ষে তাবদ্রাজ্ঞো বিহিতৈব সা, অধ্যাত্ম-পক্ষেঽপি জীবস্য বিষয়ভোগো বিহিত এবেত্যাশঙ্ক্যাহ—তীর্থেম্বিতি ত্রিভিঃ। (৬) অয়ং ভাবঃ—ন হি মৃগয়া বিধীয়তে, রাগপ্রাপ্তত্বাৎ ; কিন্তু নিয়ম্যতে প্রবৃত্তিঃ সঙ্কোচ্যতে। নিয়মমেব ষড়্বিধং দর্শয়তি—যস্তলমত্যর্থং লুব্ধো রাগী সন্ হন্যাৎ, তর্হি তীর্থেষু শ্রাদ্ধাদিম্বেব ; তত্রাপি প্রতিদৃষ্টেষু প্রখ্যা-তেম্বেব, ন নিত্যশ্রাদ্ধাদিষু ; তত্রাপি রাজ্ঞৈব, মেধ্যানেব, বন এব, যাবদুপ্-যোগমেবেতি। এবং জীবস্য বিষয়সেবাপি যাবদুপযোগম্, ন যথেষ্টমিতি নিয়ম এবেত্যর্থঃ॥ (৭) অতো নাবশ্যকত্বমিত্যাহ—য ইতি। এবং নিয়তং কর্ম্ম বিদ্বান্। তেনেত্যুপলক্ষণম্, তেনান্যেন বা কর্ম্মণৈবমনু-ষ্ঠিতেন যজ্‌জ্ঞানং ভবতি, তেন জ্ঞানেন হেতুনা সোঽনুষ্ঠাতা ন লিপ্যতে॥ (৮) অন্যথা নিয়মোল্লঙ্ঘনেন অন্তঃকরণশুদ্ধ্যভাবাৎ কর্ত্তৃত্বাভিমানমারূঢ়ঃ কর্ম্মভিরনুবধ্যতে, ততশ্চ গুণপ্রবাহে পতিতঃ অধো ব্রজতি॥ (৯) প্রাসঙ্গিকং পরিসমাপ্য পুনর্মৃগয়ামেবানুবর্ণয়তি—তত্রেতি। চিত্রা বাজাঃ পক্ষা যেষাং তৈঃ। বিপ্লবো নাশঃ ; করুণাত্মনাং কৃপালূনাং দুঃসহঃ॥

১১। তদেবং স্বপ্নাবস্থা দর্শিতা, ইদানীং পুনরপি বিবেকবত্যা বুদ্ধ্যা রমমাণস্য পুত্রাদিসন্ততিং প্রপঞ্চয়িষ্যন্ কথাসৌন্দর্য্যায় তস্যাঃ প্রণয়কুপিতায়া অনুনয়ং প্রস্তাবসহিতমাহ—তত ইত্যারভ্য যাবদধ্যায়সমাপ্তি। এয়িবান্—আগতঃ। কৃতং স্নানমুচিত আহারশ্চ যেন ; সংবিবেশ শয্যামাশ্রিতঃ[১]॥

১৩। গৃহমেধিনীং সাত্ত্বিকীং বুদ্ধিং রাজস্যাং বুদ্ধ্যাং বর্ত্তমানো নাপশ্যৎ॥

১৪। বেদিষৎ, হে প্রাচীনবর্হিঃ! অন্তঃপুরস্ত্রিয়স্তৎসখীঃ ; সেশ্বরীণাং—স্বামিনীসহিতানাম্। যথা পুরেত্যাদি পৃথগ্বাক্যম্॥

১। শয্যামুপাশ্রিতঃ (ক)।

১৫। ব্যঙ্গে—চক্রাদিহীনে ॥

১৭। নিরবস্তারে—আস্তরণহীনে ॥

১৮। অবধূতাং ত্যক্তদেহাদরাম্ ; তৎসঙ্গেনোন্মথিতং ব্যাকুলং জ্ঞানং চিত্তং যস্য ॥

১৯। স্নেহসংরম্ভঃ প্রণয়কোপঃ, তস্য লিঙ্গং কুটিলদৃষ্ট্যাদি যস্মিন্ ন লব্ধবান্ ॥

২০। উৎসঙ্গমারোপ্য লালিতাম্ ॥

২১। কৃতমাগোঽপরাধো যৈস্তেষু, আত্মসাৎ কৃত্বাঽস্মদধীনোঽয়মিতি মত্বা শিক্ষার্থং দণ্ডং ন কুর্ব্বন্তি, তে ভৃত্যা মন্দভাগ্যাঃ ॥

২২। যতঃ পরমোঽনুগ্রহো দণ্ডঃ ; যস্ত দণ্ডিতো বিষীদতি, সোঽজ্ঞ ইত্যাহ—বাল ইতি। বন্ধুকৃত্যং শিক্ষাকরণম্ ; অমর্ষণঃ—ক্রোধী ॥

২৩। হে সুদতি ! হে সুভ্রু ! হে মনস্বিনি ! সা ত্বমস্মাকং স্বামিনী, অতঃ স্বানাং মুখং প্রদর্শয়। কীদৃশম্ ? অনুরাগভারেণ ব্রীড়য়া যো বিলম্বো মন্থরতা, তেন বিলসন্ হসিতাবলোকো যস্মিন্। নীলা অলকা এবালয়স্তৈরুপস্কৃতং ভূষিতম্ ; উন্নতনাসিকম্ ; বল্গু বাক্যং যস্মিংস্তৎ ॥

২৪। হে বীরপত্নি ! বীরস্য মম ভার্য্যে ! যস্তে কৃতাপরাধস্তস্মিন্নহং ব্রাহ্মণকুলাদন্যত্রান্যস্মিন্, মুররিপুদাসাদিতরত্র চ দমং দধে, দণ্ডং করোমি ; কিন্তু তং বিগতভয়ম্, উচ্চৈর্মুদিতং ত্রিলোক্যামন্যত্র ত্রৈলোক্যাদ্বহিরপি ন পশ্যামি ; মদ্ভয়াদেবাসৌ মরিষ্যতীত্যর্থঃ ॥

২৫। তে বক্ত্রমিতঃপূর্ব্বং কদাচিদপি বিতিলকং ন পশ্যামি। সংরম্ভেণ কোপাবেশেন ভীমং ভয়ঙ্করম্, অবিমৃষ্টমনুজ্জ্বলম্, অপেতরাগং স্নেহশূন্যম্, তথা তে সুজাতৌ শোভনৌ স্তনাবপি শোকাশ্রুভিরুপহতৌ ন পশ্যামি। তথা বিম্বফলাকারমধরঞ্চ বিগতঃ কুঙ্কুমপঙ্কতুল্যস্তাম্বূলরাগো যস্মাত্তাদৃশং ন পশ্যামি। ইদানীং কৃত এবং জাতমিতি শেষঃ। পাঠান্তরে

('পশ্যন্ স্তনাবপি শুচোপহতৌ সুজাতৌ, বিন্দামি শং বিগতকুঙ্কুমপঙ্করাগৌ' ইত্যেবংরূপে) এবম্ভূতং মুখং স্তনৌ চ পশ্যন্ শং ন বিন্দামীত্যন্বয়ঃ। বিগতঃ কুঙ্কুমপঙ্করাগো যাভ্যামিতি স্তনয়োর্বিশেষণম্ ॥

২৬। তত্তস্মাৎ কৃতং কিল্বিষমপরাধো যেন—তস্য। কিল্বিষমেবাহ—স্বৈরং স্বাতন্ত্র্যেণ ত্বামপৃষ্ট্বা মৃগয়াং গতস্য। দেবো দেবনং ক্রীড়া, তাং রাতি দদাতীতি দেবরঃ কান্তস্তম্, কামবেগেন বিস্রস্তং গতং পৌংস্নং পৌরুষং ধৈর্য্যং যস্য তম্, উশতী কাময়মানা, কৃত্যে কর্ত্তুং যোগ্যেঽর্থে কা ন ভজেত ইতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
ষড়্বিংশোঽধ্যায়ঃ ॥ ২৬ ॥

সপ্তবিংশোঽধ্যায়ঃ

সপ্তবিংশে প্রিয়াপুত্রাদ্যাসক্ত্যা বিস্মৃতাত্মনঃ।
কালকন্যাদ্যুপাখ্যানৈর্জরারোগাদ্যুদীর্য্যতে ॥ (১)

১। তদেবং জীবস্যানুনয়াদিকথাসৌন্দর্য্যেণাত্যন্তমুপাধিবশ্যত্বমুক্ত্বা-তন্নিমিত্তাং সংসারপরম্পরাং নিরূপয়িতুমাহ—ইত্থমিতি। অত্র চ প্রতিপদং কথঞ্চিদধ্যাত্মপক্ষেঽপি যোজয়িতুং শক্যমেব। শ্রীনারদেন তু জীবস্য স্ত্রী-পুরুষবাসনাদার্ঢ্যেন বিচিত্রা সংসৃতির্ভবতীত্যেতাবদেব কথাতাৎপর্য্যং দর্শিতম্—'ক্বচিৎ পুমান্ ক্বচিচ্চ স্ত্রী ক্বচিন্নোভয়মন্ধধীঃ। দেবো মনুষ্যস্তির্য্যগ্বা যথা কর্ম্মগুণং ভবঃ ॥' ইতি বদতা। তত্রাদৌ পুংস্ত্বেন সংসৃতিরধ্যায়-ত্রয়েণোক্ত্বা, ততশ্চৈকেনাধ্যায়েন স্ত্রীত্বেন সংসৃতিং প্রদর্শ্যেশ্বরপ্রসাদলব্ধ-

জ্ঞানেন মোক্ষ ইত্যুক্তম্. ততস্তদেব যথোপযোগং ব্যাখ্যাতমিতি পঞ্চাধ্যায্যারম্ভঃ প্রতীয়তে। প্রতিপদমধ্যাত্মযোজনা তু দুর্ঘটা নিষ্প্রয়োজনা চেতি স্বপ্রৌঢ়িখ্যাপনমনাদৃত্য যথোপযোগমেব ব্যাখ্যাস্যামঃ। সধ্র্যক্ সম্যক্, বিভ্রমৈর্বিলাসৈঃ ॥

২। কৃতং স্বস্ত্যয়নং মঙ্গলকুঙ্কুমসিন্দূরাদিভির্যস্যাস্তাম্ ॥

৩। উপগূঢ়ঃ পরিরব্ধঃ, পরিরব্ধা কন্ধরা তস্যা যেন, রহ একান্তে, অনুমন্ত্রৈরনুকূলৈর্গুহ্যভাষণৈরপকৃষ্টা চেতনা বিবেকো যস্য ; কালরংহঃ আয়ুর্ব্ব্যয়ম্, প্রমদৈব পরিগ্রহো ন জ্ঞানসাধনং যস্য ॥

৪। মহার্হতল্প উৎকৃষ্টশয্যায়াং শয়ানঃ, মহিষ্যা ভুজ উপধিঃ উপাধানমুচ্ছীর্ষকং যস্য ; মহিষীভুজোপধীত্যবিসর্গপাঠে শয়নক্রিয়াবিশেষণম্। তাং মহিষীমেব পরং পুরুষার্থমমন্যত, ন তু যন্নিজং রূপং ব্রহ্ম তৎ ; তমসা অজ্ঞানেনাভিভূতো যতঃ ; যদ্বা, নিজমাত্মানম্, ততঃ পরঞ্চ পরমাত্মানম্ ॥

৬। পুত্রানিন্দ্রিয়পরিণামান্, দুহিতৄস্তদনন্তরং বুদ্ধিবৃত্তীঃ। পুত্রসংখ্যা চ বাহুল্যমাত্রবিবক্ষয়া, দুহিতৃসংখ্যা তু পুত্রেভ্যো ন্যূনত্বেন গার্হস্থ্য-সৌন্দর্য্যার্থমেব। বিরাট্—সম্রাট্। আয়ুষোঽর্দ্ধমিত্যাদ্যপি কথা-সৌন্দর্য্যার্থমেব ॥

৭। পুরঞ্জনকন্যাত্বাৎ পৌরঞ্জন্যঃ। হে প্রজাপতে ॥

৮। দারৈঃ পরিণামানন্তরং হিতাহিতচিন্তাভিঃ, বরৈরুচিতবিষয়ভোগৈঃ ॥

৯। পুত্রাণাং পুত্রাঃ কর্ম্মাণি। পঞ্চালেষু—শব্দাদিবিষয়েষু ॥

১০। তেষু পুত্রাদিষু তেষামপি যে রিকৃথহারাঃ পুত্রাস্তেষু চ ॥

১২। যুক্তেষ্বাত্মহিতেষু কর্ম্মস্বনবহিতস্য, স বৈ কালো জরাসময়ঃ ॥

১৩। চণ্ডবেগঃ সংবৎসরেণাবর্ত্তমানেনোপলক্ষিতঃ ; গন্ধর্ব্বা দিবসাঃ ॥

১৪। গন্ধর্ব্ব্যো রাত্রয়ঃ, তাদৃশীস্তাদৃশ্যঃ, মৈথুন্তো দিবসৈর্মিথুনীভূয় স্থিতাঃ, সিতাশ্চাসিতাশ্চ শুক্লকৃষ্ণপক্ষীয়াঃ, পরিভ্রমণেন সর্ব্বৈঃ কামৈঃ সহ বিনির্মিতাং পুরীমপহরন্তি ॥

১৫। প্রজাগরঃ—প্রাণঃ ॥

১৬। বিংশত্যা চ সহ ॥

১৭। স্বসম্বন্ধে স্বসম্বন্ধিনি প্রাণে ॥

১৮। স এব মধুভুক্ ক্ষুদ্রসুখভোক্তা, স্বপার্ষদৈরিন্দ্রিয়ৈর্নাবিদন্নালোচিতবান্ ॥

১৯। কালস্থ দুহিতা জরাস্তি, তাং ন প্রত্যনন্দত নৈচ্ছৎ। বর্হিষ্মন্ হে প্রাচীনবর্হিঃ ॥

২০। পুরবে যযাতিপুত্রায়, তেন বৃতা সতী বরমদাৎ। যযাতিঃ শুক্রশাপাজ্জরাং প্রাপ্য পুত্রানুবাচ—ইমাং গৃহ্লীতেতি। তাং জ্যেষ্ঠাশ্চত্বারো ন জগৃহুঃ, পুরুস্ত জগৃহে। ততো যযাতিস্তস্মৈ রাজ্যং দদাবিতি জরৈবাদাদিত্যুক্তম্ ॥

২১। সা জরা ; বৃহদ্ব্রতং নৈষ্ঠিকম্ ॥

২২। প্রত্যাখ্যাতবতি ময়ি সংরভ্য ক্রোধং কৃত্বা 'নৈকত্র স্থাতুমর্হসি' ইতি শাপমদাৎ ॥

২৩। আধয়ো ব্যাধয়শ্চ যবনাঃ, তেষামীশ্বরং ভয়নামানং বব্রে ॥

২৪। হে বীর ! ত্বামীপ্সিতং পতিং বৃণে। ন রিষ্যতি, ন নশ্যতি ॥

২৫। লোকতো বেদতশ্চ যদ্দেয়ত্বেন গ্রাহ্যত্বেন চোপনতং প্রাপ্তম্, তদ্যাচ্যমানং যো ন দদাতি, যশ্চ দীয়মানং নেচ্ছতি, ন গৃহ্লাতি, ইমৌ দ্বৌ কর্ম্মভূতাবনুশোচন্তি সন্তঃ ॥

২৬। পুরুষেণ কর্ত্তব্যো ধর্ম্মঃ পৌরুষঃ ॥

২৭। দেবগুহ্যং মরণম্, তদ্ধি প্রাণিনাং বৈরাগ্যানুদয়ায় দেবৈর্গোপ্যতে ॥

২৮। তুভ্যং তব, আত্মসমাধিনা জ্ঞানদৃষ্ট্যা, যাচ্যমানোঽয়ং লোকস্ত্বাং নেচ্ছতি ॥

২৯। অতোঽব্যক্তগতিঃ ; কুতঃ ? প্রাপ্তেত্যলক্ষিতগতিঃ সতী লোকমাক্রম্য ভুঙ্ক্ষ্ব। এবং সর্ব্বোঽপি লোকস্তব পতিঃ স্যাদিত্যর্থঃ। ন চৈবং ত্বয়া শঙ্কনীয়ম্—প্রতিকূলাং মাং লোকো হনিষ্যতীতি, যস্মাত্ত্বমেব প্রজানাং নাশং করিষ্যসীত্যাহ—যা হীতি। যা মদীয়া যবনপৃতনা, তয়া যুক্তা ॥

৩০। কিঞ্চ, প্রজ্বার ইতি। মারকো বৈষ্ণবো জ্বরঃ, মাহেশ্বরস্য ব্যাধ্যন্তপাতিত্বাৎ। ভীমা ঘোরাঃ সৈনিকা যস্য ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
সপ্তবিংশোঽধ্যায়ঃ ॥ ২৭ ॥

অষ্টাবিংশোঽধ্যায়ঃ

অষ্টাবিংশে তু বৈদর্ভ্যাখ্যানেন স্ত্রীবিচিন্তয়া।
স্ত্রীত্বং প্রাপ্তস্য দৈবেন কদাচিন্মুক্তিরুচ্যতে ॥ (১)

১। ইদানীন্তু পুরঞ্জনস্য পুংদেহত্যাগপূর্ব্বকং স্ত্রীত্বপ্রকারমাহ—সৈনিকা ইত্যাদি, 'রাজসিংহস্য বেশ্মনি' ইত্যন্তেন গ্রন্থেন। দিষ্টং দৈবং কুর্ব্বন্ত্যধিকুর্ব্বন্তীতি তথা মৃত্যোরাদেশকারিণ ইতি বা ॥

২। জরৎপন্নগেন জীর্ণপ্রাণেন পালিতাম্ ॥

৪। দ্বার্ভিশ্চক্ষুরাদিভী রোগরূপেণ প্রবিশ্য ॥

৬—৮। কন্যয়া জরয়োপগূঢ়ঃ সন্ তৎপ্রতিক্রিয়াং ন লেভে ইতি তৃতীয়েনান্বয়ঃ। (৬) হৃতৈশ্বর্য্যঃ, উত্থানাত্মশক্তেঃ॥ (৭) প্রতিকূলান-পেক্ষিতবিষয়প্রাপকান্, অনাদৃতানাদরমকুর্ব্বাণান্, স্বাধীনত্বাভাবাৎ। অনুগা ইন্দ্রিয়াণি, অমাত্যা ইন্দ্রিয়দেবতাঃ। গতসৌহৃদামধ্যবসায়াভাবাৎ॥ (৮) কন্যয়া জরয়া গ্রস্তম্; পঞ্চালান্ বিষয়ানরিভির্ব্যাধাদিভিদূ র্ষিতান্॥

৯। কালকন্যয়া হেতুভূতয়া, যাতযামান্ নিঃসারানপি কামান-ভিলষন্। বিগতা আত্মনো গতিঃ পারলৌকিকী, ঐহিকঃ পুত্রাদিস্নেহশ্চ যস্য সঃ। গতিঃ স্নেহাদিতি বা পাঠঃ। স রাজা পুরঞ্জনো হাতুং প্রচক্রমে উপক্রান্তবানিতি দ্বয়োরন্বয়ঃ॥

১০। অনিকামতঃ—অনিচ্ছয়াপি॥

১২। সপরিচ্ছদো ভৃত্যবর্গসহিতঃ; কুটুম্বেন দীব্যতীতি কৌটুম্বিকঃ; কুটুম্বিন্যা গৃহিণ্যা; সন্ধির্নাত্র বিবক্ষিতঃ। সান্বয়ঃ পুত্রাদিসহিতঃ॥

১৩। যবনৈরুপরুদ্ধান্যায়তনানি যস্য স পুরপালঃ॥

১৪। পুরু বহু কৃচ্ছ্রম্, তেনোরুর্বেপথুর্যস্য; বৃক্ষকোটরাদিব সর্পঃ॥

১৫। কণ্ঠে উপরুদ্ধো রুরোদ, ঘুরঘুরধ্বনিং চকার॥

১৬। দুহিত্রাদীন্ দধ্যাবিত্যুত্তরেণান্বয়ঃ। জাময়োঽত্র স্নুষাঃ। স্বত্ব-মাত্রেণাবশিষ্টম্, ভোগস্তু প্রাগেব ক্ষীণঃ॥

১৮। ধ্যানমেবাহ—লোকান্তরমিত্যাদিনা॥

১৯। অনাশিতে—অভোজিতে, ভর্ৎসিতে ভর্ৎসনে কৃতে, যতবাগ-ভবতি॥

২০। অবিজ্ঞমবিবেকিনং মাম্, ব্যুষিতে দেশান্তরং গতে, গৃহমেধীয়ং বর্ত্ম গৃহধর্ম্মমপি কিং নেষ্যত্যনুবর্ত্তয়িষ্যতি? যুক্তমেতৎ, যতো বীরসূঃ পুত্রবতী; কিংবা, মদ্বিরহমসহমানা মরিষ্যত্যেবেত্যর্থঃ॥

২১। ন বিদ্যতে পরময়নমাশ্রয়ো যেষাং 'তেঽপরায়ণাঃ পুত্রাঃ কন্যাশ্চ ; যদ্বা, পরাশ্রয়াঃ কন্যাঃ ; ভিন্না নৌর্যেষাম্ ॥

২২। অতদর্হণম্, বস্তুতস্তস্য ব্রহ্মত্বাৎ ॥

২৩। এষ যদা ক্ষয়ং স্থানং নীয়মানঃ, তদা অনুপথাঃ প্রাণা ইন্দ্রিয়াণি চ ; তথা চ শ্রুতিঃ—'তমুৎক্রামন্তং প্রাণোঽনূৎক্রামতি, প্রাণমনূৎক্রামন্তং সর্ব্বে প্রাণা অনূৎক্রামন্তি' ইতি ॥

২৪। প্রকৃতিম্—মহাভূতাত্মতাম্ ॥

২৫। নাবিন্দৎ ন সস্মার, পুরঃ পূর্ব্বং সখায়ং সন্তমীশ্বরম্ ॥

২৬। অদয়ালুনা কাম্যকর্ম্মসু যে সংজ্ঞপ্তা হতাঃ, অমীবং পাপং ক্রৌর্য্যং বা ॥

২৭। শাশ্বতীঃ সমা আর্তিমনুভূয় ॥

২৮। অন্তকালে তাং ভার্য্যামেব মনসা গৃহ্নন্ স্মরন্নন্তরং বিদর্ভস্য বেশ্মনি প্রমদোত্তমা বভূব। অতঃপরমস্মিন্ প্রকরণ এতাবদেব প্রকৃতোপ-যোগি বিবক্ষিতম্। স্ত্রীধ্যানেন স্ত্রীত্বপ্রাপ্তাবপি পতিব্রতাধ্যানেন পূর্ব্বা-দৃষ্টেন চ ধার্ম্মিকাদ্বিদর্ভাৎ জন্মাভূৎ। ধার্ম্মিকসঙ্গেন চ বিশুদ্ধস্য ভাগবতেন মলয়ধ্বজেন সঙ্গোঽভূৎ। ততো বিষ্ণুভক্তিঃ, ততো বৈরাগ্যম, ততস্তমেব ভর্ত্তৃরূপং গুরুং পাতিব্রত্যধর্ম্মেণ ভজতো ভগবৎপ্রসাদলব্ধজ্ঞানেন মোক্ষ ইতি। অন্যৎ তু কথালঙ্কারমাত্রম্, তথাপি কিঞ্চিদ্বৃত্তি[১]সামান্যেন ইহ যোজয়িষ্যামঃ। বিদর্ভস্য বিশিষ্টদর্ভোপলক্ষিতস্য, কর্ম্মঠস্য রাজসিংহস্য, ধর্ম্মেণ হি প্রজাপালনেন যজ্ঞাদিনা চ ক্ষত্রিয়া রাজন্তে, তেষু শ্রেষ্ঠস্য বেশ্মনি ॥

২৯। মলয়োপলক্ষিতে দক্ষিণদেশে ধ্বজ ইব দর্শনীয়ঃ। স হি শ্রীবিষ্ণুভক্তিপ্রধানো দেশস্তত্র মুখ্যঃ, মহাভাগবত ইত্যর্থঃ। পণ্ডা নিশ্চয়-

১। কিঞ্চিচ্ছ্রুতি- (ক)।

বুদ্ধিঃ, তামর্হতীতি পাণ্ড্যঃ, স উপযেমে। পুরঞ্জনো ভাগবতসঙ্গং প্রাপ্ত ইত্যর্থঃ ॥

৩০। আত্মজাং শ্রীকৃষ্ণসেবারুচিম্; সৎসঙ্গেন ভগবদ্ধর্ম্মে রুচিরভূদিত্যর্থঃ। অসিতস্য শ্রীকৃষ্ণস্যেক্ষণং যয়া তাম্। যবীয়সঃ সপ্ত সুতান্—'শ্রবণং কীর্ত্তনং বিষ্ণোঃ স্মরণং পাদসেবনম্। অর্চ্চনং বন্দনং দাস্যম্' ইতি ভক্তিপ্রকারান্। সখ্যাত্মনিবেদনয়োস্ত্বংপদার্থজ্ঞানোত্তরকালত্বাত্তস্য চ ভগবতৈবোত্তরত্রোপদেক্ষ্যমাণত্বাদিদানীমনুৎপত্তেঃ সপ্তেত্যুক্তম্। ভগবদ্ধর্ম্মরুচ্যা তৎ শ্রবণকীর্ত্তনাদিকং জাতমিত্যর্থঃ। দ্রবিড়ভূমিপালকান্, দ্রবিড়ভূমির্হি শ্রবণাদিভক্তিভিরেব সুরক্ষিতাস্তীতি প্রসিদ্ধম্ ॥

৩১। অর্ব্বুদমিতি শ্রবণাদীনাং প্রত্যেকমনেকপ্রকারা অভবন্নিত্যর্থঃ। তদুক্তম্—'ভক্তিযোগো বহুবিধো মার্গৈর্ভামিনি ভাব্যতে' ইতি। যেষাং বংশধরৈর্যতঃ প্রবৃত্তৈঃ সম্প্রদায়ভেদৈঃ কৃৎস্না মহী, মন্বন্তরম্, ততঃ পরঞ্চ ভোক্ষ্যতে, অবিদ্যাকামকর্ম্মভ্যোঽপি রক্ষিষ্যতে ॥

৩২। অগস্ত্যোঽগানি নিষ্ক্রিয়াণি গাত্রাণি স্ত্যায়তি সংঘাতয়তীত্যগস্ত্যো মনঃ, স প্রাক্ প্রথমজাতাং দুহিতরং কৃষ্ণসেবারুচিমুপযেমে, তস্য মনঃ শ্রীকৃষ্ণে দৃঢ়াং রতিং ববন্ধেত্যর্থঃ। ধৃতানি শমদমাদীনি ব্রতানি যয়া তাং রতিম্। দৃঢ়েভাঃ সত্যলোকাদিভোগেভ্যোঽপি চ্যুতস্তদ্রহিতঃ, শ্রীকৃষ্ণরতাবিহামুত্রভোগবিরাগো জাত ইত্যর্থঃ। স এবোপশমাত্মকত্বান্মুনিঃ। কথম্ভূতঃ? ইধ্মবাহ আত্মজো যস্য সঃ। 'তদ্বিজ্ঞানার্থং স গুরুমেবাভিগচ্ছেৎ সমিৎপাণিঃ শ্রোত্রিয়ং ব্রহ্মনিষ্ঠম্' ইত্যাদিশ্রুতিপ্রসিদ্ধা সমিদ্বহনোপলক্ষিতা গুরূপসত্তির্বৈরাগ্যাদভূদিত্যর্থঃ। ন হ্যবিরক্তস্য গুরূপসত্তিঃ সম্ভবতি। কথাপক্ষে যথাশ্রুতমেব ॥

৩৩। ক্ষ্মাং বিভজ্য, তত্র শ্রবণাদিভক্তিভেদং ব্যবস্থাপ্য ॥

৩৪। ইদানীং পুরঞ্জনস্য স্ত্রীভাবং প্রাপ্তস্য সর্ব্বতো বিরক্তস্য—'পতিরেবগুরুঃ স্ত্রীণাম্' ইতি-বচনাৎ পতিসেবয়া গুরুশুশ্রূষাপ্রকারং দর্শয়িতুমাহ—'হিত্বা' ইত্যাদিনা 'মনো দধে' ইত্যন্তেন গ্রন্থেন। মদয়তীতি মদির-মীক্ষণং যস্যাঃ ॥

৩৫—৩৬। তত্র চন্দ্ররসাখ্যা[1] নদ্যঃ। তাসাং পুণ্যৈঃ সলিলৈরুভয়ত্র অন্তর্ব্বহিশ্চ, আত্মনো মলং ক্ষালয়ন্ তপ আস্থিত ইত্যুত্তরেণান্বয়ঃ ॥ (৩৬) অস্যতে ভূমৌ ক্ষিপ্যত ইত্যষ্টির্বীজম্ ॥

৩৮। বিদ্যয়োপাসনয়া পক্ককষায়ো দগ্ধকামাদিবাসনঃ; যুযুজে আত্মনো ব্রহ্মতাং ভাবয়ামাস। অক্ষাণীন্দ্রিয়াণি, অনিলঃ প্রাণঃ, আশয়-শ্চিত্তম্; বিজিতা অক্ষাদয়ো যেন ॥

৩৯। আস্তে স্ম বর্ষশতমিতি জ্ঞানস্য দুঃসাধনতাং দর্শয়তি। অতএব হরৌ ভক্তিং কৃতবানিত্যাহ—বাসুদেবে রতিমুদ্বহন্নন্যদ্দেহাদিকং ন বেদ ॥

৪০। এবং বর্ত্তমান আত্মন্যাত্মানং বিদ্বান্নস্মাদুপররাম। কথং বিদ্বান্? ব্যতিরিক্ততয়া দেহাদিব্যতিরিক্তত্বেন। কুতঃ? ব্যাপকতয়া দেহাদিপ্রকাশকত্বেন। নন্বু দেহাদ্যাকারো বিমর্শ এতৎ প্রকাশয়তি, ন তু নিরাকার আত্মা, অত আহ—আমর্শস্যাপি সাক্ষিণম্। অয়ং ভাবঃ—আমর্শো নামান্তঃকরণবৃত্তিঃ, সা চ জড়ত্বাদাত্মপ্রকাশ্যৈবেতি। যথা স্বপ্নে মমেদং শিরশ্ছিন্নমিত্যাদিপ্রতীতৌ তদ্ব্যতিরিক্তমাত্মানং বেত্তি, তদ্বৎ ॥

৪১। কেন বিদ্বান্? তত্রাহ—সাক্ষাদ্ধরিরেব যো গুরুস্তেনোক্তেন সর্ব্বতোমুখং যথা তথা স্ফুরতানবচ্ছিন্নেন জ্ঞানেন ॥

৪২। তদেবাহ—পর ইতি। ব্রহ্মৈবাহম্, ন সংসারীতি ব্রহ্মণ্যাত্মন ঈক্ষণে শোকাদিনিবৃত্তিঃ। অহমেব ব্রহ্ম ইত্যাত্মনি ব্রহ্মণ ঈক্ষণে ব্রহ্ম-পারোক্ষ্যনিবৃত্তিঃ। অতো ব্যতিহারেণেক্ষমাণোঽস্মাৎ সংসারাদুপররাম।

১। চন্দ্রবসাখ্যা (ঘ)।

নন্বেবমপি জীবস্য কুতো ব্রহ্মত্বাপত্তিঃ ? ঈক্ষণস্যৈব ব্যবধায়কত্বাদিত্যাশঙ্ক্যাহ —ঈক্ষাং বিহায়। দগ্ধেন্ধনানলবত্তস্যাঃ স্বয়মেবোপশান্তিরিতি ভাবঃ ॥

৪৪। উপপতিং পত্যুঃ সমীপে; যদ্বা, পত্যুঃ কিঞ্চিন্মাত্রং ন্যূনা তৎসমানা সতী বভাবিত্যর্থঃ; 'উপোঽধিকে চ' ইতি কর্ম্মপ্রবচনীয়ঃ, তদ্‌যোগে চ দ্বিতীয়া। শান্তমঙ্গারাবস্থমনলম্, উপশান্তা শুদ্ধা জ্বালা যথা ভাতি, তদ্বৎ ॥

৪৫। তদানীমপি সুস্থিরমাসনং যস্য। অতএবাজানতী যদা, তদা যথাপূর্ব্বমাসেবত ॥

৪৬। পত্যুরঙ্ঘ্রি মর্চ্চয়ন্তী যদা তস্মিন্নঙ্ঘ্রাবুষ্মাণং নাপশ্যৎ ॥

৪৭। অবন্ধুং পতিরহিতম্, অশ্রুভিরাসিচ্য ॥

৪৮। ক্ষত্রবন্ধুভ্যোঽধার্ম্মিকক্ষত্রিয়েভ্যোঽপি ॥

৪৯। অবর্ত্তয়ৎ—প্রবর্ত্তয়ামাস ॥

৫০। তস্যাং নিধায়, অগ্নিদানেনাদীপ্য চ ॥

৫১। পূর্ব্বতরোঽনাদিরীশ্বরঃ সখা, 'দ্বা সুপর্ণৌ' ইতি শ্রুতেঃ। সাম্না প্রিয়বাক্যেন সম্বোধয়ন্ ॥

৫২। যস্য যং শোচসি। অগ্রে সৃষ্টেঃ পূর্ব্বং বিচচর্থ, ময়ি স্থিতত্বেন সখ্যসুখমনুভূতবানসি ॥

৫৩—৫৯। ননু নাহমাবয়োঃ সখ্যং সহচরত্বঞ্চ জানামীতি চেৎ, তত্রাহ—(৫৩) যদ্যপি মাং ন জানাসি, তথাপ্যাত্মানং ত্বামবিজ্ঞাতসখমবিজ্ঞাতঃ কশ্চিন্মে সখা আসীদিত্যেবং কিং স্মরসি ? সখ ইতি পুংস্ত্বনির্দ্দেশঃ প্রাক্তনপুংস্ত্বস্মারণায়। সখ্যং স্মারয়ন্ স্ববিয়োগকৃতমনর্থমাহ—হিত্বেতি সার্দ্ধৈঃ ষড়্‌ভিঃ। পদং স্থানম্ ॥ (৫৪) হংসৌ শুদ্ধৌ, মানসং হৃদয়ময়নং যয়োঃ, কথাপক্ষে মানসসরসি স্থিতৌ পক্ষিণৌ, অভূতাং জাতৌ; ওকো গৃহম্, অন্তরা বিনৈব। 'বা'-শব্দ এবার্থে। সহস্রপরি-

বৎসরান্ মহাপ্রলয়ং যাবৎ ॥ (৫৫) হে বন্ধো ! গ্রাম্যে সুখে মতির্যস্য। স্ত্রিয়া মায়য়া ॥ (৫৬) পঞ্চ ইন্দ্রিয়ার্থবিষয়াঃ শব্দাদয় আরামা উপবনানি যস্মিন্, নব দ্বারাণি প্রাণচ্ছিদ্রাণি যস্মিন্, একঃ প্রাণঃ পালো যস্মিন্, ত্রীণি পৃথিব্যপ্তেজাংসি কোষ্ঠানি প্রাকারা যস্মিন্, ষড়্ জ্ঞানেন্দ্রিয়মনাংসি কুলান্যভীষ্ট-বিষয়সমর্পকা বণিজো যস্মিন্, পঞ্চ বিপণা হট্টাঃ কর্ম্মেন্দ্রিয়াণি যস্মিন্, পঞ্চভূতানি প্রকৃতিরুপাদানকারণং যস্য, স্ত্রী বুদ্ধিরেব ধবঃ পতিঃ স্বামিনী যস্মিন্ ॥ (৫৭) স্বয়মেব ইমং শ্লোকং ব্যাচষ্টে—পঞ্চেন্দ্রিয়ার্থা ইতি। ষট্কুলমিতি ষট্ত্বম্, একপালমিতি চ স্পষ্টার্থত্বান্ন ব্যাখ্যাতম্ ॥ (৫৮) ভূতান্যেবাব্যয়া প্রকৃতিরুপাদানং যস্য ; স্ত্রীধবমিত্যস্য ব্যাখ্যানং শক্তিরধীশা যস্য, তদ্বশঃ সন্নিত্যর্থঃ ॥ (৫৯) স্পৃষ্টোঽভিভূতঃ, অতো ন বিদ্যতে শ্রুতে ব্রহ্মত্বে স্মৃতির্যস্য ॥

৬০—৬৩। তত্ত্বমুপদিশতি—ন ত্বমিতি চতুর্ভিঃ। (৬০) সুহৃৎ পতিঃ। নবদ্বারে পুরে যয়া রুদ্ধোঽসি তস্যাঃ ॥ (৬১) পুমাংসং পূর্ব্বজন্মনি যদমন্যথাঃ, ইদানীঞ্চ সতীং শ্রেষ্ঠাং স্ত্রিয়ং যন্মন্যসে, এষা মায়া। যত উভয়মপি বস্তুতো নাস্তি, যস্মাদাবাং হংসৌ শুদ্ধৌ। নৌ আবয়োর্বক্ষ্যমাণাং গতিং স্বরূপং পশ্য ॥ (৬২) তত্ত্বংপদার্থয়োশ্চিদংশেনৈক্যমাহ—অহমেব ভবান্। উপচারং বারয়তি—ন চান্য ইতি। ব্যতীহারোপদেশ উক্তাভিপ্রায়ঃ, ছিদ্রমন্তরম্ ॥ (৬৩) তর্হি কথমাবয়োঃ সর্ব্বজ্ঞত্বাসর্ব্বজ্ঞত্বাদি[১]ধর্ম্মভেদঃ ? তত্রাহ—যথেতি। আত্মানং দেহম্, আদর্শে নির্ম্মলং মহান্তং স্থিরঞ্চাবেক্ষেত, পরস্য চক্ষুষি চ তদ্বিপরীতম্। বিদ্যাবিদ্যোপাধিকৃতো ধর্ম্মভেদ ইত্যর্থঃ ॥

৬৪। এবমমুনা প্রকারেণ স মানসো হংসঃ ক্ষেত্রজ্ঞো হংসেন পরমাত্মনা বোধিতঃ সন্, স্বস্থ আত্মনি স্থিতঃ সন্ চিরং ধ্যাত্বা তদ্ব্যভিচারে-

১। অজ্ঞত্ব-সর্ব্বজ্ঞত্বাদি- (ঘ)।

ণেশ্বরবিয়োগেন বিষয়াভিলাষবুদ্ধ্যা নষ্টাং স্মৃতিম্ 'অহং ব্রহ্মাস্মি' ইতি জ্ঞানং পুনঃ প্রাপ্তবান্॥

৬৫। কথামাত্রমিতি বুদ্ধিং বারয়তি—বর্হিষ্মন্নিতি। পারোক্ষ্যেণ রাজকথামিষেণ। তত্র হেতুঃ—যদ্‌যস্মাৎ। হে বর্হিষ্মন্! প্রাচীনবর্হিঃ! এতদ্রাজকথামিষেণাত্মকথা প্রদর্শিতা, যস্মাদ্দেবঃ শ্রীনারায়ণঃ পরোক্ষপ্রিয়ঃ, সাক্ষাদাত্মজ্ঞানকথনেন তব চেতসি কথা নায়াতীতি ভাবঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
অষ্টাবিংশোঽধ্যায়ঃ॥ ২৮॥

ঊনত্রিংশোঽধ্যায়ঃ

ঊনত্রিংশে পরোক্ষার্থব্যাখ্যানেনোপসংহৃতম্।
স্ত্রীসঙ্গতো ভবস্ত্বীশসঙ্গান্মুক্তিরিতি স্ফুটম্॥ (১)

১। কবয়ঃ—অধ্যাত্মবিদঃ॥

২। ব্যনক্তি লিম্পতি চেতনীকরোতীত্যর্থঃ; যদ্বা, ব্যনক্তি প্রকটয়তি। ততশ্চ স্বকর্ম্মণা পুরং জনয়তীতি পুরঞ্জনপদং ব্যাখ্যাতং ভবতি। একদ্ব্যাদয়ঃ পাদা যস্ত॥

৩। 'অবিজ্ঞাত'-শব্দেন আহৃতো ব্যাহৃত উক্তো যঃ স ঈশ্বরঃ, অবিজ্ঞাতনামনিরুক্তিঃ; যদ্‌যস্মাৎ পুংভির্নামাদিযোগেন ন বিজ্ঞায়তে॥

৪। তত্র তেষু পুরেষু মধ্যে॥

৫। অক্ষভিরিন্দ্রিয়ৈঃ॥

৬। পঞ্চবৃত্তিত্বাৎ পঞ্চশিরাঃ সর্প ইব প্রাণঃ॥

৭। একাদশমহাভট ইত্যনেন একাদশো মহাভটো নায়ক ইত্যুক্তঃ, তং দর্শয়তি—বৃহদ্বলং যস্য, তন্মনঃ। নব খানি দ্বারাণি যস্য ॥

৮। দ্যুমৎসখ ইত্যাদেরর্থং সংক্ষেপেণাহ—যস্তদিন্দ্রিয়সংযুতঃ স আত্মা তাভির্দ্বাভির্বহির্যাতীতি ॥

৯। পুরঃ পূর্ব্বভাগে কৃতাঃ ॥

১০। নেত্রে ইতি রূপমিতি চক্ষুষেতি চ খদ্যোতাদীনাং ব্যাখ্যানম্। শেষোঽনুবাদঃ। ঈশ্বরঃ—পুরঞ্জনঃ ॥

১১। নাসে ইতি ব্যাখ্যা। অবধুনোতীতি অবধূতো বায়ুঃ, তদাত্মকেনোচ্ছ্বাসেন সহৈকস্থানত্বাদ্ঘ্রাণোঽবধূতঃ। আস্যমিতি ব্যাখ্যা। রসজ্ঞবিপণান্বিত ইত্যত্র 'রসজ্ঞ'-শব্দনির্দ্দিষ্টস্য রসবিদিত্যনুবাদঃ। রস ইতি ব্যাখ্যা, রসনেন্দ্রিয়মিত্যর্থঃ। বিপণো বাগ্রসবিদ্রস ইত্যেব পাঠঃ। আর্ষত্বান্ন দোষশ্ছন্দোভঙ্গে ॥

১২। অন্ধঃ—অন্নম্ ॥

১৪। গ্রামকমিত্যস্যানুবাদঃ—গ্রামিণাং রতিরিতি। তস্য ব্যাখ্যা—ব্যবায় ইতি ॥

১৬। বিষূচীনপদার্থানুবাদঃ—বিষূচিরিতি। তদ্গুণৈর্মনোগুণৈস্তমঃসত্ত্বরজোভিঃ ॥

১৭। মহিষী যদ্যদীহেতেত্যাদেরর্থং সংগৃহ্যাহ—যথা যথা বুদ্ধিঃ স্বপ্নে বিক্রিয়তে, জাগ্রতি বিকরোতি বা ইন্দ্রিয়াণি পরিণময়তি, তস্যা গুণৈরক্তো লিপ্ত আত্মা তথা তথা তস্যা বৃত্তীর্দর্শনস্পর্শনাদ্যাঃ কেবলমুপদ্রষ্টৈব সন্ বলাদনুকার্য্যতে ॥

১৮। আশুগমিত্যেতদ্ব্যাচষ্টে—সংবৎসরস্যেবাপ্রতিহতো রয়ো বেগঃ প্রতীতিতো যস্য স সংবৎসররয়ঃ, বস্তুতস্তু অগতিঃ, স্বপ্নশরীরাদের্বুদ্ধাবেব বিবৃতত্বেন দেশান্তরগত্যভাবাৎ। সংবৎসরবয়োগতিরিতি পাঠে

সংবৎসরশ্চ তৎকৃতং রয়শ্চ তাভ্যাং গতির্যস্যেতি। দ্বীষমিত্যস্য ব্যাখ্যা নারদেন ন কৃতা। দ্বিকর্ম্মচক্র ইতি দ্বিচক্রমিত্যস্য ব্যাখ্যা। ত্রিগুণধ্বজ ইতি ত্রিবেণুপদ-ব্যাখ্যা॥

১৯। পঞ্চপ্রহরণমিত্যেতদ্ব্যাচষ্টে—পঞ্চেন্দ্রিয়ার্থপ্রক্ষেপ ইতি॥

২০। পঞ্চেন্দ্রিয়ৈঃ সূনাবিনোদমিবান্যায়েন বিষয়সেবাং করোতীতি পঞ্চসূনাবিনোদকৃৎ; অনেন 'চচার মৃগয়াং তত্র' ইত্যাদি ব্যাখ্যাতম্॥

২২। পরিক্রান্ত্যা—পরিভ্রমণেন॥

২৩। ভগিনীত্বেন জগৃহে, লোকানাং ক্ষয়ায়॥

২৪। চরাঃ—সঞ্চারিণঃ; ভূতানামুপসর্গে পীড়ায়ামাশু শীঘ্রো মৃত্যু-হেতূ রয়ো বেগো যস্য প্রজ্বারস্যেতি 'প্র'-শব্দব্যাখ্যা। ভূতোপসর্গাস্বরয় ইতি পাঠে ভূতকৃতা অরয়ঃ। অনেন চ অরিভিরুপরুদ্ধ ইত্যরিপদং ব্যাখ্যাতম্। দ্বিবিধঃ শীতোষ্ণরূপেণ প্রবেশনির্গমভেদাৎ॥

২৫—২৬। এবং পরোক্ষত্বেনোক্তমর্থং ব্যাখ্যায় সর্ব্বকথাতাৎপর্য্যমাহ—এবমিত্যাদিনা 'বিরম ক্রমেণ' ইত্যন্তেন। (২৫) আধিদৈবিকাদিভি-র্দুঃখৈঃ ক্লিশ্যমানো মমাহমিতি দেহে শতং বর্ষাণি শেতে বর্ত্তত ইতি দ্বয়োরন্বয়ঃ॥ (২৬) অশনাপিপাসাদীন্ প্রাণধর্ম্মান্, অন্ধত্বাদীনিন্দ্রিয়-ধর্ম্মান্, কামাদীন্ মনোধর্ম্মাংশ্চ নির্গুণোঽপি আত্মন্যধ্যস্য কামলবান্ বিষয়সুখলেশান্ ধ্যায়ন্ কর্ম্মকৃৎ॥

২৭—২৮। ততঃ কিম্? অত আহ—যদেতি দ্বাভ্যাম্। (২৭) স্বদৃক্ স্বপ্রকাশস্বভাবোঽপি॥ (২৮) শুক্লং সাত্ত্বিকম্, কৃষ্ণং তামসম্, লোহিতং রাজসম্; যথা কর্ম্ম, তথা জায়তে॥

২৯—৩০। তদেবাহ—শুক্লাদিতি দ্বাভ্যাম্। (২৯) প্রকাশো ভূয়িষ্ঠো যেষু, দুঃখমুদর্কমুত্তরফলং যেষু, ক্রিয়য়া আয়াসো যেষু তান্,

লোহিতাৎ ; তমঃশোকাবুৎকটৌ যেষু তান্ কৃষ্ণাদিতি জ্ঞেয়ম্॥ (৩০) নোভয়ং নপুংসকম্ ; যথাকর্ম্মগুণং কর্ম্মগুণাবনতিক্রম্য ॥

৩১—৩২। তেষু দৈববশেন সুখদুঃখে প্রাপ্নোতীতি সদৃষ্টান্তমাহ দ্বাভ্যাম্। (৩১) ক্ষুধা পরীতো ব্যাপ্তঃ সারমেয়ঃ শ্বা ; দণ্ডঃ দণ্ডেন তাড়নম্॥ (৩২) কামব্যাপ্ত আশয়ো যস্য ॥

৩৩। ননু তর্হি সুখস্য সম্ভবাৎ, দুঃখস্য চ প্রতীকারসম্ভবান্নৈকান্ততো হেয়ত্বম্? তত্রাহ—দুঃখেম্বিতি ; দুঃখস্য প্রতীকারস্তাবন্নাস্তি ; স্যাচ্চেত্তস্য তস্য প্রতিক্রিয়া, তথাপি ত্রিবিধেষু দুঃখেষু মধ্যে একতরেণাপি দুঃখেন ব্যবচ্ছেদো বিয়োগো নাস্তি ॥

৩৪। প্রতিক্রিয়াণামপি দুঃখরূপত্বাদিতি সদৃষ্টান্তমাহ—যথা হীতি ॥

৩৫। দুঃখস্য মূলভূতানি কর্ম্মাণি প্রতিক্রিয়াদিকর্ম্মভির্নৈব নিবর্ত্তন্ত ইত্যাহ—নৈকান্তত ইতি। অত্যন্তং সবাসনম্, কেবলং জ্ঞানরহিতম্, অবিদ্যয়োপস্থতং প্রাপ্তম্। অতোঽবিরোধান্ন নিবর্ত্ত্য-নিবর্ত্তকত্বমিতি ভাবঃ। অত্র দৃষ্টান্তঃ—স্বপ্নে দৃষ্টঃ স্বপ্নঃ প্রবোধং বিনা যথা তং স্বপ্নমত্যন্তং ন প্রতিকরোতীত্যর্থঃ ॥

৩৬। ননু তর্হ্যজ্ঞানবিলসিতত্বেন সংসৃতের্হেতোর্দেহাদেরপ্যসত্ত্বাৎ কিং তন্নিবর্ত্তনপ্রয়াসেন? তত্রাহ—অর্থে হীতি। লিঙ্গরূপেণ—উপাধিভূতেন ॥

৩৭। তদেবং সংসৃতিপ্রকারমুক্ত্বা তন্নিবৃত্তিপ্রকারমাহ—অথ তস্মাৎ পুরুষার্থভূতস্যৈব আত্মনঃ, যতোঽজ্ঞানান্মনসো বা অনর্থপরম্পরারূপা সংসৃতির্ভবতি। তস্য ব্যবচ্ছেদো গুরুরূপে বাসুদেবে ভক্ত্যৈব ॥

৩৮। ননু সংসৃতিনিবৃত্তির্বৈরাগ্যপূর্ব্বকাজ্‌জ্ঞানাদেব, ন তু ভক্ত্যা—'তরতি শোকমাত্মবিৎ' ইতি শ্রুতেঃ ; অত আহ—বাসুদেব ইতি। সধ্রীচীনেন সমীচীনেন প্রকারেণ ॥

৩৯। নন্বসৌ মহাফলো ভক্তিযোগঃ কথং স্যাৎ? অত আহ—স ত্বচ্যুতস্য কথামাশ্রিত্য বর্ত্তমানোঽচিরাৎ স্যাৎ। কস্য স্যাৎ? তত্রাহ—শৃণ্বতোঽধীয়ানস্য চ॥

৪০। কুত্র স্যাৎ? তদাহ—যত্রেতি। ভগবতো গুণানুকথনে শ্রবণে ব্যগ্রং সত্বরং চেতো যেষাং তে॥

৪১—৪২। নন্বু সাধুসঙ্গং বিনা স্বয়মেব হরিকথাচিন্তনাদিনা ভক্তির্ভবেদেবেত্যাশঙ্ক্যাহ দ্বাভ্যাম। (৪১) তস্মিন্ স্থানে মহদ্ভির্মুখরিতাঃ কীর্ত্তিতাঃ; মধুভিদশ্চরিত্রমেব পীযূষম্, তদেব শিষ্যত ইতি শেষো যাসু, অসারাংশরহিতাঃ শুদ্ধামৃতবাহিন্য ইত্যর্থঃ। অবিতৃষঃ—অলংবুদ্ধিশূন্যাঃ সন্তঃ, গাঢ়ৈঃ সাবধানৈঃ কর্ণৈর্যে তাঃ সরিতঃ পিবন্তি সেবন্তে; 'অশন'-শব্দেন ক্ষুল্লক্ষ্যতে, অশনাদয়স্তান্ ন স্পৃশন্তি, ভক্তিরসিকান্ ন বাধন্ত ইত্যর্থঃ॥ (৪২) সৎসঙ্গমন্তরেণ স্বয়মেব কথাচিন্তনাদাবালস্যাদিনা রসাবেশাভাবাচ্চ ক্ষুৎপিপাসাদ্যভিভূতস্য ভক্তির্ন সম্ভবতীত্যাহ—এতৈরিতি॥

৪৩—৪৬। ভগবদনুগ্রহমন্তরেণ তু ন কস্যাপি জ্ঞানসম্ভব ইতি কৈমুত্যন্যায়েনাহ চতুর্ভিঃ॥ (৪৩) প্রজাপতিপতির্ব্রহ্মা॥ (৪৪) মদন্তাঃ—অহং নারদোঽন্তে যেষাং তে॥ (৪৫) বাচাং পতয়োঽপি তপোবিদ্যা-সমাধিভিরুপায়ৈঃ পশ্যন্তো বিচিন্বন্তোঽপি পশ্যন্তং সর্ব্বসাক্ষিণং ন পশ্যন্তি॥ (৪৬) কুতঃ? ইত্যত আহ—শব্দব্রহ্মণি বেদ উরুর্বিস্তরো যস্য। অর্থতোঽপি পারশূন্যে তস্মিন্ বর্ত্তমানাঃ, মন্ত্রাণাং লিঙ্গৈর্বজ্রহস্তত্বাদিগুণযুক্ত-বিবিধদেবতাভিধানসামর্থ্যৈঃ পরিচ্ছিন্নমেবেন্দ্রাদিরূপং তত্তৎকর্ম্মাগ্রহেণ ভজন্তঃ পরমেশ্বরং ন বিদুঃ॥

৪৭। তর্হি অন্যঃ কো নাম কর্ম্মাদ্যাগ্রহং হিত্বা পরমেশ্বরমেব ভজেৎ? ইত্যত আহ— যদা যমনুগৃহ্ণাতি। অনুগ্রহে হেতুঃ—আত্মনি ভাবিতঃ

সন্ ; স তদা লোকে লোকব্যবহারে বেদে চ কর্ম্মমার্গে পরিনিষ্ঠিতাং মতিং ত্যজতি ॥

৪৮। অর্থকাশিষু পরমার্থত্বেন প্রকাশমানেষু পুরুষার্থবুদ্ধিং মা কৃথাঃ। প্ররোচনায় কেবলং শ্রোত্রপ্রিয়েষু ; ন স্পৃষ্টং বস্তু যৈঃ ॥

৪৯। নন্থ বেদেন স্বর্গাদিসাধনত্বেনোক্তানি কর্ম্মাণীতি বেদবাদিনো বদন্তি, কথমস্পৃষ্টবস্তুম্বিতি উচ্যতে ? তত্রাহ—যে ধূম্রধিয়ো মলিনবুদ্ধয়ঃ সকর্ম্মকং কর্ম্মপরং বেদমাহুঃ, তে অতদ্বিদোঽবেদজ্ঞাঃ, যতস্তে স্বং স্বরূপ-ভূতং লোকমাত্মতত্ত্বং বেদতাৎপর্য্যগোচরং ন বিদুঃ ; যত্র দেবোঽস্তি ॥

৫০। ত্বন্তু মহামূর্খ ইত্যাহ—আস্তীর্য্যেতি। বৃহদ্বধাদ্ বহুপশুবধাৎ, মানী মহাযজ্বাহমিত্যহঙ্কারী, অতঃ স্তব্ধোঽবিনীতঃ সন্ কর্ম্ম নাবৈষি, পরং বিদ্যাস্বরূপং তচ্চ ন বেৎসি। নারদঃ স্বয়ং কৃপয়া তদ্দ্বয়ং নিরূপয়তি —হরিং তোষয়তীতি হরিতোষং যৎ, তদেব কর্ম্ম ; যয়া তস্মিন্ হরৌ মতির্ভবতি, সৈব বিদ্যা, মহাফলত্বাৎ ॥

৫১—৫২। কুত ইত্যপেক্ষায়াং হরেঃ পরমফলত্বং দর্শয়ন্নাহ দ্বাভ্যাম্। (৫১) হরির্দেহভৃতামাত্মা ঈশ্বরশ্চ। তত্র হেতুঃ—স্বয়ং স্বাতন্ত্র্যেণ প্রকৃতিঃ কারণম্। অতস্তেষাং তৎপাদমূলমেব শরণমাশ্রয়ঃ ; যতো যস্মিন্ ॥ (৫২) ন চ তদ্ভজনেঽন্যভজন ইব দুঃখং ভয়ঞ্চেত্যাহ—স ইতি। ইতি যো বেদ, স এব বিদ্বান্, স গুরুঃ, স এব হরিশ্চ ॥

৫৩। উক্তমুপসংহরতি—প্রশ্ন ইতি। এবং ভবতঃ প্রশ্নঃ সঞ্ছিন্নঃ পরিহৃতঃ। তদেবমাত্মনো বন্ধমোক্ষপ্রকারে কথারূপেণ কথিতেঽপি নাতিনির্বিণ্ণচিত্তং পুত্রাগমনং প্রতীক্ষমাণং সন্তং তৎক্ষণমেব মহাভয়-প্রকম্পিতসকলগাত্রং গৃহান্নির্ব্বাসয়িতুং হরিণরূপকমাহ—অত্রেতি। বদতো মে বচঃ শৃণু ॥

৫৪। ক্ষুদ্রমল্পং চরতীতি তথা তম্, অলুক্। সুমনসাং পুষ্পাণাং শরণে আশ্রমে বাটিকায়াম্, মিথিত্বা মিথঃ পরস্পরং স্ত্রিয়া সহ মিলিত্বা, তত্রৈব রক্তমাসক্তম্, ষড়ঙ্ঘ্রয়ো ভ্রমরাস্তেষাং গণাস্তেষাং সামসু গীতেষু লুব্ধঃ কর্ণো যস্য, তম্। পরেষামসুভিস্তৃপ্যৈতৈঃ স্বীয়ানসূংস্তর্পয়ন্তীত্যসুতৃপস্তানবিগণয্যাগণয়িত্বা লুব্ধকস্য বাণেন ভিন্নং মৃগং মৃগয়ান্বেষয় ॥

৫৫। শ্লোকং প্রস্তুতে যোজয়ন্ ব্যাচষ্টে—সুমনোভিঃ সমানো ধর্ম্মঃ পরিণামবিরসত্বং যাসাং স্ত্রীণাম্। মিথিত্বেত্যস্য ব্যাখ্যা মিথুনীভূয়, স্ত্রীভিঃ সহেতি শেষঃ। রক্তমিত্যস্য ব্যাখ্যা—তাস্বভিনিবেশিতং মনো যেন। অসুতৃপ ইত্যস্য ব্যাখ্যা—আয়ুর্হরত ইতি। যান্তমিত্যস্য ব্যাখ্যা—বিহরন্তমিতি; অন্তর্নলিকায়াং গূঢ়েন শরেণ পরাবিধ্যতি দূরাদেব তাড়য়তি ॥

৫৬। উপদেশসারমাহ—স ইতি। বিচক্ষ্য বিচার্য্য, অন্তর্হৃদি চিত্তম্, কর্ণয়োধুনীং নদীমিব বাহির্বৃত্তিং চিত্তে নিযচ্ছ; এতচ্চ সর্ব্বেন্দ্রিয়োপলক্ষণার্থম্, অঙ্গনাশ্রমং গৃহাশ্রমঞ্চ জহি। কীদৃশম্? অসত্তমানামতিকামুকানাং যানি যূথানি, তেষাং গাথা বার্ত্তা যস্মিন্। হংসানাং জীবানাং শরণমীশ্বরম্। এবংক্রমেণ সর্ব্বতো বিরম ॥

৫৭। অর্থান্তরং প্রষ্টুং পূর্ব্বোক্তমর্থমনুবদতি—শ্রুতমিতি; অন্বীক্ষিতং বিচারিতঞ্চ। ব্রহ্মন্ হে নারদ! এতত্ত্বদুক্তমাত্মতত্ত্বমুপাধ্যায়া যে মম কর্ম্মোপদেষ্টার আচার্য্যাঃ, তে ন জানন্তি ॥

৫৮। অতস্তৎকৃত উপাধ্যায়কৃতস্তদ্বাক্যবিরোধেনাসম্ভাবনারূপো মহান্ সংশয়ঃ সঞ্ছিন্নস্ত্বয়া। অত্র তু কশ্চিৎ সংশয়ো বর্ত্ততে। যত্রেন্দ্রিয়বৃত্তীনামপ্রবৃত্তের্মুহ্যন্তি ॥

৫৯—৬০। সংশয়মাহ দ্বাভ্যাম্। (৫৯) কর্ম্মাণি যেন দেহেন করোতি, তমত্রৈব বিহায় অমুত্র লোকান্তরে কর্ম্মোপস্থাপিতেনান্যেন দেহেন জুষ্টান্যুপভুক্তানি জীবোঽশ্নুতে প্রাপ্নোতি॥ (৬০) ইতি বাদঃ

শ্রূয়তে—'প্রাপ্য পুণ্যকৃতাং লোকান্' ইতি, 'শরীরজৈঃ কর্ম্মদোষৈর্যাতি স্থাবরতাং নরঃ' ইতি ; ত্বয়া চোক্তম্—শাশ্বতীরনুভূয়ার্ত্তিমিতি। এতচ্চ কর্ত্তৃভোক্তৃদেহভেদেন কৃতনাশাকৃতাভ্যাগম-প্রসঙ্গান্ন সঙ্গচ্ছত ইতি ভাবঃ। সংশয়ান্তরমাহ—প্রোক্তং বেদোক্তং কর্ম্ম যৎ ক্রিয়তে জনৈঃ, তচ্চানরন্তরক্ষণ এব পরোক্ষমদৃশ্যং সন্ন প্রকাশতে, অতঃ কর্ম্মণো নষ্টত্বাৎ তদ্ভোগোঽপ্যাতিদুর্ঘট ইতি ভাবঃ॥

৬১। প্রথমস্যোত্তরমাহ—যেনৈবেতি। অব্যবধানেন—কর্ত্তৃভোক্তৃদেহবিচ্ছেদং বিনা ; স্থূলদেহনাশেঽপি মনঃপ্রধানস্য লিঙ্গদেহস্যানাশান্নোক্তদোষপ্রসঙ্গ ইত্যর্থঃ॥

৬২। লিঙ্গদেহবিশিষ্টস্য ভোক্তৃত্বং স্বপ্নদৃষ্টান্তেন স্পষ্টয়তি—শয়ানমিমং জাগ্রদ্দেহং শ্বসন্তং জীবন্তমুৎসৃজ্য তদভিমানং ত্যক্ত্বা, আত্মনি মনসি সংস্কাররূপেণাহিতং কর্ম্ম যথা ভুঙ্‌ক্তে, তাদৃশেন শয়ানদেহসদৃশেন কর্ম্মোপস্থাপিতেন দেহেনান্যেন বা পশ্বাদিদেহেন তথা লোকান্তরেঽপীতি ভাবঃ॥

৬৩। নন্বু ভবতু নাম লিঙ্গবিশিষ্টস্যানেন দৃষ্টান্তেন ভোক্তৃত্বম্, কর্ত্তৃত্বন্তু দানপ্রতিগ্রহাদিষু স্থূলদেহবিশিষ্টস্যৈব দৃশ্যতে ? তত্রাহ—মমৈতে পুত্রাদয়ঃ, অসাবহং ব্রাহ্মণ ইতি ব্রুবন্ মনসা যদ্‌যদ্দেহং গৃহ্ণীয়াৎ, তত্ততো দেহাদ্ রাদ্ধং সিদ্ধং কর্ম্ম পুমান্ গৃহ্ণীয়াৎ। যেন কর্ম্মণৈবমহঙ্কারগৃহীতেন পুনর্ভবো ভবতি, অন্যথা জন্মানুপপত্তেঃ। অতোঽভিমন্তুর্মনোবিশিষ্টস্যৈব কর্ত্তৃত্বম্, অভিমানবিষয়স্য তু দেহস্য পুত্রাদিদেহবদ্ দ্বারমাত্রত্বমিতি ভাবঃ॥

৬৪। যদুক্তং কর্ম্মণো নষ্টত্বান্নামুত্র ভোগ ইতি, তত্রাহ—যথেতি। উভয়ৈর্জ্ঞানকর্ম্মরূপৈরিন্দ্রিয়াণামীহিতৈঃ কদাচিৎ কচিৎ কর্ম্মপ্রবৃত্তিভিশ্চিত্তমনুমীয়তে, সত্যপি সর্ব্বেন্দ্রিয়বিষয়সম্বন্ধে যুগপজ্জ্ঞানানুৎপত্তেঃ। তদুক্ত-

মক্ষপাদেন—'যুগপজ্‌জ্ঞানানুপপত্তির্মনসো লিঙ্গম্' ইতি। এবং চিত্তবৃত্তিভি-রপি পূর্ব্বদেহজং কর্ম্ম লক্ষ্যতে, তাসামপি যুগপদনুৎপত্তেঃ ॥

৬৫—৬৬। ইতোঽপি কর্ম্ম লক্ষ্যত ইত্যাহুঃ—নানুভূতমিতি দ্বাভ্যাম্। (৬৫) অনেন বর্ত্তমানেন দেহেন ক্ব চ কুত্রচিদপি নানুভূতমনুপভুক্তম্, অদৃষ্টঞ্চাশ্রুতঞ্চ যদ্রূপং যদাত্মকম, যাদৃগ্‌ যৎপ্রকারঞ্চ, তৎ কদাচিৎ স্বপ্নমনোরথাদিষ্বাত্মনি মনস্যুপলভ্যেত॥ (৬৬) তেন হেতুনাস্য লিঙ্গিনো বাসনাশ্রয়স্য জীবস্য তাদৃশং তদনুভবাদিযুক্তং পূর্ব্বদেহসম্ভবং শ্রদ্ধৎস্ব নিশ্চয়েন মন্যস্ব। ন হ্যননুভূতোঽর্থো মনঃ প্রষ্টুং মনসি স্ফুরিতুমর্হতি ॥

৬৭। কিঞ্চ, মনোবৃত্ত্যৈব পূর্ব্বাপরাণি শুভাশুভনিমিত্তানি শরীরাণি জ্ঞায়ন্ত ইত্যাহ—মন এবেতি। ভদ্রং ত ইতি সম্যগবধানার্থমাশিষাভি-নন্দতি। ভবিষ্যত উদ্ভবং প্রাপ্স্যতঃ, ন ভবিষ্যতো নীচত্বং প্রাপ্স্যতোঽপি ভাবীনি রূপাণি শংসতি। মন এবৌদার্য্য-কার্পণ্যাদিবৃত্তিভিঃ পূর্ব্বমপ্যেব-মাসীৎ, পশ্চাদপ্যেবমেব ভবিষ্যতীতি জ্ঞাপয়তীত্যর্থঃ ॥

৬৮। ননু কদাচিদ্দর্শনানর্হমপি স্বপ্নে প্রতীয়তে, যথা পর্ব্বতাগ্রে সমুদ্রঃ, দিবা নক্ষত্রাণি, স্বশিরশ্ছেদ ইত্যাদি ? তত্রাহ—অদৃষ্টমিতি। অন্য-দেশাশ্রয়ং সমুদ্রাদিকং পর্ব্বতাগ্রে, নিশাশ্রয়ং নক্ষত্রাদিকং দিবা, অভ্যাঙ্গাদি ক্রিয়াশ্রয়ং স্বশিরচ্ছেদনাশ্রয়ং নিদ্রাদিদোষেণ হি তথা প্রতীয়ত ইত্যনুমন্তব্যম্। পরস্যাপি তদনুপপত্তেস্তুল্যত্বাদিতি ভাবঃ ॥

৬৯। ননু দরিদ্রঃ ক্বচিদাত্মানং মহারাজং পশ্যতি, রাজা চ রঙ্কমাত্মানং পশ্যতি, তৎ কথমসম্ভাবিতং সঙ্গচ্ছেত ? তত্রাহ—সর্ব্ব ইতি। আয়ান্তি ভোগ্যত্বেন প্রাপ্নুবন্তি, যান্তি চ ভোগানন্তরম্। যদি চ কশ্চিদমনা ভবেৎ, তর্হ্যেবং ন স্যান্ন ত্বেতদস্তীত্যাহ—সর্ব্বে সমনস ইতি। অতঃ সর্ব্বেষাং সমনস্কত্বান্মনসি চ সর্ব্বার্থানাং ক্রমেণ প্রবেশান্নাত্যন্তাদৃষ্টচরঃ কস্যাপি কশ্চিদর্থোঽস্তীত্যর্থঃ ॥

৭০। তদেবং সর্ব্বৈরপি সর্ব্বেঽর্থাঃ ক্রমেণ দৃশ্যন্ত ইত্যুক্তম্। ইদানীং যুগপদপি সর্ব্বদর্শনং কদাচিদ্ভবতীত্যাহ—সত্ত্বৈকনিষ্ঠে ভগবৎপার্শ্ববর্ত্তিনি ভগবদ্ধ্যানপরে মনসীদং বিশ্বমুপরজ্য সংযোগমিব প্রাপ্যাবভাসতে। প্রতীত্যনর্হস্যাপি কদাচিৎ প্রতীতৌ দৃষ্টান্তঃ—চন্দ্রমস্যুপরজ্য তমো রাহুরিব। তদিদং শুদ্ধে মনসি সর্ব্ববিষয়স্ফুরণং যোগিপ্রত্যক্ষমিতি প্রসিদ্ধম্॥

৭১। তদেবং স্থূলদেহনাশেঽপি লিঙ্গদেহস্যানাশাদন্যঃ কর্ত্তা, অন্যো ভোক্তেতি দোষো নাস্তীত্যুক্তম্। তত্রৈবং শঙ্ক্যতে—নন্বু লিঙ্গদেহস্য স্থূল-দেহদ্বারেণৈব কর্তৃত্ব-ভোক্তৃত্বে, ন তু কেবলস্য। তত্র কদাচিৎ স্থূলদেহা-ভাবে জীবস্য কর্তৃত্ব-ভোক্তৃত্বাভাবান্মুক্তিঃ প্রসজ্যেত, তত্রাহ—অহং মমেতি ভাবঃ স্থূলদেহসম্বন্ধঃ পুরুষে জীবে ন ব্যবধীয়তে, ন বিচ্ছিন্নো ভবতি। কিং পর্য্যন্তম্? বুদ্ধ্যাদীনাং ব্যূহঃ পরিণামো লিঙ্গং যাবদাস্তে। অনাদিমান্—অনাদিঃ সন্॥

৭২—৭৩। স্বাপাদাবহঙ্কারাস্ফুভাবাত্তদ্বিচ্ছেদমাশঙ্ক্যাহ দ্বাভ্যাম্। (৭২) সুপ্ত্যাদিষ্যুপতাপ ইষ্টবিয়োগাদিদুঃখম্। তেষ্বহমিতি জ্ঞানম্, অহঙ্কারো নেহতে ন প্রকাশতে, প্রাণায়নানামিন্দ্রিয়াণাং বিঘাতাদিন্দ্রিয়ৈ-রিদমহঙ্কারাস্পদবস্তুগ্রহণে হ্যহঙ্কারঃ স্ফুরতি, নান্যথেত্যর্থঃ॥ (৭৩) অ-পৌষ্কল্যাদসম্পূর্ণত্বাৎ প্রাণায়নানামিতি শেষঃ। যূনস্তরুণস্য যদেকাদশবিধ-মেকাদশেন্দ্রিয়ৈঃ স্ফুটং লিঙ্গমহঙ্করণম্, তন্ন দৃশ্যতে গর্ভাদাবিতি। সতোঽ-প্যনভিব্যক্তৌ দৃষ্টান্তঃ—কুহ্বামমাবস্যায়াং চন্দ্রমসো লিঙ্গং রূপমিব॥

৭৪। তস্মাদহঙ্কারাস্পদস্য স্থূলদেহস্যাবিচ্ছেদাদ্বস্তুভূতার্থাভাবেঽপি সংসৃতিনিবৃত্তির্নাস্তীত্যাহ—অর্থে হীতি॥

৭৫—৭৭। যাবল্লিঙ্গং স্থূলদেহাবিচ্ছেদাৎ সংসারানিবৃত্তিরিত্যেতৎ প্রপঞ্চয়তি—এবমিতি সার্দ্ধৈস্ত্রিভিঃ। (৭৫) পঞ্চবিধং পঞ্চতন্মাত্রাত্মকম্,

ত্রিবৃৎ ত্রিগুণম্, ষোড়শবিকারাত্মনা বিস্তৃতম্ ॥ (৭৭) নন্বেকং দেহং বিসৃজ্য দেহান্তরপ্রবেশাৎ পূর্ব্বং বিদেহতা স্যাদেব ? ইত্যত আহ—যথেতি। নাপযাতি, পূর্ব্বতৃণস্যাত্যাগাৎ, অপযাতি চ তৃণান্তরধারণাৎ। তথা প্রাগ্ দেহাভিমতিং ন ত্যজেন্ম্রিয়মাণোঽপি ; অন্যং দেহম্। কর্ম্মণাং প্রাগ্ দেহারম্ভকাণাং ব্যবধানেন বিচ্ছেদেন সমাপ্ত্যা ॥

৭৮। প্রকরণার্থমুপসংহরতি—মন এবেতি। ভবভাবনং সংসার-হেতুঃ ॥

৭৯। কথং সতি ? তত্রাহ—যদেতি। চরিতাননুপভুক্তান্ ; যতঃ কর্ম্মণি সতি। নন্বসঙ্গস্য কুতঃ কর্ম্ম ? তত্রাহ—অবিদ্যায়াং সত্যামনাত্মনো দেহাদেঃ কর্ম্মণি বন্ধো ভবতি ॥

৮০। বিশ্বস্থিত্যাদয়ো যতো হরের্ভবন্তি ॥

৮১। হংসয়োর্জীবেশ্বরয়োঃ ॥

৮২। পুত্রান্ আদিশ্যেতি পুত্রাণামাদেশং মন্ত্রিণামগ্রে কথয়িত্বা ; কপিলাশ্রমম্—গঙ্গাসাগরসঙ্গমম্ ॥

৮৫। আত্মশৌচং মনঃশোধকম্ ; পারমেষ্ঠ্যং সর্ব্বোৎকৃষ্টফলদম্ ॥

৮৬। স্ত্রী বুদ্ধিঃ, তৎসহিতস্য আশ্রমোঽহঙ্কারশ্ছিন্নো ভবতি ; অমুত্র কর্ম্মফলভোগঃ কথমিতি সংশয়শ্ছিন্নঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
একোনত্রিংশোঽধ্যায়ঃ ॥ ২৯ ॥

ত্রিংশোঽধ্যায়ঃ

প্রসঙ্গাৎ পঞ্চভিঃ প্রোক্তং বৃত্তং প্রাচীনবর্হিষঃ।
বর্ণ্যতে চ পুনর্দ্বাভ্যাং প্রস্তুতং তৎ প্রচেতসাম্॥ (১)
তত্র ত্রিংশে তপস্তুষ্টাদীশাল্লব্ধবরাস্ততঃ।
আগত্য বার্ক্ষীমুদ্বাহ্য রাজ্যং চক্রুরিতীর্য্যতে॥ (২)

১। হরিং প্রতোষ্য কাং সিদ্ধিমাপুঃ ?

২। হে বার্হস্পত্য ! কস্যাঞ্চিদ্বিদ্যায়াং বৃহস্পতের্মৈত্রেয়ঃ শিষ্য ইতি জ্ঞাতব্যম্। তে যদৃচ্ছয়া গিরিশং প্রাপ্য তস্যৈব কৈবল্যনাথপ্রিয়স্য গিরিশস্য পার্শ্ববর্ত্তিনস্তদনুগৃহীতাঃ সন্তো নূনং পরং মোক্ষং প্রাপুরেব। ততঃ পূর্ব্বন্তু ইহ অথবা পরত্র কিং প্রাপুঃ ?

৩। রুদ্রগীতজপরূপেণ যজ্ঞেন, তপসা চ ; পুরঞ্জনং হরিম্॥

৪। তেষাং কৃচ্ছ্রং তপঃক্লেশং রুচা কান্ত্যা শময়ন্ শান্তেন শুদ্ধসত্ত্বেন বপুষা আবির্ভূতঃ॥

৫—৭। সুপর্ণস্কন্ধমারূঢ় ইত্যাদীনাং বর্হিষ্মতঃ সুতান্ আহেতি তৃতীয়েনান্বয়ঃ। (৬) কনকময়েন বর্ণবতা বিভূষণেন ভ্রাজমানং কপোলং বদনঞ্চ যস্য। অষ্টভিরায়ুধৈঃ ; গরুড় এব কিন্নরঃ, তেন পক্ষস্বনৈর্গীতা কীর্ত্তির্যস্য॥ (৭) পীনাশ্চ তে আয়তা অষ্টৌ ভুজাস্তেষাং মণ্ডলং সমূহঃ, তন্মধ্যে স্থিতয়া লক্ষ্ম্যা স্পর্দ্ধমানা শ্রীঃ শোভা যস্যাস্তয়া বনমালয়া পরিবৃত আদ্যঃ পুরুষ আহ। পর্জ্জন্যস্য নাদ ইব রুতং নাদো যস্যাস্তয়া বাচা। সঘৃণোঽবলোকো যস্য॥

৮। যূয়ং মে মত্তো বৃণীধ্বম্ ; সৌহার্দ্দেন হেতুনাপৃথগ্ধর্ম্মো যেষাং তেষাং সম্বোধনম্। বঃ পরস্পরং সৌহৃদেন তুষ্টোঽহম্॥

৯। ভূতেষু সৌহৃদঞ্চ ভবিষ্যতি॥

১০। তেভ্যো দাস্তে, কিং পুনর্যুষ্মভ্যমিতি শেষঃ ॥

১১। অগ্রহীষ্ট গৃহীতবন্তঃ। অথো ইতি হেতোঃ। লোকাননু লোকেষু ভবিষ্যতি ; যদ্বা, লোকাননুভবিষ্যতি দ্রক্ষ্যতি, ব্যাপ্স্যতীত্যর্থঃ ॥

১২। অনবমঃ—অন্যূনঃ ; আত্মনো বীর্য্যেণ সন্তানেন ॥

১৩—১৫। পুত্রার্থমাদৌ ভার্য্যাং সম্পাদয়তি ভগবান্—কণ্ডোরিতি ত্রিভিঃ। (১৩) তপোনাশার্থমিন্দ্রপ্রেষিতয়া প্রম্লোচয়া কণ্ডুর্নাম ঋষির্বহুকালং রেমে। সা চ ততঃ স্বর্গং গচ্ছন্তী কণ্ডোর্জাতং গর্ভং বৃক্ষেষু ত্যক্ত্বা জগাম। তদেতদুক্তম্। অপবিদ্ধাং ত্যক্তাম্ ॥ (১৪) স প্রসিদ্ধো বনস্পতীনাং রাজা সোমোঽমৃতস্রাবিণীং দেশিনীং তর্জ্জনীং রুদত্যাস্তস্যা মুখে নিদধে। অনেনাপ্সরোগর্ভসম্ভবেনামৃতাহারেণ চ তস্যা লাবণ্যং ক্লমস্বেদদৌর্গন্ধ্যাদি-রাহিত্যঞ্চোক্তম্॥ (১৫) মামনুবর্ত্তমানেন পিত্রা নিযুক্তাঃ সন্তস্তত্র প্রজা-বিসর্গে নিমিত্তে তামুদ্বহত ॥

১৬। ননু বহূনাং কথমেকা ভার্য্যা স্যাৎ? তত্রাহ—অপৃথগ্‌ধর্ম্মঃ শীলং যেষাং তেষাং বঃ পত্নী ভূয়াৎ। অর্পিতো ভবৎসু আশয়ো যয়া। ধর্ম্মশীলয়োরৈক্যান্মদ্বাক্যাচ্চ ন দৃষ্টাদৃষ্টবিরোধ ইতি ভাবঃ ॥

১৭। অহতৌজসোঽপ্রতিহতবলাঃ সন্তঃ ॥

১৮। পক্বগুণো দগ্ধকামাদিমল আশয়ো যেষাম্, অতো লোকদ্বয়-ভোগান্নিরয়প্রায়ান্নির্ব্বিদ্য মৎস্থানং প্রাপ্স্যথ ॥

১৯। ননু গৃহেষু প্রবিষ্টানামস্মাকং তদাসক্ত্যা বন্ধ এব স্যাৎ, কুতস্ত্ব-ভক্তির্নির্ব্বেদো বা? তত্রাহ—গৃহেষ্বিতি। কুশলং ময্যর্পিতং কর্ম্ম যেষাম্, মদ্বার্ত্তয়া যাতো যামো কালো যেষাম্ ॥

২০। ত্বদ্বার্ত্তাশ্রোতৃণাং গৃহৈর্ন বন্ধ ইতি কুতঃ? তত্রাহ—নব্যবদিতি। যদ্‌যস্মাৎ, কথাশ্রবণাৎ জ্ঞঃ সর্ব্বজ্ঞোঽহমীশ্বরো ব্রহ্মবাদিভিঃ প্রবক্তৃভি-র্নিমিত্তভূতৈঃ শ্রোতৃণাং হৃদ্‌হৃদয়ং নব্যবৎ প্রতিপদং নূতনবৎ অয়ে

প্রাপ্নোমি, ব্রহ্মসাক্ষাৎকারো ভবতীত্যর্থঃ। নন্থ ত্বৎকথাশ্রবণে কথং ব্রহ্মসাক্ষাৎকারঃ ? তত্রাহ—যোঽহম্, এতদেব ব্রহ্ম। তত্র হেতুঃ—যতো গতাঃ, যং মাং প্রাপ্তাঃ সন্তো মোহশোকহর্ষান্ ন প্রাপ্নুবন্তি ; অতো মৎকথাশ্রবণেন নব্যবন্মম হৃত্থাবির্ভাবাৎ, অস্যৈব ব্রহ্মসাক্ষাৎকারত্বাদ্গৃহেষু বসতামপি ন বন্ধ ইত্যর্থঃ ॥

২১। পুরুষার্থং ভাজয়তি প্রাপয়তীতি তথা তম্ ॥

২২। বেদৈঃ সকলশ্রেয়ঃসাধনত্বেন নিরূপিতা উদারগুণা আহ্বয়া নামানি চ যস্য ; মনোবচসোর্বেগাদপি পুরোঽগ্রতো জবো বেগো যস্য, মনোবচসোরগোচরায়েত্যর্থঃ। অতএব সর্ব্বেষামক্ষাণাং মার্গৈরগতোঽনবগতোঽধ্বা মার্গো যস্য তস্মৈ তে নমঃ ॥

২৩। স্বনিষ্ঠয়া স্বরূপস্থিত্যা শুদ্ধায়, অতঃ শান্তায় ; মনসি নিমিত্তে সত্যপার্থং ব্যর্থমেব বিলসদ্বিস্ফুরিতং দ্বয়ং যস্মিন্ ; গৃহীতা মায়াগুণৈর্বিগ্রহা ব্রহ্মাদিমূর্ত্তয়ো যেন ॥

২৪। স্বতস্ত্ব বিশুদ্ধসত্ত্বরূপায় ; সংসারং হরতি মেধা জ্ঞানং যস্য, তস্মৈ ॥

২৬। অযুঙ্ক্ষ্মহি—কৃতবন্তো বয়ম্ ॥

২৭। যত্নক্তং বরং বৃণীধ্বমিতি, তন্মনসি নিধায়াহুঃ—রূপমিতি। সমস্তানাং ক্লেশানাং সংক্ষয়ো যস্মাৎ। ন আবিস্কৃতং প্রকটিতম্, অতোঽন্যৎ কিমনুকম্পিতমনুকম্পা ? ইয়মেবাস্মাকং পরমানুকম্পেত্যর্থঃ ॥

২৮। কুতঃ ? ইত্যত আহুঃ—হে অভদ্ররন্ধন ! অমঙ্গলনাশন ! 'ত্ব'-প্রত্যয়োঽত্র ন বিবক্ষিতঃ ; এতাবদেব দীনেষু বৎসলৈঃ প্রভুভির্ভাব্যং কার্য্যম্। কিং তৎ ? তদাহ—যদিতি। অস্মদীয়া এত ইতি বুদ্ধ্যা উচিতে কালেঽনুস্মর্য্যন্ত ইতি যৎ, ত্বয়া তু রূপমপি দর্শিতমিতি ভাবঃ ॥

২৯। যেনানুস্মরণেন স্মৃতানাং তেষামুপশান্তিঃ সুখং ভবতি। কিঞ্চ, ক্ষুল্লকানামপি ভূতানামন্তর্হৃদয়েঽন্তর্হিতোঽন্তর্যামিত্বেন স্থিতো ভবানীহিতামিচ্ছতাং ত্বদুপাসকানাং নোঽস্মাকমাশিষঃ কস্মাদ্ধেতোর্ন বেদ? জানাত্যেবেত্যর্থঃ॥

৩০। তথাপি বক্তব্যং চেৎ, তর্হি যেষামস্মাকং ভগবান্ প্রসন্নঃ, অসাবেব বরঃ, ভবৎপ্রসাদ এবাস্মাকমীপ্সিতো বর ইত্যর্থঃ। অপবর্গগুরুর্মোক্ষমার্গপ্রদর্শকঃ; গতিঃ স্বতশ্চ পুরুষার্থভূতঃ॥

৩১। যদ্যপ্যেবং তথাপি হে নাথ! ত্বৎ ত্বত্তো বরমেকং বৃণীমহে। কথম্ভূতাৎ? পরতঃ কারণাদপি পরাৎ—'অক্ষরাৎ পরতঃ পরঃ' ইতি শ্রুতেঃ। অতো যদ্যপি ত্বং দাতুং সমর্থঃ, ন চ দেয়ানাং ত্বদ্বিভূতীনামন্তোঽস্তি, যতোঽনন্তবিভূতিত্বাদনন্ত ইতি গীয়সে॥

৩২। তথাপি যথা সারঙ্গো ভ্রমরঃ পারিজাতে সুখেন লব্ধে সতি সুলভমপ্যন্যদ্‌বৃক্ষান্তরং ন সেবতে, তথা বয়মপি সাক্ষাত্ত্বদঙ্ঘ্রিমূলং প্রাপ্য কিং কিং বৃণীমহি? ন কিঞ্চিদিত্যর্থঃ। যদ্বা, কিমপ্যন্যত্তুচ্ছং কিমর্থং বৃণীমহি? যদ্বা, যদি বৃণীমহি, তর্হি কিং কিং বৃণীমহি? অনন্তত্বেন মনোরথানামনবস্থানাদিত্যর্থঃ॥

৩৩। অত এতাবদেব প্রার্থয়ামহ ইত্যাহুঃ—যাবদিতি। স্পৃষ্টা ব্যাপ্তাঃ সন্তঃ। ভবতি প্রকৃষ্টঃ সঙ্গো যেষাং তেষাং সঙ্গোঽস্মাকং স্যাৎ॥

৩৪। নন্বু রাজ্যভোগান্ স্বর্গাপবর্গৌ চ বিহায় কিমিদং প্রার্থ্যতে? তত্রাহুঃ—তুলয়ামেতি। ভগবৎসঙ্গিনাং সঙ্গস্য লবেনাপি॥

৩৫—৩৭। সৎসঙ্গস্য শ্রৈষ্ঠ্যং প্রপঞ্চয়তি—যত্রেতি ত্রিভিঃ। (৩৫) যত্র যেষু, যতো যাভ্যঃ কথাভ্যঃ, নির্ব্বৈরং বৈরাভাবঃ, উদ্বেগো ভয়ম্॥ (৩৭) পদ্ভ্যাং পাবনেচ্ছয়া, সংসারাদ্ভীতস্য॥

৩৮। সৎসঙ্গফলমস্মাভিরেবানুভূতমিত্যাহুঃ—বয়স্ত্বিতি। তব যঃ প্রিয়ঃ সখা তস্য ভবস্য। অত্যন্তমচিকিৎস্যস্য ভবস্য জন্মনো মৃত্যোশ্চ ভিষক্তমং সদ্বৈদ্যং ত্বাং গতিং প্রাপ্তাঃ॥

৩৯—৪০। বরান্তরং বৃণতে—যন্ন ইতি দ্বাভ্যাম্। (৩৯) নতাঃ নমস্কৃতাঃ॥ (৪০) নিরন্ধসাং নিরন্নানাম্, অদভ্রং বহুকালম্; তে পরিতোষণায় ভবত্বিতি বৃণীমহে॥

৪১। অজ্ঞানামপ্যস্মাকং ত্বৎস্তুতির্নাযুক্তেত্যাহুঃ—মনুরিতি। যস্য তব মহিম্নো ন দৃষ্টং পারং যৈস্তেঽপি ত্বামাত্মসমং স্বমত্যনুরূপং যথা স্তুবন্তি, অথো অতো বয়মপি গৃণীমঃ॥

৪২। সত্ত্বমূর্ত্তয়ে—বাসুদেবায়॥

৪৩। যানং স্বপ্রয়াণমনিচ্ছতামপি সতাং স্বধাম যযৌ, ভক্তহৃদয়ং বিবেশ। অনপবর্গবীর্য্যঃ—অকুণ্ঠিতপ্রভাবঃ॥

৪৪। উদন্বতঃ সিন্ধোঃ সলিলাৎ, নির্যায় নির্গত্য, গাং স্বর্গং রোদ্ধুমিবোচ্ছ্রিতৈর্দ্রুমৈর্গাং মহীং ছন্নাং বীক্ষ্য দ্রুমেভ্যোঽকুপ্যন্। তদা হি প্রাচীনবর্হিষঃ প্রব্রজিতত্বাদরাজকে কর্ষণাদ্যভাবাদ্দ্রুমৈর্ভূমিশ্ছন্নাভূৎ॥

৪৫। নিরস্তা বীরুধোঽপি যস্যাস্তথাভূতাং কর্ত্তুম্। সংবর্ত্তকঃ কালাগ্নিরুদ্রঃ, অত্যয়ে প্রলয়ে॥

৪৬। নয়ৈঃ—যুক্তিভিঃ॥

৪৭। উজ্জহুঃ—সমর্পয়ামাসুঃ॥

৪৮। মারিষাম্—বার্ক্ষীম্; অজনযোনির্ব্রহ্মা, তস্মাজ্জাতো দক্ষঃ। মহতঃ শ্রীমহাদেবস্যাবজ্ঞানাৎ পূর্ব্বমজনযোনিজো ব্রহ্মপুত্রোঽপি সন্ ক্ষত্রিয়জাতৌ যস্যামজনি জাতঃ॥

৪৯। প্রাক্সর্গে পূর্ব্বদেহে কালেন বিদ্রুতে গতে দৈবেনেশ্বরেণ চোদিতঃ সন্ ইষ্টাঃ প্রজাঃ সসর্জ্জ, স দক্ষ ইতি প্রসিদ্ধঃ॥

৫০। স্বয়া রুচা প্রভয়া তেজ উপাদত্তাচ্ছাদিতবান্। যঞ্চ কর্ম্ম-দাক্ষ্যাদ্দক্ষমব্রুবন্॥

৫১। তমভিষিচ্যানাদির্ব্রহ্মা প্রজাসর্গরক্ষায়াং যুযোজ। স চ দক্ষোঽন্যান্ মরীচ্যাদীংস্তত্তদ্ব্যাপারেষু নিযুক্তবান্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং চতুর্থস্কন্ধে
ত্রিংশোঽধ্যায়ঃ॥ ৩০॥

একত্রিংশোঽধ্যায়ঃ

একত্রিংশে সুতে দক্ষে ধুরং ন্যস্য বনে সতাম্।
নারদোক্তেন মার্গেণ মুক্তিরুক্তা প্রচেতসাম্॥ (১)

১। ততো দিব্যবর্ষসহস্রাণাং সহস্রস্যান্তে উৎপন্নবিবেকজ্ঞানাস্তে 'উপযাস্যথ মদ্ধাম নির্বিদ্য নিরয়াদতঃ' ইত্যধোক্ষজভাষিতং স্মরন্তস্ত্বাশু প্রাব্রজন্॥

২। ব্রহ্মসত্রেণাত্মবিমর্শেন দীক্ষিতাঃ কৃতসঙ্কল্পা বভূবুঃ। সর্ব্বেষু ভূতেষু আত্মেতি মেধা জ্ঞানং যস্মিংস্তেন। ক্ব? বেলায়াং সমুদ্রতটে; জাজলির্নাম ঋষিঃ॥

৩। নির্জ্জিতাঃ প্রাণমনোবচোদৃশো যৈস্তান্; শান্তা উপরতাঃ, সমানা মূলাধারাদারভ্য ঋজবো বিগ্রহা যেষাম্; ব্রহ্মণি যোজিত আত্মা যৈঃ; সুরাসুরৈরীড্যো দৃষ্টবান্॥

৪। উত্থায় প্রণিপত্য যথাদেশং যথাবিধি পূজয়িত্বা॥

৬। আদিষ্টমুপদিষ্টং যদাত্মতত্ত্বম্; ক্ষপিতং বিস্মৃতম্॥

৮। ইতি প্রচেতোভিঃ পৃষ্টঃ ॥

৯—১২। অহো গৃহপ্রসক্ত্যা হরিসেবাং বিনা সর্ব্বং জন্মকর্ম্মাদিকং ব্যর্থীকৃতমিতি তাননুশোচন্নাহ—তজ্জন্মেতি চতুর্ভিঃ। যতো জন্মাদের্হরিসেবৈব ফলম্, অতস্তদ্বিহীনং সর্ব্বং ব্যর্থমিত্যর্থঃ ॥ (১০) শুক্রসম্বন্ধি জন্ম বিশুদ্ধমাতাপিতৃভ্যামুৎপত্তিঃ, সাবিত্রমুপনয়নেন, যাজ্ঞিকং দীক্ষয়া ; বিবুধানামিব দীর্ঘায়ুষাপি ॥ (১১) বচোভির্বাগ্বিলাসৈঃ[১] ; চিত্তবৃত্তিভির্নানাবধানসামর্থ্যৈঃ। ইন্দ্রিয়াণাং রাধসা পাটবেন ॥ (১২) যোগেন প্রাণায়ামাদিনা, সাংখ্যেন দেহাদিব্যতিরিক্তাত্মজ্ঞানমাত্রেণ, সন্ন্যাসবেদাধ্যয়নাভ্যামপি ; অন্যৈরপি ব্রতবৈরাগ্যাদিভিঃ শ্রেয়ঃসাধনৈঃ ॥

১৩। নন্বেষাং নানাফলসাধনানাং হরিসেবাভাবমাত্রেণ কুতো বৈয়র্থ্যম্ ? তত্রাহ—শ্রেয়সাং ফলানামাত্মৈবাবধিঃ পরা কাষ্ঠা। অর্থতঃ পরমার্থতঃ, আত্মার্থত্বেনৈবান্যেষাং প্রিয়ত্বাদিত্যর্থঃ। ভবতু, আত্মাবধিঃ, হরেঃ কিমায়াতম্ ? তত্রাহ—সর্ব্বেষামপীতি। আত্মা, আত্মদশ্চাবিদ্যানিরাসেন স্বরূপাভিব্যঞ্জকঃ, ঐশ্বরেণাপি রূপেণ বলিপ্রভৃতিভ্য ইবাত্মপ্রদঃ, প্রিয়শ্চ, পরমানন্দরূপত্বাৎ ॥

১৪। কিঞ্চ, নানাকর্ম্মভিস্তত্তদ্দেবতাপ্রীতিনিমিত্তান্যপি ফলানি হরেঃ প্রীত্যা ভবন্তি, কেবলং তত্তদ্দেবতারাধনেন তু ন কিঞ্চিদিতি সদৃষ্টান্তমাহ—যথেতি। মূলাৎ প্রথমবিভাগাঃ স্কন্ধাঃ, তদ্বিভাগা ভুজাঃ, তেষামপি উপশাখাঃ, উপলক্ষণমেতৎ, পত্রপুষ্পাদয়োঽপি তৃপ্যন্তি, ন তু মূলসেকং বিনা তাঃ স্বস্বনিষেচনেন। প্রাণস্যোপহারো ভোজনম্ ; তস্মাদেবেন্দ্রিয়াণাং তৃপ্তিঃ, ন তু তত্তদিন্দ্রিয়েষু পৃথক্ পৃথগন্নলেপনেন ; তথা অচ্যুতারাধনমেব সর্ব্বদেবতারাধনম্, ন পৃথগিত্যর্থঃ ॥

১। বাগ্‌বৃত্তিভিঃ (ক)।

১৫। কুতঃ? সর্ব্বমূলত্বাদিতি সদৃষ্টান্তমাহ—যথৈব বারো জলানি বর্ষা-কালে সূর্য্যাদুদ্ভবন্তি, গ্রীষ্মে তস্মিন্নেব প্রবিশন্তি। অস্যাপ্রসিদ্ধত্বেন দৃষ্টান্তা-ন্তরমাহ—যথা ভূতানি ভূমাবিতি। গুণপ্রবাহশ্চেতনাচেতনাত্মকঃ প্রপঞ্চঃ ॥

১৬। নন্বু হরাবেব গুণপ্রবাহ ইত্যুক্তে তদাধারত্বেন সোপাধিকত্বং হরেঃ স্যাদিত্যাশঙ্ক্যাহ—এতদিতি। এতদ্বিশ্বং বিষ্ণোস্তৎ সর্ব্বশাস্ত্রপ্রসিদ্ধং পদম্, পরং সর্ব্বোপাধিরহিতম্, তদুৎপন্নত্বান্ন ততঃ পৃথগিত্যর্থঃ। তর্হি কথ-মন্যথা ভাতি? তত্রাহ—সকৃদিতি। সকৃৎ কদাচিদ্বিভাতং স্ফুরিতং গন্ধর্ব্ব-নগরবৎ। যথা সবিতুঃ প্রভা ন ততো ভিন্না, যথা চ জাগ্রত্যসব ইন্দ্রিয়াণি স্ফুরন্তি, সুষুপ্তৌ তু সুপ্তশক্তয়ো ভবন্তীত্যর্থঃ। কথম্ভূতোঽসৌ হরিঃ? দ্রব্যাদীনাং ত্রিবিধাহঙ্কারকার্য্যাণাং তন্নিমিত্তস্য ভেদভ্রমস্য চাত্যয়ো যস্মাৎ সঃ; যদ্বা, অজাগ্রতি সুষুপ্তাবসবঃ সুপ্তাঃ শক্তয়ো যেষাং তে ভবন্তি, দ্রব্যাদেরপ্যত্যয়ো ভবতি। সবিতুঃ প্রভেত্যুদ্গতৌ দৃষ্টান্ত ইতি ॥

১৭। নন্বসঙ্গে হরৌ কথং প্রপঞ্চোৎপত্তি-লয়ৌ? তত্রাহ—যথেতি। অভ্রতমঃপ্রকাশা আগমাপায়িনো রজস্তমঃসত্ত্বস্থানীয়াঃ। হে ভূপাঃ! প্রচেতসঃ! অমূঃ শক্তয় উদ্ভবন্তি, ন ভবন্তি লীয়ন্তে ইত্যেবময়ং জগৎ-প্রবাহঃ ॥

১৮। তেন সর্ব্বকারণত্বেন হেতুনা; কালো নিমিত্তম্, প্রধানমুপাদানম্, পুরুষঃ কর্ত্তা, এতত্রিতয়াত্মকত্বাৎ সর্ব্বকারণং পরমেশ্বরমদ্ধা সাক্ষাদ্ ভজধ্বম্। কথম্? আত্মন একভাবেনাভিন্নত্বেন ॥

১৯। সাধনমাহ—দয়াদিভিঃ শীঘ্রং তুষ্যতি ॥

২০। ততো ন কদাচিৎ ত্যজতীত্যাহ—অপহতা নিরস্তাঃ সকলা এষণা যস্মাৎ, স চাসাবমল আত্মা মনস্তস্মিন্ সতাং মনসি নিরন্তরং সমেধিতয়া[১] ভাবনয়োপহূতঃ সন্নিধাপিতঃ সন্নক্ষরো হরিশ্ছিদ্রবত্তত্রত্যা-

১। সেবিতয়া (ক)।

কাশবত্ত্বতো ন সরতি, নাপযাতি হি। কিং কুর্ব্বন্? আত্মনো নিজজন-বশগত্বং স্বভক্তাধীনত্বময়ন্নবগচ্ছন্॥

২১। সতামেব বশ্যোঽসৌ, অসতাস্তু পূজামপি ন গৃহ্নাতীত্যাহ—নেতি। কুমনীষিণাম্—কুৎসিতমতীনাম। অধনাশ্চ তে আত্মধনাশ্চ ভগবদ্ধনাঃ, তে প্রিয়া যস্য; রসজ্ঞঃ—ভক্তিসুখজ্ঞঃ। কে কুমনীষিণঃ? তানাহ—শ্রুতাদিনিমিত্তৈর্মদৈর্যে সৎসু পাপং তিরস্কারং কুর্ব্বন্তি॥

২২। ভক্তাধীনত্বং প্রপঞ্চয়ন্নাহ—অনুবর্ত্তমানামপি শ্রিয়ম্, তদর্থিনঃ সকামান্, দ্বিপদপতীন্নরেন্দ্রান্, বিবুধান্ দেবানপি যো নানুবর্ত্ততে। যতঃ স্বেনৈব পূর্ণঃ, অতঃ স্বভৃত্যবর্গানুরক্ত এব। এবম্ভূতমমুম্ উৎ ঈষদপি কথং পরিত্যজেৎ॥

২৩। প্রচেতসঃ কর্ম্মভূতানন্যাশ্চ নূনং সুনীতেরিত্যাদি-ধ্রুবচরিতাখ্যাঃ, সত্রেঽগায়ৎ প্রচেতসামিত্যুক্তত্বাৎ॥

২৪। তেঽপি প্রচেতসঃ; তদ্গতিং বিষ্ণুলোকম্॥

২৫। প্রচেতসাং নারদস্য সংবাদরূপমেতদাখ্যানং তেঽভিহিতম্; হরেঃ কীর্ত্তনং যস্মিংস্তৎ॥

২৬। য এষ বংশঃ, সোঽনুবর্ণিতঃ॥

২৭। যঃ—প্রিয়ব্রতঃ॥

৩০। স্বান্ জ্ঞাতীন্ দিদৃক্ষুঃ॥

৩১। রাজ্ঞাং চরিতমিতি শেষঃ॥

চতুর্থেঽত্র চতুথার্থসাধনাদন্যদস্তি ন।

সতীধ্রুবাদিচরিতে পুরঞ্জনকথামৃতে॥ (২)

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং শ্রীধরস্বামিবিরচিতায়াং

চতুর্থস্কন্ধটীকায়ামেকত্রিংশোঽধ্যায়ঃ॥ ৩১॥

চতুর্থস্কন্ধঃ সম্পুর্ণঃ।

পঞ্চমঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

* অথাতঃ পঞ্চমস্কন্ধ-ব্যাখ্যানেকবিশেষবান্।
প্রিয়ব্রতান্বয়ো যত্র সপ্রপঞ্চঃ প্রপঞ্চ্যতে॥ (১)
ষড়্বিংশত্যধুনাধ্যায়ৈঃ পঞ্চমে স্থানমীর্য্যতে।
লোকদ্বীপাদিমর্য্যাদা-পালনাখ্যমনেকধা॥ (২)
পৃথিব্যুপর্য্যধো লোকৈর্ম্মর্য্যাদা ত্রিবিধা মতা।
পুনশ্চৈকৈকশস্তেষু মর্য্যাদা বহুধা মতা॥ (৩)
ভুবি দ্বীপাদিমর্য্যাদাঃ পাল্যন্তে রাজভিঃ পৃথক্।
ভূমেরুপরি দেবাদ্যৈস্ততশ্চাধোঽসুরাদিভিঃ॥ (৪)
তত্রাধ্যায়ৈস্তু বিংশত্যা প্রিয়ব্রতপুরঃসরৈঃ।
ভুবি দ্বীপাদিমর্য্যাদাঃ পালিতা ইতি বর্ণ্যতে॥ (৫)
ত্রিভিঃ সূর্য্যাদিভির্জ্যোতিশ্চক্রাদিস্থিতি কীর্ত্ত্যতে।
অতলাদিষু দৈত্যাদ্যৈঃ পালনঞ্চ ততস্ত্রিভিঃ॥ (৬)
তত্র তু প্রথমেঽধ্যায়ে জ্ঞানিনো রাজ্যনির্বৃতিঃ।
পুনশ্চ জ্ঞাননিষ্ঠেতি প্রিয়ব্রতকথাদ্ভুতা॥ (৭)

১। 'বংশং প্রিয়ব্রতস্যাপি নিবোধ নৃপসত্তম। যো নারদাদাত্মবিদ্যা-মধিগম্য পুনর্মহীম্॥ ভুক্ত্বা বিভজ্য পুত্রেভ্য ঐশ্বরং সমগাৎ পদম্' ইতি পূর্ব্বস্কন্ধান্তে প্রিয়ব্রতস্য প্রথমমাত্মবিদ্যা, ততো গৃহাশ্রমঃ, ততঃ সর্ব্ব-সঙ্গত্যাগেন মোক্ষ ইত্যুক্তম্। তত্র বিস্মিতঃ পৃচ্ছতি—প্রিয়ব্রত ইতি।

---

* উল্লিখিতানাং শ্লোকানামুপরি 'ঘ'-গ্রন্থে 'নমঃ শ্রীমৎপরমহংসাস্বাদিত-চরণ-কমল-চিন্মকরন্দায় ভক্তজনমানসনিবাসায় শ্রীরামায়।' ইত্যধিকঃ পাঠো দৃশ্যতে।

ভাগবতোঽতএবাত্মারামো গৃহে কথমরমত? ননু রমতাং কো দোষ ইতি চেৎ, অত আহ—কর্ম্মণা বন্ধঃ পরাভবশ্চ স্বরূপতিরস্কারো যন্মূলো ভবতি, যদ্গৃহং মূলং কারণং যস্য ॥

২। গৃহেষু রতিশ্চ তত্রাভিনিবেশাৎ স্যাৎ, স চ ভাগবতানামাত্মারামাণাং ন সম্ভবতীত্যাহ—ন নূনমিতি ॥

৩। গৃহাসক্তির্হি কুটুম্বাদিস্পৃহয়া ভবতি, সা চ তেষাং নাস্তীত্যাহ—মহতামিতি। উত্তমঃশ্লোকপাদয়োশ্ছায়া কামাদিসন্তাপহারিণী, তয়া নির্ব্বৃতং চিত্তং যেষাং তেষাং স্পৃহাযুক্তা মতির্নাস্তি ॥

৪। দারাদ্যাসক্তস্য তু মোক্ষঃ, শ্রীকৃষ্ণেঽস্খলিতা মতিশ্চাভূদিতি যৎ, অয়ঞ্চ মহান্ সংশয় ইত্যাহ—সংশয় ইতি ॥

৫। অঙ্গীকৃত্য পরিহরতি—বাঢ়মিতি ; বাঢ়মভিনিবেশাদিকং নাস্তীতি সত্যমেব, তথাপি বিঘ্নবশেন তেষাং প্রবৃত্তিঃ, পূর্ব্বাভ্যাসবলেন পুনর্নিবৃত্তিশ্চ সঙ্গচ্ছত ইত্যাহ—ভগবতঃ শ্রীমচ্চরণারবিন্দমকরন্দরূপো যো রসস্তস্মিন্নাবেশিতং চেতো যৈস্তেঽপি কেনচিদন্তরায়েণ বিঘ্নেন বিহতামপি স্বাং শিবতমাং পদবীং মার্গং ন হিন্বন্তি, ন ত্যজন্তি। কাম্? ভাগবতা এব পরমহংসাস্তেষাং দয়িতস্য প্রিয়স্য শ্রীবাসুদেবস্য কথাম্ ॥

৬। প্রিয়ব্রতস্য ব্রহ্মাজ্ঞৈ[১]বান্তরায়রূপা বভূবেতি সপ্রসঙ্গমাহ—যর্হীত্যাদিনা বিমুক্তসঙ্গঃ প্রকৃতিং ভজস্বেত্যন্তেন। যর্হি বাব হ যদা হি ; বাবেতি প্রসিদ্ধ্যাদৌ হ ইতি চ। স স্বপিত্রা মনুনা অবনিতলপরিপালনায়োপামন্ত্রিতো নিযুক্তো নৈবাভ্যনন্দন্নৈচ্ছৎ। অথ হ তদৈব ভগবানাদিদেবো ব্রহ্মা স্বভবনাদবততারেত্যন্বয়ঃ। উপামন্ত্রণে হেতুঃ—আম্নাতা রাজ্ঞাং শাস্ত্রেণোক্তা যে প্রবরাঃ শ্রেষ্ঠা গুণাস্তেষাং গণস্যৈকান্তভাজনতয়া নিয়তাশ্রয়ত্বেন। অনিচ্ছায়াং হেতুঃ—পরমার্থ-সতত্ত্বমাত্মযাথাত্ম্যমবগতং তদ্

১। ব্রহ্মার্থে- (গ)।

যেন স তথা ; অতো ব্রহ্মসত্রেণাত্মধ্যানেন[1] কার্য্যেণ দীক্ষিষ্যমাণো নিয়মং গ্রহীষ্যন্, প্রাগপি বাসুদেব এব নিরন্তরেণ সমাধিযোগেন চিত্তৈকাগ্র্যেণ সমাবেশিতঃ সমর্পিতঃ সকলানাং কারকানামিন্দ্রিয়াণাং যাঃ ক্রিয়াস্তাসাং কলাপো যেন সঃ। যদ্যপি তৎ পিত্রোক্তং ন প্রত্যাখ্যেয়ম্, তথাপি তদধিকরণে রাজ্যাধিকারেঽসতোঽপি মিথ্যাভূতাদপি রাজ্যপ্রপঞ্চাদাত্মনঃ পরাভবমালোচয়ন্নাভ্যনন্দৎ ॥

৭। গুণবিসর্গস্য গুণসৃষ্টেঃ পরিবৃংহণং সমৃদ্ধিঃ, তদনুচিন্তয়া ব্যবসিতঃ সকলজগতামভিপ্রায়ো যেন সঃ ; যথা রাজ্ঞা চারৈর্মণ্ডলেশ্বরাণামভিপ্রায়ো নিশ্চীয়তে, তদ্বৎ ; অখিলৈর্নিগমৈর্মূর্ত্তিমদ্ভির্বেদৈর্নিজগণৈশ্চ মরীচ্যাদিভিশ্চ পরিবৃতঃ সত্যলোকাদবতীর্ণঃ ॥

৮। স চ ব্রহ্মা তত্র তত্রোড়ুপতিশ্চন্দ্র ইব প্রকাশমানো গন্ধমাদনস্য দ্রোণীং দরীমবভাসয়ন্নুপসসর্পেত্যন্বয়ঃ। অমরপরিবৃঢ়ৈর্দেবেন্দ্রাদিভিঃ ॥

৯। হংসযানেনোপলক্ষণেনৈনং পিতরমুপলভমানো 'মৎপিতায়ম্' ইতি লক্ষয়ন্ পিতাপুত্রাভ্যাং মনু-প্রিয়ব্রতাভ্যাং সহ নারদঃ কৃতাঞ্জলিঃ সন্ সহসৈবাভ্যুত্থায়ার্হণেন পূজয়া সহোপতস্থে তুষ্টাব। প্রিয়ব্রতং তদা মন্দর-দ্রোণ্যামাত্মবিদ্যাং নারদ উপদিশতি, মনুশ্চ তং নেতুমাগতোঽস্তীতি জ্ঞাতব্যম্ ॥

১০। হে ভারত! ভগবানাদিপুরুষো ব্রহ্মাপি তং প্রিয়ব্রতমিতি হোবাচেত্যন্বয়ঃ। তেন নারদেনোপনীতমর্হণং যস্য সঃ ; সূক্তবাক্যেন যথোচিতবাক্যেন, অতিশয়েনোদিতা বর্ণিতা গুণগণা অবতারাঃ সুজয়াঃ সর্ব্বোৎকর্ষাশ্চ যস্য ॥

১১—১৯। প্রবৃত্তিনিষ্ঠং মদ্বাক্যং প্রতিকূলং মত্বা মযাসূয়াং করিষ্যতীতি শঙ্কমানো নাহমেবং বদামি, কিন্তু মন্মুখেন হরিরেব ত্বামাজ্ঞাপয়তীতি বদন্

১। অধ্যাত্মধ্যানেন (ক)।

প্রবৃত্তি-নিবৃত্তিরহস্যমাহ—নিবোধেতি নবভিঃ। (১১) ঋতম্—সত্যম্, অপ্রমেয়ং দেবমনস্থয়িতুং দোষারোপেণ দ্রষ্টুং নার্হসি। তে তব ততস্তাত এষ ত্বদ্গুরুশ্চ মহর্ষিঃ। দিষ্টমাদিষ্টমাজ্ঞাং বিবশা অস্বতন্ত্রাঃ সন্তো বহামঃ॥ (১২—১৫) বিবশত্বমেবাহ চতুর্ভিঃ। (১২) নেতি, তস্য কৃতং তেন নির্ম্মিতং তনুভৃজ্জীবস্তপআদিভির্বিহন্তুমন্যথাকর্ত্তুং ন বিভূয়াৎ প্রভুর্ন ভবেৎ। মনীষয়া সামাদিবুদ্ধিবলেন; পরতো বলবদাশ্রয়াৎ॥ (১৩) তত্র দেহযোগে তাবৎ পারতন্ত্র্যং প্রসিদ্ধমিত্যাহ—ভবায়েতি, ভবো জন্ম। ভবাদ্যর্থমব্যক্তেনেশ্বরেণ দিষ্টং দত্তং দেহযোগং জনতা জীবসমূহঃ সদা ধত্তে, ন ত্বন্যথাকর্ত্তুং শক্নোতি। অঙ্গ! হে প্রিয়ব্রত॥ (১৪) কর্ম্ম-করণেঽপি পারতন্ত্র্যমাহ—যদ্বাচীতি, যস্য বাচি বেদলক্ষণায়াং তন্ত্র্যাং দামন্যাং গুণাঃ সত্ত্বাদয়স্তৎপূর্ব্বকাণি চ যানি কর্ম্মাণি, তন্নিবন্ধনৈর্দামভি-র্ব্রাহ্মণাদিশব্দৈঃ সুদুস্তরৈঃ সুদৃঢ়ৈঃ, হে বৎস! বয়ং সর্ব্বে সুযোজিতা নিবদ্ধাঃ সন্তস্তস্মা ঈশ্বরায় বলিং বহামস্তদিচ্ছয়া কর্ম্ম কুর্ম্মঃ। নসি নাসিকায়াং প্রোতা বদ্ধাঃ সন্তশ্চতুষ্পদো বলীবর্দ্দা যথা, দ্বিপদে পুরুষায়॥ (১৫) ভোগেষু পারতন্ত্র্যমাহ—ঈশেতি, ঈশা ঈশ্বরেণাভিসৃষ্টং দত্তমেব। অঙ্গ! হে প্রিয়ব্রত! অবরুন্ধ্মহে স্বীকুর্ম্মঃ, যথা স্বামিনা দত্তমেব কণিশাদি বলীবর্দ্দা ভক্ষয়ন্তি, ন স্বেচ্ছয়া, তদ্বৎ। ন চৈবং বৈষম্যমীশ্বরস্য, যতো গুণকর্ম্মসঙ্গান্নাথো যদ্যদ্দেবতির্য্যগাদিলক্ষণং দেহমযুঙ্ক্ত যোজিত-বাংস্তত্তদাস্থায় স্বীকৃত্য, যথা অন্ধাশ্চক্ষুষ্মতা ছায়ামাতপং বা নীয়মানাঃ সন্তস্তত্রৈব গচ্ছন্তি, তদ্বৎ॥ (১৬) নন্বেতৎ সর্ব্বমবিদুষ এব, ন তু আত্মবিদ ইত্যাশঙ্ক্যাহ—মুক্তোঽপীতি। যাবৎ প্রারব্ধং কর্ম্ম, তাবদ্-যথা স্বপ্নেঽনুভূতং প্রতিযাতনিদ্রো গতনিদ্রোঽভিমানশূন্য এবানুস্মরতি, তর্হি ভোগবাসনয়া পুনর্জ্জন্ম ভবেত্তত্রাহ—কিন্তু দেহান্তরারম্ভকান্ গুণান্ কর্ম্মাণি বাসনাশ্চ ন বৃঙ্ক্তে, ন সন্তজতে॥ (১৭) নন্বু গৃহে বর্ত্তমানস্য

ভোগান্ ভুঞ্জানস্য কুতোঽভিমানাভাবো মোক্ষো বা ? অতস্তত্ত্যাগেন বনবাস এব যুক্তঃ, তত্রাহ—ভয়মিতি, ভয়ং সংসারঃ স্যাদেব, প্রমত্তস্যাজিতেন্দ্রিয়স্য, বনেষ্বিতি সঙ্গভিয়া বনাদ্বনান্তরং গচ্ছতোঽপীত্যর্থঃ। সহৈব ষট্ সপত্নাঃ শত্রবো মনোবুদ্ধীন্দ্রিয়াণি চ যস্য স তথাভূত এব বনেষ্বপি যত আস্তে। বুধস্ত্বেন জিতেন্দ্রিয়ত্বাদাত্মরতেরাত্মারামস্যাবস্থং রাগাদিদোষং কিং নু করোতি ? ন করোত্যেব ॥ (১৮) ননু গৃহে বসতঃ পুরুষস্য রাগাদয়ঃ সম্ভবন্তি, ন তু বন ইত্যাশঙ্ক্যাহ—য ইতি। যঃ ষড়্বৈরিণঃ ষড়িন্দ্রিয়াণি বিজিগীষমাণঃ, স পূর্ব্বং গৃহেষু স্থিত্বা তেষামত্যন্তং নিরোধমকুর্ব্বন্ জেতুং যতেত। ক্ষীণেষ্বরিষু কামং গৃহেঽন্যত্র বা বিচরেৎ, যতো লোকে উর্জ্জিতারীন্ দুর্গাশ্রিত এবাত্যেতি জয়তি, পশ্চাদ্দুর্গে বান্যত্র বা বর্ত্তেত ; যুধ্যেতেতি পাঠে প্রহরেদিত্যর্থঃ ॥ (১৯) এতচ্চ গৃহদুর্গাশ্রয়ণং প্রাকৃতানাম্, ত্বন্তু জনাভস্যাঙ্ঘ্রিসরোজকোশ এব দুর্গং তদাশ্রিতঃ, অতএব নির্জ্জিতষট্সপত্নশ্চ, তথাপি পুরুষেণেশ্বরেণাতিদিষ্টান্ দত্তান্ ভোগাংস্তাবদ্ভুঙ্ক্ষ্ব, পশ্চাদ্বিমুক্তসঙ্গঃ সন্ প্রকৃতিং স্বরূপং ভজস্ব, আত্মনিষ্ঠো ভবেত্যর্থঃ॥

২০। আত্মনস্ততো লঘুতয়াল্পতয়া তচ্ছাসনমঙ্গীচকার ; বদ্বা, আত্মনো যদনুশাসনং তদলঘুতয়া গৌরবেণ 'বাঢ়ং তথা করিষ্যামি' ইত্যবনতকন্ধরঃ সন্ জগ্রাহ ॥

২১। মনুনা সন্তুষ্টেনোপকল্পিতা পূজা যস্য, প্রিয়ব্রতস্য যোগভ্রংশান্নারদস্য চ শিষ্যনাশাৎ কুটিলমীক্ষণং সম্ভবতি, তত্তু নাস্তীত্যাহ—অবিষমং যথা ভবতি তথা তয়োরভিসমীক্ষমাণয়োঃ সতোরাত্মনঃ সম্যগবস্থানং যস্মিন্নবাঙ্মনসং বাঙ্মনসয়োরবিষয়ং ক্ষয়ং নিবাসং জগাম। 'অবাঙ্মনসঃ ক্ষয়ম্' ইতি পাঠে অবাগ্ বাচামগোচরং কথঞ্চিন্মনসঃ ক্ষয়ং বিষয়ম্, অতোঽব্যবহৃতং ব্যবহারশূন্যং ব্রহ্ম নিবৃত্তং প্রবর্ত্তয়ন্, ব্যবহারাদ্বিষণ্ণঃ সন্ ব্যবহারাতীতং স্বরূপং চিন্তয়ন্নন্তর্হিত ইত্যর্থঃ ॥

২২। পুত্রং রাজ্যেঽভিষিচ্য বনং যাস্যামীত্যেবং যো মনোরথঃ, স পরেণ ব্রহ্মণৈব প্রতিসন্ধিতঃ সম্পাদিতো যস্য সঃ, নারদস্যানুমতেন রাজ্যে স্থাপয়িত্বা, অতিবিষমো দুস্তরো যো বিষয়বিষজলাশয়ো গৃহম্, তস্য আশা দিক্ প্রবৃত্তির্ব্বাসনা ভোগেচ্ছা বা তস্যা উপরতোঽভূৎ॥

২৩। যৎ পৃষ্টং গৃহে কথমরমতেতি, তত্রোক্তমুত্তরমুপসংহরতি—ইতি হ বাব ইত্থমেব হি। অধিনিবেশিতঃ প্রাপিতঃ কর্ম্মাধিকারো যস্য ; অখিলস্য জগতো বন্ধধ্বংসনঃ পরোঽনুভাবো যস্য তস্য যদঙ্ঘ্রিযুগলং তস্যানবরতং ধ্যানং তদনুভাবেন পরিরন্ধিতকষায়ো দগ্ধরাগাদিমল আশয়ো যস্য, অতোঽবদাতঃ শুদ্ধোঽপি মহতাং ব্রহ্মাদীনামাজ্ঞাপালনেন মানবর্দ্ধনঃ॥

২৪। 'উ' ইতি বিস্ময়ে, 'হ' ইতি প্রসিদ্ধৌ, 'বাব' ইতি নিশ্চয়ে। আত্মনঃ সমানৈঃ শীলাদিভিরুদারান্ মহতো দশ পুত্রান্ জনয়ামাস॥

২৫। তানাহ—আগ্নীধ্রঃ, ইধ্মজিহ্বঃ, যজ্ঞবাহুঃ, মহাবীরঃ, হিরণ্যরেতাঃ, ঘৃতপৃষ্ঠঃ, সবনঃ, মেধাতিথিঃ, বীতিহোত্রঃ, কবিশ্চেত্যগ্নীনাং নামানি যেষাং তে॥

২৬। অর্ভভাবাৎ—বাল্যাদারভ্য॥

২৭। তস্মিন্ পারমহংস্যাশ্রমে শ্রীমচ্চরণারবিন্দয়োরবিরতস্মরণেনাবিগলিতোঽখণ্ডিতো যঃ পরমো ভক্তিযোগস্তস্যানুভাবেন বিশোধিতান্তঃকরণে প্রতীতো যো ভগবান্, তস্মিন্নাত্মনস্ত্বংপদার্থস্য তাদাত্ম্যমবিশেষেণ, বিশেষো দেহাদ্যুপাধিস্তদপোহেন প্রাপুঃ॥

২৯। উপশমাশ্রয়েষু তেষু সৎসু, দশকোটিভিরেকমর্ব্বুদম্, এতাদৃশানি বর্ষাণামেকাদশার্ব্বুদানি জগতীং বুভুজ ইত্যন্বয়ঃ। রাজ্ঞো ধর্ম্মপালনবিষয়ভোগপ্রভাবৈর্ভাব্যম্। তত্রানায়াসেনৈব ধর্ম্মপালনমাহ—অব্যাহতা অখিলাঃ পুরুষকারাঃ পৌরুষাণি যস্মাত্তেন সারেণ বলেন সংভৃতৌ পূর্ণৌ দোর্দ্দণ্ডৌ, তয়োর্যুগলং তেনাপীড়িত আকৃষ্টো মৌর্ব্বীগুণস্তস্য স্তনিতং টঙ্কারস্তেনৈব যুদ্ধং বিনা বিরমিতা নিরস্তা ধর্ম্মপ্রতিপক্ষা যেন।

ভোগাতিশয়মাহ—বর্হিষ্মত্যাঃ স্বভার্য্যায়া অনুদিনমেধমানৈঃ প্রমোদাদিভিঃ পরাভূয়মানবিবেক ইব, অতএব বিষয়াসক্ত্যাত্মানমনববুধ্যমান ইব বুভুজে। তত্র প্রমোদ আয়ান্তং পতিং দৃষ্ট্বা হর্ষস্ততঃ প্রসরণমভ্যুত্থানাদিলীলা, ততো যৌষিণ্যং যোষিৎস্বভাবকৃতং শৃঙ্গারানুভাবপ্রকাশনম্, ততো ব্রীড়য়া প্রমুষিতাঃ সঙ্কুচিতা হাসাবলোকাস্ততো রুচিরক্ষ্বেল্যাদয়ঃ পরিহাস-বাক্যাদীনি, তৈঃ॥

৩০। প্রভাবাতিশয়মাহ— যাবদ্বসুধাতলং লোকালোকপর্য্যন্তমব-ভাসয়তি, মেরুং প্রদক্ষিণীকুর্ব্বন্নাদিত্যস্তস্মিন্নর্দ্ধেনৈবোপলক্ষিতং প্রতপতি, প্রকাশয়তি, অর্দ্ধেন চাচ্ছাদয়তি তমসাবৃণোতি, তদা দ্বিতীয়ঃ পতঙ্গঃ সূর্য্য ইব পর্য্যক্রামৎ। ন চেদমসম্ভাবিতম্, যতো ভগবদুপাসনেনোপচিতো-ঽতিপুরুষঃ পুরুষানতিক্রান্তঃ প্রভাবো যস্য॥

৩১। যে বৈ উহ অতিপ্রসিদ্ধাস্তস্য রথচক্রাগ্রকৃতাঃ পরিখাতা গর্ত্তাঃ, যতো যৈরেব কৃতাঃ॥

৩২। তানাহ—জম্বি্বতি। তেষাং পরিমাণং শৃণ্বিতি শেষঃ। পূর্ব্বস্য যদ্বিস্তারমানমুত্তরস্ততো দ্বিগুণেন বিস্তারমানেনেত্যেবং সিন্ধুভ্যো বহিঃ সমন্তত উপকৢপ্তা রচিতাঃ॥

৩৩। যথা সিন্ধুভ্যো বহিরেকৈকশো দ্বীপাঃ, এবং দ্বীপানামপি বহিঃ সিন্ধব ইত্যাহ—ক্ষারোদেতি। দধিমণ্ডো মথিতং দধি; এতে সপ্ত জলধয়ঃ সপ্তদ্বীপানাং পরিখা ইব, অভ্যন্তরে তৈঃ সংবেষ্টিতা যে দ্বীপাস্তৈঃ সমানা বিস্তারতঃ। বহির্নান্তঃ, পৃথগসঙ্কীর্ণতয়া॥

৩৫। অহো আশ্চর্য্যম্, রাজ্ঞঃ সামর্থ্যমিতি পরীক্ষিদভিপ্রায়জ্ঞো ভগবান্ বাদরায়ণিরাহ—নৈবমিতি। জিতাঃ ষড়্গুণা ইন্দ্রিয়াণি ষড়ূর্ম্ময়ো বা যৈস্তেষাম্, এবংবিধঃ পুরুষকার ইতি ন চিত্রং নাসম্ভাবিতম্, যতো বিদূরবিগতোঽন্ত্যজোঽপি যস্যোরুবিক্রমস্য নাম সকৃদুচ্চারয়েদ্ যঃ সোঽধুনা তৎক্ষণমেব বন্ধং সংসারম্; তন্বমিতি পাঠেঽপ্যয়মেবার্থঃ। তত্ত্বমিতি পাঠে চাণ্ডালত্বং জহাতি, শুদ্ধো ভবতীত্যর্থঃ॥

৩৬। তস্য পরাক্রমমুপসংহরন্নিবৃত্তিক্রমমাহ—স এবমিতি। দেবর্ষি-চরণয়োরনুশয়নমুপসত্তিস্তদনুপতিতো যো গুণবিসর্গো রাজ্যাদিপ্রপঞ্চস্তৎ-সংসর্গেণ। আত্মনি মনসি নির্ব্বেদো যস্য ॥

৩৭। তমাহ—ময়াসাধ্বনুষ্ঠিতম্। যদ্ যতোঽভিনিবেশিতঃ, তৎ ততোঽলমলং বিষয়ৈঃ। বিনোদমৃগম্—মর্কটম্ ॥

৩৮। পরদেবতায়া হরেঃ প্রসাদেনাধিগতঃ প্রাপ্তো য আত্মপ্রত্যব-মর্শো বিবেকস্তেন নারদস্য পদবীং তদুপদিষ্টমার্গমেব পুনরনুসসারেত্যন্বয়ঃ। কিং কৃত্বা? অনুগতেভ্যঃ, স্বপুত্রেভ্যঃ ইমাং পৃথ্বীং বিভজ্য, ভুক্তো ভোগো যস্যাস্তাং ভার্য্যাম্, মহাবিভূতিঃ সাম্রাজ্যসম্পৎ, তৎসহিতাং মহিষীং মৃতশরীরমিব পরিত্যজ্য। তত্র হেতুঃ—হৃদি নিহিতো নির্ব্বেদো যেন, হৃদীত্যস্যোত্তরত্রাপ্যন্বয়ঃ, হৃদি গৃহীতাশ্চন্তিতো[১] হরিবিহারস্তেনানুভাব-স্ত্যাগসামর্থ্যং যস্য ॥

৩৯। তস্য মহিমোপনিবন্ধনশ্লোকাঃ পূর্ব্বসিদ্ধাঃ কথ্যন্তে, যথা বেদে তদপ্যেষ শ্লোকো ভবতীতি। কো নু কো নাম কুর্য্যাৎ? ছায়াং ঘ্নন্ তমো নিরস্যন্ ॥

৪০। ভূসংস্থানং দ্বীপৈঃ কৃতম্। সরিদ্গিরিবনাদিভিঃ সীমা চ যেন কৃতা। ভূতানাং নির্ব্বৃত্যৈ সুখায়াবিবাদায় ॥

৪১। ভৌমং পাতালজম্, দিব্যং স্বর্গজম্, মানুষং মর্ত্ত্যলোকজং মহিত্বং বৈভবং যো নিরয়তুল্যং মেনে। পুরুষানুজনা বিষ্ণুভক্তাস্ত এব প্রিয়া যস্যেতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে

প্রথমোঽধ্যায়ঃ ॥ ১ ॥

১। গৃহীতো নিশ্চিতো (ঘ)।

দ্বিতীয়োঽধ্যায়ঃ

দ্বিতীয়ে প্রোক্তমাগ্নীধ্র-চরিত্রং স্ত্রৈণ-সম্মতম্[১]।
পত্ন্যাং হি পূর্ব্বচিত্ত্যাং যো নাভিমুখ্যানজীজনৎ ॥ (১)
অস্মিন্ বংশে প্রসিদ্ধোঽয়মাগ্নীধ্রঃ স্ত্রৈণপুঙ্গবঃ।
বিহসন্নিব তস্যেদং চরিতং মুনিরব্রবীৎ ॥ (২)

১। জম্বুদ্বীপমোকো যাসাং তাঃ প্রজাঃ পুত্রবৎ পালয়ামাস। ধর্ম্মাবেক্ষমাণো ধর্ম্মমবেক্ষমাণঃ, ধর্ম্মেণেত্যর্থঃ ॥

২। পিতৃলোককামঃ পুত্রকামঃ; সুরবরাণাং বনিতাস্তাসামাক্রীড়াচলো মন্দরস্তস্য দ্রোণ্যামাভৃতানি সম্পাদিতানি পরিচর্য্যোপকরণানি পুষ্পাদীনি যেন ॥

৩। তদুপলভ্য জ্ঞাত্বা, ব্রহ্মাভিযাপয়ামাস সম্ভোগার্থং প্রস্থাপয়ামাস ॥

৪। সা চ তদাশ্রমোপবনমুপবভ্রামেত্যন্বয়ঃ। রমণীয়ত্বমেবাহ—বিবিধাশ্চ নিবিড়াশ্চ যে বিটপিনস্তেষাং বিটপাঃ শাখাস্তেষাং নিকরাস্তৈঃ সংশ্লিষ্টাঃ পুরটলতাঃ স্বর্ণবল্ল্যস্তাস্বারূঢ়াঃ স্থলবিহঙ্গমা ময়ূরাদয়স্তেষাং মিথুনৈঃ প্রোচ্যমানাভিঃ শ্রুতিভিরুচ্চার্য্যমাণৈঃ ষড়্জাদিস্বরৈঃ প্রতিবোধ্যমানা যে সলিলকুক্কুটাদয়স্তৈর্বিচিত্রং যথা তথোপকূজিতা নাদিতা অমলা জলাশয়াস্তেষু কমলানি, তেষামাকরমুপবনম্ ॥

৫। সুললিতে গমনে যে পদবিন্যাসাস্তৈর্গতৌ বিলাসো যস্যাঃ। চকারস্তস্যাশ্চেত্যেকবাক্যত্বায়। অনুপদং প্রতিপদং খণখণেতি ধ্বনিং কুর্ব্বতো রুচিরস্য চরণাভরণস্য স্বনম্। আমীলিতে নয়ন এব নলিনমুকুলে, তয়োর্যুগলমীষদ্বিকচয্য কিঞ্চিদুন্মীল্য ব্যচষ্ট দদর্শ ॥

৬। তামেব দেবীং মকরধ্বজস্য বশমুপনীতঃ সন্ জড়বদিতি হ বক্ষ্যমাণান্ দশ শ্লোকানুবাচ। জাড্যানুকরণঞ্চ বৈদগ্ধ্যেন তদ্বশীকরণার্থম্। দিবিজানাং দেবানাং মনুজানাঞ্চ যানি মনাংসি নয়নানি চ তেষামাহ্লাদদুঘৈর্গত্যাদিভির্গুণাং মনসি কামস্য বিবরং প্রবেশদ্বারং বিদধতীম্;

১। -সংযুতম্ (গ)।

গতিশ্চ বিহারশ্চ ব্রীড়াবিনয়যুক্তোঽবলোকশ্চ সুস্বরাণ্যক্ষরাণি চাবয়বাশ্চ নেত্রাদয়স্তৈঃ। নিজমুখাদ্‌বিগলিতমমৃতমিব স্বাদু, আসব ইব মাদকঞ্চ যৎ সহাসং ভাষণং তস্মিন্নামোদো নিশ্বাসগন্ধস্তেন মদান্ধা যে মধুকরনিকরাস্তৈরুপরোধ আবরণং তেন ভয়াদ্‌দ্রুতঃ শীঘ্রো যঃ পদবিন্যাসস্তেন বল্গু স্পন্দনং কিঞ্চিচ্চলনং স্তনকলসয়োঃ কবরভারে রশনায়াঞ্চ যস্যাস্তাম্; তস্যাবলোকনেন বিবৃতাবসরস্য দত্তাবকাশস্য[১] ॥

৭। কা ত্বম্? শৈলে গিরাবস্মিন্ কিং চিকীর্ষসি? মুনিবর্য্যেত্যাদি-পুংস্ত্বেন সম্বোধনাদি জাড্যানুকরণার্থম্। হে মুনিবর্য্য! নূনং ভগবতঃ পরদেবতাভূতস্য মায়াসি। ভ্রুবাবালক্ষ্যাহ—হে সুহৃৎ সখে! বিজ্যে নির্গুণে ধনুষী বিভর্ষি কিমাত্মনোঽর্থে? চ তবৈবাভ্যাং কিং কার্য্যমস্তি? কিংবা প্রমত্তানজিতেন্দ্রিয়ান্ মৃগতুল্যানস্মদাদীন্ মৃগয়সে? তান্ বশীকর্ত্তুং ধনুষী ধারয়সীত্যর্থঃ ॥

৮। * কটাক্ষমালক্ষ্যাহ—বাণাবিমৌ শতপত্রে নেত্রকমলে, ত এব পত্রাণি পিচ্ছানি যয়োঃ; শান্তৌ বিভ্রমেণ মন্থরৌ; পুঙ্খাভ্যাং বিনাপি রুচিরৌ, পত্রতয়া কল্পিতনেত্রাভ্যাং পরভাগস্য পুঙ্খস্থানীয়স্যাভাবাৎ। অতিতিগ্মাবতিতীক্ষ্ণৌ দন্তাবগ্রভাগৌ যয়োস্তৌ। কস্মৈ প্রযোক্তুমিচ্ছসি ইতি ন বিদ্মঃ। অতো ভয়াদেতাবৎ প্রার্থয়ামহে, তবায়ং বিক্রমোঽস্মাকং ক্ষেমায়াস্তু ॥

৯। তদঙ্গপরিমললোভেনানুগচ্ছতো ভ্রমরানালক্ষ্যাহ—শিষ্যা ইতি। অজস্রং সন্ততং যুষ্মচ্ছিখাতো বিলুলিতা বিগলিতাঃ সুমনসামভিতো বৃষ্টি-র্গলিতানি কুসুমানি ভজন্তীত্যর্থঃ। শুদ্ধত্বেনোপমা বেদশাখা ইবেতি ॥

১০। নূপুরস্বনমাকর্ণ্যাহ—বাচমিতি। তুভ্যং তব চরণগতপঞ্জরয়োর্নূপুরয়োস্তিত্তিরীণামন্তর্গতরত্নানাম্, পরং কেবলম্, বাচং শৃণুমঃ। কথ-

১। দত্তাবসরস্য (গ); * ইতঃপূর্ব্বং 'হে কৃষ্ণ! হে রমানাথ!' ইত্যধিকঃ পাঠঃ (গ)।

স্তুতাম্ ? অরূপা—অদৃষ্টবক্তৃকা, মুখরা—অতিপ্রকটা, তাঞ্চ তাঞ্চ। পীতং পরিধানবস্ত্রং নিতম্বকান্তিত্বেন প্রকল্প্যাহ—কদম্বকুসুমস্য রুচির্দীপ্তিরঙ্ক-বিটঙ্কবিম্বে নিতম্বস্য সুন্দরে মণ্ডলে ক লব্ধা ? অঙ্গ নিতম্বেতি পাঠান্তরে অঙ্গেতি সম্বোধনম্। মেখলামালক্ষ্যাহ—যস্যামলাতপরিধির্বর্ত্ততে। বস্ত্রং নিতম্বকান্তিত্বেন প্রকল্প্য বস্ত্রমদৃষ্টৈব পৃচ্ছতি—ক চ তে বল্কলমিতি॥

১১। স্তনাবালক্ষ্যাহ—শৃঙ্গয়োঃ স্তনয়োঃ কিং সংভৃতং কিং পূর্ণমস্তি ? মনোহরং কিঞ্চিদস্তীত্যেতাবজ্জানামি, যতো মধ্যে কৃশোঽপি কৃচ্ছ্রেণ বহসি ধারয়সি। যত্র চ মে দৃশির্দৃষ্টিঃ শ্রিতা সংলগ্নাস্তি, অন্যথেদং দ্বয়ং[১] ন ঘটত ইতি ভাবঃ। স্তনগতং কুঙ্কুমমালক্ষ্যাহ—পঙ্কোঽরুণ আত্মনস্তব বিষাণে শৃঙ্গ[২] ঈদৃগত্যপূর্ব্বঃ। কুতঃ ? ইত্যত আহ—যেন পঙ্কেনাশ্রমং সুরভীকরোষি, সুগন্ধযুক্তং করোষীতি॥

১২। লোকং স্থানম্ ; যত্রত্যো জন উরসেত্থমপূর্ব্বাবয়বৌ বিভর্ত্তি। মনস উন্নয়নৌ ক্ষোভকৌ, উন্নয়নৈরিতি পাঠে ইত্থম্ভূতলক্ষণে তৃতীয়া। বক্ত্রে চ বহ্বদ্ভুতং বিভর্ত্তি। কিম্ ? তদাহ—রসো মধুরালাপঃ, রাসো বিলাসস্তাভ্যাং সহিতা সুধা অধরামৃতম্, আদি-শব্দাৎ স্মিতনর্ম্মাদি॥

১৩। কা বা তব লোকে আত্মনো দেহস্য বৃত্তিরাহারঃ ? অঙ্গ ! হে সখে ! অদনাচ্চর্ব্বণাদ্ধবিরিতি তৎসম্বন্ধী গন্ধো বাতি, আগচ্ছতীতি তাম্বূলাভিপ্রায়ম্। অদনাদ্বহিরঙ্গ ভাতীতি পাঠে মম তাবদ্ভোজনাদ্বহির্ভূতৈব বৃত্তির্ভবতীত্যর্থঃ, যতস্ত্বং বিষ্ণোঃ কলাসি, বিষ্ণুশ্চ নাশ্নাতি, 'অনশ্নন্নন্যোঽভিচাকশীতি' ইতি শ্রুতেঃ। বিষ্ণোঃ কলাসীত্যত্র হেতুঃ—তব চ কর্ণৌ বিষ্ণোরিবানিমিষোন্মকরাবনিমিষৌ রত্ননেত্রত্বেনানিমিষ-শূন্যাবুল্লসন্তৌ মকরৌ তদাকারে কুণ্ডলে যয়োস্তৌ ; কিঞ্চ, তব মুখং সর ইৎ সর ইব ; তদেবাহ—উদ্বিগ্নং চঞ্চলং মীনযুগলমিব নেত্রদ্বয়ং যস্মিন্,

১। ত্রয়ং (গ) ; ২। স্তন।

দ্বিজা দন্তাস্তেষাং পঙ্‌ক্ত্যা শোচিঃ শোভা যস্মিন্, সরসি তু দ্বিজা রাজ-হংসাঃ। আসন্নো ভৃঙ্গনিকর ইব কেশস্তোমঃ পরিমললুব্ধ-ভৃঙ্গস্তোমো বা যস্মিন্ ॥

১৪। পতঙ্গঃ কন্দুকো ভ্রমতো ভ্রমচ্চিত্তস্য মে অক্ষিণ্যেজয়তে, চঞ্চলতাং নয়তি। বক্রকেশসমূহং মুক্তবন্ধনং ন স্মরসি, ন সন্তাবয়সি কিম্? কষ্টো ধূর্ত্তোঽনিলো নীবীং হরতি, এতচ্চ ন স্মরসি কিম্?

১৫। উপলব্ধম্—প্রাপ্তম্। মহ্যং মম, হে মম মিত্র! ময়া সহ তপশ্চর্ত্তুমর্হসি। কিঞ্চ, স বৈ ভবভাবনঃ সংস্থৃতিবিস্তারকো ব্রহ্মা মে প্রসীদতি, ত্বাং ভার্য্যাং কল্পয়তীত্যর্থঃ ॥

১৬। দ্বিজদেবেন ব্রহ্মণা দত্তম্। দৃঙ্ মনশ্চ লগ্নং সন্নাপযাতি। হে চারুশৃঙ্গি! যতস্থে চিত্তং তত্র মাং ত্বদধীনং নেতুমর্হসি। সচিব্যস্তব সখ্যোঽপি শিবা অনুকূলাঃ সত্যো মাং প্রতিসরন্ত্বনুবর্ত্তন্তাম্; যদ্বা, এতাবৎ-পর্য্যন্তং মে যাঃ সচিব্যঃ সখ্যঃ শিবাঃ ফেরবস্তাঃ প্রতিসরন্ত নির্যান্ত; যদ্বা, বনবাসে সচিব্যঃ সহচর্য্যো হরিণ্যঃ শিবাঃ প্রতিসরন্ত, প্রদক্ষিণং গচ্ছন্ত ॥

১৭। গ্রাম্যেষু বৈদগ্ধ্যং যস্তাস্তয়া পরিভাষয়া বাচা সভাজয়ামাস পূজয়ামাস, সম্মুখীচকারেত্যর্থঃ ॥

১৮। বুদ্ধ্যাদীনাং দ্বন্দ্বৈক্যম্ ॥

২০। সূত্বা প্রসূয়, উপতস্থেঽভজত ॥

২১। ঔৎপত্তিকেনৈব স্বভাবেনৈব; সংহননং দৃঢ়াঙ্গত্বম্ ॥

২২। কামানাং ভোগৈঃ, অধি অধিকং মন্যমানঃ, শ্রুতিভির্বেদোক্তৈঃ কর্ম্মভিরবারুদ্ধ প্রাপ, মাদয়ন্তে মোদন্তে ॥

২৩। ইতি এবস্তূতাঃ সংজ্ঞা যাসাং তাঃ পরিণীতবন্তঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে চরিতং নাভেঃ পরং মঙ্গলমীর্য্যতে।

যস্য যজ্ঞে প্রতীতঃ সন্ পুত্রোঽভূদৃষভো হরিঃ॥ (১)

১। নাভিরাগ্নীধ্রসুতঃ। অপুত্রয়া মেরুদেব্যা ভার্য্যায়া সহ॥

২। প্রবর্গ্যসংজ্ঞকেষু কর্ম্মসু ক্রিয়মাণেষু দ্রব্যাদয়ঃ সপ্ত যে যোগা উপায়াস্তেষামুপপত্ত্যা সম্পত্ত্যা দুরধিগমো দুষ্প্রাপোঽপি ভাগবতেষু কৃপালুতয়া সুপ্রতীকঃ শোভনাবয়বঃ সন্নাত্মানমাবিশ্চকার। অপরাজিতম্—স্বতন্ত্রম্। নিজভক্তানাং যেঽভিপ্রেতার্থাস্তেষাং বিধিৎসয়া গৃহীতমাকৃষ্টং হৃদয়ং চিত্তং যস্য; হৃদয়ঙ্গমং সুখকরম্, যতো মনোনয়নান্যানন্দয়ন্তি যেঽবয়বাস্তৈরভিরামং সুন্দরম্॥

৩। অথ হেত্যাদি নিপাতবাহুল্যং বাক্যালঙ্কারায়। আবিষ্কৃতং ভুজানাং যুগলদ্বয়ং চতুষ্টয়ং যেন, হিরণ্ময়ং তেজোময়ম্। পুরুষেষু বিশিষ্যত ইতি তথা, পুরুষোত্তমমিত্যর্থঃ। অর্হণেনার্ঘ্যেণ সহোপতস্থুরভজন্নিত্যন্বয়ঃ। বিলসন্ শ্রীবৎস এব ললামং চিহ্নং যস্য; দরবরঃ শঙ্খশ্রেষ্ঠঃ, বনরুহং পদ্মম্, অচ্ছূরি চক্রম্, অমৃতমণিঃ কৌস্তুভঃ, এবমাদিভিরুপলক্ষিতম্; স্ফুটকিরণা যে প্রবরা মণয়স্তন্ময়ানি যানি মুকুটাদীন্যঙ্গানাং ভূষণানি তৈর্বিভূষিতম্। বহুমানে দৃষ্টান্তঃ—অধনা ইবোত্তমধনং নিধিম্॥

৪। অর্হসীত্যাদিনা নিগদেন স্তুবন্তি—হে অর্হত্তম! পরিপূর্ণোঽপি ত্বমনুপথানাং ভৃত্যানামস্মাকমর্হণং মুহুঃ স্বয়মেব স্বীকর্ত্তুমর্হসি; ন তু বয়ং স্তোতুং শক্তা ইত্যাহুঃ—নমো নম ইত্যেতদেবাস্মাকং সদ্ভিরুপশিক্ষিতম্, তদ্রূপস্য দুর্জ্ঞেয়ত্বাৎ। তদেবাহুঃ—কোঽর্হতীতি প্রকৃতিগুণানাং ব্যতিকরঃ প্রপঞ্চঃ, তস্মিন্নেব মতির্যস্য, অতএবানীশঃ। প্রকৃতিপুরুষয়োঃ পরস্য, অতএবেশ্বরস্যার্ব্বাক্তনাভিস্ত্বামস্পৃশন্তীভিঃ প্রপঞ্চান্তর্গতাভির্নাম চ রূপঞ্চাকৃতিশ্চাকারস্তাভিস্তব স্বরূপনিরূপণং কর্ত্তুং কো নাম পুমানর্হতি?

৫। স হেতাবন্মাত্রমেবার্হতি, নাধিকমিত্যাহুঃ—সকলজননিকায়স্য বৃজিনং নিরস্যন্তীতি তথা, তে শিবতমাঃ প্রবরাশ্চ যে গুণগণাস্তেষামেকদেশস্তস্য কথনাদ্বিনাধিকং নার্হতি ॥

৬। অবাঙ্মনস-গোচরোঽপি ত্বং ভক্তানাং সুখারাধ্য এবেত্যাহুঃ—হে পরম! পরিজনৈরনুরাগেণ বিরচিতা যে শবলসংশব্দা জয় জয়েতি গদ্গদাক্ষরস্তুতয়ঃ, সলিলঞ্চ, সিতকিসলয়াশ্চ শুদ্ধপল্লবাঃ। শিলেতি পাঠে শিলং কুশাদিমঞ্জরী, এবমাদিভিঃ সংভৃতয়া সম্পাদিতয়া পূজয়া পরিতুষ্যসি ॥

৭। অথেতি প্রকারান্তরে। অন্যথা ত্বনয়েজ্যয়া যোগেনাপ্যুরুভারভরয়ানেকাঙ্গসমৃদ্ধয়াপি ভবতঃ সমুচিতমপেক্ষিতমর্থং প্রয়োজনং নৈব পশ্যামঃ ॥

৮। অত্র হেতুঃ—আত্মনঃ স্বত এবানুসবনং সর্ব্বদাঞ্জসা সাক্ষাদব্যতিরেকেণ সমন্বয়েন বোভূয়মানাতিশয়েন ভবন্তোঽশেষাঃ পুরুষার্থাঃ, তে স্বরূপং যস্য পরমানন্দস্য। ন চৈবং সত্যপি যাগানর্থক্যমিত্যাহুঃ—কিন্ত্বিতি। সকামানামস্মাকমেবৈতদুপপদ্যতে, ন তবেত্যর্থঃ ॥

৯। স্বোপযোগমেব প্রদর্শয়ন্তি—তদ্‌যথেতি। পরমেভ্যোঽপি হে পরমপুরুষ! প্রকর্ষযুক্তয়া করুণয়োপকল্পয়িষ্যন্ সম্পাদয়িষ্যন্; চকারাৎ কামিতঞ্চ; নাপচিতোঽনপচিতোঽপূজিত এব, পূজানপেক্ষত্বাৎ, স্বয়মেবোপলক্ষিতো দৃষ্টোঽসি, ইতরবৎ সাপেক্ষবৎ ॥

১০। যদ্যপি ত্বং বরান্ দাতুমাবির্ভূতোঽসি, তথাপি হে অর্হত্তম! রাজর্ষের্বর্হিষি যজ্ঞে নিজপুরুষাণাং ত্বদ্ভক্তানামস্মাকমীক্ষণবিষয়ো ভবান্ যর্হি যদাসীৎ, তদা হ্যয়মেব বরঃ সঞ্জাতঃ ॥

১১। দর্শনস্য দুর্লভতামাহুঃ—অসঙ্গেন বৈরাগ্যেণ নিশিতং যজ্‌জ্ঞানম্, স এবানলস্তেন বিধূতা অশেষা মলা যেষাম্, অতো ভবত ইব

স্বভাবো যেষাম্। তানেবাহুঃ—আত্মারামাণামেবম্ভূতানাং মুনীনামপি পরমমঙ্গলায়নং গুণগণকথনমেব, ন তু দর্শনং যস্য। অতস্তৈরনবরতং পরিগুণিতা অভ্যস্তা গুণগণা যস্যেতি সম্বোধনম্॥

১২। দর্শনেনৈব কৃতার্থা অপি বরমেকং প্রার্থয়ন্তে—অথেতি। স্মরণায় বিবশানাম্—ত্বাং স্মর্তুমশক্তানাং নঃ॥

১৩। অন্যচ্চ প্রার্থনীয়মস্তীত্যাহুঃ—কিঞ্চেতি। আশিষামৈহিকানাং স্বর্গাপবর্গয়োরপীশ্বরং ত্বামুপধাবতি। প্রজায়ামেব পুরুষার্থ ইতি প্রত্যয়ো যস্য; অধনো যথা ফলীকরণং তুষকণাদিকমাশাসানো ধনদমুপধাবতি॥

১৪। ইদঞ্চ নাতিচিত্রমিত্যাহুঃ—ইহ সংসারে তেঽপরাজিতয়া মায়য়া-নবসিতপদব্যালক্ষিতমার্গয়াপরাজিতঃ কো বৈ? ন কোঽপি। অত-স্তয়ানাবৃতমতিঃ কঃ? অতএব বিষয় এব বিষম্, তস্য রয়া বেগা-স্তৈরনাবৃতা প্রকৃতির্যস্য স কঃ? যস্ত্বনুপাসিতমহচ্চরণঃ, অতস্ত্বন্মায়য়া মোহিতস্তৈবমাশংসা ঘটত ইত্যর্থঃ॥

১৫। অদভ্রকর্ত্তঃ! হে বহুকার্য্যকারিন্! অল্পীয়সে কার্য্যায় ত্বং যদ্-যস্মাদস্মাভিরিহ সমাহূতোঽসি, তত্র প্রজায়ামর্থে ধীর্যেষাং তেষাং মন্দানাং যদ্দেবহেলনমবজ্ঞানম্, তৎ সর্ব্বান্ প্রতি তব সাম্যেন হেতুনা প্রতিবোঢ়ুং সোঢ়ুমর্হসীতি॥

১৬। ইতি নিগদেন গদ্যাত্মকস্তোত্রেণ; বর্ষধবো ভারতবর্ষপতি-র্নাভিস্তেনাভিবাদিতা যে ঋত্বিজস্তৈরভিবন্দিতৌ চরণৌ যস্য॥

১৭। অসুলভত্বে হেতুঃ—মমাহমেবাভিরূপঃ সদৃশঃ, কৈবল্যাদ-দ্বিতীয়ত্বাৎ। দ্বিজেষু দেবা ইব যে ব্রাহ্মণাস্তেষাং কুলম্॥

১৮। আগ্নীধ্রীয়ে—নাভৌ॥

১৯। পতিম্—নাভিম্॥

২০। হে বিষ্ণুদত্ত! তস্যাবরোধায়নেঽন্তঃপুরে মেরুদেব্যাং শুক্লয়া শুদ্ধসত্ত্বরূপয়া মূর্ত্ত্যাবততার। কেষাং ধর্ম্মান্? বাতরশনানাং দিগ্-বাসসাম্। পাষণ্ডিব্যাবৃত্ত্যর্থমাহ—শ্রমণানাং তপস্বিনাম্, ঋষীণাং জ্ঞানিনাম্, ঊর্দ্ধমন্থিনাং নৈষ্ঠিকব্রহ্মচারিণাম্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
তৃতীয়োঽধ্যায়ঃ॥ ৩॥

চতুর্থোঽধ্যায়ঃ

চতুর্থাদি-ত্রিভিঃ প্রোক্তমৃষভস্যেহিতং মহৎ।
লোকার্থং যেন সৎ কর্ম্ম নৈষ্কর্ম্ম্যঞ্চ নিদর্শিতম্॥ (১)
চতুর্থে শতপুত্রস্য রাজ্যং তস্যোপবর্ণ্যতে।
যস্য রাজ্যে জনঃ সর্ব্বঃ সন্তোষামৃতনির্ব্বৃতঃ॥ (২)

১। অভিব্যজ্যমানানি ভগবল্লক্ষণানি পাদতলাদিষু বজ্রাঙ্কুশাদীনি যস্য, মহাবিভূতিঃ সর্ব্বসম্পত্তিঃ, সাম্যাদিভিঃ সহ বর্দ্ধমান-প্রভাবম্, প্রকৃতয়োঽমাত্যাদয়ো জগৃধুরভিকাঙ্ক্ষন্তি স্ম॥

২। বর্ষ্মণা দেহেন ; তস্য বিশেষণদ্বয়ম্—বরীয়সা শ্রেষ্ঠতমেন ; বৃহন্তঃ শ্লোকাঃ পদ্যানি কবীনাং যস্মিংস্তেন চ। ওজস্তেজঃ, বীর্য্যং প্রভাবঃ, শৌর্য্যমুৎসাহঃ, এতৈর্গুণৈরতিশ্রেষ্ঠত্বাদৃষভঃ শ্রেষ্ঠ ইতি নাম চকার॥

৩। তস্য বর্ষে মণ্ডলে॥

৪। অবরুধ্য—প্রাপ্য ; স্বৈরমিচ্ছয়া গৃহীতো নরলোকসমানধর্ম্মো মনুষ্যাকারো যেন তম্, অতএব মায়য়া স্বপুত্র ইতি বিলসিতা মতির্যস্য॥

৫। আপৌরপ্রকৃতি পৌরান্ প্রকৃতীংশ্চাভিব্যাপ্য, বিদিতোঽনুরাগো যস্মিন্। কথম্ভূতো নাভিঃ? জনপদো জনাঃ পৌরাদয়ঃ পদং প্রমাণং যস্য সঃ। আত্মজং ধর্ম্মমর্য্যাদারক্ষণার্থমভিষিচ্য ব্রাহ্মণানামুৎসঙ্গে নিধায়, বিশালায়াং বদরিকাশ্রমে, প্রসন্নং পরানুদ্বেজকং নিপুণঞ্চ তীব্রং তেন, উপাসীনঃ সেবমানঃ কালেন তন্মহিমানং জীবন্মুক্তিমবাপ ॥

৬। নাভেস্তৎ প্রসিদ্ধং কর্ম্ম, অনু তদনন্তরং কো নু পুমানাচরেৎ? ন কোঽপীত্যর্থঃ ॥

৭। মঙ্গলৈর্দক্ষিণাদিভিঃ পূজিতাঃ সন্তঃ। ওজসা—মন্ত্রবলেন ॥

৮। অন্বেষাং গ্রহণায় প্রদর্শিতো গুরুকুলবাসো যেন, অনুশিক্ষমাণো-ঽনুশিক্ষয়ন্, উভয়বিধং শ্রুতি-স্মৃতিলক্ষণং কর্ম্মবিধিমভিযুঞ্জন্ননুতিষ্ঠন্, জয়ন্ত্যাং ভার্য্যায়ামাত্মজানাং শতং জনয়ামাস ॥

১০। তং ভরতমনু কুশাবর্ত্তাদয়ো নব পুত্রা নবতেঃ প্রধানাঃ শ্রেষ্ঠাঃ[১]।

১২। তদনন্তরং কবিপ্রমুখা নব ভাগবতধর্ম্মপ্রদর্শকাঃ; বসুদেব-নারদয়োঃ সংবাদো যস্মিন্। উপরিষ্টাদেকাদশস্কন্ধে ॥

১৩। মহাশালীনাঃ—অতিবিনীতাঃ ॥

১৪। কেবলঃ শুদ্ধো বিপরীতবদনীশ্বরবৎ কর্ম্মাণি কুর্ব্বন্নিয়ময়ন্নিয়-মিতবান্। অরময়দিতি পাঠান্তরে নিতরামরময়ৎ। কর্ম্মকরণে হেতুঃ—অনুগতমুৎপন্নং ধর্ম্মং স্বয়মাচরণেনাতদ্বিদামুপশিক্ষয়ন্। কথম্? ধর্ম্মা-দীনামবরোধেন সংগ্রহেণ। আনন্দো ভোগঃ; অমৃতং মোক্ষঃ[২] ॥

১৫। শীর্ষণ্যঃ শ্রেষ্ঠঃ, তেনাচরিতং তত্তদনুবর্ত্ততে যতঃ ॥

১৬। সকলো ধর্ম্মো যস্মিংস্তদ্‌ব্রাহ্মং গুহ্যং বেদরহস্যং যদ্যপি স্বেনৈব বিদিতম্, তথাপি ব্রাহ্মণান্ পৃষ্ট্বৈব করোতীত্যর্থঃ ॥

১। জ্যেষ্ঠাঃ (ঘ); ২। মোক্ষবোধঃ (ক)।

১৭। দ্রব্যাদিভিরুপচিতৈর্যজ্ঞৈরিষ্টবান্, তত্র বয়ো যৌবনম্, যুবৈব ধর্ম্মমন্বিচ্ছেদিতি বচনাৎ। বিবিধোদ্দেশা নানাদেবতোদ্দেশাঃ ; যথোপদেশং যথাবিধি ॥

১৮। অন্যস্মাৎ সকাশাদাত্মনঃ কশ্চিদপি কিমপি কথঞ্চনাপি ন বাঞ্ছতি। ইচ্ছানুদয়ে দৃষ্টান্তঃ—অবিদ্যমানং খপুষ্পাদিকমিব ; ন চান্যদীয়মবেক্ষতেঽপীত্যর্থঃ। ভর্ত্তরি ঋষভদেবে প্রতিক্ষণমুল্লসিতস্নেহোদ্রেকং বিনান্যন্ন বাঞ্ছতি ॥

১৯। অবহিতাত্মনঃ সংযতচিত্তানপি প্রজানুশাসনার্থমুপশিক্ষয়ন্নিতি হ বক্ষ্যমাণমুবাচ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
চতুর্থোঽধ্যায়ঃ ॥ ৪ ॥

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে মোক্ষধর্ম্মোপদেশৈঃ পুত্রানুশাসনম।
উক্তং পারমহংস্যঞ্চ তস্য দ্বন্দ্বতিতিক্ষয়া ॥ (১)

১। বিড্ভুজামপি যে সন্তি, তান্ কষ্টান্ দুঃখদান্ কামান্ বিষয়ান্ নার্হতি, তদ্যোগ্যোঽয়ং মনুষ্যদেহো ন ভবতি। দিব্যমুৎকৃষ্টম্, যেন তপসা, যস্মাচ্ছুদ্ধসত্ত্বাদনন্তং ব্রহ্মসুখং ভবতি ॥

২—৩। মোক্ষবন্ধয়োর্নিদানমাহ—মহৎসেবামিতি। (২) তমসঃ সংসারস্য দ্বারম্—যোষিতাং যে সঙ্গিনস্তেষাং সঙ্গম্। মহতাং লক্ষণমাহ সার্দ্ধেন—মহান্ত ইতি। সাধবঃ—সদাচারাঃ ॥ (৩) ময়ি ঈশে কৃতং সৌহৃদমেবার্থঃ পুরুষার্থো যেষাম্। 'বা'-শব্দেনান্যনিরপেক্ষস্যৈবাস্য লক্ষণত্বং

দর্শয়তি। দেহং বিভর্ত্তীতি দেহন্তরা বিষয়া বার্ত্তৈব, ন ধর্ম্মবিষয়া যেষু, তেষু জনেষু জায়াদিযুক্তেষু গৃহেষু চ। রাতির্মিত্রং ধনং বা। পাঠান্তরে জায়াদিপ্রদেষু। যাবদর্থাশ্চ যাবদর্থমেবার্থো যেষামিতি মধ্যমপদলোপী সমাসঃ, দেহনির্ব্বাহাধিকধনস্পৃহাশূন্যা ইত্যর্থঃ ॥

৪। কামান্ নার্হতীতি যদুক্তম্, তদুপপাদয়তি—নূনমিতি। যদ্যদা ইন্দ্রিয়প্রীতয় আপৃণোতি ব্যাপ্রিয়তে, তদা প্রমত্তঃ সন্ বিকর্ম্ম পাপং নূনং কুরুতে ; যতো বিকর্ম্মণঃ প্রাচীনাদয়ং ক্লেশদো দেহো জাতস্তস্যৈব পুনঃ করণং সাধু ন মন্যে ॥

৫। দেহাদের্নশ্বরত্বাৎ কিয়ানয়মনর্থ ইত্যাশঙ্ক্যাহ—পরাভবো দেহাদিনা স্বরূপাভিভবোঽজ্ঞানকৃতস্তাবদ্ভবতি। তত্র হেতুঃ—যাবৎ ক্রিয়াঃ স্যুস্তাবদিদং মনো হি কর্ম্ম-স্বভাবমেব স্যাৎ। যেন—কর্ম্মাত্মকেন মনসা ॥

৬। উক্তমুপসংহরতি—এবং পূর্ব্বকৃতং কর্ম্ম কর্ত্তৃভূতং মনঃ কর্ম্মভূতং বশং প্রযুঙ্‌ক্তে, পুনঃ কর্ম্মনিষ্ঠং করোতি। জীবন্মুক্তকর্ম্মব্যাবৃত্ত্যর্থমাহ—অবিদ্যয়েতি ; অবিদ্যয়াত্মন্যুপধীয়মানে আচ্ছাদ্যমানে সতি, এবং মনঃ কর্ত্তৃ পুরুষং কর্ম্মবশং প্রযুঙ্‌ক্ত ইতি বা ॥

৭। ন কেবলং দেহযোগমাত্রমনর্থান্তরঞ্চেত্যাহ—যদা গুণানামিন্দ্রিয়াণামীহাং চেষ্টামযথা মিথ্যা আত্মীয়া ন ভবতীতি বিপশ্চিদ্বিবেকী সন্ ন পশ্যতি। নু পশ্যতীতি পাঠেঽযথাত্মীয়ত্বেনেত্যর্থঃ। তত্র তদা সহসা গতস্মৃতিঃ স্বরূপস্মৃতিশূন্যঃ সন্নজ্ঞো মূঢ়ো মৈথুনসুখপ্রধানং গৃহং প্রাপ্য তাপান্ বিন্দতি ॥

৮। ননু যথোপযোগং স্ত্রিয়া মিথুনীভূয় সুখমাত্রমনুভবতঃ কুতস্তাপাঃ স্যুঃ ? তত্রাহ—পুংস ইতি। প্রত্যেকং তয়োরেকৈকো হৃদয়গ্রন্থিরস্ত্যেব। এতং মিথোঽন্যোন্যং স্থূলমন্যং হৃদয়য়োর্গ্রন্থিং দুর্ভেদং বদন্তি। কুতঃ? ইত্যত আহ—অতোঽস্মান্মিথুনীভাবাৎ। প্রত্যেকং হৃদয়গ্রন্থিনা তু দেহেন্দ্রিয়-

মাত্রে অহং মমেতি মোহঃ, অস্মাত্তু গৃহাদিভির্বিষয়ভূতৈর্মহান্ মোহো ভবেদিত্যর্থঃ ॥

৯। কদা তর্হি তস্য নিবৃত্তিঃ? অত আহ—যদাস্য জনস্য কর্ম্মভিরনুবদ্ধো দৃঢ়ো মনোরূপো হৃদয়গ্রন্থিঃ শিথিলো ভবেৎ, তদাস্মান্মিথুনীভাবান্নিবর্ত্ততে, ততশ্চ হেতুমহঙ্কারং ত্যক্ত্বা মুক্তঃ সন্ পরং পদং যাতি ॥

১০—১৩। 'হেতুমতিহায়' ইত্যুক্তম্, তত্র পঞ্চবিংশতিসাধনান্যাহ চতুর্ভিঃ। (১০) হংসে ময়ি গুরৌ ভক্তিঃ সেবা, অনুবৃত্তিস্তৎপরতা, তয়া বিগততৃষ্ণয়া; সর্ব্বত্র লোকান্তরেঽপি ব্যসনাবগত্যা দুঃখানুসন্ধানেন, ঈহানিবৃত্ত্যা কাম্যকর্ম্মত্যাগেন ॥ (১১) মদর্থৈঃ কর্ম্মভিঃ। অহমেব দেবো যেষাং তৈঃ সঙ্গাৎ। হে পুত্রাঃ! দেহগেহয়োরাত্মবুদ্ধেঃ—অহংমমেতি বুদ্ধেঃ ॥ (১২) অধ্যাত্মযোগেনাধ্যাত্মশাস্ত্রাভ্যাসেন। সধ্র্যক্ সম্যগিতি সর্ব্বত্র সম্বন্ধঃ। অসম্প্রমাদেন—কর্ত্তব্যস্যাপরিত্যাগেন ॥ (১৩) সর্ব্বত্র মদ্ভাবো মদ্ভাবনা, তত্র বিচক্ষণেন নিপুণেন বিজ্ঞানবিরাজিতেনানুভবপর্য্যন্তেন জ্ঞানেন, যোগেন সমাধিনা ধৃত্যুত্তমসত্ত্বযুক্তো ধৈর্য্যপ্রযত্নবিবেকৈর্যুক্তঃ সন্নহঙ্কারাখ্যমুপাধিং ব্যপোহেন্নিরস্যেৎ ॥

১৪। ততঃ সাধনাদুপরমেদিত্যাহ—কর্ম্মাণ্যাশেরতে যস্মিন্; যোগেন—উপায়েন। যদ্যপি ফলে সিদ্ধে সাধনোপরমঃ সিদ্ধ এব, তথাপি যাবদ্দেহপাতং তদভ্যাসশঙ্কাবারণায়োক্তম্ ॥

১৫। কিঞ্চ, পুত্রান্ পিতা, শিষ্যান্ গুরুঃ, নৃপশ্চ প্রজা এবমনুশিক্ষয়েৎ। মম লোকং যঃ কাময়তে; যদ্বা, মদনুগ্রহ এবার্থো যস্য। বিমন্যুঃ শিক্ষিতস্যাকরণেঽপি কোপশূন্যঃ, অতজ্জ্ঞান্ তত্ত্বমবিদুষঃ শ্রেয়োবুদ্ধ্যা কর্ম্মসু মূঢ়ান্ ন যোজয়েৎ। অন্যথোপদেশে প্রত্যবায়মাহ—মনুজঃ কাম্যকর্ম্মসু পুরুষং যোজয়ন্ গর্ত্তে সংসারকূপে তং পাতয়তি। স মনুজঃ কমর্থং পুরুষার্থং লভেত? ন কমপীত্যর্থঃ ॥

১৬—১৮। এতদুপপাদয়তি—লোক ইতি ত্রিভিঃ। নষ্টদৃষ্টিত্বে হেতুঃ—য ইতি। (১৬) নিকামমতিশয়েন কামো যস্ত॥ (১৭) তমীদৃশং কুবুদ্ধিং দৃষ্ট্বা তত্রৈব কস্তং প্রবর্ত্তয়েৎ? ন কোঽপি। উৎপথেন গচ্ছন্তমন্ধং যথা তেনৈব গচ্ছেতি কো ব্রূয়াৎ? (১৮) সমুপেতঃ সংপ্রাপ্তো মৃত্যুঃ সংসারো যেন তম্, ততো ভক্তিমার্গোপদেশেন যো ন মোচয়েৎ, স গুর্ব্বাদির্ন ভবেদিত্যর্থঃ। যদ্বা, যস্তং মোচয়িতুং ন শক্নুয়াৎ, স তস্ত গুর্ব্বাদির্ন স্যাদিতি নিষেধঃ। ততশ্চ পিতা ন স স্যাদিতি পুত্রোৎপত্তৌ যত্নো ন কার্য্য ইত্যর্থঃ; দৈবং দেবতা ন স্যাদিতি পূজা ন গ্রাহ্যা ইত্যর্থঃ। এবমন্যদপি দ্রষ্টব্যম্॥

১৯—২০। এবং মোক্ষধর্ম্মানুপদিশ্য ভ্রাতৃশুশ্রূষণলক্ষণং ধর্ম্মং স্পর্দ্ধাদিনিবৃত্তয়ে তেষাং জন্মকথনপূর্ব্বকমাহ দ্বাভ্যাম্। (১৯) ইদং মনুষ্যাকারং শরীরং মম দুর্বিভাব্যমবিতর্ক্যম, মদিচ্ছাবিলসিতম্, ন ত্বহং প্রাকৃতো মনুষ্য ইত্যর্থঃ। মে হৃদয়ন্তু সত্ত্বম্। কিং তদ্ধৃদয়ম্? যত্র ধর্ম্মস্তৎ শুদ্ধং সত্ত্বমিত্যর্থঃ। কুতঃ? যদ্‌যস্মান্ময়াধর্ম্মো দূরাদেব পৃষ্ঠে কৃত উৎসারিতঃ, অতএব মামৃষভং শ্রেষ্ঠং প্রাহুঃ॥ (২০) ভবন্তশ্চ হৃদয়েন শুদ্ধসত্ত্বময়েন জাতাস্তস্মান্মৎসরং হিত্বা মহত্তমং সনাভং সোদরং ভজধ্বম্। ননু ত্বৎপুত্রত্বাত্ত্বাং বয়ং ভজেম, রাজপুত্রত্বাৎ প্রজাশ্চ পালয়ামেতি চেৎ, অত আহ—তদেব মে শুশ্রূষণম্, প্রজানাঞ্চ পালনম্। ভরতানুবৃত্ত্যৈব সর্ব্বং কৃতং স্যাদিতি ভাবঃ॥

২১—২৫। ইদানীং ব্রাহ্মণাশ্চ সেব্যা ইত্যাশয়েন তেষাং সর্ব্বেভ্যঃ শ্রৈষ্ঠ্যমাহ পঞ্চভিঃ। (২১) ভূতেষু চেতনাচেতনেষু, বিরোহন্তীতি বিরুধঃ স্থাবরাঃ; উদুচ্চৈরতিশয়েনোত্তমাস্তেভ্যোঽপি যে সরীসৃপাঃ সর্পন্তীতি জঙ্গমাস্ত উদুত্তমা ইতি সর্ব্বত্রানুষঙ্গঃ। তেষ্বপি সবোধা নিষ্ঠা স্থিতির্যেষাং পশ্বাদীনাং তে কীটকাদিভ্যঃ, ততস্তেষ্বপি মনুষ্যাঃ, ততোঽপি প্রমথা ভূতপ্রেতা-

দয়ঃ, ততোঽপি গন্ধর্ব্বাঃ, ততঃ সিদ্ধাঃ, ততোঽন্যে বিবুধানুগাঃ কিন্নরাদয়ঃ ॥ (২২) তেভ্যোঽসুরাঃ, দেবা অসুরেভ্যঃ ; সন্ধিরার্ষঃ। দেবাশ্চ মঘবৎ-প্রধানাঃ, দেবেভ্য ইন্দ্রঃ শ্রেষ্ঠ ইত্যর্থঃ, ততোঽপি ব্রহ্মসুতা দক্ষাদয়ঃ, তেষাং মধ্যে ভবঃ পরঃ শ্রেষ্ঠঃ, স ভবশ্চ বিরিঞ্চো বীর্য্যং শক্তিঃ কারণং যস্য স বিরিঞ্চবীর্য্যঃ, অতস্তজ্জনকত্বাদ্ বিরিঞ্চস্ততঃ পর ইত্যর্থঃ। স বিরিঞ্চো মৎপরঃ, অহং পরো যস্য। দ্বিজদেবা ব্রাহ্মণা এব দেবাঃ পূজ্যা যস্য সোঽহম ॥ (২৩—২৫) ব্রাহ্মণৈরন্যদ্ ভূতং ন তুলয়ে সমং ন পশ্যামি, অতো ব্রাহ্মণাৎ পরন্তু ভূতং কিং পশ্যামি ? ন কিঞ্চিৎ। বিপ্রা ইতি তত্রত্যানাং ব্রাহ্মণানাং সম্বোধনম্। সমস্যৈবাভাবাদধিকং কুতস্ত্যমিত্যর্থঃ। তত্র হেতুনাহ সার্দ্ধদ্বাভ্যাম্। যস্মিন্ ব্রাহ্মণে শ্রদ্ধয়া প্রকর্ষেণ হুতমন্নাদি কামং যথেচ্ছমহমশ্নামি ॥ (২৪) মে তনূর্মূর্ত্তির্বেদাখ্যা যেন ব্রাহ্মণেনেহ লোকে ধৃতা, যত্র চ ব্রাহ্মণে সত্ত্বাদয়োঽষ্টৌ গুণাঃ সন্তি, ততঃ পরং কিং পশ্যামীত্যন্বয়ঃ ॥ (২৫) নিস্পৃহত্বমাহ—মত্তোঽপি যেষাং ন কিঞ্চিৎ প্রার্থনীয়মস্তি, তেষামিতরেণ রাজ্যাদিনা কিমু স্যাৎ ? ন কিমপি ॥'

২৬। তদেবং ব্রাহ্মণসম্মানং বিধায়েদানীং সর্ব্বভূতসম্মানং বিধত্তে—সর্ব্বাণীতি। হে সুতাঃ সর্ব্বাণি জঙ্গমানি স্থাবরাণি চ ভূতানি মদধিষ্ঠানতয়া বো যুষ্মাভিঃ সম্মাননীয়ানি। পদে পদে ক্ষণে ক্ষণে। বিবিক্তা পূতা মৎসরাদিরহিতা দৃষ্টির্যেষাং তৈঃ। তদেব হি মমার্হণম্ ॥

২৭। সর্ব্বকর্ম্মণামীশ্বরার্পণং বিধত্তে। মনোবচোদৃশামন্যেষাঞ্চ করণানামীহিতস্য ব্যাপারস্য মে পরিবর্হণমারাধনমেব সাক্ষাৎকৃতং ফলম্। যেন পরিবর্হণেন বিনা কালপাশাদ্বিমোক্তুং ন ঈশেন্ন ঈশীত সমর্থো ন ভবেৎ ॥

২৮। স্বত এব সুশিক্ষিতানপি লোকানুশাসনার্থমনুশাস্য মুনীনাং পারমহংস্যং ধর্ম্মমুপশিক্ষয়িষ্যন্, ভরতমভিষিচ্য, ঋষভ ইত্যপদেশো নাম

যস্ত স ভগবান্ ব্রহ্মাবর্ত্তাৎ স্বদেশাৎ প্রবব্রাজেত্যন্বয়ঃ। উর্ব্বরিতোঽবশিষ্টঃ শরীরমাত্রং পরিগ্রহো যস্ত ॥

২৯। অভিভাষ্যমাণোঽপি জনানাং মধ্যে জড়াদিবদ্বর্ত্তমানস্তূষ্ণীং বভূব। অবধূতস্তেব বেশো যস্ত ॥

৩০। তত্র তত্র পুরাদিম্বনুপথং মার্গে মার্গেঽবনিচরাপসদৈদুর্জ্জনৈ-স্তর্জ্জনাদিভিঃ পরিভূয়মাণোঽপি তদবিগণয়ন্নেবৈকচর একাকী পৃথিবীং পরিবভ্রামেত্যন্বয়ঃ। তত্র পুরং পত্তনম্, গ্রামা হট্টহীনাঃ, আকরঃ খনিঃ, খেটঃ কৃষীবলগ্রামঃ, বাটাঃ পুষ্পাদিবাটিকাঃ, খর্ব্বটঃ পর্ব্বতপ্রান্তগ্রামঃ, শিবিরং সেনায়া নিবাসস্থানম্, ব্রজো গবাং স্থানম্, ঘোষো গোপানাং স্থানম্, সার্থো যাত্রিকজনসঙ্ঘাতঃ, আশ্রমা ঋষীণাম্। তর্জ্জনং ভয়জননম্, তাড়নং প্রহারঃ, অবমেহনমুপরি মূত্রণম্, ষ্ঠীবনং ফূৎকৃত্য শ্লেষ্মপ্রক্ষেপঃ, গ্রাবৃণাং শকৃতো রজসশ্চ প্রক্ষেপঃ, পূতিবাতোঽধোবায়ুঃ, দুরুক্তং শাপঃ, এতৈঃ। অগণনে দৃষ্টান্তঃ—মক্ষিকাভিরিবেতি। তত্র হেতুঃ—অসতি মিথ্যাভূতে সংস্থানে সন্নিবেশে, দেহ ইত্যুপলক্ষণমাকারো যস্ত, সদিত্য-পদেশমাত্রং যস্ত তস্মিন্নিরভিমানত্বাৎ। কেন হেতুনা? উভয়োঃ সদ-সতোর্যোঽনুভবস্তৎস্বরূপেণ যৎ স্বমহিম্ন্যবস্থানং তেন, অতএবাবিখণ্ডিতং মনো যস্ত স পরিবভ্রাম ॥

৩১। স চ তদা গ্রহগৃহীত ইবাদৃশ্যত ; তত্র হেতুঃ—পরাক্ পুরতোঽ-বলম্বমানাশ্চ তে কুটিলাশ্চ জটিলাশ্চ কপিশাশ্চ কেশাঃ, তেষাং ভূরি-ভারো যস্ত সঃ। অবধূতমনাদৃতম্, অতএব মলিনং নিজশরীরং তেন। কথম্ভূতোঽপ্যেবমদৃশ্যত? অতিসুকুমারাণি করচরণোরঃস্থলানি, তথা বিপুলা বাহ্বাদয়স্ত এবাবয়বাস্তেষাং বিশিষ্টো ন্যাসঃ সন্নিবেশো যস্ত সঃ, তথা প্রকৃত্যৈব সুন্দরঃ স্বভাবসিদ্ধো হাসস্তেন শোভনং মুখং যস্ত, তথা নবনলিনদলবদাচরতী যে শিশিরতারে তাপহারি-কনীনিকে অরুণে আয়তে

নয়নে, তাভ্যাং রুচিরঃ, তথা সদৃশা অন্যূনাধিকাঃ সুভগাশ্চ কপোল-কর্ণকণ্ঠনাসিকা যস্য, তথা বিগূঢ়স্মিতং যদ্বদনং তস্য মহোৎসবেন বিভ্রমেণ পুরাঙ্গনানাং মনসি কামমুদ্দীপয়ন্ ; এবম্ভূতোঽপি তথাদৃশ্যতেত্যন্বয়ঃ ॥

৩২। যর্হি যদা লোকং জনং যোগস্য প্রতিপক্ষমাচক্ষাণঃ পশ্যন্ বভূব, তস্য প্রতিক্রিয়াকরণং কর্ম্ম চ নিন্দিতমিত্যাচক্ষাণস্তদাজগরং নাম ব্রতমাস্থিতঃ সন্ শয়ান এবাশ্নাতি স্মেত্যন্বয়ঃ ; আজগরং ব্রতং নামৈকত্রৈব স্থিত্বা প্রারব্ধকর্ম্মোপভোগঃ। অবমেহতি মূত্রয়তি, হদতি পুরীষমুৎসৃজতি, উচ্চরিতে পুরীষে চেষ্টমানো বিলুঠন্ তেনৈবাদিগ্ধা আলিপ্তা উদ্দেশা দেহপ্রদেশা যস্য সঃ ॥

৩৩। বীভৎসমিবাশঙ্ক্যাহ—তস্যেতি। পুরীষস্য সুরভিণা গন্ধেন সৌগন্ধ্যং যস্য স বায়ুঃ ॥

৩৪। এবং গবাদিচর্য্যয়া পানাদি করোতি স্ম। তদেবাহ—ব্রজন্নিত্যাদিনা। কাকমৃগগবামিবান্যদপি চরিতং বৃত্তির্যস্য ॥

৩৫। নানাযোগচর্য্যা আচরতীতি তথা। লোকযাত্রাপরিহারায় যোগিভিরেবং বর্ত্তিতব্যমিতি প্রদর্শনায় তথা কৃতবান্, বস্তুতস্তু ভগবান্, যতোঽবিরতঃ পরমমহানুত্তরোত্তরশতগুণত্বেনোক্তো য আনন্দস্তদনুভবস্বরূপঃ, কিঞ্চ বাসুদেবে আত্মনোঽব্যবধানেনাভেদেন ন বিদ্যতেঽন্যেষামিবান্তরা মধ্যে উদরস্য দেহোপাধের্ভাবস্তেন নিত্যনিবৃত্তোপাধিত্বেনেত্যর্থঃ। স্বত এব সিদ্ধৈঃ সমস্তৈরর্থৈঃ ফলৈঃ পরিপূর্ণত্বাদ্ যোগৈশ্বর্য্যাণি নাভ্যনন্দৎ। বৈহায়সং খেচরত্বম্, মনোজবং মনস ইব দেহস্য বেগম্, দূরগ্রহণং দূরদর্শনম্। হে নৃপ ! হৃদয়েন মনসা ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে

পঞ্চমোঽধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠে লীনাভিমানস্য দেহত্যাগক্রমাভিধা।
প্রদহন্তং দবাগ্নিং যঃ পশ্যন্নপি ন পশ্যতি ॥ (১)

১। যোগৈশ্বর্য্যাণি নাভ্যনন্দদিত্যুক্তম্, তত্র পৃচ্ছতি—নেতি। ভগবঃ! হে ভগবন্! যোগেন সমীরিতমুদ্দীপিতং যজ্‌জ্ঞানং তেনাবভর্জ্জিতানি দগ্ধানি কর্ম্মবীজানি রাগাদীনি যৈস্তেষাম্, যদৃচ্ছয়া প্রাপ্তানি যোগৈশ্বর্য্যাণি পুনঃ ক্লেশদানি ভবিতুং নার্হন্তি ; অতঃ কিমিতি নাভ্যনন্দদিত্যর্থঃ ॥

২। অঙ্গীকৃত্য পরিহরতি—সত্যমিতি। একে বুদ্ধিমন্তোঽনবস্থানস্য চঞ্চলস্য মনসো বিশ্বাসং ন সঙ্গচ্ছন্তে, ন সম্যক্ প্রাপ্নুবন্তি। শঠঃ কিরাতো যথা ধৃতেষ্বপি মৃগেষু, শঠে কিরাতো যথা মৃগা ইতি সপ্তম্যন্তং বা। পাঠান্তরে শঠো বঞ্চকঃ, কিরাতো বণিগ্‌ব্যবহর্ত্তরি যথা তস্মিন্ বা ব্যবহর্ত্তা বিশ্বাসং ন যাতীত্যর্থঃ। পাক্ষিকোঽপি দোষো বর্জ্জনীয় ইত্যুপদেষ্টুং নাভ্যনন্দদিতি ভাবঃ ॥

৩। তত্র হেতুঃ—যদ্বিশ্রম্ভাদ্ যস্য মনসো বিশ্বাসাচ্চিরাচ্চীর্ণং বহু-কালসঞ্চিতং তপশ্চস্কন্দ সুস্রাব, ঐশ্বরং বিষ্ণোর্মোহিনীরূপসন্দর্শনেন। যদ্বা, ঈশ্বরাণাং সমর্থানামপি সৌভরিপ্রভৃতীনাং তপঃ ॥

৪। নিত্যমিতি। কৃতবিশ্বাসো যো যোগী, তদীয়ং মনঃ কামস্য তমনু যে অরয়স্তেষাঞ্চ ছিদ্রমবকাশং দদাতি। যথা কৃতবিশ্বাসস্য পত্যুঃ পুংশ্চলী জায়া জারাণামবকাশং দত্ত্বা পতিং ঘাতয়তি, তথা মনোঽপি কামাদিভির্যোগিনং ভ্রংশয়তীত্যর্থঃ ॥

৫। অরীন্ কথয়ন্নুপসংহরতি—কাম ইতি। যন্মূলো যন্নিমিত্তো ভবতি, তন্মনঃ কো নু বুধঃ স্বীকুর্য্যাৎ, স্বাধীনমিতি মন্যেত ॥

৩৪—

৬। প্রাসঙ্গিকং সমাপ্য প্রস্তুতমাহ—অথেতি। অখিলানাং লোক-পালানাং ললামো মণ্ডনভূতোঽপ্যুপরতা বাধিতানুবৃত্তির্যস্মাৎ স উপ-ররাম, লিঙ্গদেহাভিমানং জহৌ। বিলক্ষণৈরনেকপ্রকারৈরবধূতবেশাদিভির্ন বিলক্ষিতো ভগবৎপ্রভাবো যস্মিন্। সাম্পরায়বিধিং দেহত্যাগপ্রকারম্। আধারাধেয়ভাবব্যাবৃত্ত্যর্থমাহ — অনর্থান্তরভাবেনাভেদেন। উপাসনা-ব্যাবৃত্ত্যর্থমাহ—অসংব্যবহিতম্ ॥

৭। মনসা স্বয়ং ত্যক্তেঽপ্যভিমানে কেনাপি সংস্কারেণ দেহঃ প্রচলতি যথা কুলালচক্রম্, সোঽয়মভিমানাভাসস্তেন। স চ জীবন্মুক্তানামবিদ্যা-বাসনয়া ভবতীতি ততো বিশেষমাহ—যোগমায়াবাসনয়েতি। কোঙ্কাদীন্ দেশান্ গতঃ সন্ কয়াপি বাসনয়াস্যে কৃতোঽশ্মকবলো যেন। অসংবীতো নগ্নঃ ॥

৮। সমীরবেগেন বিধূতানাং কম্পিতানাং বেণূনাং সজ্ঘর্ষণেন জাত উগ্রো দাবানল আলেলিহানঃ সর্ব্বতো গ্রসন্ ॥

৯। অবধূতবেশেন ঋষভদেবস্তত্র গত ইত্যেতস্য সূচকমাহ—যস্য কিলাশ্রমাতীতমনুচরিতং তদ্দেশবাসিভ্য উপাকর্ণ্য অর্হন্নিতি নাম যস্য স রাজা স্বয়ং তদুপশিক্ষ্য শিক্ষিত্বা কুপথশ্চাসৌ পাষণ্ডশ্চ তং নিজমনীষয়া সম্প্রবর্ত্তয়িষ্যত ইত্যন্বয়ঃ। তত্র হেতুঃ—কলাবিত্যাদি। ভবিতব্যেন প্রাণিনাং পূর্ব্বসঞ্চিতপাপফলেন ॥

১০। যেন প্রবর্ত্তকেন মনুজেষ্বপসদা নিকৃষ্টাঃ, স্ববিধিনা নিয়োগো যস্মিন্ শৌচচারিত্রে তদ্বিহীনা দেবাবজ্ঞারূপাণ্যস্নানাদীনি কুব্রতানি গৃহ্ণানা বেদাদীনাং বিদূষকা ভবিষ্যন্তি ॥

১১। তৎফলঞ্চান্ধং তমঃ প্রাপ্স্যন্তীত্যাহ—তে চেতি। অর্ব্বাক্ত-নয়াবেদমূলয়া নিজলোকযাত্রয়া স্বেচ্ছাকৃতপ্রবৃত্ত্যাশ্বস্তাঃ কৃতবিশ্বাসাঃ ॥

১২। নন্থ তর্হ্যনর্থকারী কিমর্থোঽয়মৃষভাবতারঃ? তত্রাহ—অয়মিতি। রজোব্যাপ্তানাং জনানাং মোক্ষমার্গোপশিক্ষণার্থম্ ॥

১৩। তস্য কৈবল্যোপশিক্ষণস্যানুরূপান্, অধি অধিকং পুণ্যং যস্মিন্, এতদ্ভারতং বর্ষম্; ঋষভাস্যবতারযুক্তানি কর্ম্মাণি ॥

১৪। প্রিয়ব্রতস্য বংশোঽবদাতঃ শুদ্ধঃ, যত্র বংশে, যদ্ যস্মাদকর্ম্ম মোক্ষস্তস্য হেতুং ধর্ম্মং চচার ॥

১৫। অপরঃ কো নু যোগী অস্য কাষ্ঠাং দিশমপ্যনুগচ্ছেৎ? যো যোগী যেন ঋষভেণাসত্তয়াবস্তুত্বেনোদস্তা নিরস্তা যোগমায়াঃ সিদ্ধীর্বাঞ্ছতি। কথম্ভূতাঃ? কৃতঃ প্রযত্নো যাসু, তদর্থং প্রযত্নঞ্চ করোতীত্যর্থঃ। যদ্বা, কথম্ভূতাঃ? উদস্তাঃ কৃতপ্রযত্নাঃ সেবিতুমুদ্যতা অপীত্যর্থঃ ॥

১৬। বিশুদ্ধাচরিতং যদীরিতং কথিতং তৎসমস্তং দুশ্চরিতমভিতো হরতীতি তথা। পরমমহামঙ্গলানাময়নঞ্চ, অবহিতঃ সন্, অনয়োরপি শ্রোতৃশ্রাবয়িত্রোরবিশেষেণ ভক্তিঃ সম্যগনুবৃত্তা ভবতীত্যর্থঃ ॥

১৭। ভক্তেঃ পরমপুরুষার্থতামাহ—যস্যাং ভক্তাবেব, ন তু যোগাদিষু, অনুসবনমবিরতমাত্মানং স্নাপয়ন্তঃ স্বয়মাসাদিতমপ্রার্থিতং ভগবতা স্বয়মেব দীয়মানমপি। অনাদরে হেতুঃ—ভগবদীয়ত্বেনৈব পরিতঃ সমাপ্তাঃ সম্যক্-প্রাপ্তাঃ সর্ব্বে পুরুষার্থা যৈস্তে ॥

১৮। নন্থ ভগবতোঽতিসুলভত্বদর্শনান্মোক্ষস্য চাতিদুর্লভত্বাদিয়মতি-স্তুতিরেবেত্যাশঙ্ক্যাহ—হে রাজন্; ভবতাং পাণ্ডবানাং যদূনাঞ্চ পতিঃ পালকঃ, গুরুরুপদেষ্টা, দৈবমুপাস্যঃ, প্রিয়ঃ সুহৃৎ, কুলস্য পতির্নিয়ন্তা, কিং বহুনা, ক্ব চ কদাচিদ্ দৌত্যাদিষু বঃ পাণ্ডবানাং কিঙ্করোঽপ্যাজ্ঞানুবর্ত্তী। অস্তু নামৈবম্, তথাপ্যন্যেষাং নিত্যং ভজতামপি মুক্তিং দদাতি, ন তু কদাচিদপি সপ্রেমভক্তিযোগম্ ॥

১৯। বর্ণিতমৃষভাবতারং নমস্করোতি। নিত্যমনুভূতং যন্নিজং স্বরূপং স এব লাভস্তেন নিবৃত্তা তৃষ্ণা যস্য সঃ। অতদ্রচনয়া দেহাত্মর্থমনোরথেন শ্রেয়সি বিষয়ে চিরং সুপ্তা বুদ্ধির্যস্য তস্য জনস্য করুণয়া নির্ভয়মাত্মস্বরূপং ব আখ্যাতবান্, তস্মৈ নমঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
ষষ্ঠোঽধ্যায়ঃ॥ ৬॥

সপ্তমোঽধ্যায়ঃ

অধ্যায়ানাং ত্রয়েণৈবমৃষভাখ্যানমীরিতম্।
অষ্টভির্ভরতাখ্যানমতঃ প্রস্তূয়তেঽদ্ভুতম্[১]॥ (১)

সপ্তমে ভরতো রাজ্যে চিরং যজ্ঞৈর্হরিং যজন্।
আরব্ধকর্ম্মনির্ব্বাণে হরিক্ষেত্রেঽভজদ্ধরিম্॥ (২)

১। সঞ্চিন্তিতঃ সঙ্কল্পেনৈব রাজ্যাদৌ নিযুক্তঃ॥

২। আত্মনোঽনুরূপান্, ভূতাদিরহঙ্কার ইব ভূতসূক্ষ্মাণীতি সন্ততিবৃদ্ধৌ দৃষ্টান্তঃ॥

৩। ভারতমিতি স্বনাম্নাখ্যাপকত্বেন ধর্ম্মাত্যতিশয়ঃ সূচিতঃ॥

৪। বহুবিৎ—সর্ব্বজ্ঞঃ॥

৫। যজ্ঞা অযূপাঃ, ক্রতবঃ সযূপাস্তদ্রূপম্; উচ্চাবচৈর্মহদ্ভিরল্পৈশ্চ ক্রতুভিঃ কর্ম্মভিঃ শ্রদ্ধয়া ইজে চ। তানেবাহ—আহৃতাঃ স্বাধিকারেণাত্মসাৎ-

---

১। অমৃতম্ (ক, গ, ঘ)।

ক্বতা যেঽগ্নিহোত্রাদয়স্তেষাং প্রকৃতিবিকৃতিভিঃ। অগ্নিহোত্রাদয়ো দ্বিবিধাঃ —সকলাঙ্গযুক্তাঃ প্রকৃতয়ঃ, বিকলাঙ্গা বিকৃতয় ইতি, তৈর্দ্বিবিধৈরপীষ্টবানিত্যর্থঃ। অনুসবনমিত্যন্তং বা, চাতুর্হোত্রবিধিনেত্যন্তং বা গদ্যম্॥

৬। কিঞ্চ, সম্প্রচরৎসু প্রবর্ত্তমানেষু নানাযাগেষু বিরচিতানুষ্ঠিতাঙ্গক্রিয়া যেষাং তেষু, যদপূর্ব্বং তদ্বাসুদেব এব ভাবয়মানশ্চিন্তয়ন্ স যজমানো যজ্ঞভাগভাজো যে দেবাঃ সূর্য্যাদয়স্তান্ পুরুষস্য বাসুদেবস্যাবয়বেষু চক্ষুরাদিষ্বভ্যধ্যায়ন্ন তু তৎপৃথক্ত্বেনেত্যর্থঃ[১]। অপূর্ব্বে পক্ষদ্বয়ং মীমাংসকানাম্, তদানীমেব সূক্ষ্মত্বেনোৎপন্নং ফলমেবাপূর্ব্বং কালান্তরফলোৎপাদিকা কর্ম্মশক্তির্বেতি। তদুক্তম্—'যাগাদেব ফলং তদ্ধি শক্তিদ্বারেণ সিধ্যতি। সূক্ষ্মং শক্ত্যাত্মকং বাপি ফলমেবোপজায়তে॥' ইতি। তদেবাহ—ক্রিয়াফলং ধর্ম্মাখ্যমিতি চ। নন্বু যত্নঙ্গং দেবতাঃ কর্ম্মপ্রধানমিতি মতম্, তর্হি কর্ত্তৃনিষ্ঠমপূর্ব্বং স্যাৎ? তদুক্তম্—'কর্ম্মভ্যঃ প্রাগযোগ্যস্য কর্ম্মণঃ পুরুষস্য বা। যোগ্যতা শাস্ত্রগম্যা যা পরা সাপূর্ব্বমিষ্যতে॥' ইতি। অথ দেবতাপ্রধানং কর্ম্ম তু দেবতারাধনার্থং তদা দেবতাপ্রসাদরূপত্বাদ[২]পূর্ব্বস্য দেবতাশ্রয়ত্বমেব যুক্তম্। কর্ম্মণাং প্রাগ্ যোগ্যস্য প্রোক্ষণাদ্যপূর্ব্বস্যেব ব্রীহ্যাদ্যাশ্রয়ত্বম্। কুতো বাসুদেবাশ্রয়মপূর্ব্বং ভাবয়তি? উচ্যতে—যদি কর্ত্তৃনিষ্ঠমপূর্ব্বং স্যাৎ, তর্হি বাসুদেবস্যান্তর্যামিণঃ প্রবর্ত্তকত্বেন মুখ্যকর্ত্তৃত্বাত্তদাশ্রয়মেবাপূর্ব্বম্, ন তু তৎপ্রযোজ্য-যজমানাশ্রয়ম্, 'শাস্ত্রফলং প্রযোক্তরি' ইতি ন্যায়াৎ; অন্যথা ঋত্বিজামপ্যপূর্ব্বাশ্রয়ত্বপ্রসঙ্গাৎ। তদেবাহ—সাক্ষাৎ কর্ত্তরীতি। দেবতাশ্রয়ত্বেঽপি বাসুদেবাশ্রয়ত্বমেবেত্যাহ —পরদেবতায়ামিতি। পরদেবতাত্বে হেতুঃ—সর্ব্বদেবতালিঙ্গানাং তত্তদ্দেবতাপ্রকাশকানাং মন্ত্রাণাং যেঽর্থা ইন্দ্রাদিদেবতাস্তেষাং নিয়ামকতয়া তস্যৈব প্রসাদনীয়ত্বাৎ ফলদাতৃত্বাচ্চ যুক্তমেবাপূর্ব্বাশ্রয়ত্বমিত্যর্থঃ। এবং

১। ইত্যন্বয়ঃ (ঘ); ২। দেবতাপ্রধানরূপত্বাদ্ (গ)।

ভাবনমেবাত্মনো নৈপুণ্যং কৌশলম্, তেন মৃদিতাঃ ক্ষীণাঃ কষায়া রাগাদয়ো যস্য। অধ্বর্য্যুভিরিতি বহুবচনং নানাকর্ম্মাভিপ্রায়েণ॥

৭। এবম্ভূতয়া কর্ম্মবিশুদ্ধ্যা বিশুদ্ধসত্ত্বস্য ভক্তিরজায়তেত্যন্বয়ঃ[১]। ক্ব? অন্তর্হৃদয়ে য আকাশঃ স এব শরীরমভিব্যক্তিস্থানং যস্য তস্মিন্ ব্রহ্মণি। কীদৃশে? মহাপুরুষরূপস্যোপলক্ষণমাকারো যস্য তস্মিন্। কিঞ্চ, শ্রীবৎসাদিভিরুপলক্ষিতে, নিজপুরুষাণাং নারদাদীনাং হৃদি লিখিতবন্নিশ্চলতয়া স্থিতেনোক্তেন পুরুষরূপেণাত্মনি স্বমনসি বিরোচমানে। কীদৃশী ভক্তিঃ? অত্যন্তাতিশয়েনৈধমানো রয়ো বেগপ্রকর্ষো যস্যাঃ॥

৮। এবমনয়া বৃত্ত্যা[২] বর্ষাণামযুতানি, তেষাং সহস্রম্, তৎপর্য্যন্তকালেঽবসিতো নিশ্চিতঃ কর্ম্মনির্ব্বাণাবসরো রাজ্যভোগাদৃষ্টসমাপ্তিসময়ো যেন সঃ। অধিকৃত্য ভুজ্যমানং রিকৃথং ধনং যথাবিভাগং বিভজ্য সকলসম্পদাং নিকেতাদাশ্রয়াৎ স্বগৃহাৎ পুলহাশ্রমং হরিক্ষেত্রং প্রবব্রাজ॥

৯। যত্র ক্ষেত্রে বিদ্যাধরকুণ্ডে, বাৎসল্যং কর্ত্তৃ, তেন সন্নিহিতঃ ক্রিয়তে; ভক্তানামপেক্ষিতেন রূপেণ সন্নিহিতো ভবতীত্যর্থঃ॥

১০। আশ্রমস্থানান্যুভয়ত উপর্য্যধশ্চ নাভির্যেষাম্, তৈর্দৃশচ্চক্রৈঃ শিলামধ্যগতৈশ্চক্রৈশ্চক্রনদী গণ্ডকী সরিতাং শ্রেষ্ঠা পবিত্রীকরোতি॥

১১। একলঃ—একঃ, আরাধনং সমীহমানঃ কুর্ব্বাণঃ; বিবিক্তঃ শুদ্ধঃ, অতএবোপরতো বিষয়াভিলাষো যস্য সঃ; উপভৃতঃ[৩] সংবৃদ্ধ উপশমো যস্য॥

১২। প্রবর্দ্ধমানানুরাগস্য ভরেণ যদ্দ্রুতং দ্রবীভূতং হৃদয়ম্, তস্মিন্ শৈথিল্যমৌৎসুক্যমে যস্য; আত্মনি দেহে উদ্ভিদ্যমানং[৪] রোমপুলককুলং রোমাঞ্চবৃন্দং যস্য; 'ক'কারঃ সমাসান্তঃ। ঔৎকণ্ঠ্যাৎ প্রবৃত্তেন প্রণয়বাষ্পেণ নিরুদ্ধোঽবলোকো যয়োস্তে নয়নে যস্য সঃ; এবং বর্ত্তমানস্তামপি

১। অন্বয়ঃ (ঘ); ২। এবমনুবৃত্ত্যা (ঘ); ৩। উপসংভৃতঃ (খ); ৪। উচ্ছিদ্যমানং (গ)।

ভগবৎসপর্য্যাং ন সস্মারেত্যন্বয়ঃ। তত্র হেতুঃ—নিজরমণস্য স্বপ্রীতিদাতুর্য অরুণে চরণারবিন্দে, তয়োরনুধ্যানেন পরিচিতঃ সমৃদ্ধো ভক্তিযোগস্তেন পরিপ্লুতঃ সর্ব্বতো ব্যাপ্তঃ পরমাহ্লাদঃ পরমানন্দো যস্মিন্ গম্ভীরহৃদয়হ্রদে তস্মিন্নবগাঢ়া নিমগ্না ধিষণা যস্য ॥

১৩। ধৃতানি ভগবদ্ব্রতানি যেন সঃ, ভগবন্তং সূর্য্যমণ্ডলেঽভ্যুপ-তিষ্ঠন্নেতদু হোবাচেত্যন্বয়ঃ। কীদৃশঃ? এণ্যা হরিণ্যা অজিনমৈণেয়ম্, তদেব বাসস্তেনানুসবনাভিষেকেণার্দ্রাঃ কপিশাশ্চ যাঃ কুটিলা জটাস্তাসাং কলাপেন চ বিরোচমানঃ। সূর্য্যপ্রকাশিকয়া ঋচা হিরণ্ময়ং 'ধ্যেয়ঃ সদা সবিতৃমণ্ডলমধ্যবর্ত্তী' ইত্যাদিনোক্তম্। উজ্জিহানে উদ্গচ্ছতি সতি। 'উজ্জিহাস' ইতি সকারান্তপাঠে সনন্তাৎ 'পচাদ্যচ্', অর্থস্তু স এব ॥

১৪। পরোরজঃ রজসঃ প্রকৃতেঃ পরং শুদ্ধসত্ত্বাত্মকম্, সবিতুর্দেবস্য সূর্য্যস্য ভর্গঃ স্বরূপভূতং তেজঃ, জাতং বেদো ধনং কর্ম্মফলং যস্মাত্তৎ, কর্ম্ম-ফলদমিত্যর্থঃ। অত্র হেতুঃ—যন্মনসৈবেদং বিশ্বং জজান সসর্জ্জ, পুনশ্চাদঃ সৃষ্টং বিশ্বমন্তর্যামিরূপেণ প্রবিশ্য গৃধ্রাণমাকাঙ্ক্ষন্তম্, হংসং জীবং স্বরেতসা[১] চিচ্ছক্ত্যা বিচষ্টে পশ্যতি, পালয়তীত্যর্থঃ। নৃষু সীদত্যুপাধিতয়া তিষ্ঠতীতি নৃষদ্বুদ্ধিস্তস্যাং রিঙ্গিং রিঙ্গণং গতিং রাতি দদাতীতি নৃষদ্রিঙ্গিরাম্। 'বা ছন্দসি' ইত্যমি পূর্ব্বরূপত্বাভাবঃ। তদ্ভর্গঃ; ইমঃ শরণং ব্রজাম[২] ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে

সপ্তমোঽধ্যায়ঃ ॥ ৭ ॥

১। স্বরেতসা (ঘ); ২। ব্রজামঃ (ঘ)।

অষ্টমোঽধ্যায়ঃ

অষ্টমে ভজতো বিষ্ণুং তস্য কর্ম্মান্তরায়তঃ।
এণ[১]রক্ষাপ্রসক্তস্য জাতমেণত্বমীর্য্যতে ॥ (১)
কৃপয়াপি কৃতঃ সঙ্গঃ পতনায়ৈব-যোগিনঃ।
ইতি প্রদর্শয়ন্নাহ ভরতস্যৈণপোষণম্ ॥ (২)

১। নৈয়মিকং নিত্যনৈমিত্তিক-বিধিপ্রাপ্তমাবশ্যকমর্থপ্রাপ্তং মূত্রোৎসর্গাদি, কৃতমভিষেকাদিকং যেন; ব্রহ্মাক্ষরং প্রণবং জপন্, উদকান্তে নদ্যাস্তীরে ॥

২। জলাশয়াভ্যাসং নদ্যাঃ সমীপম্ ॥

৩। পেপীয়মানেঽত্যাসক্ত্যা পীয়মানে সতি, তাবদেব তৎক্ষণমেবাবিদূরেণ সন্নিধৌ, মৃগপতেঃ সিংহস্যোন্নাদো মহান্নাদ উদগাত্ ॥

৪। প্রকৃত্যা স্বভাবত এব বিক্লবা ব্যাকুলা, সুতরান্তু হরিভয়স্যাভিনিবেশেন ব্যগ্রং ব্যাকুলং হৃদয়ং যস্যাঃ; পারিপ্লবদৃষ্টিঃ পরিভ্রান্তনেত্রা; ন গতা তৃষা তৃড়্ যস্যাঃ; উচ্চক্রাম নদীমুল্লঙ্ঘিতবতী ॥

৫। অন্তর্ব্বত্ন্যা গর্ভিণ্যা উরুভয়েন স্থানাদ্বিচলিতো যোনের্নির্গতঃ সন্ স্রোতসি প্রবাহে নিপতিতঃ ॥

৬। তৎপ্রসবো গর্ভপাতঃ, উৎসর্পণমুল্লঙ্ঘনম্, ভয়ঞ্চ,—এতৈঃ খেদেনাতুরা পীড়িতা; দর্য্যাং গিরিগুহায়াং হরিণবধূর্নিপপাত, অথানন্তরং মৃতা চ ॥

৭। এণকুণকং হরিণবালকম্, অপবিদ্ধং বন্ধুভিস্ত্যক্তম্। ইত্যেতৈঃ কুণক[২]ত্বাদিহেতুভির্যানুকম্পা, তয়ানয়ৎ ॥

৮। কৃতো নিজঃ স্বীয় ইত্যভিমানো যেন। পোষণং তৃণাদিনা, পালনং বৃকাদিভ্যো রক্ষণম্, লালনং চুম্বনাদিনা, প্রীণনং কণ্ডূয়নাদিনা,

---

১। প্রাণ- (ক); ২। কৃপণ- (ঘ)।

এতৈর্যদনুধ্যানমাসক্তিস্তেনৈবাত্মনো নিয়মাঃ স্নানাদয়ঃ, যমা অহিংসাদয়স্তৎ-সহিতা ঈশ্বরপরিচর্য্যাদয়শ্চ প্রত্যহমেকৈকশো বিযুজ্যমানাঃ সন্তঃ, কতি-পয়েনাহর্গণেন সর্ব্ব উৎসন্না বভূবুঃ ॥

৯। আসক্তিং প্রপঞ্চয়তি—'অহো' ইত্যাদিনা 'ইতি কৃতানুষঙ্গঃ' ইত্যেতৎপর্য্যন্তেন। ঈশ্বররথচরণঃ—কালচক্রম্, তস্য পরিভ্রমণবেগেন স্বগণাদিভ্যো বিভ্রংশিতঃ। 'মা' ইতি মাঞ্চ শরণং প্রাপিতো মামেব মাতাপিত্রাদিবুদ্ধ্যোপেয়ায় প্রাপ্তঃ। যৌথিকান্ যূথসজ্যাতিনঃ; অনসূয়ুনা এতন্নিমিত্তং মম স্বার্থো ভ্রশ্যতীতি দোষদৃষ্টিমকুর্ব্বতা ॥

১০। তদেবাহ—নূনং হীতি ॥

১১। ইত্যেবং কৃতোঽনুষঙ্গ আসক্তির্যেন; মৃগজহুনা[১] মৃগাপত্যেন সহ স্নেহেনানুবদ্ধং হৃদয়ং যেন ॥

১২। স্নেহানুবন্ধমেব প্রপঞ্চয়তি—'কুশকুসুম'-ইত্যাদিনা 'স্বধয়তি' ইত্যন্তেন। শালাবৃকাঃ—শ্বানঃ। যদা ভয়ং শঙ্কমানো ভবতি, তদা তেন সহ বনং সমাবিশতি ॥

১৩। অতিশয়িতঃ প্রণয়ভরো যস্য, তদ্ধৃদয়ং যস্য সঃ॥

১৪। ক্রিয়ায়াং দেবপূজাদিলক্ষণায়াম্, বর্ষপতির্ভরতঃ, প্রকৃতিস্থেন স্বস্থেন[২], স্তাৎ ভূয়াৎ ॥

১৫। অন্যদাদর্শনে সকরুণং যথা ভবতি 'এবমনুশোচন্' ইতি 'হোবাচ' ইত্যন্বয়ঃ। অতিতর্ষেণাত্যৌৎসুক্যেন; হরিণকুণকবিরহেণ বিহ্বলে হৃদয়ে সন্তাপো যস্য; কশ্মলং মোহং প্রাপিতঃ সন্ ॥

১৬। 'অপি' ইতি সম্ভাবনায়াম্, 'বত' ইত্যনুকম্পায়াম্, 'অহো' ইতি খেদে। শঠকিরাতয়োরিব বঞ্চনপরা ক্রূরা চ মতির্যস্যাকৃতসুকৃতস্য

১। -জন্তুনা (গ); ২। সুস্থেন (খ)।

নির্ভাগ্যস্য মম তচ্ছাঠ্যাদিকমগণয়ন্নচিন্তয়ন্নাগমিষ্যতি কিম্? অপরাধা-চিন্তনে হেতুঃ—আত্মপ্রত্যয়েন স্বচিত্তশুদ্ধ্যা কৃতবিশ্বাসঃ সন্ সুজনো যথা ন গণয়তি, তদ্বৎ ॥

১৭। শষ্পাণি—কোমলতৃণানি ॥

১৮। নৈকচরো যূথচরঃ শূকরাদিঃ; যদ্বা, এক এব চরতি যঃ ক্রূরস্বভাবো ব্যাঘ্রাদির্ন ভক্ষয়তি কিম্?

১৯। সকললোকস্য ক্ষেমো যস্মাৎ স উদয়ো যস্য; বেদত্রয়ী আত্মা স্বরূপং যস্য; স সূর্য্যো নিম্লোচত্যস্তং যাতি। মৃগবধ্বা ন্যাসো নিক্ষেপভূতঃ ॥

২০। হরিণ এব রাজকুমার আগত্য মামপিস্বিৎ সুখয়তি সুখয়িষ্যতীত্যর্থঃ। কিং কুর্ব্বন্? বিবধৈ রুচিরৈর্দ্দর্শনীয়ৈর্নিজৈর্মৃগদারকবিনোদৈঃ স্বীয়ানাং খেদমপনুদন্ ॥

২১। সম্ভবতি চৈতদিত্যাহ—ক্ষ্বেলিকায়াং ক্রীড়ায়াং মৃষা যঃ সমাধিস্তেনামীলিতে দৃশৌ যেন তং মাং প্রেমসংরম্ভেণ প্রণয়কোপেন পৃষজ্জলবিন্দুস্তদ্বদপরুষেণ মৃদুনা বিষাণাগ্রেণ লুঠতি সংঘট্টয়তি ॥

২২। আসাদিতং হবির্যস্মিন্ তস্মিন্ বর্হিষি দর্ভে দন্তাকর্ষণাদিনা চাপলেন দূষিতে সতি। দূষিত্বেতি পাঠে বর্হিষি বিষয়ে দূষণং কৃত্বেত্যর্থঃ। ময়াধিক্ষিপ্তঃ সন্ তৎক্ষণমেবোপরতক্রীড়ো নিশ্চল আস্তে ॥

২৩। ইতি বহুধা প্রলপ্যোত্থায় বহির্নির্গত্য তৎখুরখাতভূভাগোপলম্ভ-সম্ভ্রান্তহৃদয় আহ—কিং বেতি। অরে অহো, অনয়া ক্ষিত্যা কিং বা তপ আচরিতম্? তপস্বিন্যা সভাগ্যয়া, যদ্ যস্মাদিয়ং সবিনয়স্য কৃষ্ণ-সারতনয়স্য তনুতরাঃ সুভগাশ্চ শিবতমাশ্চাখরাশ্চ খুরা যেষু তেষাং পদানাং তত্র তত্রাঙ্কিতানাং পঙ্‌ক্তিভির্দ্রবিণং মৃগস্তেন বিরহিতস্যাতএবাতুরস্য

দুঃখিতস্য মম দ্রবিণমার্গং সূচয়ন্তী সতী স্বাত্মানঞ্চ তাভিঃ কৃতমণ্ডনং দ্বিজানাং দেবযজনং যজ্ঞভূমিং করোতি। 'যস্মিন্ দেশে মৃগঃ কৃষ্ণস্তস্মিন্ ধর্ম্মান্ নিবোধত' ইতি স্মৃতেঃ॥

২৪। তাবদুদিতে চন্দ্রে মৃগং দৃষ্ট্বা স্বমৃগত্বং সম্ভাবয়ন্নাহ—অপি-স্বিদিতি॥

২৫। চন্দ্ররশ্মিস্পর্শসুখং প্রাপ্যাহ—কিং বেতি সম্ভাবনায়াম্। আত্মজ-বিশ্লেষেণ জ্বরস্তাপঃ, স এব দবদহনস্তস্য জ্বালাভিরুপতপ্যমানা হৃদয়রূপা স্থলনলিনী যস্য। জলস্থং পদ্মং তাপং সোঢ়ুং ক্ষমমিতি স্থলগ্রহণম্। উপসৃতোঽনুগতো মৃগীতনয়ো যেন তং মাং চন্দ্রঃ স্বধয়তি[১] শান্তিং গময়তি। কৈঃ? শিশিরঞ্চ তচ্ছান্তঞ্চ ময্যনুরাগেণ গুণিতঞ্চাবর্ত্তিতং পুনঃ পুনঃ স্রবদ্‌যদ্বদনসলিলং তদেবামৃতময়া গভস্তয়স্তৈঃ। লোকে হি মন্ত্র-বাদিনো বদনসলিলৈস্তাপং শময়ন্তীতি প্রসিদ্ধম্। উপসৃত্য মৃগীতনয় ইতি পাঠে মনোরথান্তরমেতৎ। উপসৃত্য প্রাপ্তো মৃগীতনয়ঃ কিংবা মাং স্বধয়িষ্যতীতি। শেষং সমানম্॥

২৬। মৃগদারকবদাভাসমানেন ভগবদারাধনলক্ষণাৎ কর্ম্মণশ্চ বি-ভ্রংশিতঃ। প্রারব্ধকর্ম্মত্বে হেতুঃ—কথমিতরথেতি। সাক্ষাৎ স্বপুত্রবৎ কথমাসঙ্গঃ স্যাৎ? পূর্ব্বং পরিত্যক্তা দুস্ত্যজা ঔরসা যেন। অন্তরায়েণ বিহতং যোগারম্ভণং যস্য, আত্মানমবিগণয়ত আত্মচিন্তামকুর্ব্বতস্তাবদেব তীব্রবেগঃ কালো মৃত্যুসময়শ্চাপদ্যত॥

২৭। লোকং দেহং মৃগেণ সহিতং বিসৃজ্য প্রাকৃত ইব মৃগশরীর-মবাপ। কথম্ভূতঃ? কলেবরং মৃতমনু ন মৃতা ন বিনষ্টা পূর্ব্বজন্মানুস্মৃতির্যস্য॥

২৮। আহ স্বচিত্তে[২]॥

১। স্বধয়তি (গ); ২। অচিরেণ (গ)।

২৯। অহো কষ্টম্, ধীরাণাং মার্গাদ্ ভ্রষ্টোঽহম্। ভ্রংশমেবাহ—যদ্‌যতো বিমুক্তাঃ সমস্তাঃ সঙ্গা যেন, বিবিক্তং পুণ্যারণ্যং শরণং যস্য, আত্মবতো ধীরস্য মম মনঃ সর্ব্বেষাং ভূতানামাত্মনি বাসুদেবে সমাবেশিতং সমাহিতঞ্চ নিশ্চলং সৎ আরাদ্‌দূরাদেব সুস্রাব গলিতং নিঃসৃতম্। কেন সমাবেশিতম্? তস্যানুশ্রবণাদিষ্বভিযোগেনাভিনিবেশেনাশূন্যাঃ সকলা যামা যস্মিংস্তেন কালেন॥

৩০। নিগূঢ়োঽনাবিষ্কৃতো নির্ব্বেদো যেন। শালবৃক্ষোপলক্ষিতং গ্রামম্। কালঞ্জরাদ্ যত্র হরিণো জাতস্তস্মাৎ পর্ব্বতাৎ॥

৩১। আত্মৈব সহচরো যস্য, একাকী। প্রতীক্ষণস্যৈব প্রপঞ্চঃ—মৃগত্বনিমিত্তেতি। তীর্থোদকেন ক্লিন্নমার্দ্রমর্দ্ধোদকস্থমিত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
অষ্টমোঽধ্যায়ঃ॥ ৮॥

নবমোঽধ্যায়ঃ

নবমে জড়বিপ্রত্বে তস্য রাগাদ্যভাবতঃ।
ভদ্রকালীপশুত্বেঽপি নির্ব্বিকারত্বমীর্য্যতে॥ (১)
পিতুঃ প্রাপ্তাত্মবিজ্ঞানো ভরতো মৃগতাং গতঃ।
প্রারব্ধকর্ম্মবেগেণ তদন্তে জড়বিপ্রতাম্॥ (২)

১। আঙ্গিরসগোত্রজাতানাং প্রবরস্য শ্রেষ্ঠস্য শমাদিযুক্তস্য। ত্যাগোঽত্রাতিথ্যাদিভ্যোঽন্নদানাদি, বিদ্যা কর্ম্মবিদ্যা, আত্মজ্ঞানং দেহাদিব্যতিরিক্ত-ভোক্ত্রাত্মজ্ঞানম্, আনন্দো ধর্ম্মসম্পত্তিজঃ, আত্মনা সদৃশাঃ শ্রুতাদয়ো গুণা

যেষাং তে সমানোদরা নব পুত্রা বভূবুঃ। যবীয়স্যাং কনিষ্ঠায়াঞ্চ মিথুনং স্ত্রীপুরুষযুগ্মম্ ॥

২। উৎসৃষ্টং মৃগশরীরং যেন তম্; 'শুচীনাং শ্রীমতাং গেহে যোগভ্রষ্টোঽভিজায়তে' ইতি স্মৃতেঃ ॥

৩। তত্রাপি চান্যসঙ্গাদাত্মনো ভ্রংশমাশঙ্কমানশ্চাত্মানমুন্মত্তাদিরূপেণ দর্শয়ামাসেত্যন্বয়ঃ। কিং কুর্ব্বন্? কর্ম্মবন্ধবিধ্বংসনং শ্রবণং স্মরণম্, গুণানাং বিবরণং কথনঞ্চ যস্য, তদ্ভগবতশ্চরণারবিন্দযুগলং মনসা বিশেষেণ ধারয়ন্। প্রতিঘাতশঙ্কায়াং হেতুঃ—অনুস্মৃতা স্বীয়পূর্ব্বজন্মনামাবলিঃ পরম্পরা যেন সঃ ॥

৪। পুত্রস্নেহেঽনুবদ্ধং মনো যস্য, জড়স্য গার্হস্থ্যানধিকারাৎ সমাবর্ত্তনান্তান্ সংস্কারান্ বিদধানস্তমুপনীয়, উপনীতস্য পুনঃ শৌচাদীংস্তস্যানভিপ্রেতানপি শিক্ষিতবান্। তত্র হেতুঃ—অনুশিষ্টেন হি ভাব্যং পিতুঃ সকাশাৎ পুত্রেণেতি ॥

৫। সোঽপি চ পিতুঃ শিক্ষানির্ব্বন্ধনিবৃত্তয়েঽসধ্রীচীনমসমীচীনমিব করোতি স্ম। উপাকরণ-বেদব্রতাদ্যনন্তরং শ্রাবণাদিমাসেষু বেদানধ্যাপয়িষ্যন্নাদৌ তাবদ্ব্যাহৃতিভিঃ সহ প্রণবশিরঃসহিতাং ত্রিপদীং চৈত্রাদিচতুরো মাসানধীয়ানমপ্যসমবেতরূপং যথা ভবত্যেবং গ্রাহয়ামাস, তাবতাপি কালেন স্বরানুপূর্ব্ব্যা বিযুক্তং ব্যাহৃত্যাদি তস্য নাধিগতমিত্যর্থঃ ॥

৬। আত্মভূতে স্বতনুজেঽনুরাগেণাবেশিতং চিত্তং যেন। শৌচাদীনি যান্যোপকুর্ব্বাণকস্য সাবধিব্রহ্মচর্য্যবতঃ কর্ম্মাণি, তানি তেনানভিযুক্তান্যনাদৃতান্যপি তং পুত্রং প্রত্যনুশাস্যাপ্যপ্রাপ্তপুত্রপাণ্ডিত্যমনোরথঃ স্বয়ং কালেনোপসংহৃতো মৃত ইত্যর্থঃ। অনুশাসননির্ব্বন্ধে পুনস্তমেব হেতুমাহ—অনুশিষ্টেন ভাব্যমিত্যসন্নযোগ্য আগ্রহো যস্য ॥

৭। সপত্ন্যৈ সমর্প্য ; অনুসংস্থয়ানুমরণেন ; অনুসংস্থায়ামিতি সপ্তম্যন্ত-পাঠেঽপ্যয়মেবার্থঃ ॥

৮। ত্রিবৃৎসন্নিবর্ত্তিতুমৈচ্ছন্, নিবৃত্তা ইত্যর্থঃ॥

৯। যদাভিভাষ্যমাণস্তদা তদনুরূপাণি প্রভাষতে। মূল্যমন্তরেণ বলাদ্ যৎ কর্ম্ম কার্য্যতে, সা বিষ্টিঃ, বেতনং মূল্যম্। বিষ্ট্যাদিভিরুপসাদিত-মন্নমভ্যবহরতি পরং ভুঙ্‌ক্তে কেবলম্, ন ত্বিন্দ্রিয়প্রীতয়ে। অত্র হেতু-দ্বয়মাহ—নিত্যং সদা নিবৃত্তং নিমিত্তং যস্মাৎ স উৎপাদকশূন্যঃ স্বসিদ্ধোঽ-ভিব্যঞ্জকশূন্যো বিশুদ্ধঃ কেবলো যোঽনুভবঃ স এবানন্দরূপঃ স্বাত্মা, তস্য লাভ এবম্ভূতোঽহমিতি জ্ঞানম্, তস্যাধিগমঃ প্রাপ্তিরস্তি যস্য। দ্বন্দ্বানি সম্মানাবমানাদীনি, তদ্ধেতুকয়োঃ সুখদুঃখয়োরকৃতদেহাভিমানঃ, তস্মাৎ নেন্দ্রিয়প্রীতিনিমিত্তমভ্যবহরতীত্যন্বয়ঃ ॥

১০। অতএব শীতোষ্ণাদিষ্বনাবৃতাঙ্গো বিচচারেত্যন্বয়ঃ। কীদৃশঃ? পীনঃ পুষ্টঃ, সংহননাঙ্গঃ সংহন্যন্তে নিবিড়ীভবন্ত্যঙ্গানি যস্য, কঠিনাবয়ব ইত্যর্থঃ। স্থণ্ডিলসংবেশনং ভূমিশয়নম্, অনুন্মর্দ্দনং মর্দ্দনাভাবঃ, অমজ্জনং স্নানাভাবঃ, তৈর্যদ্রজস্তেনাপ্রকটং ব্রহ্মবর্চ্চসং ব্রাহ্মং তেজো যস্য; যথা মহামণিরনভিব্যক্ততেজা ভবতি। কুৎসিতেন পটেনাবৃতা কটির্যস্য, উরুমসিনাতিমলিনেন, তত্ত্বতস্তং যে ন জানন্তি তৈর্জনৈরবমতঃ সন্ ॥

১১। যদা তু পরেভ্যঃ কর্ম্মমূল্যেনাহারমপেক্ষমাণো ভবতি, তদা কেদারকর্ম্মণি শালিক্ষেত্রে কর্দ্দমবিলোড়নাদাবাহারপ্রলোভনেন নিযুক্তঃ সন্ করোতি, কিন্ত্বত্র কর্দ্দমস্য প্রক্ষেপে ক্ষেত্রং সমং ভবেদিতি উদ্ধরণে বিষমং স্যাদিত্যাদি ন বেদ। ভ্রাতৃভির্দত্তান্ কণাদীনপ্যমৃতবদ্ভুঙ্‌ক্তে। কণাশ্চূর্ণতণ্ডুলাঃ, পিণ্যাকং তৈলযন্ত্রোদ্ধৃতং তিলকিট্টং ফলীকরণং তুষাঃ, কুল্মাষাঃ কীটদষ্টা মাষাঃ, স্থালী-পুরীষং স্থালীলগ্নং দগ্ধান্নম্ ॥

তস্য রাগাদিরাহিত্যমলৌল্যঞ্চৈবমীরিতম্।
অথান্যচ্চরিতং প্রাহ চিত্রং মৃত্যাবসম্ভ্রমম্॥ (১)

১২। বৃষলপতিঃ শূদ্রসামন্তশ্চৌররাজঃ, আলভত[1] আলব্ধুং প্রবৃত্তঃ॥

১৩। দৈবাদ্‌বন্ধনবিমুক্তস্য পশোঃ। তমসা ব্যাপ্তায়াং নিশি, তত্রাপি নিশীথসময়েঽর্দ্ধরাত্রাবসরে, আকস্মিকো দৈবনির্মিতো বিধিঃ প্রকারস্তেন, বীরাসনেনোর্দ্ধাবস্থানেন॥

১৪। অবমৃষ্য—জ্ঞাত্বা॥

১৫। পণয়শ্চৌরাঃ, অহতেন নূতনেনোপস্কৃতমলঙ্কৃতম্, বৈশসসংস্থয়া হিংসাবিধানেন, গীতাদিঘোষেণ চ সহ ভদ্রকাল্যাশ্চণ্ডিকায়াঃ পুরতঃ সমীপেঽধোবদনং কারয়িত্বোপবেশয়ামাসুঃ॥

১৬। বৃষলরাজস্য পণিঃ পুরোহিতত্বেন বর্ত্তমানশ্চৌরস্তদভিমন্ত্রিতং ভদ্রকালীমন্ত্রাভিমন্ত্রিতম্॥

১৭। ধনমদ এব রজস্তেনোৎসিক্তং ত্যক্তমর্য্যাদং মনো যেষাম্। ভগবৎকলাযুক্তং ধীরাণাং ব্রাহ্মণানাং কুলং তুচ্ছীকৃত্য যথেচ্ছং বর্ত্তমানানাং যৎ কর্ম্ম, তদুপলভ্য দেব্যুচ্চচাট, প্রতিমাং ত্যক্ত্বা বহির্নির্গতা। কথম্ভূত-মালভনম্? সূনায়ামপ্যাপৎকালে অনুজ্ঞাতায়ামপি[2] হিংসায়ামননুজ্ঞাতম্। ভদ্রকালীত্যন্তং গদ্যম্॥

১৮। অমর্ষোঽপরাধাসহনং রোষশ্চ বপুষো দাহনং তয়োরাবেশঃ, তস্য রভসেন বেগেন বিলসিত উত্তম্ভিতো ভ্রূকুটিলক্ষণো বিটপঃ শাখা, কুটিলা দংষ্ট্রাশ্চারুণানীক্ষণানি চ, তেষামাটোপঃ সম্ভ্রমস্তেনাতিভয়ানকং বদনং যস্যাঃ; ইদং জগদ্ধন্তুমুদ্যতেব, মহান্তমট্টহাসং সনাদং হাসম্, ততঃ স্থানাদুৎপত্য, বিবৃক্ণানি ছিন্নানি শীর্ষাণি যেষাম্, গণেন পরিবারেণ সহ, শিরাংস্যেব কন্দুকানি, তেষাং লীলয়া চিক্রীড় চ॥

১। আরভত (গ); ২। লৌকিক্যামপি (খ)।

১৯। নন্থ কথং দেব্যারাধকানামেবং বিপরীতং ফলম্? তত্রাহ—এবমেবেতি। মহৎস্বভিচাররূপোঽতিক্রমোঽপরাধঃ॥

২০। নন্বসম্ভাবিতমিদমেবং যন্মরণেঽপ্যব্যাকুলত্বম্, মারকেষু চ ক্রোধাভাব ইত্যাদি; তত্রাহ—ন বেতি। বিমুক্তো দেহাত্মাত্মভাবলক্ষণঃ সুদৃঢ়ো হৃদয়গ্রন্থির্যৈঃ, সর্ব্বসত্ত্বানাং সুহৃদ আত্মানশ্চ যে তেষাম্। ন চ তেষাং দেহাত্মভিমানসদ্ভাবেঽপি মরণাদিভয়মস্তীত্যাহ—সাক্ষাদ্ভগবতাভিতো রক্ষ্যমাণানাম্। কেন? অনিমিষঃ কালঃ, স এবারিশ্চক্রম্, তেন বরায়ুধেন। তৈস্তৈর্ভাবৈশ্চান্তর্যামিতয়া প্রবর্ত্ত্যমানৈর্ভদ্রকাল্যাদিরূপৈঃ, ন কুতশ্চিদপি ভয়ং যস্মিন্, ভাগবতানাং ভগবদুপাসকানাং পরমহংসানাম্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
নবমোঽধ্যায়ঃ॥ ৯॥

দশমোঽধ্যায়ঃ

দশমে ক্ষিপতা রাজ্ঞা শিবিকাং স্বাং বহন্ মুনিঃ।
স্বদুর্ব্বাদানুবাদেন বিজ্ঞায়াশু প্রসাদিতঃ॥ (১)
এবম্ভূতাবিকারিত্বমজ্ঞসর্ব্বজ্ঞয়োঃ সমম্।
ইতি সর্ব্বজ্ঞতাসিদ্ধ্যৈ রহূগণকথেরণম্॥ (২)

১। রহূগণো নাম সিন্ধুসৌবীরদেশয়ো রাজা তত্ত্বজিজ্ঞাসুঃ কপিলাশ্রমং যদা গচ্ছতি স্ম, তদা যদ্বৃত্তং তদাহ—অথেতি। ইক্ষুমত্যা নদ্যাস্তীরে তেষাং শিবিকাবাহকানাং কুলস্য নাথেন। এষ গৌরিব খর ইব চ ভারং বোঢ়ুং সমর্থ ইতি ধিয়া পূর্ব্বং যে কেচন বিষ্ট্যা বলাদ্ গৃহীতাস্তৈঃ সহ প্রসভং বলাদ্ গৃহীতঃ সন্নতদর্হোঽপি স মহানুভাবঃ শিবিকামুবাহেত্যন্বয়ঃ

২। হিংসাপরিহারার্থমিষুমাত্রপ্রদেশাবলোকস্তানু পশ্চাদ্ যা গতিস্তস্যা হেতুভূতায়াঃ পুরুষাণাং গতির্ন সম্যগাহিতৈকরূপা নাভূৎ ॥

৩। সোপালম্ভম্—সাক্ষেপম্। সামদানভেদদণ্ডেষূপায়েষু চতুর্থাচ্ছঙ্কিতচিত্তাঃ ॥

৪। ভবন্নিয়মানুপথাস্ত্বদাজ্ঞানুবর্ত্তিনঃ, ন পারয়ামো ন শক্নুমঃ ॥

৫। কৃপণানাং বচো নিশম্য, সাংসর্গিকঃ সংসর্গনিমিত্ত একস্যাপি দোষঃ সর্ব্বেষামেব ভবিতুমর্হতীতি নিশ্চিত্য রহূগণ আহেত্যন্বয়ঃ। কথম্ভূতঃ? উপাসিতা বৃদ্ধা যেন, সোঽপি স্বভাবেন বলাৎ পরবশঃ কৃতঃ সন্। কথম্ভূতং প্রত্যাহ? ন বিস্পষ্টং ব্রহ্মতেজো যস্মিন্, ভস্মনাচ্ছন্নমগ্নিমিব স্থিতম্ ॥

৬। ভ্রাতরিতি সম্বোধনমাক্ষেপাভিপ্রায়ম্। ব্যক্তং নিশ্চিতমুরু অধিকং পরিশ্রান্তোঽসীত্যাদীনি বিপরীতার্থানি ষড়্বাক্যানি। উঢ়িবান্ প্রাপিতবান্, তত্রাপি সুচিরম্, জরসা চ বৃদ্ধত্বেন, সংঘট্টিনঃ সহচরা বহু যথা ভবত্যেবং বিপ্রলব্ধোঽপি বক্রোক্ত্যোপহসিতোঽপি তূষ্ণীমুবাহেত্যন্বয়ঃ। তূষ্ণীম্ভাবে হেতুঃ—অবিদ্যয়া রচিতা দ্রব্যাদয়ো যস্মিংস্তস্মিন্ স্ব-চরম-কলেবরেঽনধ্যারোপিতো মিথ্যাপ্রত্যয়ো যেন। তত্র দ্রব্যাণি মহাভূতানি, গুণা ইন্দ্রিয়াণি, কর্ম্মাণি পুণ্যপাপানি, আশয়োঽন্তঃকরণম্, যতো ব্রহ্মভূতঃ ॥

৭। মামনাদৃত্য ভর্ত্তুঃ স্বামিনো মম শাসনমাজ্ঞামতিক্রামসি। চিকিৎসাং শাস্তিম্, দণ্ডপাণির্যমো যথা জনসমূহস্য শাস্তিং করোতি, তথা স্বাং প্রকৃতিমপ্রমত্তাম্ ॥

৮। অবদ্ধমনন্বিতম্, নরদেবোঽহমিত্যভিমানো যস্য তম্, অনুবিদ্ধেন সংগুণিতেন তিরস্কৃতোঽশেষঃ সম্পূর্ণো ভগবতঃ প্রিয়ো নিকেত আশ্রয়ো যেন তম্; যদ্বা, অশেষাণাং ভগবৎপ্রিয়াণাং নিকেতঃ। সর্ব্বেষাং ভূতানাং সুহৃচ্চ আত্মা চ, যোগেশ্বরাণাং চর্য্যা জড়াদিবদাচরণম্, তস্যাং নাত্যন্তং

ব্যুৎপন্না পরিমিতা মতির্যস্ত তম্। স্ময়মানো হসন্নিবেতি মুখপ্রসত্তির্দ্যোত্যতে। বিগতস্ময়ো গতগর্ব্বঃ॥

৯। তত্র বক্রোক্ত্যা যদুক্তং 'ত্বং ন শ্রান্তঃ, ন চ দীর্ঘমধ্বানমাগতঃ' ইতি, তত্রোত্তরমাহ—ত্বয়া যদুদিতং শ্রমাদি নাস্তীতি তদ্ব্যক্তং স্ফুটং তথৈব। অবিপ্রলব্ধং বিপ্রলম্ভো ন ভবতি। তদেবাহ—হে বীর! যদি ভারো নাম কশ্চিৎ স্যাৎ, স চ ভর্ত্তুর্বোঢ়ুর্দেহস্য যদি স্যাৎ, স চ মে যদি প্রসক্তঃ স্যাৎ, তর্হীদানীং ভারাভাবাদ্‌বিপ্রলম্ভঃ স্যাৎ। ন ত্বেতদস্তি, ভারস্য বোঢ়ুশ্চানিরূপ্যত্বাৎ, মম চ তৎসম্বন্ধাভাবাৎ। তথা গন্তুরধিগম্যং প্রাপ্যমধ্বা বা যদি স্যাৎ। অদ্ধেতি পাঠে সাক্ষাৎ পরমার্থতঃ, তচ্চ মে যদি স্যাদিত্যাদি যোজ্যম্। যচ্চোক্তম্—'নাতিপীবা' ইতি, তত্রাহ—চৈতন্যমুদ্দিশ্য ত্বং পীবেতি প্রবাদো বিদাং বিদুষাং ন ভবতি, কিন্তু মূর্খাণাম্। যতোঽয়ং প্রবাদো রাশৌ ভূতসঙ্ঘে দেহে, ন ত্বাত্মনি; দেহ এব পীনঃ, নাহমিত্যর্থঃ॥

১০। এতৎ প্রপঞ্চয়তি—স্থৌল্যমিতি। কলিঃ কলহঃ, অহঙ্কারেণ মদশ্চ, দেহেন সহ তদভিমানেন জাতস্য হি ভবন্তি, মম তু নিরভিমানস্য ন সন্তি; যদ্বা, দেহে জাতে যো জাতস্তস্যৈব তানি, মম তু তত্র ন জাতস্য ন সন্তীতি॥

১১। যচ্চোক্তম্—'জীবন্মৃতোঽসি' ইতি, তত্রাপ্যাহ—জীবন্মৃতত্বং ন কেবলং মম, কিন্তু বিকৃতস্য সর্ব্বস্যাপি পরিণামিনো দৃষ্টম্। যদ্‌যস্মাদ্‌বিকৃতং প্রতিক্ষণমাদ্যন্তবৎ। যদুক্তম্—'ভর্ত্তৃশাসনমতিচরসি' ইতি, তত্রাহ—স্বঞ্চ স্বাম্যঞ্চ তয়োর্ভাবঃ সত্তা। হে ঈড্য! যত্র পক্ষে ধ্রুবো যদি বিহিতঃ, যদি ব্যবস্থিতঃ স্যাদিত্যর্থঃ, তর্হি বিধির্নিয়োগঃ; কৃত্যং কর্ম্ম, তয়োর্যোগো ধ্রুব উচ্যতে, উচিতো ভবতি। 'উচ সমবায়ে' ইতি ধাতুঃ। যদি তু তব রাজ্যভ্রংশো মম চ রাজ্যং স্যাত্তদা সর্ব্বমেতদ্বিপরীতং স্যাদিত্যর্থঃ॥

১২। নন্থ যাবদ্রাজাহং তাবত্তব স্বামী ভবাম্যেবেতি চেৎ, তত্রাহ—বিশেষো রাজভৃত্যাদিভেদঃ, তদ্‌বুদ্ধের্বিবরমবকাশং ব্যবহারাদন্যন্ন পশ্যাম। মনাক্ চ ঈষদপি। অথাপি তবায়মভিমানশ্চেত্তর্হি ব্রূহি, কিং তব করবামেতি॥

১৩। যদুক্তম্—'প্রমত্তস্য চ তে চিকিৎসাং করোমি, যথা স্বাং প্রকৃতিং ভজিষ্যসে' ইতি; তত্রাহ—উন্মত্তাদিবদ্বর্ত্তমানস্য বস্তুতঃ স্বসংস্থাং ব্রহ্মভাবং গতস্য ভবতা কৃতেন চিকিৎসিতেন দণ্ডেন শিক্ষিতেন বা কিয়ানর্থঃ? মুক্তস্যার্থানর্থয়োরসম্ভবাৎ। যদি পুনরহং ন মুক্তঃ, কিন্তু প্রমত্তঃ স্তব্ধ এব, তথাপি মম শিক্ষাদিকং পিষ্টপেষণবদ্ব্যর্থমিত্যর্থঃ; ন হি জড়স্বভাবঃ শিক্ষয়াপি পটূ কর্ত্তুং শক্যতে॥

১৪। ইত্যনুবাদরূপয়া পরিভাষয়া ভাষণেন তং প্রত্যুত্তরং দত্ত্বা, উপরতমনাত্ম্যে দেহাত্মত্বে নিমিত্তমবিদ্যা যস্য, আরব্ধফলং কর্ম্ম ক্ষপয়ন্॥

১৫। হে পাণ্ডবেয়! সম্যগ্ যা শ্রদ্ধা তয়ৈব তত্ত্বজিজ্ঞাসায়াং প্রাপ্তোঽধিকারো যেন। যথা 'দর্শপৌর্ণমাসাধিকৃতস্যৈব গোদোহনেন পশুকামস্যাপঃ প্রণয়েৎ' ইতি গুণফলসম্বন্ধেঽপ্যধিকারঃ, এবং সাত্ত্বিকশ্রদ্ধায়ামধিকৃতস্যৈব কাৎস্ন্যেনাস্যামধিকার ইত্যর্থঃ। বহুযোগগ্রন্থসম্মতং দ্বিজস্য তদ্বচঃ শ্রুত্বা বিগতো নৃপদেবোঽধিরাজ ইতি স্ময়ো গর্ব্বো যস্য॥

১৬। দ্বিজানাং মধ্যে কতমঃ, যতঃ সূত্রমুপবীতং বিভর্ষি? যদ্বা, দত্তাত্রেয়াদীনাং মধ্যে কতমোঽবধূতঃ? ইহাপি কস্মাদ্ধেতোঃ প্রাপ্তঃ? নোঽস্মাকং ক্ষেমায় চেৎ প্রাপ্তঃ, তর্হি শুকঃ কপিলো মুনির্ন ভবসি কিম্? উতেতি বিতর্কে॥

১৭। কিমনয়া চিন্তয়া, শিবিকাং তাবদ্‌বহামীতি চেৎ, অত আহ—নাহমিতি। বিত্তপঃ—কুবেরঃ॥

১৮। যস্মাদ্ভৃশং শঙ্কে, তত্তস্মাৎ কস্ত্বমিত্যাদি-প্রশ্নানামুত্তরং ব্রূহি। নিগূঢ়ং পিহিতং বিজ্ঞানরূপং বীর্য্যং প্রভাবো যেন। অপারঃ—অনন্ত-মহিমা। তত্র হেতুঃ—নো মনসাপি ভেত্তুং ন ক্ষমং ন শক্যম্। কিং ভেত্তুমিত্যপেক্ষায়ামাহ—তে বচাংসীতি। যদ্বা, মনসা যুক্তাঃ সূক্ষ্মদৃষ্টয়োঽপি ভেত্তুং ন ক্ষমন্তে. ন শক্নুবন্তীত্যর্থঃ॥

১৯। স্বস্য জ্ঞানার্থিতাং দর্শয়তি—অহঞ্চেতি। ইহ সংসারে যদরণং শরণং তৎ কিমিতি প্রষ্টুং প্রবৃত্তোঽস্মি। জ্ঞানশক্ত্যাবতীর্ণং কপিলম্॥

২০। স এব ভবান্ কিংস্বিদেবং বিচরতি? গৃহাবিষ্টঃ কথং বিচক্ষীত পশ্যেৎ?

২১। এবং তৎস্বরূপং পৃষ্ট্বা তদুক্তান্যুত্তরাণ্যাক্ষিপতি। তত্র যদুক্তম্—'মম শ্রমো নাস্তি' ইতি, তত্রাহ—দৃষ্ট ইতি। আত্মনো মে, অনুমন্যেঽনুমিমে। অনুমানঞ্চৈবম্—ভবান্ ভারবহনাদিনা শ্রান্তঃ, কর্ত্তৃত্বাৎ। যঃ কর্ত্তা স শ্রাম্যতি, যথাহং যুদ্ধাদিকর্ত্তেতি। নন্বিদং ব্যবহারমাত্রম্, ন তু সত্যম্। যদুক্তম্—'ব্যবহারতোঽন্যন্ন পশ্যামি' ইতি, তত্রাহ—যথেতি। ব্যবহারমার্গঃ প্রপঞ্চঃ সমূলঃ সপ্রমাণক এব ইষ্টঃ, যথা যথাবৎ; অসতা ঘটাদিনোদকানয়নাদেরভাবাৎ। এবং প্রয়োগঃ—প্রপঞ্চঃ সত্যোঽর্থক্রিয়া-কারিত্বাৎ। যঃ পুনরসত্যো নাসাবর্থক্রিয়াকারী, যথা মিথ্যা ঘটাদিরিতি॥

২২। যদুক্তম্—'উপাধিধর্ম্মাঃ স্থৌল্যাদয়ো মে বস্তুতো ন সন্তি' ইতি, তত্রোপাধিকত্বেঽপি সত্যত্বং কিং ন স্যাদিত্যাহ—স্থাল্যা অগ্নিতাপাত্তন্মধ্য-বর্ত্তিনঃ ক্ষীরস্য তাপঃ, তস্য তাপাত্তণ্ডুলানাং বহির্ভাগস্য তাপঃ, ততস্তদ্গর্ভস্য চ রন্ধিঃ পাকঃ, ন চাত্র কিঞ্চিন্মিথ্যা। এবং দেহাদিভিঃ সন্নিকর্ষাৎ সম্বন্ধাত্তন্নিমিত্তা সংসৃতিঃ পুরুষস্য ভবতি। অসবঃ প্রাণাঃ, আশয়ো মনঃ, অনুরোধাদুপাধিধর্ম্মানুবৃত্তেঃ, তথা হি নিদাঘাদিনা দেহে তপ্তে ইন্দ্রিয়াণাং তাপঃ, ততঃ প্রাণস্য, ততো মনস ইত্যেবং যথাযথমূহ্যম্॥

২৩। যদুক্তম্—'স্বস্বাম্যভাবোঽধ্রুবঃ' ইতি, তত্রাহ—শাস্তেতি। অধ্রুবত্বেঽপি যদা যো নৃপতিঃ স প্রজানাং শাস্তা গোপ্তা চ। যচ্চোক্তম্—'স্তব্ধাদেঃ শিক্ষা পিষ্টপেষঃ' ইতি, তত্রাহ—যোঽচ্যুতস্য কিঙ্করঃ, স পিষ্টং ন পিনষ্টি, নিষ্ফলং ন করোতি; স্তব্ধত্বাদ্যনপগমেঽপি শাস্তুরীশ্বরস্যাজ্ঞা-সম্পাদনেনৈব ফলবত্ত্বাৎ[1]। তদাহ—স্বধর্ম্মরূপমচ্যুতস্যারাধনং কুর্ব্বন্ যস্মাদঘৌঘং বিজহাতি॥

২৪। যস্মাদেবং মম ত্বদুক্তং বিপরীতং প্রতিভাতি, ততস্মান্নরদেবাভি-মানমদেন তুচ্ছীকৃতাস্তিরস্কৃতাঃ সত্তমা ভবাদৃশা যেন, তস্য মে মৈত্রীদৃশং স্নেহযুক্তাং দৃষ্টিং কৃষীষ্ট করোতু; সতামবজ্ঞারূপং পাপং যয়া তরিষ্যামি॥

২৫। নন্থ মমাবজ্ঞাকৃত-বিকারাভাবাৎ কুতঃ পাপম্? তত্রাহ—নেতি। যদ্যপি তব বিক্রিয়া নাস্তি, বিশ্বস্য সুহৃচ্চাসৌ সখা চ তস্য, ততঃ সর্ব্বত্র সাম্যেন স্বদেহে বিগতাভিমানস্য, তথাপি মহতামবমানান্মাদৃশো বিনঙ্ক্ষ্যতি, অদূরাৎ ক্ষিপ্রম্, শূলপাণিরিবাতিসমর্থোঽপীত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
দশমোঽধ্যায়ঃ॥ ১০॥

একাদশোঽধ্যায়ঃ

একাদশেঽথ সংপৃষ্টো রহূগণমহীভৃতা।
উপাদিশৎ পরং জ্ঞানং স যোগীতি নিগদ্যতে॥ (১)

১। অকোবিদোঽবিদ্বানপি ত্বং কোবিদানাং বাদা উদ্‌গ্রহণিকাস্ত-ত্তুল্যান্ বাদান্ বদস্যথো অতোঽত্যন্তং বিদুষাং মধ্যে শ্রেষ্ঠো ন ভবসি।

১। সফলত্বাৎ (ঘ)।

কুতঃ? হি যস্মাৎ, যং স্বামিভৃত্যাদি-লৌকিকব্যবহারং ত্বং সত্যমাথ, এনং সূরয়স্তত্ত্ববিচারেণ সহ ন বদন্তি, কিন্ত্ববিচারসুন্দরং[১] বদন্তি, অতো ন সত্যঃ ॥

২। বৈদিকোঽপি কর্ম্মফলব্যবহারো ন সত্য ইত্যাহ—তথৈবেতি। উরবো গার্হা গৃহসম্বন্ধিনো মেধা যজ্ঞাঃ, তেষাং বিতানো বিস্তারঃ, তদ্বিষয়াসু বিদ্যাসু উর্বধিকং বিজৃম্ভিতেষু বিলসিতেষু বেদবাদেষু তত্ত্ববাদো নু নিশ্চিতং ন চকাস্তি, ন প্রকাশতে। তথা চ শ্রুতিঃ—'নেহ নানাস্তি কিঞ্চন' ইত্যাদি। শুদ্ধো হিংসাদিশূন্যঃ, সাধূ রাগাদিশূন্যশ্চ। প্রায়েণেতি ঈশ্বরার্পিত-কর্ম্মণাং পরমার্থফলত্বাভিপ্রায়েণোক্তম্ ॥

৩। নন্থ শ্রুতবেদান্তস্যাপি পুংসঃ কর্ম্মসু প্রবৃত্তেঃ কথমসত্যতা? তত্রাহ—নেতি। সাক্ষাদ্‌যথাবত্তত্ত্বজ্ঞানায় বরীয়স্যোঽপি বেদান্তবাচস্তস্য ন সম্যগাসন্ বভূবুঃ। স্বপ্নে যা নিরুক্তিস্তয়া স্বপ্নদৃষ্টান্তেন দৃশ্যত্বাদিহেতুনা স্বয়মেব হেয়ত্বেনান্থমিতং যস্য ন স্যাৎ ॥

৪। এবং প্রপঞ্চস্য সত্যত্বং তদুক্তং নিরাকৃত্য সংসারস্যাপি তদুক্তাং সত্যতাং নিরাকর্ত্তুং তস্য মনোনিমিত্ততামাহ—যাবদিত্যাদিনা যাবৎপরিসমাপ্তি। মনো যাবদ্রজআদিভির্গুণৈরন্থরুদ্ধং বশীকৃতং ভবতি, তাবত্তন্মনো নিরঙ্কুশং সৎ পুরুষস্য কুশলং ধর্ম্মমিতরমধর্ম্মং বাতনোতি। কৈঃ? চেতোভির্জ্ঞানেন্দ্রিয়ৈঃ, আকুতিভিঃ কর্ম্মেন্দ্রিয়ৈশ্চ ॥

৫। ততশ্চ ধর্ম্মাধর্ম্মবাসনাযুক্তং তদেবানেকদেহাদিবৈচিত্র্যং করোতীত্যাহ—স ইতি। পুংস্ত্বমাত্মশব্দবিশেষণত্বেন, তন্মন ইত্যর্থঃ। বাসনাযুক্ত আত্মোপাধিত্বাদাত্মা, অতো বিষয়ৈরুপরক্তোঽন্থবিদ্ধঃ, অতো গুণপ্রবাহো গুণৈরিতস্ততশ্চাল্যমানঃ, অতএব বিকৃতঃ কামাদিপরিণামবান্,

১। বিচারহুন্দরং (গ)।

ষোড়শাত্মা ষোড়শকলাসু ভূতেন্দ্রিয়রূপাসু মুখ্যঃ, পৃথঙ্‌নামভিঃ সহ পৃথগ্‌রূপভেদং দেব-তির্য্যগাদিরূপং বিভ্রৎ। অন্তর্ব্বহিষ্ট্বমুৎকৃষ্টত্বং নিকৃষ্টত্বঞ্চ পুরৈস্তৈরেব দেহৈর্হেতুভূতৈস্তনোতি। নামভিরিত্যত্র রেফলোপে দীর্ঘাভাব আর্ষঃ॥

৬। ফলঞ্চ তদনুরূপং করোতীত্যাহ—দুঃখং সুখং ব্যতিরিক্তঞ্চ মোহং তীব্রং দুর্নিবারং কালপ্রাপ্তং ফলং সর্ব্বতোঽভিব্যনক্তি সৃজতি। নন্বু জড়ঃ কথং সৃজতি? তত্রাহ—স্বদেহিনমালিঙ্গ্য। আলিঙ্গনে কারণমাহ—মায়য়া রচিতোঽন্তরাত্মা জীবোপাধিঃ। উপাধিতামাহ—সংসৃতিচক্রে কূটয়তি ছলয়তীতি তথা, যথা গ্রামকূটক ইতি॥

৭। এবময়ং মনোনিবন্ধনঃ সংসারো জীবে ফলতীত্যাহ—তাবানিতি। আবিঃ—প্রকাশমানঃ। সদা ক্ষেত্রজ্ঞস্য সাক্ষ্যো দৃশ্যো ভবতি। স্থূলসূক্ষ্মো জাগ্রৎস্বপ্নস্বরূপঃ। মনসঃ সংসারহেতুত্বমুপসংহরন্ মোক্ষস্যাপি তদেব কারণমিত্যাহ—তস্মাদিতি। অদো মনো লিঙ্গং কারণম্। গুণত্বং গুণাভিমানিত্বম্, অগুণত্বং তদ্রাহিত্যম্, তদেব পরমবরঞ্চ তস্য॥

৮। কথমেকমেব বিলক্ষণয়োঃ কারণম্? অবস্থাভেদাদিত্যাহ—গুণেতি। নৈগুর্ণ্যং নিগুর্ণম্; অথো ইতি কার্ৎস্ন্যেন। দৃষ্টান্তেন স্ফুটয়তি—যথেতি, অন্যদা তু ঘৃতক্ষয়ে স্বং পদং শুক্ল[১]-ভাস্বররূপং মহাভূতাত্মত্বং বা। অন্যত্র—অন্যদা॥

৯। বৃত্তীর্দর্শয়তি—একাদশ বৃত্তয় আসন্, আকূতয়ঃ ক্রিয়াকারাঃ পঞ্চ, ধিয়শ্চ জ্ঞানাকারাঃ পঞ্চ, অভিমানশ্চেতি। হে বীরঃ! ভূমীর্বিষয়ান্॥

১০। বিষয়ানেবাহ—গন্ধাদয়ঃ পঞ্চ জ্ঞানেন্দ্রিয়দ্বারা ধীবৃত্তীনাং বিষয়াঃ। আকৃতিঃ—রূপম্; শ্রবঃ—শব্দঃ, বিসর্গাদয়ঃ পঞ্চ কর্ম্মেন্দ্রিয়দ্বারা কর্ম্মাকারবৃত্তীনাং বিষয়াঃ; রতিঃ সম্ভোগঃ, অর্ত্তির্গতিঃ। পুরস্যা[২]-ভিমান-

---

১। শুদ্ধ-(ক); ২। পুরুষস্যা-(ক)।

বিষয়ত্বপ্রকারমাহ—একাদশং পুরম্। স্বীক্রিয়ত ইতি স্বীকরণম্। অয়মর্থঃ—শরীরমভিমানস্য ন জ্ঞেয়তয়া গন্ধাদিবদ্বিষয়ঃ, নাপি কার্য্যতয়া বিসর্গাদিবৎ, কিন্তু মমেতি ভোগায়তনত্বেন স্বীকার্য্যতয়া বিষয় ইতি। একে তু বিবেকিনামেব পুরং মমত্বাভিমানবিষয়ঃ, ন তু মূঢ়ানাম্, অতো মূঢ়দৃষ্ট্যাহমহঙ্কারং দ্বাদশং বৃত্ত্যন্তরমাহুঃ, তস্য চ পুরমেব শয্যাসংজ্ঞং দ্বাদশং বিষয়মাহুঃ। তত্র হি জীবোঽহঙ্কারেণ সহ শেতে, যতঃ পুরি শয়নাৎ পুরুষ ইত্যুচ্যতে ॥

১১। তাসাং বৃত্তীনামবান্তরভেদৈরানন্ত্যমাহ—দ্রব্যাণি বিষয়াঃ, স্বভাবঃ পরিণামহেতুঃ, আশয়ঃ সংস্কারঃ, কর্ম্ম অদৃষ্টম্, কালঃ ক্ষোভকঃ, এতৈর্নিমিত্তভূতৈঃ প্রথমং শতশঃ, ততঃ সহস্রশঃ, ততঃ কোটিশঃ স্যুঃ, ন তু মিথঃ স্যুঃ, ন চ স্বতঃ, কিন্তু ক্ষেত্রজ্ঞতঃ পরমেশ্বরাৎ ; তস্য চানন্তশক্তিত্বাদনন্তাঃ স্যুরিত্যর্থঃ ; যদ্বা, তাসাং মিথ্যাত্বমনেনোচ্যতে। কোটিশো ভবন্ত্যতস্তাঃ ক্ষেত্রজ্ঞত এব স্যুস্তৎসত্তয়ৈব সত্তাং লভেরন্, ন তু মিথঃ, ন চ স্বত ইতি। যদ্বা, ক্ষেত্রজ্ঞো জীবস্তস্মান্ন স্যুঃ, তস্যাবিকারিত্বাৎ। ন মিথঃ, ইতরেতরাশ্রয়ত্বাপত্তেঃ ; ন চ স্বতঃ, আত্মাশ্রয়ত্বাপত্তেঃ। অতো মিথ্যাভূতা এবেতি ॥

১২। তদেবং শ্লোকত্রয়েণ গুণকর্ম্মানুবদ্ধং মনো বৃত্তীঃ শ্রয়ত ইতি যদুক্তম্, তৎ প্রপঞ্চিতম্। অন্যদা তত্ত্বং শ্রয়ত ইতি যদুক্তম্, তদেব তত্ত্বমাহ—ক্ষেত্রজ্ঞ ইতি। জীবস্য জীবোপাধেরবিশুদ্ধকর্ত্তুর্মনসো নিত্যাঃ প্রবাহরূপেণাবিচ্ছিন্না জাগ্রৎস্বপ্নয়োরাবির্ভূতাঃ পশ্যতি, ক্বাপি সুষুপ্তৌ তিরোভূতাঃ পশ্যতি, অবস্থাত্রয়সাক্ষী ক্ষেত্রজ্ঞ আত্মা তত্ত্বমিত্যর্থঃ ॥

১৩। ক্ষেত্রজ্ঞো হি দ্বিবিধঃ—ত্বংপদার্থো জীবঃ, তৎপদার্থ ঈশ্বরশ্চ। তত্রাদ্যো নিরূপিতঃ, ইদানীং তৎপ্রাপ্যমীশ্বরং নিরূপয়তি—ক্ষেত্রজ্ঞ আত্মা ব্যাপী, পুরাণো জগৎকারণভূতঃ, পুরুষঃ পূর্ণঃ, সাক্ষাদপরোক্ষঃ, স চ স্বয়ংজ্যোতিঃ, ন তু জ্ঞানস্য বিষয়ত্বেনাশ্রয়ত্বেন বা পরোক্ষঃ ; অজো জন্মাদি-

শূন্যঃ, পরেষাং ব্রহ্মাদীনামপীশঃ, নারং জীবসমূহঃ, সোঽয়নং যস্য নিয়ন্তুঃ, ভগবানৈশ্বর্য্যাদিষড়্গুণবান্, বাসুদেবঃ সর্ব্বভূতানামাশ্রয়ঃ। স্বাধীনমায়য়াত্মনি জীবেঽবধীয়মানোঽবস্থাপ্যমানঃ, কর্ম্মকর্ত্তরি প্রয়োগঃ, তন্নিয়ন্তৃত্বেন বর্ত্তমান ইত্যর্থঃ ॥

১৪। এতৎ সদৃষ্টান্তমাহ—যথেতি। আত্মস্বরূপেণ প্রাণরূপেণেশেদীশীত[১] নিয়ময়তি, ইদং বিশ্বম্ ॥

১৫। তদেবমাত্মনঃ শুদ্ধত্বং সংসারস্য চ মিথ্যাত্বং প্রদর্শ্যেদানীং তন্নিবৃত্তিমাহ—ন যাবদিতি। তনুভৃদ্দেহী বয়ুনোদয়েন জ্ঞানোৎপত্ত্যা যাবন্মায়াং বিধূয়াত্মতত্ত্বং ন বেদ, তাবদিহ ভ্রমতি ॥

১৬। যাবচ্চ বিষয়ানুরক্তং মন এবানর্থহেতুরিতি ন বেদ, তাবন্নির্ব্বেদাভাবাৎ পারভ্রমত্যেবেত্যাহ—নেতি। আত্মনো লিঙ্গমুপাধিভূতং মনঃ সংসারতাপানামাবপনং ক্ষেত্রং যাবন্ন বেদ, তাবদ্ভ্রমতীত্যনুষঙ্গঃ। তাপাবপনত্বে হেতুঃ—যন্মনঃ শোকাদ্যনুবন্ধং মমতাঞ্চ বিধত্তে ॥

১৭। তত্তস্মাদ্ভ্রাতৃব্যং শত্রুমধ্যেধিতং সংবৃদ্ধম্, স্বয়ং ব্যলীকং মিথ্যাভূতম্, তথাপ্যাত্মানং মুষ্ণাতীতি তথা তম্ ; গুরুরেব হরিস্তস্য চরণোপাসনমেবাস্ত্রং যস্য তথাভূতঃ সন্, জহি ঘাতয় ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
একাদশোঽধ্যায়ঃ ॥ ১১ ॥

১। ঈশেৎ (ঘ)।

দ্বাদশোঽধ্যায়ঃ

দ্বাদশে পুনরাপৃষ্টঃ সন্দেহেন মহীভৃতা।
স যোগী সর্ব্বসন্দেহানপানুদদিতীর্য্যতে ॥ (১)

১। কারণমীশ্বরস্তস্যেব লোকসংরক্ষণার্থো বিগ্রহো দেহো যস্য; স্বরূপেণ পরমানন্দপ্রকাশেন তুচ্ছীকৃতো বিগ্রহো দেহো যেন। হে অবধূত! যোগেশ্বর! দ্বিজবন্ধোর্লিঙ্গেন বেষেণ নিগূঢ়ো নিত্যানুভবো যেন, তস্মৈ নমঃ ॥

২। বিশেষতঃ প্রষ্টুং তদ্বাক্যমভিনন্দতি—জ্বর এবাময়ো রোগস্তেনার্ত্তস্য যথা সৎ স্বাদ্বগদমৌষধম্, যথা চ নিদাঘেন দগ্ধস্য সন্তপ্তস্য হিমাম্ভঃ শীতলমুদকং গঙ্গোদকং বা, তথা হে ব্রহ্মন্! কুৎসিতে দেহে যো মানোঽহঙ্কারঃ, স এবাহিস্তেন বিশেষেণ দষ্টা দৃষ্টির্বিবেকলক্ষণা যস্য, তস্য মে তবেদং বচোঽমৃততুল্যমৌষধম্ ॥

৩। মম সংশয়বিষয়মর্থং পশ্চাৎ প্রক্ষ্যামি, অধুনা তাবত্ত্বদুক্তং বচোঽধ্যাত্মযোগেন গ্রথিতং দুর্ব্বোধম্, সুবোধং যথা ভবত্যেবং ব্যাখ্যাহি, কৌতূহলযুক্তং চেতো যস্য, তস্য মম ॥

৪। ত্বয়োদিতং ব্যক্তমবিপ্রলব্ধমিত্যাদিনা ভারবহনাদিক্রিয়া চ তৎফলঞ্চ শ্রমাদি প্রত্যক্ষাদিভির্দৃশ্যমানং সদবাধিতমপি[1] ব্যবহারমাত্রমূলম্; যদ্বা, সতোঽবাধিতস্য ব্যবহারস্য মূলং কারণমপি ন হ্যঞ্জসা তত্ত্ববিমর্শনায় ক্ষমমিতি ভবান্ যদাহ, অমুষ্মিন্নর্থে মে মনো ভ্রমতি ॥

৫। অবাধিতত্ব[2]মেবাসিদ্ধমিত্যাহ—হে পার্থিব! যঃ পার্থিবো বিকারঃ, স এব কস্য হেতোঃ কস্মাচ্চিৎ কারণাৎ পৃথিব্যাং চলন্নয়ং ভারবাহকাদির্জনো নাম প্রসিদ্ধঃ; যশ্চ ন চলতি, স পাষাণাদিরিত্যেতাবানেব

১। সদারাধিতমপি (গ); ২। আরাধিতত্ব- (গ)।

ভেদঃ, তস্য চ জড়ত্বান্ন ভারঃ শ্রমশ্চ, কিঞ্চ ভবেদেবং যদি শ্রমস্যাশ্রয়ো নিরূপ্যেত, ন ত্বেতদস্ত্যবয়বব্যতিরেকেণ শ্রমাশ্রয়স্যা[১]বয়বিনোঽনিরূপণাৎ, ইত্যাশয়েনাহ—তস্যাপি পৃথ্বীবিকারস্যাপ্যঙ্ঘ্র্যোরধি উপর্য্যুপরি গুল্‌ফাদয়ঃ। উরসঃ সলোপ আর্ষঃ॥

৬। শিবিকায়ামপি অবয়বী নাস্তি, ত্বয্যপি নাস্তি, তদাহ—সৌবীররাজেত্যপদেশো নামমাত্রং যস্য স পার্থিবো বিকার আস্তে। রাজেতি সন্ধিরার্ষঃ। যস্মিন্ ভবান্নিরূঢ়াত্মাভিমানঃ, 'সিন্ধুষু রাজাস্মি' ইতি দুর্মদেনান্ধঃ সন্॥

৭। শোচ্যানিমান্ বিষ্ট্যা নিগৃহ্ণন্নিষ্কৃপো বর্ত্তসে, অতো মিথ্যৈব গোপ্তাস্মীতি শ্লাঘমানো মহতাং সভাসু ন শোভসে, যতো ধৃষ্টঃ॥

৮। ন চোত্তরোত্তরাবয়বভারঃ পূর্ব্বপূর্ব্বাবয়বানাং ভবেদিতি বাচ্যম্, তেষামপ্যনিরূপণাদিত্যাশয়েনাহ—যদেতি। নিষ্ঠাং নাশম্, প্রভবমুৎপত্তিম্, বিদাম বিদ্মঃ, তত্তদা ক্ষিতেরন্যস্য বিকারস্যাভাবান্নামমাত্রাদন্যদ্‌ব্যবহারস্য মূলং কারণমর্থক্রিয়য়া সদিত্যনুমেয়ং নিরূপ্যতাম্। তথা চ শ্রুতিঃ—'বাচারম্ভণং বিকারো নামধেয়ং মৃত্তিকেত্যেব সত্যম্' ইতি॥

৯। তর্হি ক্ষিতেঃ সত্যতা স্যাৎ? তত্রাহ—এবং 'ক্ষিতি'-শব্দস্যাপি বৃত্তং বর্ত্তনমর্থং বিনৈব নিরুক্তম্। যদ্বা, 'ক্ষিতি'-শব্দস্য বৃত্তং যস্মিংস্তদপি মিথ্যাত্বেন নিরুক্তমিত্যর্থঃ। কুতঃ? অসৎসু সূক্ষ্মেষু পরমাণুষু, স্বকারণভূতেষু নিধানাল্লয়াৎ, অতঃ পরমাণু-ব্যতিরেকেণ ক্ষিতির্নাস্তীত্যর্থঃ। পরমাণবস্তর্হি সত্যাঃ স্যুঃ? তত্রাহ—তে মনসা কার্য্যানুপপত্ত্যা বাদিভিঃ কল্পিতাঃ। কল্পনাবীজমাহ—যেষাং সমূহেন বিশেষঃ কৃতস্তেষাং সমূহঃ পৃথ্বীবুদ্ধ্যালম্বনমিত্যর্থঃ। অবয়বিনো নিরস্তত্বাৎ সমূহগ্রহণম্, তথাপি সত্যাঃ স্যুঃ? ন, অবিদ্যয়া প্রপঞ্চস্য ভগবন্মায়াবিলসিতত্বাদজ্ঞানেন কল্পিতাঃ॥

১। শ্রমাস্পদস্যা- (ঘ)।

১০। এবমন্যমপি কৃশত্বাদিধর্ম্মকং বুদ্ধ্যা প্রতীতং দ্বিতীয়ং দ্বৈতং দ্রব্যাদিনাম্নোপলক্ষিতয়াজয়া মায়য়া কৃতমবেহি। তত্র কৃশং হ্রস্বম্, স্থূলং তৎপ্রতিযোগি, অণুবৃহতোঃ পৃথগুপাদানাৎ। অসৎ কারণম্, সৎ কার্য্যম্, জীবং চেতনমজীবং জড়ম্॥

১১। তর্হি কিং সত্যম্? তদাহ—জ্ঞানং সত্যম্। ব্যবহারিক-সত্যত্বং ব্যাবর্ত্তয়তি—পরমার্থম্। বৃত্তিজ্ঞানব্যবচ্ছেদার্থানি ষড়্বিশেষণানি —বিশুদ্ধম্, তচ্চাবিশুদ্ধকম্; একম্, তত্তু নানারূপম্; অনন্তরমবহি-র্বাহ্যাভ্যন্তরশূন্যম্, তত্তু বিপরীতম্; ব্রহ্ম পরিপূর্ণম্, তত্তু পরিচ্ছিন্নম্; প্রত্যক্, তত্তু বিষয়াকারম্; প্রশান্তং নির্বিকারম্, তত্তু সবিকারম্। তদেবং স্বরূপজ্ঞানং সত্যমিত্যুক্তম্। কীদৃশং তৎ? ঐশ্বর্য্যাদিষড়্গুণত্বেন ভগবচ্ছব্দঃ সংজ্ঞা যস্য; যচ্চ জ্ঞানং বাসুদেবং বদন্তি॥

১২। এবং তৎপ্রাপ্তিশ্চ মহৎসেবাং বিনা ন ভবতীত্যাহ—হে রহূগণ! এতজ্ জ্ঞানং তপসা পুরুষো ন যাতি, ইজ্যয়া বৈদিককর্ম্মণা, নির্ব্বপণাদন্নাদি-সংবিভাগেন, গৃহাদ্বা তন্নিমিত্তপরোপকারেণ, ছন্দসা বেদাভ্যাসেন, জলাগ্ন্যাদিভিরুপাসিতৈঃ॥

১৩। মহৎসেবায়াস্তৎপ্রাপ্ত্যুপায়তামাহ—যত্র যেষু মহৎসু। গ্রাম্য-কথানাং বিঘাতো যস্মাৎ॥

১৪—১৫। বিষয়সঙ্গস্তু যোগভ্রংশক ইতি বদন্ কস্ত্বং নিগূঢ়শ্চরসীতি প্রশ্নস্যোত্তরমাহ—অহমিতি দ্বাভ্যাম্। (১৪) বিমুক্তো দৃষ্টশ্রুতাভ্যাং সঙ্গনিমিত্তো বন্ধো যেন; হতোঽর্থঃ প্রয়োজনং যস্য॥ (১৫) শ্রীকৃষ্ণার্চ্চনং ভ্রষ্টমপ্যুদ্ধরতীত্যাহ—সেতি। জনসঙ্গাদ্বিশঙ্কমানঃ; অবিবৃতোঽপ্রকটঃ॥

১৬। অসঙ্গৈর্মহদ্ভির্যঃ সুসঙ্গস্তেন জাতং জ্ঞানমেবাসিঃ খড়্গাস্তেন ছিন্নমোহঃ সন্নধ্বনঃ সংসারমার্গস্যাতিশয়িতং শ্রেষ্ঠং পারং হরিং যাতি।

যদ্বা, পারমতি অতিক্রম্য হরিং যাতি, 'অতিরতিক্রমণে চ' ইতি কর্ম্মপ্রবচনীয়ত্বাদ্ দ্বিতীয়া। তস্য হরেরীহানাং কথনশ্রুতাভ্যাং[১] লব্ধা স্মৃতির্যেন সঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

ত্রয়োদশোঽধ্যায়ঃ

ত্রয়োদশেঽবিরক্তায় বৃথা তত্ত্বনিরূপণম্।
ইতি বৈরাগ্যদার্ঢ্যায় ভবাটব্যুপবর্ণ্যতে ॥ (১)

১। **অধ্বনঃ** পারমিত্যুক্তম্, তমেবাধ্বানং প্রসিদ্ধমার্গরূপকেণ বৈরাগ্যায় প্রপঞ্চয়তি—দুরত্যয়ে দুস্তরেঽধ্বনি প্রবৃত্তিমার্গে। রজস্তমঃসত্ত্বৈর্বিভক্তানি কর্ম্মাণি কার্য্যতয়া পশ্যতীতি তথা, স এষ প্রসিদ্ধঃ সার্থো জীবসমূহঃ, অর্থপরঃ সুখার্থঃ সন্, যথা বণিক্সার্থোঽর্থার্জ্জনায় গচ্ছন্নটবীং যাতি, তদ্বৎ। অস্যাধ্যায়স্য ব্যাখ্যানরূপ উত্তরাধ্যায়োঽস্তি, তথাপি সুখপ্রতিপত্তয়ে কিঞ্চিৎ কিঞ্চিদ্ব্যাখ্যায়তে ॥

২। যস্যাং ভবাটব্যামিমে ইন্দ্রিয়নামানঃ ষড় দস্যবশ্চৌরাঃ, কুৎসিতো নায়কঃ সারথির্বুদ্ধির্যস্য তং সার্থং বিলুম্পন্তি, তস্য ধর্ম্ম্যং ধনমুপভোগেন মুষ্ণন্তীত্যর্থঃ। গোমায়বঃ শৃগালতুল্যা দারাপত্যাদয়ঃ, ত্বং মে ভর্ত্তা পিতেত্যেবং প্রবিশ্য প্রমত্তং সার্থিকং সার্থে স্থিতং হরন্তি ইতস্তত আকর্ষন্তি ; উরণং মেষম্ ॥

৩। বীরুধো লতাস্তৃণানি চ গুল্মাশ্চ লতাদিজালানি, প্রভৃতৈরেতৈর্গহ্বরে দুষ্প্রবেশে ক্ষেত্রে কঠোরৈস্তীব্রৈর্দংশৈর্মক্ষিকাবিশেষৈর্মশকৈশ্চ যথা

১। কথনস্মৃতিভ্যাং (ঘ)।

কশ্চিদুপদ্রুতো ভবতি, এবং কামকর্ম্মাদিভির্গহ্বরে গৃহাশ্রমে বর্ত্তমানো দুর্জ্জনৈরুপদ্রুতো ভবতীত্যর্থঃ। গন্ধর্ব্বপুরবদঘটমানমেব দেহাদিকং প্রকর্ষেণ সত্যমেবেদমিতি পশ্যতি। ক্বচিৎ ক্বচিৎ ক্বাপি ক্বাপ্যাশুরয়োঽতিবেগো য উল্মূকাকারো গ্রহঃ পিশাচস্তম্, তত্তুল্যং সুবর্ণমুপাদেয়ত্বেন প্রপশ্যতীত্যর্থঃ॥

৪। নিবাসাদিস্বাত্মা স্বভাবো যস্যাঃ সা বুদ্ধির্যস্য স ততস্ততো ধাবতীত্যুভয়ত্র তাবানেবার্থঃ। বাত্যা চক্রবাতস্তস্যামুত্থিতঃ পাংশুস্তেন ধূম্রা দিশঃ, রজস্বলে রজোব্যাপ্তে অক্ষিণী যস্য, স যথা ন জানাতি, তথা বাত্যেব ভ্রময়ন্তী যা স্ত্রী তস্যামুদ্গতৈ রাগাদিভিরপ্রকাশমানা দিগ্‌দেবতাঃ কর্ম্মসাক্ষিভূতা ন জানাতীত্যর্থঃ॥

৫। অদৃশ্যানাং ঝিল্লীনাং ভৃঙ্গারিকাসংজ্ঞানাং কীটবিশেষাণাং স্বনৈঃ কর্ণয়োঃ শূলো ব্যথা যস্য। উলূকা ঘূকাস্তেষাং বাগ্‌ভির্ব্যথিতোঽন্তরাত্মা মনো যস্য। অত্র চ পরোক্ষমপ্রিয়বক্তারো ঝিল্লীতুল্যাঃ, প্রত্যক্ষমপ্রিয়-বক্তারো ঘূকতুল্যাঃ। যেষাং ছায়াপি পাপহেতুস্তেঽপুণ্যবৃক্ষাঃ, তত্তুল্যান-ধার্ম্মিকান্ সেবতে। মরীচিতোয়ানীতি নিষ্ফলত্বেন বিজ্ঞাতানপি বিষয়ান্॥

৬। বিতোয়াসু সরিৎসু পতিতস্য গাত্রভঙ্গাৎ সদ্যো দুঃখং ভবতি, ন চোদকলাভঃ; তদ্বদিহ চ পরত্র চ দুঃখদান্ পাষণ্ডানভিযাতি। আলষতেঽভিলষতি, দায়াদেভ্যোঽন্নাদি বাঞ্ছতি। উভয়ত্রাপি স এবার্থঃ। দাবং দাবাগ্নিতুল্যং দুঃখদং গৃহং প্রাপ্য শোকাগ্নিনা তপ্তো নির্ব্বিদ্যতে বিষীদতি। ক্ব চ কদাচিত্তত্র যক্ষরাক্ষসতুল্যৈ রাজভির্হৃতমসুবৎ প্রেষ্ঠং ধনং যস্য স নির্ব্বিদ্যতে॥

৭। অন্যৈশ্চ শূরৈর্হৃতং স্বং বিত্তং যস্য, নির্ব্বিণ্ণং বিষণ্ণং চেতো যস্য, কশ্মলং মূর্চ্ছাম্, গন্ধর্ব্বপুরমিব মনোরথোপগত-পিতৃপুত্ত্রাদিসমাজং প্রবিষ্টঃ সন্॥

৮। কণ্টকাদিবিদ্ধাঙ্ঘ্রিরিব বিঘ্নৈরভিভূতঃ সন্, নগতুল্যং মহৎ কর্ম্মারোঢুং কর্ত্তুমিচ্ছুর্বিমনা ইবাস্তে। পদে পদে ক্ষণে ক্ষণে, অভ্যন্তর-বহ্নিনা জঠরবহ্নিনা[১] ॥

৯। অজগরাহিনা নিদ্রারূপেণ গিলিতো ন বেত্তি। বিপিনে ত্যক্তঃ শব ইব দন্দশূকৈর্হিংস্রৈর্দুর্জ্জনৈর্দষ্টঃ পীড়িতোঽন্ধো লুপ্তবিবেকোঽন্ধকূপে মোহগর্ত্তে পতিতস্তমিস্রে দুঃখে শেতে লীয়তে ॥

১০। ক্ষুদ্ররসান্ পরযোষাদীন্ বিচিন্বন্ গবেষয়ংস্তন্মক্ষিকাভির্যোষাদি-স্বাম্যাদিভির্বিমানোঽবজ্ঞাতস্তাড়িতঃ সন্ ব্যথিতো ভবতি। যদি কথঞ্চিত্তত্রাতিক্লেশেন প্রতিলব্ধমানঃ প্রাপ্তযোষাদির্ভবতি, তদা বলাদন্যেঽপহরন্তি, তান্ যদাভিযুঙ্‌ক্তে, তদা ততোঽপ্যন্যে হরন্তি ॥

১১। যৎ কিঞ্চিদত্যল্পমপি মিথো ব্যবহরন্ ক্রয়াদিনা গৃহ্ণন্ বিত্ত-শাঠ্যাদ্ধনবঞ্চনাৎ ॥

১২। শয্যাদিহীনঃ; আস্যতেঽস্মিন্নিত্যাসনং কম্বলাদি, স্থীয়তেঽস্মি-ন্নিতি স্থানং গৃহম্; বিহরন্ত্যনেনেতি বিহারো যানাদি; যাচমানোঽপি যদা পরস্মাদপ্রাপ্তকামস্তদা পরকীয়ে বস্তুনি দৃষ্টিরভিলাষো যস্য, সোঽবমানং প্রাপ্নোতি ॥

১৩। এবমন্যোঽন্যং বিত্তব্যতিষঙ্গেণ ধনবিনিময়েন বিবৃদ্ধো বৈরানু-বন্ধো যস্য, তথাবিধোঽপি পরস্পরং বিবহন্ বিবাহাদিসম্বন্ধং কুর্ব্বন্নুরুভিঃ কৃচ্ছ্রৈঃ শ্রমৈর্বিত্তবাধৈরুপসর্গৈশ্চ দ্বেষাদিভির্বিপন্নো মৃতপ্রায়ো ভবতি ॥

১৪। দুরত্যয়ত্বমধ্বনো দর্শয়তি—তাংস্তান্ বিপন্নান্ মৃতান্ বিহায় জাতং জাতং পরিগৃহ্য বিহরন্, যতঃ প্রস্থিতস্তং প্রতি নাবর্ত্ততে, হে বীর! অধ্বনঃ পারং যো যোগস্তঞ্চ নোপৈতি। অত্র সার্থে কশ্চিদতিসমর্থোঽপি ॥

১। জাঠরেণ (ঘ)।

১৫। তদেবাহ—মনস্বিনঃ শূরাঃ, নির্জ্জিতা দিগ্‌গজেন্দ্রা যৈঃ, মমেয়ং ভূর্মমেয়মিতি ভুবি নিমিত্তভূতায়াং বদ্ধং বৈরং যৈঃ, ন্যস্তদণ্ডঃ সন্ন্যাসী যদ্বিষ্ণোঃ পদমভিযাতি, তত্তু ন ব্রজন্তি ॥

১৬। সিংহাবলোকনেন পুনর্ভবাটবীমেবানুবর্ণয়তি—প্রসজ্জত্যাসক্তিং করোতি। কীদৃশঃ? লতানাং ভুজাঃ শাখাস্তদ্বৎ সুকুমারা যে স্ত্রীণাং ভুজাস্তদাশ্রয়ঃ সন্। তদাশ্রয়া অব্যক্তপদা অস্ফুটাক্ষরাঃ কলভাষিণো যে দ্বিজাঃ পক্ষিণস্তত্তুল্যেষু স্ত্রীসঙ্গপ্রসক্তেষ্বপত্যেষু স্পৃহা যস্য তাদৃশো ভূত্বা, হরিচক্রং সিংহসমূহস্তত্তুল্যাৎ কালচক্রনিমিত্তাজ্জন্মমরণাদেস্ত্রসন্ তৎপরিহারায় কৈশ্চিৎ প্রলোভিতো বকাদিবদ্বঞ্চকৈঃ ক্ষুদ্রৈঃ ক্রূরৈশ্চ পাষণ্ডৈঃ সহ সখ্যং করোতি, তেষু প্রবিশতি ॥

১৭। তৈর্বঞ্চিতস্তত্র ফলাভাবং জ্ঞাত্বা হংসানাং ব্রাহ্মণানাং কুলং পুনঃ প্রবিশংস্তেষাং শীলং প্রায়শ্চিত্তপূর্ব্বকং পুনরুপনয়নাদ্যাচারমরোচয়ন্নপ্রিয়ং পশ্যন্ বানরতুল্যান্ ভ্রষ্টাচারান্ শূদ্রপ্রায়ানুপৈতি। তজ্জাতিরাসেন বানরজাতিক্রীড়য়া স্ত্রিয়া মিথুনীভূয় পরস্পরমুখোদ্বীক্ষণেন বিস্মৃতো জীবিতাবধির্ম্মরণকালো যেন ॥

১৮। দ্রুমবৎ কেবলদৃষ্টার্থেষু গৃহেষু। ব্যবায়দীনঃ সুরতেচ্ছয়া কৃপণঃ, এবং স্বস্য যদ্বন্ধনং প্রাপ্তং তস্মিন্ বিবশঃ পরিহর্ত্তুমশক্তঃ। চরন্ বনে ইতি পাঠান্তরে তু বনে সংসারে চরন্নিত্যর্থঃ। গিরিকন্দরবদতিভয়ানকে রোগাদিদুঃখে পতন্ কন্দরস্থগজতুল্যান্মৃত্যোর্ভীতঃ সন্, বল্লীতুল্যং প্রাচীনং কর্ম্মাবলম্ব্যাবস্থিতো ভবতি ॥

১৯। সার্থং প্রবিশতি, যথাপূর্ব্বং প্রবৃত্তিমার্গে রমতে ; ন বেদ পরমপুরুষার্থম্ ॥

২০। ত্বমপ্যধ্বনি নিবেশিত ইত্যনুষঙ্গঃ। অতোঽস্যাধ্বনঃ পারমতিতর; অসজ্জিতাত্মা বিষয়েষ্বনভিনিবেশিতচিত্তঃ সন্, হরিসেবয়া শিতং তীক্ষ্ণীকৃতম্॥

২১। অখিলজন্মসু শোভনং নৃজন্মৈব। ন পরং শ্রেষ্ঠং যেভ্যো দেবাদিজন্মভ্যস্তৈরপি কিম্? অমুষ্মিন্ স্বর্গেঽপি জন্মভিঃ কিম্? ন কিঞ্চিৎ। যদ্যেষু জন্মসু, যত্র স্বর্গে বা, বো যুষ্মাকং মহাত্মনাং সমাগমঃ প্রচুরো ন ভবতি। হৃষীকেশস্য যশসা কৃতঃ শোধিত আত্মা যৈস্তেষাম্॥

২২। সন্ততং সমুপাসিতৈস্ত্বৎপাদাব্জরেণুভির্হতমংহো যস্য তস্যাধোক্ষজে নির্ম্মলা ভক্তির্ভবতীতি নৈবাদ্ভুতম্। যস্য তব তু মুহূর্ত্তমাত্রভবাৎ সমাগমমাত্রাদপি কুতর্কেণ বদ্ধমূলোঽপি মমাবিবেকো নষ্টঃ॥

২৩। ব্রহ্মবিদঃ কেন রূপেণ চরন্তীত্যজ্ঞানাৎ সর্ব্বান্ নমস্যতি—নম ইতি। যে বটবঃ, ক্রীড়ারতত্বাদশ্রদ্ধেয়ধৌরেয়াস্তানভিব্যাপ্য সর্ব্বেভ্যো নম ইত্যর্থঃ। স্বদৃষ্টান্তেন রাজ্ঞাং মহদবজ্ঞাং সম্ভাব্যাহ—রাজ্ঞাং শিবমস্ত্বিতি॥

২৪। উত্তরা মাতা যস্য, হে উত্তরামাতঃ! বিগণয়তো, ন গণয়তঃ, অবমন্তর্য্যপি পরমকরুণাকরত্বেন সিন্ধুপতয় আত্মতত্ত্বমুপদিশ্য; নিভৃতাঃ শান্তাঃ, করণানামূর্ম্ময়ো যস্মিন্, স আশয়ো যস্য॥

২৫। সুজনাত্তস্মাৎ সম্যগবগতং পরমাত্মসতত্ত্বং যেন তথাভূতঃ সন্, তদানীমেব দেহে আত্মমতিঞ্চ বিসসর্জ্জ। হে নৃপ! ভগবদাশ্রিতো ভরতঃ, তদাশ্রিতো রহূগণঃ, যস্তস্যানুভাবঃ সদ্যো দেহাহঙ্কারত্যাগঃ॥

২৬। পরোক্ষেণ বণিক্‌সার্থরূপকেণার্য্যাণাং বিবেকিনাং মনীষয়ৈব দস্যুস্থানীয়ানীন্দ্রিয়াণি গোমায়ুস্থানীয়ান্যপত্যাদীনীত্যেবং কল্পিতবিষয়ঃ; অব্যুৎপন্নস্য তু লোকস্য জনস্য সম্যগধিগম্যো ন ভবতি। অথ অতস্তদেতদেব ভবাধ্বরূপং সমবেতানুকল্পেন প্রস্তুতে তদনুরূপার্থোপকল্পনেন॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে ত্রয়োদশোঽধ্যায়ঃ॥ ১৩॥

চতুর্দ্দশোঽধ্যায়ঃ

চতুর্দ্দশে ভবারণ্য-রূপকব্যাকৃতিঃ কৃতা।
প্রস্তুতে দস্যুগোমায়ু-মশকাদ্যর্থকল্পনৈঃ॥ (১)

১। যঃ পরীক্ষিতা পৃষ্টঃ স শ্রীশুক উবাচ। হেতি সূতোক্তিঃ। দুরত্যয়েঽধ্বন্যজয়া নিবেশিত ইতি যদুক্তম্, তদেব বননিবেশনপ্রকারকথনেন প্রপঞ্চয়তি। স এব প্রসিদ্ধো জীবলোকোঽয়ং বিষ্ণোর্মায়য়াসুগমেঽধ্বন্যাপতিতো ভবাটবীং গতঃ সন্ হরিরূপস্য গুরোশ্চরণারবিন্দে যে মধুকরাঃ সেবকাস্তেষামনুপদবীং তৈরনুষ্ঠিতং ভক্তিমার্গমদ্যাপি নাবরুন্ধে, ন প্রাপ্নোতীত্যন্বয়ঃ। মায়ায়াঃ স্বকার্য্যদ্বারেণ সংসারমার্গপাতহেতুত্বমাহ—দেহাত্মমানিনাং সত্ত্বাদিগুণবিশেষৈর্বিকল্পিতানি বিভক্তানি যানি কুশলাকুশলবিমিশ্রকর্ম্মাণি তৈর্বিনির্মিতাভির্বিবিধদেহাবলিভির্বিয়োগসংযোগাদির্যোঽনাদিঃ সংসারস্তদনুভবস্য দ্বারভূতেন ষড়িন্দ্রিয়বর্গেণ তস্মিন্ সংসাররূপে দুর্গমমার্গবদসুগমেঽধ্বন্যাপতিতো যথা বণিজাং সার্থঃ সমূহোঽর্থার্জ্জনপরঃ। স্বদেহনিষ্পাদিতানাং কর্ম্মণাং ফলদ্বারেণানুভবো যস্য, বিফলাশ্চ বহুপ্রতিযোগা বহুবিঘ্নাশ্চ ঈহাশ্চেষ্টা যস্য সঃ। তস্যাং সংসারাটব্যাং যে তাপাস্তেষামুপশমনীং নাশনীম্। যস্যামিত্যাদি ব্যাচষ্টে, যস্যাং ভবাটব্যাম্॥

২। দস্যুতুল্যং তেষাং কর্ম্ম দর্শয়তি—তদ্যথেতি। ধর্ম্মোপনিবেশপ্রকারকথনেন প্রপঞ্চয়তি—স এব প্রসিদ্ধো জীবলোকোঽয়ং বিষ্ণোর্মায়াং সুগমেঽধ্বনি নাপতিতো ভবাটবীং গতঃ। হরিরূপস্য গুরোশ্চরণারবিন্দয়োর্মধুকরাঃ সেবকাঃ। ধর্ম্মৌপয়িকং ধর্ম্মকারণম্, তমেব স্বাভিপ্রেতং ধর্ম্মমাহ—সাক্ষাদিতি। তত্ত্ব সাম্পরায়ে পরলোকার্থমুদাহরন্তি। তদ্ধর্ম্ম্যং ধর্ম্মার্হং ধনম্, দর্শনাদ্যাঃ পঞ্চজ্ঞানেন্দ্রিয়াণাং বৃত্তয়ঃ, সঙ্কল্পব্যবসায়াবন্তঃকরণস্যৈতৈর্গৃহে যো গ্রাম্য উপভোগস্তেন কুনাথস্য কুবুদ্ধেরজিতাত্মনো বিলুম্পন্তি, যথা চৌরাঃ কুপালকস্যানবহিতাত্মনঃ সার্থস্য ধনং হরন্তি, তদ্বৎ॥

৩। গোমায়বো যত্রেত্যেতদ্ব্যাচষ্টে—অথ চেতি। অথ চেত্যর্থান্তরোপন্যাসে ; কর্ম্মণা তে তু বৃকাঃ শৃগালাশ্চ, অতিকদর্য্যস্যাতিলুব্ধস্য ॥

৪। প্রভূতবীরুত্তৃণগুল্মগহ্বর ইত্যেতদ্ব্যাচষ্টে—যথা হীতি। ন দগ্ধানি বীজানি যস্মিন্ ; যদ্‌যস্মাদ্ যোহয়মাবসথ আশ্রমঃ, এষ কামানাং করণ্ডঃ, যথা কর্পূরভাজনে কর্পূরক্ষয়েহপি পরিমলো ন ক্ষীয়তে, এবমত্র বাসনানামক্ষীণত্বান্ন কর্ম্মাণ্যুৎসীদন্তীত্যর্থঃ ॥

৫। দংশমশকতুল্যৈরপসদৈর্নীচৈঃ শলভাদিভিশ্চোপরুধ্যমানঃ পীড্যমানো বহিঃপ্রাণো বিত্তং যস্য, তথাবিধোহপ্যস্মিন্নধ্বনি পরিভ্রমন্নবিদ্যাদিভিরুপরক্তেন মনসা গন্ধর্ব্বপুরতুল্যমঘটমানং নরলোকং সত্যতয়া মিথ্যাদৃষ্টিরনুপশ্যতি ॥

৬। প্রপশ্যতীতি 'প্র'-শব্দসূচিতমর্থান্তরং দর্শয়তি—তত্র চ গন্ধর্ব্বপুরে ক্বচিদাতপোদকং মৃগতৃষ্ণাজলং, তত্তুল্যান্ বিষয়ানুপধাবতীতি ॥

৭। ক্বচিৎ ক্বচিচ্চাশুরয়োল্মুকগ্রহমিত্যেতদ্ব্যাচষ্টে—ক্বচিচ্চাশেষাণাং দোষাণাং নিষদনং স্থানম্, পুরীষবিশেষমগ্নের্বিষ্ঠাম্, তস্য পুরীষস্যেব লোহিতো বর্ণো যস্য রজোগুণস্য তেন নির্ম্মিতা তদ্বিষয়া মতির্যস্য স সুবর্ণমুপাদাতুমিচ্ছতি, অগ্নিকামেন কাতরঃ পরবশ উল্মুকসদৃশং পিশাচমিব। শীতাতুরো হ্যরণ্যেহগ্নিবজ্জাজ্বল্যমানস্ততস্ততো ধাবন্তমুল্মুকপিশাচমগ্নিবুদ্ধ্যানুধাবতি, ন তু তং প্রাপ্নোতি। কথঞ্চিৎ প্রাপ্তশ্চেৎ, তর্হি তেন ভক্ষিতঃ সন্ ম্রিয়তে, এবং সুবর্ণমনুধাবন্নপীত্যর্থঃ ॥

৮। নিবাসতোয়দ্রবিণেত্যেতদ্ব্যাচষ্টে—অথেতি। নিবাসাদিষ্বনেকেষ্বাত্মন উপজীব্যেষ্বভিনিবেশো যস্য ॥

৯। ক্বচিচ্চ বাত্যোত্থিতেত্যেতদ্ব্যাচষ্টে—ক্বচিচ্চেতি ; আরোহমঙ্কম্। তস্মিন্ কালে যদ্রজো রাগস্তেন স্বদৃষ্ট্যাবরকেণ রজন্যাং রাত্রৌ ভূতা ইব।

হ্রস্বপাঠে রজনিভূতস্তমোময় ইবাতীব রজসাচ্ছন্নমতিঃ, অতএব রজোব্যাপ্ত-চক্ষুরিব দিক্ষু স্থিতা মর্য্যাদাতিক্রমসাক্ষিভূতা দেবতা ন জানাতি ॥

১০। অনুপাদেয়মেবোপাদেয়তয়া গৃহ্লাতীতি প্রক্রমসাজাত্যাদুত্তর-শ্লোকচতুর্থপাদং প্রথমং ব্যাচষ্টে—ক্বচিৎ সকৃদিতি। ক্বচিদাতপোদক-নিভানিত্যত্র মিথ্যাবিষয়েষু লম্পটত্বমুক্তম্, নিবাসতোয়েত্যত্র তদর্জ্জনপ্রয়াস উক্তঃ, অত্র তু বাধিতেষ্বপি পুনঃ প্রবৃত্তিরুচ্যত ইত্যপৌনরুক্ত্যম্। স্বয়মেব সকৃদবগতং বিষয়াণাং বৈতথ্যং বিফলত্বং যেন, পরাভিধ্যানেন দেহাভি-নিবেশেন বিভ্রংশিতা স্মৃতির্যস্য, তয়ৈব বিভ্রংশিতয়া স্মৃত্যা স্মৃতিভ্রংশাদে-বেত্যর্থঃ ॥

১১। অদৃশ্যঝিল্লীস্বনেত্যেতদ্ব্যাচষ্টে—ক্বচিদুলূকেতি। অতিপরুষো রভস উৎসাহস্তেনাটোপঃ সংভ্রমো যথা ভবত্যেবং রিপূণাং রাজকুলস্য চ নির্ভর্ৎসিতেনাতিব্যথিতং কর্ণমূলং হৃদয়ঞ্চ যস্য ॥

১২। অপুণ্যবৃক্ষানিত্যেতদ্ব্যাচষ্টে—স যদেতি। দুগ্ধমুপভুক্তং পূর্ব্ব-সুকৃতং যেন, তদা কারস্করো বিষতিন্দুকস্তৎপ্রমুখা যেঽপুণ্যদ্রুমাস্তথাবিধা লতাশ্চ বিষোদপানাশ্চ বিষকূপাস্তত্তুল্যান্ দৃষ্টাদৃষ্টপ্রয়োজনশূন্যধনান্ ॥

১৩। ক্বচিদ্বিতোয়াঃ সরিত ইত্যেতদ্ব্যাচষ্টে—একদা ক্বচিদসতাং প্রসঙ্গান্নিকৃতা বঞ্চিতা মতির্যস্য সঃ। নিরুদক-নদীগর্ভপাতে যথা সদ্যঃ শিরঃ স্ফুটতি, পশ্চাদপি চ তদ্বেদনানুবর্ত্ততে, এবমিহ পরত্র চ দুঃখদম ॥

১৪। পরস্পরং চালয়তে[১] নিরন্ধ ইত্যেতদ্ব্যাচষ্টে—যদা ত্বিতি। অন্ধোঽন্নং নোপনমতি নোপতিষ্ঠতি। পিতৃপুত্ত্রাণাং বর্হিঃ কুশস্তদ্বতঃ, পিতুঃ পুত্ত্রাণাং বা কুশাদিতৃণমাত্রমপি যেষু পশ্যতি তান্ ভক্ষয়তি বাধত ইত্যর্থঃ। পিতৃ-পুত্ত্রবর্হিষ্ঠানিতি তু পাঠঃ সুগমঃ ॥

১৫। আসাদ্য দাবমিত্যেতদ্ব্যাচষ্টে—ক্বচিদাসাদ্যেতি ॥

১। চালষতে (ঘ)।

১৬। ক্ব চ যক্ষৈৰ্হৃতাসুরিত্যেতদ্ব্যাচষ্টে—ক্বচিৎ কালেন বিষমিতং প্রতিকূলতাং নীতং যদ্রাজকুলং তদেব রক্ষস্তেনাপহৃতা প্রিয়তম-ধনরূপা অসবো যস্য, বিগতানি জীবলক্ষণানি হর্ষাদীনি যস্য, শূরৈর্হৃতস্ব ইত্যপ্যনেনৈব ব্যাখ্যাতম্ ॥

১৭। ক্বচিচ্চ গন্ধর্ব্বপুরং প্রবিষ্ট ইত্যেতদ্ব্যাচষ্টে—কদাচিন্মনোরথপ্রাপ্তং পিত্রাদ্যসদেব সদিতি মত্বা। পূর্ব্বং গন্ধর্ব্বপুরবদঘটমানদর্শনমুক্তম্, ইদানীং তন্নিমিত্তসুখাসক্তিরুচ্যত ইতি ভেদঃ ॥

১৮। চলন্ ক্বচিদিত্যেতদ্ব্যাচষ্টে—ক্বচিদ্‌গৃহাশ্রমে যাঃ কর্ম্মচোদনা-স্তাসামতিভরোঽতিবিস্তারঃ, স এব গিরিস্তমারুরুক্ষংস্তদন্তং গন্তুমিচ্ছন্ ॥

১৯। পদে পদেঽভ্যন্তরবহ্নিনেতি ব্যাচষ্টে—ক্বচিচ্চ দুঃসহেনেতি ॥

২০। ক্বচিন্নিগীর্ণ ইত্যেতদ্ব্যাচষ্টে—স এবেতি ॥

২১। 'দষ্টঃ স্ম শেতে' ইতি ব্যাচষ্টে—কদাচিদিতি। মানো গর্ব্ব এব দংষ্ট্রা, পরপীড়াকরত্বাৎ। ভগ্না মানদংষ্ট্রা যস্য, অতএব ন লব্ধো নিদ্রায়াঃ ক্ষণোঽপি যেন ॥

২২। কর্হিস্মচিৎ ক্ষুদ্ররসানিত্যেতদ্ব্যাচষ্টে—কর্হিস্মচিৎ কামমধুলবানিতি। যদা নিহতো ভবতি, তদা সদ্য এব নিরয়ে পততি ॥

২৩। প্রসঙ্গাৎ প্রবৃত্তস্য কর্ম্মণঃ সংসারহেতুত্বং স্ফুটয়তি—অথ চেতি। যস্মাদেবং তস্মাৎ, অথানন্তরমেব, উভয়থা ইহ চ পরত্র চ, অস্মিন্ প্রবৃত্তিমার্গে, সংসারস্যাবপনং জন্মক্ষেত্রং কর্ম্মোদাহরন্তি ॥

২৪। তত্রাতিকৃচ্ছ্রং প্রতিলব্ধমান ইত্যেতদ্ব্যাচষ্টে—মুক্ত ইতি। যদি বন্ধান্মুক্তো ভবতি, তর্হি ততঃ সকাশাদন্যো হরতি, তস্মাদপ্যন্যঃ। ন ত্বসৌ ভোক্তুং লভত ইত্যর্থঃ ॥

২৫। ক্বচিচ্চ শীতাতপেত্যেতদ্ব্যাচষ্টে—ক্বচিচ্চেতি। শীতাদয়োঽনেকা আধিদৈবিক্যাদ্যা যা দশা দুঃখাবস্থাস্তাসাম্ ॥

২৬। ক্বচিন্মিথ ইত্যেতদ্ব্যাচষ্টে—ক্বচিন্মিথো যৎ কিঞ্চিদ্ধনং ব্যবহরন্ কাকিণিকামাত্রং বিংশতিবরাটকমাত্রং[১] ততোঽপি ন্যূনং বা যৎ কিঞ্চিদপহরন্ বিদ্বেষমেতি॥

২৭। অধ্বন্যমুষ্মিন্নুরুকৃচ্ছ্রবিত্তবাধোপসর্গৈরিত্যুক্তানুপসর্গান্ প্রপঞ্চয়তি—অধ্বন্যমুষ্মিন্নিমে উরুকৃচ্ছ্রবিত্তবাধাদয়স্তথা সুখদুঃখাদয়শ্চ॥

ব্যুৎক্রমৈঃ পুনরুক্তৈশ্চ নানাপাঠৈরতঃ পরম্।
দুর্গমোঽপি ভবাধ্বায়ং সম্প্রদায়েন তীর্য্যতে[২]॥ (২)

২৮। তত্র প্রসজ্জতি ক্বাপীত্যাদিনা সিংহাবলোকন্যায়েনোক্তমর্থমপকৃষ্য ক্রমেণ ব্যাচষ্টে—ক্বাপি দেবমায়য়েতি। প্রস্কন্নমপগতং বিবেকবিজ্ঞানং যস্য, তস্যাঃ স্ত্রিয়া বিহারগৃহং ক্রীড়াগৃহং তদারম্ভ আকুলং হৃদয়ং যস্য, অনেন প্রসজ্জতীতি ব্যাখ্যাতম্। তদাশ্রয়েত্যাদি ব্যাচষ্টে—তস্যা আশ্রয়েঽবসক্তাঃ সংলগ্না সুতা দুহিতরশ্চ কলত্রঞ্চ সৈব স্ত্রী, তেষাং ভাষিতাদিভিরপহৃতং হৃদয়ং যস্য ; প্রহিণোতি প্রক্ষিপতি॥

২৯। ক্বচিৎ কদাচিদ্ধরিচক্রতস্ত্রসন্নিত্যেতদ্ব্যাচষ্টে—কদাচিদীশ্বরস্যেতি। পরমাণুরাদিঃ, দ্বিপরার্দ্ধোঽপবর্গোঽন্তস্তদেবোপলক্ষণং যস্য, তস্মাৎ। কালোপলক্ষণাদিতি পৃথক্‌পদত্বেন পাঠে কালস্বরূপাদিত্যর্থঃ। রংহসা শীঘ্রেণ পরিবর্ত্তিতেন পরিভ্রমণেন, বয়সা বাল্যাদিক্রমেণ ব্রহ্মাণমভিব্যাপ্য তৃণস্তম্বাদীনি ভূতানি হরতঃ সংহরতশ্চক্রতঃ সকাশাদ্‌বিত্রস্তহৃদয়ঃ সন্ পাষণ্ডদেবতা আভিমুখ্যেন ধত্ত ইত্যন্বয়ঃ। অনিমিষতো নিমেষমকুর্ব্বতঃ, অপ্রমত্তাদিত্যর্থঃ। মিষতাং প্রতিকর্ত্তুমশক্তানামিত্যর্থঃ ; কর্ম্মণি ষষ্ঠ্যঃ। কালচক্রং নিজমায়ুধং[৩] যস্য, সাঙ্কেত্যেন মূলপ্রমাণশূন্যেন পাষণ্ডাগমেন॥

৩০। তৈর্বঞ্চিত ইত্যেতদ্ব্যাচষ্টে—যদা ত্বিতি। আত্মনা বঞ্চিতৈঃ, উরু অধিকম্, বঞ্চিতঃ সন্। তেষাং ব্রাহ্মণানাং যচ্ছীলমুপনয়নাদি তদরোচয়ন্

১। -কপর্দ্দকমাত্রং (ঘ) ; ২। সম্প্রদায় ইতীর্য্যতে (গ) ; ৩। নিজং নিত্যমায়ুধং (ঘ)।

শূদ্রবদ্বর্ত্ততে। নিগমোক্তাচারেঽশুদ্ধিতস্তস্য[১] শুদ্ধ্যভাবাদ্, যস্য শূদ্রস্য কেবলং মিথুনীভাবঃ কুটুম্বভরণঞ্চ ব্যাপারঃ, নাগ্নিহোত্রাদিঃ ॥

৩১। তজ্জাতিরাসেনেত্যাদি ব্যাচষ্টে—তত্রাপি নিরবরোধঃ প্রতিবন্ধ-রহিতঃ স্বৈরেণ স্বেচ্ছয়া ক্রীড়ন্ বিস্মৃতমৃত্যুকালঃ সন্ ॥

৩২। দ্রুমেষু রংস্যন্নিত্যেতদ্ব্যাচষ্টে—ক্বচিদ্দ্রুমবদিতি। ব্যবায়ক্ষণো মৈথুনোৎসবো ভবতি ॥

৩৩। ক্বচিৎ প্রমাদাদিত্যেতদ্ব্যাচষ্টে—এবমধ্বনি সুখদুঃখাভ্যবরুদ্ধানো গিরিকন্দরপ্রায়ে তমসি রোগাখ্যাপদি পততীতি শেষঃ ॥

৩৪। ক্বচিচ্ছীতবাতেত্যাদি পূর্ব্বস্মাদধিকোক্তিঃ। রোগাখ্যাপদি পতিতঃ সন্ শীতাদিভিঃ ক্লিশ্যন্নাস্ত ইত্যর্থঃ ॥

৩৫। তদেবং সিংহাবলোকন্যায়েনোক্তমর্থং যথাস্থানমপকৃষ্য ব্যাখ্যায় ক্রমস্থমনুবর্ত্তয়িতুং পূর্ব্বোক্তমেবানুবদতি—ক্বচিন্মিথ ইতি। বিত্তশাঠ্যেন কদাচিদ্ যৎ কিঞ্চিদ্ধনমুপযাতি[২] ॥

৩৬। ক্বচিৎ ক্বচিৎ ক্ষীণধনস্ত্বিতি ব্যাচষ্টে—ক্বচিৎ ক্বচিৎ ক্ষীণধন ইতি। অপ্রতিলব্ধং যন্মনোরথেনোপগতং বাঞ্ছিতং তস্যাদানে স্বীকারে নিশ্চিতমতিঃ সন্ ॥

৩৭। অন্যোঽন্যবিত্তব্যতিষঙ্গেণেত্যেতদ্ব্যাচষ্টে—এবং বিত্তব্যতিষঙ্গেতি। অপবহতি ত্যজতি যৎ ॥

৩৮। অধ্বন্যমুষ্মিন্নিত্যাদি ব্যাচষ্টে—এতস্মিন্নিতি। আপন্নঃ আপদং প্রাপ্তঃ, বিপন্নো বিনষ্টো বা যত্র যস্তমিতরস্তত্রৈব বিসৃজ্য। নহ্যমানো বধ্যমানঃ, সাধুবর্জ্জিতঃ সাধুব্যতিরিক্তঃ ॥

৩৯। অনাবৃত্তৌ হেতুমাহ—যদিদমিতি ॥

১। স্বস্য (ঘ); ২। উপনয়তি (গ)।

৪০। মনস্বিন ইতি ব্যাচষ্টে—যদপীতি। যে বৈ রাজর্ষয়স্তেহপি নাবরুন্ধতে, কিন্তু পরং কেবলং মৃধে শয়ীরন্ ॥

৪১। প্রসজ্জতীত্যাদি গিরিকন্দর ইত্যন্ত্যমপকৃষ্য ব্যাখ্যাতং গ্রন্থমতিক্রম্য বল্লীং গৃহীত্বেত্যাদি-গ্রন্থং ব্যাচষ্টে—কর্ম্মবল্লীমিতি। এবমুপরি স্বর্গং গতোহপি নরলোকসার্থমেবোপযাতি ॥

৪২। তদেবং ভরতোক্তিং ব্যাখ্যায় তচ্চরিত-সংগ্রহশ্লোকানাহ—তস্যেদং কর্ম্ম শ্লোকৈরুপগায়ন্তি। আর্ষভস্য ঋষভপুত্রস্যান্যো নৃপোহনুবর্ত্ম নার্হতি বর্ত্মানুগন্তুং ন শক্নোতি ॥

৪৩। অত্র হেতুমাহ—য ইতি। সুহৃদ্রাজ্যয়োর্দ্বন্দ্বৈক্যম্, যো দুস্ত্যজান্ দারাদীন্ বিষ্ঠামিব জহৌ, তস্যার্ষভস্যেতি সম্বন্ধঃ। দুস্ত্যজত্বে হেতুঃ—হৃদিস্পৃশো মনোজ্ঞান্। ত্যাগে হেতুঃ—উত্তমঃশ্লোকে লালসা লম্পটত্বং যস্য ॥

৪৪। তস্যৈবং বিষয়ত্যাগো ন চিত্রমিত্যাহ—য এবম্ভূতোহসৌ নৃপঃ, স ক্ষিত্যাদীন্ নৈচ্ছদিতি যত্তদুচিতম্। সদয়াবলোকাং ভরতস্য দয়া যথা ভবত্যেবমবলোকো যস্যা ইতি পরিজনাবলোকঃ শ্রিয়ামুপচর্য্যতে, যতো মধুদ্বিষঃ সেবায়ামনুরক্তং মনো যেষাং তেষাং মহতামভবো মোক্ষোহপি ফল্গুস্তুচ্ছ এব ॥

৪৫। তস্য সেবানুরাগমেবাহ—যজ্ঞায়েতি। যজ্ঞরূপায় ধর্ম্মপতয়ে যজ্ঞাদিফলদাত্রে, বিধৌ নৈপুণ্যং যস্য তস্মৈ ধর্ম্মানুষ্ঠাত্রে, যোগোহষ্টাঙ্গস্তস্মৈ, সাংখ্যং বিবেক-জ্ঞানম্, তচ্ছিরঃ প্রধানং ফলং যস্য তস্মৈ যোগায়, প্রকৃতীশ্বরায় মায়ানিয়ন্ত্রে ; অতএব নারং জীবসমূহোহয়নমাশ্রয়ো যস্য, তস্মৈ সর্ব্বজীবনিয়ন্ত্রে ; এবং কর্ম্মজ্ঞানদেবতাকাণ্ডৈঃ প্রতিপাদিতায় হরয়ে নম ইত্যুদারমুচ্চৈর্যঃ সম্যগুচ্চারিতবান্। মৃগত্বং মৃগদেহমপি হাস্যন্ ত্যক্ষ্যন্, য এবম্ভূতস্তস্য তদুচিতমিতি বা, তস্যানুবর্ত্ম নার্হতীতি বা সম্বন্ধঃ ॥

৪৬। ভরতচরিতশ্রবণাদিফলমাহ—য ইদমিতি। ভাগবতৈঃ সভাজিতা অবদাতাঃ শুদ্ধা গুণাঃ কর্ম্মাণি চ যস্য তস্য ভরতস্যানুচরিতং যোঽনুশৃণোতি, স আত্মন এব সকাশাৎ সর্ব্বা আশিষ আশাস্তে, স্বত এব প্রাপ্নোতি, ন তু কাঞ্চিদপি পরস্মাদপেক্ষত ইত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ ॥ ১৪ ॥

পঞ্চদশোঽধ্যায়ঃ

এবমষ্টভিরধ্যায়ৈর্ভরতস্যোক্তমীহিতম্[১]।
ততঃ পঞ্চদশে তস্য কীর্ত্ত্যন্তে বংশজা নৃপাঃ ॥ (১)

১। ঋষভস্য পদবীং জীবন্মুক্তমার্গমনুবর্ত্তমানং যং দৃষ্ট্বেতি শেষঃ। যদ্বা, যং সুমতিমবেদসমাম্নাতাং দেবতাং কল্পয়িষ্যন্তি, বুদ্ধোঽয়ং সাক্ষাদবতীর্ণ ইতি মংস্যন্ত ইত্যর্থঃ ॥

৩। তত্তনয়ো দেবতাজিতঃ পুত্রঃ ॥

৪। আত্মবিদ্যাং বহুভ্য আখ্যায় ব্যাখ্যানেনৈব স্বয়ং সংশুদ্ধোঽনুসস্মারাপরোক্ষতয়ানুভূতবান্ ॥

৫। প্রতিহর্ত্তা প্রস্তোতোদ্গাতেতি ত্রয়ো যজ্ঞনিপুণাঃ সূনব আসন্। অজনিষাতাং জাতৌ ॥

৬। হৃদ্দয়জঃ পুত্রঃ। জগতো রিরক্ষিষয়া রক্ষিতুমিচ্ছয়া গৃহীতং সত্ত্বং যেন, তস্য বিষ্ণোঃ কলা অংশঃ সন্ ॥

১। -মীরিতম্ (গ)।

৭। মহাপুরুষত্বমেবাহ—স বৈ ইতি। ধর্ম্মস্তস্য দ্বিবিধঃ—অভিষিক্তত্বাৎ প্রজাপালনাদিরূপ একঃ, গৃহস্থত্বাদিজ্যাদিশ্চাপরঃ। দ্বিবিধোঽপি ভগবতি সর্ব্বাত্মনার্পিতঃ সন্ পরমার্থলক্ষণস্তেন পরিভাবিতা সংস্কৃতাতো বিশুদ্ধা মতির্যস্য, অতএবোপরতমনাত্ম্যং দেহাদ্যহংভাবো যস্মিংস্তস্মিন্নাত্মনি চিত্তে স্বয়মেবোপলভ্যমানে ব্রহ্মণ্যাত্মানুভবো যস্য তাদৃশোঽপি নিরভিমান এবাবনিমজুগুপং পালয়ামাস॥

৯। কর্ম্মভির্গয়ং কঃ প্রতিযাতি অনুকরোতি? ন কোঽপি। অত্র হেতুঃ—যজ্ঞাদিরূপেণ ভগবৎকলাং গয়মৃতেঽন্যঃ ক ইত্যনুষঙ্গঃ। অভিমানী সর্ব্বতো মানাস্পদং মনস্বীতি বা, সমাগতা সম্প্রাপ্তা শ্রীর্যেন, যমিতি বা, সতাং সদসঃ সভায়াঃ পতিঃ, সতাং সেবকঃ। যদ্বা, যজ্ঞাদিরূপোঽপি ভগবৎ-কলামৃতে গয়ং কোঽন্যঃ প্রতিযাতীত্যন্বয়ঃ॥

১০। সতীঃ—সত্যঃ। সত্যা আশিষো যাসাং তাঃ, দক্ষকন্যাঃ—শ্রদ্ধা মৈত্রী দয়া ইত্যাদ্যাঃ; নিরাশিষোঽপি যস্য প্রজানামাশিষঃ কামান্ বরান্ ধরা দুদুহে। তস্য গুণা এব বৎসস্তেন স্নুতমুধো যস্যাঃ পৃথিব্যাঃ। যচ্ছন্দানাং তং গয়ং কঃ প্রতিযাতীতি সম্বন্ধঃ॥

১১। ছন্দাংসি বেদাস্তদ্বিহিত-কর্ম্মাণি বা[১] দুদুহুর্দুদুহুঃ। যুধি প্রত্যঞ্চিতা বাণৈঃ প্রতিপূজিতা নৃপা যস্য বলিমাজহ্রুরর্পয়ামাসুঃ। ধর্ম্মেণ পালনেন দক্ষিণাদিভিশ্চ যদা প্রত্যঞ্চিতা বিপ্রাস্তদা পরেত্য পরলোক[২] আশিষাং ধর্ম্মফলানাং ষষ্ঠমংশমাজহ্রুঃ, স্বয়ং বিপ্রেভ্যঃ সকাশাদাজহার; 'পুণ্যষড়্‌ভাগমাদত্তে ন্যায়েন পরিপালয়ন্' ইতি স্মৃতেঃ॥

১২। উরুসোমপীথে বহুসোমপানেঽধ্বরে মঘোনি ইন্দ্রে মাদ্যতি মদং প্রাপ্নুবতি সতি, শ্রদ্ধয়া বিশুদ্ধো যোঽচলো ভক্তিযোগস্তেন সমর্পিত-মিজ্যাফলমাজহারার্হণমিব প্রত্যক্ষতঃ স্বীকৃতবানিত্যর্থঃ॥

১। চ (ঘ); ২। লোকান্তরে (ঘ)।

১৩। যস্য ভগবতঃ প্রীণনাৎ। দেবাদীনাং দ্বন্দ্বৈক্যম্ ; তৎ সত্ত্বঃ প্রীয়েত প্রীতিং গচ্ছেৎ। স বিশ্বজীবঃ সর্ব্বান্তর্যামী স্বয়ং প্রীতিরূপ এব বর্হিষি যজ্ঞে গয়স্য হ স্ফুটং প্রীতিমগাৎ, তৃপ্তোঽস্মীতি প্রত্যক্ষং প্রীতি-মাবিষ্কৃতবানিত্যর্থঃ ॥

১৫। সুমনসি—স্ত্রিয়াম্ ॥

১৬। কীর্ত্ত্যাতিশয়েনালমকরোদ্ভূষিতবান্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
পঞ্চদশোঽধ্যায়ঃ ॥ ১৫ ॥

ষোড়শোঽধ্যায়ঃ

পূর্ব্বোক্তদ্বীপসিন্ধাদি-মানচিহ্নস্বরূপতঃ।
স্পষ্টং প্রবক্তুমারব্ধা পরাধ্যায়ী[১] ততঃ পরম্ ॥ (১)

ষোড়শেঽধস্তথা চোর্দ্ধং পরিতঃ সন্নিবেশতঃ।
মেরোঃ স্থিতির্ম্মাহী-কঞ্জকর্ণিকেবোপবর্ণ্যতে ॥ (২)

প্রিয়ব্রতচরিত্রোক্তাবুক্তা[২] দ্বীপাদিকল্পনা।
তদ্বিশেষবিজিজ্ঞাসুঃ কথান্তে পরিপৃচ্ছতি ॥ (৩)

১। উক্ত ইতি। কিংপর্য্যন্তমুক্তস্তদাহ—যাবদাদিত্যস্তপতি প্র-কাশয়তি, যত্র যত্র চাসৌ শুক্লকৃষ্ণপক্ষয়োর্নক্ষত্রগণৈঃ সহ চন্দ্রমা বা দৃশ্যতে, তাবৎ ॥

২। যতো যেভ্যঃ সিন্ধুভ্যঃ, এতস্যা ভুবঃ, সূচিতঃ সংক্ষেপতো দর্শিতঃ ॥

১। পঞ্চাধ্যায়ী (গ, ঘ) ; ২। -চরিত্রোক্তা উক্তা (খ)।

৩। জিজ্ঞাসায়াঃ ফলমাহ—ভগবত ইতি ॥

৪। যা মায়া গুণবিভূতিস্তস্যাঃ, কাষ্ঠামন্তম্, রূপং সন্নিবেশঃ, লক্ষণং চিহ্নম্ ॥

৫। কুবলয়ং ভূমণ্ডলং তদেব কমলম্, তস্য কোশাঃ সপ্ত দ্বীপাঃ, তেষু অভ্যন্তরকোশঃ প্রথমো জম্বুদ্বীপো নিযুতযোজনবিশালো লক্ষযোজনবিস্তীর্ণঃ[১] ॥

৬। নবযোজনসহস্রং প্রত্যেকমায়ামো যেষাম্, আয়ামোঽত্র বিস্তারঃ। এতচ্চ ভদ্রাশ্ব-কেতুমালব্যতিরেকেণ দ্রষ্টব্যম্। তয়োশ্চতুস্ত্রিংশদ্‌যোজনসহস্রায়ামত্বাৎ, কেচিত্তু নীলনিষধয়োঃ সংলগ্নাগ্রয়োঃ সমুদ্রপ্রবেশমঙ্গীকৃত্য তয়োরপি মধ্যে সঙ্কুচিতত্বেন নবসহস্রায়ামত্বং সম্পাদয়ন্তি। সন্নিবেশস্ত বায়ুনোক্তঃ—'ধনুর্বৎ সংস্থিতে জ্ঞেয়ে দ্বে বর্ষে দক্ষিণোত্তরে। দীর্ঘাণি তত্র চত্বারি চতুরস্রমিলাবৃতম্॥' ইতি ॥

৭। নাভ্যাং মধ্যে ; দ্বীপস্যায়ামো লক্ষযোজনপ্রমাণস্তাবান্ সমুন্নাহ উচ্ছ্রায়ো যস্য। মূলে ষোড়শযোজনসহস্রং বিততঃ, তাবতা ষোড়শযোজনসহস্রমানেন চতুরশীতিযোজনসহস্রমানেন চ বহির্দৃশ্যতে। তথা চ বিষ্ণুপুরাণম্—'চতুরশীতিসাহস্রৈর্যোজনৈরস্য চোচ্ছ্রয়ঃ। প্রবিষ্টঃ ষোড়শাধস্তাদ্দ্বাত্রিংশন্মূর্দ্ধ্নি বিস্তৃতঃ। মূলে ষোড়শসাহস্রো বিস্তারস্তস্য ভূভৃতঃ॥' এবং লক্ষযোজনোন্নাহঃ ॥

৮। উত্তরোত্তরেণেলাবৃতম্, ইলাবৃতস্যোত্তরোত্তরতঃ ক্রমেণ নীলাদয়স্ত্রয়ো মর্য্যাদাগিরয়ঃ প্রাগায়তাঃ পূর্ব্বতো দীর্ঘাঃ। ক্ষারোদ এবাবধির্যেষাম্, দ্বিসহস্রযোজনবিস্তীর্ণাঃ। দশাংশাদীষদধিকো যোঽংশস্তেন দৈর্ঘ্য এব হ্রসন্তি, ন তূচ্চত্বে পৃথুত্বে বা ; যথোক্তং বিষ্ণুপুরাণে—'লক্ষপ্রমাণৌ দ্বৌ

১। -বিস্তারঃ (গ)।

মধ্যে দশহীনাস্তথাপরে' ইতি। এতচ্চ স্থূলদৃষ্ট্যৈবোক্তম্, তয়োরপি যথাবন্মধ্যে সত্ত্বাভাবেন[১], লক্ষপ্রমাণত্বাভাবাৎ॥

৯। অযুতযোজন উৎসেধ উচ্ছ্রায়ো যেষাম্, অয়ঞ্চোৎসেধো নীলাদীনামপি দ্রষ্টব্যঃ, নীলাদিপৃথুত্বঞ্চৈষামপি দ্রষ্টব্যম্। যথাসংখ্যং মর্য্যাদাগিরয় ইতি শেষঃ॥

১০। আনীলনিষধায়তাবুত্তরতো নীলপর্য্যন্তং দক্ষিণতো নিষধপর্য্যন্তঞ্চ দীর্ঘৌ। পপ্রথতুর্বিস্তীর্ণৌ ভবতঃ। তাবেব কেতুমাল-ভদ্রাশ্বয়োর্বর্ষয়োঃ সীমানং কুর্ব্বাতে। নন্বেবং সতি পূর্ব্বাপররেখায়ামিলাবৃতবেষ্টিতো মেরুমধ্যে ততঃ পূর্ব্বাপরতো গিরিদ্বয়ং বর্ষদ্বয়ঞ্চ, নাতঃ পরং কিঞ্চিদস্তি ; দক্ষিণোত্তররেখায়াস্তু তথৈবেলাবৃতবেষ্টিতো মধ্যে মেরুরুভয়তস্ত্রীণি ত্রীণি বর্ষাণি গিরয়শ্চ ষট্। তৎ কথং সর্ব্বতো লক্ষপ্রমাণত্বং জম্বুদ্বীপস্য ? উচ্যতে—মেরোঃ ষোড়শসহস্রাণি, সর্ব্বতঃ স্থিতত্বাদিলাবৃতস্যাষ্টাদশ, অন্যেষাং ষণ্ণাং চতুঃপঞ্চাশৎ, গিরীণাং ষণ্ণাং দ্বাদশ ইত্যেবং দক্ষিণোত্তররেখায়াং তাবল্লক্ষম্। পূর্ব্বাপররেখায়ামপি সুমেরোরিলাবৃতস্য চতুস্ত্রিংশৎ, গির্য্যোশ্চত্বারি, শেষাণি দ্বিষষ্টি-সহস্রাণি পূর্ব্বাপরবর্ষয়োরাসমুদ্রং দৈর্ঘ্যে দ্রষ্টব্যানি, অতো ন বিরোধঃ॥

১১। অযুতযোজনপ্রমাণৌ বিস্তারোন্নাহৌ যেষাম্, বিস্তীর্ণমূর্দ্ধ্নৌ মেরোরবষ্টম্ভত্বাৎ পূর্ব্বপশ্চিমৌ গিরী দক্ষিণোত্তরবিস্তারৌ দক্ষিণোত্তরৌ চ পূর্ব্বাপরবিস্তারৌ দ্রষ্টব্যৌ। সর্ব্বতো দশযোজনসহস্রবিস্তারাঙ্গীকারে ত্বিলাবৃতলোপাৎ 'পূর্ব্বেণেলাবৃতমুপপ্লাবয়তি' ইত্যাদিবিরোধঃ স্যাৎ॥

১২। অধিসহস্রমেকাদশশতান্যুন্নাহো যেষাম্, তাবৎপ্রমাণা বিটপবিততির্যেষাম্, শতযোজনং পরিণাহো বিস্তারো যেষাম্॥

১৩। যত্তুপস্পর্শিনো যৎসেবিনঃ॥

১। মধ্যমত্ত্বাভাবেন (ঘ)।

১৫। ললামো ভূষণম্। সুরললনানাং ভূষণভূতাঃ শ্রেষ্ঠা যাঃ স্ত্রিয়-স্তাসাং যূথস্য পতয়ঃ, সহ সম্ভূয় যেষু বিহরন্তি ॥

১৬। একাদশশতযোজনমুত্তুঙ্গো যো দেবচূতস্তস্য শিরসঃ সকাশাৎ। ফলপ্রমাণঞ্চোক্তং বায়ুপুরাণে,—'অরত্নীনাং শতান্যষ্টাবেকষষ্ট্যধিকানি চ। ফলপ্রমাণমাখ্যাতমৃষিভিস্তত্ত্বদর্শিভিঃ ॥' ইতি ॥

১৭। অতিমধুরশ্চাসৌ স্বতঃ সুরভিশ্চ সুগন্ধিশ্চ, ন চান্যেষাং গন্ধৈ-রধিবাসিতঃ, বহুলশ্চাসাবরুণশ্চ রসঃ, স এবোদমুদকং তেন ॥

১৮। যদুপজোষণাদ্যস্য রসস্য সেবনাৎ ॥

১৯। অনস্থিপ্রায়াণামতিসূক্ষ্মবীজানাম্। যত্র নিপততি ততশ্চা-রভ্যাত্মনো দক্ষিণতঃ সর্ব্বমিলাবৃতং ব্যাপ্য বহতীত্যর্থঃ ॥

২০। তাবৎ সর্ব্বতো রোধসোস্তটয়োঃ ॥

২২—২৩। আয়ামোঽত্র ব্যামঃ, স চ—'ব্যামো বাহ্বোঃ সকরয়ো-স্ততয়োস্তির্য্যগন্তরম্' ইত্যুক্তলক্ষণঃ। পঞ্চ ব্যামাঃ পরিণাহঃ স্থৌল্যং যাসামিত্যর্থঃ। কেচিত্তু পঞ্চব্যামপরিণাহা ইত্যেব পঠন্তি ॥

২৪। নীচীনাঃ—অধোমুখাঃ ॥

২৭। চতুর্দ্দিক্ষু মেরুমূলাদ্‌যোজনসহস্রং ত্যক্ত্বাগ্রেঃ পরিতঃ পরিধয় ইব জঠরদেবকূটাদয়স্তিষ্ঠন্তি। অতোঽষ্টাদশযোজনসহস্রং প্রমাণমত্রোক্তম্ —'বৈষ্ণবাদিপুরাণেষু পরিমাণাদি যৎ পুনঃ। অন্যথা বর্ণিতং তত্তু কল্প-ভেদাদ্ব্যপেক্ষয়া ॥' দ্বিসহস্রং পৃথু চ তুঙ্গৌ চ ॥

২৯। যথাদিশং প্রাচ্যাদিদিক্ষু, যথারূপমিন্দ্রাদিবর্ণানতিক্রমেণ, তুরীয়-মানেন সার্দ্ধদ্বিসহস্রপ্রমাণেন, নামানি পুরাণান্তরাজ্‌ জ্ঞাতব্যানি। যথোক্তম্—'মেরৌ নব পুরাণি স্যুর্মনোবত্যমরাবতী। তেজোবতী সংযমনী

তথা কৃষ্ণাঙ্গনা পরা ॥ শ্রদ্ধাবতী গন্ধবতী তথা চান্যা মহোদয়া। যশোবতী চ ব্রহ্মেন্দ্র-বহ্ন্যাদীনাং যথাক্রমম্ ॥' ইতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
ষোড়শোঽধ্যায়ঃ ॥ ১৬ ॥

সপ্তদশোঽধ্যায়ঃ

ততঃ সপ্তদশে গঙ্গাগমনং তচ্চতুর্দ্দিশম্।
ইলাবৃতে চ রুদ্রেণ সঙ্কর্ষণনিষেবণম্ ॥ (১)

১। যজ্ঞলিঙ্গস্য বলের্যজ্ঞে লিঙ্গং ত্রিবিক্রমমূর্ত্তির্যস্য। বিক্রমতো দক্ষিণেন পদা ভুবং ক্রান্ত্বা বামপাদমুৎক্ষিপতো বামপাদাঙ্গুষ্ঠনখেন নির্ভিন্ন-মূর্দ্ধমুপরিভাগো যস্যাণ্ডকটাহস্য তস্য বিবরেণান্তঃপ্রবিষ্টা যা বাহ্যজলধারা, সা দিবো মূর্দ্ধন্যবততারেত্যন্বয়ঃ। তস্য যচ্চরণপঙ্কজং তস্যাবনেজনেন ক্ষালনে-নারুণং তদ্গতং কুঙ্কুমম্, তদেব কিঞ্জল্কাস্তৈরুপরঞ্জিতা, অতএবাখিলস্য জগতোঽঘমলাপহমুপস্পর্শনং যস্যাঃ, তথাপ্যমলা তন্মলসঙ্গশূন্যা সাক্ষাদ্-ভগবৎপদীতি যদনুপলক্ষিতং জাহ্নবীভাগীরথীত্যাদ্যুপলক্ষণান্তররহিতং বচো নাম তেনাভিধীয়মানা। তস্মিন্ সময়ে ভগবৎপদী নাম, পশ্চান্নামান্তরাণি জাতানীত্যর্থঃ। কোঽসৌ দিবো মূর্দ্ধা? তমাহ—যদিতি ॥

২। কিং তদ্বিষ্ণুপদম্? তদাহ—যত্রেতি। বীরব্রতঃ—দৃঢ়সঙ্কল্পঃ। অস্মৎকুলদেবতায়া হরেশ্চরণারবিন্দোদকমিতি হেতোঃ পরমাদরেণ বিভর্ত্তী-ত্যন্বয়ঃ। কথম্ভূতঃ সন্? প্রতিক্ষণং বর্দ্ধমানেন ভগবদ্ভক্তিযোগেন দৃঢ়-মত্যন্তং ক্লিদ্যমানমন্তর্হৃদয়ং যস্য, অতএবৌৎকণ্ঠ্যেন বিবশমামীলিতং

যল্লোচনযুগলং তদেব কুট্মলে, তাভ্যাং বিগলিতমমলং বাষ্পম্, তস্য কলয়া সহাভিব্যজ্যমানং রোমপুলকানাং কুলং যস্য ॥

৩। ততঃ সপ্তর্ষয়স্তস্যা গঙ্গায়াঃ প্রভাবাভিজ্ঞাঃ সন্তো যাং জটাজূটৈরুদ্বহন্তীত্যন্বয়ঃ। এতাবত্যেব, নাতোঽধিকাস্তীত্যভিপ্রায়বন্তঃ। তত্র হেতুঃ—ভগবতি সন্ততং ভক্তিযোগলাভেনৈবোপেক্ষিতা অন্যে পুরুষার্থা আত্মজ্ঞানঞ্চ যৈঃ। কামিব, ক ইব ধারয়ন্তি? প্রত্যক্ষং মুক্তিমিব তামাগতাম্, মুমুক্ষবো জনা ইব তে ॥

৪। ততোঽনেকসহস্রকোটীনাং বিমানানামনীকৈঃ সঙ্কুলেন দেবযানেনাকাশমার্গেণাবতরন্তী। সপ্তর্ষিভ্যোঽর্ব্বাগেব প্রায়শঃ কর্ম্মিণাং গতিরিতি ততোঽর্ব্বাগেব সঙ্কুলত্বমুক্তম্। আবার্য্য—আপ্লাব্য। মেরুমূর্দ্ধস্থে ব্রহ্মসদনে নিপততি ॥

৫। অভিস্যন্দন্ত্যভিতো[১] গচ্ছন্তী ॥

৬। কেশরাচলানাং মেরুসমানোচ্ছ্রায়ত্বাৎ প্রথমং তেষামাদিশিখরেষু মুখ্যশৃঙ্গেষু পততি, ততস্তেভ্যোঽধোঽধঃ প্রস্রবন্তী সতী ॥

৭। মাল্যবচ্ছিখরাৎ কেতুমালাভিমুখং নিষ্পতন্তী, চক্ষুঃসংজ্ঞা[২] ॥

৮। গিরিশিখরাদিতি ; কুমুদশিখরাদুচ্চলিতা নীলশিখরম্, তত উচ্চলিতা[৩] শ্বেতশিখরম্, তদপ্যতিহায় শৃঙ্গবতঃ শৃঙ্গাদধঃ প্রস্রবন্তী ॥

৯। অতিরভসতররংহসাস্খলিততীব্রতরবেগেন ॥

১০। বহুশো বহুবিধাঃ, মের্ব্বাদিগিরীণাং দুহিতরস্তৎপ্রসূতাঃ ॥

১১। দিব্যভৌমবিলভেদাস্ত্রিবিধঃ স্বর্গঃ। তত্র ভৌমস্বর্গস্য পদানি স্থানানি ব্যপদিশন্তি ॥

১২। অযুতং পুরুষমাণেনায়ুর্ব্বর্ষাণি যেষাম্ ; বজ্রবদ্দৃঢ়ং সংহননং শরীরম্, তস্মিন্ বলবয়োমোদাস্তৈঃ প্রমুদিতানি যানি মহাসৌরতানি

১। অভিস্পন্দত্যভিতো (ঘ) ; ২। বঙ্ক্ষুর্বঙ্ক্ষুসংজ্ঞা (খ) ; ৩। উচ্ছলিতা (খ)।

মিথুনানি, তেষাং ব্যবায়াপবর্গে সম্ভোগাবসান একবর্ষশেষ আয়ুষি ধৃত একো গর্ভো যৈস্তাদৃশানি কলত্রাণি যেষাম্। ত্রেতাযুগসমঃ, বিষয়সুখোৎকর্ষাৎ। কৃতযুগে হি সর্ব্বে ধ্যাননিষ্ঠাঃ, দ্বাপরাদৌ তু দুঃখবহুলাঃ॥

১৩। যত্র হ যেষু হি বর্ষেষু দেবপতয়ঃ স্বৈঃ স্বৈঃ সেবকগণেষু মুখ্যৈঃ কৃতমহোপচারাঃ সন্তঃ স্বৈরং বিহরন্তীত্যন্বয়ঃ। কেষু স্থানেষু? সর্ব্বেষ্বৃতুষু কুসুমস্তবকাদীনাং শ্রিয়া সমৃদ্ধ্যাত্যন্তং নম্যমানা বিটপাস্তদাশ্রিতা লতাশ্চ যেষু, তৈর্বিটপিভিরুপশুম্ভমানানি শোভমানানি রুচিরাণি কাননানি যেষু তেষ্বাশ্রমায়তনেষু বর্ষগিরিদ্রোণীষু চ, তথামলেষু জলাশয়েষু চ, বিকচানি বিকাসীনি বিবিধানি নবানি চ যানি বনরুহাণি নীরজানি, তেষামামোদেন প্রমুদিতৈ রাজহংসাদিভির্মধুকরনিকরাণাঞ্চ আকৃতিভির্জাতিবিশেষৈরুপকূজিতেষু। কামেন কলিলৈঃ ক্ষুভিতৈর্বিলাসাদিভিরাকৃষ্টং মনো দৃষ্টিশ্চ যেষাং তে॥

১৪। নবস্বপি বর্ষেষু যে পুরুষাস্তেষাং তদনুগ্রহায় স চাসৌ বক্ষ্যমাণোঽনুগ্রহশ্চ, তদর্থমাত্মতত্ত্বব্যূহেন স্বমূর্তিসমূহেন সন্নিধীয়তে সন্নিহিতো ভবতি॥

১৫। অপরোঽর্ব্বাচীনঃ, পশ্চান্নবমস্কন্ধে॥

১৬। ভবানী নাথঃ স্বামিনী যেষাং তৈঃ স্ত্রীগণানামর্ব্বুদসহস্রৈরবরুধ্যমানঃ সর্ব্বতঃ সেব্যমানঃ। আত্মনঃ প্রকৃতিং কারণম্, আত্মনি সমাধিধ্যানং যস্য তেন রূপেণ, এতদ্বক্ষ্যমাণং মন্ত্রাদিকমভিগৃণন্ জপন্॥

১৭। সর্ব্বেষাং গুণানাং সংখ্যানং প্রকাশো যস্মাৎ। স্বয়ন্তু অব্যক্তায়াপ্রমেয়ায়॥

১৮। হে ভজেন্য! ভজনীয়! ত্বা ত্বাং পরমীশ্বরং ভজ ইত্যন্বয়ঃ। অরণং শরণং পাদপঙ্কজং যস্য। কৃৎস্নস্য ভগস্যৈশ্বর্য্যাদিষড়্গুণস্য[১] পরময়ন-

১। -ষাড়্গুণ্যস্য (ঘ)।

মাশ্রয়ম্, ভক্তেম্বলমত্যর্থং ভাবিতং প্রকটিতং ভূতভাবনং স্বরূপং যেন; ভবাপহং সংসারহরম্, ভক্তেম্বিত্যনুষঙ্গঃ; ভবং ভাবয়তীতি তথা তম্, অর্থাদভক্তেম্বিতি দ্রষ্টব্যম্॥

১৯। ঈশ্বরত্বমুপপাদয়ংস্তামসত্বেন প্রসক্তমনাদরং বারয়তি—ন যস্যেতি; যস্য নিরীক্ষমাণস্যাপি দৃষ্টির্মায়য়া গুণৈর্বিষয়ৈশ্চিত্তবৃত্তিভিরন্তঃকরণৈশ্চাণ্বপীষদপি নাজ্যতে, ন লিপ্যতে। কিমর্থং নিরীক্ষমাণস্য? ঈশে ঈশনায় নিয়মনায়, ঈশনমীট্ সম্পদাদিত্বাদ্ভাবে ক্বিপ্। অত্র বৈধর্ম্মো দৃষ্টান্তঃ—যথা অজিতক্রোধবেগানাং নোঽস্মাকং দৃষ্টিরজ্যতে, ন তথেতি। অত আত্মন ইন্দ্রিয়াণি জিগীষুর্জেতুমিচ্ছুর্মুমুক্ষুস্তং কো ন মন্যেত, নাদ্রিয়েত?

২০। নন্থ সুরামদাভ্যাং মত্তস্য কুতো দৃষ্টির্নাজ্যতে? তত্রাহ—অসতী দৃগ্দৃষ্টির্যস্য, তস্য স্বমায়য়া ক্ষীবা মত্ত ইব যো ভয়ঙ্করঃ প্রতিভাতি, মধ্বাসবাভ্যাং তাম্রলোচন ইব চ। নাগবধূবিমোহনেন তথা প্রতিভানং যুক্তমিত্যাহ—নেতি। পাদার্চ্চনে যস্য পাদয়োঃ স্পর্শনেন ধর্ষিতং মোহিতমিন্দ্রিয়ং মনো যাসাং তাঃ, হ্রিয়া লজ্জয়া ভুজান্তর্হণে নেশিরে, ন শেকুঃ; কস্তং ন মন্যেতেতি পূর্ব্বেণৈবান্বয়ঃ॥

২১। অস্য বিশ্বস্য স্থিতিজন্মসংযমহেতুং যমাহুঃ, অতএব ত্রিভিঃ স্থিত্যাদিভির্বিহীনমনন্তঞ্চ যমাহুঃ, ঋষয়ো মন্ত্রাঃ, ছন্দোঽনুরোধেন দীর্ঘপাঠঃ; যদ্বা, ঋকারো দেবমাতা লক্ষ্মীঃ, সা চ ঋষয়শ্চেত্যর্থঃ। অনন্তত্বং দর্শয়তি—মূর্দ্ধসহস্রমেব ধামানি স্থানানি, তেষু ক্বচিদেকদেশে স্থিতং ভূমণ্ডলং যো ন বেদ সিদ্ধার্থং সর্ষপমিব, তস্মৈ নম ইতি চতুর্থেনান্বয়ঃ॥

২২। অত্র জন্মহেতুত্বং মহদাদিদ্বারেণ প্রপঞ্চয়তি—যস্য গুণনিমিত্তো মহান্ নাম বিগ্রহ আসীৎ। বিজ্ঞানং সত্বং ধিষ্ণ্যমাশ্রয়ো যস্য সঃ, তস্য চিত্তরূপত্বেন সত্বপ্রধানত্বাৎ। স এব কিলাধিদেবঃ[১], বাসুদেবাভেদ-

১। কিলাধিদৈবঃ (ঘ)।

বিবক্ষয়া ; ভগবানজো ব্রহ্মা ; যৎসম্ভবো যস্মাদ্ব্রহ্মণঃ সম্ভূতোঽহং রুদ্রঃ। ত্রিবৃতা ত্রিগুণেন স্বতেজসা স্ববিভূতিরূপেণাহঙ্কারেণ বৈকারিকং দেবতা-বর্গং[১] তামসং ভূতবর্গম্[১], ঐন্দ্রিয়মিন্দ্রিয়বর্গঞ্চ[১] সৃজে সৃজামি॥

২৩। কিঞ্চৈতে বয়ং মহদাদয়ঃ সর্ব্বে যস্যানুগ্রহাদিদং ব্রহ্মাণ্ডং সৃজামঃ। কথম্ভূতাঃ ? যস্য মহাত্মনো বশে স্থিতাঃ সন্তঃ। যতঃ সূত্রেণ ক্রিয়াশক্ত্যা যন্ত্রিতাঃ প্রোতাঃ, শকুন্তাঃ পক্ষিণ ইব লৌকিকেন সূত্রেণ। বয়মিত্যুক্তম্, তানেবাহ—মহানহঙ্কারশ্চ বৈকৃতাদয়ঃ পূর্ব্বোক্তা বর্গাশ্চ॥

২৪। স্থিতিলয়হেতুত্বং দর্শয়ন্ প্রণমতি—যেন নির্ম্মিতামেতাং মায়া-মেবায়ং জনোঽঞ্জসা বেদ, ন তু তন্নিস্তারে যোগমুপায়ং কর্হিচিদপি বেদেতি স্থিতিহেতুত্বং দর্শিতম্। কীদৃশীম্ ? কর্ম্মাণ্যেব পর্ব্বাণি গ্রন্থয়স্তানি নয়তি প্রাপয়তীতি তথা, তাম্। প্রলয়হেতুত্বমাহ—বিলীয়তেঽস্মিন্নিতি বিলয়ঃ, উদেতি অস্মাদিত্যুদয়ঃ, তস্য বিলয়োদয়াবাত্মা স্বরূপং যস্য, তস্মৈ নমঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
সপ্তদশোঽধ্যায়ঃ॥ ১৭ ॥

অষ্টাদশোঽধ্যায়ঃ

অষ্টাদশে ততো মেরোঃ পূর্ব্বাদিক্রমতস্ত্রিষু।
ত্রিষু চোত্তরবর্ষেষু সেব্যসেবকবর্ণনম্॥ (১)

১। ভদ্রশ্রবা বর্ষপতিঃ, তস্য কুলপতয়ঃ সেবকমুখ্যাশ্চ॥

২। ভদ্রশ্রবস উচুরিতি। প্রাণভৃত উপদধাতীতিবদ্ গণলক্ষণয়া তদ্‌যোগাদ্গণেষু লিঙ্গসমবায়ন্যায়েন বহুবচনম্॥

১। -সর্গং, -সর্গম্, সর্গঞ্চ (ক)।

৩। অয়ং জনো মিষন্নপি পশ্যন্নপি ঘ্নন্তং হিংসন্তং মৃত্যুং ন পশ্যতি, নালোচয়তীতি। ভগবদ্বিচেষ্টিতমেব, তচ্চ বিচিত্রম্। অদর্শনে লিঙ্গম্—পুত্রং বালম্, পিতরঞ্চ বৃদ্ধং মৃতং নির্হৃত্য দগ্ধ্বা স্বয়ং তত্তুভয়ধনৈর্জিজীবিষতি জীবিতুমিচ্ছতি ; জিজীবিষন্নিতি পাঠে তু ছন্দঃসামঞ্জস্যম্। কিং ধর্ম্মাদ্যর্থম্? ন। যর্হি যতোঽসত্তুচ্ছং বিষয়সুখং সেবিতুং বিকর্ম্ম পাপমেব ধ্যায়ন্॥

৪। নন্ববিদ্বান্ন পশ্যতি ; কিমত্র চিত্রম্? তত্রাহ—নশ্বরং বদন্তি স্ম শাস্ত্রতঃ, পশ্যন্তি চ সমাধৌ। হে অঙ্গ! তথাপি মায়য়া মুহ্যন্তি। এতচ্চ তব কৃত্যং চেষ্টিতং সুবিস্মিতমতিচিত্রম্, অতঃ শাস্ত্রাদিশ্রমং বিহায় তং ত্বামজমহং নতোঽস্মি॥

৫। ইদমপরং চিত্রবৎ প্রতীয়মানমপি ত্বয়ি ন চিত্রমিত্যাহ—বিশ্বস্যোদ্ভবাদি কর্ম্মাকর্ত্তুরপি, অপগতা আবৃদাবরণং যস্মাত্তাদৃশস্যাপি তেঽঙ্গীকৃতং বেদেন। ত্বয়ি তন্ন চিত্রম্ ; যতো মায়য়া সর্ব্বাত্মনি কার্য্যস্য কারণে স্রষ্টরি কর্ম্ম যুক্তম্। বস্তুনি সর্ব্বব্যতিরিক্তে নিরুপাধাবনাবৃতত্বম্, অকর্ত্তৃত্বঞ্চ যুক্তম্॥

৬। পরমেশ্বরত্বেন স্তুত্বা প্রস্তুতাবতারচরিতমাহ—বেদানিতি। তমসা দৈত্যরূপেণ তিরস্কৃতানপনীতান্। না চ তুরঙ্গশ্চ নৃতুরঙ্গৌ, তদ্রূপো বিগ্রহো যস্য। কবয়ে ব্রহ্মণে, তদর্থমবিতথে হিতায় সত্যসঙ্কল্পায়॥

৭। উত্তরত্র প্রহ্লাদচরিত্রে। মহাপুরুষস্য গুণানাং ভাজন আশ্রয়ঃ। দৈত্যদানবকুলস্য তীর্থীকরণং শীলমাচরিতঞ্চ যস্য, ফলসঙ্কল্পেন ব্যবধানেন শূন্যশ্চাসাবনন্যশ্চাব্যভিচারী যো ভক্তিযোগস্তেনোপাস্তে সেবতে॥

৮। তেজসামপি তেজসে, আবিরাবিরতিপ্রকটো ভবেতি, বীপ্সা বা। কর্ম্মাশয়ান্ ; কর্ম্মবাসনাঃ, কর্ম্মাশ্রয়ানিতি পাঠে রাগাদীন্ রন্ধয় নির্দ্দহ। ভূয়িষ্ঠাঃ ভূয়াঃ॥

৯। বিশ্বস্য স্বস্তিপ্রার্থনে খলস্যাপি ভবেৎ, তত্তু সাধুপীড়াং বিনা ন স্যাৎ। অন্যোন্যমমঙ্গলঞ্চ ধ্যায়তাং ভূতানামন্যোন্যঘাতং বিনা ন ভবেদিত্যা-

শঙ্ক্যাহ—খলঃ প্রসীদতাং প্রসীদতু, ক্রৌর্য্যং ত্যজতু ; ভূতানি চ মিথঃ শিবমেব ধ্যায়ন্তু, তেষাং মনশ্চ ভদ্রমুপশমাদিকং ভজতু, নোঽস্মাকমপি মতিঃ, 'অপি'-শব্দাদ্ ভূতানাঞ্চ মতিঃ, অহৈতুকী নিষ্কামা সতী ॥

১০। নঃ সঙ্গঃ ক্বাপি মা স্যাৎ। যদি কথঞ্চিৎ স্যাৎ, তহ্যগারাদিষু মা স্যাৎ, কিন্তু ভগবৎপ্রিয়েষ্বেব। অগারাদিসঙ্গদোষমাহ—ষ ইতি। ইন্দ্রিয়প্রিয়ো গৃহাদ্যাসক্তঃ ॥

১১। ভগবৎপ্রিয়সঙ্গে গুণমাহ—যেষাং ভগবৎপ্রিয়াণাং সঙ্গাল্লব্ধং মুকুন্দবিক্রমং শ্রুতিভিঃ শ্রবণাদিভিঃ সংস্পৃশতাং সেবমানানাং পুংসামন্তর্গতোঽজো মানসং মলং হরতি। কথম্ভূতং বিক্রমম্? নিজমসাধারণং বীর্য্যবৈভবং প্রভাবাতিশয়ো যস্য। তীর্থন্তু গঙ্গাদি মুহুঃ সংস্পৃশতামঙ্গজং মলং কেবলং হরতি, ন তু বাসনাঃ। তান্ কো বৈ ন সেবেতেত্যন্বয়ঃ ॥

১২। মানসমলাপগমফলমাহ—যস্যেতি। অকিঞ্চনা নিষ্কামা মনঃশুদ্ধৌ হরের্ভক্তির্ভবতি, ততশ্চ তৎপ্রসাদে সতি সর্ব্বে দেবাঃ সর্ব্বৈর্গুণৈশ্চ ধর্ম্মজ্ঞানাদিভিঃ সহ তত্র সম্যগাসতে, নিত্যং বসন্তি ; গৃহাদ্যাসক্তস্য তু হরিভক্ত্যসম্ভবাৎ কুতো মহতাং গুণা জ্ঞানবৈরাগ্যাদয়ো ভবন্তি? অসতি বিষয়সুখে মনোরথেন বহির্ধাবতঃ ॥

১৩। ননু হরিবিমুখস্য গৃহাদ্যাসক্তস্যাপি লোকে মহত্ত্বং দৃশ্যতে? সত্যং দৃশ্যতে। তত্তু উপহাসাস্পদমিতি সহেতুকমাহ—হরির্হীতি। যথা ঝষাণাং মীনানামীপ্সিতং তোয়মেবাত্মা, তেন বিনা জীবনাভাবাৎ। মহানতিপ্রসিদ্ধোঽপি যদি গৃহে সজ্জতে, তদা দম্পতীনাং মিথুনানাং শূদ্রাদিষ্বপি প্রসিদ্ধং বয়সৈব কেবলং যন্মহত্ত্বং তদেব তস্য ভবতি, ন তু জ্ঞানাদিনা। মিথুনেষু তেষু পূজ্যমানেষু স্ত্রীভ্যঃ পুংসাং মহত্ত্বম্, বালমিথুনেভ্যশ্চ বৃদ্ধমিথুনানাং মহত্ত্বং যথেত্যর্থঃ ॥

১৪। যস্মাদেবং, তস্মাদ্গৃহং হিত্বাকুতোভয়ং নৃসিংহপাদং ভজতেত্যসুরাননুপদিশতি। কীদৃশং গৃহম্? রজস্তৃষ্ণা, রাগোঽভিনিবেশঃ; রজআদীনাং মূলং কারণম্, অতএব সংসৃতীনাং জন্মমরণাদীনাং চক্রবালং মণ্ডলমবিচ্ছেদো যস্মাৎ॥

১৫। কেতুমালেঽপি ভগবান্ কামদেবস্বরূপেণাস্ত ইতি শেষঃ। কিমর্থমাস্তে? তত্রাহ—লক্ষ্ম্যা ইতি। প্রজাপতিঃ সংবৎসরঃ, 'সংবৎসরো বৈ প্রজাপতিঃ' ইতি শ্রুতেঃ। তস্য দুহিতরো রাত্র্যভিমানিন্যো দেবতাঃ, পুত্রা দিবসাভিমানিনো দেবাঃ, তেষাঞ্চ প্রিয়চিকীর্ষয়া। পুরুষায়ুষা বর্ষশতেন যান্যহোরাত্রাণি তৈঃ পরিসংখ্যানং গণনা যেষাম্, ষট্‌ত্রিংশৎসহস্রাণামিত্যর্থঃ। যাসাং দুহিতৃণাম্, মহাপুরুষস্য মহাস্ত্রং চক্রম্, তস্য তেজসা॥

১৬। রমাং রময়ন্ স্বীয়ানীন্দ্রিয়াণি রময়তে। কেন সাধনেন রময়ন্? তত্রাহ—অতীবসুললিতয়া গত্যা যো বিলাসস্তেন বিলসিতো রুচিরো হাসলেশো মন্দস্মিতম্, তৎসহিতোঽবলোক এব লীলা, তয়া কিঞ্চিদুত্তম্ভিতমুত্তুঙ্গিতং সুন্দরং যদ্ ভ্রূমণ্ডলং তেন সুভগং যদ্বদনারবিন্দং তস্য শ্রিয়া॥

১৭। তদ্দুর্তৃভির্দিবসাধিষ্ঠাতৃভিরুপেতা॥

১৮। সর্ব্বৈর্গুণবিশেষৈঃ শ্রেষ্ঠবস্তুভির্বিলক্ষিতো লক্ষ্যীকৃত আত্মা যস্য। আকূতীনাং ক্রিয়াণাম্, চিত্তীনাং জ্ঞানানাম্, চেতসাং সঙ্কল্পাধ্যবসায়াদীনাম্, বিশেষাণাং তত্তদ্বিষয়াণাম্। ষোড়শ কলা অংশা একাদশেন্দ্রিয়পঞ্চবিষয়লক্ষণা যস্য। ছন্দোময়ায় বেদোক্তকর্ম্মপ্রাপ্যায়, অন্নময়ায়ান্নোপষ্টভ্যত্বাৎ, অমৃতময়ায় পরমানন্দাবিষ্কারিত্বাৎ, সর্ব্বময়ায় সর্ব্ববিষয়ত্বাৎ; সহসে, ওজসে, বলায়, তদ্ধেতুত্বাৎ॥

১৯। তৎকামেনৈব ত্বৎসেবকত্বাদহং কৃতার্থাস্মি, অন্যকামনয়া তু ত্বামর্চ্চন্ত্যো ন পরিপূর্ণমনোরথাঃ স্যুরিত্যাহ—স্ত্রিয় ইতি; স্বত এব হৃষীকাণামীশ্বরং পতিং সন্তং ত্বামারাধ্য যাঃ স্ত্রিয়োঽন্যং পতিং প্রার্থয়ন্তে;

পতিকামানাং হি কামারাধনং ব্রতেষু প্রসিদ্ধম্ ; তাসামপত্যাদীনি তে পতয়ো ন পাতুং শক্তাঃ ॥

২০। অতস্তে পতয় এব ন ভবন্তীত্যাহ—স বা ইতি। স চ এবম্ভূতঃ পতিঃ স্বয়ং ভবানেক এব, নান্যঃ ; যো ভবানাত্মলাভাৎ পরমন্যদধিকং ন মন্যতে। ইতরথান্যাধীনসুখস্য ন স্বতন্ত্রতা। অস্বতন্ত্রনানাত্বে চ মণ্ডলেশ্বরাণামিব মিথো ভয়ং স্যাদিত্যর্থঃ ॥

২১। কিঞ্চ নিষ্কামভজনেঽপ্রার্থিতা এব সর্ব্বে কামা ভবন্তি। সকামভজনে তু কামিতমাত্রমনিত্যঞ্চেত্যাহ—যা স্ত্রী তস্যোক্তলক্ষণস্য তে পাদসরোরুহস্যার্হণং পূজামেব কাময়েত, ন ফলান্তরং, সাখিলেষু কামেষু লম্পটা, সর্ব্বান্ কামান্ প্রাপ্নোতীত্যর্থঃ। ঈপ্সিতমীপ্সিতঃ ফলান্তরমাপ্তুমপেক্ষিতঃ সন্নর্চিতশ্চেত্তর্হি তদেবৈকং রাসি দদাসি। কিঞ্চ, যদ্যতঃ ফলভোগানন্তরং ভগ্না যাচ্ঞা যাচিতোঽর্থো যস্যাঃ সা প্রতপ্যতে দুঃখং প্রাপ্নোতি, তদেব রাসি, ন তু নিত্যম্ ॥

২২। ননু মমার্হণে কুতঃ সর্ব্বকামপ্রাপ্তিঃ ? তমেব হি কামার্থিভিঃ সেব্যসে, অত আহ—মৎপ্রাপ্তয়ে ব্রহ্মাদয়স্তপস্তপ্যন্তে কুর্ব্বন্তি। কথম্ভূতাঃ ? ঐন্দ্রিয়ে সুখে ধীর্যেষাম্, অলুক্-সমাসঃ। তথাপি ভবৎপাদপরায়ণাদৃতে মাং ন বিন্দন্তি, মৎকটাক্ষবিলসিতা বিভূতীর্ন লভন্ত ইত্যর্থঃ। যতস্ত্বয্যেব হৃদয়ং যস্যাঃ সাহং ত্বৎপরতন্ত্রত্বাত্ত্বদনুবর্ত্তিনমেব বিলোকয়ামি, নান্যমিত্যর্থঃ ॥

২৩। ইদানীং তৎকৃপাং প্রার্থয়তে—স ত্বমিতি। যদ্ভজনং বিনা ন কশ্চিদপি পুরুষার্থঃ স ত্বম্। ত্বদিতি ত্বয়া যৎ করাম্বুজং সাত্বতানাং ভক্তানাং শীর্ষ্ণ্যধায়ি কৃপয়া ন্যস্তম্, তন্মমাপি শীর্ষ্ণি নিধেহীতি শেষঃ। কথম্ভূতম্ ? বন্দিতং সর্ব্বকামবর্ষিত্বেন সদ্ভিঃ স্তুতম্। ন চ ময়ি তবানাদরঃ, যতো হে বরেণ্য ! মা মাম্, বক্ষসি লক্ষ্ম বিভর্ষি। অহো চিত্রমেতৎ,

ময়ি কেবলমাদরমাত্রম্, ভক্তেষু তু পরমা কৃপা। অত ঈশ্বরস্য তব মায়য়েহিতং কো বিতর্কয়িতুং সমর্থঃ ॥

২৫। সত্ত্বায় সত্ত্বগুণপ্রধানায়, মুখ্যতমায় প্রাণায় সূত্রাত্মনে ॥

২৬। উরুঃ স্বনো বেদাত্মকো নাদো যস্য। য ইদং বিশ্বং ব্রাহ্মণাদি-নাম্না বিধিনিষেধালম্বনমূলেন[১] বশেঽনয়ন্নিয়মিতবান্, স ত্বমীশ্বরঃ ; তথা চ শ্রুতিঃ —'যস্য বাকৃতন্তির্নামানি দামানি' ইত্যাদিঃ ॥

২৭। নন্বিন্দ্রাদয়ো বশং নয়ন্তি, লোকপালকত্বাৎ, কুতোঽহম্? তত্রাহ —যমিতি। মৎসর এব জ্বরো যেষাং তে। যং হিত্বা দ্বিপদশ্চতুষ্পদশ্চ সরীসৃপং জঙ্গমম্, স্থাণু স্থাবরঞ্চ, যদত্র দৃশ্যতে, তৎ কিঞ্চিদপি পাতুং ন শক্তাঃ, স ত্বমেব প্রাণরূপেণ পালক ঈশ্বরশ্চেত্যর্থঃ। তথা চ শ্রুতিঃ — 'স্তা অহিংসন্তাহমুক্থমস্ম্যহমুক্থমস্মি' ইত্যাদিঃ ॥

২৮। অবতারচরিতমাহ—ভবানিমাং ক্ষৌণীং ময়া মনুনা সহ মৎ-সংহিতাং[২] ধৃত্বেত্যধ্যাহারঃ ; ঊর্ম্মিমালাবতি প্রলয়ার্ণব উরু ওজসা ক্রমতে বিচরতি ; যদ্বা, পাতুমিত্যস্যানুষঙ্গঃ, ক্ষৌণীং পাতুং ক্রমত উৎসহত ইত্যর্থঃ। যতোঽজঃ। কীদৃশীম্? ওষধীনাং বীরুধাঞ্চ নিধিমাশ্রয়-ভূতাম্ ; তস্মৈ নমঃ, জগতো যঃ প্রাণগণস্তস্যাত্মনে নিয়ন্ত্রে ॥

২৯। তৎপ্রিয়তমাং তাং প্রিয়তমাম্ ॥

৩০। অকূপারায় কূর্ম্মায়, সর্ব্বঃ সম্পূর্ণঃ সত্ত্বগুণো বিশেষণং যস্য, নোপলক্ষিতং স্থানং যস্য, বারিচরত্বাৎ। বর্ষ্মণে বর্ষীয়সে কালানবচ্ছিন্নায়, ভূম্নে সর্ব্বগতায়, অবস্থানায়াধারায় ॥

৩১। নিজমায়য়ার্পিতং প্রকাশিতমেতদর্থস্বরূপং দৃশ্যং পৃথিব্যাদি যস্যৈব রূপং যতঃ পৃথঙ্ নাস্তি। কথম্ভূতম্? বহুভী রূপৈ রূপিতং নিরূপিতম্। যস্য চ সংখ্যা নাস্তি। কুতঃ? অযথা মিথ্যৈবোপলম্ভনাৎ।

১। -ভূতেন (ঘ) ; ২। মৎসহিতাং (ঘ)।

ন হি মরীচিকাজলমেতাবদিতি সংখ্যাতুং শক্যতে। অব্যপদেশরূপিণেঽনিরুক্তপ্রপঞ্চাকারায় ॥

৩২। বহুরূপত্বং দর্শয়ংস্তস্যেশ্বরাদব্যতিরেকমাহ—জরায়ুজমিতি। দ্বীপ-গ্রহর্ক্ষমিত্যভিধেয়স্ত্বমেবৈকো, ন ত্বদ্ব্যতিরিক্তোঽস্তি, 'সর্ব্বং খল্বিদং ব্রহ্ম' ইত্যাদিশ্রুতেরিত্যর্থঃ ॥

৩৩। সপ্রপঞ্চতামনূদ্য তন্নিরাসেন প্রণমতি—যস্মিন্নিতি। অসংখ্যেয়া অনন্তা বিশেষা যেষাং তানি নামানি রূপাণ্যাকৃতয়শ্চ যস্য তাদৃশে যস্মিংস্ত্বয়ি কবিভিঃ কপিলাদিভিরিয়ং চতুর্বিংশত্যাদি-সংখ্যা কল্পিতা সতী যয়া তত্ত্বদৃশা যেন তত্ত্বজ্ঞানেনাপনীয়তে, তস্মৈ তে তুভ্যং সাংখ্যসিদ্ধান্তরূপায় নমঃ, পরমার্থজ্ঞানরূপায়েতি বা ॥

৩৪। এষা ভূরুপধাবতি হেত্যন্বয়ঃ ॥

৩৫। মন্ত্রৈস্তত্ত্বেন লিঙ্গ্যত ইতি তথা তস্মৈ। যজ্ঞা অযূপাঃ, ক্রতবঃ সযূপাস্তদ্রূপায়, অতএব মহান্তোঽধ্বরা অবয়বভূতা যস্য। কর্ম্মণা শুক্লায় শুদ্ধায় যজ্ঞানুষ্ঠাত্রে, ত্রিযুগায়, কৃতযুগে যজ্ঞাভাবাৎ; যদ্বা, কলিযুগে ছন্নত্বাৎ ॥

৩৬। কবয়ো বিদ্বাংসো বিপশ্চিতো নিপুণা গুণেষু দেহেন্দ্রিয়াদিষু মথ্নন্তি বিচিন্বন্তি, মথ্না বিবেকসাধনেন মনসা, ক্রিয়ার্থৈঃ কর্ম্মভিস্তৎফলৈশ্চ, গূঢ়মপ্রকাশমানং দিদৃক্ষবঃ। এবং মথন ঈরিতঃ প্রকটিত আত্মা স্বরূপং যস্য, তস্মৈ নমঃ ॥

৩৭। মথনমেব দর্শয়ন্ত্যাহ—দ্রব্যেতি; দ্রব্যং বিষয়ঃ, ক্রিয়া ইন্দ্রিয়-ব্যাপারঃ, হেতুর্দেবতা, অয়নং দেহঃ, ঈশঃ কালঃ, কর্ত্তা অহঙ্কারঃ, এতৈর্মায়ায়া গুণৈঃ কার্য্যৈরুপলক্ষণৈর্বস্তুত্বেন নিরীক্ষিতো য আত্মা তস্মৈ। অন্বীক্ষয়া বিচারেণ, অঙ্গৈর্যমনিয়মাদিভিরতিশয়াত্মা নিশ্চয়বতী বুদ্ধির্যেষাং তৈর্নিরস্তা মায়ানিমিত্তা আকৃতির্যস্মাত্তস্মৈ, তে নমঃ ॥

৩৮। তদেবং নির্গুণরূপেণ নত্বা পরমেশ্বররূপেণ চ প্রণমতি—করোতীতি। যস্তেক্ষিতুর্জীবার্থমীপ্সিতম্, অত্যন্তানিচ্ছায়ামীক্ষণাযোগাৎ। স্বার্থন্তু নেপ্সিতম্, বিশ্বস্থিত্যাদি স্বগুণৈর্মায়া করোতি। তস্যা জড়ত্বেঽপীশ্বরসন্নিধানাৎ প্রবৃত্তিং দৃষ্টান্তেনাহ—যথায়ো লৌহং গ্রাবণোঽয়স্কান্তান্নিমিত্তাদ্ ভ্রমতি, তদাশ্রয়ং তদভিমুখং সৎ। গুণানাং কর্ম্মণাং জীবাদৃষ্টানাঞ্চ সাক্ষিণে তস্মৈ, তে নমঃ ॥

৩৯। অবতারচরিতমাহ—প্রমথ্যেতি। যো জগতামাদিঃ কারণভূতঃ শূকরো মাং পৃথ্বীমগ্রদংষ্ট্রে দংষ্ট্রাগ্রে কৃত্বা রসাতলাদারভ্যোদন্বতঃ প্রলয়ার্ণবাদিভো গজ ইব নিরগাৎ। ততশ্চ প্রতিবারণং প্রতিগজতুল্যং দৈত্যং প্রমথ্য যঃ ক্রীড়ন্ স্থিতস্তং বিভুম্, প্রণতাস্মীত্যন্বয়ঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
অষ্টাদশোঽধ্যায়ঃ ॥ ১৮ ॥

একোনবিংশোঽধ্যায়ঃ

ঊনবিংশে কিম্পুরুষে ভারতে চোপবর্ণ্যতে।
সেব্যসেবকভাবশ্চ ভারতশ্রেষ্ঠ্যমেব চ ॥ (১)

২। ভর্ত্তা চাসৌ ভগবাংশ্চ, তস্য কথাম্ ॥

৩। আর্য্যাণি লক্ষণানি শীলং ব্রতঞ্চ যস্মিন্। উপশিক্ষিতাত্মনে সংযতচিত্তায়, উপাসিতোঽনুস্মৃতো লোকো যেন, সাধুবাদঃ সাধুত্বপ্রসিদ্ধিস্তস্য নিকষণায় নিকষাশ্মবন্নির্দ্ধারণস্থানায়, পরমসীম্ন ইত্যর্থঃ ॥

৪। শ্রীরামং পরমাত্মরূপেণ[১] প্রণমতি—যদেকং বেদান্তেষু প্রসিদ্ধং তত্ত্বম্, তং প্রপদ্যে। কথম্ভূতম্? বিশুদ্ধশ্চাসাবনুভবশ্চ, স এব মাত্রা স্বরূপং যস্য। বিশুদ্ধত্বে হেতুঃ—প্রশান্তম্; তত্রাপি হেতুঃ—স্বতেজসা স্বরূপপ্রকাশেন ধ্বস্তা গুণানাং বিবিধা জাগ্রদাদ্যবস্থা যস্মিন্। অনুভব-মাত্রত্বে হেতুঃ—প্রত্যক্, দৃশ্যাদন্যত্বাৎ। তৎ কুতঃ? অনামরূপম্। নন্‌ু বস্তুত এবম্ভূতস্যাপি জীবস্যোক্তসর্ব্ববিপর্য্যয়ো দৃশ্যতে? তত্রাহ—নিরহম্, অহঙ্কারাভাবান্ন তথা বৈপরীত্যমিত্যর্থঃ। নন্‌ু শ্রীরামস্য স্বরূপং নৈবং প্রতীয়তে? তত্রাহ—সুধিয়া পুংসোপলভ্যত ইত্যুপলক্ষনং শুদ্ধ-চিত্তেন ব্রহ্মত্বেনৈবোপলভ্যত ইত্যর্থঃ ॥

৫। কথং তর্হি দশরথপুত্রত্বম্? তত্রাহ—বিভোর্বিষ্ণোর্মর্ত্ত্যাবতারস্তু রক্ষসো রাবণস্য বধায়, তস্য মনুষ্যাদন্যতোঽবধ্যত্বাৎ। ন কেবলমেতাবৎ, কিন্ত্বিহ সংসারে স্ত্রীসঙ্গাদিকৃতং দুঃখং দুর্ব্বারমিতি মর্ত্ত্যানাং শিক্ষণঞ্চ, শিক্ষার্থমপীত্যর্থঃ। অন্যথা স্বে স্বরূপে রমমাণস্য জগদাত্মনঃ সীতা-বিরহকৃতানি ব্যসনানীতি কুতঃ স্যাৎ?

৬। বিষয়াসক্ত্যভাবেন ব্যসনানর্হত্বমুপপাদয়তি—ন বৈ স ভগবান্ ত্রিলোক্যাং ক্বাপি সক্তঃ, যত আত্মবতাং ধীরাণামাত্মা সুহৃত্তমশ্চ, অতো ন স্ত্রীকৃতং মোহং প্রাপ্নুয়ান্ন লক্ষ্মণঞ্চেতি। দেবদূতেন শ্রীরামঃ সম্মন্ত্রয়তা বিজ্ঞাপিতঃ—অত্রাগতস্ত্বয়া বধ্য ইতি। তদৈব দ্বারি স্থিতং লক্ষ্মণং দুর্ব্বাসসমাগতং বিজ্ঞাপয়িতুং প্রবিষ্টং হন্তুমুদ্যতো বসিষ্ঠবাক্যাত্তত্যাজ, তচ্চ ন যুজ্যত ইত্যর্থঃ ॥

৭। অতঃ শ্রীরাম এব সর্ব্বৈঃ সেব্য ইতি বক্তুং ন তস্য তোষহেতুঃ সৎকুলজন্মাদি, কিন্তু ভক্তিরেবেত্যাহ—ন জন্মেতি। মহতঃ পুরুষাজ্জন্ম, মহতঃ শ্রীরামস্যেতি; বা সৌভগং সৌন্দর্য্যম্, আকৃতির্জাতিঃ, যদ্‌যস্মাত্তৈ-

১। পরমার্থরূপেণ (ঘ)।

র্জন্মাদিভির্বিস্পৃষ্টাংস্ত্যক্তানপি নো বনচরান্, বত অহো লক্ষ্মণস্যাগ্রজোঽপি সখিত্বে কৃতবান্॥

৮। তস্মাৎ সুরো বাঽন্যো বা যঃ কোঽপি শ্রীরামমেব সর্ব্বপ্রকারেণ ভজেত। সুকৃতজ্ঞমল্পীয়স্যপি ভজনে বহুমানিনম্ ; উত্তরান্ কোশলানযোধ্যাবাসিনঃ॥

৯। উপচিতৈর্ধর্ম্মাদিভিরাত্মোপলভ্যতে যেন তত্তপশ্চরতি। তত্রোপশম ইন্দ্রিয়াণাং সংযমঃ, উপরমো নিরহঙ্কারতা। আত্মবতামনুগ্রহায়, ন স্বার্থম্, ঈশ্বরত্বাৎ॥

১০। ভগবদনুভাব উপবর্ণ্যতে যেন পঞ্চরাত্রেণ তৎ, সাবর্ণের্মনোঃ, উপসরতি সেবতে॥

১১। উপরতানাত্ম্যায় নিরহঙ্কারায়॥

১২। অসক্তশ্চাসৌ বিবিক্তশ্চ সাক্ষী চ, তস্মৈ নমঃ। অসক্তত্বং দর্শয়তি—অস্য বিশ্বস্য সর্গাদিষু কর্ত্তাপি যো ন বধ্যতে, অহং কর্ত্তেতি ন মন্যতে। বিবিক্তত্বমাহ—দেহগতোঽপি দৈহিকৈঃ ক্ষুৎপিপাসাদিভির্যো ন হন্যতে, নাভিভূয়তে। সাক্ষিত্বমাহ—যস্য দ্রষ্টুরপি সতো দৃক্ দৃষ্টিগুর্ণৈদৃর্শ্যৈর্ন বিদূষ্যতে ন বিক্রিয়তে॥

১৩—১৫। যোগকৌশলং নিরূপয়ন্ যোগং প্রার্থয়তে—ইদমিতি ত্রিভিঃ। (১৩) হে যোগেশ্বর! হিরণ্যগর্ভো যদ্‌যোগনৈপুণ্যং জগাদ, তদিদমেব। তৎ কিম্? জন্মপ্রভৃতি ভক্ত্যান্তকালে পুমাংস্ত্বয়ি মনো ধারয়েদিতি যৎ। কথম্ভূতঃ সন্? উজ্ঝিতং ত্যক্তং দুষ্কলেবরং তদভিমানো যেন॥ (১৪) অন্যথা তস্য শাস্ত্রাভ্যাসাদিশ্রমো ব্যর্থ ইত্যাহ—যথৈহিকামুষ্মিককামেষু লম্পটো মূর্খঃ সুতাদিষু যোগ-ক্ষেমং চিন্তয়ন্ কুৎসিতস্য কলেবরস্যাত্যয়ান্মৃত্যোঃ শঙ্কতে, তথা বিদ্বানপি সন্ যঃ শঙ্কেত, তস্য যত্নঃ শাস্ত্রশ্রবণাদিঃ শ্রম এব॥ (১৫) যস্মাদ্বিদুষোঽপীয়মেব দশা,

তত্তস্মাদ্ হে প্রভো ! অধোক্ষজ ! ত্বমেব নো যোগং বিধেহি। কীদৃশম্ ? ত্বয়ি স্বভাবং সহজবাসনারূপম্ ; যেন যোগেন বয়ং ত্বন্মায়য়া নোঽস্মাকং কুকলেবরেঽপিতামহংমমতাং শীঘ্রং ভিন্দ্যাম ত্যজেম। সুহূর্ভিদামুপায়ান্তরৈঃ সর্ব্বথা ত্যক্তুমশক্যাম্ ॥

১৬। ইলাবৃতবদস্মিন্নপি বর্ষে সরিতঃ শৈলাশ্চ সন্তি অনেকে। নিতম্ব-প্রভবরাস্তটেভ্যঃ সম্ভূতাঃ ॥

১৭। আত্মনা চ দেহেনাপ্যুপস্পৃশন্তি ॥

১৮। লব্ধং জন্ম যৈস্তৈঃ পুরুষৈঃ। সাত্ত্বিকাদিনা স্বকৃতেন কর্ম্মণা দিব্যাদিগতয় আত্মনো বিধীয়ন্তে সাধ্যন্তে। হি যস্মাৎ, সর্ব্বা এব গতয়ঃ কর্ম্মানুসারেণ সর্ব্বেষাং ভবন্তি। যস্য বর্ণস্য যদ্বিধানং মোক্ষপ্রকারঃ সন্ন্যাস-বনস্থত্বাদিস্তদনতিক্রমেণাস্মিন্নেব বর্ষে নৃণামপবর্গশ্চ ভবতি। এতচ্চ স্বধর্ম্মাদি[1]বহুসাধনসম্ভবাভিপ্রায়েণোক্তম্, ন ত্বন্যত্রাপবর্গাভাবেন। তদুপর্য্যপি বাদরায়ণ-সম্ভবাদিতি দেবানামপি মোক্ষস্য সূচিতত্বাৎ ॥

১৯। অপবর্গস্বরূপমাহ—যোঽসাবিতি। অনাত্ম্যে—আত্মনি ভব-মাত্ম্যং রাগাদি তদ্রহিতে, অনিরুক্তে বাচামগোচরে, অনিলয়নেঽনাধারে, অনন্যনিমিত্তোঽহৈতুকো ভক্তিযোগ এব লক্ষণং স্বরূপং যস্য। কথং কদা ভবতি ? নানাগতীনাং নিমিত্তং যোঽবিদ্যাগ্রন্থিস্তস্য রন্ধনং ছেদনম্, তদ্দ্বারেণ : মহাপুরুষপ্রকৃত্যা বিষ্ণুভক্তাস্তৈঃ প্রকৃষ্টঃ সঙ্গো যদা ভবতি, তদা ॥

২০। এতদেব মানুষ্যমেব সর্ব্বপুরুষার্থসাধনং গায়ন্তি। এষামেভিঃ, উতস্বিদথবা, স্বয়মেব সাধনং বিনৈব হরিরেষাং প্রসন্নোঽভূৎ, এবম্ভূতস্য পুণ্যস্য দুষ্করত্বাৎ। ভারতাজিরে ভারতাঙ্গনে নঃ কেবলং স্পৃহৈব, যত্র তন্মুকুন্দসেবোপযোগি নৃষু জন্ম যৈর্লব্ধম্ ॥

১। ·কর্ম্মাদি- (ঘ)।

২১—২৭। স্পৃহামেবাহুঃ—কিমিত্যাদি-সপ্তভিঃ। (২১) দুষ্করৈঃ ক্রেত্বাদিভির্নঃ ফল্গুনা তুচ্ছেন দ্যুজয়েন স্বর্গপ্রাপ্ত্যা কিম্? ন কিঞ্চিৎ ফলম্। কুতঃ? যত্র নারায়ণপাদপঙ্কজস্মৃতির্নাস্তি, প্রত্যুতাতিশয়িতাদিন্দ্রিয়াণামুৎসবাদ্ভোগাৎ প্রমুষ্টাভূৎ॥ (২২) ক্ষণমল্পমেবায়ুর্যেষাম্। বরত্বে হেতুঃ—মর্ত্ত্যেনাপি দেহেন ক্ষণেনৈব কালেন কৃতং কর্ম্ম সংন্যস্য হরেঃ পদং সম্যগ্‌যান্তি॥ (২৩) অতো যত্র বৈকুণ্ঠকথামৃতনদ্যো ন সন্তি; তদাশ্রয়াঃ কথাপগাশ্রয়াঃ, মহান্তো নৃত্যাদ্যুৎসবা যেষু তাদৃশা যজ্ঞেশস্য মখাশ্চ পূজাঃ, স সুরেশস্য ব্রহ্মণোঽপি লোকো ন সেব্যতাম্॥ (২৪) অমুমুক্ষূন্নরান্ নিন্দন্তি—প্রাপ্তা ইতি। জ্ঞানঞ্চ তদর্থাঃ ক্রিয়াশ্চ তদর্থানি দ্রব্যাণি চ তেষাং কলাপেন সমূহেন সংভৃতাং সম্পূর্ণাম্। অপুনর্ভবায় মোক্ষায়। বনৌকা ইব বনৌকসঃ পক্ষিণো যথা লুব্ধকেন মুক্তা অপি পুনর্যদি তস্মিন্নেব বৃক্ষে প্রমত্তা বিহরন্তি, তর্হি যথা বধ্যন্তে তদ্বৎ॥ (২৫) অহো ভারতবাসিনাং ভাগ্যমিত্যাহুঃ—যৈরিতি। 'অগ্নয়ে ত্বা জুষ্টং নির্ব্বপামি, ইন্দ্রায় ত্বা জুষ্টং নির্ব্বপামি' ইত্যেবং ভাগশো নিরুপ্তং পৃথক্‌কৃতম্। কথম্? বিধিনা প্রকারেণ মন্ত্রেণ চ বস্তুতশ্চরুপুরোডাশাদিভেদেন চেষ্টং দেবতামুদ্দিশ্য ত্যক্তুং নিরুপ্তঞ্চ মমেদমিতি স্বীকৃত্য ত্যাগানন্তরমশ্নাতীত্যর্থঃ। পৃথগিন্দ্রাদিনামভিরাহুত আহূত আশিষাং প্রভুঃ স্বয়ং পূর্ণোঽপি হরিঃ॥ (২৬) তত্রাপি নিষ্কামাঃ কৃতার্থা ইত্যাহুঃ—সত্যমিতি। প্রার্থিতঃ সন্নর্থিতং দদাতীতি সত্যম্, তথাপি পরমার্থদো ন ভবত্যেব। যদ্‌যস্মাদ্ যতো দত্তাদনন্তরং পুনরপ্যর্থিতা ভবতি। নন্বর্থিতশ্চেৎ, কিমপি ন দদ্যাৎ, ইত্যাশঙ্ক্যাহুঃ—অনিচ্ছতাং নিষ্কামাণামিচ্ছানাং পিধানমাচ্ছাদকং সর্ব্বকামপরিপূরকং নিজপাদপল্লবং স্বয়মেব সম্পাদয়তি॥ (২৭) স্বিষ্টস্য সম্যগ্‌যজনস্য, সূক্তস্য প্রবচনস্য, কৃতস্যান্যস্যাপি কর্ম্মণঃ স্বর্গসুখাদুপভুক্তাদবশেষিতং যদি কিঞ্চিদস্তি, তেনাজনাভে বর্ষে নোঽস্মাকং জন্ম স্যাৎ।

কীদৃশম্? স্মৃতিমদ্ধরিরেব সেব্য ইত্যনুসন্ধানযুক্তম্, যতো হরির্ভজতাং শং সুখং তনোতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
একোনবিংশোঽধ্যায়ঃ ॥ ১৯ ॥

বিংশোঽধ্যায়ঃ

বিংশে প্লক্ষাদিষড়্দ্বীপ-স্থিতিমাহ সহার্ণবৈঃ।
লোকালোকস্থিতিঞ্চান্তর্ব্বহির্ভাগাদি[১]মানতঃ ॥ (১)

২। তাবতা লক্ষবিস্তরেণ, পরিক্ষিপ্তঃ পরিবেষ্টিতঃ, উপান্তে তিষ্ঠতি, আকলয্য সমর্প্য ॥

৩। অভিজ্ঞাতাঃ প্রসিদ্ধাঃ সপ্তৈব, অন্যে চ পর্ব্বতা নদ্যশ্চ সহস্রশঃ সন্তীত্যর্থঃ। মানসোত্তরস্য মণ্ডলাকারত্বোক্তেরেতেষু প্লক্ষাদিপঞ্চদ্বীপেষু বর্ষাদ্রয়স্তির্য্যগ্রেখাকারা উভয়তোঽব্ধিস্পৃশ ইতি গম্যতে; অন্যথা সপ্তভিঃ সপ্তবর্ষবিভাগাসম্ভবাৎ। বৈষ্ণবে বর্ষাণাং পূর্ব্বাদিক্রমোক্তেশ্চ ॥

৪। জলোপস্পর্শনেন বিধূতং রজস্তমশ্চ যেষাম্, হংসাদয়ো ব্রাহ্মণাদি-স্থানীয়াঃ, বিবুধোপমং সন্দর্শনং ক্লমস্বেদাদিরহিতং রূপং প্রজননমপত্যোৎ-*পাদনঞ্চ যেষাম্ ॥*

৫। বিগীতা অপি দ্বীপমন্ত্রা ব্যাখ্যায়ন্তে—প্রত্নস্য পুরাণপুরুষস্য বিষ্ণোর্যদ্রূপম্, তং সূর্য্যমীমহি শরণং ব্রজেম। কথম্ভূতম্? সত্যাদীনা-মাত্মানমধিষ্ঠাতারম্। তত্র সত্যমনুষ্ঠীয়মানো ধর্ম্মঃ, ঋতং প্রতীয়মানো ধর্ম্মঃ, ব্রহ্মণস্তদ্বোধকস্য বেদস্য, অমৃতস্য শুভফলস্য, মৃত্যোরশুভফলস্য ॥

১। র্ভাগান্ত- (গ)।

৮। 'সুপর্ণোঽসি গরুত্মান্ ত্রিবৃত্তে শিরঃ' ইত্যাদি শ্রুতেশ্ছন্দোভিঃ স্বাবয়বভূতৈঃ শ্রীবিষ্ণুং স্তৌতীতি ছন্দস্তুৎ, তস্য গরুড়স্য নিলয়ং স্থানম্। সা শাল্মলী, দ্বীপস্য হূতয়ে ব্যপদেশায় ॥

১২। স্বগোভিঃ স্বরশ্মিভিঃ, অন্ধোঽন্নম্, সোমো নো রাজা আস্তু, আভিমুখ্যেন ভবতু ; হ্রস্বপাঠে ত্ববিবক্ষয়া সন্ধ্যভাবঃ ॥

১৩। এবং সুরোদাদ্বহির্ঘৃতোদেনাবৃতঃ কুশদ্বীপ ইত্যন্বয়ঃ। সুশস্পাণি কোমলশিখাস্তেষাং রোচিষা ॥

১৭। হে জাতবেদঃ ! ত্বং সাক্ষাৎ পরস্য ব্রহ্মণো হরের্হব্যবাড়সি ; অতো দেবানাং যজ্ঞেন পুরুষং হরিমেব যজ। অঙ্গানাং নাম্না দত্তমঙ্গিনে সমর্পয়েত্যর্থঃ ॥

১৮। উপকৢপ্তো বেষ্টিতঃ, যথা কুশদ্বীপো ঘৃতোদেন বৃতঃ ॥

১৯। গুহস্য কার্ত্তিকেয়স্য প্রহরণেনায়ুধেনোন্মথিতা নিতম্বাঃ কুঞ্জানি চ যস্য ॥

২০। স্বয়ং ভগবান্ জ্ঞানী ; পরমকল্যাণং যশো যস্য ॥

২২। আপোময়মম্ময়ম্[১]।

২৩। হে আপঃ ! পুরুষবীর্য্যা ঈশ্বরাল্লব্ধসামর্থ্যাঃ স্থ ভবথ, অতএব ভূর্ভুবঃস্বস্ত্রৈলোক্যং পুনন্ত্যস্তা ভবত্যো নোঽস্মাকং স্পৃশতাং স্পর্শনং কুর্ব্বতাং ভুবঃ শরীরাণি পুনন্তু, যত আত্মনা স্বরূপেণৈবামীবঘ্নীঃ পাপহন্ত্র্যঃ ॥

২৪। দধ্নো মণ্ডং রসঃ, স এবোদকং যস্য ; যস্য পর্ণান্যন্তঃখরস্পর্শানি বহির্মৃদুস্পর্শানি স শাকো নাম বৃক্ষঃ ॥

২৮। আত্মকেতুভিঃ প্রাণাদিবৃত্তিভিঃ ॥

২৯। জ্বলনশিখাবদমলানাং কনকপত্রাণামযুতানামযুতানি যস্য তৎ ॥

৩০। দেবানামহোরাত্রাভ্যামুত্তরদক্ষিণায়নাভ্যামিত্যর্থঃ ॥

১। অম্ভোময়ং (ঘ)।

৩২। ব্রহ্মরূপিণং কমলাসনমূর্ত্তিম্; সকর্ম্মকেণ ব্রহ্মসালোক্যাদি-সাধনেন ॥

৩৩। কর্ম্মময়ং কর্ম্মফলরূপম্; ব্রহ্ম লিঙ্গ্যতে যস্মাৎ; একস্মিন্নেব পরমেশ্বরেঽন্তো নিষ্ঠা যস্য তৎ, অতএব বস্তুতোঽদ্বৈতম্ ॥

৩৪। ততঃ শুদ্ধোদাৎ পরস্তাৎ। লোকঃ সূর্য্যাদ্যালোকবান্ দেশঃ, অলোকস্তদ্রহিতঃ, তয়োরন্তরালে মধ্যে, তয়োর্বিভাগার্থমিত্যর্থঃ ॥

৩৫। ততঃ পরস্তাদিত্যুক্তম্, তদেব কিয়তান্তরেণেত্যপেক্ষায়াং তদন্তর্ব্বর্ত্তিনীং ভূমিমাহ—যাবন্মানসোত্তরমের্ব্বোরন্তরং সার্দ্ধসপ্তলক্ষোত্তরসার্দ্ধ-কোটিপরিমিতং তাবতী ভূঃ শুদ্ধোদাৎ পরতোঽস্তি, তত্র চ প্রাণিনোঽপি সন্তি। ততঃ কাঞ্চনী ভূমিরন্যাস্তীত্যর্থঃ। সা চৈকোনচত্বারিংশল্লক্ষোত্তর-কোট্যষ্টকপরিমিতা জ্ঞেয়া, এবং হি সতি মেরুলোকালোকয়োরন্তরং সার্দ্ধ-দ্বাদশকোটিভিঃ পরিমিতং বক্ষ্যমাণমুপপন্নং ভবতি। এতদেব শৈবতন্ত্রেঽপ্যুক্তম্—'কোটিদ্বয়ং ত্রিপঞ্চাশল্লক্ষাণি চ ততঃ পরম্। পঞ্চাশচ্চ সহস্রাণি সপ্তদ্বীপাঃ সসাগরাঃ ॥ ততো হেমময়ী ভূমির্দশকোট্যো বরাননে। দেবানাং ক্রীড়নার্থায় লোকালোকস্ততঃপরম্ ॥' ইতি। তত্র চ দশকোটিত্বং পূর্ব্বোক্ত-ভূম্যা সহ দ্রষ্টব্যম্। সর্ব্বসত্ত্বপরিহৃতেতি দেবব্যতিরেকেণেতি বিজ্ঞেয়ম্, দেবানাং ক্রীড়নার্থায়েত্যুক্তত্বাৎ ॥

৩৭। লোকত্রয়স্যান্তে পরিতো মর্য্যাদারূপো বিহিতঃ। যস্মাৎ প্রতি-বন্ধকাৎ, সূর্য্য আদির্যেষাম্, ধ্রুবোঽপবর্গোঽন্তো যেষাম্; আবিতন্বানাঃ সমন্তাৎ প্রকাশয়ন্তস্তৎপরতো গন্তুং ন শক্নুবন্তি। তাবদুন্নহনমুৎসেধস্তদনুরূপ আয়ামশ্চ বিস্তারো যস্য, ধ্রুবাদপ্যুচ্ছ্রিতত্বাত্ত্রিলোকীমর্য্যাদাভূত ইত্যর্থঃ ॥

৩৮। সোঽয়ন্তু লোকালোকাচলস্তুরীয়ভাগশ্চতুর্থোঽংশঃ সার্দ্ধদ্বাদশ-কোট্যো মেরোরেকত ইতি দ্রষ্টব্যম্ ॥

৩৯। আশাসু দিক্ষু যে বিনিবেশিতাস্ত আসতে ॥

৪০। তেষাং দিগ্‌গজানাং স্ববিভূতীনাং স্বাংশভূতানাং মহেন্দ্রাদীনাঞ্চ বিবিধবীর্য্যোপবৃংহণায় সকললোকস্বস্তয়ে চ ভগবাংস্তস্মিন্নাস্ত ইত্যন্বয়ঃ। কিং কুর্ব্বন্? আত্মনঃ স্বস্য যদ্বিশুদ্ধং সত্ত্বং তৎ সন্ধারয়মাণ আবিষ্কুর্ব্বন্। কীদৃশম্? ধর্ম্মজ্ঞানাদীন্যষ্টমহাসিদ্ধয়শ্চোপলক্ষণং যস্য তৎ। দোর্দ্দণ্ডৈ-রুপলক্ষিতঃ সন্। মহাবিভূতেঃ পরমৈশ্বর্য্যস্য পতিত্বাদেকয়ৈব মূর্ত্ত্যা সমন্তাদাস্ত ইত্যর্থঃ॥

৪১। নন্বন্তর্য্যামিণান্তঃস্থিতেনৈব সর্ব্বং কর্ত্তুং শক্যম্, কিং তস্য বহিঃ সমন্তাদবস্থানেনেত্যাশঙ্ক্য তস্যার্থং স্বয়মেব ব্যাচষ্টে—আকল্পমিতি। আত্মনো যোগমায়য়া বিরচিতা যা বিবিধলোকযাত্রা, তস্যা গোপীথায় রক্ষণায়ৈষ ভগবানেবম্ভূতমাকল্পং বেশং গতো লীলয়া প্রাপ্ত ইতি সমন্তাদাস্ত ইত্যস্যার্থঃ॥

৪২। আলোকপরিমাণঞ্চ মেরোরেকতঃ সার্দ্ধদ্বাদশকোট্যঃ; ততো লোকালোকাৎ, অলোকাদ্বা পরস্তাৎ। বিশুদ্ধাং দ্বিজপুত্রস্যানয়নেঽর্জ্জুনস্য শ্রীকৃষ্ণেন প্রদর্শিতাম্॥

৪৩। বিস্তরেণোক্তং ব্রহ্মাণ্ডমানং সর্ব্বতোঽপি নিরূপয়তি—অণ্ডমধ্য-গত ইতি। কিং তন্মধ্যম্? তদাহ—দ্যাবাভূম্যোঃ পূর্ব্বোত্তরকপালয়ো-র্যদন্তরং মধ্যস্থানম্। সর্ব্বতঃ পঞ্চবিংশতিকোট্যঃ স্যুঃ॥

৪৪। অণ্ডমধ্যাবস্থানে কারণং তন্নামনির্ব্বচনেনাহ—মৃতেঽচেতন এষ সূর্য্যো বৈরাজরূপেণ যস্মাৎ প্রবিষ্টঃ॥

৪৫। কিঞ্চ, সূর্য্যেণৈব বিভজ্যন্তে দিশঃ, খমন্তরীক্ষম্, ভিদা অন্যোঽপি বিভাগঃ, স্বর্গাপবর্গৌ ভোগমোক্ষদেশৌ, রসৌকাংস্যতলাদীনি॥

৪৬। উপাসনার্থমাহ—দেবাদীনাং সূর্য্য আত্মা দৃগীশ্বরো নেত্রা-ধিষ্ঠাতা চ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে

বিংশোঽধ্যায়ঃ॥ ২০॥

একবিংশোঽধ্যায়ঃ

এবমধ্যায়বিংশত্যা ভূ-মর্য্যাদা নিরূপিতা।
অতঃ পরং দ্যুমর্য্যাদাপালনং ত্রিভিরুচ্যতে ॥ (১)
একবিংশে রবেঃ কালচক্রেণ ভ্রমতোঽন্বহম্।
স্বগত্যা রাশিসঞ্চারৈর্লোকযাত্রা নিরূপ্যতে ॥ (২)

১। এতাবান্ বিস্তারেণ কোট্যঃ পঞ্চাশৎ, উৎসেধেন পঞ্চবিংশতিঃ ॥

২। দ্বিদলয়োর্মধ্যে যথৈকস্য মানেনাপরস্য মানমুপদিশ্যতে, তদ্বৎ। তেঽন্তরেণ তয়োর্মধ্যে তদুভয়সন্ধিতং তাভ্যামুভয়তঃ সংলগ্নম্ ॥

৩। উদগয়নাদিসংজ্ঞাভির্মন্দক্ষিপ্রসমগতিভির্যথাকালমারোহণাদিস্থানেষ্বারোহণাদ্যভিপদ্যমানো মকরাদিষ্বহোরাত্রাণি দীর্ঘহ্রস্বসমানানি বিধত্তে ॥

৪। তৎ প্রপঞ্চয়তি—যদেতি। অত্যন্তবৈষম্যাভাবাৎ সমানানীত্যুক্তম্। সর্ব্বথা সাম্যন্ত্বেকস্যৈবাহোরাত্রস্য। যদ্যপি বৃষভমিথুনয়োরেবাহ্নাং বৃদ্ধিঃ, কর্কটাদিষু হ্রাসস্তথাপি রাত্র্যপেক্ষয়াধিকত্বাদ্বর্দ্ধন্ত ইত্যুক্তম্, এবং রাত্রিবৃদ্ধাবপি দিনাপেক্ষয়া হ্রসতীত্যুক্তম্, একৈকেতি স্থূলদৃষ্ট্যোক্তম্, বৃদ্ধিহ্রাসয়োঃ প্রতিমাসবৈষম্যাৎ ॥

৫। বিপর্য্যয়াণীত্যহানি ন্যূনানি, রাত্রয়োঽধিকা ইত্যর্থঃ ॥

৬। তাত্ত্বিকং বৃদ্ধিহ্রাসকালমাহ—যাবদিতি ॥

৭। এবং মন্দাদিগতিভিঃ। নব কোটয় ইতি মেরোরুভয়তো মানসোত্তরস্যান্তর্বিস্তারেণ পঞ্চদশলক্ষাধিককোটিত্রয়পরিমিতেনেদং পরিমণ্ডলমানমুন্নেয়ম্। এবং পঞ্চদশভির্ঘটিকাভিরিত্যাদিষ্বপি ত্রৈরাশিকগণিতেন তত্তন্মানমুন্নেয়ম্। অত্রাপেক্ষিতো বিশেষঃ পুরাণান্তরাদেব গম্যঃ[১]। অত্রারোহণাদিস্থানানি বায়ুপুরাণে দর্শিতানি—'সর্ব্বগ্রহাণাং ত্রীণ্যেব স্থানানি দ্বিজসত্তমাঃ। স্থানং জারদ্গবং মধ্যং তথৈরাবতমুত্তরম্ ॥ বৈশ্বানরং দক্ষিণতো

১। পুরাণান্তরাদবগন্তব্যঃ (ঘ)।

নির্দ্দিষ্টমিহ তত্ত্বতঃ’ ইতি। তদেব মধ্যমোত্তরদক্ষিণমার্গত্রয়ং প্রত্যেকং বীথীত্রয়েণ ত্রিধা বিভিদ্যতে—ত্রিভিস্ত্রিভিরশ্বিন্যাদিনক্ষত্রৈর্নাগবীথী গজবীথী ঐরাবতী চেত্যুত্তরমার্গে বীথীত্রয়ম্; আর্ষভী গোবীথী জারদ্গবী চেতি বৈষুবতে মধ্যমমার্গে বীথীত্রয়ম্; অজবীথী, মৃগবীথী বৈশ্বানরী চেতি দক্ষিণমার্গে বীথীত্রয়ম্। তদপ্যুক্তং তত্রৈব—‘অশ্বিনী কৃত্তিকা যাম্যা নাগবীথীতি শব্দিতা। রোহিণ্যার্দ্রা মৃগশিরো গজবীথ্যভিধীয়তে॥ পুষ্যাশ্লেষা তথাদিত্যা বীথী চৈরাবতী স্মৃতা। এতাস্তু বীথয়স্তিস্র উত্তরো মার্গ উচ্যতে॥ তথা দ্বে চাপি ফাল্গুন্যৌ মঘা চৈবার্ষভী মতা। হস্তশ্চিত্রা তথা স্বাতী গোবীথীতি তু শব্দিতা॥ জ্যেষ্ঠা বিশাখানুরাধা বীথী জারদ্গবী মতা। এতাস্তু বীথয়স্তিস্রো মধ্যমো মার্গ উচ্যতে॥ মূলাষাঢ়োত্তরাষাঢ়া চাজবীথ্যভিশব্দিতা[১]। শ্রবণঞ্চ ধনিষ্ঠা চ মার্গী শতভিষস্তথা॥ বৈশ্বানরীভাদ্রপদে রেবতী চৈব কীর্ত্তিতা। এতাস্তু বীথয়স্তিস্রো দক্ষিণো মার্গ উচ্যতে॥’ ইতি। যাম্যা ভরণী, আদিত্যা অদিতিদেবতাকা পুনর্ব্বসুঃ, মার্গী মৃগবীথী, এবং স্থিত উত্তরায়ণে ধ্রুবেণ যুগাক্ষকোটিনিবদ্ধবায়ুপাশদ্বয়াকর্ষণে রথস্যারোহণম্, তদাভ্যন্তরমণ্ডলপ্রবেশো গতিমান্দ্যঞ্চেতি দিনবৃদ্ধী রাত্রিহ্রাস ইতি। দক্ষিণায়নে চ পাশপ্রসারণা[২]দবরোহণে বহির্ম্মণ্ডলপ্রবেশো গতিশৈঘ্র্যঞ্চেত্যহোরাত্রয়োর্বিপর্য্যয়ঃ। বৈষুবতে তু পাশসাম্যাৎ সমাবস্থানে মধ্যমমণ্ডলপ্রবেশো গতিসাম্যঞ্চেত্যহোরাত্রয়োঃ সাম্যমিতি। তথা চ পুরাণান্তরম্—‘আকৃষ্যেতে যদা তৌ তু ধ্রুবেণ সমধিষ্ঠিতৌ। তদাভ্যন্তরতঃ সূর্য্যো ভ্রমতে মণ্ডলানি তু॥ ধ্রুবেণ মুচ্যমানেন পুনা রশ্মিযুগেন তু। তথৈব বাহ্যতঃ সূর্য্যো ভ্রমতে মণ্ডলানি চ॥’ ইতি। তদেতদুক্তম্, ‘যদা মেষতুলয়োঃ’ ইত্যাদিনা তস্মিন্নুদয়াস্তাদিকং বক্তুমাহ—তস্মিন্ মানসোত্তরে মেরোঃ পূর্ব্বত ঐন্দ্রীং পুরীমুপদিশন্তীত্যনুষঙ্গঃ, তাসু পুরীষূদয়াদীন্যপ-

১। অভিধীয়তে (গ); ২। পাশপ্রেরণা- (ঘ)।

দিশন্তি। চতুর্দ্দিশমিত্যুক্তের্যে মেরোর্দক্ষিণে দেশে, তেষামৈন্দ্রীমারভ্য পূর্ব্বাদয়ঃ; যে পশ্চিমে, তেষাং যাম্যামারভ্য; য উত্তরে তেষাং বারুণী-মারভ্য; যে পূর্ব্বে, তেষাং সৌম্যামারভ্য॥

৮। তত্রত্যানাং মেরুস্থানাম্, সব্যেনেতি, নক্ষত্রাভিমুখতয়া স্বগত্যা মেরুং বামতঃ কুর্ব্বন্নপি প্রদক্ষিণাবর্ত্তপ্রবর্ত্তকপ্রবহাখ্যবায়ুভ্রাম্যমাণজ্যোতি-শ্চক্রবশাৎ প্রত্যহং দক্ষিণতঃ করোতি। অতশ্চক্রগতিবশাদতিদূরতো ভূসংলগ্নস্যেব দর্শনমুদয়ঃ, আকাশমারূঢ়স্যেব দর্শনং মধ্যাহ্নঃ, ভূমিং প্রবিষ্ট-স্যেব দর্শনমস্তময়ঃ, ততোঽতীব দূরগমনে নিশীথ ইতি। সমুদ্রতীরস্থদৃষ্ট্যা চ —'অদ্ভ্যো বা এষ প্রাতরুদেত্যপঃ সায়ং প্রবিশতি' ইতি শ্রুতিব্যবহারঃ, ন বস্তুতঃ। তদুক্তং বৈষ্ণবে—'উদয়াস্তময়ে চৈব সর্ব্বাকালন্তু সম্মুখে। দিশাস্বশেষাসু তথা মৈত্রেষু[১] বিদিশাসু চ॥ যৈর্যত্র দৃশ্যতে ভাস্বান্ স তেষামুদয়ঃ স্মৃতঃ। তিরোভাবশ্চ যত্রেতি তত্রৈবাস্তমনং রবেঃ॥ নৈবাস্তমন-মর্কস্য নোদয়ঃ সর্ব্বদা সতঃ[২]। উদয়াস্তমনাখ্যং হি দর্শনাদর্শনং রবেঃ॥ শক্রাদীনাং পুরে তিষ্ঠন্ স্পৃশত্যেষ পুরত্রয়ম্। বিকোণৌ দ্বৌ বিকোণস্থস্ত্রীন্ কোণান্ দ্বে পুরে তথা॥' ইতি। অতএব তত্রৈবোক্তম্—'তস্মাদ্দিশ্যুত্তরস্যাং বৈ দিবা রাত্রিঃ সদৈব হি। সর্ব্বেষাং দ্বীপবর্ষাণাং মেরোরুত্তরতঃ স্থিতিঃ॥' ইতি। যতো যত্র যঃ পশ্যতি, সৈব তস্য প্রাচী, তস্য চ বামতো মেরুস্তিষ্ঠতীতি॥

৯। যথোক্তমুদয়াস্তমনাদিনিয়মং দর্শয়তি—যত্রোদেতীত্যাদিনা; স্যন্দেন স্বেদোদ্গমেন, প্রস্বাপয়তি নিশীথং করোতি। যেঽস্তমনুপশ্যেরন্ প্রস্বাপ-সমানসূত্রেস্থাঃ॥

১০। সাধিকানি পঞ্চবিংশতিসহস্রাধিকানি॥

১১। সহ বা সহৈব। যদ্যপি বস্তুতঃ সূর্য্যস্যাপি নক্ষত্রৈঃ সহৈবোদয়া-স্তময়ৌ, তথাপি তস্য তৎসাহিত্যাদর্শনাৎ সোমাদীনামেব তৎসাহিত্যমুক্তম্॥

১। মৈত্রেয় (গ, ঘ); ২। স্মৃতঃ (ক, ঘ)।

১২। ত্রয়ীময় ইত্যুপাসনার্থম্ ॥

১৩। দ্বাদশ মাসা অরা যস্ত, ষট্ ঋতবো নেময়ো যস্ত, ত্রীণি চাতুর্ম্মাস্থানি নাভয়ো যস্ত, কৃত ইতরভাগো যস্ত, মানসোত্তরগিরৌ লক্ষার্দ্ধাদূপরি বায়ুবদ্ধভূমাবিতি দ্রষ্টব্যম্, চক্রং বা তাবদুচ্ছ্রিতমিতি মন্তব্যম্, অন্যথা অযুতমাত্রোচ্ছ্রায়ত্বান্মানসোত্তরস্ত মেরোশ্চ চতুরশীতিসহস্রোচ্ছ্রায়ত্বাদক্ষস্ত সাম্যানুপপত্তেঃ ॥

১৪। তস্মিন্নক্ষে চক্রপ্রান্তে কৃতমূলো নিবদ্ধপূর্ব্বভাগঃ প্রথমোঽক্ষো মেরুমানসোত্তরায়তঃ সার্দ্ধসপ্তলক্ষাধিকসার্দ্ধকোটিপ্রমাণস্তস্ত তুর্য্যমানেন, সার্দ্ধসপ্তত্রিংশৎসহস্রাধিকৈকোনচত্বারিংশল্লক্ষমানেন ধ্রুবে কৃতো বায়ুপাশেন নিবদ্ধ উপরিভাগো যস্ত ॥

১৫। নীড় উপবেশস্থানম্, গায়ত্র্যাদিচ্ছন্দোনামানঃ, অরুণেন যোজিতাঃ সন্তো দেবং বহন্তি ॥

১৬। পুরস্তাৎ স্থিতোঽপি পশ্চাৎ প্রত্যঙ্মুখ আস্তে ; যদ্বা, যৎ সূর্য্যস্ত পুরস্তাত্তস্তৈব পশ্চিমত্বাৎ পশ্চাদিত্যুক্তম্। অশ্বস্থানঞ্চ বায়ুনোক্তম্—'সপ্তাশ্বরূপচ্ছন্দাংসি বহন্তে বামতো রবিম্[১]। চক্রপক্ষনিবদ্ধানি চক্রে চাক্ষঃ সমাহিতঃ ॥' ইতি ॥

১৭। সূক্তবাকায়—সুভাষিতায় ॥

১৮। একৈকশশ্চতুর্দ্দশ, দ্বন্দ্বশঃ সপ্ত গণাঃ সন্তো মাসি মাস্যুপাসত ইত্যন্বয়ঃ ॥

১৯। গব্যূতিঃ ক্রোশযুগম্[২], সগব্যূত্যুত্তরং যথা ভবতি, তথা ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে

একবিংশোঽধ্যায়ঃ ॥ ২১ ॥

১। হরিম্ (ক) ; ২। ক্রোশদ্বয়ম্ (ঘ)।

দ্বাবিংশোঽধ্যায়ঃ

দ্বাবিংশে সোমশুক্রাদেঃ স্থানমাহোত্তরোত্তরম্ ।
তত্তদ্গত্যনুসারেণ ইষ্টানিষ্টে তথা নৃণাম্ ॥ (১)

১। রাশীনামভিমুখমপ্রদক্ষিণঞ্চোপবর্ণিতম্—সব্যেন চলন্ দক্ষিণেন করোতীতি বদতা। অমুষ্য বয়ং কথমনুমিমীমহি, এতৎ কথং জ্ঞাস্যামঃ, বিরুদ্ধত্বাদিত্যর্থঃ ॥

২। চক্রবশাৎ স্বতশ্চ গতিদ্বয়মবিরুদ্ধমিতি পরিহারার্থঃ ॥

৩। তত্তৎকালনিয়মেন কর্ম্মণাং বিশুদ্ধেঃ, সাদ্গুণ্যস্য নিমিত্তভূতমাত্মানং বিভজ্য, বিজিজ্ঞাস্যমানো বিতর্ক্যমাণঃ, যথোপজোষং যথাকর্ম্মভোগম্, ঋতুগুণান্ শীতোষ্ণাদীন্ ॥

৪। বর্ণাশ্রমাচারানুবর্ত্তিনঃ পুরুষাস্ত্রয্যাম্নাতৈঃ কর্ম্মভিরিন্দ্রাদিরূপম্, যোগবিতানৈশ্চ ধ্যানাদিভিরন্তর্যামিরূপং পূজয়ন্তঃ[১] ॥

৫। স এব স্বগত্যা মাসাদিব্যবহারকারণমিত্যাহ—স এব লোকানা-মাত্মা, দ্যাবা-পৃথিব্যোরন্তরেণ মধ্যে যন্নভোবলয়মন্তরীক্ষম্, তস্য মধ্যে যৎ কালচক্রং তদ্গতঃ। রাশিভির্মেষাদিভিঃ সংজ্ঞা যেষাম্, চৈত্রাদিসংজ্ঞাস্তু চান্দ্রমাসানাম্। মাসমাহ—পক্ষদ্বয়ং মাস ইতি চান্দ্রেণ মানেন। সপাদং নক্ষত্রদ্বয়ং[২] সৌরেণ, দিবা নক্তঞ্চাহোরাত্রমিতি পিত্র্যেণ, ষষ্ঠমংশং রাশিদ্বয়ম্ ॥

৭। মণ্ডলাভ্যাং সহ ভুঞ্জীত। স হ স হি সূর্য্যঃ। যদা শুক্লপ্রতিপদি সংক্রান্তির্ভবতি, তদা সৌরচান্দ্রয়োর্মাসয়োর্যুগপদুপক্রমো ভবতি, স সং-বৎসরঃ। ততঃ সৌরমানেন বর্ষে ষড় দিনানি বর্দ্ধন্তে, চান্দ্রমানেন ষট্ হ্রসন্তীতি দ্বাদশদিনব্যবধানাদুভয়োরগ্রপশ্চাদ্ভাবো ভবতি, এবং পঞ্চ বর্ষাণি গচ্ছন্তি, তন্মধ্যে দ্বৌ মলমাসৌ ভবতঃ। ততঃ পুনঃ ষষ্ঠঃ সংবৎসরো ভবতি। তদেবমবান্তরভেদেন সংবৎসরাদিপঞ্চকং সমামনন্তি ॥

১। পূজয়ন্তি (গ); ২। মহানক্ষত্রদ্বয়ং (ঘ)।

৮। সোমাদীনামপি স্থানং কার্য্যঞ্চাহ—এবং চন্দ্রমা ইতি। অর্ক-গভস্তিভ্যো মণ্ডলরূপেভ্যঃ, সপাদর্ক্ষাভ্যাং সপাদদিনদ্বয়েন ॥

৯। সর্ব্বেষাং জীবনিবহানাং প্রাণঃ, অন্নময়ত্বাদমৃতময়ত্বাচ্চ ; অতএব জীবনহেতুত্বাজ্জীবশ্চ ॥

১০। তদেবাহ—স এষ ইতি ॥

১১। দক্ষিণেনৈব, ন তু তেষাং পৃথগন্যা গতিরস্তীত্যর্থঃ। কালায়নে কালচক্রে, উত্তরাষাঢ়াশ্রবণাসন্ধাবভিজিন্নক্ষত্রং ফলবিশেষেণ পৃথক্ কল্পিতম্, তেন সহ ; তথা চ শ্রুতিঃ—'অভিজিন্নাম নক্ষত্রমুপরিষ্টাদুত্তরাষাঢ়ানাম-ধস্তাচ্ছ্রোণায়াঃ' ইত্যাদি ॥

১২। পুরতঃ সূর্য্যেণ ভোক্ষ্যমাণে নক্ষত্রে, পশ্চাদ্ভুক্তে[১] সহৈব ভুজ্যমানে চারেণ ক্রমস্থনক্ষত্রাত্যতিক্রমেণ, বৃষ্টের্বিষ্টম্ভঃ স্তম্ভনং যস্মাদ্গ্রহাত্ত-মুপশময়তীতি তথা ॥

১৩। বুধো ব্যাখ্যাতঃ। পুরতঃ পশ্চাৎ সহৈব বা চরতীতি। কিঞ্চি-দ্বিশেষঞ্চাহ—তত ইত্যাদিনা। আশংসতে—সূচয়তি ॥

১৪। অঘশংসো দুঃখসূচকঃ ; যদি ন বক্রেণাভিবর্ত্ততে, তর্হি ত্রিভি-স্ত্রিভিঃ পক্ষৈঃ ॥

১৫। যদি ন বক্রঃ স্যাৎ, তর্হি পরিবৎসরম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
দ্বাবিংশোঽধ্যায়ঃ ॥ ২২ ॥

১। ভুঙ্‌ক্তে (ঘ)।

ত্রয়োবিংশোঽধ্যায়ঃ

ত্রয়োবিংশে ধ্রুবস্থানং জ্যোতিশ্চক্রাশ্রয়ং ততঃ।
শিশুমারস্বরূপেণ হরেশ্চ স্থিতিরুচ্যতে ॥ (১)

১। যত্তৎ প্রসিদ্ধং বিষ্ণোঃ পদম্ ; যত্র ধ্রুব উপাস্তে তিষ্ঠতীত্যন্বয়ঃ। সমকালমেব যুজ্যন্ত ইতি তথা, তৈর্নক্ষত্ররূপৈঃ ॥

৩। মেধীস্তম্ভে বদ্ধা ধান্যাক্রমণপশবো বলীবর্দ্দাঃ, কর্ম্ম সারথিঃ সহায়ো যেষাম্ ॥

৪। ঈশ্বরাধারত্বাৎ পতনশঙ্কৈব নাস্তীতি বক্তুং মতান্তরমাহ—কেচিদিতি। জ্যোতিরনীকং জ্যোতিশ্চক্রম্, যোগধারণায়াং স্থিতমিতি শেষঃ ॥

৫। লাঙ্গুলে লাঙ্গুলাগ্রাদধোভাগে, উদগয়নান্যভিজিদাদীনি পুনর্ব্বস্বন্তানি চতুর্দ্দশ দক্ষিণপার্শ্বে, দক্ষিণায়নানি পুষ্যাদীন্যুত্তরাষাঢ়ান্তানি চতুর্দ্দশ বামপার্শ্বে ॥

৬। তদেব স্থানবিশেষেণ বিভজ্য দর্শয়তি—পুনর্ব্বসুপুষ্যাবিত্যাদিনা। পুনর্ব্বসুরুদগয়নস্যান্তং নক্ষত্রম্, পুষ্যো দক্ষিণায়নস্যাদ্যম্, আর্দ্রাশ্লেষে তয়োর্নিরন্তরে, অভিজিদুত্তরাষাঢ় উত্তরদক্ষিণায়নয়োরাদ্যন্তনক্ষত্রে, শ্রবণাপূর্ব্বাষাঢ়ে তয়োরুত্তরপূর্ব্বে, ধনিষ্ঠা মূলঞ্চ তয়োরপ্যুত্তরপূর্ব্বে, মঘাদীনি যান্যনুরাধান্তানি দক্ষিণায়নান্যষ্ট তানি বামপার্শ্ববঙ্ক্রিষু[১] বামপার্শ্বাস্থিষু, মৃগশীর্ষাদীনি প্রাতিলোম্যেন পূর্ব্বভাদ্রপদান্তানি যান্যুদগয়নানি নক্ষত্রাণ্যষ্ট, তানি দক্ষিণপার্শ্বেষু, শতভিষাজ্যেষ্ঠে উত্তরদক্ষিণায়নয়োর্যে অবশিষ্টে, তে স্কন্ধয়োঃ ॥

৭। যমঃ—নক্ষত্ররূপঃ ; তথা নারায়ণোঽশ্বিনৌ চ, ককুদি গলপৃষ্ঠশৃঙ্গে ॥

১। -বঙ্ক্রিষু (ঘ)।

৮। জ্যোতিষাং লোকায়াশ্রয়ায়, কালায়নায় কালচক্ররূপায় 'নমোঽভিধীমহি' ইতি মন্ত্রেণোপতিষ্ঠেত ॥

৯। মন্ত্রকৃতাং পূর্ব্বোক্তং মন্ত্রং জপতাম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
ত্রয়োবিংশোঽধ্যায়ঃ ॥ ২৩ ॥

চতুর্বিংশোঽধ্যায়ঃ

* এবং ত্রিভির্দ্ব্যমর্য্যাদাপালনং বর্ণিতং তথা।
অধোভুবনমর্য্যাদাপালনং ত্রিভিরুচ্যতে ॥ (১)
চতুর্ব্বিংশে রবেরর্ব্বাক্ স্বর্ভান্বাদিস্থিতিঃ ক্রমাৎ।
অতলাদিবিলস্বর্গ-মর্য্যাদাঃ সপ্ত বর্ণিতাঃ ॥ (২)

১। সূর্য্যমারভ্য ধ্রুবান্তং সন্নিবেশং নিরূপ্যেদানীং সূর্য্যাদধস্তান্নিরূপয়তি—অধস্তাদিতি। স্বর্ভানুঃ—রাহুঃ, অলভত—লেভে, সিংহিকায়াঃ পুত্রঃ ॥

২। গ্রহণং বক্তুমাহ—যদদঃ প্রতপতস্তরণের্মণ্ডলম্, অমৃতপানে মধ্যপ্রবেশেন তয়োর্ব্যবধানং করোতীতি তথা। অতএব তাভ্যাং সূচিতত্বাদ্বৈরমনুবধ্নাতীতি তথা ॥

৩। ভাগবতং চক্রম্, পরিবর্ত্তমানং পরিভ্রমৎ, অভিমুখং মুহূর্ত্তমবস্থিতঃ সন্; ইত্যেবমন্তরালে তদবস্থানমুপরাগং গ্রহণং বদন্তি। অত্র চ ঋজুবক্রস্থিতিভ্যাং সর্ব্বগ্রাসাসর্ব্বগ্রাসৌ, ন তু বস্তুতো গ্রাসোঽস্তি, দূরান্তরত্বাৎ ॥

৪। তাবন্মাত্রে—যোজনাযুতে ॥

---

* এষ শ্লোকো গ-পুস্তকে নাস্তি।

৫। অন্তরিক্ষং গ্রহহীনম্[১] ; তস্যাবধিমাহ—যাবদ্বায়ুঃ প্রবাতি, তীব্রো বাতি। তস্যাপ্যবধিমাহ—যাবন্মেঘাঃ ॥

৬। পৃথিব্যা উপরি ভূর্লোকাবধিমাহ—যাবদ্ধংসাদয়ঃ পার্থিবা বিকারাঃ॥

৭। যোজনাযুতান্তরেণ প্রত্যেকমুচ্ছ্রিতাঃ, আয়ামো যঃ কটাহস্য, তাবদ্বিস্তারেণ ॥

৮। সামান্যেন বিবরাণি বর্ণয়তি—এতেষ্বিত্যাদিনা অথাতল ইত্যতঃ প্রাক্তনেন গ্রন্থেন। এতেষু দৈত্যাদয়ো নিবসন্তীত্যন্বয়ঃ। কথম্ভূতেষু ? অধিককামভোগৈশ্চৈশ্বর্য্যানন্দশ্চ, ভূতিশ্চ সন্ততিঃ, বিভূতিশ্চ সম্পত্তিঃ, তাভিঃ সুসমৃদ্ধা ভবনাদয়ো যেষু। কথম্ভূতাঃ ? নিত্যপ্রমুদিতা অনুরক্তাশ্চ কলত্রাদয়ো যেষাম্, ন প্রতিহতঃ কামো যেষাম্, মায়য়া বিনোদো যেষাম্ ॥

৯। কিঞ্চ, হে মহারাজ ! যেষু ময়েন নির্ম্মিতাঃ পুরশ্চকাসতীত্যন্বয়ঃ। কথম্ভূতাঃ ? নানা যে মণিপ্রবরাস্তেষাং প্রবেকা মুখ্যাস্তৈর্বিরচিতৈর্বিচিত্রের্ভবনাদিভিঃ, তথা বিবরেশ্বরাণাং গৃহোত্তমৈশ্চ সমলঙ্কৃতাঃ। কীদৃশৈর্গৃহোত্তমৈঃ ? নাগাশ্চাসুরাশ্চ মিথুনভূতাঃ পারাবতাদয়শ্চ তৈরাকীর্ণা ব্যাপ্তাঃ কৃত্রিমা ভূময়ো যেষু তৈঃ। নানাস্বনমিথুনেতি পাঠান্তরে নানাস্বনত্বং মিথুনবিশেষণম্ ॥

১০। উদ্যানানি চাতিতরামমরলোকশ্রিয়মতিশয়িতানি যেষু চকাসতীত্যন্বয়ঃ। কাভিঃ শ্রীভিঃ ? কেষাম্ ? কুসুমফলস্তবকাশ্চ সুভগকিশলয়ানি চ, তৈরবনতা রুচিরা বিটপা যেষাং তেষাম্, বিটপিনাং লতানামঙ্গৈরালিঙ্গিতানাং শ্রীভিঃ ; তথা সমিথুনাশ্চক্রবাকাদিমিথুনসহিতা যে বিবিধা বিহঙ্গাস্তদ্যুক্তানাং জলাশয়ানাঞ্চ শ্রীভিঃ। কীদৃশানাম্ ? অমলৈর্জলৈঃ পূর্ণানাম্। পুনরপি কৈরতিশয়িতানি ? ঝষকুলোল্লঙ্ঘনেন ক্ষুভিতং যজ্জলাশয়ানাং নীরম্, তস্মিন্ যানি নীরজাদীনি তেষাং বনেষু কৃতং নিকেতনং

১। গৃহহীনং (ঘ)।

যৈস্তেষাম্, অর্থাৎ পক্ষিণামেকোঽখণ্ডঃ স্বচ্ছন্দো যো বিহারস্তেনাকুলাশ্চ তে মধুরাশ্চ বিবিধস্বনাদয়স্তৈর্যে ইন্দ্রিয়োৎসবাস্তৈশ্চ ; যদ্বা, সমিথুনেত্যাদেরুত্তরেণৈব সম্বন্ধঃ। মনইন্দ্রিয়ানন্দিভিরিতি স্বনাদীনাং বিশেষণম্। তত্র নীরজং সামান্যেন কমলম্, লোহিতং শতপত্রঞ্চ তদ্বিশেষঃ॥

১১। অহোরাত্রাদিভির্যদ্ভয়ং তন্নোপলক্ষ্যতে, সূর্য্যাদ্যভাবাৎ॥

১৩। ক্লমঃ শ্রমঃ, গ্লানিরনুৎসাহঃ॥

১৪। কল্যাণানাং মঙ্গলরূপাণাম্॥

১৫। যস্মিন্ ভগবত্তেজসি প্রবিষ্টে, পুংসবনানি গর্ভাঃ, 'আ চতুর্থাদ্ভবেৎ স্রাবঃ পাতঃ পঞ্চমষষ্ঠয়োঃ' ইতি স্রাবপাতৌ জ্ঞেয়ৌ॥

১৬। সবর্ণে রতাঃ স্বৈরিণ্যঃ, কামিন্যস্ত্বসবর্ণেঽপি, তত্রাপ্যতিচঞ্চলাঃ পুংশ্চল্যঃ, বিলায়নং বিলায়তনম্, সাধয়িত্বা সম্ভোগসমর্থং কৃত্বা, স্বে যে অসাধারণা বিলাসাস্তৎপূর্ব্বকোঽবলোকস্তেনানুরাগযুক্তং স্মিতম্, তেন সংলাপ উপগূহনঞ্চ, তদাদিভিঃ। যস্মিন্ হাটকাখ্যে রসে, উপযুক্তে সেবিতে॥

১৭। ভবয়োর্ভবস্য ভবান্যাশ্চ, চিত্রভানুরগ্নিঃ, তেন নিষ্ঠ্যূতং ফুৎকৃত্য ত্যক্তম্। অসুরেন্দ্রাণামবরোধেষ্বন্তঃপুরেষু, পুরুষীভিঃ স্ত্রীভিঃ॥

১৮। সুতলে চ বলিরধুনাপ্যাস্ত ইত্যন্বয়ঃ। কথম্ভূতঃ? মহেন্দ্রস্য প্রিয়ং কর্ত্তুমিচ্ছতা ভগবতা প্রথমং পরাক্ষিপ্তমপহৃতং লোকত্রয়ং যস্য সঃ, পুনর্ভগবতোঽনুকম্পয়ৈব তত্র প্রবেশিতঃ সন্; কীদৃশেন? যোঽদিতেঃ সকাশাদ্ভূত্বা বটুবামনরূপেণ লব্ধকায়স্তেন॥

১৯। কেচিত্তস্য সুতলরাজ্যং ভূমিদানফলং মন্যন্তে, তন্নিরাকরোতি—নো এবেতি। যদ্বিলনিলয়ে বিবরস্থানে, ঐশ্বর্য্যমেতদ্ভূমিদানস্য সাক্ষাৎকারঃ ফলং ন ভবত্যেব। কুত ইত্যপেক্ষায়াম্—এবম্ভূতস্য দানস্য সাক্ষাদপবর্গহেতুত্বাদিত্যাহ—যত্তৎ প্রসিদ্ধং দানং তস্য। তদেবাহ—

ভগবত্যশেষজীবনিকায়ানাং জীবভূতশ্চাসাবাত্মভূতশ্চ, সর্ব্বজীবনিয়ন্তা চাসা-বাত্মারামশ্চেত্যর্থঃ, তস্মিন্ সংপ্রতিপাদিতস্ত ॥

২০। কিঞ্চ, যস্ত নাম ক্ষুদাদিষু চ বিবশোঽপি সকৃদপি গৃণন্ কর্ম্মবন্ধং বিধুনোতি। কথম্ভূতম্? যস্ত প্রতিবাধনস্থিহ মুমুক্ষবোঽন্যথৈ-বোপলভন্তে, যন্নিবৃত্ত্যর্থং যোগসাংখ্যাদিক্লেশানন্নুভবন্তীত্যর্থঃ, তং কর্ম্মবন্ধং ত্যজতি ॥

২১। তত্তস্মিন্, ভগবতাং ভক্তানাং জ্ঞানিনাঞ্চ, যথাযথমাত্মন্যাত্মদে জ্ঞানদে হরাবাত্মতমে চ সমর্পিতস্ত ভূমিদানস্ত ন তৎ ফলমিতি পূর্ব্বেণৈব সম্বন্ধঃ ॥

২২। কিঞ্চ, নেদং ভগবদনুকম্পাফলমপি, কিন্ত্বেকান্তভক্তস্ত তস্যান্ত-রায়মাত্রমিত্যাহ—নেতি। ভগবানমুষ্যামুং নৈবানুগৃহীতবান্, তত্র হেতুঃ—যদুতেতি। আত্মন ঈশ্বরস্যানুস্মৃতিং মুষ্ণাতীতি তথা। তদুক্তম্—'বাসুদেবে মনো যস্ত জপহোমার্চ্চনাদিষু। তস্যান্তরায়ো মৈত্রেয় দেবেন্দ্রত্বাদিকং ফলম্॥' ইতি॥

২৩। তস্যৈকান্তভক্তিং সপ্রপঞ্চমাহ—যত্তদিতি। যত্তদতিপ্রসিদ্ধমিতি—বক্ষ্যমাণমুবাচ হেত্যন্বয়ঃ। কথম্ভূতঃ? নাধিগতোঽন্য উপায়ো যেন, তেন ভগবতা যাচ্ঞাচ্ছলেনাপহৃতং স্বশরীরমাত্রাবশেষিতং লোকত্রয়ং যস্ত; সম্যক্ প্রতিমুক্তো বদ্ধঃ, অপবিদ্ধঃ প্রতিক্ষিপ্তো[১]ঽপি সন্॥

২৪। বতেতি খেদে। ভগবান্ বিদ্বানপি, যোঽসাবিন্দ্রঃ, যস্যৈকান্তেন বৃহস্পতিঃ সচিবঃ সহায়ঃ, যতো মন্ত্রার্থং বৃতঃ, সোঽপি পুরুষার্থেষু নূনং ন নিষ্ণাতো ন নিপুণঃ। যতঃ, উপেন্দ্রেণ দ্বারভূতেন তমুপেন্দ্রং বিহায়াত্মানং মাং লোকত্রয়মযাচত, তং মন্ত্রাস্পদং[২], বৃহস্পতিমতিহায়েতি বা; তস্মিন্ প্রসন্নে স এব বরণীয়ঃ, ন লোকত্রয়ম, যতস্তদতিতুচ্ছমিত্যাহ—অতি-

১। প্রক্ষিপ্তো- (ঘ); ২। মন্ত্রপদং (ঘ)।

গম্ভীরমনন্তং বয়ো যস্য, তস্য কালস্য যন্মন্বন্তরম্, তেন পরিবৃত্তং বিপর্য্যস্তং লোকত্রয়মিদং কিয়ৎ ?

২৫। প্রহ্লাদস্তু এক এবার্থে নিষ্ণাত ইত্যাহ—যস্যানুদাস্যমিতি। স্বপিতর্য্যুপরতে মৃতে সতি, স্বং পিত্র্যং পদং ভগবতা দীয়মানমপি ভগবতঃ খলু পরমন্যদিতি কৃত্বা ন তু জগ্রাহেত্যর্থঃ ॥

২৬। নন্বু ত্বমতিবীরঃ[১], কুতস্তমেব বহু মন্যসে ? তত্রাহ—তস্যানুপথম্—অনুবর্ত্ম[২], অমৃজিতা অক্ষীণাঃ কষায়া রাগাদয়ো যস্য, পরিহীণো ভগবদনুগ্রহো যস্য স কো বোপগন্তুমিচ্ছতীতি ॥

২৭। অথ শ্রীশুকোক্তিঃ। নন্বেবম্ভূতশ্চেদ্বলিস্তর্হি তস্যৈব চরিতং বিস্তরেণ কথ্যতাম্। তত্রাহ—তস্য বলেরনুচরিতমুপরিষ্টাদষ্টমে বিস্তরিষ্যতে। যস্য দ্বার্য্যবতিষ্ঠতে, নিজজনেষ্বনুকম্পিতং কৃতানুকম্পং হৃদয়ং যস্য ; দ্বারপালকর্ম্ম দর্শয়তি—যেন শ্রীনারায়ণেন বলের্দ্বারি বিশন্ দশকন্ধর উচ্চাটিতঃ। কেন ? পদা, তত্রাপ্যঙ্গুষ্ঠেনৈব ॥

২৮। যথা হরিণা স্বভক্তো বলিঃ সুতলে নিহিতঃ সুখমাস্তে, এবং শ্রীমহাদেবভক্তোঽপি ময়স্তলাতলে সুখমাস্ত ইত্যাহ—তত ইতি। লব্ধং পদং স্থানং যেন, মহীয়তে পূজ্যতে ॥

২৯। নৈকশিরসামনেকফণানাং গণোঽস্তি ; এতৎ প্রপঞ্চয়তি—কুহকেতি। মহাভোগবন্তো মহাকায়াঃ, পুরুষবাহাদ্ধরের্বাহনাৎ ॥

৩০। বিবুধপ্রত্যনীকা দেবশত্রবঃ, সকলেষ্বপি লোকেষ্বনুভাবো যস্য, তস্যৈব তেজসা সুদর্শনেন প্রতিহতো বলাবলেপো বীর্য্যমদো যেষাম্, বিলেশয়াঃ সর্পা ইব। ইন্দ্রদূত্যা প্রযুক্তাভির্মন্ত্ররূপাভির্বাগ্ভিঃ। এবং হি বৈদিকমাখ্যানম্—'ফণিভিরসুরৈর্নিগূঢ়াং গামন্বেষ্টুং সরমাং দেবশুনীমিন্দ্রেণ প্রহিতাং সন্ধিমিচ্ছন্তঃ পণয়ঃ প্রাহুঃ—কিমিচ্ছন্তী সরমেত্যাদি ;

১। -ধীরঃ (ক) ; ২। অনুকর্ম্ম (গ)।

সা চ সন্ধিমনীচ্ছন্তীন্দ্রস্তুতিপূর্ব্বকং তানতিপরুষমাহ—'হতা ইন্দ্রেণ পণয়ঃ, পলায়ধ্বম্[১] ।' ইত্যাদি। তে চ তচ্ছ্রুত্বা বিভ্যতীতি ॥

৩১। মহাভোগিনো মহাফণাঃ, মহানমর্ষঃ ক্রোধো যেষাম্। পঞ্চাদি-সংখ্যানি শীর্ষাণি যেষাম্, শীর্ষ্ণামিতি বক্তব্যে শীর্ষাণামিত্যার্ষঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
চতুর্বিংশোঽধ্যায়ঃ ॥ ২৪ ॥

পঞ্চবিংশোঽধ্যায়ঃ

পঞ্চবিংশে ততোঽধস্তাদাহ শেষস্য সংস্থিতিম্।
সঞ্জিহীর্ষোরিদং কালে যতো[২] রুদ্রসমুদ্ভবঃ ॥ (১)

১। তস্য পাতালস্য। কোঽসাবনন্তঃ ? সাত্বতীয়াঃ সাত্বততন্ত্রনিষ্ঠাঃ, চতুর্ব্ব্যূহোপাসনে যং সঙ্কর্ষণ ইত্যাচক্ষতে। তথাখ্যানে হেতুঃ—দ্রষ্টৃ-দৃশ্যয়োর্দৃগ্দৃশ্যয়োঃ, সম্যক্কর্ষণমেকীকরণং যেন। তৎ কুতঃ ? অহ-মিত্যভিমানো লক্ষণং চিহ্নমধিষ্ঠাতুর্যস্য, অহঙ্কারাধিষ্ঠানেন দৃগ্দৃশ্য[৩]সঙ্কর্ষণাৎ সঙ্কর্ষণ ইত্যর্থঃ॥

২। অনন্তত্বমাহ—যস্যেদমিতি। যচ্ছব্দানাং স এব ভগবাননন্ত ইত্যুত্তরেণান্বয়ঃ ॥

৩। তামসত্বমাহ—যস্যেদং বিশ্বমুপসংহর্ত্তুমিচ্ছতোঽমর্ষেণ বিরচিতে কুটিলীকৃতে, রুচিরে[৪] ভ্রমন্তৌ ভ্রুবৌ তয়োর্মধ্যে, উত্তম্ভয়ন্—উন্নময়ন্ ॥

১। পলায়ধ্বম্ (ক, খ); ২। যত্র (খ); ৩। দ্রষ্টৃদৃশ্য- (খ); ৪। রুচিরীকৃতে (খ)।

৪। সুভগত্বমাহ—যস্যাঙ্ঘ্রিকমলযুগলেঽরুণা বিশদাশ্চ নখা এব মণয়স্তেষাং ষণ্ডঃ সমূহস্তস্য মণ্ডলেষু দর্পণোপাধিষু পরিস্ফুরতাং কুণ্ডলানাং প্রভামণ্ডল্যা মণ্ডিতানি গণ্ডস্থলানি যেষু তানি ॥

৫। চারুণ্যঙ্গবলয়ে বিলসিতাশ্চ তে বিশদাশ্চ বিপুলাশ্চ ধবলাশ্চ সুভগাশ্চ রুচিরাশ্চ ভুজা এব রজতস্তম্ভাস্তেঘগুরুচন্দনকুঙ্কুমানাং পঙ্ক এবানুলেপস্তেনাবলিম্পমানাস্তেষামভিমর্শনেন স্পর্শনেনোন্মথিতে হৃদয়ে মকরধ্বজস্যাবেশেন রুচিরঞ্চ ললিতঞ্চ স্মিতমবলোকশ্চ যাসাং তাঃ, তস্যানুরাগেণ মদেন চ মুদিতঞ্চ তন্মদেন বিঘূর্ণিতে প্রচলিতে চ, আ ঈষদরুণে করুণাবলোকযুক্তে নয়নে যস্মিংস্তদ্বদনারবিন্দঞ্চ বিলোকয়ন্তি ॥

৬। অমর্ষোঽসহনম্, রোষঃ ক্রোধঃ, উপসংহৃতস্তয়োর্বেগো যেন ॥

৭। উপাসনার্থমাহ—সুরাদিভির্ধ্যায়মানশ্চিন্ত্যমানঃ, অনবরতং মদেন মুদিতশ্চাসৌ বিকৃতবিহ্বললোচনশ্চ, সুললিতেন মুখরিকামৃতেন বচনামৃতেন, স্বপার্ষদান্ বিবুধযূথপতীংশ্চাপ্যায়মানো হর্ষয়ন্, নীলে বাসসী যস্য, একমেব কুণ্ডলং যস্য, হলস্য ককুদি পৃষ্ঠে কৃতো ন্যস্তঃ সুভগশ্চ সুন্দরশ্চ ভুজো যেন, কাঞ্চনীং কক্ষ্যাং গজরজ্জুম্ ; উদারা লীলা যস্য সঃ। ন পরিম্লানো রাগঃ কান্তির্যস্যাস্তস্যা নবনবতুলসিকায়া আমোদমধ্বাসবেন সুরভিমধুরসেন মাদ্যতাং মধুকরাণাং যে ব্রাতাস্তেষাং মধুরগীতেন শ্রীর্যস্যাস্তাং বনমালাং কক্ষাং বরস্রাম্ ॥

৮। সংশ্লোকয়ামাস—বর্ণয়ামাস ॥

৯। অস্য জগত উৎপত্ত্যাদিহেতবো গুণা যস্যেক্ষয়া কল্পাঃ স্বস্বকার্য্যসমর্থা আসন্। যস্য স্বরূপং ধ্রুবমনন্তম্, অকৃতঞ্চানাদি ; অত্র হেতুঃ— যদেকমেব সৎ, আত্মন্যাত্মনি নানা-কার্য্যপ্রপঞ্চমধাৎ। তস্য ব্রহ্মরূপস্য বর্ত্ম তত্ত্বং জনঃ কথমুহ বেদ ? ন বেদেত্যর্থঃ ॥

১০। তর্হি কথমসৌ মুমুক্ষুভিঃ সেব্যতে? তত্রাহ—মূর্ত্তিমিতি। যত্রেদং সদসদ্বিভাতি, স নোঽস্মাকং ভক্তানাং বহুকৃপয়া সংশুদ্ধং সত্ত্বং মূর্ত্তিং বভার। কিমর্থম্? স্বজনানাং মনাংস্যাদাতুং বশীকর্ত্তুং কৃতাম্ ; যস্য লীলাং মৃগপতিঃ সিংহ আদদেঽশিক্ষত ; যতঃ—উদারাণি বীর্য্যাণি যস্য। তস্মাদন্যং মুমুক্ষুঃ কমাশ্রয়েদিত্যুত্তরেণান্বয়ঃ। যদ্বা, কৃপয়েত্যত্র হেতুঃ—যদ্‌যস্মাৎ, স্বজনানাং মনাংস্যাদাতুং লীলামাদদে, মৃগপতিরিবোদারবীর্য্যঃ ; যদ্বা, মৃগ্যন্ত ইতি মৃগাঃ কামপ্রদাস্তেষাং পতির্মুখ্যঃ ॥

১১। কিঞ্চ, আস্তাং তস্য কৃপয়া বপুর্ধারণং তদ্ভজনং বা, তন্নামৌদার্য্যমেবাতিচিত্রমিত্যাহ—যস্য নাম যদি পতিতো মহাপাতক্যপ্যনুকীর্ত্তয়েত্তর্হি সংশুধ্যেদিতি কিং বক্তব্যম্? যতোঽসাবেব নৃণামশেষমংহঃ সপদি সদ্যো হন্তি। কথমনুকীর্ত্তয়েৎ? অন্যতঃ শ্রুতং বাকস্মাদ্বা, আর্ত্তো বা সন্, প্রলম্ভনাদ্বা পরিহাসাৎ, তস্মাচ্ছেষাদন্যম্ ॥

১২। গির্য্যাদিসহিতং ভূগোলম্, সত্ত্বানি প্রাণিনঃ, সহস্রজিহ্বোঽপি কো গণয়েৎ?

১৩। দুরন্তং বীর্য্যং বলং যস্য, উরবো গুণা অনুভাবাশ্চ যস্য, স চ স চ ; রসায়া ভূমের্মূলে স্থিতঃ সন্ বিভর্ত্তি, আত্মতন্ত্রঃ—আত্মাধারঃ ॥

১৪। উক্তস্য লোকবিভাগস্যোপযোগং বদন্নুপসংহরতি—এতা হ্যেবেহ কামান্ কাময়মানৈর্নৃভিরুপগন্তব্যা ইত্যন্বয়ঃ ॥

১৫। তস্য প্রপঞ্চঃ—এতাবত্যো বিপাকগতয়ঃ ফলভূতা গতয়ঃ, তা ব্যাচখ্যে ব্যাখ্যাতবানস্মি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং পঞ্চমস্কন্ধে
পঞ্চবিংশোঽধ্যায়ঃ ॥ ২৫ ॥

ষড়্বিংশোঽধ্যায়ঃ

ষড়্বিংশে তু ততোঽধস্তান্নরকস্থিতিরুচ্যতে।
পাপিনো যত্র দণ্ড্যন্তে[১] যমদূতৈর্যথাযথম্ ॥ (১)

১। পুংসো গতয় উচ্চাবচা বিসদৃশা ইতি ভোগবৈচিত্র্যমুক্তম্, তদেতৎ কুত ইতি পৃচ্ছতি—মহর্ষ ইতি ॥

২। কর্ম্মণঃ সমানত্বেঽপি শ্রদ্ধাবৈচিত্র্যাৎ ফলবৈচিত্র্যমিতি পরিহরতি—ত্রিগুণত্বাদিতি। সাত্ত্বিক্যা শ্রদ্ধয়া কর্ত্তুঃ সুখিত্বম্, রাজস্যা সুখিত্বং দুঃখিত্বঞ্চ, তামস্যা দুঃখিত্বং মূঢ়ত্বঞ্চ; তত্রাপি তাসাং শ্রদ্ধানাং তারতম্যাৎ সুখাদি-তারতম্যং সর্ব্বেষামিত্যর্থঃ ॥

৩। প্রতিষিদ্ধং প্রতিষেধস্তদেব লক্ষণং প্রমাণং যস্যাধর্ম্মস্য কর্ত্তুঃ শ্রদ্ধা-বৈসাদৃশ্যং তমসস্তারতম্যাৎ। তত্রাপি কারণং দর্শয়ন্নাহ—অনাদ্যবিদ্যাকৃতানাং কামানাং যা সৃতয়ো নরকগতয়স্তাসাং তাঃ, অথেদানীং তাঃ প্রাচুর্য্যেণানু-বর্ণয়িষ্যাম ইত্যন্বয়ঃ ॥

৪। কিং ভূমাবেব দেশবিশেষাঃ, ত্রিলোক্যা ব্রহ্মাণ্ডাদ্বহির্বা, আবরণেষু মধ্যেঽন্তরালে বা ভূমিব্যতিরিক্তে ?

৬। কর্ম্মদোষমনতিক্রম্য দোষমেব দমং পাপফলম্, দণ্ডং করোতি ; নোল্লঙ্ঘিতং ভগবচ্ছাসনং যেন ॥

৭। মতান্তরেণাষ্টাবিংশতিমাহ—কিঞ্চেতি ॥

৮। পাপভেদেন চ তত্তন্নরকযাতনাভেদং প্রপঞ্চয়তি—যত্র যস্ত্বিত্যা-দিনা। যাত্যমানঃ পীড্যমানঃ, একদৈব তদৈব ॥

৯। পুরুষং পতিং বঞ্চয়িত্বা ॥

১। দহ্যন্তে (ঘ)।

১০। এতচ্ছরীরমহমিতি, ইদং ধনাদি মমেতি মত্বা স্বঞ্চ কুটুম্বমেব চ পুষ্ণাতি। তেনাশুভেন ॥

১১। রুরবো ভূত্বেতি, কর্ম্মাণ্যেব তথা পরিণামং প্রাপ্যেত্যর্থঃ। অতিক্রূরস্য ভারশৃঙ্গাখ্যস্য সত্ত্বস্য, অপদেশঃ সংজ্ঞা ॥

১২। ক্রব্যেণ নিমিত্তেন মাংসার্থমিত্যর্থঃ ॥

১৩। প্রাণতঃ প্রাণপুষ্ট্যর্থম্[১] (সজীবান্) উপরন্ধয়তি পচতি। অপ-করুণং নিষ্কৃপম্ ॥

১৪। খলে—সমে দেশে ॥

১৫। স্বধর্ম্মহা—স্বধর্ম্মত্যাগী ॥

১৬। স্বনয়ন্ রুদন্, কশ্মলং মোহমুপগতো ভবতি। অদৃষ্টদোষা-স্তেনোপরুদ্ধাঃ সন্তো যথা কশ্মলমুপগতাস্তদ্বৎ ॥

১৭। ঈশ্বরেণোপকল্পিতা মনুষ্যরক্তপানাদিলক্ষণা বৃত্তির্যেষাং মৎকুণা-দীনাম্। ন বিবিক্তা বিজ্ঞাতা পরব্যথা যৈরবিবেকিভিস্তেষাম্, পুরুষেণ ব্রাহ্মণাদিস্বভাবেন বিধিনিষেধপূর্ব্বকমুপকল্পিতা বৃত্তির্যস্য, বিবিক্তা পরিজ্ঞাতা পরব্যথা যেন বিবেকিনা। অভিদ্রুগ্ধা হিংসিতাঃ, বিহতা নিদ্রারূপা নির্ব্বৃতির্যস্য, ন লব্ধমবস্থানং যেন স তমসি পরিক্রামতি ॥

১৮। যৎ কিঞ্চন ভক্ষ্যাদিকমুপনতং প্রাপ্তম্, তদসংবিভজ্য। ন নির্ম্মিতাঃ পঞ্চ যজ্ঞা যেন, অতএব বায়সৈঃ সংস্তুতঃ সমত্বেন বর্ণিতঃ কাকতুল্যো বা; ক্রমিভোজনঃ ক্রমীনেব ভুঞ্জানঃ। যাবৎ তদ্‌যাবন্তি যোজনানি তৎ, ক্রমিকুণ্ডং তাবন্তি বর্ষাণি যাবদ্বা তৎ পাপমিত্যর্থঃ[২]। অপ্রত্তমসংবিভক্তম্; অপ্রহুতঞ্চাত্তীতি তথা সঃ, অনির্ব্বেশম্—অকৃত-প্রায়শ্চিত্তম্ ॥

১৯। নিষ্কুষন্তি—ছিন্দন্তি ॥

১। সজীবান্ (ক, ঘ); ২। পাতকমিত্যর্থঃ (ঘ)।

২০। তিগ্ময়া তপ্তয়া, শূর্ম্যা প্রতিময়া ॥

২১। সর্ব্বাভিগমঃ পশ্বাত্ত্যপগন্তা ॥

২২। অপাষণ্ডাঃ সৎকুলীনাঃ সন্তঃ ; দ্বিতীয়ান্তপাঠে সেতুবিশেষণম্। নদীং বিশিনষ্টি—বিণ্মূত্রেতি ॥

২৩। পশুচর্য্যাম্—স্বেচ্ছাচারম্ ॥

২৪। অতীর্থে বিহিতাদন্যত্র ; বিধ্যান্তীতি প্রাণনিরোধো দর্শিতঃ ॥

২৫। নিরয়পতয়ো যমপুরুষাঃ ॥

২৬। লালাভক্ষমাহ—যস্ত্বিহেতি। রেতঃপানং কারয়ন্তি ॥

২৭। যমদূতা যে শ্বানঃ, সরভসং সসম্ভ্রমম্ ॥

২৮। দ্রব্যবিনিময়ে ক্রয়বিক্রয়াদৌ, নিরবকাশে নিরালম্বে ; 'অবীচি'-শব্দার্থমাহ—যত্রেতি। বীচিস্তরঙ্গস্তদ্রহিতত্বাদবীচিঃ ॥

২৯। যো বিপ্রস্তৎকলত্রং বা সুরাং পিবতি, অন্যোঽপি বা ব্রতস্থঃ সন্, রাজন্যো বৈশ্যো বা সোমপীথঃ কৃতসোমপান ইত্যন্বয়ঃ ; তয়োঃ সোমস্থানে ফলচমসবিধানাৎ সোমপাননিষেধাচ্চ। তথা চ শ্রুতিঃ—'ন্যগ্রোধস্ত্রিরাহৃত্য[১] তাঃ সংপিষ্য দধিন্যুপসৃজ্য[২] তমস্মৈ ভক্ষ্যং সম্প্রযচ্ছেৎ, ন সোমম্' ইতি ॥

৩০। স পূর্ব্বমপি, মৃতক এব সন্ মৃত্বা ॥

৩১। পুরুষস্য মেধেন হিংসয়া ভৈরবাদীন্ যজন্তে; যাশ্চ স্ত্রিয়ো নরপশুমাংসং ভক্ষয়ন্তি ; তমোরূপা[৩] রক্ষোগণা ভূত্বা যথেহ তে পুরুষাদাঃ সন্তঃ পূর্ব্বমনৃত্যংস্তদ্বৎ ॥

৩২। বৈস্রম্ভকৈর্বিশ্বাসোপায়ৈরুপবিস্রভ্য[৪] বিশ্বাস্য ॥

৩৩। বিলেশয়ান্—মূষিকান্ ॥

১। ন্যগ্রোধতন্ত্রীরাহৃত্য (ঘ); ২। দধিন্যুপমৃজ্য (ঘ); ৩। কামরূপা (ঘ); ৪। -বিশ্রম্ভয্য (ঘ)।

৩৪। সগরেণ—সবিষেণ ॥

৩৫। অতিথয়োঽজ্ঞাতপূর্ব্বাঃ, অভ্যাগতা জ্ঞাতপূর্ব্বাস্তান্, পাপেন বক্রীকৃতেন ॥

৩৬। আঢ্যাভিমতির্ধনগর্ব্বিতঃ, অহঙ্কৃতিঃ শ্রেষ্ঠোঽহমিতিমানী, তির্য্যক্ প্রেক্ষণং যস্য ; সর্ব্বতো গুর্ব্বাদেরপি ধনঞ্চোরয়িষ্যন্তীতি বিশঙ্কমানঃ। পরিশুষ্যমাণং হৃদয়ং বদনঞ্চ যস্য। অনবগতঃ—অপ্রাপ্তঃ, তস্যার্থস্যোৎপাদনাদিভিঃ শমলং গৃহ্নাতীতি তথা ; পরিবয়ন্তি সূত্রপ্রোতান্ কুর্ব্বন্তি ॥

৩৭। ইতরত্র স্বর্গাদৌ, ইহ মর্ত্ত্যলোকে, পুনর্ভবে পুনর্জন্মনিমিত্তম্, উভয়োর্ধর্ম্মাধর্ম্ময়োঃ, শেষাভ্যাম্ ॥

৩৮। আদাবেব দ্বিতীয়স্কন্ধে 'বৈশ্বানরং যাতি' ইত্যাদিনা। উপগেয়মৌপনিষদম্[১], শ্রদ্ধাভক্তিভ্যাং বিশুদ্ধা বুদ্ধির্যস্য ॥

৩৯। যথা যথাবচ্ছ্রুত্বা ॥

৪০। কথম্ভূতা সংস্থা ? সকলানাং জীবনিকায়ানাং ধাম—আশ্রয়ভূতং বপুঃ ॥

পঞ্চমস্কন্ধসম্বন্ধিপদভাবার্থদীপনৈঃ।
প্রীয়তাং পরমানন্দনৃহরির্ব্বালভাষিতৈঃ ॥ (২)

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং শ্রীধরস্বামিবিরচিতায়াং
পঞ্চমস্কন্ধটীকায়াং ষড়্বিংশোঽধ্যায়ঃ ॥ ২৬ ॥

পঞ্চমস্কন্ধঃ সম্পূর্ণঃ

১। ঔপনিষদং রূপং (ঘ)।

ষষ্ঠঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

পুণ্যারণ্যে নৃসিংহৈকনামসিংহো বিরাজতে।
যন্নাদতঃ পলায়ন্তে মহাকল্মষকুঞ্জরাঃ ॥ (১)

বিসর্গসম্ভবান্ জীবান্ স্বমর্য্যাদাসু সংস্থিরান্[১]।
বিষ্ণুঃ পাত্যখিলৈ রূপৈরিত্যেবং পঞ্চমে স্থিতম্ ॥ (২)

অধ্যায়ৈকোনবিংশত্যা ষষ্ঠে পোষণমুচ্যতে।
অতিলঙ্ঘিতমর্য্যাদভক্তরক্ষণলক্ষণম্ ॥ (৩)

অজামিলো মনুষ্যেষু মহাপাপো যথেরিতঃ[২]।
বিশ্বরূপাদিঘাতী চ তথা[৩] দেবেষু বাসবঃ ॥ (৪)

অজামিলস্য ভক্তত্বং বিষ্ণুদূতৈর্নিরূপিতম্।
সঙ্কেতভগবন্নাম-পুত্রস্নেহানুষঙ্গজম্ ॥ (৫)

ইন্দ্রোঽপি ভগবদ্ভক্তঃ সখ্যেনোপেন্দ্রসেবকঃ।
তদধীনসুরৈশ্বর্য্যশক্রনির্জয়জীবিতঃ ॥ (৬)

তত্রাদৌ ত্রিভিরধ্যায়ৈরজামিলকথোচ্যতে।
বিশ্বরূপকথা ষড়্ভিরিন্দ্রদোষোক্তয়ে ততঃ ॥ (৭)

ইন্দ্রস্যৈব তু দোষোক্ত্যৈ বৃত্রাখ্যানং তথাষ্টভিঃ।
দ্বাভ্যাঞ্চ মরুদাখ্যানমেবং প্রকরণক্রমঃ ॥ (৮)

তত্রাদৌ প্রথমে বিষ্ণোর্দূতৈঃ পাতকিমোচনে।
তৎপাপখ্যাপনায়োক্তং যাম্যৈর্ধর্ম্মাদিলক্ষণম্ ॥ (৯)

১। সুমর্য্যাদাসু সম্ভবান্ (ক), স্বমর্য্যাদাসু সংস্থিতান্ (ঘ); ২। যথান্বিতঃ (ঘ); ৩। যথা (ঘ)।

১—৬। অথ ষষ্ঠস্কন্ধো ব্যাখ্যায়তে। পূর্ব্বোক্তানুবাদপূর্ব্বকমনন্তরোক্ত[১]-নরকপরিহারোপায়ং পৃচ্ছতি—নিবৃত্তিমার্গ ইতি ষড়্ভিঃ। (১) আদৌ দ্বিতীয়স্কন্ধে 'বৈশ্বানরং যাতি' ইত্যাদিনা ভগবতা ত্বয়া যথা যথাবদ্ যদ্যেন মার্গেণ। ক্রমেণ যোগোঽর্চ্চিরাদি-প্রাপ্তিস্তেনোপলব্ধো যো ব্রহ্মা, তেন সহাসংসৃতির্মোক্ষো ভবতি; 'ব্রহ্মণা সহ তে সর্ব্বে সম্প্রাপ্তে প্রতি-সঞ্চরে। পরস্যান্তে কৃতাত্মানঃ প্রবিশন্তি পরং পদম্॥' ইতি-বচনাৎ॥ (২) ত্রৈগুণ্যং স্বর্গাদিসুখম্, তদেব বিষয়ঃ প্রাপ্যং যস্য, ন লীনা প্রকৃতির্যস্য তস্য, পুংসঃ পুনঃপুনর্গুণসর্গঃ, ভোগার্থং দেহারম্ভরূপো যো মার্গঃ, স চ কথিতস্তৃতীয়ে 'দক্ষিণেন পথার্য্যম্ণঃ পিতৃলোকং ব্রজন্তি তে' ইত্যাদিনা॥ (৩) অনুবর্ণিতাস্য নিরন্তরাধ্যায়ে[২]। ব্যাখ্যাতশ্চতুর্থস্যাদৌ। যতো যস্মিন্॥ (৪-৫) দ্বীপাদীন্ ভাগতো লক্ষণতো মানতশ্চ, ধরামণ্ডলস্য সংস্থানম্, জ্যোতিষাং বিবরাণাঞ্চেদং সংস্থানং বিভুর্হরির্যথাসৃজত্তথা ব্যাখ্যাতমিত্যর্থঃ॥ (৬) নানা উগ্রা যাতনা যেষু তান্ নরকান্, যথা যেনোপায়েন ন ঈয়াৎ, ন গচ্ছেৎ, তন্মেঽধুনা ব্যাখ্যাতুমর্হসি॥

৭—৮। তত্র তাবন্মন্বাদ্যুক্তং যথাযথপ্রায়শ্চিত্তং বিনা নরকা দুর্নিবারা ইত্যাহ—ন চেদিতি দ্বাভ্যাম্। (৭) মনউক্তিপাণিভির্মনোবাক্‌কায়ৈঃ, কৃতস্যাংহসঃ স্তৈরেব ইহৈবাপচিতিং প্রায়শ্চিত্তং যথাবন্ন কুর্য্যাচ্চেৎ, তর্হি স পুরুষঃ প্রেত্য মৃত্বা নরকান্ ধ্রুবমুপৈতি। যে ময়া, যে ভবতঃ কীর্ত্তিতাঃ, তিগ্মা দারুণা যাতনা যেষু তে, তান্॥ (৮) যস্মাদেবং তস্মাৎ পাপস্য নিষ্কৃতৌ প্রায়শ্চিত্তে যতেত। কদা? মৃত্যোঃ পুরৈব, তত্রাপ্যবিপন্নতা-ক্ষীয়মাণেনাত্মনা দেহেন; যদ্বা, অবিপদ্ বিপত্তিরহিতো যাবৎ, যতাত্মনা সংযতেন মনসা, তত্রাপ্যাশু; অন্যথা 'অতীত[৩]-চিরকালে তু দ্বিগুণং ব্রত-মর্হতি' ইতি দ্বৈগুণ্যাপত্তেঃ। অত্র চ পাপস্য মহত্ত্বমল্পত্বঞ্চাবেক্ষ্য তদনুরূপে

১। নিরন্তরোক্ত- (ঘ); ২। অনন্তাধ্যায়ে (গ); ৩। অতীব- (ঘ)।

প্রায়শ্চিত্তে যতেত। রুজাং রোগাণাং নিদানবিদ্‌যথা[১] বৈদ্যস্তদনুরূপং চিকিৎসেত, তদ্বৎ ॥

৯—১০। অত্র চোদয়তি দ্বাভ্যাম্। (৯) দৃষ্টং রাজদণ্ডাদি, শ্রুতং নরকপাতাদি, তাভ্যামাত্মনঃ পাপমহিতং জানন্নপি, ভূয়ঃ প্রায়শ্চিত্তানন্তরং করোতি। অথো অতঃ কারণাদ্‌দ্বাদশাব্দিকাদি কথং প্রায়শ্চিত্তম্? তেন সমূলদোষস্যানিবৃত্তেঃ। নিবৃত্তৌ বা পুনশ্চ পাপপ্ররোহযোগাদিতি ভাবঃ ॥ (১০) কিঞ্চ, ক্বচিৎ কদাচিদভদ্রাৎ পাপান্নিবর্ত্ততে, ক্বচিত্তদেব পুনরাচরতি। যথা কুঞ্জরঃ স্নাতোঽপি রজোভিরাত্মানং মলিনীকরোতি, তথা পাপস্য পুনঃপুনর্নিবারত্বেন নরকপাতস্যাবশ্যম্ভাবিত্বাৎ প্রায়শ্চিত্তং ব্যর্থমিতি মন্যে ॥

১১। পরিহরতি—কর্ম্মণা কৃচ্ছ্রাদিপ্রায়শ্চিত্তেন, কর্ম্মণঃ পাপস্য নির্হারো নাশ আত্যন্তিকঃ সমূলো ন হীষ্যতে। অবিদ্বানধিকারী যস্মিংস্তস্য ভাবস্তত্ত্বং তস্মাৎ। অতোঽবিদ্যায়া নাশাভাবান্নষ্টেঽপি তস্মিন্ পাপে তৎ-সংস্কারেণ পাপান্তরস্য পুনপুনঃ প্ররোহো ভবত্যেব। কিং তর্হি মুখ্যং প্রায়শ্চিত্তম্? তদাহ—প্রায়শ্চিত্তং তু বিমর্শনং জ্ঞানম্ ॥

১২। তত্তু নিত্যমপ্রমত্তঃ শনৈর্লভতে, নান্য ইতি সদৃষ্টান্তমাহ—নেতি। পথ্যমেবান্নমশ্নতঃ পুরুষান্ যথা ব্যাধয়ো ন বাধন্তে, তথা নিয়মাদিকর্ত্তা ক্ষেমায় তত্ত্বজ্ঞানায় সমর্থো ভবতি ॥

১৩—১৪। এতদেব বিশদয়তি দ্বাভ্যাম্। (১৩) তপসা—ঐকাগ্র্যেণ, 'মনসশ্চেন্দ্রিয়াণাঞ্চ ঐকাগ্র্যং পরমং তপঃ' ইতি স্মৃতেঃ। ব্রহ্মচর্য্যেণা-ষ্টাঙ্গেন ; তদুক্তম্,—'স্মরণং কীর্ত্তনং কেলিঃ প্রেক্ষণং গুহ্যভাষণম্। সংকল্পোঽধ্যবসায়শ্চ ক্রিয়ানির্বৃতিরেব চ ॥ এতন্মৈথুনমষ্টাঙ্গং প্রবদন্তি মনীষিণঃ। বিপরীতং ব্রহ্মচর্য্যমেতদেবাষ্টলক্ষণম্ ॥' ইতি। শমো মনসো

১। নিদানবিদ্যয়া (ঘ)।

নিয়মনম্, দমো বাহ্যেন্দ্রিয়াণাম্, ত্যাগো দানম্, যমোঽহিংসাদিঃ, নিয়মো জপাদিঃ ॥

১৫। তস্যাতিদুষ্করত্বান্মুখ্যমেবান্যৎ প্রায়শ্চিত্তমাহ—কেচিদিত্যনেন। এবম্ভূতা ভক্তিপ্রধানা বিরলা ইতি দর্শয়তি—কেবলয়া তপ-আদিনিরপেক্ষয়া, 'বাসুদেবপরায়ণাঃ' ইতি নাধিকারিবিশেষণমেতৎ, কিন্ত্বন্যেষামশ্রদ্ধয়া তত্রাপ্রবৃত্তেরর্থান্তেষ্বেব পর্য্যবসানাদনুবাদমাত্রম্ ॥

১৬। এতচ্চ জ্ঞানমার্গাদপি শ্রেষ্ঠমিত্যাহ—ন তথা পূয়েত শুধ্যেৎ, তৎপুরুষনিষেবয়া, কৃষ্ণেঽর্পিতাঃ প্রাণা যেন ॥

১৭। অত্র হেতুঃ—সধ্রীচীনঃ সমীচীনঃ, অয়ং পন্থা ভক্তিমার্গঃ, যতঃ ক্ষেমঃ ; ক্ষেমত্বে হেতুঃ—ন কুতশ্চিদ্বিঘ্নাদের্ভয়ং যস্মিন্। তদেবাহ—সুশীলাঃ কৃপালবঃ, সাধবো নিষ্কামাঃ, যত্র যস্মিন্ ভক্তিমার্গে[১]। অতো ন জ্ঞানমার্গ ইবাসহায়তানিমিত্তং ভয়ম্, নাপি কর্ম্মমার্গবৎ মৎসরাদিযুক্তেভ্যো ভয়মিতি ভাবঃ ॥

১৮। ভক্তেরন্যনিরপেক্ষত্বমুক্তম্ ; কৃচ্ছ্রাদীনি তু ভক্তিং বিনা ন শোধয়ন্তীত্যাহ—প্রায়শ্চিত্তানীতি। মহতামপ্যশোধকত্বে দৃষ্টান্তমাহ—সুরাকুম্ভমাপগা নদ্য ইবেতি ॥

১৯। ভক্তিঃ স্বল্পাপি পুনাত্যেবেত্যাহ—সকৃদিতি। তস্য গুণেষু রাগমাত্রমস্তি, ন তু জ্ঞানং যস্য তন্মনঃ ; তাবতৈব চীর্ণং কৃতং নিষ্কৃতং প্রায়শ্চিত্তং যৈঃ ॥

২০। ইমমর্থমিতিহাসেনোপপাদয়তি—অত্র চেতি। মে মত্তঃ ॥

২১। কান্যকুব্জে পুরে, দাস্যাঃ পতির্নাম্না অজামিলঃ ॥

২২। বন্দী গ্রহেন[২] অক্ষৈশ্চ দ্যূতেন, কৈতবৈর্বঞ্চনাদিভিশ্চ বৃত্তিং জীবিকাং বিভ্রৎ পুষ্ণন্, যাতয়ামাস পীড়য়ামাস ॥

১। মার্গে ধর্ম্মনিষ্ঠাঃ (ঘ) ; ২। বন্দী গ্রহেণ (ঘ)।

২৩। আয়ুষঃ সম্বন্ধী মহান্ কালোঽত্যগাৎ; স কিয়ানিত্য-পেক্ষায়ামাহ—অষ্টাশীত্যা সংখ্যয়া যুক্তাঃ সমাঃ সংবৎসরাঃ ॥

২৪। প্রবয়সঃ—বৃদ্ধস্য ॥

২৫। বদ্ধং হৃদয়ং যেন ; জরঠো বৃদ্ধঃ ॥

২৬। এতচ্চ তদুপলালনাদি, শ্রীনারায়ণনাম্নঃ পরমমাহাত্ম্যেন[১] তদ্ভক্তিরেবাভূদিতি সিদ্ধান্তোপযোগিত্বেনাপি দ্রষ্টব্যম্ ॥

২৮। বক্রানি তুণ্ডানি মুখানি যেষাং তান্, ঊর্দ্ধানি রোমাণি যেষাং তান্ ॥

২৯। প্লাবিতেন প্লুতত্বং নীতেন ॥

৩০। হরিকীর্ত্তনং নিশম্যাপতন্, যতস্তদ্ভর্ত্তুর্নাম ॥

৩২। পুরঃসরাঃ—ভৃত্যাঃ ॥

৩৩। অস্য নয়নং নিষেধথ ॥

৩৪—৩৫। বয়ন্তু যুষ্মান্ ন জানীমহীতি ন কোপঃ কার্য্যঃ, যতোঽ-লৌকিকাদ্ভুতরূপা যূয়মিত্যাহুঃ—সর্ব্বে ইতি সার্দ্ধাভ্যাম্। (৩৪) লসন্ত্যঃ পুষ্করমালাঃ সন্তি যেষাম্ ॥ (৩৫) নূত্নং নবং বয়ো যেষাম্, নিষঙ্গ ইষুধিঃ, ধনুর্নিষঙ্গাদিভিঃ শ্রীঃ শোভা যেষাং তে ॥

৩৬। বিগতং তিমিরমালোকশ্চান্যস্য প্রকাশো যাসু তথাভূতা দিশঃ কুর্ব্বন্তঃ। ভবতামনুচিতমিদমিত্যাহুঃ—কিমর্থমিতি ॥

৩৭। অহো দণ্ড্যাদণ্ড্যাদিজ্ঞানশূন্যা এতে চৌরা এবাস্মদ্ভিয়া ধর্ম্মরাজস্য কিঙ্করা ইত্যনৃতং বদন্তীতি বিস্ময়েন প্রহস্য তান্ প্রত্যূচুঃ। মেঘস্যেব নির্হ্রাদো ধ্বনির্যস্যাস্তয়া ॥

৩৮। তত্ত্বং স্বরূপম ; লক্ষণং প্রমাণম্ ॥

১। শ্রীনারায়ণ-নামোচ্চারণমাহাত্ম্যেন (ঘ)।

৩৯। কথংস্বিৎ কেন প্রকারেণ। স্থানং বিষয়ঃ, কারিণঃ কর্ম্মিণঃ, নৃণামিতি নরা এব ন পশ্বাদয়ঃ, তেষ্বপি কতিচিদেবেত্যর্থঃ ॥

৪০। বেদেন প্রণিহিতো বিহিতো ধর্ম্মঃ, স চ বেদপ্রমাণক ইত্যর্থঃ। অনেন যো বেদপ্রমাণকঃ স ধর্ম্মঃ, যো ধর্ম্মঃ স বেদপ্রমাণক ইতি স্বরূপং প্রমাণঞ্চোক্তম্; যথাহ জৈমিনিঃ—'চোদনালক্ষণোঽর্থো ধর্ম্মঃ' ইতি; ব্যাখ্যাতঞ্চ ভট্টৈঃ—'দ্বয়মেকেন সূত্রেণ শ্রুত্যর্থাভ্যাং নিরূপ্যতে' ইতি। অপৃষ্টমপ্যধর্ম্মস্য স্বরূপং লক্ষণঞ্চ দণ্ডস্থানকথনায়াহুঃ। তদ্বিপর্য্যয়ো যো বেদনিষিদ্ধঃ সোঽধর্ম্মঃ, নিষেধস্তস্মিন্ প্রমাণমিত্যর্থঃ। বেদস্য প্রামাণ্যে হেতুঃ—বেদো নারায়ণাদুদ্ভূতঃ, স এব সাক্ষাদিত্যুপচারঃ। স্বয়ম্ভূরিতি চ নিশ্বাসমাত্রেণ স্বয়মেব ভবতীতি; তথা চ শ্রুতিঃ—'অস্য মহতো ভূতস্য নিশ্বসিতমেতদ্ যদৃগ্বেদঃ' ইতি ॥

৪১। কোঽসৌ নারায়ণস্তত্রাহুঃ—যেন স্বধাম্নি স্বস্বরূপেঽমী ভাবাঃ প্রাণিনঃ, গুণাঃ শান্তত্বাদয়ঃ, নামানি ব্রাহ্মণ ইত্যাদীনি, ক্রিয়া অধ্যয়নাদ্যাঃ, রূপাণি বর্ণাশ্রমাদীনি, তৈর্বিভাব্যন্তে বিবিচ্যন্তে। যথাতথং যথার্থম্[১], স নারায়ণঃ ॥

৪২। তথাপ্যধর্ম্মোঽনেন কৃত ইতি কুতো জ্ঞায়তে? তত্রাহুঃ—সূর্য্য ইতি। অহস্তহশ্চ রাত্রিশ্চ, কম্—উদকম্, কুঃ—পৃথ্বী, দেহস্য—জীবস্য; যথাহুঃ—'আদিত্যচন্দ্রাবনিলোঽনলশ্চ, দ্যৌর্ভূমিরাপো হৃদয়ং যমশ্চ। অহশ্চ রাত্রিশ্চ উভে চ সন্ধ্যে, ধর্ম্মশ্চ জানাতি জনস্য[২] বৃত্তম্ ॥' ইতি মনুঃ ॥

৪৩। স্থানমাহুঃ—এতৈর্নিমিত্তভূতৈর্বিজ্ঞাতঃ। দণ্ড্যানাহুঃ—সর্ব্ব ইতি ॥

৪৪। বিপরীতান্যভদ্রাণ্যপি কর্ম্মিণাং সম্ভবন্তি, যতস্তেষাং গুণসঙ্গোঽস্তি, যদি কশ্চিদকর্ত্তা স্যাৎ, তর্হি তস্যাভদ্রাণি ন স্যুঃ। ন হ্যেতদস্তীত্যাহুঃ

১। যথাবৎ (ঘ); ২। নরস্য (ক, ঘ)।

—ন হি দেহবানকর্ম্মকৃদস্তীতি। অতঃ সর্ব্বে কর্ম্মিণঃ, কর্ম্মিণাঞ্চ পাপস্যা-বশ্যম্ভাবিত্বাত্তে সর্ব্বে দণ্ডমর্হন্তীত্যর্থঃ ॥

৪৫। কথংস্বিৎ ধ্রিয়তে দণ্ডঃ? ইত্যস্যোত্তরম্—যেনেতি। ধর্ম্মো বেতি দৃষ্টান্তঃ—অধর্ম্মানুসারেণ দণ্ডঃ, ধর্ম্মানুসারেণ সুখবদিত্যর্থঃ ॥

৪৬। ন কেবলং সূর্য্যাদয় এব ধর্ম্মাধর্ম্মজ্ঞাপকাঃ, কিন্ত্বর্থাপত্তিরপী-ত্যাহুঃ—যথেতি। হে দেবপ্রবরাঃ! ইহ জন্মনি, শান্তঘোরমূঢ়ত্বেন বা সুখদুঃখমিশ্রত্বেন বা ধার্ম্মিকত্বাদিনা বা ত্রৈবিধ্যং ভূতেষু যথোপলভ্যতে, তথান্যত্র জন্মান্তরেঽপ্যনুমীয়তে, ত্রৈবিধ্যান্যথানুপপত্ত্যা কল্প্যতে ॥

৪৭। বর্ত্তমানজন্মনা পূর্ব্বাপরজন্মধর্ম্মাধর্ম্মজ্ঞানং ভবতীতি সদৃষ্টান্ত-মাহুঃ—বর্ত্তমানো বসন্তাদিকালঃ, অন্যয়োর্ভূতভবিষ্যয়োর্বসন্তয়োর্যে গুণাঃ পুষ্পফলাদয়স্তেষামভিজ্ঞাপকো যথা, এবমেতজ্জন্মান্যয়োর্ভূতভাবিজন্মনো-র্ধর্ম্মাধর্ম্মৌ নিদর্শয়তীতি তথা ॥

৪৮। অয়ঞ্চ ধর্ম্মাধর্ম্মজ্ঞানপ্রকারোঽন্যেষাম্, ধর্ম্মরাজস্তু মনসৈব সর্ব্বং পশ্যতীত্যাহুঃ—পুরে সংযমন্যাং স্থিত এব দেবো যমো দেহে স্থিতোঽন্তর্যামী বা, জীবস্য পূর্ব্বরূপং ধর্ম্মাধর্ম্মাদিযুক্তং বিশেষেণ পশ্যতি। অনু—অনন্তরম, অপূর্ব্বং রূপং মীমাংসতে, যদস্যানুরূপং তদ্বিচারয়তি, যতোঽসৌ ভগ-বানজঃ ॥

৪৯। জীবস্ত্বীশ্বরেণোপস্থাপিতং বর্ত্তমানং দেহং পশ্যতি, ন তু পূর্ব্ব-মপরঞ্চেত্যাহুঃ—যথেতি। অজ্ঞোঽবিদ্যোপাধির্জীবস্তু ব্যক্তমেব প্রাচীন-কর্ম্মাভিব্যক্তং বর্ত্তমানমেব দেহাদ্যুপাস্তে, অহমিতি মন্যতে; পূর্ব্বমপরং বা ন বেদ। তত্র হেতুঃ—নষ্টা জন্মনাং স্মৃতির্যস্য। তত্র দৃষ্টান্তঃ—তমসা নিদ্রয়া যুক্তো যথা স্বপ্নেঽভিব্যক্তমেব দেহাদ্যুপাস্তে, ন তু জাগ্রদ্দেহাদি পূর্ব্বস্বপ্নাদি-গতং বা, তদ্বদিত্যর্থঃ ॥

৫০—৫৪। এবম্ভূতস্যাবিদ্যোপাধিজীবস্য সংসারং প্রপঞ্চয়তি পঞ্চভিঃ শ্লোকৈঃ। (৫০) পঞ্চভিঃ কর্ম্মেন্দ্রিয়ৈঃ স্বার্থানুপাদানাদীন্ কুরুতে, পঞ্চভির্জ্ঞানেন্দ্রিয়ৈঃ পঞ্চ শব্দাদীন্ বেদ। ষোড়শেন মনসা সহ সপ্তদশঃ। ষোড়শোপাধ্যন্তর্গতোঽপি স্বয়ং ত্বেক এব সর্ব্বেন্দ্রিয়বিষয়প্রতিসন্ধানাত্রীন্ জ্ঞানকর্ম্মেন্দ্রিয়মনোবিষয়ান্ প্রাপ্নোতি॥ (৫১) তদেতল্লিঙ্গশরীরং শক্তিত্রয়ং গুণত্রয়কার্য্যং মহদনাদি পুংসি জীবেঽনুসংসৃতিং[১] ধত্তে॥ (৫২) নেচ্ছন্ননিচ্ছন্নপ্যনেনৈব কর্ম্মাণি কার্য্যতে। কোশকারঃ কীটবিশেষো মুহ্যতি, নির্গমোপায়ং ন জানাতি॥ (৫৩) কার্য্যত ইত্যত্রানুভবং প্রমাণয়ন্তি—ন হীতি। গুণৈর্গুণকার্য্যরাগাদিভিঃ, স্বাভাবিকৈঃ পূর্ব্বকর্ম্মসংস্কারোদ্ভূতৈঃ॥ (৫৪) কর্ম্মবশেন চ তদনুরূপো দেহো ভবতীত্যাহুঃ—লব্ধ্বেতি। অব্যক্তমদৃষ্টং নিমিত্তং লব্ধ্বা, ব্যক্তাব্যক্তং তদনুরূপং স্থূলং সূক্ষ্মঞ্চ শরীরং ভবতি। যথাযোনি মাতৃসদৃশম্, যথাবীজং পিতৃসদৃশম, স্বভাবো বাসনা শুক্রশোণিতয়োরেকরূপত্বেঽপি মাতৃভাবনাপিতৃভাবনারূপয়া কর্ম্মবাসনয়া মাতাপিতৃসদৃশো দেহো ভবতীত্যর্থঃ॥

৫৫। সংসারক্রম[২]মুপসংহরন্তো মুক্তিপ্রকারমাহুঃ—এষ ইতি। ঈশসঙ্গাৎ পরমেশ্বরভজনাৎ॥

৫৬—৬৮। তদেবং সামান্যতো ধর্ম্মাদিনির্ণয়মুক্ত্বা প্রস্তুতস্যাজামিলস্যাধর্ম্মং প্রপঞ্চয়ন্তো দণ্ড্যত্বমাহুঃ—অয়ং হীতি যাবদধ্যায়সমাপ্তি। (৫৬-৫৭) তত্র দ্বাভ্যাং তৎপূর্ব্ববৃত্তান্তানুবাদোঽন্যায়াতিরেকপ্রদর্শনার্থঃ। (৫৬) শীলং সুস্বভাবঃ, বৃত্তং সদাচারঃ, গুণাঃ ক্ষমাদয়ঃ, তেষামালয়ঃ॥ (৫৭) অনহঙ্কৃতো নিরহঙ্কারঃ॥ (৫৮) তত আবৃত্তো বনাৎ পরাবৃত্তঃ॥ (৫৯) ভুজিষ্যয়া ভোগস্ত্রিয়া দাস্যা, মৈরেয়ং মধু, পৈষ্টীং সুরাং পীত্বা মদেনাঘূর্ণিতে ভ্রান্তে নেত্রে যস্যাঃ॥ (৬০) বিশেষেণ শ্লথন্তী নীবী যস্যাঃ, তয়া সহ ব্যপেতং

১। অন্বনুসংসৃতিং (ঘ); ২। সংসারচক্র- (ঘ)।

স্বাচারাদ্ভ্রষ্টম্ ॥ (৬১) কামেন কামোদ্দীপকেন, তদঙ্গরাগেণ হরিদ্রাদিনা লিপ্তেন ॥ (৬২) সত্ত্বং ধৈর্য্যম্, শ্রুতং জ্ঞানম্, তদ্বলেন স্তম্ভয়ন্নপি মদনেন কম্পিতং মনঃ সমাধাতুং নিয়মিতুং ন শক্তোঽভূৎ ॥ (৬৩) তদ্দর্শনমেব নিমিত্তং যস্য স্মরব্যাজস্য গ্রহস্য, তেন গ্রস্তঃ ; বিচেতনো গতস্মৃতিঃ[১] ॥ (৬৪) যাবতা সমগ্রেণ ॥ (৬৫) লম্ভিতাং পরিণীতাম্ ॥ (৬৭) অঘরূপমায়ুর্যস্য, মলমেব তদীয়মন্নাদিকমত্তীতি মলাৎ ॥ (৬৮) অকৃতনির্ব্বেশমকৃতপ্রায়শ্চিত্তম্, অস্যৈব চ হিতার্থং নেষ্যাম ইত্যাহুর্যত্রেতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

প্রথমোঽধ্যায়ঃ ॥ ১ ॥

দ্বিতীয়োঽধ্যায়ঃ

দ্বিতীয়ে বৈষ্ণবৈর্যাম্যান্ নামমাহাত্ম্যমদ্ভুতম্ ।
শ্রাবয়িত্বা দ্বিজো বিষ্ণুলোকং নীত ইতীর্য্যতে ॥ (১)

১ । নয়কোবিদাঃ—ন্যায়নিপুণাঃ ॥

২ । ধর্ম্মদৃশাং সতাং সভামধর্ম্মঃ স্পৃশতি ; তদাহুঃ—যত্র সভায়াম্ । যৈর্ধর্ম্মদৃগ্ভিঃ, তেষাং তাং সভাম্ ॥

৩ । পিতরঃ পিতৃবৎ পালকাঃ, শাস্তারোঽনুশিক্ষকাঃ, বৈষম্যমদণ্ড্যদণ্ডনম্ ॥

৪ । এতৎ প্রবর্ত্তিতমধর্ম্মমন্যোঽপি করিষ্যতীতি মহৎ কষ্টমভূদিত্যাহুঃ—যদ্যদিতি । শ্রেয়ান্ শ্রেষ্ঠঃ ॥

১। নষ্টস্মৃতিঃ (গ)।

৫—৬। বিশ্বস্তঘাতাদপীত্যাহুঃ—যস্মেতি দ্বাভ্যাম্। (৫) নির্বৃতঃ—নিশ্চিন্তঃ ॥ (৬) বিশ্বাসেন নিতরামর্পিত আত্মা যেন তম্। বিশ্রম্ভণীয়ো বিশ্বসনীয়ঃ সঘৃণশ্চেৎ ॥

৭। নন্বস্য পাপিনো দণ্ডে কিমর্থমাক্রোশঃ ক্রিয়তে? তত্রাহুঃ—অয়ং হীতি। যদ্‌যদা, বিবশোঽপি হরের্নাম ব্যাজহারোচ্চারিতবান্, ন কেবলং প্রায়শ্চিত্তমাত্রং হরের্নাম, অপি তু স্বস্ত্যয়নং মোক্ষসাধনমপি; 'সকৃদুচ্চরিতং যেন হরিরিত্যক্ষরদ্বয়ম্। বদ্ধঃ পরিকরস্তেন মোক্ষায় গমনং প্রতি ॥' ইতি স্মৃতেঃ ॥

৮। নন্বু কর্ম্মসাদ্‌গুণ্যকরং হরের্নামেতি যুক্তম্; 'যস্য স্মৃত্যা চ নামোক্ত্যা তপোযজ্ঞক্রিয়াদিষু। নূনং সম্পূর্ণতাং যাতি সদ্যো বন্দে তমচ্যুতম্ ॥' ইত্যাদি-বচনাৎ। স্বাতন্ত্র্যেণ ত্বঘনিবর্ত্তকং হরের্নাম কথং স্যাৎ? তত্রাহুঃ—এতেনৈবেতি। অঘোনঃ—অঘবতঃ, 'মঘবৎ'-শব্দবদ্ রূপম্। যৎ আ ইতি চ্ছেদঃ, আ ঈষদাভাসমাত্রং চতুরক্ষরং যন্নাম জগাদ, এতেনৈব কেবলেন চতুরক্ষরমিত্যনেনাধিক্যঞ্চ দর্শিতম্। কথং জগাদ? নারায়ণ আয় আগচ্ছেত্যেবং বিক্রোশরূপেণ পুত্রাহ্বানেন। অয়ং ভাবঃ—কর্ম্মাঙ্গত্বেঽপি হরিনাম্নঃ খাদিরাদিবৎ[১] সংযোগপৃথক্ত্বেন সর্ব্বপ্রায়শ্চিত্তার্থত্বং যুক্তমেব; তথা হি—'অবশেনাপি যন্নাম্নি কীর্ত্তিতে সর্ব্বপাতকৈঃ। পুমান্ বিমুচ্যতে সদ্যঃ সিংহত্রস্তৈর্মৃগৈরিব ॥' ইত্যাদিভিঃ। পুরাণেষু তাবৎ সহস্রশো নাম্নঃ স্বাতন্ত্র্যমবগম্যতে, ন চৈতেঽর্থবাদা ইতি শঙ্কনীয়ম্, বিধিশেষত্বাভাবাৎ; ন চ বিধ্যশ্রবণাদন্যশেষতা কল্পনীয়া, যদাগ্নেয়োঽষ্টকপালো ভবতীত্যাদিবদপ্রাপ্তার্থত্বেন বিধিকল্পনোপপত্তেঃ। মন্ত্রেষু চ 'মর্ত্ত্যা অমর্ত্ত্যস্য তে ভূরি নাম মনামহে[২], বিপ্রাসো জাতবেদসঃ, আঽস্য জানন্তো নাম চিদ্বিবক্তন' ইত্যাদিষু নাম্নস্তপোদানাদিসর্ব্বধর্ম্মাধিক্যমবগম্যতে। উপপাদিতঞ্চ

১। খাদিরত্বাদিবৎ (ঘ); ২। ভূরি নাম্না মমতামহে (গ)।

মন্ত্রার্থবাদানামপি স্বার্থে প্রামাণ্যং দেবতাধিকরণে 'তস্মাচ্ছ্রীনারায়ণনামাভাসমাত্রেণৈব সর্ব্বাঘনিষ্কৃতং কৃতং স্যাৎ' ইতি ॥

৯—১০। নন্বু কামকৃতানাং বহূনাং মহাপাতকানাং সহস্রশ আবর্ত্তিতানাং দ্বাদশাব্দাদিকোটিভিরপ্যনিবর্ত্ত্যানাং কথমিদমেকমেব প্রায়শ্চিত্তং স্যাৎ ? তত্রাহুঃ—স্তেন ইতি দ্বাভ্যাম্। (১০) সুনিষ্কৃতং শ্রেষ্ঠং প্রায়শ্চিত্তমিদমেব। তত্র হেতুঃ—যতো নামব্যাহরণাৎ, তদ্বিষয়া নামোচ্চারকপুরুষবিষয়া, 'মদীয়োঽয়ম্, ময়া সর্ব্বতো রক্ষণীয়ঃ' ইতি বিষ্ণোর্মতির্ভবতি ॥

১১—১২। শ্রেষ্ঠত্বমেবোপপাদয়ন্তি—নেতি দ্বাভ্যাম্। (১১) ব্রহ্মবাদিভির্ম্ন্বাদিভিরুক্তৈর্ব্রতাদিভির্নিষ্কৃতৈস্তথা ন শুধ্যতি, উদাহৃতৈরুচ্চারিতৈর্যথা ; নামপদৈরিত্যনেন নমামীত্যাদিক্রিয়াযোগোঽপি নাপেক্ষিত ইতি দর্শিতম্। কিঞ্চ, তন্নামপদোচ্চারণমুত্তমঃশ্লোকস্য গুণানাঞ্চোপলম্ভকং জ্ঞাপকং ভবতি, ন তু কৃচ্ছ্রচান্দ্রায়ণাদিবৎ পাপনিবৃত্তিমাত্রোপক্ষীণমিত্যর্থঃ ॥ (১২) নৈকান্তিকং নাত্যন্তশোধকং তন্নিষ্কৃতম্, যস্মিন্ কৃতেঽপ্যসৎপথে পাপমার্গে মনো ধাবতি চেৎ, তত্তস্মাৎ কর্ম্মণাং পাপানাং নির্হারমাত্যন্তিকং নাশমিচ্ছতাং হরেগু্ণানুবাদ এব প্রায়শ্চিত্তম্, যতোঽসৌ খলু সত্ত্বভাবনশ্চিত্তশোধকঃ ॥

১৩। অথ তস্মাদেবৈনং মা অপমার্গেণ নয়ত, কৃতমশেষাণামঘানাং নিষ্কৃতং যেন ; যদ্‌যস্মাৎ সমগ্রহীৎ সম্পূর্ণমুচ্চারিতবান্ ; নাম্নৈকদেশেনাপ্যলমিতি ভাবঃ। ম্রিয়মাণ ইত্যনেন পুনঃ পাপান্তরাসম্ভব উক্তঃ ; ন তু তৎকালত্বমেব বিবক্ষিতম্, তদানীং কৃচ্ছ্রাদিবিধিবন্নামোচ্চারণবিধেরপ্যসম্ভবাৎ। ন চ বিধিং বিনা কাকতালীয়নামোচ্চারণং পাপহরমিতি[১] প্রমাণমস্তি সাক্ষাদ্ধি বৈদিককর্ম্মণঃ ফলাবশ্যম্ভাব ইতি নিয়মাদিতি বাচ্যম্, শৌচাদিবিধানাভাবেঽপি বস্তুস্বাভাব্যাৎ ফলসিদ্ধেঃ ॥

১। পাপাপহমিতি (ঘ)

১৪। নন্বয়ং পুত্রনামাগ্রহীৎ, ন তু ভগবন্নাম ? অত্রাহুঃ—সাঙ্কেত্যং পুত্রাদৌ সঙ্কেতিতম্, পারিহাস্যং পরিহাসেন কৃতম্, স্তোভং গীতালাপ-পূরণার্থং কৃতম্, হেলনং কিং বিষ্ণুনেতি সাবজ্ঞমপি চ বৈকুণ্ঠনামোচ্চারণম্ ॥

১৫। নন্থ নায়ং সঙ্কল্পপূর্ব্বকং বৈকুণ্ঠনামাগ্রহীৎ, কিন্তু পুত্রস্নেহপরবশঃ সন্ ? তত্রাহুঃ—পতিত ইতি। অবশেনাপি যো হরিরিত্যাহ, স যাতনা নার্হতি, পুমানিত্যনেন নাত্র বর্ণাশ্রমাদিনিয়ম ইত্যুক্তম্। অবশত্বমেবাহুঃ—পতিতঃ প্রাসাদাদিভ্যঃ, স্খলিতো মার্গে, ভগ্নো ভগ্নগাত্রঃ, সন্দষ্টঃ সর্পাদিভিঃ, তপ্তো জ্বরাদিনা, আহতো দণ্ডাদিনা ॥

১৬—১৭। নন্থ মহতঃ পাপস্য মহদেব প্রায়শ্চিত্তং যুক্তম্, ন স্বল্পং নামগ্রহণমাত্রম্, পাপতারতম্যেন কৃচ্ছ্রাদিতারতম্যবৎ ? তত্রাহুর্দ্বাভ্যাম্। (১৬) গুরূণাং পাপানাম্, গুরূণি প্রায়শ্চিত্তানি, লঘূনাঞ্চ লঘূনি তারতম্যং জ্ঞাত্বা মন্বাদিভিরুক্তানি, অতস্তত্র তথৈব ব্যবস্থা। হরিনাম্নস্তু নেয়ং ব্যবস্থোক্তা—'বিষ্ণোঃ স্মরণমাত্রেণ মুচ্যতে সর্ব্বপাতকৈঃ' ইতি-বচনাৎ। ন চ সুরাবিন্দুপানে মহাপাতকত্বস্মরণবন্নাম্নস্তৎপ্রায়শ্চিত্তত্বস্মরণমিতি ভাবঃ॥ (১৭) কিঞ্চ, তৈস্তপোদানাদিভিস্তান্যঘান্যেব পূয়ন্তে নশ্যন্তি ; অধর্ম্মাজ্জাতং মলিনন্তু তস্য পাপকর্ত্তুর্হৃদয়ম্ ; যদ্বা, তেষামঘানাং হৃদয়ং সূক্ষ্মরূপং সংস্কারাখ্যং ন শুধ্যতি, তদপীশাঙ্ঘ্রিসেবয়া কীর্ত্তনাদিনা শুধ্যতীত্যর্থঃ। অয়ং ভাবঃ—মহান্ত্যপি পাপানি সকৃদুচ্চারিতেনৈব নাম্না নশ্যন্তি, সকৃৎ প্রবর্ত্তিতেন দীপেনেব গাঢ়ধ্বান্তানি। তদাবৃত্ত্যা তু পাপান্তরস্যানুৎপত্তিঃ, দীপধারণ ইব তমোঽন্তরস্য। ততশ্চ বাসনাক্ষয়াদ্ধৃদয়স্য শুদ্ধিঃ ; এতদর্থমেব তত্র তত্রাবৃত্তিবিধানং পাপক্ষয়শ্চ ভবতি, 'স্মরতাং তমহর্নিশম্' ইত্যাদিষু। তদেবাত্রাপ্যুক্তম্—'গুণানুবাদঃ খলু সত্ত্বভাবনঃ' ইতি ; 'তদপীশাঙ্ঘ্রিসেবয়া' ইতি চ। অতোঽস্যাজামিলস্য হরিনাম্নৈব সর্ব্বপাপক্ষয়ঃ, বাসনাক্ষয়স্তু মহাপুরুষদর্শনাদিভিরিতি ॥

১৮। তথাপি পাপপ্রায়শ্চিত্তমিদমিতি জ্ঞাত্বা নোচ্চারিতমিতি চেৎ, তত্রাহুঃ—অজ্ঞানাদিতি। বালকেনাজ্ঞানাদপি প্রক্ষিপ্তোঽগ্নির্যথা কাষ্ঠরাশিং দহতি, তদ্বৎ ॥

১৯। নন্বেবমপি পার্ষদানুপদিষ্টং শ্রদ্ধাহীনঞ্চ কথং প্রায়শ্চিত্তং স্যাৎ? তত্রাহুঃ—যথেতি। অগদমৌষধম্, বীর্য্যবত্তমমিতি বক্তব্যে বীর্য্যতমমিত্যুক্তম্। যদৃচ্ছয়া শ্রদ্ধাদিহীনম্, উপযুক্তং ভক্ষিতং পার্ষদমুখাদজানতোঽপি স্বগুণমারোগ্যং কুর্য্যাৎ, মন্ত্রোঽপি নামাত্মকস্তথা স্বকার্য্যং কুর্য্যাদেব। ন হি বস্তুশক্তিঃ শ্রদ্ধাদিকমপেক্ষত ইত্যর্থঃ; তদুক্তং বিষ্ণুধর্ম্মে—'হরির্হরতি পাপানি দুষ্টচিত্তৈরপি স্মৃতঃ। অনিচ্ছয়াপি সংস্পৃষ্টো দহত্যেব হি পাবকঃ ॥' ইতি ॥

২০। তং বিপ্রমমূমুচন্ মোচয়ামাসুঃ ॥

২১। প্রত্যুদিতা নিরাকৃতাঃ সন্তো যাত্বা গত্বা যমরাজায় যথা যথাবৎ কথয়ামাসুঃ ॥

২২। দর্শনেনোৎসবো যস্য ॥

২৩। বিবক্ষুং বক্তুমিচ্ছন্তং জ্ঞাত্বা ॥

২৪—২৫। ত্রৈবেদ্যং বেদত্রয়প্রতিপাদ্যম্, গুণাশ্রয়ং যমদূতানাং ধর্ম্মম্, কৃষ্ণদূতানাঞ্চ ভাগবতং ভগবৎপ্রণীতং শুদ্ধং নির্গুণং ধর্ম্মমাকর্ণ্যেতি যোজ্যম্। ভক্তিমানাসীদিত্যুত্তরস্যানুষঙ্গঃ ॥

২৬—২৯। অনুতাপং প্রপঞ্চয়তি—অহো ইতি চতুর্ভিঃ। (২৬) যেনাত্মনা ময়া বৃষল্যাং পুত্রতয়া জায়মানেন ব্রহ্ম ব্রাহ্মণজাতির্বিপ্লাবিতং নাশিতম্ ॥ (২৭) দুষ্কৃতং দোষকর্ত্তারম্, কুলস্য কজ্জলং কলঙ্কম্ ॥ (২৮) নাস্ত্যন্যো বন্ধুঃ পুত্রাদির্যয়োঃ, তপস্বিনৌ সন্তপ্তৌ; অধুনা তৎক্ষণমেব ॥

৩০—৩৭। ইদানীং তস্য বিমর্শপূর্ব্বকং মোক্ষক্রমমাহ—কিমিদমিত্যষ্টভিঃ। (৩০) সাক্ষাৎ প্রত্যক্ষমিহ জাগ্রতৈব দৃষ্টম্ ॥ (৩১) যে মাং ব্যমোচয়ন্, তে চ ক্ব গতাঃ? (৩২) যদ্যপ্যহমস্মিন্ জন্মনি দুর্ভগঃ

পাপীয়াংস্তথাপি জন্মান্তরে নূনং পুণ্যবানিত্যাহ—বিবুধোত্তমদর্শন ইতি, নিমিত্তসপ্তমী। তেষাং দর্শনার্থং পূর্ব্বেণ মঙ্গলেন মহতা পুণ্যেন ভবিতব্যম্; যেন দর্শনেন ॥ (৩৩) অন্যথা—পূর্ব্বপুণ্যং বিনা। কথম্ভূতং বৈকুণ্ঠনাম? গৃহ্যতে বশীক্রিয়তে চিত্তমনেনেতি গ্রহণম্ ॥ (৩৪) ব্রহ্মঘ্নো বিপ্রস্বনাশকঃ ॥

৩৮। অমিথ্যাভূতেঽর্থে ধীর্যস্য, তথাভূতঃ সন্, দেহাদৌ মমাহমিতি মতিং হিত্বা মনো ধাস্যে ॥

৩৯। মুক্তং সর্ব্বমনুবন্ধনং পুত্রাদিস্নেহো যেন সঃ ॥

৪০। প্রত্যাহৃত ইন্দ্রিয়গ্রামো যেন সঃ ॥

৪১। গুণেভ্যো দেহেন্দ্রিয়াদিভ্যঃ, আত্মানং বিযুজ্য বিশোধ্য, আত্ম-সমাধিনা চিত্তৈকাগ্র্যেণ, ভগবতো ধাম্নি স্বরূপে ॥

৪২। তস্মিন্ ভগবদ্ধাম্ন্যুপারতা নিশ্চলা ধীর্যস্য সঃ, তস্মিন্ কালেঽ-দ্রাক্ষীদিতি বা। পুরঃ পুরতঃ, ততশ্চ প্রাগুপলব্ধানেব তানুপলভ্য প্রত্য-ভিজ্ঞায় ববন্দে ॥

৪৫—৪৬। উপসংহরতি—এবমিতি দ্বাভ্যাম্। (৪৫) বিপ্লাবিতাঃ সর্ব্বে ধর্ম্মা যেন; হতং ব্রতং স্বদারনিয়মাদি যস্য ॥ (৪৬) কর্ম্মনিবন্ধস্য পাপমূলস্য কৃন্তনং ছেদকমতঃ পরং নাস্তি। কস্মাৎ পরম্? তীর্থপদস্যানু-কীর্ত্তনাৎ। ততোঽনুকীর্ত্তনাদন্যথা প্রায়শ্চিত্তান্তরৈ রজস্তমোভ্যাং কলিলং মলিনমেব তিষ্ঠতি; যত্তন্মনঃ কর্ম্মসু পুনর্ন সজ্জতে; তত্র হেতুঃ—যদ্-যতোঽনুকীর্ত্তনাৎ ॥

৪৮। ন চেক্ষিতো ভবতি ॥

৪৯। ম্রিয়মাণোঽবশত্বেন শ্রদ্ধাবিহীনোঽপি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে তু যমেনাপি বৈষ্ণবোৎকর্ষবর্ণনৈঃ।
সান্ত্বয়িত্বা স্বদূতাস্তে বৈষ্ণবে কিঙ্করীকৃতাঃ ॥ (১)

১। বিষ্ণুদূতৈর্নির্ণীতং শাস্ত্রার্থং যমমুখেন দ্রঢ়য়িতুং তৃতীয়াধ্যায়ারম্ভঃ। তত্র যদুক্তম্—'যমরাজ্ঞে যথা সর্ব্বমাচচক্ষুঃ' ইতি ততঃ কিং তত্র বৃত্তমিতি পৃচ্ছতি—নিশম্যেতি। মুরারের্নির্দেশিকৈঃ কিঙ্করৈরেবং বিহতান্, অতএব হৃতা আজ্ঞা যস্য। যস্য বশবর্ত্ত্যয়ং জনঃ, সোঽপি তান্ প্রতি কিমাহ?

২। অত্যাশ্চর্য্যমেতদিত্যাহ—যমস্যেতি। হে ঋষে! যমস্য দণ্ডভঙ্গঃ কুতশ্চন কস্মাচ্চিদপি শ্রুতপূর্ব্বো নাসীৎ। এতদেতস্মিন্নর্থে; যদ্বা, ন শ্রুতপূর্ব্ব এতদ্যমদূতনিরাকরণং চাসীৎ। অতঃ সর্ব্বস্যাপি লোকস্য সংশয়ো বর্ত্ততে, তঞ্চ ত্বত্তোঽন্যো ন ছিনত্তীতি মে বিনিশ্চিতম্, অতঃ কথয়েতি শেষঃ॥

৩। ভগবতঃ পুরুষৈঃ প্রতিহত উদ্যমো যেষাং তে, যাম্যাঃ পুরুষাঃ॥

৪। 'কতি সন্তি' ইত্যাক্ষেপোক্তিঃ। ত্রৈবিধ্যং ত্রিবিধম্, স্বার্থে ষ্যঞ্। যদ্বা, ত্রৈবিধ্যং যথা ভবতি, তথা কর্ম্ম কুর্ব্বতঃ। তথৈব কর্ম্মফলস্যাভিব্যক্তিহেতবঃ কতি সন্তীতি॥

৫। সন্তু বহবঃ, কো বিরোধঃ[১]? তত্রাহুঃ—যদীতি। মৃত্যুর্দুঃখম্, অমৃতং সুখম্, তেষাং শাস্তৄণাং বিপ্রতিপত্তৌ তে উভে কস্য স্যাতাম্? ন কস্যাপি, পরস্পরবিরোধেনোভয়োরপি প্রতিবন্ধাৎ, ঐকমত্যে তু কস্য বা ন স্যাতাম্? একঃ সুখং কর্ত্তুমিচ্ছতি দুঃখঞ্চান্যঃ, ঐকমত্যে তু তয়োঃ পরস্পরকার্য্যানুমোদনেন উভয়োরপি প্রাপ্তেঃ কস্য বা? তে উভে অপি ন স্যাতামিত্যর্থঃ॥

১। বাধঃ (ঘ)।

৬। নন্বু বহূনাং কর্ম্মিণাং ব্যবস্থয়া বহবঃ শাস্তারো ভবন্তু, তথা সতি নায়ং দোষঃ স্যাৎ? তত্রাহুঃ—বহূনাং কর্ম্মিণাং ব্যবস্থয়া শাস্তৃবহুত্বে শাস্তৃত্বং স্যাদ্ঘটেত, কিন্তু যদা যৎ সর্ব্বশাস্তরি মুখ্যং শাস্তৃত্বম্, তদেকদেশ উপচারমাত্রমেব স্যাৎ; যথা চক্রবর্ত্তিন এব মুখ্যং শাস্তৃত্বম্, মণ্ডলবর্ত্তিনা-মুপচারমাত্রম্, নিরঙ্কুশত্বাভাবাৎ॥

৭। যস্মাদেবং শাস্তৃবহুত্বং ন ঘটতে, অতস্ত্বমেক এব শাস্তা শুভাশুভে বিবিনক্তীতি তথা॥

৮। বিপ্রলম্ভিতা বঞ্চিতা লঙ্ঘিতা ইত্যর্থঃ॥

৯। তদেবাহুর্নীয়মানমিতি॥

১০। তে ত্বত্তঃ, যদি নোঽস্মাকং ক্ষমং হিতং মন্যসে; অন্যথা জ্ঞানত-স্তদবজ্ঞানে তবাপ্যনর্থঃ স্যাৎ। অতর্ক্যো হি তেষাং প্রভাবঃ, যতো নারায়ণায়েতি কেবলমভিহিতে মা ভৈষ্ট কুর্ব্বিতি বদন্তঃ শীঘ্রমাগতাঃ॥

১১। প্রজাঃ সংযময়তীতি তথা॥

১২। মত্তোঽন্যো জগতস্তস্থুষশ্চ পরোঽধীশ্বরোঽস্তি। অহন্তু জঙ্গমা-নামেব, তত্রাপি নৃণামেব, তত্রাপি পাপিনামেব তৎকিঙ্করঃ সন্নীশ্বরঃ, স তু সর্ব্বেশ্বরঃ। কোঽসৌ? যত্র যস্মিন্ বিশ্বমোতং প্রোতঞ্চ, ঊর্দ্ধতির্য্যক্তন্তুষু পটবৎ; যস্য ত্বদংশেভ্যো ব্রহ্মবিষ্ণুরুদ্রেভ্যোঽস্য স্থিত্যাদয়ো ভবন্তি; যস্য চ বশে লোকো বর্ত্ততে, নসি নাসিকায়াং প্রোতবলীবর্দ্দবৎ॥

১৩। এতৎ প্রপঞ্চয়তি—ব্রাহ্মণাদিনামভির্ব্বাচি বাগ্রূপায়াং নিজায়াং তন্ত্র্যাং দামন্যাম্, জনান্ যো বধ্নাতি দামভির্গা বলীবর্দ্দানিব। ত ইমে জীবা নামকর্ম্মভির্নিবন্ধৈর্দৃঢ়বন্ধসাধনৈর্বদ্ধা যস্মৈ বলিং বহন্তি, যদধীনাঃ কর্ম্ম কুর্ব্বন্তীত্যর্থঃ॥

১৪—১৫। যস্য চ লীলা দুর্বিভাব্যেত্যাহ—অহমিতি দ্বাভ্যাম্॥ (১৫) ন স্পৃষ্টং রজস্তমশ্চ যৈঃ, ঈহিতমভিপ্রেতং চেষ্টিতং বা ন

বিদুঃ। স্পৃষ্টমায়া মায়য়া স্পৃষ্টাঃ। ততস্তেভ্যোঽন্যে ন বিদুরিতি। কিং পুনর্বক্তব্যম্ ?

১৬। তন্মায়াবিমোহিতত্বান্ন জানন্তীত্যুক্তম্। অবিষয়ত্বাচ্চ তস্যে-ত্যাহ—যমিতি। গোভিরিন্দ্রিয়ৈঃ, হৃদা চিত্তেন ন বিচক্ষতে, ন পশ্যন্তি; 'যদ্বাচা নাভ্যুদিতং যন্মনো ন মনুতে' ইত্যাদি শ্রুতেঃ। আত্মনাং জীবানামা-ত্মানং দ্রষ্টারং যমাকৃতয়ো রূপাণি চক্ষুর্যথা কর্ম্মভূতং ন জানন্তি। ততঃ পরমাকৃতীনাং প্রকাশকম্। ন হি প্রমাতা প্রমাণস্য বিষয় ইতি ভাবঃ। এবম্ভূতঃ পরমেশ্বরো মদন্যোঽস্তীতি পূর্ব্বেণৈব সম্বন্ধঃ॥

১৭—১৮। ভবত্যেবম্ভূতোঽন্যঃ পরমেশ্বরঃ, যে পুনরস্মান্নির্ভর্ৎস্য পাপিনং রক্ষিতবন্তঃ, তে কে ? তানাহ—তস্যেতি দ্বাভ্যাম্। (১৭) তস্যেব রূপং গুণাঃ প্রভাবাদয়ঃ, স্বভাবো ভক্তবাৎসল্যাদির্যেষাং তে॥ (১৮) বিষ্ণোর্ভূতানি ভৃত্যা দুর্দ্দর্শানি দ্রষ্টুমপ্যশক্যানি লিঙ্গানি রূপাণি যেষাং তানি; তদ্ভক্তিমতো বিষ্ণুভক্তান্, পরেভ্যঃ শত্রুভ্যঃ, মত্তঃ সর্ব্বতোঽগ্ন্যাদি-ভ্যশ্চ রক্ষন্তি॥

১৯। নন্বু বিষ্ণুভক্তাশ্চেৎ কথমধর্ম্মপক্ষপাতং কৃতবন্তঃ ? তত্রাহ—ধর্ম্মমিতি। ঋষয়ো ভৃগ্বাদয়ঃ॥

২০। নন্বু কেঽপি চেন্ন জানন্তি, তস্য সত্ত্বে কিং প্রমাণম্ ? তত্রাহ—স্বয়ম্ভূরিতি। কুমারঃ সনৎকুমারঃ, বয়মিত্যাত্মানমেব বহু মন্যমানো নির্দ্দিশতি॥

২১। হে ভটাঃ॥

২২। তমেব ধর্ম্মমাহ—এতাবানিতি॥

২৩। ন চাত্র প্রমাণং বক্তব্যং দৃষ্টত্বাদিত্যাহ—নামোচ্চারণেতি। যেনৈব কেবলেন সকৃদুচ্চারিতেন॥

২৪। ননু সকৃদুচ্চারিতেন নামাভাসেন কথং সর্ব্বপাপক্ষয়ঃ স্যাৎ, শ্রদ্ধাভক্ত্যাবৃত্ত্যাদেরপি বিধানাৎ? তথা হি—'সায়ং প্রাতর্গৃণন্ ভক্ত্যা দুঃখগ্রামাদ্বিমুচ্যতে' ইতি; 'অনুদিনমিদমাদরেণ শৃণ্বন্' ইতি; 'শ্রবণং কীর্ত্তনং ধ্যানং হরেরদ্ভুতকর্ম্মণঃ। জন্মকর্ম্মগুণানাঞ্চ তদর্থেঽখিলচেষ্টিতম্॥' ইত্যাদ্যস্মিন্নেব পুরাণে তত্র তত্র পঠ্যতে। পুরাণান্তরে চ—'পাপক্ষয়শ্চ ভবতি স্মরতাং তমহর্নিশম্' ইতি। অত্রৈব চ—'তস্মাৎ সংকীর্ত্তনং বিষ্ণোর্জগন্মঙ্গলমংহসাম্। মহতামপি কৌরব্য বিদ্ধ্যৈকান্তিকনিষ্কৃতম্॥' ইত্যাদিনা সম্যক্কীর্ত্তনাদেব মুচ্যতে। কিঞ্চ, তথা সতি কিমিতি মন্বাদয়ো দ্বাদশাব্দাদীনি স্মরেয়ুঃ? তস্মাদিদমনুপপন্নমিতি, তত্রাহ—এতাবতেতি। ভগবতো গুণানাং কর্ম্মণাং নাম্নাঞ্চ সম্যক্ কীর্ত্তনমিতি যদেতাবতা পুংসামঘনির্হরণায় পাপক্ষয়মাত্রায়ালমুপযোগো নাস্তি। 'অলং'-শব্দোঽত্র বারণে; যথাহামরসিংহঃ,—'অলং ভূষণপর্য্যাপ্তিশক্তিবারণবাচকম্' ইতি। উপযোগাভাবমেবাহ—অজামিলো মহাপাতক্যপি নারায়ণেতি বিক্রুশ্য, ন তু সম্যক্ কীর্ত্তয়িত্বা, তত্র চ পুত্রং বিক্রুশ্য, ন তু হরিম্; অঘবানশুচিরপি, ম্রিয়মাণোঽস্বস্থ[১] চিত্তোঽপি মুক্তিমবাপ, ন ত্বঘনির্হরণমাত্রম্। অতো নামাভাসেনাপি সর্ব্বপাপক্ষয় ইত্যেব তত্ত্বম্। আবৃত্তিশ্রদ্ধাদিবিষয়স্তু[২] পাপবাসনাক্ষয়ার্থ ইত্যুক্তমেব 'হরেগুর্ণানুবাদঃ খলু সত্ত্বভাবনঃ' ইত্যত্র॥

২৫। যদুক্তং ব্যর্থং তর্হি দ্বাদশাব্দাদি-স্মরণমিতি, তত্রাহ—প্রায়েণেতি। মহাজনো মন্বাদিঃ। অয়ন্ভাবঃ—যথা মৃতসঞ্জীবনৌষধমজানন্তো বৈদ্যা রোগনির্হরণায় ত্রিকটুকনিম্বাদীনি স্মরন্তি, তথা স্বয়ম্ভূশম্ভুপ্রমুখদ্বাদশব্যতিরেকেণায়ং মহাজনোঽতিগুহ্যমিদমজ্ঞাত্বা দ্বাদশাব্দাদিকং স্মরতীতি। কিঞ্চ, মায়য়া দেব্যা অলং বিমোহিতমতিরয়ং জনো মধু মধুরং যথা ভবত্যেবং পুষ্পিতায়াং পুষ্পস্থানীয়ৈরর্থবাদৈর্মনোহরায়াং ত্রয্যাং জড়ী-

১। অস্বস্থ-(ঘ); ২। -বিধয়স্তু (খ)।

কৃতাভিনিবিষ্টা মতির্যস্য, অতএব মহত্যেব কর্ম্মণি অগ্নিষ্টোমাদৌ শ্রদ্ধয়া যুজ্যমানো নাল্পে প্রবর্ত্ততে। দৃশ্যতে হি—প্রাকৃতস্য লোকস্য মহতি মন্ত্রাদৌ শ্রদ্ধা, অল্পে চাশ্রদ্ধা ; তস্মাদস্য গ্রাহকো নাস্তীতি তৈর্নোক্তম্। যদ্বা, স্বাধীনঃ সিংহোঽস্তীত্যেতাবতাশ্বশৃগালাদিবারণায় তং যথা ন প্রযুঞ্জতে, তথাতিতুচ্ছত্বাৎ পাপস্য ন তন্নিরসনায় পরমমঙ্গলং হরের্নাম স্মরন্তি। যদ্বা, নামমাহাত্ম্যজ্ঞানে সর্ব্বমুক্তিপ্রসঙ্গাদিত্যেষা দিক্। গ্রন্থ-বিস্তরভয়াত্তু নাতিপ্রপঞ্চ্যতে॥

২৬। ভাবযোগম্—ভক্তিযোগম্। অমীষাং পাতকং ন স্যাদেব, যদি স্যাদুরুগায়স্য বাদঃ কীর্ত্তনম্॥

২৭। তদেবং ধর্ম্মতত্ত্বং নির্ণীয় ভৃত্যাননুশাস্তি—ত ইতি। যে ভগবন্তং প্রপন্নাস্তে দেবৈঃ সিদ্ধৈশ্চ পরিগীতপবিত্রগাথা বর্ণিতপবিত্রকথাঃ, অতস্তান্নোপসীদত তৎসমীপমপি ন গচ্ছত। বয়ঃ কালোঽপি ন প্রভবতি॥

২৮—২৯। কে তর্হি দণ্ডার্থমানেয়াঃ ? ইত্যত্রাহ—তানিতি দ্বাভ্যাম্। (২৮) অসতো দুষ্টান্, তানেবাহ—মুকুন্দপদারবিন্দয়োর্যো মকরন্দরূপো রসস্তস্মাদ্বিমুখান্। কথম্ভূতাৎ ? নিষ্কিঞ্চনৈরজস্রং জুষ্টাৎ। তেষাং জ্ঞাপক-মাহ—নিরয়বর্ত্মনি স্বধর্ম্মশূন্যে গৃহে বদ্ধা তৃষ্ণা যৈস্তান্॥ (২৯) কিঞ্চ, জিহ্বেত্যাদি। যদ্ যেষাং জিহ্বেত্যাদ্যন্বয়ঃ। ন কৃতং বিষ্ণুকৃত্যং ভগবদ্-ব্রতং যৈঃ। একদাপীতি সর্ব্বত্রান্বয়ঃ॥

৩০। ভগবন্তং ক্ষমাপয়তি—তদিতি। অয়ং ভাবঃ—নঃ স্বপুরুষৈ-রস্মদীয়ত্বেন স্থিতৈঃ স্বীয়ৈরেব পুরুষৈর্যদ্যস্মাদসদন্যায্যং কৃতম্ তত্তস্মাৎ স্বয়মেব ক্ষম্যতাং সহতাম্। স্বানাং স্বীয়ানাং ভক্তানাং নোঽস্মাকং ন বিদুষামজ্ঞানাম্। অহো গরীয়সি তস্মিন্ ক্ষান্তির্যুক্তৈব। মহ ইতি পাঠে স্বীয়ানাং মাহাত্ম্যমবিদুষাং নঃ ক্ষমাং করোত্বিত্যর্থঃ॥

৩১। তস্মাদিত্যাদি শুকোক্তিঃ। জগতোঽপি মঙ্গলরূপম্॥

৩২। ঐকান্তিকত্বমেবাহ—শৃণ্বতামিতি। ব্রতাদিভিস্তথা ন শুধ্যেৎ॥

৩৩। এতদুপপাদয়তি—কৃষ্ণাঙ্ঘ্রিপদ্ময়োর্মধু লেঢ়ি আস্বাদয়তীতি তথা, মধুলেহাত্তুচ্ছত্বেন[১] বিসৃষ্টা যে মায়াগুণা বিষয়াস্তেষু পুনর্ন রমতে। অন্যস্তু তন্মধ্বাস্বাদরহিত অতএব কামাভিহতঃ সন্নাত্মনো রজঃ পাপং প্রমাষ্টুমপি কর্ম্মৈব প্রায়শ্চিত্তরূপমীহেত ; যতঃ কর্ম্মণঃ পুনরপি রজঃ পাপং স্যাদেব, কুঞ্জরশৌচবৎ সত্ত্বশোধকত্বাভাবাৎ॥

৩৪। নৈব বিস্মিতধিয়ো বভূবুঃ, কিন্তু সত্যমুক্তমিত্যেব মেনিরে। ততঃ প্রভৃতি প্রতিশঙ্কমানাঃ 'অস্মানেবৈষ হন্যাৎ' ইতি শঙ্কাং বহন্তস্তং দ্রষ্টুমপি বিভ্যতি স্ম। তে চেতি পাঠে তে বিস্মিতধিয়ো জাতাঃ ; তে চ ততঃ-প্রভৃতি বিভ্যতি স্মেত্যর্থঃ॥

৩৫। কুম্ভসম্ভবোঽগস্ত্যঃ, মলয়ে পর্ব্বতে আসীনোঽব্যগ্রঃ, হরিমর্চ্চয়ন্ পুনঃপুনর্বিশ্বাসার্থং হরেঃ পাদৌ স্পৃশন্নিত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
তৃতীয়োঽধ্যায়ঃ॥ ৩॥

চতুর্থোঽধ্যায়ঃ

চতুর্থাদিত্রিভির্বিশ্বরূপজন্মবিবক্ষয়া।
প্রচেতঃসুতদক্ষস্য বংশস্তাবৎ প্রতন্যতে॥ (১)
চতুর্থে তু প্রজাসৃষ্ট্যৈ দক্ষেণারাধনং হরেঃ।
তপসা হংসগুহ্যাখ্যস্তোত্রেণ চ নিরূপ্যতে॥ (২)
প্রসক্তানুপ্রসক্তেন স্বায়ম্ভুবসুতান্বয়ে।
নামমাহাত্ম্য[২]মাকর্ণ্য বংশব্যাসং বুভুৎসতে[৩]॥ (৩)

১। মধুলিহতাতিতুচ্ছত্বেন (ঘ); ২। নামপ্রভাব- (গ); ৩। বুভুৎসতি (গ)।

১—২। দেবাসুরেতি দ্বাভ্যাম্। (১) সামাসিকঃ সংক্ষিপ্তঃ যঃ প্রোক্তস্তৃতীয়স্কন্ধে॥ (২) ব্যাসং বিস্তারম্, তে ত্বত্তঃ। যয়া শক্ত্যা, যথা সসর্জ্জ, তাং শক্তিম্, তঞ্চ প্রকারং জ্ঞাতুমিচ্ছামি। অনুসর্গমনুবৃত্তং সর্গম্॥

৪। দক্ষাদিরূপেণ সসর্জ্জেতি বক্তুং দক্ষজন্মপ্রকারমাহ—যদেতি। প্রাচীনবর্হিষঃ পুত্ত্রা যদা সমুদ্রমধ্যাতুন্মগ্না নির্গতাস্তদা গাং পৃথ্বীং দ্রুমৈর্বৃতাং দদৃশুঃ। নারদোপদেশতঃ প্রাচীনবর্হিষো নিবৃত্ত্যারাজকে সতি, কৃষ্যাদ্যভাবাৎ॥

৫। তপসা দীপিতো মন্যুর্যেষাং তে। তেষাং দ্রুমাণাং দগ্ধুমিচ্ছয়া॥

৬। তাভ্যাং বায়্বগ্নিভ্যাং দহ্যমানাংস্তান্ দ্রুমান্। বনস্পতীনাং রাজা সোম উবাচ,—মা দ্রুমেভ্য ইতি নবভিঃ॥

৭—১৫। হে মহাভাগাঃ! বিবর্দ্ধয়িষবো বিশেষেণ বর্দ্ধয়িতুমিচ্ছবঃ॥ (৮—১০) প্রজাপতীনাং তদ্ভক্ষ্যভোজ্যদাহোঽনুচিত ইত্যাহ—অহো ইতি ত্রিভিঃ। উর্জ্জং ভক্ষ্যম্, ইষমন্নম্॥ (১১) অত আতিষ্ঠতাশ্রয়ত, সতাং মার্গমুপশমং পিত্রাদিভির্জুষ্টম্॥ (১২) প্রজানাং প্রজাপতিরেব বন্ধুরতস্তজ্জীবিকানাশো ন কর্ত্তব্য ইতি দৃষ্টান্তপঞ্চকেনাহ—তোকানাং বালানাং মাতাপিতরৌ, অজ্ঞানাং জ্ঞানদো বুধ এব সুহৃৎ॥ (১৩) ঈশ্বরাধিষ্ঠানত্বাচ্চ ভূতদ্রোহো ন যুক্ত ইত্যাহ—অন্তর্দ্দেহেষ্বিতি। বো যুষ্মাভিঃ॥ (১৪) আকাশাদ্দেহে সমুৎপতিতমাকস্মিকমিত্যর্থঃ। আত্মবিচারেণ যো নিযচ্ছেৎ॥ (১৫) খিলানাং শেষাণাম্, বো যুষ্মাকঞ্চ শিবমস্তু। বৃক্ষরক্ষণার্থং তদীয়াং কন্যাং দদাতি। বার্ক্ষী বৃক্ষৈঃ পালিতা॥

১৬। আমন্ত্র্য সান্ত্বয়িত্বা, আপ্সরসীমপ্সরসঃ প্রম্লোচায়াঃ সুতাম্॥

১৮। দুহিতৃবৎসল ইতি তস্য কন্যাবংশ এবেত্যুক্তম্। মম মত্তঃ॥

১৯। প্রজাপতির্দক্ষঃ ॥

২০। অবৃংহিতম্—অসংবৃদ্ধম, বিন্ধ্যস্ত পাদান্ সন্নিহিতপর্ব্বতান্ ॥

২২। হংসগুহ্যাখ্যেন স্তোত্রেণ, কস্ত—দক্ষস্ত ॥

২৩। পরায় সর্ব্বোত্তমায় নমো দধে নমস্করোমি। পরত্বে হেতুঃ—অবিতথানুভূতিশ্চিচ্ছক্তির্যস্ত, অতো গুণত্রয়াভাসশ্চ জীবো নিমিত্তঞ্চ মায়া, তয়োর্ব্বন্ধবে নিয়ন্ত্রে। এবমপি গুণেষু তত্ত্ববুদ্ধির্যেষাং তৈর্জীবৈরদৃষ্টং ধাম স্বরূপং যস্ত। তত্র হেতুঃ—নিবৃত্তং মানং যস্মাত্তস্মৈ; নিবৃত্তমানাবধয়ে ইতি পাঠে নিবৃত্তং নিরস্তং মানমবধিশ্চ যস্মাৎ। তর্হি কথং তস্ত সিদ্ধিঃ? তত্রাহ—স্বয়ম্ভুবে স্বপ্রকাশায় ॥

২৪। অদৃষ্টধামত্বং দর্শয়ন্নাহ—নেতি। পুরুষঃ সখা জীবঃ, অস্মিন্ পুরে দেহে বসন্নপ্যত্রৈব সংবসতঃ সখ্যুর্যস্ত সখ্যং করণপ্রবর্ত্তকত্বাদিকং নাবৈতি ন জানাতি তস্মৈ। কুতঃ? ব্যক্তদৃষ্টেঃ প্রপঞ্চদ্রষ্টুঃ, ন হি দ্রষ্টা দৃশ্যো ভবতি। প্রথমান্তপাঠে ব্যক্তে প্রপঞ্চ এব দৃষ্টির্যস্ত সঃ। গুণো বিষয়ো গুণিনো বিষয়িণ ইন্দ্রিয়াদেঃ সখ্যং প্রকাশকত্বং যথা ন বেত্তি, তদ্বৎ ॥

২৫। ননু গুণো জড়ত্বান্ন জানাতি, জীবস্তু চেতনঃ কিমিতি ন জানাতি? তত্রাহ—দেহ ইতি। দেহঃ, অসবঃ প্রাণাঃ, অক্ষাণি ইন্দ্রিয়াণি, মনবোঽন্তঃকরণানি ভূতানি চ, মাত্রাশ্চ তন্মাত্রাণ্যাত্মানং স্বস্বরূপং দৃশ্যমন্যমিন্দ্রিয়বর্গং তয়োঃ পরঞ্চ দেবতাবর্গং ন বিদুঃ, পুমান্ জীবস্তু সর্ব্বমেতত্ত্রয়ং বেদ। গুণাংশ্চ তন্মূলভূতান্ বেদ। তজ্জ্ঞোঽপি সন্ যং সর্ব্বজ্ঞং ন বেদ, তমনন্তমীড়ে স্তৌমি ॥

২৬। অদৃষ্টধামত্বমুক্ত্বা স্বপ্রকাশত্বমাহ—যদা মনস উপরামঃ সমাধিঃ, ন তু সুষুপ্তাবিব লয়ঃ, ন চ জাগ্রৎস্বপ্নয়োরিব বিক্ষেপস্তদাহ—নামরূপে রূপ্যেতে যেন তৎ, তথা তস্ত। উপরামে হেতুঃ—দৃষ্টং দর্শনং স্মৃতিশ্চ তয়োঃ

সম্প্রমোষান্নাশাৎ, তদা যঃ কেবলেন স্বরূপজ্ঞানেন প্রতীয়তে, তস্মৈ হংসায় শুদ্ধায়, শুচি শুদ্ধং চিত্তং[1] সদ্ম প্রতীতিস্থানং যস্য, তস্মৈ নমঃ ॥

২৭—২৮। এবম্ভূতঃ কেষাং প্রতীয়তে ? ইত্যপেক্ষায়ামাহ—মনীষিণ ইতি দ্বাভ্যাম্। বিবেকিনো যং নিষ্কর্ষন্তি বিবিচ্য ধ্যায়ন্তি, স নির্ব্বাণ-সুখানুভূতির্মম প্রসীদতামিতি দ্বয়োরন্বয়ঃ। এবং নিষ্কর্ষতাং প্রতীয়ত ইতি ভাবঃ। (২৭) কিমিতি নিষ্কর্ষন্তি ? স্বশক্তিভির্গূঢ়মপ্রকাশমানম্। কতিভিঃ ? নবভিঃ, পুনশ্চ ত্রিবৃদ্ভিস্ত্রিগুণাভিঃ সপ্তবিংশত্যুপাধিভির্গূঢ়-মষ্টাবিংশং নিষ্কর্ষন্তীত্যর্থঃ ; যদ্বা, নবভিঃ প্রকৃতিপুরুষমহদহঙ্কারপঞ্চতন্মাত্র-রূপাভিঃ, ত্রিবৃদ্ভিস্ত্রিগুণাত্মিকাভিঃ, চকারাৎ ষোড়শবিকাররূপাভিশ্চ। কথম্ভূতং নিষ্কর্ষন্তি ? মনীষয়ান্তর্হৃদি সন্নিবেশিতম্, নিশ্চলীকৃতং পাঞ্চদশ্যম্, পঞ্চদশসামিধেনীমন্ত্রৈঃ প্রকাশ্যমলৌকিকম্, বহ্নিমিবাহঙ্কারাস্পদাদাত্ম-নোঽন্যং যং পরমাত্মানং নিষ্কর্ষন্তীত্যর্থঃ ॥ (২৮) অশেষা বিশেষা যস্যাস্তস্যা মায়ায়া নিষেধেন নির্ব্বাণসুখেঽনুভূতির্যস্য। অপ্রসক্তনিষেধাসম্ভবাৎ প্রসক্তিমাহ—স এব সর্ব্বনামা, স এব বিশ্বরূপ ইতি। তদ্রূপত্বেঽপি বাস্তব-ত্বাভাবান্নিষেধঃ সম্ভবতীত্যাহ—অনিরুক্তা আত্মনি শক্তির্মায়া যস্য সঃ ॥

২৯—৩১। ননু যদি কেবলয়া স্বসংস্থয়া প্রতীয়তে, তর্হি সর্ব্বনামত্বং বিশ্বরূপত্বঞ্চানুপপন্নং বাগাদ্যগোচরত্বাদিত্যাশঙ্ক্য সর্ব্বৈর্নামভির্বাচ্যং প্রত্যক্ষাদি দৃশ্যঞ্চ তস্য স্বরূপং বস্তুতো মা ভূৎ, তথাপি মায়য়া ঘটত ইতি শ্লোক-ত্রয়েণোপপাদয়ন্ নমস্করোতি—যদ্ যদিতি। (২৯) যদ্‌যদ্‌বচসা নিরুক্ত-মভিহিতম্, ধিয়া নিরূপিতং ব্যবসিতম্, অক্ষভির্ব্বা ইন্দ্রিয়ৈর্নিরূপিতং গৃহীতমুতাপি মনসাপি নিরূপিতং সংকল্পিতং যস্য স্বপ্রকাশত্বম্, তস্য তত্তৎ স্বরূপং মা ভূৎ, ন ভবতি। তৎস্বরূপত্বাভাবে হেতুঃ—হি যস্মাৎ, তত্তদ্-

---

১। মনঃ (ঘ)।

গুণানামেব রূপম্; গুণবৃংহিতমিতি পাঠান্তরে গুণৈর্বর্দ্ধিতম্, স তু গুণ-ব্যতিরিক্তঃ; যতো গুণানামপায়বিসর্গাভ্যাং প্রলয়োৎপত্তিভ্যাং লক্ষ্যত ইতি তথা চেতনাধিষ্ঠানং বিনা তয়োরসম্ভবাৎ; যদ্বা, যস্য স্বরূপং মা ভূৎ, ন ভবতি, তস্মৈ নম ইতি তৃতীয়েনান্বয়ঃ॥ (৩০) তদেবং বস্তুতো গুণস্বরূপত্বাভাবমঙ্গী-কৃত্যানিরুক্তাত্মশক্তিরিত্যনেন দ্যোতিতং মায়য়া সর্ব্ববাচ্যত্বেন বিশ্বরূপত্বমাহ —যস্মিন্নধিকরণে, যতোঽপাদানাৎ, যেন করণেন, যস্য সম্বন্ধি, যস্মৈ সম্প্রদানায়, যদীপ্সিততমম্, যঃ কর্ত্তা কুরুতে স্বতন্ত্রঃ, কার্য্যতে চান্যেন প্রযোজ্যকর্ত্রা, তদ্ ব্রহ্মেতি প্রত্যেকং সম্বন্ধঃ। অত্র চ যচ্ছব্দৈঃ সপ্তভিঃ সপ্ত বিভক্ত্যর্থা দর্শিতাঃ; যথেতি চ ক্রিয়াকারকসম্বন্ধপ্রকারবাচিনামব্যয়া-নামর্থাঃ। কুরুতে কার্য্যতে চেতি স্বার্থপরার্থক্রিয়ান্বয়শ্চ সর্ব্বেষাং দর্শিতঃ; 'চ'-শব্দেন ভাবকর্ম্মাদিবিহিতপ্রত্যয়ার্থাঃ সংগৃহীতাঃ, তদ্ব্রহ্মৈবেতি কুতঃ? তত্রাহ—তদ্ধেতুস্তেষাং কারণম্। তৎ কুতঃ? সর্ব্বেভ্যঃ প্রাক্ প্রসিদ্ধম্। ননু ব্রহ্মাদয়স্তদ্ধেতবঃ শ্রূয়ন্তে, অবরে চ দৃশ্যন্তে, তৎ কথং ব্রহ্মৈব তদ্ধেতুঃ? তত্রাহ—পরেষামবরেষাঞ্চ হেতুনাং পরমং কারণম্। ননু সর্ব্বকারণত্বে তস্য কিং নাম সহকারি ভবেত্তদানীমন্যস্যাভাবাৎ? সত্যম্, নিরপেক্ষমেব তৎ কারণমিত্যাহ—অনন্যদ্বিজাতীয়শূন্যম্, একং সজাতীয়শূন্যঞ্চ তস্মৈ নম ইত্যুত্তরেণান্বয়ঃ॥ (৩১) নন্বেবং ব্রহ্ম চেদ্বিশ্বস্য হেতুস্তর্হি ন কদাচিদনীদৃশং জগদিতি বদন্তো মীমাংসকাঃ কুতোঽত্র বিবদন্তে, তৈশ্চান্যে স্বভাববাদিনঃ সংবদন্তে? তে চ তে চ তত্ত্ববিদ্ভির্বোধিতা অপি কুতঃ পুনঃ পুনর্মুহ্যন্তি? তত্রাহ—যস্য মায়াবিদ্যাত্মাঃ শক্তয়ো বিবাদস্য ক্বচিৎ সংবাদস্য চ ভুবঃ স্থানানি ভবন্তি, তস্মৈ নমঃ॥

৩২। ননু কিং তদ্ব্রহ্ম, যস্য শক্তয়ো বিবাদাদিভুবো ভবন্তি? তত্রাহ —অস্তীতি। যোগঃ—উপাসনাশাস্ত্রম্। তত্র হি বিরাড়্রূপেণোপাসনায়াং পাতালপাদাদিকমস্তীত্যুপাস্যত্বেন বিধীয়তে। নাস্তীতি সাংখ্যং জ্ঞানশাস্ত্রম্,

তত্র হ্যপাণিপাদোঽচক্ষুরশ্রোত্রমিতি চ পাদাদি নাস্তীতি নিষিধ্যতে। তয়োর্যোগসাংখ্যয়োর্যৎ কিঞ্চিৎ সমমনুবর্ত্তমানম্, অবেক্ষিতং প্রতীতম্, তদ্‌বৃহদ্‌-ব্রহ্ম বিবাদেঽপ্যবিবাদাস্পদং ব্রহ্মেত্যর্থঃ। বিবাদং স্ফুটয়তি—ভিন্নৌ অস্তি নাস্তীত্যেবম্ভূতৌ বিরুদ্ধৌ ধর্ম্মৌ যয়োস্তয়োর্ভিন্নবিষয়ত্বেঽপি বিরোধো ন স্যাদিত্যেকস্থয়োরিত্যুক্তমেকবিষয়য়োঃ। কুতঃ? বস্তুনিষ্ঠয়োঃ, পাদাদি-বিধিনিষেধয়োরেকবস্তুনিষ্ঠত্বাৎ। সমত্বে হেতুঃ—পরম্; হি যতঃ, বিধি-প্রতিষেধয়োরবিষয়স্তয়োঃ পাদাদিবিষয়ত্বাৎ। তথা তহ্যবিষয়স্য সদ্ভাবে কিং প্রমাণম্? তদাহ—অনুকূলমধিষ্ঠানং বিনা পাদাদিকল্পনাযোগাৎ, অবধিং বিনা তন্নিষেধাযোগাচ্চ তয়োরুপপাদকত্বেন সিদ্ধমিত্যর্থঃ। তস্মৈ নম ইতি পূর্ব্বানুষঙ্গঃ॥

৩৩। ননূদাসীনস্য সমস্য নমস্কারে কো লাভঃ? তত্রাহ—য ইতি। পাদমূলং ভজতামনুগ্রহার্থং প্রাকৃতনামরূপরহিতোঽপি জন্মভিরবতারৈর্বিশুদ্ধোর্জ্জিতসত্ত্বানি রূপাণি কর্ম্মভির্নামানি চ যো ভেজে। তৎ কুতঃ? ভগবানচিন্ত্যৈশ্বর্য্যঃ, স মহ্যং প্রসীদতু॥

৩৪। ননু তাদৃশাঃ সকামা গণেশাদীন্ প্রার্থয়ন্তে, তত্ত্ব তান্ বিহায় কিমিতি ভগবন্তমেব প্রার্থয়সে? তত্রাহ—প্রাকৃতৈরর্ব্বাচীনৈর্জ্ঞানপথৈ-রুপাসনামার্গৈর্যথাশয়ং তত্তদ্বাসনানুসারেণ যো দেহগতোঽন্তর্যামী তত্ত-দ্দেবতারূপেণ বিবিধো ভাতি; যথা—বায়ুঃ পার্থিবং গুণং পঙ্কজাদি[১]গন্ধ-ভেদমাশ্রিত্য নানাগন্ধবান্ বিভাতি, রেণোর্গুণং ধূসরত্বাদিকমাশ্রিত্য, নানা-রূপবান্ প্রতীয়তে, তদ্বৎ, তস্যৈব তত্তদ্দেবতারূপেণ বিশেষফলদাতৃত্বাৎ। স ঈশ্বর এব মম মনোরথং সত্যং করোতু, কিমন্তর্গতবহুভির্দেবতান্তরৈ-রিত্যর্থঃ। তদুক্তং গীতাসু,—'যো যো যাং যাং তনুং ভক্তঃ শ্রদ্ধয়ার্চ্চিতু মিচ্ছতি। তস্য তস্যাচলাং শ্রদ্ধাং তামেব বিদধাম্যহম্॥ স তয়া শ্রদ্ধয়া যুক্ত-

১। চম্পকাদি- (ঘ)।

স্তস্যারাধনমীহতে। লভতে চ ততঃ কামান্ ময়ৈব বিহিতান্ হি তান্॥' ইতি; 'যে যথা মাং প্রপদ্যন্তে তাংস্তথৈব ভজাম্যহম্' ইতি চ॥

৩৫। সংস্তুবতো দক্ষস্য স ভগবান্ প্রত্যক্ষোঽভূৎ॥

৩৬—৩৯। তং বর্ণয়তি সার্দ্ধৈশ্চতুর্ভিঃ। (৩৬) সুপর্ণস্যাংসে স্কন্ধে কৃতৌ পাদৌ যেন, প্রলম্বা আজানুলম্বিতা অষ্টৌ মহান্তো ভুজা যস্য, চক্রাদ্যষ্টায়ুধধরঃ॥ (৩৭) প্রসন্নং বদনমীক্ষণে চ যস্য, বনমালয়া নিবীতং কণ্ঠাদিপাদান্তং ব্যাপ্তমঙ্গং যস্য, লসন্তৌ শ্রীবৎসকৌস্তুভৌ যস্য॥ (৩৮) মহান্তি কিরীটকটকানি যস্য, স্ফুরতী মকরকুণ্ডলে যস্য, কাঞ্চ্যাদিভির্বিভূষিতঃ। বলয়মত্র পাদভূষণং দ্রষ্টব্যম্, কটকস্যোক্তত্বাৎ॥ (৩৯) ত্রৈলোক্যমোহনং শ্রীপুরুষোত্তমাখ্যম্; সুরযূথপৈর্লোকপালৈঃ॥

৪১। আপূরিতানি মনোদ্বারাণীন্দ্রিয়াণি তৈঃ; যথা হ্রদিন্যো নদ্যো নির্ঝরৈরাপূর্য্যন্তে, তথা মহানন্দাপূর্ণত্বেনাবৃত্তিকত্বাদ্ বাগাদীনাং ন কিঞ্চিদ্‌বক্তুং শক্তোঽভূদিত্যর্থঃ॥

৪২। যদ্যপ্যসৌ নাবোচৎ, তথাপি চিত্তজ্ঞ ইদং বক্ষ্যমাণমাহ॥

৪৩। ভাবং ভক্তিং গতঃ প্রাপ্তঃ॥

৪৪। যদ্‌যতন্তে তপোঽস্য বিশ্বস্যোদ্‌বৃংহণং বৃদ্ধিকরমতস্তেঽহং প্রীতঃ। মত্তপসে লোকসমৃদ্ধ্যর্থত্বে ত্বৎপ্রীতেঃ কিং কারণম্? তত্রাহ—মমেতি। ভূতানাং বিভূতয়ঃ সমৃদ্ধয়ো ভূয়াসুরিতি যদেষ এব মম কামঃ, অতো মৎকামপূরণাদেবাহং প্রীতোঽস্মীত্যর্থঃ॥

৪৫। ভূতিবিস্তারপ্রযত্নশ্চ তবোচিত এবেত্যাহ—ব্রহ্মেতি। ভবন্তঃ প্রজাপতয়ো ভূতেরুদ্ভবস্য হেতবঃ॥

৪৬। বিশ্বপ্রবৃদ্ধ্যর্থেন ত্বত্তপসাহং প্রীত ইত্যুক্তম্, তদেব তপঃ স্তুবন্ প্রসঙ্গাদন্যান্যপি লোকবৃদ্ধিকরাণি বিদ্যাদীনি স্তৌতি—তপো যমনিয়মাদিসহিতং ধ্যানং মে হৃদয়ম্, বিদ্যা সাঙ্গমন্ত্রজপঃ, সা ধ্যানং তনোতীতি তনু-

র্দ্দেহঃ ; ক্রিয়া ধ্যানাদিবিষয়ঃ, পুংব্যাপারো 'ভাবনা'-শব্দবাচ্যঃ। তেন হি ধ্যানাদিকমাক্রিয়তে ইত্যাকৃতিঃ। জাতাঃ সুনিষ্পন্নাঃ, ক্রতবোঽঙ্গানি 'শিরো বা এতদ্ যৎ প্রবর্গ্যো গ্রীবা উপসদশ্চক্ষুষী আজ্যভাগৌ' ইত্যাদি-শ্রুতেঃ ; ধর্ম্মঃ ক্রত্বাত্মপূর্ব্বম্, আত্মা মনো হৃদয়াশ্রয়ত্বাৎ ; সুরা যজ্ঞভুজস্ত এবাসবঃ প্রাণাঃ, সন্তর্পণীয়ত্বাৎ ॥

৪৭—৫০। তপসঃ সন্তানবৃদ্ধিহেতুত্বং দর্শয়িতুং দ্বিতীয়তৃতীয়োক্ত-মিতিহাসমাহ চতুর্ভিঃ ॥ (৪৭) অহমেবেতি বস্ত্বন্তরব্যাবৃত্তিঃ, আসমে-বেতি ক্রিয়ান্তরব্যাবৃত্তিঃ, আন্তরং গ্রাহকং বহির্গ্রাহ্যম্, সংজ্ঞানমাত্রং চৈতন্য-মাত্রম্। অব্যক্তমিন্দ্রিয়বৃত্তিভিরনভিব্যক্তম্, অতএব প্রসুপ্তমিব, বিশ্বতঃ সর্ব্বত্র ॥ (৪৮) গুণতো মায়াতঃ, গুণময়ো বিগ্রহো ব্রহ্মাণ্ডম্। তত-স্তদৈব অজোঽযোনিজঃ ॥ (৪৯) খিলমসমর্থমিব ॥ (৫০) মে ময়া তপ তপেত্যভিহিতঃ সন্ ; যেন তপসা ॥

৫১। সন্ততিবৃদ্ধিকরোপায়মাহ—এষেতি। অঙ্গ! হে দক্ষ! পঞ্চ-জনাখ্যস্য প্রজাপতেঃ ॥

৫২। মিথুনস্য স্ত্রীপুংসয়োর্ব্যবায়ো রতিঃ, স এব ধর্ম্মো যস্য স ত্বম্। তথাভূতায়াং তস্যাম্ ॥

৫৩। মায়য়া নিমিত্তভূতয়া স্ত্রিয়া সহ মিথুনীভূয় ভবিষ্যন্তি, পুত্রাদি-রূপেণোৎপৎস্যন্তে ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

চতুর্থোঽধ্যায়ঃ ॥ ৪ ॥

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে নারদেনাথ বাচঃ কূটৈস্তু নাশিতান্।
সুতানাকর্ণ্য দক্ষোঽমুং শশাপেতি নিরূপ্যতে॥ (১)

২—৩। অপৃথগ্ধর্ম্মশীলা একাচারস্বভাবাঃ, তত্র প্রতীচ্যাং দিশি, সিন্ধোর্নদ্যাঃ সমুদ্রস্য চ, যত্র সঙ্গমস্তত্র তন্নারায়ণসরো নাম তীর্থং প্রযযুরিত্যন্বয়ঃ। সুমহৎ—অতিবিস্তীর্ণম্॥

৪। বিনির্ধূতো মলো রাগাদির্যস্মাৎ, স আশয়ো যেষাম্॥

৫। তান্ শুদ্ধসত্ত্বানপি, পিত্রাদেশেন[১] প্রজাবিবৃদ্ধয়ে যত্তানুদযুক্তান্ দদর্শ॥

৬—৯। অহো কষ্টং মোক্ষমার্গাধিকারিণঃ সন্তঃ, এতে প্রবৃত্তিনিষ্ঠৈঃ কর্ম্মভির্নশ্যেরন্নিতি কৃপয়া তান্ স্নিগ্ধার্থৈ[২]র্ব্বাক্যৈরুপদিশতি স্ম, তদাহ—উবাচ চেতি চতুর্ভিঃ। (৬) পালকাঃ সন্তোঽপি বালিশা অজ্ঞা যূয়ং কথং প্রজাঃ স্রক্ষ্যথ? বতেতি খেদে[৩]। বালকা ইতি পাঠে বালিশত্বে হেতুঃ॥ (৭) এক এব পুরুষো যস্মিংস্তদ্রাষ্ট্রমদৃষ্টৈত্যনুষঙ্গঃ। বিলং চেত্যাদি-দ্বিতীয়ান্তানবিজ্ঞায় কথং সর্গং করিষ্যথেতি তৃতীয়েনান্বয়ঃ॥ (৮) পঞ্চ-পঞ্চানাং পঞ্চবিংশতেরদ্ভুতং গৃহম্, ক্ষৌরপব্যং ক্ষুরৈঃ পবিভির্বজ্রৈশ্চ নির্ম্মিতমিবাতিতীক্ষ্ণং দৃঢ়ঞ্চেত্যর্থঃ; স্বয়ং স্বতন্ত্রম্, ভ্রমি ভ্রমণস্বভাবম্॥ (৯) বিপশ্চিতঃ সর্ব্বজ্ঞস্য, স্বপিতুরাদেশমাত্মনোঽনুরূপমবিদ্বাংসোঽজানন্তঃ পূর্ব্বোক্তঞ্চৈকপুরুষং রাষ্ট্রমিত্যাদ্যবিজ্ঞায়, অহো কথং সর্গং করিষ্যথেত্যন্বয়ঃ॥

১০। বাচঃ কূটং পরোক্ষবাদেনার্থান্তরমিব প্রতীয়মানং বচনম্, ঔৎ-পত্তিকী সহজা মনীষা বিচারশক্তির্যস্যাস্তয়া ধিয়া, স্বয়মেব বিমমৃশু-র্বিচারিতবন্তঃ॥

১। পিত্রাদেশ-জাড্যেন (ঘ); ২। নিগূঢ়ার্থৈ- (ঘ); ৩। নির্ব্বেদে (গ)।

১১—২০। নারদোক্তদশবাক্যানাং তৈর্বিমৃশ্য নির্ণীতানর্থানাহ দশভিঃ। (১১) অদৃষ্টান্তং ভুব ইত্যত্র 'ভূ'-শব্দার্থমাহ—ভূরিতি। ক্ষেত্রম্, তচ্চাত্র জীবসংজ্ঞং লিঙ্গশরীরম্, যন্নিজবন্ধনমাত্মনো বন্ধকারণম্। 'অন্ত'-শব্দার্থমাহ —নির্ব্বাণং নাশম্, অসদ্ভির্মোক্ষানুপযোগিভিঃ কর্ম্মভিঃ কিং ভবেৎ? ন কিমপি॥ (১২) একপুরুষমিত্যস্যার্থমাহ—এক এবেতি। তুর্য্যঃ সর্ব্বসাক্ষী; স্বাশ্রয়ঃ স্বাধারঃ; অভবং নিত্যমুক্তম্, অসদ্ভিরীশ্বরাসমর্পিতৈঃ কর্ম্মভিঃ॥ (১৩) বিলং চাদৃষ্টনির্গমমিত্যস্যার্থমাহ—পুমান্ যদ্গত্বা প্রাপ্য বিলসর্গং পাতালং গত ইব নৈবৈতি নাবর্ত্ততে; তৎ প্রত্যগ্ধাম জ্যোতীরূপং ব্রহ্ম, অবিদোঽবিদুষঃ, অসদ্ভির্নশ্বরস্বর্গাদিসাধনৈঃ কর্ম্মভিঃ॥ (১৪) বহুরূপাং স্ত্রিয়মিত্যস্যার্থমাহ—নানারূপেতি। স্বৈরিণীব পুংশ্চলীব বিমোহকৈ রজ-আদিগুণৈরন্বিতা, তন্নিষ্ঠাং তস্যা অবসানং বিবেকমগতস্যাপ্রাপ্তস্য। অসদ্ভি-রশান্তৈঃ॥ (১৫) পুমাংসং পুংশ্চলীপতিমিত্যস্যার্থমাহ—তস্যাঃ সঙ্গেন ভ্রংশিতমৈশ্বর্য্যং স্বাতন্ত্র্যং যস্য। কুৎসিতা ভার্য্যা যস্য তদ্বৎ। তস্যা গতীঃ সুখদুঃখলক্ষণাঃ, সংসরন্তং গচ্ছন্তং জীবমবুধস্যাজানতঃ, অসদ্ভির্বুদ্ধ্যবিবেক-প্রাপ্তৈঃ॥ (১৬) নদীমুভয়তো বাহামিত্যস্যার্থমাহ—সৃষ্ট্যপ্যয়ৌ করোতী-ত্যুভয়তঃ প্রবাহো দর্শিতঃ, বেলাকূলং প্রবাহপতিতানাং নির্গমস্থানং তপো-বিদ্যাদি, তস্যান্তে সমীপে, বেগিতাং নির্গমপ্রতিবন্ধায় ক্রোধাহঙ্কারাদিভিঃ কৃতবেগাম্; মত্তস্য তদ্বেগেন বিবশস্য; অতএব তাং তথাভূতামবিজ্ঞস্যা-বিচারয়তঃ; অসদ্ভির্মায়িকৈঃ; যদ্বা, বেলাকূলং সমুদ্রস্য ব্যবহারস্থানম্, তস্য সমীপে সমুদ্রবৃদ্ধিহ্রাসাভ্যাং যথোভয়তোঽন্তর্ব্বহিঃ কৃতবেগা নদী ভবতি; এবং সমুদ্রতুল্যস্যাত্মনো ব্যবহারস্থানে দেহে জন্মমরণাদিভিঃ কৃতবেগা-মিত্যর্থঃ। বেগিনীমিতি পাঠে বেগবতীম্॥ (১৭) পঞ্চপঞ্চেত্যস্যার্থমাহ —পঞ্চবিংশতিতত্ত্বানাং পুরুষোঽন্তর্যামী, অদ্ভুতদর্পণ আশ্চর্য্যভূত আশ্রয়ঃ, অধ্যাত্মং কার্য্যকারণসংঘাতাধিষ্ঠাতারং তমবুধস্য। অসদ্ভির্মিথ্যাস্বাতন্ত্র্যকৃতৈঃ॥

(১৮) ক্বচিদ্ধংসমিত্যস্যার্থমাহ—ঐশ্বরমীশ্বরপ্রতিপাদকম্। বিবিক্তং পদং চিজ্জড়রূপং বস্তু যেনেতি হংসপদং ব্যাখ্যাতম্। বন্ধমোক্ষাবনুদর্শয়তীতি তথা, অনেন চিত্রাঃ কথা যস্যেতি ব্যাখ্যাতম্, তদুৎসৃজ্যানভ্যস্যাজ্জায়াবিদুষোহসদ্ভির্বহির্মুখৈঃ॥ (১৯) ক্ষৌরপব্যমিত্যস্যার্থমাহ—কালচক্রমিতি। ভ্রমি ভ্রমণাত্মকম্, তীক্ষ্ণমিতি নিষ্কর্ষয়দিতি চ ক্ষৌরপব্যপদং ব্যাখ্যাতম্। তদবুধস্য, অতএব ফলস্য নিত্যত্ববুদ্ধ্যা কাম্যকর্ম্মানুষ্ঠানে বৈগুণ্যবাহুল্যাদসদ্ভিঃ॥ (২০) স্বপিতুরাদেশমিত্যস্যার্থমাহ—শাস্ত্রস্য স্বপিতুর্দ্বিতীয়জন্মহেতোঃ, তদনুরূপায় নিবৃত্ত্যনুরূপায়, নিবর্ত্তকমাদেশং যো ন বেদ, স কথং গুণবিস্রম্ভী গুণময়প্রবৃত্তিমার্গবিশ্বাসবান্ সন্নুপক্রমেৎ সৃষ্ট্যাদৌ প্রবর্ত্তেত ? 'ক্ষেত্রেশ[১]ব্রহ্মবুদ্ধীনাং জীবমায়ান্তরাত্মনাম্। শাস্ত্রকালোপদেশানামজ্ঞানে কিমু কর্ম্মভিঃ ?' ইতি বাচঃ কূটসংগ্রহশ্লোকঃ॥

২১। ইতি ব্যবসিতা এবং নিশ্চিতবন্তঃ, একচেতস ঐকমত্যযুক্তাস্তং নারদং প্রদক্ষিণীকৃত্যাপুনরাবৃত্তিমার্গং প্রযযুঃ॥

২২। নির্ভাতঃ সাক্ষাৎকৃতো যো হৃষীকেশস্তস্য পদাম্বুজেহনুচরদন্বচরদিত্যর্থঃ॥

২৩। নাশমদর্শনং স্বধর্ম্মভ্রংশং বা, শীলেন শালন্তে শোভন্ত ইতি তথা তেষাম্। কো দক্ষঃ; সুপ্রজস্ত্বং সৎপুত্রবত্ত্বম্, শুচাং পদং শোকানাং স্থানম্॥

২৪। অজেন ব্রহ্মণা, সহস্রিণঃ সহস্রসংখ্যান্॥

২৬। পরমং ব্রহ্ম প্রণবম্, বক্ষ্যমাণমন্ত্রং বা॥

২৭। ইড়স্পতিং বাচাং মন্ত্রাণাং পতিং বিষ্ণুমারাধয়ামাসুঃ॥

২৮। বিশুদ্ধসত্ত্বাশ্রয়ায় পরমহংসায় নমো ধীমহি॥

---

১ মোক্ষেশ- (ঘ)।

২৯। প্রজাসর্গে ধীর্যেষাং তান্, বাচঃ কূটান্তদৃষ্টান্তং ভুব ইত্যাদীনি পূর্ব্বোক্তানি প্রাহ ॥

৩০। হে দাক্ষায়ণাঃ! সংশৃণুতেত্যাদি পুনরন্যদপি প্রাহ—নিগমমুপদেশম্. অন্বিচ্ছতাবলোকয়ত ॥

৩১। প্রায়ণং প্রকৃষ্টং গমনম্। পুণ্যমেব বন্ধুর্যস্য, মরুদ্ভির্ভ্রাতৃবৎসলৈর্দ্দৈবৈঃ ॥

৩২। অমোঘং দর্শনং যস্য। হে মারিষ! আর্য্য ॥

৩৩। সধ্রীচীনং সমীচীনম্, প্রতীচীনং প্রত্যগ্বৃত্তিলভ্যম্, অনুপথমনুগুণং পন্থানম্। পশ্চিমা যামিনীর্গতা রাত্রয় ইব ॥

৩৫। পুত্রাণাং পারমহংস্যনিষ্ঠামুপশ্রুত্য দক্ষোঽপি প্রায়শো বিরক্তঃ স্যাদিতি তদনুগ্রহার্থং দেবর্ষিস্তৎপার্শ্বং গতস্তদা তমুপলভ্য দক্ষ আহ ॥

৩৬। সাধোরিব লিঙ্গং বেশো যস্য তেন ত্বয়া নোঽস্মদীয়ানামর্ভকাণাম্, অসাধ্বকারি কৃতম্, তদেবাহ—সাধূনাং স্বধর্ম্মে প্রবৃত্তানাং ভিক্ষোর্যো মার্গঃ, স প্রদর্শিতঃ ॥

৩৭। ননু সন্ন্যাসিমার্গঃ সাধুরেব, মোক্ষহেতুত্বাৎ? সত্যম্, ঋণত্রয়াপাকরণং বিনা তু মহাননর্থ এবেত্যাহ—ঋণৈরিতি; 'জায়মানো হ বৈ ব্রাহ্মণস্ত্রিভির্ঋণবান্ জায়তে ব্রহ্মচর্য্যেণ ঋষিভ্যো যজ্ঞেন দেবেভ্যঃ, প্রজয়া পিতৃভ্যঃ, এষ বা অনৃণো যঃ পুত্রী যজ্ঞকৃদ্ ব্রহ্মচারী বাসীৎ' ইত্যাদিশ্রুতেঃ। ঋণৈরমুক্তানাম্, ন মীমাংসিতানি ন বিচারিতানি কর্ম্মাণি যৈস্তেষাং তাবদ্ঋণবিমোক্ষো নাস্তি, তদুভয়কাল[1]ভাবিত্বাচ্চ পুত্রোৎপাদনযজ্ঞানুষ্ঠানয়োরভাবেন পিতৃদেবর্ষিঋণাদ্ বিমুক্তিশ্চ নাস্তি। অতো হে পাপ, বিষয়ভোগত্যাগাদিহ লোকে শ্রেয়সো বিঘাতঃ কৃতঃ; মোক্ষানধিকারিত্বাচ্চ

১। তদুত্তরকাল- (ঘ)।

পরলোকেঽপি শ্রেয়সো বিঘাতঃ কৃত ইত্যর্থঃ। তথা চ মনুঃ—'ঋণানি ত্রীণ্যপাকৃত্য মনো মোক্ষে নিবেশয়েৎ। অনপাকৃত্য মোক্ষন্তু সেবমানো ব্রজত্যধঃ ॥' ইতি ॥

৩৮। বালানাং মতিং পুত্রাদিবিষয়াং ভিনত্তীতি তথা, এবং নিরনু-ক্রোশো নির্ঘৃণো হরের্যশোনাশকঃ সন্ তৎপার্ষদানাং মধ্যে কথং চরসি ?

৩৯। নির্লজ্জত্বমেবাহ—নন্বিতি। ননু ত্বামৃতে ভাগবতাঃ সর্ব্বে ভূতানুগ্রহপরবশাঃ, ত্বন্তু ভূতবিপ্রিয়ং কুর্ব্বন্ কথং ন লজ্জস ইতি ভাবঃ ॥

৪০। ননু বৈরাগ্যাদুপশমঃ, উপশমাচ্চ স্নেহ[১]পাশচ্ছেদনং ভবতি ; ন চ বিরক্তস্য ঋণত্রয়াপাকরণমাবশ্যকম্, 'যদহরেব বিরজেত্তদহরেব প্রব্রজেৎ, যদি চেতরথা ব্রহ্মচর্য্যাদেব প্রব্রজেৎ' ইত্যাদিশ্রুতেঃ। অতো বৈরাগ্যোপদেশেন তেষাং ময়ানুগ্রহ এব কৃত ইতি চেৎ, তত্রাহ—নেতি। যদ্যপি ত্বমেবং মন্যসে, তথাপি মৃষা কেবলিনা জ্ঞানং বিনাপ্যেবম্ভূতবেশেন[২] ত্বয়েত্থং মতিচালনে কৃতেঽপি পুংসাং বিরাগো নৈব স্যাৎ ; ন চ বিরাগং বিনোপশমম্, ন চ তেন বিনা স্নেহপাশনিকৃন্তনমিত্যর্থঃ ॥

৪১। ইত্থং বিরাগো ন স্যাদিত্যত্র হেতুমাহ—নানুভূয়[৩] বিষয়াণাং তীক্ষ্ণতাং দুঃখহেতুত্বং ন জানাতি, তস্মাদ্বিষয়ানুভবেন তীক্ষ্ণত্বজ্ঞানাৎ ॥

৪২। অতস্ত্বয়াস্মাকমপ্রিয়মেব কৃতম্, তথাপি বয়ং ন কুর্ম্ম ইত্যাহ—যদিতি। কর্ম্মসন্ধানাং কর্ম্মমর্য্যাদানাম্ ; কর্ত্তুমন্ধানামিতি পাঠে বিপ্রিয়ং কর্ত্তুমজানতামিত্যর্থঃ। দুঃসহং যত্ত্বং কৃতবানসি, তন্মর্ষিতং সোঢ়ম্ ॥

৪৩। তথাপি তবাভদ্রং ভবিষ্যত্যেবেত্যাহ—তন্তুকৃন্তন ! সন্তান-চ্ছেদক ! যদ্যস্মাদভদ্রং পুত্রাণাং স্থানভ্রংশমচরস্তস্মাত্তব লোকেষু ভ্রমতঃ পদং স্থানং ন ভবেদিতি মৃদুচ্ছলেন শাপঃ ॥

১। ভূতস্নেহ- (ঘ) ; ২। বিনাবধূতবেষেণ (ঘ) ; ৩। নানুভূয়ানুভূয় (ঘ)।

৪৪। বাঢ়ং তথেতি স্বীকৃতবান্। ঈশ্বরোঽপি প্রতিশপ্তুং সমর্থোঽপি তিতিক্ষেত সহেতেতি ; যদেতাবানেব ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
পঞ্চমোঽধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠে দক্ষেণ স্পষ্টায়াং কন্যাষষ্ট্যাং প্রকীর্ত্তিতাঃ।
পৃথগ্বংশা যতো জাতো বিশ্বরূপো দিতেঃ সুতাৎ ॥ (১)

১। নারদাৎ পুত্রাণাং নাশমাশঙ্কমানো দুহিতৃর্জনয়ামাস ॥

২। কায় কশ্যপায় দ্বিষড়্ দ্বিগুণাঃ ষট্ দ্বাদশ যাসু তাস্ত্রয়োদশ ইত্যর্থঃ। ইন্দবে সোমায় ত্রিনব সপ্তবিংশতিম্, তার্ক্ষায় নামান্তরং প্রাপ্তায় কশ্যপায়ৈব, অপরা অবশিষ্টাশ্চতস্রঃ ॥

৩। সাপত্যানামপত্যসহিতানাম্ ; মে মত্তঃ, শৃণু। প্রসূতি-প্রসবৈঃ পুত্রপৌত্রাদিভিঃ ॥

৫। ততো দেবর্ষভাৎ ॥

৬। যতঃ কীকটাদ্ভুবো, দুর্গাণি দুর্গাভিমানিনো দেবাঃ, যামেয়ঃ যাম্যাঃ পুত্রঃ স্বর্গঃ, ততঃ স্বর্গান্নন্দিঃ পুত্রোঽভবৎ ॥

৭। তৎসুতঃ—সাধ্যানাং সুতঃ ॥

১০। বসোর্বংশস্য, ভূয়স্ত্বাদন্তে নির্দ্দেশঃ ; মে—মত্তঃ ॥

১১। অভিমতির্নাম পত্নী, তস্যা হর্ষাদয়ঃ পুত্রাঃ ॥

১২। সহশ্চায়ুশ্চ পুরোজবশ্চ পুত্রাঃ। পুরঃ—পুরাণি ॥

১৪। স্কন্দশ্চ কৃত্তিকাসুতোঽগ্নেঃ পুত্রঃ ষাণ্মাতুর ইতি, অগ্নিভূরিতি চ প্রসিদ্ধেঃ। ততঃ—স্কন্দাৎ ॥

১৫। (আ)কৃতীপতিঃ শিল্পাচার্য্যঃ, ততো বিশ্বকর্ম্মণশ্চাক্ষুষো মনু-রাসীৎ ॥

১৬। বিভাবসোরুষা নাম ভার্য্যা ; অথাতপাৎ পঞ্চযামো দিবসো জাতঃ ; অতএব রাত্রিস্ত্রিযামা, প্রদোষপ্রত্যুষয়োর্দিবসাবয়বত্বাৎ ॥

১৭। ভূতস্থ দ্বে ভার্য্যে, তয়োর্বংশমাহ—সরূপেতি ॥

১৮। মহানিত্যেবমেকাদশরূপস্থ রুদ্রস্থ পার্ষদাঃ প্রেতাদয়ঃ, অন্যেঽন্যস্যাং জাতাঃ ॥

১৯। অঙ্গিরসঃ স্বধা সতী চেতি দ্বে ভার্য্যে, তয়োর্ব্বংশমাহ—প্রজা-পতেরিতি। স্বধা নাম পত্নী পিতৄন্ পুত্রত্বেঽকরোৎ ; অথ সতী চাথর্ব্বাঙ্গিরসং নাম বেদম্ ॥

২০। কৃশাশ্বস্থার্চ্চির্দিষণা চেতি দ্বে ভার্য্যে ; তয়োর্বংশমাহ—কৃশাশ্ব ইতি ॥

২২। সুপর্ণা—বিনতা ; অনূরুম্—অরুণম্ ॥

২৩। রোহিণ্যামেব প্রেমাতিশয়েনান্যাসামুপেক্ষণাৎ কুপিতস্থ দক্ষস্থ শাপাদ্যক্ষ্মগ্রহার্দ্দিতঃ ক্ষয়রোগপীড়িতঃ সন্ তাস্বনপত্যোঽভূৎ॥

২৪। তং দক্ষং প্রসাদ্য কেবলং কলা এব লেভে, ন ত্বপত্যানি। কথম্ভূতাঃ ? ক্ষয়ে কৃষ্ণপক্ষে দিতাঃ খণ্ডিতাঃ সতীঃ। ক্ষয়ৈধিতা ইতি পাঠে ক্ষয়ে সতি পুনরেধিতাস্তেনৈব বর্দ্ধিতাঃ সতীঃ ॥

২৬। অল্পত্বেন সুগমত্বাদ্যথাযথং ব্যুৎক্রমেণ তাসাং বংশানাহ—তিমেরিত্যাদিনা ॥

২৮। সৌরসাঃ সুরসায়াঃ পুত্রাঃ ॥

২৯। প্রাধানিকান্ মুখ্যানষ্টাদশ শৃণু ॥

৩৩। বৈশ্বানরো দনোঃ পুত্রস্তস্য সুতাঃ ॥

৩৪। কঃ প্রজাপতিঃ কশ্যপ উপযেম ইত্যন্বয়ঃ ॥

৩৫। দানবীপরিণয়ে হেতুঃ—ব্রহ্মণা চোদিত ইতি ॥

৩৬। তয়োঃ ষষ্টিসহস্রাণি নিবাতকবচাঃ পুত্রা জাতাঃ, তাংশ্চ স্বর্গং গতঃ সন্ তে পিতামহোঽর্জ্জুনঃ জঘান ॥

৩৭। রাহুর্জ্যেষ্ঠো যস্য ॥

৪০। অসূয়ত—অজনয়ৎ ; ভুবি বর্ত্তমানা ॥

৪১। ততঃ —বিবস্বতঃ ॥

৪২। চর্ষণয়ঃ কৃতাকৃতজ্ঞানবন্তঃ পশ্যন্তি, কর্ম্মত্বেন নির্ঘণ্টাদাবুক্তেঃ। যত্র যেষ্বাত্মানুসন্ধানবিশেষেণ মানুষী জাতিশ্চোপকল্পিতা ; তথা চ শ্রুতিঃ—'পুরুষত্বে চাবিস্তরামাত্মা' ইতি ॥

৪৩। কুপিতং হরিমিতি শেষঃ। বিবৃতদ্বিজঃ প্রকটিতদন্তঃ সন্ ॥

৪৫। যদ্‌যদা বিমতেনাবজ্ঞাতেন বৃহস্পতিনা পরিত্যক্তাস্তদা দ্বিষতাং শক্রূণাং ভাগিনেয়মপি বিশ্বরূপং পৌরোহিত্যে বৃতবন্তঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
ষষ্ঠোঽধ্যায়ঃ ॥ ৬ ॥

সপ্তমোঽধ্যায়ঃ

সপ্তমে বিশ্বরূপোঽসৌ পৌরোহিত্যে বৃতঃ সুরৈঃ।
গুরুণা সংপরিত্যক্তৈঃ পৌরোহিত্যমথাকরোৎ ॥ (১)

১। কস্য হেতোঃ কস্মাদ্ধেতোরাত্মনঃ শিষ্যাঃ সুরাঃ পরিত্যক্তাঃ ? অক্রমমপরাধম্ ॥

২—৯। স ইন্দ্রো যদা সংপ্রাপ্তং বাচস্পতিং নাভ্যনন্দত নাদৃতবান্, তদা স আঙ্গিরসস্ততো নির্গত্য তূষ্ণীং স্বগৃহমাযযাবিত্যষ্টানামন্বয়ঃ। অনাদরে হেতুং মদং দর্শয়িতুং তং বিশিনষ্টি—(২) ত্রিভুবনৈশ্বর্য্যমদেনোল্লঙ্ঘিতঃ সতাং পন্থা যেন সঃ॥ (৩) পরিশ্রিতঃ—পরিবৃতঃ॥ (৫) আস্থানং সভাস্থানম্, তস্মিন্নধ্যাসনং সিংহাসনং তদাশ্রিতঃ[১]॥ (৬) পারমেষ্ঠ্যৈর্মহা-রাজচিহ্নৈঃ, আসনস্যার্দ্ধে স্থিতয়া পৌলোম্যা সহ বিরাজমানঃ সন্॥ (৭) প্রত্যুত্থানাদিনা নাভ্যনন্দন্নাদৃতবান্॥ (৮) ন চোচ্চচাল, আসন এব স্থিতোঽপি কিঞ্চিন্ন চলিতবান্॥ (৯) শ্রীমদেন যা বিক্রিয়া, তাং বিদ্বান্ জানন্॥

১০। প্রতিবুদ্ধ্য—অনুস্মৃত্য॥

১১। ময়া কৃতং কর্ম্ম অহো অসাধু: যদ্ যস্মাদ্দভ্রবুদ্ধিনাল্পমতিনা ময়া কাৎকৃতস্তিরস্কৃতঃ॥

১২। বিবুধানাং সাত্ত্বিকানাং দেবানামীশ্বরোঽপ্যহম্॥

১৩—১৪। ননু সিংহাসনস্থো রাজা প্রত্যুত্থানং[২] ন কুর্য্যাদিতি বৃদ্ধা বদন্তি, তত্রাহ—য ইতি দ্বাভ্যাম্। (১৩) ধিষণমাসনম্॥ (১৪) কুপথং দিশন্ত্যুপদিশন্তীতি কুপথদেষ্টারস্তেষাং বচঃ। অশ্মময়ঃ প্লবো যেষাং তে, যথা মজ্জন্তং প্লবমনু মজ্জন্তি, তদ্বৎ॥

১৫। অগাধা গম্ভীরা ধিষণা যস্য তম্; নিশঠঃ শাঠ্যহীনঃ সন্।

১৬। অধিকয়া—আত্মমায়য়া॥

১৭। গুরোঃ সংজ্ঞাং জ্ঞানোপায়ং পরীক্ষমাণোঽপি নাধিগতোঽপ্রাপ্তঃ সন্॥

১৮। আততায়িনঃ—উদ্যতাস্ত্রাঃ॥

১। তদাস্থিতঃ (ঘ); ২। অভ্যুত্থানং (ঘ)।

১৯। নির্ভিন্নান্যঙ্গান্যুত্তমাঙ্গানি, শিরাংসি উরবো বাহবশ্চ যেষাম্ ॥

২১। বো যুষ্মাকম্, কৃতং করণং মহদভদ্রম্। তদাহ—ব্রহ্মিষ্ঠমিতি। নাভ্যনন্দত নাভিনন্দিতবন্তঃ ॥

২২। পরেভ্যঃ শত্রুভ্যো বঃ পরাভব ইতি যৎ, অয়ং তস্যানয়স্যান্যায়স্য সম্বন্ধী ফলরূপ আসীৎ; উক্তঞ্চ—'ব্রাহ্মণং কুলসম্পন্নং ভক্তং বিষ্ণোর্মহাত্মনঃ। আয়ান্তং বীক্ষ্য নোত্তিষ্ঠেৎ স দুঃখৈঃ পরিভূয়তে ॥' ইতি। স্বয়মেব বৈরিণো হন্তারো যেষাং তেভ্যঃ ॥

২৩। গুরুতিরস্কার-সৎকারাবেবাপচয়োপচয়কারণমিত্যসুরদৃষ্টান্তেনাহ—মঘবন্নিতি। দ্বিষতঃ শত্রূন্, কাব্যং ভার্গবং গুরুমেবোপসেব্যোপচিতান্[১]। উপচিতত্বমেবাহ—আদদীরন্ গৃহ্নীয়ুঃ ॥

২৪। অভেদ্যা মন্ত্রা যেষাম্, অনুশিক্ষিতার্থাঃ শিষ্যাঃ; যতো বিপ্রা গোবিন্দো গাবশ্চেশ্বরা অনুগ্রাহকা যেষাং তেষামেবাভদ্রাণি ন ভবন্তি, অন্যেষাং তু ভবন্তি ॥

২৫। তত্তস্মাদথানন্তরমেব ভজত। অস্য কর্ম্ম—অসুরপক্ষপাতম্ ॥

২৬। উদিতাঃ—উক্তাঃ ॥

২৯। অতিথীনাং পিতৄণাঞ্চ প্রশংসার্থমাহুঃ—আচার্য্য উপনীয় বেদাধ্যাপকঃ, ব্রহ্মণো বেদস্য মূর্ত্তিঃ ॥

৩০। ধর্ম্মস্যাত্মা মূর্ত্তিরতিথিঃ স্বয়ং সাক্ষাৎ। আত্মনঃ শ্রীবিষ্ণোঃ; যদ্বা, আত্মনঃ স্বস্য, সর্ব্বভূতেষ্বাত্মদৃষ্টিঃ কর্ত্তব্যেত্যর্থঃ ॥

৩১। পরেভ্যঃ পরাভব এবার্ত্তিস্তাম্ ॥

৩২। সন্দেশমাহুর্ব্রীমহ ইতি ॥

৩৩। ননূপাধ্যায়ত্বে কনিষ্ঠস্য মমাভিবন্দনং করিষ্যথ, তচ্চ বিগর্হিতম্? তত্রাহুঃ—নেতি। অর্থেষু প্রয়োজননিমিত্তং কনিষ্ঠাজ্জ্য্যভিবাদনং[২] ন

১। আসেব্যোপচিতান্ (ঘ); ২। যবিষ্ঠানামভিবাদনং (ঘ)।

নিন্দন্তি। কিঞ্চ, ছন্দোভ্যো মন্ত্রেভ্যোঽন্যত্র বয়ো জ্যৈষ্ঠ্যস্য কারণম্, ন তু মন্ত্রেষু, অতোঽস্মভ্যং মন্ত্রদাতৃত্বেন ত্বমেব জ্যেষ্ঠো ভবিষ্যসি; যদ্বা, ছন্দোভ্যোঽন্যত্র বেদান্ বিহায় বয় এব জ্যৈষ্ঠস্য কারণং ন ভবতি, কিন্তু বেদা এব কারণম্[১]; তৎসাম্যে তু বয়ঃ; মন্ত্রজ্ঞত্বাদ্ বেদজ্ঞত্বাচ্চ ত্বমেব জ্যেষ্ঠ ইত্যর্থঃ॥

৩৫। নিন্দিতমপীদং যুষ্মদ্‌যাচ্ঞাভঙ্গভয়েন করিষ্যামীত্যাহ সার্দ্ধেন। বিগর্হিতং পৌরোহিত্যম্, ধর্ম্মশীলৈরধর্ম্মহেতুত্বাৎ। কিঞ্চ, ব্রহ্মবর্চ্চউপব্যয়ং পূর্ব্বসিদ্ধস্য ব্রহ্মবর্চ্চসস্য[২] চ ব্যয়করম্, প্রত্যাখ্যাতুঞ্চ মাদৃশো নার্হতীত্যাহ—কথং স্বিতি। তেষাং শিষ্যঃ শিক্ষণার্হঃ; স এব প্রত্যাখ্যানাভাব এব হি শিষ্যস্য স্বার্থ উচ্যতে॥

৩৬। নন্থ পৌরোহিত্যেন ধনসদ্ভাবাদ্[৩] ধর্ম্মঃ সিধ্যেৎ, অন্যথা নির্ধনস্য কুতো ধর্ম্মঃ? অতএব তেন লোকো হৃষ্যতি, তত্রাহ—অকিঞ্চনানাং হি ধনং শিলোঞ্ছনম্, ক্ষেত্রে স্বাম্যপেক্ষিতকণিশোপাদানং শিলম্, হট্টাদৌ পতিতব্রীহ্যাদেরুপাদানমুঞ্ছনম্। ইহ—গৃহাশ্রমে। তেনৈব নির্ব্বর্ত্তিতা সাধূনাং সৎক্রিয়া যেন॥

৩৭। কিয়দেতৎ প্রার্থিতম্? অল্পমেব। অধিকমপি করিষ্যামীত্যাহ—ভবতামিতি॥

৩৮। পরমেণ সমাধিনা—পরমোদ্যমেন॥

৩৯। বৈষ্ণব্যা—শ্রীনারায়ণকবচাত্মিকয়া॥

৪০। অসুরচমূঃ—দৈত্যসেনাঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

সপ্তমোঽধ্যায়ঃ॥ ৭॥

১। মুখ্যং কারণম্ (ঘ); ২। ব্রহ্মবর্চ্চসো (ঘ); ৩। ধনলাভাদ্ (ঘ)

অষ্টমোঽধ্যায়ঃ

অষ্টমে বিশ্বরূপস্তু বর্ম্ম নারায়ণাত্মকম্ ।
ইন্দ্রায় প্রাহ যেনেন্দ্রো গুপ্তো দৈত্যানথাজয়ৎ ॥ (১)

১ । ত্রিলোক্যাঃ সম্বন্ধিনীং শ্রিয়ম্ ॥

৪ । মন্ত্রাভ্যামষ্টাক্ষরদ্বাদশাক্ষরাভ্যাম্, কৃতঃ স্বাঙ্গেষু করয়োশ্চ ন্যাসো যেন সঃ ॥

৫—৬ । নারায়ণময়ং পরং বর্ম্ম, সংনহ্যেদ্ বধ্নীয়াৎ । তত্রাষ্টাক্ষরেণ পাদাদ্যষ্টাঙ্গেষু ন্যাসমাহ—পাদয়োরিতি সার্দ্ধেন । (৬) প্রণবসংপুটিত-মোঙ্কারাদ্যেকৈকমক্ষরং বিন্যসেৎ ; বিপর্য্যয়ং যথা ভবত্যেবং শির-আদি পাদান্তং বা বিন্যসেৎ, উৎপত্তিন্যাসং সংহারন্যাসং বা কুর্য্যাদিত্যর্থঃ ॥

৭ । দ্বাদশাক্ষরস্যোদ্ধারঃ প্রণবাদি যকারান্তমিতি । প্রণবসংপুটিত-মোঙ্কারাদ্যেকৈকমক্ষরং দক্ষিণতর্জ্জনীমারভ্য বামতর্জ্জনীপর্য্যন্তমঙ্গুলিষু, পরিশিষ্টমক্ষরচতুষ্টয়মঙ্গুষ্ঠয়োরাদ্যন্তপর্ব্বসু ন্যসেৎ ॥

৮ । মন্ত্রান্তরন্যাসমাহ—ন্যসেদিতি । 'ষ'কার-'ণ'কারয়োর্বিশ্লেষেণ ষড়ক্ষরাণি হৃদয়াদিষু ন্যসেৎ ॥

৯ । মকারমস্ত্রমুদ্দিশ্য ধ্যাত্বা ॥

১০ । তন্মকারাস্ত্রং 'মঃ অস্ত্রায় ফট্' ইত্যেবং পূর্ব্বাদি-দিগ্‌বন্ধেষু বিনির্দ্দিশেৎ ॥

১১ । ধ্যেয়মীশ্বররূপমাত্মানং ধ্যায়েৎ । ষট্‌শক্তিভিরৈশ্বর্য্যাদিভি'র্ভগ'-শব্দবাচ্যাভিঃ । বিদ্যা চ তেজশ্চ তপশ্চ মূর্ত্তির্যস্য তম্, ইমং বক্ষ্যমাণং শ্রীমন্নারায়ণকবচাখ্যম্ ॥

১২ । অষ্টগুণঃ —অণিমাদ্যষ্টৈশ্বর্য্যযুক্তঃ ॥

১৩। যাদসাং গণা এব বরুণস্য পাশস্তস্মাৎ ॥

১৪। অটবী আজিমুখঞ্চ সংগ্রামোপক্রম[1] আদির্যেষাং তেষু সঙ্কট-স্থানেষু ॥

১৫। অসৌ প্রসিদ্ধো বরাহো মা মামধ্বনি রক্ষতু। যজ্ঞৈরবয়ব-রূপৈঃ কল্প্যতে নিরূপ্যত ইতি তথা, উন্নীতা উদ্ধৃতা ধরা যেন সঃ। অদ্রি-কূটেষু গিরিশিখরেষু ; রামো জামদগ্ন্যঃ ॥

১৬। উগ্রধর্ম্মাদভিচারাদিলক্ষণাৎ। হাসাদ্ গর্ব্বান্নরঃ পাতু[2]। দত্তো দত্তাত্রেয়ঃ ; অযোগাদ্‌যোগভ্রংশাৎ ॥

১৭। পথি যদ্দেবানাং হেলনং নমস্কারমকৃত্বা গমনম্, তস্মাৎ। পুরুষার্চ্চনস্যান্তরাদ্‌দেবপূজাচ্ছিদ্রাদ্‌দ্বাত্রিংশদপরাধরূপাদ্ নারদঃ ॥

১৮। লোকাদ্ জনাপবাদাৎ, যজ্ঞো জননিমিত্তো যোঽন্ত উপঘাত-স্তস্মাদ্ বলভদ্রোঽবতাৎ ; কৃতান্তাদিতি পাঠে কৃতান্তাৎ কালাদ্ রক্ষতু। ক্রোধবশাৎ সর্পাণাং গণাৎ ; অহীন্দ্রঃ শেষঃ ॥

১৯। কালমলভৃতাৎ কলেঃ কল্কিঃ ; ধর্ম্মাবনায় ধর্ম্মরক্ষণায়োরুর্মহান্ কৃতোঽবতারো যেন ॥

২০—২২। দিনস্য ষট্‌সু ভাগেষু ক্রমেণ প্রাতরাদিসংজ্ঞেষু রাত্রেশ্চ প্রদোষাদিসংজ্ঞেষু রক্ষাপ্রার্থনম্—মাং কেশব ইতি ত্রিভিঃ। (২০) আসঙ্গবং —সঙ্গবমভিব্যাপ্য ॥ (২১) ত্রিধামা ব্রহ্মাদিত্রিমূর্ত্তিঃ শ্রীমাধবঃ। দোষে প্রদোষে। অর্দ্ধরাত্রে অর্দ্ধরাত্রপর্য্যন্তে কালে নিশীথে চৈক[3] এব পদ্ম-নাভোঽবতু ॥ (২২) অপররাত্র ঈশঃ শ্রীবৎসধামাঽবতু। প্রত্যূষ ঈশঃ শ্রীজনার্দ্দনঃ, শ্রীদামোদরঃ প্রভাতে, শ্রীবিশ্বেশ্বরোঽনুসন্ধ্যং প্রতিসন্ধ্যম্ ॥

২৩। যুগান্তানলবৎ তিগ্মা তীক্ষ্ণা নেমির্যস্য, তচ্চক্রং ভগবতা প্রযুক্তং সদরিসৈন্যং দন্দগ্ধি দন্দগ্ধ্যতিশয়েন দহতি। তস্যায়ং স্বভাব এব, ন তু

১। সংগ্রামোপগ্রহঃ (ক, গ) ; ২। অবতু (ঘ) ; ৩। চৈত্রিক (ঘ)।

তস্মাৎ প্রার্থনীয়মিত্যর্থঃ ; যদ্বা, দন্দগ্ধি ইতি লোণ্মধ্যমপুরুষঃ। অত্র তমেবম্ভূতং চক্রমিতি স্বরূপমুক্ত্বা সংবোধ্য প্রার্থ্যতে—অতিশয়েন দহেতি। কক্ষং শুষ্কতৃণম্॥

২৪। অশনিবৎ স্পর্শো যেষাং তে বিস্ফুলিঙ্গা যস্যাস্তস্যাঃ সম্বোধনম্—হে গদে! ত্বমজিতস্য প্রিয়াসি, অহঞ্চ তস্য দাসঃ, অতঃ কুষ্মাণ্ডাদীন্ নিষ্পিণ্ঢি নিষ্পিণ্ঢি, সঞ্চূর্ণয় সঞ্চূর্ণয় ; অরীংশ্চ চূর্ণয় চূর্ণয়। সর্ব্বত্র বীপ্সাতিশীঘ্রত্বায়॥

২৫। হে দরেন্দ্র! পাঞ্চজন্য! ত্বং যাতুধানাদীন্ বিদ্রাবয়, বিপ্রগ্রহা ব্রহ্মরাক্ষসাঃ, যেঽন্যে চ ঘোরদৃষ্টয়স্তান্॥

২৬। তিগ্মা ধারা যস্য হে তিগ্মধার! অসিবর খড়্গশ্রেষ্ঠ! ত্বং মমারিসৈন্যং ছিন্ধি ছিন্ধি। শতং চন্দ্রাকারাণি মণ্ডলানি যস্মিন্, হে শতচন্দ্র! চর্ম্মন্নঘোনামঘবতাং দ্বিষাং চক্ষূংষি ছাদয় ; পাপচক্ষুষামুগ্রদৃষ্টীনাং চক্ষূংষি হর॥

২৭। যদ্ যেভ্যো ভয়ম্। অংহোভ্যঃ—পাপেভ্যঃ॥

২৮। শ্রেয়ঃপ্রতীপকাঃ—ইষ্টব্যাঘাতকাঃ॥

২৯। স্তোত্রাণি—বৃহদ্রথন্তরাদিসামানি, তৈঃ স্তূয়তে সংস্তূয়ত ইতি স্তোত্রস্তোভশ্ছন্দোময়ো বেদমূর্ত্তিঃ, 'সুপর্ণোঽসি গরুত্মান্' ইত্যাদিশ্রুতেঃ। স্তোত্রস্তোভচ্ছন্দোময় ইত্যেকপদ্যপাঠে স্তোভা গীতিপূরকাক্ষরাণি ; স্তোত্রস্তোমেতি পাঠে সামাধারভূতঋক্‌সমুদায়ঃ স্তোমঃ॥

৩০। নামানি চ রূপাণি চ যানানি চ বাহনান্যায়ুধানি চ নো মনোবুদ্ধ্যাদীন্ পান্তু, পার্ষদভূষণাঃ পার্ষদমুখ্যাশ্চ পান্তু॥

৩১। সদসচ্চ মূর্ত্তঞ্চামূর্ত্তঞ্চ যত্তৎ, সর্ব্বং জগৎ॥

৩২। ঐকাত্ম্যস্যানুভাবোঽনুধ্যানং যেষাং তেষাম্। বিকল্পো ভেদস্তদ্রহিতোঽপি॥

৩৩। সত্যমানেন—সত্যভূতেন প্রমাণেন॥

৩৪। পুনরপি শ্রীনৃসিংহ এব প্রার্থ্যতে—বিদিক্ষ্বিতি ; পাত্বিত্যনুষঙ্গঃ। যদ্বা, নারসিংহঃ প্রহ্লাদঃ, স্বনেন শ্রীনৃসিংহনামগর্জ্জনেন, স্বতেজসা স্বপ্রভাবেণ, গ্রস্তানি সমস্তানি দিগ্‌গজবিষশস্ত্রজলবায়্বগ্ন্যাদীনাং তেজাংসি প্রভাবা যেন সঃ ॥

৩৫। দংশিতঃ—কবচিতঃ ॥

৩৬। সোঽপি সাধ্বসাদ্ ভয়াদ্ বিমুচ্যতে ॥

৩৭। তস্য তু ভয়ং ন ভবেদেব ॥

৩৮—৪০। এতদ্বিদ্যাপ্রভাবমিতিহাসেনাহ—ইমামিতি সার্দ্ধৈস্ত্রিভিঃ। (৩৮) মরুধন্বনি নিরুদকে দেশে। অনেন বিদ্যায়াঃ ক্ষেত্রতীর্থানপেক্ষত্বং দর্শিতম্ ॥ (৩৯) যত্র দ্বিজস্য ক্ষয়ো দেহত্যাগস্তস্যোপরি ॥ (৪০) সদ্যস্তৎক্ষণমেব গগনান্ন্যপতৎ। সাঙ্গন ইতি পাঠান্তরে অঙ্গনাভিঃ সহ। বালিখিল্যোপদেশাত্তস্যাস্থীনি প্রাস্য প্রক্ষিপ্য বিস্মিতঃ সন্ স্বং ধাম গন্ধর্ব্বলোকং জগাম ॥

৪২। অধিগতঃ প্রাপ্তঃ সন্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

অষ্টমোঽধ্যায়ঃ ॥ ৮ ॥

নবমোঽধ্যায়ঃ

নবমে বিশ্বরূপে তু হতে শক্রেণ কোপতঃ।
ত্বষ্ট্রা চোৎপাদিতে বৃত্রে ভীতৈর্দেবৈর্হরেঃ স্তুতিঃ ॥ (১)

১। সোমস্য পীথং পানং যস্মিন্, এবং সুরাপীথম্, অন্নমত্তীত্যন্নাদম্। অত্র 'বিশ্বরূপো বৈ ত্বাষ্ট্রঃ পুরোহিতো দেবানামাসীৎ' ইত্যাদিশ্রুতিরনুসন্ধেয়া ॥

২—৩। তস্যাসুরপক্ষপাতমাহ—স বেতি দ্বাভ্যাম্। (২) প্রত্যক্ষং প্রকটং যথা ভবতি তথা, সবিনয়ং দেবেভ্যো হবির্ভাগম্ 'ইন্দ্রায় ইদমগ্নয়ে ইদম্' ইত্যেবমুচ্চৈরবদৎ। অত্র হেতুঃ —যস্য পিতরো দেবাঃ সঃ॥ (৩) সোঽসুরেভ্যস্তু পরোক্ষং গুপ্তং ভাগং দদৌ ; তদেবাহ—দেবান্ যজমানোঽসাবসুরান্ প্রতি ভাগমবহৎ, কেনাপ্যুপায়েন প্রাপয়ামাস ; যতো মাতৃস্নেহ-বশেনাসুরাননুগচ্ছতি॥

৬। তাং বারয়িতুং সমর্থস্তথাপি জগ্রাহ। সংবৎসরং তথৈব স্থিত্বা সংবৎসরান্তে ভূতাক্রোশভীতঃ সন্ ভূতানাং মধ্যে বিশুদ্ধয়ে লোকাপবাদ-পরিহারায় স হরিরিন্দ্রো ভূম্যাদিভ্যস্তদঘং ব্যভজদ্ বিভজ্য দদাবিত্যন্বয়ঃ॥

৭। তুরীয়ং চতুর্থং ভাগম্। খাতস্য গর্ত্তস্য পূরঃ পূরণম্, তেন বরেণ যদি খাতপূরণং স্বত এব ভবিষ্যতি, তর্হি গ্রহীষ্যামীত্যেবং ভাষাবন্ধেন জগ্রাহ ইত্যর্থঃ। ঈরিণমূষরম্, অতএবোষরেঽধ্যয়নাদি নিষিধ্যতে। ছেদে সতি পুনর্ব্বিরোহঃ প্ররোহো ভবত্বিতি বরেণ॥

৮। নির্যাসরূপেণ ব্রহ্মহত্যায়া দৃষ্টত্বান্নির্যাসো ন ভক্ষ্যঃ॥

৯। শশ্বৎকামবরেণ যাবৎপ্রসবং গর্ভানুপঘাতেনৈব সম্ভোগবরেণ ; অতএব রজোদর্শনে তৎসঙ্গাদির্ন কার্য্যঃ॥

১০। দ্রব্যভূয়োবরেণ যস্মিন্ দ্রব্যে ক্ষীরাদাবাপো মিশ্রা ভবেয়ুস্তস্য ভূয়স্ত্বমাধিক্যং স্যাদিতি বরেণ ; যদ্বা, স্বস্যৈব নির্ঝরোদ্গমাদিনা ভূয়স্ত্ববরেণ ; দ্রবভূয় ইতি পাঠেঽপ্যয়মেবার্থঃ ; যদ্বা, দ্রবভূয়স্ত্বং সাংসিদ্ধিকদ্রবত্বম্, তেন বরেণ। অস্য বিভাগস্য 'বিশ্বরূপো বৈ ত্বাষ্ট্রঃ' ইত্যস্যাং শ্রুতাবুক্তেঃ। তদ্বিভাগফলমাহ—তৎ পাপং হরতি নিরাকরোতি, কঃ ক্ষিপন্ বুদ্বুদাদি জলাদ্বহিঃ প্রক্ষিপন্নিত্যর্থঃ ; যদ্বা, ক্ষিপন্ জলং পাপং হরত্যাহরতি গৃহ্লাতীত্যর্থঃ। অয়ঞ্চ 'তস্মাদাপো ন পরিচক্ষ্যাঃ' ইত্যাদি শ্রুত্যর্থ উক্তঃ। হরিকিল্বিষমিতি পাঠে ইন্দ্রপাপম্॥

১১। ইন্দ্রায় ইন্দ্রং হন্তুম্, শত্রবে শত্রুৎপত্ত্যে। তদাহ—ইন্দ্রশত্রো বিবর্দ্ধস্ব ইতি। অত্র চেন্দ্রশত্রুপদস্যাত্ত্যুদাত্তত্বাদ্ 'বহুব্রীহৌ প্রকৃত্যা পূর্ব্বপদম্' ইতি স্মৃতের্বহুব্রীহিলক্ষণোৎপত্ত্যা ইন্দ্র এব তস্য শত্রুরভূৎ ; তদুক্তং শ্রুত্যা—'যদব্রবীৎ স্বাহা ইন্দ্রশত্রো বিবর্দ্ধস্ব' ইতি, 'তস্মাদস্যেন্দ্রঃ শত্রুরভবৎ' ইতি ; তথা চ শিক্ষায়াম্—'মন্ত্রো হীনঃ স্বরতো বর্ণতো বা, মিথ্যা-প্রযুক্তো ন, তমর্থমাহ—স বাগ্বজ্রো যজমানং হিনস্তি, যথেন্দ্রশত্রুঃ স্বরতোঽপরাধাৎ' ইত্যাদি ॥

১২—১৬। (১২) অন্বাহার্য্যপচনাদ্দক্ষিণাগ্নেঃ। তং বীক্ষ্য বিত্রস্তা লোকা দশ দিশো দুদ্রুবুরিতি পঞ্চমেনান্বয়ঃ ॥ (১৩) কথম্ভূতম্? বিষ্বক্ সমন্ততঃ, ইষুবিক্ষেপমাত্রং প্রতিদিনং বর্দ্ধমানম্, দগ্ধশৈলপ্রতীকাশং কৃষ্ণবর্ণম্, সন্ধ্যাভ্রানীকবদ্বর্চ্চো দীপ্তির্যস্য তম্ ॥ (১৪) তপ্ততাম্রবচ্ছিখাঃ শ্মশ্রূণি চ যস্য, মধ্যাহ্নার্কবদুগ্রে লোচনে যস্য ; রোদসী আরোপ্যেবেত্যর্থঃ ॥ (১৫) দরীবদ্‌গম্ভীরেণ বক্ত্রেণ মুহুর্ম্মুহুর্জ্জৃম্ভমাণমিত্যন্বয়ঃ। কথম্ভূতেন? নভস্তলং পিবতা ॥ (১৬) ঋক্ষাণি জিহ্বয়া লিহতা, ভুবনত্রয়ং গ্রসতা, মহতা বিস্তীর্ণেন ; রৌদ্রা দংষ্ট্রা যস্মিন্ ॥

১৭। বৃত্রনাম নির্ব্বক্তি—যেনাবৃতা ইতি। ত্বাষ্ট্রো মূর্ত্তির্যস্য, তপসস্তেন[১]। তথা চ শ্রুতিঃ—'স ইমাঁল্লোকানাবৃণোদেতদ্বৃত্রস্য বৃত্রত্বম্' ইতি ॥

১৮। অগ্রসৎ—ভক্ষিতবান্ ॥

১৯। গ্রস্তং তেজো যেষাম্। প্রত্যঞ্চমন্তর্যামিণং ত্রিভুবনস্য, তেন ব্যাপ্তত্বাৎ ক্বাপি গমনাসম্ভবাত্তত্রৈব স্থিত্বা তুষ্টুবুরিত্যর্থঃ ॥

মহাভয়ে পরিত্রাণমন্যতো ন ভবেদিতি।
হরিমেব প্রপদ্যন্তে সুরাঃ শরণমাতুরাঃ ॥

১। তমসস্তেন (ঘ)।

২০। বায্বাদীনি পঞ্চমহাভূতানি তৈর্নির্ম্মিতাস্ত্রয়ো লোকাস্তেষামধিপতয়[১]স্ততোঽর্ব্বাচীনা বয়ঞ্চ সর্ব্বে যস্মৈ অন্তকায় কালায়োদ্বিজন্তঃ সন্তো বলিং হরাম ; অসাবপি যস্মাদ্বিভেতি, ততঃ পরমেশ্বরাদেব নোঽস্মাকমরণং শরণং রক্ষণমস্তু ॥

২১। তত এবেত্যবধারণে হেতুমাহুঃ—অবিস্মিতং নিরহঙ্কারং কুতূহলশূন্যং বা। কুতঃ? প্রশান্তম্—রাগাদিশূন্যম্। তচ্চ কুতঃ? স্বেনৈব লাভেন পরিপূর্ণকামম্। তচ্চ কুতঃ? সমমুপাধিপরিচ্ছেদশূন্যম্। এবম্ভূতং পরমেশ্বরং বিনাপরং যঃ শরণার্থমুপসর্পতি, স হি বালিশোঽজ্ঞঃ ; যতোঽসৌ শুনো লাঙ্গুলেন পুচ্ছেন সমুদ্রমতিতিতর্ত্তি অতিতরিতুমিচ্ছতীত্যর্থঃ। যথা তেন সমুদ্রতরণং ন ভবতি, তথানীশ্বরাশ্রয়েণ ব্যসনার্ণবতরণং ন ভবতীতি ভাবঃ ॥

২২—২৩। মহাভয়ে স এব রক্ষক ইতি দৃষ্টমিত্যাহুঃ—যস্যেতি দ্বাভ্যাম্। (২২) যস্য মহাশৃঙ্গে জগতীং পৃথ্বীমেব স্বনাবং বদ্ধা মনুঃ সত্যব্রতো যথাবদ্দুর্গং সঙ্কটং ততার, স এব বারিচরো মৎস্যমূর্ত্তির্নোঽস্মানপ্যাশ্রিতান্ সতো নূনং ত্রাতা রক্ষিষ্যতি[২] ॥ (২৩) সংযমাম্ভসি—প্রলয়োদকে ; উদীর্ণৈরুদ্দগতৈর্ব্বাতৈর্যে ঊর্ম্ময়স্তেষাং রবৈঃ করালে ভয়ঙ্করে অরবিন্দান্নাভিকমলাৎ পতিতপ্রায় একোঽসহায় এব তস্মাদ্ ভয়াদ্, যেন ততার, স এব নঃ পারঃ তারকোঽস্তু ॥

২৪—২৬। কিঞ্চ, বয়ং ভগবতৈব সৃষ্টাঃ পালিতাশ্চ বহুশঃ, অতস্তমেব শরণং ব্রজামেত্যাহুঃ —য এক ইতি ত্রিভিঃ। (২৪) যেনানুগৃহীতাঃ সন্তো বিশ্বং সৃজাম। ননু যূয়মেব স্রষ্টারঃ, নান্যো যুষ্মাকমনুগ্রাহকোঽস্তি, তস্যাদর্শনাৎ? তত্রাহুঃ —অস্মত্তঃ পুরঃ পূর্ব্বমেবান্তর্যামিতয়া সমীহমানস্যাপি

১। অধিপতয়ো ব্রহ্মাদয়শ্চ (ঘ) ; ২। রক্ষিষ্যতে (গ)।

যস্য লিঙ্গং রূপং ন পশ্যাম ; তত্র হেতুঃ—পৃথক্ পৃথগীশা ইত্যভিমানিনঃ ॥ (২৫) দেবাদিষূপেন্দ্রপরশুরামমৎস্যরামাদিতনুভিঃ কৃতাবতারঃ সন্নাত্মসাৎ কৃত্বা পাতি চ ॥ (২৬) আত্মভূতং দৈবতম্। কুতঃ ? বিশ্বং বিশ্বাত্মকম্, তথাপি বিকারং বারয়ন্তি—অন্যম্ ; বিশ্বাত্মকত্বে হেতুঃ —পরং কারণম্। ননু প্রধানং পুরুষশ্চ বিশ্বস্য কারণম্ ? তত্রাহুঃ—প্রধানং পুরুষঞ্চ তদাত্মকোঽপি স এবেত্যর্থঃ। স এব নঃ শং বিধাস্যতি ॥

২৭। প্রতীচ্যাং দিশি হৃদি প্রথমমাবিরভূৎ ॥

২৮—২৯। পুনশ্চ তং পুরো দৃষ্ট্বা ঈক্ষণাহ্লাদেন বিবশাঃ, অবনৌ দণ্ডবৎ পতিতাঃ সন্তঃ শনৈরুত্থায় তুষ্টুবুরিত্যন্বয়ঃ। কথম্ভূতম্ ? শ্রীবৎস-কৌস্তুভৌ বিনা স্বতুল্যৈঃ ষোড়শভিঃ সুনন্দাদিভিঃ পরিতঃ সেবিতম্, উন্নিদ্রশরদম্বুরুহবদীক্ষণে যস্য তম্ ॥

৩০। যজ্ঞো বীর্য্যং সর্গাদিফলজননায় সামর্থ্যং যস্য তস্মৈ নমঃ, বয়সে উত তৎফলপরিচ্ছেদককালাত্মনেঽপি। তদ্বিঘাতকেষু দৈত্যেষু, অস্তং প্রক্ষিপ্তং চক্রং যেন, এবম্ভূতৈঃ প্রভাবৈঃ, সুপুরুহূতয়ে শোভনবহুনাম্নে ॥

৩১। ননু মম গুণাতীতং রূপং বিহায় গুণোপাধিকং যজ্ঞবীর্য্যত্বাদি কিমিতি বর্ণ্যতে ? তত্রাহুঃ—যত্তব গুণত্রয়স্যেশিতুর্নিয়ন্তুঃ, তিসৃণাং ত্রিগুণাত্মিকানাং গতীনাং পরমং পদং নির্গুণস্বরূপং তদ্বিসর্গস্যার্ব্বাচীন ইদানীন্তনঃ, হে ধাতঃ! বেদিতুং নার্হতি, অতঃ কেবলং তস্মৈ তে নমোঽস্তু ॥

মিতাক্ষরাণি পদ্যানি ন মীয়ন্তে হরেগুর্ণাঃ।
ইতি পদ্যৈরতুষ্যন্তঃ সন্তো গদ্যেন তুষ্টুবুঃ ॥

৩২। ভক্ত্যুদ্রেকেণ বহুধা সম্বোধয়ন্তো দুর্জ্ঞেয়ত্বং প্রপঞ্চয়তি—ভগবন্নিত্যাদিনা। পরমং মঙ্গলং শুদ্ধো ধর্ম্মো যস্মিন্ ; আত্মযোগেনাষ্টাঙ্গেন যঃ সমাধিশ্চিত্তৈকাগ্র্যম্, তেন পরিভাবিতোঽনুশীলিতঃ পরিস্ফুটো যঃ

পারমহংস্তধর্ম্মো ভগবদ্ভজনম্, তেনোদ্ঘাটিতং তমোরূপং কবাটং যস্মিন্ তস্মিন্ দ্বারভূতে চিত্তেঽপাবৃতে প্রকটে, আত্মলোকে প্রত্যগ্রূপে, স্বয়মেবোপলব্ধমভিব্যক্তং যন্নিজসুখং তদনুভবরূপো ভবান্ ॥

৩৩। ননু কেবলানুভবরূপত্বে মম সৃষ্ট্যাদিকর্তৃত্বং কথম্? তত্রাহুঃ — দুরববোধ ইব তবায়ং বিহারযোগঃ ক্রীড়োপায়ঃ ; যদ্যস্মাদশরণো নিরাশ্রয়ঃ। ইদং বিশ্বমনবেক্ষিতোঽস্মাকং সমবায়ো মেলনং সাহায্যং যেন সঃ ॥

৩৪। দুর্জ্ঞেয়ত্বান্তরমাহুঃ —অথ তত্রেতি। যথেহ দেবদত্তো গৃহাদি নির্ম্মায় তত্র স্বকৃতশুভাশুভয়োঃ ফলমুপাদদাতি[১], এবং ভবান্ ব্রহ্মস্বরূপো জীবরূপেণ গুণবিসর্গে সংসারে পতিতঃ সন্নুপাদদাতি কিম্? যদ্বা, সমঞ্জসমপ্রচ্যুতং দর্শনং চিচ্ছক্তির্যস্য স ভবানুদাস্তে, উদাসীনঃ সাক্ষিতয়া বর্ত্ততে? ইতি ॥

৩৫। তদেবং বিরোধেন দুর্ব্বিজ্ঞেয়ত্বমুক্ত্বা তৎপরিহারেণ জ্ঞানপ্রকারমাহুঃ —ন হীতি। বিরুধ্যত ইতি বিরোধ উভয়মবিরুদ্ধমিত্যর্থঃ। ন হ্যন্যদৃষ্টান্তেন ত্বয়ি বিকল্পো যুজ্যত অতর্কৈশ্বর্য্যত্বাদিত্যাহুঃ —ভগবতীতি। অপরিমিতা গুণগণা যস্য তস্মিন্নীশ্বরে স্বতন্ত্রে, অনবগাহ্যমতর্ক্যং মাহাত্ম্যং যস্য তস্মিন্। বিকল্পঃ —এবং বা এবং বেতি বিতর্কঃ, কিমত্র যুক্তমিতি বিচার ইত্থমেবেতি। তত্র প্রমাণাভাসাস্তদনুগ্রাহকাঃ, কুতর্কাশ্চার্ব্বাচীনা বস্তুস্বরূপাসংস্পর্শিনো বিকল্পাদয়স্তে যেষু শাস্ত্রেষু তৈঃ কলিলং ব্যাকুলমন্তঃকরণমাশয় আশ্রয়ো যস্য দুরবগ্রহস্য দুরাগ্রহস্য, তেন বাদিনাং বিবাদিনাং বিবাদস্যানবসরে অগোচরে। ননু শ্রদ্ধামাত্রমেতৎ, যুক্তিরুচ্যতাম্ ; তত্রাহুঃ —উপরতঃ সমস্তো মায়াময়ঃ সংসারো যস্মিন্ তস্মিন্ কেবলেঽপ্যাত্মমায়াং মধ্যে নিধায় কো ন্বর্থঃ কর্তৃত্বাদির্ন সম্ভবতি? যদি বস্তুতঃ কর্তৃত্বাদি ভবেত্তর্হি বিরোধঃ স্যাৎ, ন তু তদস্তীত্যাহুঃ —স্বরূপদ্বয়াভাবাদিতি ॥

১। ফলমুপাদত্তে (ঘ)।

৩৬। অনুগ্রহনিগ্রহাদিকং তু তত্তন্মতিভেদেন ত্বন্মায়য়া ত্বয়ি স্ফুরতীত্যাহুঃ —সমা বিষমা চ মতির্যেষাং তেষাং মতমভিপ্রায়ম্। সর্পাদিবিষয়াধিয়ো যেষাং তেষাং যথা রজ্জুখণ্ডস্তথা, তথা ভবতি[১] ; যদ্বা, তমেবাবিরোধং পুরুষমতিভেদেন দর্শয়ন্তি—সমবিষমেতি ॥

৩৭। তদেবং বিরোধং পরিহৃত্য নিশ্চিতং পরমার্থমাহুঃ —স এব হি যো নানারূপেণ প্রতীতঃ, বস্তুস্বরূপঃ সদ্রূপঃ, সর্ব্বেষাং গুণানাং বিষয়াণামাভাসৈঃ প্রকাশৈরুপলক্ষিতঃ। নন্বু তৈর্জীব এব উপলক্ষ্যতে ? ন, সর্ব্বপ্রত্যগাত্মত্বাৎ, সর্ব্বজীবান্তর্যামিত্বাৎ। জড়তাদাত্ম্যাধ্যাসেন জীবস্যাপি জড়প্রায়ত্বান্ন তেন বিনা প্রকাশ ইতি ভাবঃ। পর্য্যবশেষিতঃ 'নেতি নেতি' ইত্যাদি-শ্রুতিভিঃ ॥

৩৮। অতস্তদ্ভক্তিরেব পরমপুরুষার্থ ইত্যাহুঃ —অথ হেত্যাদি পর্য্যাবর্ত্ত ইত্যন্তেন। যস্মাদেবম্ভূতস্ত্বং পরমেশ্বরঃ, অথ হ বাব অতএব হি, হে মধুমথন ! পরমভাগবতা এতে ত্বৎপাদাম্বুজানুসেবাং কথমুহ বিসৃজন্তীত্যন্বয়ঃ। হি যস্মাৎ স্বার্থে পুরুষার্থে কুশলা নিপুণাঃ ; অতএব আত্মা ত্বমেব প্রিয়ঃ সুহৃচ্চ যেষাং তে সাধবো রাগাদিশূন্যাঃ। অত্র হেতুঃ —তব মহিমৈবামৃতরসসমুদ্রস্তস্য বিপ্রুষা বিন্দুমাত্রেণ সকৃদপি লীঢ়য়া আস্বাদিতয়া, স্বমনসি নিষ্যন্দমানমতিশয়েন স্রবদ্যন্নিরন্তরং সুখং তেন বিস্মারিতা দৃষ্টিশ্রুতিবিষয়াঃ সুখলেশাভাসা যেষাং তে ; অতএব ভগবতি ত্বয়ি নিতরাং রতং[২] নিবৃ‍র্তঞ্চ মনো যেষাং তে। যত্র যস্যামনুসেবায়াং সত্যাম্ ॥

৩৯। প্রস্তুতং বিজ্ঞাপয়ন্তি—ত্রিভুবনেত্যাদিনা যাবৎ-সমাপ্তি। ত্রিভুবনমাত্মা স্বরূপং ভবনঞ্চ যস্য, ত্রিভুবনস্যাত্মা ভবনঞ্চেতি বা ; ত্রয়ো বিক্রমা যস্য, ত্রীন্ লোকান্ নয়তীতি, তথা ত্রয়াণাং লোকানাং মনোহরোঽনুভাবো যস্য—এবং চতুর্দ্ধা সম্বোধ্যাহুঃ। তেষামুপক্রমসময় উত্তম-

১। ভাতি (গ, ঘ) ; ২। নিরন্তরং (ঘ)।

কালোঽয়ং ভবতীতি মত্বা, হে দণ্ডধর ! পূর্ব্বং যথা দণ্ডং দধর্থ ধৃতবানসি, এবমেনং ত্বাষ্ট্রমপি জহি, যদি মন্যসে হন্তুং যদীচ্ছসি ॥

৪০। প্রথমং তাবত্ত্বদীয়ানামস্মাকমন্তস্তাপং শময়িতুমর্হসি। তাবকানামিত্যত্র হেতুঃ —তাবকানাং হে পিতঃ[১] ! হে পিতামহ! তব চরণনলিনযুগলধ্যানেনৈবানুবদ্ধো হৃদয়ে নিগড়ঃ শৃঙ্খলা যেষাম্, স্বলিঙ্গবিবরণেন নিজমূর্ত্তিপ্রকটনেন স্বীকৃতানাম্। কেন ? অনুকম্পয়ানুরঞ্জিতং সানুরাগঞ্চ তদ্বিশদঞ্চ রুচিরঞ্চ শিশিরঞ্চ স্মিতং তৎসহিতেনাবলোকনেন তথানুকম্পয়ৈব বিগলিতো মধুরো মুখরসঃ প্রিয়বাক্ স এবামৃতকলা তয়া চ ॥

৪১। কিঞ্চাস্মদভিপ্রায়স্ত্বয়া জ্ঞাত এব, কিমত্রাস্মাভির্বিজ্ঞাপনীয়মিত্যাহুঃ —অথ হে ভগবন্! তবাস্মাভিরিহ কিয়ান্ বা অর্থবিশেষো বিজ্ঞাপনীয়ঃ স্যাদিত্যন্বয়ঃ। যথা হিরণ্যরেতসোঽগ্নেস্তদংশভূতৈর্বিস্ফুলিঙ্গাদিভিঃ প্রকাশো ন ক্রিয়তে, তথা তবাস্মাভিঃ কাম্যার্থ[২]প্রকাশনং ন কার্য্যমিত্যর্থঃ। তত্র হেতুগর্ভাণি বিশেষণানি—অখিলজগতামুৎপত্ত্যাদিষু নিমিত্তায়মানয়া দিব্যমায়য়া বিনোদো যস্য ; অতএব সর্ব্বজীবনিকায়ানামন্তর্হৃদয়েষু ব্রহ্মস্বরূপেণ প্রত্যগাত্মা অন্তর্যামী তদ্রূপেণ চ বহিরপি চ প্রধানরূপেণ দেশকালদেহাবস্থানবিশেষানমুল্লঙ্ঘ্যানুভবতঃ। কথম্ ? তেষামুপাদানতয়োপলম্ভকতয়া চোপাদানস্যোপলম্ভকতয়েতি বা, অতএব সর্ব্বেষাং প্রত্যয়ানাং বুদ্ধ্যাদীনামপি সাক্ষিণঃ ; সাক্ষিত্বে হেতুঃ —আকাশমিবালিপ্তং শরীরং স্বরূপং যস্য। অলিপ্তত্বে হেতুদ্বয়ম্, সাক্ষাৎ পরব্রহ্মণো নিরুপাধেঃ পরমাত্মনঃ শুদ্ধসত্ত্বমূর্ত্তেশ্চ ॥

৪২। অতএব সর্ব্বজ্ঞত্বাদেব বয়ং যৎকামেন যস্য কার্য্যস্য কামেনোপসাদিতাঃ প্রাপিতাঃ, তদস্মাকং কার্য্যং স্বয়মেবোপকল্পয় সম্পাদয়। চরণমেব

১। তাবকানাং ততস্তত (খ); ২। কার্য্যার্থ- (ঘ)।

শতপলাশং কমলং তস্য ছায়াং বিবিধৈর্ব্বজিনৈর্যঃ সংসারপরিশ্রমস্তস্যোপশমকরীম্ ; উপস্থতানাং প্রাপ্তানাম্ ॥

৪৩। পূর্ব্বং ভক্তেরুৎকর্ষোক্তেস্তৎকামশঙ্কা মা ভূদিতি স্বকামং কথয়ন্তি—অথোঽনন্তরমেব ॥

৪৪। শীঘ্রং তদ্বধায় পুনঃ প্রণমন্তি—হংসায় শুদ্ধায় হরয় আর্ত্তিহরায় তে নমঃ। শুদ্ধত্বে হেতবঃ—দহ্রনিলয়ায় হৃদয়াকাশনিকেতায়, নিরীক্ষকায় বুদ্ধ্যাদিসাক্ষিণে, কৃষ্ণায় সদানন্দরূপায়, 'কৃষিভূর্বাচকঃ শব্দো ণশ্চ নির্ব্বৃতিবাচকঃ। তয়োরৈক্যং পরং ব্রহ্ম কৃষ্ণ ইত্যভিধীয়তে॥' ইতি নিরুক্তেঃ। আর্ত্তিহরত্বে হেতবঃ—মৃষ্টং রুচিকরং যশো যস্য, নিরুপক্রমায়াদিশূন্যায়, সদ্ভিঃ সংগৃহ্যত ইতি তথা তস্মৈ ; ভবপান্থো ভবরূপে পথি বর্ত্তমানস্তস্য জনস্য নিজাশ্রমাপ্তৌ স্বশরণপ্রাপ্তৌ সত্যাং সংসারস্যান্তে পরীষ্টা সর্ব্বতো পূজিতা উত্তমা গতিঃ ফলং যস্তস্মৈ ॥

৪৫। অভিনন্দিতঃ—সন্তোষিতঃ ॥

৪৬। মদীয়মুপস্থানং স্তোত্রম্, তৎসহিতয়া বিদ্যয়া জ্ঞানেন। আত্মন ঐশ্বর্য্যমসংসারিত্বম্, তস্য স্মৃতির্যয়া, ন হি বিরোধ উভয়মিত্যাদিনা কর্ত্তৃত্বভোক্তৃত্বাদের্মায়িকত্বোক্তেঃ। ভক্তিশ্চ যয়া ভবতি ॥

৪৭। অথ হ ভগবন্নিত্যাদিনা ভক্তেঃ সর্ব্বোৎকর্ষোক্তের্ভক্তমভিনন্দন্তি—কিমিতি ॥

৪৮—৪৯। যদুক্তং দেবৈঃ স্বয়ং তদুপকল্পয়াস্মাকমিত্যাদি তৎসম্পাদনং কৃপালোর্মানুচিতমিত্যাশয়েনাহ—ন বেদেতি দ্বাভ্যাম্। (৪৮) গুণেষু বিষয়েষু তত্ত্বদর্শী। তান্—বিষয়ান্। তথাবিধোঽজ্ঞ এব ॥ (৪৯) কর্ম্ম ন বক্তি, প্রবৃত্তিমার্গং ন বক্তি হি। অপথ্যং যথা ন রাতি, ন দদাতি ভিষক্তমঃ সদ্বৈদ্যঃ ॥

৫০। এবং তত্ত্বকথনেনানৌচিত্যং পরিহৃত্য তদভিপ্রায়মনুসরন্নাহ—মঘবন্নিতি। বিদ্যয়া ব্রতৈস্তপসা চ সারং দৃঢ়ং গাত্রং শরীরং যাচত যাচধ্বম্॥

৫১—৫২। তত্র তদীয়ং বিদ্যাতিশয়মাহ—স বা ইতি দ্বাভ্যাম্। (৫১) এবং হ্যত্র প্রসিদ্ধা কথা—'নিশম্যাহথর্ব্বণং দক্ষং প্রবর্গ্যব্রহ্ম-বিদ্যয়োঃ। দধ্যঞ্চং সমুপাগম্য তমূচতুরথাশ্বিনৌ॥ ভগবন্ দেহি নৌ বিদ্যামিতি শ্রুত্বা স চাব্রবীৎ। কর্ম্মণ্যবস্থিতোঽদ্যাহং পশ্চাদ্বক্ষ্যামি গচ্ছতম্॥ তয়োর্নির্গতয়োরেব শক্র আগত্য তং মুনিম্। উবাচ ভিষজোর্বিদ্যাং মা বাদীরশ্বিনোর্মুনে॥ যদি মদ্বাক্যমুল্লঙ্ঘ্য ব্রবীষি সহসৈব তে। শিরশ্ছিন্দ্যাং ন সন্দেহ ইত্যুক্ত্বা প্রযযৌ[১] হরিঃ॥ ইন্দ্রে গতে তথাভ্যেত্য নাসত্যাবূচতু-র্দ্বিজম্। তন্মুখাদিন্দ্রগদিতং শ্রুত্বা তাবূচতুঃ পুনঃ॥ আবাং তব শিরশ্ছিত্ত্বা পূর্ব্বমশ্বস্য মস্তকম্। সন্ধাস্যাবস্ততো ব্রূহি তেন বিদ্যাঞ্চ নৌ দ্বিজ॥ তস্মিন্নিন্দ্রেণ সংছিন্নে পুনঃ সন্ধায় মস্তকম্। নিজন্তে দক্ষিণাং দত্ত্বা গমিষ্যাবো যথাগতম্[২]॥ এতচ্ছ্রুত্বা তথাবোচদ্দধ্যঙ্ঙাথর্ব্বণস্তয়োঃ। প্রবর্গ্যং ব্রহ্ম-বিদ্যাঞ্চ সংকৃতোঽসত্যশঙ্কিতঃ॥' ইতি। ততশ্চায়মর্থঃ—দধ্যঙ্ নিষ্কলং শুদ্ধং ব্রহ্মাধিগতো জ্ঞাতবান্; নিষ্কৃতমিতি পাঠে তু নিতরাং কৃতং ভবতি ধনং যেন তং প্রবর্গ্যঞ্চাধিগত ইত্যর্থঃ; ততোঽশ্বিভ্যাং প্রাদাদিত্যুত্তরস্যানুষঙ্গ উপদিদেশেত্যর্থঃ। কথম্ভূতং ব্রহ্ম? যদ্বৈ অশ্বশিরসা প্রোক্তত্বাদশ্বশিরো নাম প্রসিদ্ধম্। তয়োরমরতাং জীবন্মুক্তত্বং ব্যধাৎ; তথা চ শ্রুতিঃ—'অশ্বস্য শীর্ষ্ণা প্রযতানুবাচ[৩]' ইতি॥ (৫২) মদাত্মকং বর্ম্ম শ্রীনারায়ণ-কবচঞ্চাধিগত ইতি পূর্ব্বস্যানুষঙ্গঃ। তত্র হেতুঃ—যদ্যস্মাত্ত্বষ্ট্রে প্রাদাৎ। কিং তৎ? যত্ত্বষ্টা বিশ্বরূপায় পুত্রায় প্রাদাৎ। কীদৃশম্? যুষ্মং ততো বিশ্বরূপাদধাঃ ধৃতবানসি, তদেবং বিদ্যয়া সারং গাত্রং যাচধ্বমিত্যর্থঃ॥

১। স যযৌ (ঘ); ২। যথাতথম্ (ঘ); ৩। প্রপদীমুবাচ (ঘ)।

৫৩। নন্বু প্রেষ্ঠং দেহং কথং দাস্যতি? তত্রাহ—যুষ্মভ্যমঙ্গান্যস্থীনি যাচিতঃ সন্ দাস্যতি, যতো ধর্ম্মজ্ঞঃ; বিশেষতোঽশ্বিভ্যাং শিষ্যপ্রীত্যা দাস্যতি। অঙ্গানীত্যনেন[১] হেয়ত্বং দর্শিতম্। তৈরস্থিভির্বিশ্বকর্ম্মণা বিনির্ম্মিত আয়ুধশ্রেষ্ঠো বজ্রো ভবিষ্যতীতি শেষঃ; যেন ভবান্ বৃত্রস্য শিরো হর্ত্তা হরিষ্যতি, মম তেজসোপবৃংহিতঃ সন্॥

৫৪। তেজশ্চাস্ত্রাণি চ আয়ুধানি চ সম্পদশ্চ ভূয়ঃ প্রাপ্স্যথ। মহাকায়স্ত্রিভুবনগ্রাসী স, স এবাস্মান্ হন্যাদিতি শঙ্কাকুলচিত্তান্ প্রত্যাহ—মৎপরাংশ্চ কেঽপি ন হিংসন্তি, অতো যুষ্মাকং ভদ্রমেবেতি শেষঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
নবমোঽধ্যায়ঃ॥ ৯॥

দশমোঽধ্যায়ঃ

দশমে কেশবাদিষ্টদধ্যগস্থিজ[২]বজ্রধৃক্।
ইন্দ্রোঽযুধ্যত বৃত্রেণ সাসুরেণ সনির্জরঃ॥ (১)

২। তথেতি, মোদমান এব তন্মুখাদ্ধর্ম্মং শ্রোতুকামঃ, প্রত্যাচক্ষাণ ইবোবাচ—অপীতি দ্বাভ্যাম্॥

৩—৪। হে বৃন্দারকাঃ! অপি কিং সংস্থায়াং মৃত্যৌ যোঽভিদ্রোহো দুঃখং তং ন জানীথ? (৪) আত্মা—দেহঃ। 'বয়ং জানীম এব, কিন্তু শ্রীবিষ্ণুরস্মন্মুখেন যাচতে' ইতি চেৎ, তত্রাহ—যাচতে বিষ্ণবেঽপি দাতুং ক উৎসহেত?

১। অস্থীন্যনেন (ঘ); ২। -দধ্যঙ্ঙস্থিজ- (ঘ)।

৫। পুণ্যশ্লোকৈরীড্যানি কর্ম্মাণি যেষাম্ ॥

৬। যাচকো যদি বেদ, তর্হি ন যাচেত ; যদীশ্বরো দানসমর্থো বেদ[১], তর্হি সোঽপি নেতি, নাহ, অতো যথা তব সঙ্কটং বয়ং স্বার্থপরা ন জানীম এবং প্রত্যাচক্ষাণস্ত্বমস্মৎসঙ্কটং ন জানাসীতি ভাবঃ ॥

৭। মে ময়া প্রত্যুদাহৃতাঃ প্রত্যুক্তাঃ। ত্যজন্তং মা ত্যক্ত্বা যান্তম্, আত্মানং দেহম্ ॥

৮। অধ্রুবেণাত্মনা দেহেন। হে নাথাঃ!

৯। ভূতানাং শোকেন শোচতি, হর্ষেণ হৃষ্যতি য আত্মা স্বয়ম্, তস্য যো ধর্ম্মঃ, এতাবানেবাব্যয় ইত্যর্থঃ ॥

১০। পারক্যৈঃ শ্বশৃগালাদিভির্ভক্ষ্যৈঃ, অস্বার্থৈঃ স্বার্থোপযোগশূন্যৈঃ[২], স্বং বিত্তম্, জ্ঞাতয়ঃ পুত্রাদয়ঃ, বিগ্রহো দেহস্তৈর্নোপকুর্য্যাদিতি যৎ ॥

১১। কৃতং ব্যবসিতং নিশ্চয়ো যেন। আত্মানং ক্ষেত্রজ্ঞং সন্নয়ন্নেকী-কুর্ব্বংস্তনুং জহৌ ॥

১২। যতা অক্ষাদয়ো যেন, তত্ত্বং পশ্যতীতি তথা ; ধ্বস্তানি গতানি বন্ধনানি যস্য ॥

১৩—১৪। অথেন্দ্রোঽশোভত ইত্যুত্তরেণান্বয়ঃ। মুনেঃ শক্তিভি-রস্থিভির্নির্ম্মিতম্ ; উৎসিক্ত ঊর্জ্জিতঃ ; মুনেরস্থিভিরিতি বা পাঠঃ ॥

১৫। অসুরানীকানাং যূথপৈঃ পর্য্যস্তং পরিবৃতম্ ॥

১৬। রণঃ সংগ্রামঃ, প্রথমে যুগে কৃতযুগে, ত্রেতাযুগস্য মুখ আরম্ভে ॥

১৮। নামৃষ্যন্—নাসহন্ত ॥

২৩। 'শতঘ্নী তু চতুর্হস্তা লৌহকণ্টকসঞ্চিতা। ভুশুণ্ডী সর্ব্বতো লৌহকণ্টকানুক্রমোন্নতা ॥' ইত্যভিধানম্ ॥

১। -সমর্থশ্চেৎ (ঘ) ; ২। আত্মোপযোগশূন্যৈঃ (ঘ)।

২৪। পুঙ্খো মূলদেশঃ ; একস্য মূলদেশমনু তৎসংলগ্নোঽপরস্য পুঙ্খো যথা ভবতি, তথা ; নভস্থৈর্ঘনৈর্জ্যোতীংষীবেত্যনেন তেষাং তদপ্রাপ্তিঃ সূচিতা ॥

২৫। তামেবাহ—ন ত ইতি। শস্ত্রাণামস্ত্রাণাঞ্চ যানি বর্ষাণি, তেষা-মোঘা নাসেতুর্ন প্রাপুঃ। সিদ্ধপথে—আকাশে ॥

২৬। ক্ষীণা অস্ত্রাণাং শস্ত্রাণাঞ্চ ওঘা যেষাম্। গিরিশৃঙ্গৈদ্রু মৈ-রুপলৈশ্চ ॥

২৭। তানিন্দ্রসৈনিকান্, শস্ত্রাণামস্ত্রাণাঞ্চ পূগৈঃ সমূহৈরক্ষতান্ ক্ষতশূন্যান্, স্বস্তিমতঃ সুখিনঃ, দ্রুমাদিভিশ্চাবিক্ষতান্ নিশাম্য দৃষ্ট্বা ; বৃত্রো নাথো যেষাং তে তত্রসুর্ভীতাঃ ॥

২৮। কৃতাঃ কৃতাঃ পুনঃপুনঃ কৃতাঃ। কৃষ্ণোঽনুকূলো যেষাং তেষু দেবগণেষু। উষতীরুষত্যঃ[১] অকল্যাণ্যঃ, রূক্ষাঃ পরুষা বাচো যথা মহৎসু ক্ষোভকর্ত্র্যো ন ভবন্তি, তদ্বৎ ॥

২৯। হতো যুদ্ধে দর্পো যেষাম্, আত্তঃ পরৈর্গৃহীতঃ সারো ধৈর্য্যং যেষাম্, তেঽতিপ্রসিদ্ধা অপি তে দৈত্যাঃ ; এবং হি ত ইত্যস্যাপৌন-রুক্ত্যম্। আজিমুখে যুদ্ধারম্ভে পতিং বিসৃজ্য পলায়নায় মনো দধুঃ, যতো হৃরাবভক্তাঃ ॥

৩০। প্রধাবতঃ পলায়মানান্ প্রেক্ষ্য, আদাবেব তীব্রেণ ভয়েন পলায়িতং ভগ্নঞ্চ যদ্বলং সৈন্যং তচ্চ প্রেক্ষ্য, এতদ্ বক্ষ্যমাণং বভাষে ॥

৩১। তদেব বিশিনষ্টি—কালোপপন্নামবসরোচিতাম্, মনস্বিনাং রুচিরাম্, হে ময় ! হে অনর্ব্বন্ ! মে বাচং শৃণুত ॥

৩২। ততো মৃত্যোরিহ যশো লোকঃ স্বর্গশ্চ যদি স্যাৎ, অথ তর্হ্যমুং মৃত্যুং যুক্তং সমীচীনং প্রাপ্তুং বা ॥

১। রুষতী রুষত্যঃ (ঘ)।

৩৩। ব্রহ্মসন্ধারণয়া কলেবরং বিজহ্যাদিতি যৎ, স একো মৃত্যুঃ। বীরশয়ে রণভূমৌ, অনিবৃত্তোঽপরাঙ্মুখঃ সন্ বিজহ্যাদিতি যৎ, স চৈকঃ। তৌ দ্বাবিহ শাস্ত্রে সম্মতৌ মৃত্যু ; তথা চ স্মৃতিঃ —'দ্বাবিমৌ পুরুষৌ লোকে সূর্য্যমণ্ডলভেদিনৌ। পরিব্রাড়্ যোগযুক্তশ্চ রণে চাভিমুখে হতঃ॥' ইতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
দশমোঽধ্যায়ঃ ॥ ১০ ॥

একাদশোঽধ্যায়ঃ

একাদশে তু বৃত্রস্য যুধ্যমানস্য বজ্রিণা।
ভক্তিজ্ঞানবলোদর্কাশ্চিত্রা বাচোঽনুবর্ণিতাঃ॥ (১)

১। শংসতঃ কথয়তঃ, পত্যুর্ব্বচঃ॥

২। কালানুকূলৈঃ কালানুবর্ত্তিভিঃ ; কাল্যমানাং বিদ্রাব্যমাণাম্॥

৩। অমর্ষিতোঽসহমানস্তাংস্ত্রিদশান্ নিবার্য্য নির্ভর্ৎস্য চেদং বক্ষ্যমাণমুবাচ॥

৪—৫। তদেবাহ দ্বাভ্যাম্। (৪) মাতুরুচ্চরিতৈঃ পুরীষপ্রায়ৈঃ ; মাতুরুচ্চরিতা ইতি প্রথমান্তপাঠে দেবানাং সম্বোধনম্। পৃষ্ঠতো হতৈর্দৈত্যৈঃ কিম্? ন কিঞ্চিৎ—ন যশো নাপি ধর্ম্মঃ ; তদেবাহ—নহীতি॥ (৫) প্রধনে সংগ্রামে, সারং ধৈর্য্যং হৃদি চেত্তর্হি হে ক্ষুল্লকাঃ! ক্ষুদ্রাঃ! মাত্রং ক্ষণমাত্রং মেঽগ্রে তিষ্ঠত, ন চেদিহলোকভোগে স্পৃহা অস্তি॥

৬। সুরগণান্—রিপূন্। সুমহান্ প্রাণো বলং যস্য। যেন বিচেতসো বভূবুঃ॥

৭। বৃত্রস্য বিস্ফোটনেন নাদেন॥

৮। উদ্যতং শূলং যেন ; নালং বনং নলানাং বনম্ ; উদ্গতো মদো যস্য সঃ ; যূথপতির্গজো যথা মর্দ্দয়তি ॥

১১। সপ্তধনুঃপ্রমাণং দেশম্ ॥

১২। সন্নোঽবসন্নো বাহো যস্য তস্মৈ, ন প্রাযুঙ্‌ক্ত। অমৃতস্যন্দী—অমৃতস্রাবী যঃ স্বকরস্তেনাভিমর্শঃ স্পর্শঃ, তেন বীতব্যথো গতদুঃখঃ ক্ষতো বাহো যস্যেন্দ্রস্য স তথাভূতোঽবতস্থে ॥

১৩। স বৃত্রঃ। হে নৃপেন্দ্র! আহবকাম্যয়া যুদ্ধেচ্ছয়াবস্থিতম্, ভ্রাতৃহণম্—ভ্রাতা বিশ্বরূপস্তস্য হন্তারম্[১]। নৃশংসং ক্রূরম্, তদেবাংহঃ পাপং তস্য কর্ম্ম স্মরন্ ॥

১৪। যো ব্রহ্মহা ব্রাহ্মণং হতবান্, বিশেষতঃ স্বগুরুম্, মম চ ভ্রাতরম্, স ভবানগ্রতঃ সমবস্থিতঃ। এতদ্দিষ্ট্যা ভদ্রং জাতম্ ; দিষ্ট্যেত্যব্যয়মানন্দার্থে। হে অসত্তম! মম শূলেন নির্ভিন্নং দৃষত্তুল্যং হৃৎ হৃদয়ং যস্য, তেন ত্বয়া নিমিত্তভূতেনাস্থাচিরাদেব ভ্রাতুরনৃণোঽহং স্যাম্, এতচ্চ দিষ্ট্যা ॥

১৫। স্বর্গকামো যো ভবানবৃশ্চৎ, স্বর্গকামো যাজ্ঞিকঃ পশোরিবেতি বা ॥

১৬। তত্ত্বামস্পৃষ্টবহ্নিমদগ্ধদেহং সমদন্তি ; বর্ত্তমানসামীপ্যে বর্ত্তমানবন্নির্দ্দেশঃ ॥

১৭। অন্যেঽপি যে অজ্ঞা ইহ ত্বা ত্বাং নৃশংসমনু মহ্যমুদ্যতাস্ত্রাঃ সন্তো যদি প্রহরন্তি, তৈর্ভূতনাথান্ ভৈরবাদীন্ যক্ষ্যামি। কথম্ভূতৈঃ? নিশাতং তীক্ষ্ণীকৃতং যন্মম ত্রিশূলম্, তেন নির্ভিন্নো গলো যেষাং তৈঃ ॥

১৮। অথো অথবা হরে ভো ইন্দ্র! যদি ভবানেব মম শিরো হর্ত্তা হরিষ্যতি, তত্র তথা সত্যনৃণো বিমুক্তকর্ম্মবন্ধনঃ সন্ ভূতেভ্যো বলিং দেহেন বিধায় মনস্বিনাং পাদরজঃ প্রপৎস্যে, ধীরাণাং পদং প্রাপ্স্যামি ॥

১। ভ্রাতরং বিশ্বরূপং হতবন্তং (খ)।

১৯। জীবিতাদপি মৃত্যুরেব মমাভিমত ইত্যাশয়েনাহ—সুরেশেতি। ন হিনোষি, ন ক্ষিপসি। গদেব নিষ্ফলো যাস্যতীতি সংশয়ং মা কার্ষীঃ; কৃপণাদর্থঃ প্রয়োজনং যস্যাঃ সা যাচ্ঞা যথা নিষ্ফলা, তথা ন স্যাৎ ॥

২০। অমোঘত্বে হেতুং বদন্ তং প্রোৎসাহয়তি—নন্বিতি। তেজিতঃ তীক্ষ্ণীকৃতঃ; শত্রুং মাং জহি; বিষ্ণুনা যন্ত্রিতঃ প্রেরিতঃ ॥

২১। হননে মম পীড়া স্যাদিত্যপি মা সংশয়িষ্ঠা ইত্যাশয়েনাহ—অহমিতি। সঙ্কর্ষণো মৎপতির্যথাহ, তথা তদীয়চরণারবিন্দে মনঃ সমাধায় মুনের্যোগিনো গতিমহং যাস্যামি। তব বজ্রস্য রংহসা লুলিতশ্ছিন্নো গ্রাম্যপাশো বিষয়ভোগলক্ষণো যস্য; অপবিদ্ধলোকস্ত্যক্তদেহঃ ॥

২২। তর্হি ভগবান্ সঙ্কর্ষণঃ স্বভৃত্যায় মহ্যমেব স্বর্গাদিসম্পদো দাস্যতীত্যপি মা সংশয়িষ্ঠা ইত্যাহ—পুংসামিতি। স্বর্গে ভূমৌ রসাতলে চ যাঃ সম্পদস্তাঃ কিল নিশ্চিতং ন রাতি, ন দদাতি। তত্র হেতুঃ—যদ্ যাভ্যো দ্বেষাদয়ো ভবন্তি ॥

২৩। তর্হি স্বভক্তস্য কিং বিধত্তে? তত্রাহ—ত্রৈবর্গিকো ধর্ম্মার্থকামবিষয়ো য আয়াসস্তস্য বিঘাতং বিধত্তে। তত আয়াসোপরমাদেবানুমেয়ঃ, ন ত্বৈশ্বর্য্যাদিনা। অতঃ সম্যগ্ভগবৎপ্রসাদাভাবাত্তব সম্পদো ভবিষ্যন্তীতি ভাবঃ ॥

২৪। এবমিন্দ্রায় স্বাভিপ্রায়ং নিবেদ্য ভগবন্তং প্রার্থয়তে—অহমিতি। তব পাদাবেবৈকং মূলমাশ্রয়ো যেষাং তেষাং দাসানামনুদাসো ভূয়ো ভবিতাস্মি ভবিষ্যামি ভবেয়ম্। অসুপতেঃ প্রাণনাথস্য তব গুণান্ মম মনঃ স্মরতু, বাগপি তানেব কীর্ত্তয়তু, কায়স্তবৈব কর্ম্ম করোতু ॥

২৫। ননু কিং দাস্যেন? তুভ্যং মহাফলানি দাস্যামি, তত্রাহ—নাকপৃষ্ঠং ধ্রুবপদং ব্রহ্মলোকাদিকঞ্চ। হে সমঞ্জস! নিখিলসৌভাগ্যনিধে ত্বা ত্বাং বিরহয্য পৃথক্কৃত্য ন কাঙ্ক্ষে নেচ্ছামি ॥

২৬। তর্হি কিমিচ্ছসি? তদাহ—অজাতপক্ষাঃ খগাঃ ক্ষুধাদিভিঃ পীড়িতা যথা মাতরম্, যথা চ দাম্না বদ্ধা বালবৎসাঃ স্তন্যম্, যথা চ ব্যুষিতং দূরদেশং গতং প্রিয়ং কামেন বিষণ্ণা প্রিয়া, তথা মে মনঃ তাপত্রয়পীড়িতং কর্ম্মভির্ব্বদ্ধং কামাদিভির্বিষণ্ণঞ্চ ত্বাং দিদৃক্ষতে দ্রষ্টুমিচ্ছতীত্যর্থঃ ॥

২৭। উত্তমঃশ্লোকস্য তব জনেষু ভক্তেষ্বেব সখ্যং ভূয়াৎ। ত্বন্মায়য়া দেহাদিষ্বাসক্তচিত্তস্য ভূয়োঽপি তেষ্বাসক্তির্ন ভূয়াৎ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
একাদশোঽধ্যায়ঃ ॥ ১১ ॥

দ্বাদশোঽধ্যায়ঃ

দ্বাদশেঽতিবিষণ্ণেন স্বয়মুৎসাহিতেন তু।
মহেন্দ্রেণ মহাযুদ্ধে বৃত্রস্য বধ ঈর্য্যতে ॥ (১)

১। মহাপুরুষং শ্রীবিষ্ণুম্; অপ্সু প্রলয়োদকে ॥

২। যুগান্তাগ্নিবৎ কঠোরা জিহ্বা শিখা যস্য; তদাবিধ্য ভ্রাময়িত্বা ॥

৩। তৎ খে, আপতৎ আগচ্ছৎ, বিচলৎ পরিভ্রমৎ, গ্রহশ্চ উল্কা চ গ্রহোল্কম্, তদ্বৎ দুষ্প্রেক্ষ্যম্। শতং পর্ব্বাণি যস্য তেন। উরগরাজো বাসুকিস্তস্য ভোগো দেহস্তদাকারম্ ॥

৪। হনৌ কপোলপ্রান্তে; অমরেভমৈরাবতঞ্চ ॥

৬। পুনশ্চ তমাহ বৃত্রঃ—হে হরে! ইন্দ্র! ॥

৭। সদা জয়ো নৈব, কিন্তু কুত্রচিজ্জয় একত্র, কুত্রচিন্ন বৈ; যদ্বা, কুত্রচিদপি যুযুৎসতাং সদা জয়ো ন বৈ, কিন্ত্বেকত্রৈব কদাচিদেবেত্যর্থঃ। পরো দেহ আত্মা যেষাম্, পরাধীনাত্মনামিতি বা। আত্মমনাদিম্; সনাতনম্—নিত্যম্ ॥

৮—১৪। পরাধীনতামেবাহ—লোকা ইতি সপ্তভিঃ। (৮) যস্য বশে স্থিতাঃ স্বয়ং বিবশাঃ সন্তঃ শ্বসন্তি চেষ্টন্তে; দ্বিজাঃ পক্ষিণঃ, শিচা জালেন। কালঃ কলয়তীতি ভগবানিহ জয়াদৌ কারণম্॥ (৯) ওজ-আদিরূপং তং কালং হেতুমজ্ঞায়াবিজ্ঞায় জড়ং সন্তমাত্মানং দেহং হেতুং মন্যতে॥ (১১) নন্থ স্বারম্ভকপ্রধানপুরুষাদিতন্ত্রাণীতি যুক্তম্? তত্রাহ—পুরুষ ইতি। ব্যক্তম্—মহত্তত্ত্বম্; আত্মা—অহঙ্কারঃ॥ (১২) নন্থ 'স্ব-কর্ম্মদ্বারা জীব এব সৃষ্ট্যাদিহেতুঃ' ইতি মীমাংসকা মন্যন্তে? তত্রাহ—এব-মবিদ্বাননীশমেবাত্মানমীশ্বরং স্বতন্ত্রং মন্যতে। নন্থ পিত্রাদয়ঃ স্রষ্টারো দৃশ্যন্তে, ব্যাঘ্রাদয়শ্চ হন্তারঃ? তত্রাহ—ভূতৈরিতি। স্বয়মীশ্বরঃ॥ (১৩) নন্থ ত্বয়া পরাজিতস্য মম জয়াদিশঙ্কৈব নাস্তি, কিমিতি[১] বলাম্মাং যুদ্ধে প্রবর্ত্তয়সি? তত্রাহ—আয়ুরিতি। তৎকালে জয়াদিকালে বিপর্য্যয়া অকীর্ত্ত্যাদয়ঃ॥ (১৪) যস্মাদেবং সর্ব্বমীশ্বরাধীনম্, তস্মাৎ সমঃ স্যাৎ, হর্ষবিষাদহীনো ভবেৎ॥

১৫। সমদৃষ্টাবুপায়মাহ—সত্ত্বমিতি। হর্ষাদিভির্ন বধ্যতে॥

১৬। হর্ষবিষাদনিবৃত্ত্যৈ তবাহমেব গুরুরিত্যাহ—পশ্যেতি। বৃক্নমায়ুধং ভুজশ্চ যস্য॥

১৭। অনিয়তত্বং দ্যূতরূপকেণোপসংহরতি—প্রাণা এব গ্লহঃ পণো যস্মিন্; ইষব এবাক্ষাঃ পাশকা যস্মিন্; বাহনান্যেব হস্ত্যাদীনীতস্ততশ্চাল্য-মানান্যাসনানি ফলকানি যস্মিন্॥

১৮। গতালীকম্—নিষ্কপটম্॥

১৯। ভক্তঃ—সেবিতবানসি॥

২২। তস্য তব খাতকোদকৈঃ গর্ত্তাদিজলোপমৈঃ স্বর্গাদিভিঃ কিম্?

২৩। যুধাং সংগ্রামাণাং পতী মুখ্যৌ॥

১। কিমতি (ঘ)।

২৪। হে মারিষ শ্রেষ্ঠ! হে রাজন্! ॥

২৬। উৎকৃত্তং মূলং যয়োস্তাভ্যাম্; রক্তং স্রবতীতি তথা; গোত্রঃ পর্ব্বতঃ ॥

২৭—২৯। কৃত্বাধরামিত্যাদের্জগ্রাসেতি তৃতীয়েনান্বয়ঃ। (২৭) নভোবদ্-গম্ভীরেণ বক্ত্রেণ; লেলিহঃ সর্পঃ, তদ্বদুল্বণয়া জিহ্বয়া ॥ (২৮) কাল-কল্পাভির্মৃত্যু[১]তুল্যাভির্দংষ্ট্রাভিগ্রসন্নিব। অতিমাত্রোঽত্যুচ্ছ্রিতো মহান্ কায়ো যস্য; আক্ষিপন্—চালয়ন্ ॥ (২৯) নির্জরয়ন্—চূর্ণয়ন্ ॥

৩০। মহাপ্রাণো মহাবলঃ; মহাবীর্য্যো মহাপ্রভাবঃ ॥

৩১। মহাপুরুষেণ কবচরূপেণ শ্রীনারায়ণেন সন্নদ্ধো দংশিতঃ; যোগবলেন মায়াবলেন চ ॥

৩২। বলভিদিন্দ্র উচ্চকর্ত্ত চিচ্ছেদ ॥

৩৩। তস্য কন্ধরং কন্ধরাম্, আশুবেগোঽতিবেগবান্, জ্যোতিষাং সূর্য্যাদীনাময়নে দক্ষিণোত্তরগতিরূপে সংবৎসরে, যোঽহর্গণঃ ষষ্ট্যুত্তরশত-ত্রয়াত্মকস্তাবতাহর্গণেনৈব বার্ত্রহত্যে বৃত্রহত্যাযোগ্যে কালে ন্যপাতয়ৎ; যদ্বা, স্বার্থে তদ্ধিতঃ, বৃত্রহত্যায়াং বৃত্রহননার্থং পরিবর্ত্তমান ইত্যর্থঃ ॥

৩৪। বার্ত্রঘ্নলিঙ্গৈর্মন্ত্রৈর্বৃত্রহন্তৃবীর্য্যপ্রকাশকৈঃ 'বার্ত্রহত্যায শবসে[২] পৃতনাসাহ্যায় চ' ইত্যাদ্যৈস্তমিন্দ্রমভিষ্টুবানা অভিষ্টুবন্তঃ ॥

৩৫। অলোকং লোকাতীতং ভগবন্তম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

১। কাল-(ঘ); ২। -শ্রবসে (ঘ)।

ত্রয়োদশোঽধ্যায়ঃ

ত্রয়োদশে তু বৃত্রাখ্য[1]-ব্রহ্মহত্যামহাভয়াৎ।
চিরং নষ্টোঽবিতঃ শক্রো বিষ্ণুনেতি নিরূপ্যতে ॥ (১)

২। অনির্বৃতং শক্রমপৃষ্ট্বা স্বয়মেব প্রতিজগ্মুঃ ॥

৩। হরেরিন্দ্রস্য ॥

৪। তস্য দুঃখহেতুং বক্তুং প্রস্তাবকথামাহ—বৃত্রবিক্রমেত্যাদিনা। আর্থয়ন্ প্রার্থয়ন্, বৃহদ্বধাদ্ ব্রহ্মবধাদ্ ভীতঃ সন্ ॥

৫। এনঃ পাপং বিভক্তং বিভজ্য গৃহীতম্। মার্জ্মি শোধয়ামি।

১০। বৃষাকপিমিন্দ্রম্ ॥

১১। তয়া দেবাদিভিঃ কারিতয়া; স্মেত্যবধারণে; ইন্দ্র এব তাপমসহন্নান্তঃ, অমুমিন্দ্রং নির্বৃতির্নাবিশৎ। নন্থ ধৈর্য্যাদিগুণযুক্তস্য কুতোঽনির্বৃতিঃ? তত্রাহ —হ্রীমন্তং লজ্জাযুক্তম্, বাচ্যতাং নিন্দ্যতাম্ ॥

১২। যক্ষ্মগ্রস্তাম্—ক্ষয়রোগব্যাপ্তাম্ ॥

১৩। মীনস্যেব গন্ধো যস্য স মীনগন্ধিঃ, স চাসাবসুশ্চ প্রাণঃ শ্বাসবায়ুস্তস্য গন্ধেন ॥

১৪। প্রাগুদীচীং দিশং গতঃ সন্ তূর্ণং মানসং সরঃ প্রবিষ্টঃ ॥

১৫। স ইন্দ্রঃ সহস্রং বর্ষাণি পুষ্করনালস্য তন্তুনাবসৎ। কথম্ভূতঃ? ন লব্ধো ভোগো যেন সঃ। কুতঃ? যদ্যস্মাদিহ জলেঽবসৎ, অগ্নিদূতশ্চ স্বয়মগ্নেশ্চ স্বদূতস্য হবির্ভাগানেতুর্জলে প্রবেশাসম্ভবাদলব্ধভোগ ইত্যর্থঃ। অলব্ধভাগ ইতি পাঠে ন লব্ধো যজ্ঞভাগো যেন সঃ ॥

১৬। ত্রিনাকং ন অকং দুঃখং যস্মিন্নিতি নাকঃ পুণ্যলোকঃ, তৃতীয়ং নাকং স্বর্গম্। নন্থ মনুষ্যস্য[2] কুতঃ স্বর্গরাজ্যম্? তত্রাহ—বিদ্যাদিভিরনুভাবঃ

১। বৃত্রস্য (ঘ); ২। মনুজস্য (খ)।

স্বর্গপালনসামর্থ্যং যস্য সঃ। তর্হি তস্মিন্ সতি কথমিন্দ্রস্য পুনঃ স্বর্গপ্রাপ্তিঃ? তত্রাহ—স নহুষঃ, সম্পদৈশ্বর্য্যাভ্যাং যো মদস্তেনান্ধা বুদ্ধির্যস্য সঃ, ইন্দ্র-পত্ন্যা শচ্যা তিরশ্চাং গতিং সর্পযোনিং নীত উপায়েন প্রাপিতঃ; এবং হ্যাখ্যায়তে—"নহুষঃ কিল কদাচিদিন্দ্রাণীমুবাচ,—'ইন্দ্রস্তাবদহম্, অতস্ত্বং মাং ভজ' ইতি। তয়া চাবেদিতবৃত্তান্তো বৃহস্পতিস্তামুবাচ,—'ব্রাহ্মণবাহ্য-শিবিকামারুহ্যাগতং ত্বাং ভজিষ্যামীতি ব্রূহি; ততোঽসৌ ব্রহ্মশাপাৎ পতিষ্যতি' ইতি। তয়া চ তথোক্তো নহুষোঽগস্ত্যাদীন্ শিবিকাং বাহয়ামাস, তদা চ শীঘ্রং সর্প সর্পেতি অগস্ত্যং পদা পস্পর্শ। তেন চ কুপিতেন 'সর্পো ভব' ইতি শপ্তো মহাসর্পোঽজগরোঽভূৎ" ইতি॥

১৭। তত ইন্দ্রঃ স্বর্গং গতঃ প্রাপ্তঃ। কথম্ভূতঃ? ব্রহ্মগিরা ব্রাহ্মণ-বাক্যেনোপহূতঃ সন্, ঋতম্ভরঃ সত্যপালকো হরিস্তস্য ধ্যানেন নিবারিতমঘং যেন। প্রাগপি তু পাপো ব্রহ্মবধস্তমিন্দ্রং নাভ্যভূত্তস্যাভিভবং নাকরোৎ। কুতঃ? দিগ্‌দেবতয়া প্রাগুদীচ্যাং দিশি স্থিতয়া শ্রীরুদ্রেণাবিতং রক্ষিতং সন্তম্॥

১৮। পুরুষস্য হরেরারাধনং যস্মিন্ তেন॥

১৯। সর্ব্বদেবময় আত্মা মূর্ত্তির্যস্য তস্মিন্; সর্ব্বদেবময়াত্মনীতি বা পাঠঃ। ব্রহ্মবাদিভির্বিততেঽনুষ্ঠিতেঽশ্বমেধে মহেন্দ্রেণেজ্যমানে পুরুষে সতি॥

২০। তেনৈব পুরুষেণৈব শূন্যায় নীতো নাশিত ইত্যর্থঃ॥

২১। অধিকৃতা যজ্ঞা যেন তম্॥

২২। পাঠাদি বিধাতুমাখ্যানং স্তৌতি—ইদমিতি। প্রক্ষাল্যতেঽ-নেনেতি প্রক্ষালনম্, তীর্থপদস্যানুকীর্ত্তনং যস্মিন্, ভক্তেরুচ্ছ্রয়ো যস্মিন্, ভক্তজনানামনুবর্ণনং যস্মিন্, মহেন্দ্রস্য মোক্ষো যস্মিন্, মরুত্বতো বিশেষেণ জয়ো যস্মিন্॥

২৩। ইন্দ্রিয়ং তৎপাটবকরমিন্দ্রসম্বন্ধীতি বা ; আয়ুষমায়ুষ্যম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
ত্রয়োদশোঽধ্যায়ঃ ॥ ১৩ ॥

চতুর্দ্দশোঽধ্যায়ঃ

বৃত্রস্য জ্ঞানভক্ত্যাদি শ্রুত্বা পৃষ্টঃ পরীক্ষিতা ।
হেতুমাহ চতুর্ভিস্তৎপ্রাগ্ জন্মচরিতোক্তিভিঃ ॥ (১)

চতুর্দ্দশে তু সহসা কৃচ্ছ্রলব্ধে সুতে মৃতে ।
চিত্রকেতোরতিস্নেহাদতিশোকো নিরূপ্যতে ॥ (২)

১। রজস্তমশ্চ স্বভাবো যস্য ॥

৩—৫। ভক্তের্দুর্ল্লভত্বং দর্শয়তি[১] রজোভিরিতি ত্রিভিঃ। (৩) পার্থিবৈ রজোভিঃ পরমাণুভিঃ সমাঃ সংখ্যাতা অনন্তা ইত্যর্থঃ ; জন্তবো জীবাঃ, তেষাং মধ্যে যে কেচন কতিপয়ে শ্রেয়ো ধর্ম্মমীহন্তে কুর্ব্বন্তি ॥ (৪) মুচ্যেত গৃহাদিসঙ্গান্মুচ্যতে ; সিধ্যতি তত্ত্বং জানাতি ॥

৭। ন চেন্দ্রভয়াৎ কৃষ্ণং শরণং গত ইত্যাহ—যঃ পৌরুষেণেতি ॥

৯। যথা যথাবচ্ছৃণু ॥

১১। ভার্য্যাসহস্রাণাং দশসহস্রাণি কোটিরিত্যর্থঃ। সান্তানিকঃ স্বয়ং সন্তানার্হোঽপি পুত্রোৎপাদনসমর্থোঽপি তাসু সন্ততিং ন লেভে। সর্ব্বাস্তাঃ স্ত্রিয়ো বন্ধ্যা এব দৈবযোগেন মিলিতা ইতি ভাবঃ ॥

১২। তদেবাহ—বন্ধ্যাপতেরিতি ॥

১। প্রবক্ষ্যতি (ঘ)।

১৫। উপাসীদত্তস্য সমীপ উপবিবেশ সমাহিতঃ সংযতঃ ॥

১৭। অপি কিমনাময়মারোগ্যম্, স্বস্তি শুভম্? প্রকৃত্যধীনমেব রাজ্যমিতি সদৃষ্টান্তমাহ—যথা মহদাদিভিঃ[১] সপ্তভিঃ প্রকৃতিভিঃ পুমান্ জীবো নিত্যং গুপ্তো ভবতি, ন তু তদ্ব্যতিরেকেণ ক্ষণমপি তিষ্ঠতি; তথা রাজা চ সপ্তভিঃ[২], 'স্বাম্যমাত্যৌ জনপদা দুর্গদ্রবিণসঞ্চয়াঃ। দণ্ডো মিত্রঞ্চ তস্যৈতাঃ সপ্ত প্রকৃতয়ো মতাঃ॥' ইত্যুক্তলক্ষণাভির্নিত্যং গুপ্তঃ সন্; স্বামী গুরুঃ স্বয়ং বা ॥

১৮। আত্মানং প্রকৃতিষ্বদ্ধা সাক্ষান্নিধায় তদনুবর্ত্তিনং কৃত্বা শ্রেয়ো রাজ্যসুখং প্রাপ্নুয়াদিত্যর্থঃ। প্রকৃতীনাঞ্চ সুখং রাজাধীনমেবেত্যাহ—হে নরদেব! তথা প্রকৃতয়োঽপি রাজ্ঞাহিতাধয়ো নিহিতনিক্ষেপা ধনৈঃ সমৃদ্ধা ভবন্তি; আহতাধয় ইতি পাঠে আ সমন্ততো হতাধয়ো নিরস্তমনোদুঃখা ভবন্তীত্যর্থঃ ॥

১৯। প্রজাশ্চামাত্যাশ্চ, শ্রেণ্যঃ সময়বিশেষেণ সংঘশো বর্ত্তমানা বণিক্-প্রভৃতয়ঃ, পৌরাঃ পুরবাসিনঃ, জানপদাস্তত্তদ্দেশাধিকারিণঃ; মন্ত্র-সহায়ো মন্ত্রী, কর্ম্মসহায়োঽমাত্য ইতি ভেদঃ ॥

২০। তব মনঃ স্ববশং বা ন বেত্যর্থাৎ পৃচ্ছতি—যস্যাত্মা মনঃ, অনুবশোঽনুবর্ত্ত্যধীনঃ স্যাত্তস্য বশগা ইমে সর্ব্বে ভবন্তি, কিঞ্চ লোকাশ্চ তস্য বলিং যচ্ছন্তি ॥

২১। আত্মা ভবানাত্মনো ন প্রীয়তে ন তুষ্যতি, তৎ কিং পরতো বা স্বতো বালব্ধকামং ত্বাং লক্ষয়ে ॥

২২। বিদুষা সর্ব্বজ্ঞেনাপি ॥

২৩—২৬। অলব্ধকামত্বং কথয়ন্ পুত্রং যাচতে—ভগবন্নিতি চতুর্ভিঃ। (২৫) অপ্রজমপুত্রম্; ক্ষুত্তৃড়্ভ্যামন্নপানকামমপরে স্রক্চন্দনাদয়ো যথা

১। মহদাত্মাভিঃ (ঘ); ২। সপ্তপ্রকৃতিভিঃ (ঘ)।

ন সুখয়ন্তি ॥ (২৬) পূর্ব্বৈঃ পিত্রাদিভিঃ সহ গতং প্রাপ্তং তমো নরকম্; প্রজয়া যথা তরেম, তথা নো বিধেহি ॥

২৮। যজ্ঞোচ্ছিষ্টম্—যজ্ঞশেষম্ ॥

২৯। জন্মনা হর্ষং মরণেন চ শোকং[১] প্রদদাতীতি তথা, ইত্যেবমুক্ত্বা যযৌ ॥

৩১। শূরসেনানামীশস্য তেজসা বীর্য্যেণ যো গর্ভঃ, স ববৃধে ॥

৩৩। জাতকম্—জাতকর্ম্ম ॥

৩৪। অর্ব্বুদম্—দশকোটয়ঃ, বেদে তু 'কোটিরেবার্ব্বুদম্, নিযুতঞ্চ প্রযুতঞ্চার্ব্বুদং চ' ইতি প্রযুতানন্তরনির্দ্দেশাৎ ॥

৩৫। ধন্যম্—ধনকরম্; আয়ুষ্যম্—আয়ুষ্করম্; মহামনাঃ—অত্যুদারঃ ॥

৩৭। মোহস্য সমুদ্ভবো যস্মিন্; প্রজাকামরূপো জ্বরস্তাপঃ ॥

৩৮। দার ইত্যেকবচনমার্ষম্ ॥

৩৯। আনপত্যেন—অপুত্রত্বনিমিত্তেন ॥

৪০। ন গৃহে সম্মতাং ন বহুমতাম্; যদ্বা, গৃহিণ্যেব গৃহম্, ন ভার্য্যেতি সম্মতামিত্যর্থঃ ॥

৪১। দাস্যা দাসী যথা, তথা বয়ং দুর্ভগাঃ ॥

৪২। ন সম্মতা বৃত্তির্জীবনং যাসাম্ ॥

৪৩। বিদ্বেষেণ নষ্টা মতির্যাসাং তাঃ; গরম্—বিষম্; দুর্ম্মর্ষাঃ—অসহমানাঃ ॥

৪৫। ধাত্রীম্—স্তনদায়িনীম্ ॥

৪৬। উদ্গতে তারকে কনীনিকে যয়োস্তে লোচনে যস্য তম্ ॥

৪৮। বিভ্রষ্টাঃ শিরোরুহা অম্বরে চ যস্যাঃ ॥

১। দুঃখং (গ)।

৪৯। তাশ্চ সপত্ন্যোঽপি ॥

৫০। অলক্ষিতোঽন্যকো মৃত্যুর্হেতুর্যস্য তম্। অনুগতাঃ প্রকৃতয়োঽমাত্যাদয়ো যস্য, সোঽনুপ্রকৃতিঃ ॥

৫১। বাষ্পকলাভিরশ্রুবিন্দুভিরুপরোধতঃ সংবৃতত্বেন নিরুদ্ধঃ কণ্ঠো যস্য ॥

৫২। তমুরুশুচাপিতং বহুশোকেন ব্যাপ্তমেকমেব সন্ততিরূপম্ ॥

৫৩। বিগলন্ত্যঃ স্রজো যেভ্যস্তান্ কেশান্ ॥

৫৪। আত্মসৃষ্টেরপ্রতিরূপমননুরূপং চেষ্টসে ; তদেবাহ—নু অহো পরে বৃদ্ধে জীবতি, অপরস্য বালস্য যা মৃতিস্তৎ ; তথা হি বৃদ্ধস্য সৃষ্টি-সামর্থ্যাভাবে বালে চ মৃতে সতি তব সৃষ্টির্নষ্টা স্যাদিত্যর্থঃ। নন্বু সাম্প্রতং স্বসৃষ্টের্বিপরীতোঽস্মীতি চেৎ, তত্রাহ—বিপর্যয়ঃ বিপরীতোঽসি চেৎ, তর্হি ত্বং প্রাণিনামতিদুঃখকারিত্বাদধ্রুবো নিত্যঃ পরঃ শত্রুরসি, ন তু কৃপালুরিত্যর্থঃ ॥

৫৫। নন্বু জীবস্য কর্ম্মানুসারেণ জন্মাদি কুর্ব্বতো মম কোঽপরাধঃ ? তত্রাহ—ন হীতি। পুত্রে জীবত্যেব পিতা ম্রিয়তে, পিতরি জীবত্যেব পুত্রো জায়ত ইতি ক্রমো নাস্তি। কর্ম্মাধীনত্বাদিতি চেৎ, তর্হ্যাত্মকর্ম্মভিরেব তজ্জন্মাদিকমস্তু, কিং ত্বয়া কৃত্যম্ ? নন্বু ময়েশ্বরেণ বিনা জড়ৈঃ কর্ম্মভিরিদং কথং সিধ্যেৎ ? ভবতু নাম, তথাপি নিজসর্গবৃদ্ধয়ে তে ত্বয়া যঃ স্নেহপাশঃ কৃতঃ, তমিমং স্বয়মেব বিবৃশ্চসি ছিনৎসীত্যাক্রোশতি। ন হ্যেবংবিধং দুঃখং দৃষ্ট্বা কশ্চিদপি পুত্রাদিষু স্নেহং করিষ্যতীতি ভাবঃ ॥

৫৬। অপ্রজদুস্তরমপ্রজানাং দুস্তরম্, অকরুণেন সহ ॥

৫৭। অশনয়া—ক্ষুধা ॥

৫৮। তনূজ! হে পুত্র! নাহং প্রথমং ত্বৎপার্শ্বমাগতা সতী তব মুগ্ধস্মিতং বক্ত্রং দদৃশে দৃষ্টবত্যস্মি, ইদানীমপি গিরো ন শৃণোমি, তর্হি কিমপুনরন্বয়ং পুনরাগমনং যথা ন ভবতি, তথা গতোঽসি?

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ ॥ ১৪ ॥

পঞ্চদশোঽধ্যায়ঃ

ততঃ পঞ্চদশে চিত্রকেতোঃ শোকাপনোদনম্।
কৃতং তত্ত্বোপদেশেন নারদেনাঙ্গিরোযুজা ॥ (১)

১। মৃতকোপান্তে—শবসমীপে ॥

২। ত্বঞ্চাস্য বন্ধূনাং মধ্যে কতমঃ? সৃষ্টৌ প্রজারূপায়াম্। অয়ং পুত্রোঽহঞ্চাস্য পিতেতি চেৎ, তত্রাহতুঃ—পুরেতি; যে পূর্ব্বজন্মনি পিত্রাদি-রূপেণ সংযুক্তা আসন্, ত এব মরণেন ততো বিযুক্তাঃ সন্তো বর্ত্তমানজন্মনি কদাচিত্তস্যৈবান্যস্য বা পুত্রাদয়ো ভবন্তি, তে জন্মান্তরে তস্যৈবান্যস্য বা কলত্রাদয়ঃ শত্রুমিত্রাদয়ো বা ভবন্তি, ততো নায়ং নিয়ম ইতি ভাবঃ ॥

৩। তমেবাভিপ্রায়ং প্রকটয়তি—যথেতি। স্রোতসঃ প্রবাহস্য বেগেন যথা প্রযান্তি বিযুজ্যন্তে, সংযান্তি সংযুজ্যন্তে চ, তথা কালবেগেন দেহিনো জীবা অপি ॥

৪। তথাপ্যেতাবন্তং কালং মম পুত্রো নাভূৎ, বার্দ্ধকে জাতো মৃত ইতি দুঃখমিতি চেৎ, তত্রাহতুঃ—যথা ধানাসু বীজেষু ধানা বীজান্তরাণি ভবন্তি, কাসুচিৎ কদাচিন্ন ভবন্তি নোৎপদ্যন্তে নশ্যন্তি বা; ন তু ভবন্ত্যেব তিষ্ঠন্ত্যেবেতি নিয়মঃ; এবমেব ভূতানি পুত্রাদিরূপাণি ভূতেষু পিত্রাদি-

রূপেষু ; অতো ধানানাং জন্যজনকত্বেঽপি যথা পিতৃপুত্রাদিভাবো নাস্তি, এবমত্রাপীতি ন শোকঃ কার্য্য ইতি ভাবঃ। ঈশমায়াপ্রেরিতানামেব ভবনমভবনম্, ন তু বস্তুতঃ ॥

৫। তস্য চ সর্ব্বসাধারণত্বান্ন পুত্র এব শোচনীয় ইত্যাহতুঃ —বয়ঞ্চেতি। তুল্যকালা বর্ত্তমানকালীনাঃ, জন্মনঃ প্রাক্, মৃত্যোঃ পশ্চাচ্চ যথা ন সন্তি, এবমধুনাপি ন সন্তি ; ভো রাজন্! আদ্যন্তয়োরসত্ত্বাৎ স্বপ্নবদিত্যর্থঃ ॥

৬। অসত্যে কথং প্রতীতিঃ, কথং বাহমস্য জনক ইত্যাদ্যভিমানঃ? তত্রাহতুঃ —ভূতৈরিতি। ঈশ্বরেণ মায়য়া সৃষ্টত্বাৎ প্রতীতিনিমিত্তমাত্রত্বেনৈব চ ভূতানাময়মভিমান ইতি ভাবঃ। নন্বীশ্বরস্য সৃষ্ট্যাদিভিঃ সাধ্যমস্তি চেৎ, তর্হ্যপূর্ণকামতা প্রাপ্তা, নাস্তি চেৎ কুতঃ প্রবৃত্তিঃ? তত্রাহতুঃ — অনপেক্ষোঽপি বালবল্লীলয়া করোতীতি ॥

৭। অয়ঞ্চ জন্মাদি-ব্যবহারো দেহানামেবানাত্মত্বান্নাত্মন ইত্যাহতুঃ — দেহিনঃ পিতুর্দ্দেহেন দেহিনঃ পুত্রস্য দেহো মাতুর্দ্দেহিনো দেহাদভিজায়তে, যথা বীজাদেব বীজং জায়তে ; দেহী তু শাশ্বত এব অর্থো ভূম্যাদির্যথা তদ্বৎ ॥

৮। নন্বু নশ্বরদেহপ্রতিযোগিত্বাদ্দেহ্যপি ন শাশ্বতঃ স্যাৎ? তত্রাহতুঃ —দেহদেহিনোরয়ং পরস্পরপ্রতিযোগিবিভাগঃ পুরা অনাদিরবিবেকক্লৃতোঽজ্ঞানকল্পিতঃ। জাতিঃ সামান্যম্, ব্যক্তিবিশেষস্তয়োর্বিভাগো যথা বস্তুনি সন্মাত্রে কল্পিতঃ, পরস্পরাপেক্ষসিদ্ধিত্বেনানিরূপ্যত্বাৎ, তদ্বৎ ॥

৯। আধিনা ম্লানং বক্ত্রম্ ॥

১১। উন্মত্তস্যেব লিঙ্গং যেষাং তে ॥

১৬। মম প্রভূ রক্ষকৌ বোধে সমর্থাবিতি বা ; অতো যুবাভ্যাং জ্ঞানদীপঃ প্রবর্ত্ত্যতাম্ ॥

১৮। মহাপুরুষগোচরং হরিভক্তং ত্বাম্ ॥

২০। তদৈব—যদা পূর্ব্বমাগতোঽস্মি ॥

২১। রায়ঃ —অর্থাঃ ॥

২২। চলাঃ —অনিত্যাঃ ; কিঞ্চ মহীতি ॥

২৩। হে শূরসেন ! ইমে সর্ব্বেঽপি শোকাদিপ্রদাঃ, কিঞ্চাগমাপায়িত্বেন গন্ধর্ব্বনগরতুল্যাঃ। গন্ধর্ব্বনগরং হ্যকস্মাদেব ক্বচিদায়াত্যপযাতি চেতি প্রসিদ্ধম্। তদেবমনিত্যত্বং শোকাদিহেতুত্বঞ্চাগমাপায়িত্বঞ্চোক্তম্। মিথ্যাত্বমপ্যাহ—স্বপ্নশ্চ মায়া চ মনোরথশ্চ তে যথা, তদ্বৎ ॥

২৪। এতে মনোভবা মনোমাত্রবিজৃম্ভিতাঃ ; তত্র হেতুঃ —অর্থেন তাত্ত্বিকস্বরূপেণ বিনৈব দৃশ্যমানাঃ। তৎ কুতঃ ? যস্মাৎ ক্ষণান্তরে ন দৃশ্যন্তে, তাত্ত্বিকত্বে হি ক্ষণান্তরে বাধো ন স্যাৎ ; অতো মনোমাত্রবিজৃম্ভিতত্বেন স্বপ্নাদিবন্মিথ্যাভূতা ইত্যর্থঃ। নন্বেতে পুণ্যাপুণ্যকৃতা ইতি মীমাংসকাঃ প্রাহুঃ, তৎ কুতো মনোভবত্বম্ ? তত্রাহ—কর্ম্মভিঃ কর্ম্মবাসনাভিরর্থান্ ধ্যায়তঃ পুংসো মনস এব নিমিত্তাৎ কর্ম্মাণ্যভবন্; কর্ম্মাভিধ্যায়ত ইতি পাঠে কর্ম্ম ঈপ্সিততমমভিধ্যায়ত ইত্যর্থঃ। কর্ম্মণামপি মনোভবত্বাত্তৎসাধ্যা অপি অর্থা মনোভবা এবেতি ভাবঃ ॥

২৫। তদেবং মমতাস্পদানাং পুত্রাদীনাং দুঃখাদিহেতুত্বমুক্তম্। তত্র দেহসম্বন্ধো মূলমিত্যাহ—অয়ং হীতি ; হীত্যবধারণে ; অয়ং দ্রব্যজ্ঞানক্রিয়াত্মকোঽধিভূতাধিদৈবাধ্যাত্মরূপো দেহ এব দেহিনো দেহোঽহমিতি মন্যমানস্য দেহিনো জীবস্য বিবিধান্ ক্লেশান্ সন্তাপাংশ্চ করোতীতি তথা ॥

২৬। স্বস্থেনাব্যগ্রেণ গতিং তত্ত্বং ধ্রুবোঽয়মর্থ ইতি বিশ্রম্ভং বিশ্বাসং প্রণয়ং বা ত্যজ, ততশ্চোপশমমাবিশাশ্রয় ॥

২৭। অঙ্গিরসোপদিষ্টং তত্ত্বং পরমেশ্বরপ্রসাদং বিনা ন প্রাপ্যত ইতি তৎপ্রসাদায় মন্ত্রবিদ্যাং নারদ উপদিশতি—এতামিতি ; উপনিষন্নং পরং

শ্রেয়োঽস্তামিত্যুপনিষৎ, মন্ত্র এবোপনিষৎ, তাং প্রতীচ্ছ গৃহাণ। দ্রষ্টা দ্রক্ষ্যতি ভবান্ ॥

২৮। অতুলঞ্চ তদনধিকঞ্চ সমানাধিকশূন্যং পরং মহিমানং প্রাপুঃ। উপৈতি—উপৈষ্যতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

পঞ্চদশোঽধ্যায়ঃ ॥ ১৫ ॥

ষোড়শোঽধ্যায়ঃ

ষোড়শে তৎসুতোক্ত্যৈব বিশোকীকৃত্য তং নৃপম্।

আদিদেশ মহাবিদ্যাং[১] নারদঃ শেষতোষণীম্ ॥ (১)

১—২। আদৌ তাবত্তৎপুত্রমুখেনৈব পিতৃপুত্রাদিসম্বন্ধো মিথ্যেতি দর্শয়িতুং যোগবলেন তমেব জ্ঞাতীনাং দর্শয়িত্বা 'জীবাত্মন্' ইত্যাদ্যুবাচ ॥

৩। শেষমবশিষ্টমায়ুরস্তি, অপমৃত্যুনা মৃতত্বাদিত্যর্থঃ ॥

৪। তদেব কলেবরং প্রবিশ্যোত্থিতো জীব উবাচ ; যদ্বান্তরালে প্রেত-শরীরে স্থিত্বেতি জ্ঞেয়ম্ ॥

৫। ময়ি মৃতে পুত্রদৃষ্ট্যা শোকশ্চেচ্ছত্রুদৃষ্ট্যা হর্ষঃ কিং ন ক্রিয়ত ইত্যাশয়েন সম্বন্ধস্যানিয়তত্বমাহ—বন্ধবো বিবাহাদিভিঃ সম্বন্ধিনঃ, জ্ঞাতয়ঃ সপিণ্ডাঃ, অরয়ো ঘাতকাঃ, মিত্রাণি রক্ষকাঃ, মধ্যস্থা উভয়ব্যতিরিক্তাঃ সাধারণাঃ, বিদ্বিষো দ্রব্যাদিনিমিত্তেন দ্বেষিণঃ, উদাসীনাস্তদ্ব্যতিরিক্তা ইতি ভেদঃ ॥

১। পরাং বিদ্যাং (গ)।

৬। কর্ম্মভির্ভ্রাম্যমাণত্বে দৃষ্টান্তঃ—যথা পণ্যানি ক্রয়বিক্রয়ার্হাণি কর্ত্তৃষু ব্যবহর্ত্তৃষু পরিভ্রমন্তি, এবং জীবোঽপি যোনিষু জনকেষু॥

৭—৮। একস্মিন্নপি জন্মনি সম্বন্ধস্যানিয়তত্বং সদৃষ্টান্তমাহ দ্বাভ্যাম্। (৭) নিত্যস্য জীবতোঽপ্যর্থস্য পশ্বাদেরনিত্যোঽনিয়তঃ, বিক্রয়াদিনা সম্বন্ধনিবৃত্তেঃ॥ (৮) এবং যোনিগতঃ পিত্রাদিসম্বন্ধং প্রাপ্তোঽপি স জীবো নিত্যঃ, দেহজন্মাদিনা তস্য জন্মাদ্যভাবাৎ; অতএব বস্তুতো নিরহঙ্কৃতঃ 'অহমস্য পুত্রঃ' ইত্যভিমানশূন্যঃ। যত্র পিত্রাদৌ সম্বন্ধিনি যাবদুপলভ্যেত কর্ম্মবশেন বর্ত্তেত, তাবদেব তস্য পিত্রাদেস্তত্তস্মিন্ স্বত্বম্, ন তু বিক্রয়াদ্যুত্তরকালমপি; অথবা এবং সম্বন্ধো যদুক্তং 'কলেবরং স্বমাবিশ্য' ইতি, তত্র তস্মিন্ কলেবরে সমেদানীং স্বত্বং নিবৃত্তমিতি সদৃষ্টান্তমাহ—নিত্যস্য চিরকালাবস্থায়িনঃ সুবর্ণাদের্যোনিগতো দেহং প্রবিষ্টঃ, যত্র দেহে তস্য জীবস্য তত্তস্মিন্ দেহে স্বত্বম্, ন তু মরণোত্তরকালমপীত্যর্থঃ। শেষং সমানম্॥

৯। জীবস্য নিত্যত্বং সাধয়তি—এষ নিত্যঃ। তত্র হেতুঃ—অব্যয়োঽপক্ষয়শূন্যঃ। তৎ কুতঃ? সূক্ষ্মঃ—জন্মাদিশূন্যঃ। তচ্চ কুতঃ? সর্ব্বাশ্রয়ো জন্মাদিমতো দেহাদেরাশ্রয়ঃ, ন তু দেহাদিরূপঃ, যতঃ স্বদৃক্ স্বপ্রকাশঃ। সর্ব্বাশ্রয়ত্বমুপপাদয়তি—আত্মনো মায়াগুণৈরাত্মানমেব বিশ্বং বিশ্বাত্মকং সৃজতি, 'তদাত্মানং স্বয়মকুরুত' ইতি শ্রুতেঃ; উপাদানকারণত্বাৎ সর্ব্বাশ্রয় ইত্যর্থঃ। জীবস্য বস্তুতো ব্রহ্মত্বাদ্‌ব্রহ্মণ এব চিচ্ছক্তিবিশিষ্টস্যেশ্বরত্বেন স্রষ্টৃত্বাজ্জীবঃ সৃজতীতি বাচোযুক্তিঃ; যদ্বা, স্বকর্ম্মদ্বারা সৃষ্টিনিমিত্তত্বেন স্রষ্টৃত্বম্, ভোগস্য চ সর্ব্বস্য ভোক্ত্রাশ্রয়ত্বাৎ সর্ব্বাশ্রয়ত্বঞ্চোক্তমিতি দ্রষ্টব্যম্॥

১০। যদুক্তং 'সুহৃদ্‌বৃতঃ' ইতি, 'সুহৃদো বান্ধবাস্তপ্তাঃ' ইতি চ, তত্রাপ্যাহ—ন হ্যস্যেতি। তত্র হেতুঃ—একঃ সুহৃদাদিসঙ্গরহিতঃ। তৎ

কুতঃ? গুণদোষয়োর্হিতাহিতয়োঃ কর্ত্তৃণাং মিত্রাদীনাং যাঃ সর্ব্বা ধিয়ঃ বিচিত্রা বুদ্ধয়স্তাসাং দ্রষ্টা সাক্ষী ॥

১১। যচ্চোক্তম্ 'ভুঙ্ক্ষ্ব ভোগান্' ইত্যাদি, তত্রাপ্যাহ—নাদত্ত ইতি। গুণং সুখম্, দোষং দুঃখম্, ক্রিয়াফলঞ্চ রাজ্যাদিকম্। উদাসীনত্বে হেতুঃ—পরাবরদৃক্, কারণস্য কার্য্যস্য চ সাক্ষী, ন তু ভোক্তা; যত ঈশ্বরো দেহাদিপারতন্ত্র্যশূন্যঃ; অত এবম্ভূতস্য মম চ যুষ্মাকঞ্চ সম্বন্ধাভাবাচ্ছোক-মোহং মা কুরুতেতি বাক্যার্থঃ॥

১৪। দ্বিজভাষিতমঙ্গিরসা প্রোক্তং পুত্রাদীনাং দুঃখহেতুত্বং স্মরন্ত্যঃ পুত্রকামশূন্যা নির্ম্মৎসরাঃ সত্য ইতি ভাবঃ ॥

১৫। নিবিড়পঙ্কতুল্যং গৃহং বিহায় নিষ্ক্রমণমতিধীরস্য তস্যৈব যোগ্যং নান্যস্যেতি সদৃষ্টান্তমাহ—স ইত্থমিতি। সরসঃ পঙ্কাদ্দ্বিপো গজ ইবেতি ॥

১৬। কৃতাঃ পুণ্যজলক্রিয়া পিতৃতর্পণাদ্যা যেন; সংযতপ্রাণো নিয়তেন্দ্রিয়ঃ ॥

১৮। নমো ধীমহি ধ্যায়েম, মনসা নমস্যাম ইত্যর্থঃ ॥

১৯। নিবৃত্তা দ্বৈতদৃষ্টির্যস্মাৎ ॥

২০। ন্যস্তা নিরস্তাঃ শক্ত্যূর্ম্ময়ো মায়ানিমিত্তা রাগদ্বেষাদয়ো যেন সঃ॥

২১। মনসা সহ বচস্যপ্রাপ্যোপরতে সতি য এক এব প্রকাশতে; বচসীতি সর্ব্বেন্দ্রিয়োপলক্ষণম্; স নোঽস্মানব্যাৎ। সদসৎপরঃ কার্য্য-কারণয়োঃ কারণম্ ॥

২২। তদেবাহ—যস্মিন্নিদমিতি, যস্মিন্নিদং কার্য্যকারণং তিষ্ঠত্যপ্যেতি চ, যতশ্চ জায়তে। মৃন্ময়েষু ঘটাদিষু মৃজ্জাতির্মৃন্মাত্রমিব সর্ব্বান্বনুস্যূতং যত্তস্মৈ ॥

২৩। নমু সর্ব্বাসুস্যুতত্বাজ্জাতিবৎ[1] প্রতীয়তে, কথং মনোবচসোর-প্রাপ্তিঃ ? তত্রাহ—যদ্ব্রহ্ম ব্যোমবদ্ বিততমপি, অসবঃ প্রাণাঃ ক্রিয়া-শক্ত্যা ন স্পৃশন্তি, মনআদীনি চ জ্ঞানশক্ত্যা ন বিদুস্তদ্ব্রহ্ম, নতোঽস্মি ॥

২৪। তেষাং তদজ্ঞানে হেতুমাহ—দেহেন্দ্রিয়াদয়োঽমী যদংশবিদ্ধা যচ্চৈতন্যাংশেনাবিষ্টাঃ সন্তঃ কর্ম্মসু স্বস্ববিষয়েষু প্রচরন্তি, জাগ্রৎস্বপ্নয়ো-রন্যদা সুষুপ্তিমূর্চ্ছাদৌ নৈব প্রচরন্তি, যথাপ্রতপ্তং লৌহং ন দহতি। অতো যথা লৌহমগ্নিশক্ত্যৈব দাহকং সদগ্নিং বিনা ন দহতি, এবং ব্রহ্মগত-জ্ঞানক্রিয়াশক্তিভ্যাং প্রবর্ত্তমানা দেহাদয়স্তন্ন স্পৃশন্তি, ন বিদুশ্চেতি ভাবঃ। জীবস্তর্হি দ্রষ্টৃত্বাজ্জানাতু, নেত্যাহ—স্থানেষু জাগ্রদাদিষু তদ্দ্রষ্ট্রপদেশং দ্রষ্টৃ-সংজ্ঞাং তদেবৈতি প্রাপ্নোতি, 'নান্যো জীবো নামাস্তি', 'নান্যোঽতোঽস্তি দ্রষ্টা' ইত্যাদি-শ্রুতেঃ ; যদ্বা, দ্রষ্ট্রপদেশং দ্রষ্টৃসংজ্ঞং জীবমপি তদেবৈতি জানাতি, ন তু জীবস্তজ্জানাতীত্যর্থঃ। তদুক্তং হংসগুহ্যস্তোত্রে—'দেহোঽ-সবোঽক্ষাঃ' ইত্যাদি ॥

২৫। সকলা যে সাত্বতপরিবৃঢ়াস্তেষাং নিকরঃ সমূহস্তস্য কর-কমলানাং কুট্মলৈর্মুকুলৈরুপলালিতং চরণারবিন্দযুগলং যস্য, তস্য সম্বোধনম্। পরম উৎকৃষ্ট ! পরমেষ্ঠিন্ সর্ব্বেশ্বর ! ॥

২৬। পূর্ব্বং সনারদোঽঙ্গিরা আজগামেতি অঙ্গিরাঃ প্রাধান্যেনোক্তঃ, চিত্রকেতোঃ পুত্রপ্রদত্বেন তস্য পৃথগুক্তত্বাৎ। ইহ তু নারদোঽঙ্গিরসা সাকং যযাবিতি নারদস্য প্রাধান্যনির্দ্দেশস্তদুপদেশেন তস্য বৈরাগ্যোৎপত্তেঃ। প্রভো ! হে সমর্থ ! ॥

২৭। যথা যথাবদ্ ধারয়ামাস ॥

২৮। বিদ্যাধরাধিপত্যঞ্চাবান্তরফলং লেভে, অপ্রতিহতমস্খলিতম্ ॥

২৯। ততঃ কতিপয়ৈরহোভির্বিদ্যয়েদ্ধেন দীপ্তেন মনসা গতির্যস্য সঃ ॥

১। নমু সর্ব্বাসুস্যুতং চেন্মৃজ্জাতিবৎ (খ)।

৩০। মৃণালবদ্‌গৌরম্ ; সিতিবাসসং নীলাম্বরম্ ; স্ফুরন্তি কিরীটাদীনি যস্য, কটিত্রং কটিসূত্রম্, প্রসন্নানি বক্ত্রাণি যস্য, অরুণানি লোচনানি যস্য তঞ্চ তঞ্চ ॥

৩১। দৃষ্ট্বা চ তমাদিপুরুষমভ্যয়াচ্ছরণং গতঃ। অনমৎ ননাম। কথম্ভূতঃ ? তদ্দর্শনেন ধ্বস্তং সমস্তং কিল্বিষং যস্য, স্বস্থ[১]মমলঞ্চান্তঃকরণং যস্য, প্রণয়েনাশ্রুযুক্তো লোচনে যস্য, প্রহৃষ্টানি রোমাণি যস্য সঃ ॥

৩২। তং প্রসমীড়িতুং স্তোতুং চিরং নৈবাশকৎ, ন শশাক। তত্র হেতুঃ —উত্তমঃশ্লোকস্য পদাব্জয়োর্বিষ্টরমাসনমুপমেহয়ন্নভিষিঞ্চন্, প্রেম্ণোপরুদ্ধোঽখিলানাং বর্ণানাং নির্গম উচ্চারণং যস্য সঃ ॥

৩৩। মনীষয়া বুদ্ধ্যা, মনঃ সমাধায়ৈতদ্বক্ষ্যমাণং বভাষে। প্রতিলব্ধা বাগ্ যেন। সাত্বতশাস্ত্রোক্তো বিগ্রহো যস্য তম্ ॥

৩৪—৪৮। অন্যোঽন্যপ্রেমজানন্দনিভৃতান্ স্বামিসেবকানভিনন্দন্ মুদা স্তৌতি দশভিঃ, পঞ্চভির্বিভুম্। (৩৪) হে অজিত ! অন্যৈরজিতোঽপি ভবান্ সাধুভির্ভক্তৈর্জিতঃ স্বাধীন এব কৃতঃ, যতো ভবানতিকরুণঃ। তেঽপি চ নিষ্কামা অপি ভবতা বিজিতাঃ, যো ভবানকামাত্মনামাত্মানমেব দদাতি ॥ (৩৫) ননু ভক্তৈরেব জিত ইতি কথং স্পর্দ্ধমানৈরপি সৃষ্ট্যাদিকর্তৃভিরন্যৈরীশ্বরৈর্বিজয়সম্ভবাৎ ? তত্রাহ—তবেতি। জগত উদয়াদীনি তবৈব বিভবো বিভবনং মহিমা লীলেতি যাবৎ ; 'আদি'-শব্দেন প্রবেশনিয়মাদীনি। বিশ্বসৃজস্তু ব্রহ্মাদয়ো নেশ্বরাঃ, কিন্তু তে তবাংশো যঃ পুরুষস্তস্যাংশাঃ ; তত্র এবং স্থিতেঽপি 'পৃথক্ পৃথগীশ্বরা বয়ম্' ইত্যভিমানেন বৃথৈব স্পর্দ্ধন্তে ॥ (৩৬) ত্বমেব সৃষ্ট্যাদিকর্ত্তেত্যেতদুপপাদয়তি—পরমাণুঃ সূক্ষ্মং মূলকারণম্। পরমমহৎ অন্তিমং কার্য্যম্, তয়োস্ত্বমেবাদ্যন্তান্তরবর্ত্তী। আদাবন্তে চান্তরে

১। স্বচ্ছ- (ঘ)।

মধ্যে চ বর্ত্তিতুং শীলং যস্য সঃ ; অতএব ত্রয়বিধুর আদ্যন্তমধ্যশূন্যো ধ্রুবঃ। তে চ ত্বয়া সৃজ্যন্তে, ন তু ধ্রুবাঃ। কুতঃ ? ইত্যত আহ—সত্ত্বানাং সত্ত্বেন প্রতীতানাং কার্য্যাণামাদাবন্তে চান্তরালে চ যদ্ধ্রুবমনপায্যন্তরালেঽপি, তদেব ধ্রুবং সুবর্ণাদিবৎ॥ (৩৭) এবং ধ্রুবত্বেন কালতঃ পরিচ্ছেদো নাস্তীত্যুক্তম্, দেশতোঽপ্যপরিচ্ছেদমাহ—ক্ষিত্যাদিভিরিতি। পূর্ব্বস্মাৎ পূর্ব্বস্মাদ্দশগুণৈরুত্তরৈরধিকৈরাবৃতঃ ; যত্র ত্বয্যণুকল্পোঽণুতুল্যঃ পততি পরিভ্রমতি, তত্তস্মাদনন্তস্ত্বম্॥ (৩৮) যস্মাদেবং পরমেশ্বরস্ত্বমেব, অন্যে দেবাস্তব বিভূতয়ঃ, অতস্ত্বাং বিহায় বিষয়কামনয়ান্যোপাসকা অতি-মন্দা ইত্যাহ—বিষয়েষু তৃট্ তৃষ্ণা যেষাং তে নরাকারাঃ পশবঃ। কুতঃ ? যে বিভূতীরিন্দ্রাদ্যা উপাসতে, ন তু পরং ত্বাম্। ততঃ কিম্ ? তত্রাহ—তেষামিতি। তদনু—উপাস্যনাশানন্তরম্, যথা রাজকুলমনু রাজকুলনাশা-নন্তরং যথা তৎসেবকানামাশিষো নশ্যন্তি, তদ্বৎ ; অয়ঞ্চ পরমোঽবধিঃ, মধ্যে-ঽপি নশ্যন্ত্যেব॥ (৩৯) বিষয়কামেনাপি কৃতা ত্বৎসেবা মোক্ষফলৈবেত্যাহ—কামধিয়ঃ কামবাসনাপি হে পরম ! ত্বয়ি রচিতাঃ কৃতাশ্চেন্ন রোহন্তি, দেহান্তরোৎপত্তয়ে ন ভবন্তি, করম্ভবীজানি ভর্জ্জিতবীজানি যথা ; যতোঽস্য জীবস্য গুণগণাদেব দ্বন্দ্বসমূহা ভবন্তি, অতঃ কামেনাপি নির্গুণস্য তব ভজনাচ্ছনৈর্নৈর্গুণ্যং ভবতীত্যর্থঃ॥ (৪০) ফলকামনয়াপি ত্বদারাধনং যদা মোক্ষহেতুস্তদা কিং বক্তব্যং ভাগবতধর্ম্মমাহাত্ম্যমিতি বক্তুং তৎ-সম্প্রদায়প্রবর্ত্তকত্বেনৈব ভগবন্তং স্তৌতি—জিতমিতি। যদা ভবান্ ভাগবতং ধর্ম্মমাহ, তদা হে ভগবন্ ! ত্বয়া জিতং সর্ব্বোৎকর্ষেণ স্থিতম্। তত্র হেতুঃ —যে নিষ্কিঞ্চনাঃ সনৎকুমারাদয়ো মুনয়স্তে যং ভগবন্তমপবর্গায় সেবন্তে, তেন ভবতা জিতম্ ; যং ধর্ম্মমিতি বা॥ (৪১) অনবদ্যতামেবাহ—বিষমমতির্যত্র যস্মিন্ ভাগবতে ধর্ম্মে নাস্তি, যদন্যত্র যথান্যস্মিন্ কাম্য-ধর্ম্মে। নন্বু সোঽপি বেদোক্তত্বাদনবদ্য এব ? তত্রাহ—বিষমধিয়া শত্রু-

মারণাদিকামনয়া রচিতো বিহিতো যঃ, স হ্যবিশুদ্ধো রাগদ্বেষাদিমত্ত্বাৎ, ক্ষয়িষ্ণুশ্চ নশ্বরফলত্বাৎ, অধর্ম্মবহুলশ্চ হিংসাদিবাহুল্যাৎ। তদুক্তং শবরস্বামিভিঃ —'উভয়মিহ চোদনায়াং লক্ষ্যতেঽর্থোঽনর্থশ্চ' ইত্যাদি ॥ (৪২) এতৎ প্রপঞ্চয়তি—কঃ ক্ষেমঃ, কিং কুশলম্? ন কিঞ্চিন্নিজপরয়োঃ স্বস্য পরস্য চ। স্বপরদ্রুহা স্বস্মৈ পরস্মৈ চ দ্রুহ্যতীতি স্বপরধ্রুক্, তেন; যতঃ স্বদ্রোহাদত্যন্তকায়ক্লেশাত্তব কোপঃ পীড়া সম্ভবতি; তদুক্তং গীতাসু —'কর্ষয়ন্তঃ শরীরস্থং ভূতগ্রামমচেতসঃ। মাঞ্চৈবান্তঃশরীরস্থং তান্ বিদ্ধ্যাসুরনিশ্চয়ান্ ॥' ইত্যাদি। তথা পরসংপীড়য়াধর্ম্মঃ, 'চ'কারাৎ[১] তব কোপশ্চ। অতস্ত্বয়া রাগান্ধমপি কথঞ্চিদ্বেদমার্গে প্রবর্ত্তয়িতুং কাম্যধর্ম্মোঽভিহিতঃ, ন তু তত্ত্বদৃষ্ট্যা ॥ (৪৩) ভাগবতধর্ম্মেণ তু ন দ্রোহ ইত্যাহ—নেতি; ন ব্যভিচরতি, ন পরমার্থং জহাতি, তব ঈক্ষা দৃষ্টিঃ। অব্যভিচারে হেতুঃ — স্থিরেতি। স্থাবরজঙ্গমপ্রাণিসমূহেষু সমবুদ্ধয়ো ভাগবতা যং ধর্ম্মং সেবন্তে ॥ (৪৪) এবম্ভূতস্য ভাগবতধর্ম্মপ্রবর্ত্তকস্য তব দর্শনাৎ সর্ব্বপাপক্ষয়ো ভবতীতি কিং চিত্রমিত্যাহ—ন হীতি ॥ (৪৫) অতোঽহং কৃতার্থোঽস্মীত্যাহ— অথেতি; অথ অতো হেতোস্তবাবলোকনেন পরিমৃষ্টা নিরস্তা আশয়ে চিত্তে মলা যেষং তে, ত্বদ্দর্শনঞ্চ মম নারদোপদেশেন জাতমিত্যাহ—সুরঋষিণেতি ॥ (৪৬) যথা চাহং পূর্ব্বমতিমূঢ় আসম্, যথা চ নারদেনানুগৃহীতোঽস্মি, তৎ সর্ব্বান্তর্যামিণস্তব ময়া কিং প্রকাশনীয়মিত্যাহ—বিদিতমিতি। বিশেষেণ জ্ঞাপ্যং প্রকাশনীয়ং কিয়দিব? ন কিমপীত্যর্থঃ। সবিতুর্যথা খদ্যোতৈঃ প্রকাশনীয়ং নাস্তি, তদ্বৎ ॥ (৪৭—৪৮) উক্তলক্ষণং ভগবন্তং প্রণমতি— নম ইতি দ্বাভ্যাম্। (৪৭) সকলস্য জগতঃ স্থিত্যাদীনামীশায় সমর্থায়, দুরবসিতাবিজ্ঞাতাত্মগতির্নিজতত্ত্বং যস্য তস্মৈ। কেষাম্? কুযোগিনাম্।

১। চ-শব্দাৎ (খ)।

কেন ? ভিদা—ভেদদৃষ্ট্যা ॥ (৪৮) শ্বসন্তি—চেষ্টন্তে। চেকিতানং পশ্যন্তমনু চিত্তয়ো জ্ঞানেন্দ্রিয়াণ্যুচ্চকন্তি, স্বরূপং[১] পশ্যন্তি ॥

৫০। মেঽনুশাসনম্—মদ্বিষয় উপদেশঃ, তেন চ, তয়া চ বিদ্যয়া, অস্মাচ্চ দর্শনাৎ সংসিদ্ধোঽসি ॥

৫১। তদ্বোধদার্ঢ্যায় স্বয়মপ্যুপদিশতি—অহমিত্যাদিনা ; সর্ব্বভূতান্যহমেব ; ভূতানামাত্মা ভোক্তাপ্যহমেব, ভোক্তৃভোগ্যাত্মকং বিশ্বং যদ্‌ব্যতিরিক্তং নাস্তীত্যর্থঃ ; যতোঽহং ভূতভাবনঃ ভূতানাং প্রকাশকঃ কারণঞ্চ। নন্বু 'শব্দ'ব্রহ্মপ্রকাশকং পরং ব্রহ্ম কারণং প্রকাশকঞ্চ, সত্যম্, ত উভে মমৈব রূপ ইত্যাহ—শব্দব্রহ্ম পরং ব্রহ্মেতি। শাশ্বতী—শাশ্বত্যৌ ॥

৫২—৫৪। অতস্ত্বমেবং পশ্যেত্যাহ—(৫২) লোকে ভোগ্যে প্রপঞ্চে, ভোক্তৃত্বেন বিততমনুগতমাত্মানং লোকঞ্চাত্মনি ভোগ্যত্বেন সন্ততং ব্যাপ্তম্, তদুভয়ঞ্চ ময়া কারণাত্মনা ব্যাপ্তম্, ময়ি চৈবোভয়ং কৃতং কল্পিতং স্মরেদিতি তৃতীয়েনান্বয়ঃ, 'পশ্যেৎ' ইত্যধ্যাহারো বা ॥ (৫৩—৫৪) নন্বু জাগ্রদাদ্যবস্থাভেদেন ভোক্তৃভোগ্যাত্মকং বিশ্বং স্ফুটং প্রতীয়মানং কথং কল্পিতং স্যাৎ ? ইত্যাশঙ্ক্য স্বপ্নগতজাগ্রদাদিদৃষ্টান্তেন সাধয়ন্নাহ—যথেতি দ্বাভ্যাম্ ॥ (৫৩) যথা স্বপ্নে সুষুপ্তো বিশ্বং গিরিবনাদিরূপং দেশান্তরস্থমাত্মন্যেব পশ্যতি, স্বপ্নমধ্যে সুষুপ্তিং স্বপ্নঞ্চ পশ্যতীত্যর্থঃ, তথা স্বপ্ন এবোত্থিতঃ সন্নাত্মানমেকদেশস্থং শয়নদেশে স্থিতং মন্যতে, জাগ্রদবস্থামনুভবতি ॥ (৫৪) এবং প্রসিদ্ধান্যপি জাগরণাদীনি জীবস্থানানি জীবোপাধের্বুদ্ধেরবস্থাভূতানি, আত্মনো মায়ামাত্রাণীত্যেবং বিজ্ঞায় তেষাং দ্রষ্টারম্, অতএব পরং তদবস্থারহিতমাত্মানং স্মরেৎ ॥

৫৫। নন্বু তেষাং দ্রষ্টারমিতি কথমুচ্যতে, স্বাপে দৃশ্যাভাবেন দ্রষ্টৃত্বাভাবাৎ ? তত্রাহ—যেনেতি। প্রসুপ্তঃ পুরুষো জীবো যেন রূপেণ তদা

১। স্বারূঢ়ং (ঘ)।

স্বাপকাল আত্মনঃ স্বাপং নির্গুণমতীন্দ্রিয়ং সুখঞ্চ বেদ, তমাত্মানং ব্রহ্ম মামবেহি, তদা, 'স্বাপসুখয়োরসংবেদনে সুখমহমস্বাপ্সং ন কিঞ্চিদবেদিষম্' ইতি স্মৃতেরসম্ভবাৎ ॥

৫৬। নন্নু স্বাপসাক্ষিণা দৃষ্টং কথং জাগ্রদবস্থঃ স্মরেৎ? ন হ্যন্যেন দৃষ্টমন্যঃ স্মরতি? তত্রাহ—উভয়ং প্রস্বাপং প্রতিবোধঞ্চ স্মরতোঽনুসন্দধত-স্তয়োঃ প্রস্বাপ-প্রতিবোধয়োঃ প্রকাশত্বেন যদন্বেতি, তাভ্যাং ব্যতিরিচ্যেত চ, একৈকাপায়েঽপ্যনপায়াত্তজ্জ্ঞানং পরং ব্রহ্ম তদেব, ন তু ভিন্নমিত্যর্থঃ। অতো বাল্যে দৃষ্টস্য যৌবনে স্মৃতিবদবস্থান্তরত্বেঽপি স্বাপানন্দয়োঃ স্মরণং ঘটত ইতি ভাবঃ। তদেবম্ভূতং ব্রহ্মাত্মানমবেহীত্যনুষঙ্গঃ ॥

৫৭। বিপক্ষে দোষমাহ—যদিতি; যদ্ যদি, এতন্মদ্ভাবং মৎস্বরূপং ব্রহ্ম বিস্মৃতং সৎ, আত্মনঃ সকাশাদ্ ভিন্নং ভবতি, তত এতস্য পুংসঃ সংসারো ভবতি। সংসারস্বরূপমাহ—দেহাদ্দেহো জন্মানন্তরং, পুনর্জন্ম, মৃতেরনন্তরং মৃতিশ্চেতি ॥

৫৮। যোন্যন্তরেঽপি ভোগাদিসম্পাদনং শক্যম্, জ্ঞানার্থং তত্রৈব যতিতব্যমিত্যাহ—লব্ধে্তি। জ্ঞানং শাস্ত্রোত্থম্, বিজ্ঞানমপরোক্ষম্, তয়োঃ সম্ভবো যস্যাং তাম্ ॥

৫৯। বৈরাগ্যার্থমাহ—ঈহায়াং প্রবৃত্তিমার্গে। ততঃ—ঈহাতঃ। অনীহায়াং নিবৃত্তিমার্গে ত্বভয়ং মোক্ষো ভবতীতি স্মৃত্বা ফলসংকল্পাদ্বিরমেৎ। নোভয়মিতি পাঠে উভয়ং পরিক্লেশঃ ফলবিপর্য্যয়শ্চ নাস্তীত্যেবং স্মৃত্বা ॥

৬০—৬২। এতদ্বিবৃণোতি—সুখায়েতি ত্রিভিঃ। (৬০) দুঃখস্যা-নিবৃত্তিঃ সুখস্যাপ্রাপ্তিঃ॥ (৬১) বিজ্ঞা উদ্যমে প্রবীণা বয়মিত্যভিমানবতাম্, স্থানত্রয়বিলক্ষণাং তুরীয়াং বুদ্ধ্বা॥ (৬২) দৃষ্টশ্রুতাভির্মাত্রাভিরৈহিকা-মুষ্মিকৈর্বিষয়ৈঃ, স্বেন তেজসা বিবেকবলেন ॥

৬৩। ন চাতঃ পরঃ পুরুষার্থোঽস্তীত্যাহ—এতাবানিতি। যোগে নৈপুণ্যং যস্যাঃ সা বুদ্ধির্যেষাম্, পরস্যাত্মনো ব্রহ্মণো জীবতত্ত্বস্য তস্যৈকং কেবলমৈক্যেন দর্শনমিতি যৎ, এতাবানেব ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

ষোড়শোঽধ্যায়ঃ ॥ ১৬ ॥

সপ্তদশোঽধ্যায়ঃ

ততঃ সপ্তদশেঽমোঘমহর্দ্ধিং প্রাপ্য খে চরন্।

বিহস্য গিরিশং শাপাদুমায়া বৃত্রতাং গতঃ॥ (১)

১। যতো যস্যাম্, তস্যৈ দিশে নমো নমনং কৃত্বা ॥

২—৩। স চিত্রকেতুর্বিদ্যাধরস্ত্রীভির্হরিং গাপয়ন্ রেম ইতি দ্বয়োরন্বয়ঃ। (২) অব্যাহতং বলমিন্দ্রিয়পাটবঞ্চ যস্য ॥ (৩) নানাবিধাঃ সঙ্কল্পেনৈব সিদ্ধয়ো যাসু তাসু ॥

৪। 'অকস্মাদদ্ভুতৈশ্বর্য্যগর্ব্বাৎ প্রাচীনকর্ম্মণঃ। আসুরীং যোনিমাপন্নো ভবানী-শাপতঃ স তু॥' তদাহ—একদেত্যাদিনা ॥

৫। অঙ্কীকৃতামুৎসঙ্গেনৈকীকৃত্য দেবীং বাহুনালিঙ্গ্য স্থিতমুবাচ, জহাস চ; তস্যান্তিকে স্থিতঃ সন্॥

৬। ধর্ম্মং বক্তা বদতি, শরীরিণাং মধ্যে মুখ্যঃ, ভার্য্যয়া মিথুনীভূয়াস্তে ॥

৯। অগাধা গম্ভীরা ধীর্যস্য সঃ ॥

১০। ন তস্য বীর্য্যং প্রভাবং বিদ্বান্ তস্মিন্। নির্জিতাত্মাভিমানিনে জিতেন্দ্রিয়োঽহমিত্যভিমানবতে, রুষা ক্রোধেনাহ ॥

১১। বিরুদ্ধং প্রকর্ষেণ করোতীতি বিপ্রকৃৎ ॥

১২। অতিবর্ত্তিনং শাস্ত্রমতিক্রম্য বর্ত্তনশীলম্, যে নো নিষেধন্তি, ন বারয়ন্তি ॥

১৩। এষাং ব্রহ্মাদীনামনুধ্যেয়ং পদাব্জযুগ্মং যস্য তম্, মঙ্গলমঙ্গলং পরমধর্ম্মমূর্ত্তিম্। সূরীন্ পরিভূয়াজ্ঞান্ কৃত্বা জগদ্গুরুং যঃ প্রশাস্তি, তৎ—তস্মাৎ ॥

১৪। ননু হরিভক্তোঽয়ং ন দণ্ডার্হ ইতি চেৎ, তত্রাহ—নায়ং সাধুভিঃ পরিষেবিতম্, বৈকুণ্ঠস্য পাদমূলোপসর্পণমর্হতি ; যতঃ সম্ভাবিতা অহমধিক ইতি কৃতা মতির্যেন, অতএব স্তব্ধোঽনম্রঃ ॥

১৫। তদেবং স্বয়ং দণ্ড্যত্বং নিশ্চিত্য তং প্রত্যাহ—অত ইতি। হে পুত্র! যথা ভূয়ো মহতাং কিল্বিষমপরাধং ন কর্ত্তা ন করিষ্যসি, তথা যাহীত্যর্থঃ ॥

১৭। পূর্ব্বদিষ্টং প্রাচীনকর্ম্মপ্রাপ্তমেব ॥

১৮। অয়ঞ্চ সংসারচক্রস্বভাব এব, ন চিত্রমিত্যাহ—সংসারচক্র ইতি ॥

১৯। অতএবাত্র মম তব চ ন কোঽপি দোষ ইত্যাহ—নৈবেতি ॥

২০। এবং তাবৎ সুখদুঃখাদিকমঙ্গীকৃত্যোক্তম্, ইদানীং তদপি বস্তুতো নাস্তীত্যাহ—গুণানাং মায়াময়ানাং প্রবাহে সংসারে ॥

২১। ননু মায়াগুণানাং চেদয়ং প্রবাহস্তর্হি তেষাং জড়ত্বাদ্ বন্ধমোক্ষাস্যনুভবো ন স্যাৎ? তত্রাহ—একঃ পরমেশ্বরো মায়য়া নিমিত্তভূতয়া ভূতানি প্রাণিনঃ সৃজতি, এষাং বন্ধাদিকঞ্চ সৃজতি, নিষ্কলঃ স্বয়ং বন্ধাদিশূন্যঃ ॥

২২—২৩। নন্বেবম্ভূতবিষমসৃষ্টৌ তস্য কিং কারণম্? প্রিয়াদিবৈষম্যাভাবাদিত্যাশঙ্ক্য যদ্যপি প্রিয়াদয়ো ন সন্তি, তথাপি তত্তৎকর্ম্মবশাৎ সর্ব্বং ঘটত ইত্যাহ—ন তস্যেতি দ্বাভ্যাম্। (২২) প্রতীপোঽপ্রিয়ো ন জ্ঞাতির্বন্ধুশ্চেত্যর্থঃ। তত্র হেতুঃ—সর্ব্বত্র সমস্য। তৎ কুতঃ? নিরঞ্জনস্য

নিঃসঙ্গস্য, অতএব তন্নিমিত্তে সুখে রাগো নাস্তি, রাগানুবন্ধো রোষঃ কুতঃ স্যাৎ? (২৩) যদ্যপ্যেবম্ ; তথাপি তস্য শক্ত্যা মায়য়া বিসর্গঃ পুণ্য-পাপাদিলক্ষণং কর্ম্মৈষাং শরীরিণাং সুখাদ্যর্থমবকল্পতে, সমর্থো ভবতি ; যথোক্তং গীতাসু—'ভূতভাবোদ্ভবকরো বিসর্গঃ কর্ম্মসংজ্ঞিতঃ' ইতি ॥

২৪। অথ তস্মাদ্ হে ভামিনি ! কোপনে ! ত্বাং কেবলং প্রসাদয়ামি, ন তু শাপমোক্ষায়। তর্হি কিং প্রসাদনেন ? অত আহ—মমোক্তমুক্তিং সাধ্বপ্যসাধু যন্মন্যসে, তত্ত্বয়া ক্ষম্যতাম্ ॥

২৫। গিরিশৌ ভবানীশঙ্করৌ প্রসাদ্য স্ময়তোর্বিস্ময়ং কুর্ব্বতোঃ সতোঃ ॥

২৮। স্বর্গাদাবেব তুল্যোঽর্থঃ প্রয়োজনমিতি দ্রষ্টুং শীলং যেষাং তে তথা ॥

২৯—৩০। তত্র তদুক্তমেব হেতুমাহ দ্বাভ্যাম্—(২৯) দেহিনাং সুখদুঃখমিত্যাদিদ্বন্দ্বানীশ্বরস্য লীলয়া মায়য়া ভবন্তি। তেষু চ সুখাদিষু[১] গুণদোষবিকল্প ইবেত্যন্বয়ঃ ॥ (৩০) ইষ্টানিষ্টভেদ ইব যঃ স্ফুরত্যাত্মন্যর্থ-ভেদঃ সুখাদিভেদঃ পুংসঃ স্বপ্নে যথাবিবেককৃতো ভবতি, স্রজিবৎ সর্প-মালাদিভিদা যথা তথৈব কৃত ইত্যর্থঃ। স্রজি ইবেতি বক্তব্যে স্রজি-বদিত্যার্ষম্। স্রজি তৎকৃত ইতি পাঠঃ সুগমঃ ॥

৩১। অতো ভাগবতানাং নিস্পৃহত্বং যুক্তমেবেত্যাহ—বাসুদেব ইতি। জ্ঞানবৈরাগ্যয়োর্বীর্য্যং বলং যেষাং তেষাং ব্যপাশ্রয়ো বিশিষ্টবুদ্ধ্যাশ্রয়ণীয়োঽর্থো নাস্তি ॥

৩২—৩৩। অস্য চ হরিদাসত্বেন তৎস্বভাবত্বান্নৈতচ্চিত্রমিতি বক্তুং হরের্মাহাত্ম্যমাহ—নাহমিতি দ্বাভ্যাম্। (৩২) ঈহিতমভিপ্রায়ং লীলাং বা, যদা বয়ং ন বিদ্মস্তদা তস্য স্বরূপমংশকাংশকা অপি সন্তঃ পৃথগীশ-মানিনো ন বিদুরেব ॥ (৩৩) অতএব হরিরপি সর্ব্বেষাং ভূতানাং প্রিয়ঃ ॥

১। দুঃখাদিষু (গ)।

৩৪। অহঞ্চৈবাচ্যুতস্য প্রিয়ঃ, তস্মান্মমাস্মিন্ ক্রোধো নাভূদিতি ভাবঃ ॥

৩৭। প্রতিশাপং দাতুমলন্তমঃ সমর্থতমোঽপি ॥

৩৯। অসুরজাতেরসুরস্বভাবেনোৎপত্তেঃ, ভগবতি মতেশ্চ ॥

৪১। এতৎ—এতম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

সপ্তদশোঽধ্যায়ঃ ॥ ১৭ ॥

অষ্টাদশোঽধ্যায়ঃ

আদিত্যানাং চতুর্থস্য ত্বষ্টুর্বংশপ্রসঙ্গতঃ।
প্রোক্তমিন্দ্রকৃতং বিশ্বরূপবৃত্রবধাদিকম্ ॥ (১)

অদিতেঃ পঞ্চমাদীনাং পুত্রাণামন্বয়োক্তিভিঃ।
অষ্টাদশে দিতের্গর্ভে শক্রেণ মরুতাং ভিদা ॥ (২)

ত্বষ্টুর্বংশমনুক্রম্য সপ্রসঙ্গং যথাক্রমম্।
আদিত্যানামথান্যেষাং বংশানাহ মুনীশ্বরঃ ॥ (৩)

১—২। দক্ষকন্যান্বয়ানুকথনেঽদিত্যা দ্বাদশ পুত্রাঃ প্রোক্তাঃ; 'বিবস্বানর্য্যমা পূষা ত্বষ্টাথ সবিতা ভগঃ। ধাতা বিধাতা বরুণো মিত্রঃ শক্র উরুক্রমঃ ॥' ইতি। তত্র ষষ্ঠাধ্যায়ান্তমারভ্য বিশ্বরূপবৃত্রচিত্রকেতূপাখ্যানৈস্ত্বষ্টুর্ব্বংশমনুবর্ণ্যেদানীং সবিতুর্বংশমাহ—পৃশ্নিস্ত্বিতি। সাবিত্রীমিত্যাদিষু প্রাস্থতেত্যুত্তরস্যানুষঙ্গঃ। পশুং পশুযাগম্[১], মহামখান্ পঞ্চযজ্ঞান্ ॥

১। পশুমখম্ (গ)।

৩। ধাতুর্ভার্য্যা কুহূঃ সায়ং পুত্রং প্রাসূত। এবং সিনীবালী দর্শ-মিত্যনুক্রমাৎ ॥

৪। সমনন্তরো বিধাতা ক্রিয়ায়াং ভার্য্যায়াং পুরীষ্যানগ্নীন্ পঞ্চচিতীঃ, 'পুরীষ্যাসো অগ্নয় ইতি পঞ্চধা এতে অগ্নয়ো যচ্চিতয়ঃ[১]।' ইত্যাদিশ্রুতেঃ। চর্ষণী বরুণস্ত ভার্য্যাসীৎ, পূর্ব্বং ব্রহ্মণঃ পুত্রো ভৃগুর্যস্যাং পুনর্জাতঃ ॥

৫। বল্মীকাৎ বাল্মীকির্ব্বরুণস্যৈব পুত্রোঽভবৎ। এতৌ বরুণস্যা-সাধারণৌ পুত্রৌ ; তথোৎসর্গাদয়ো মিত্রস্যাসাধারণাঃ। তয়োরেব সাধারণৌ দ্বৌ পুত্রৌ চাহ—অগস্ত্যশ্চ বসিষ্ঠশ্চ ঋষী মিত্রাবরুণয়োরভবতাম্ ॥

৬। যত উভাবপি কুম্ভে রেতঃ সিষিচতুঃ, 'সত্রে হ জাতারিষিতা নামভিঃ, কুম্ভে রেতঃ সিষিচতুঃ সমানম্' ইতি শ্রুতেঃ। দ্রুতম্—স্কন্নম্ ॥

৯। পশ্চাৎ—অষ্টমস্কন্ধে ॥

১০। অথেতি কশ্যপস্যাদিতেঃ পুত্রাণাং দ্বাদশাদিত্যানাং সন্ততিমুক্ত্বা দিতেঃ পুত্রান্ কথয়ামীত্যর্থঃ ॥

১১। হিরণ্যকশিপুর্হিরণ্যাক্ষশ্চেতি প্রথমং দ্বাবেব। তৌ চ কীর্ত্তিতৌ তৃতীয়স্কন্ধে ॥

১৩। বিপ্রচিত্তো দানবাদ্ভর্ত্তুঃ সকাশাদ্রাহুং পুত্রমগ্রহীৎ ॥

১৪। ততঃ সংহ্রাদাদসূত ॥

১৫। যো মেষরূপিণং বাতাপিং পেচে, তমিল্বলং যং পেচে, তং বাতাপিং চাসূতেত্যন্বয়ঃ ॥

১৭। ততো বলেঃ সকাশাদভবৎ। তস্য বলেরনুভাবমনুভাবঃ, সুশ্লোক্যো গুণকীর্ত্ত্যর্হঃ ; যদ্বা, অনুভাব্যতে সদ্ভিঃ স্তূয়ত ইত্যনুভাবম্, সুশ্লোক্যং যশ ইতি শেষঃ ॥

১৮। তস্য গণেষু মুখ্যতাং প্রাধান্যম্ ॥

১। যচ্চিত্তয়ঃ (গ)।

১৯। সাম্যতাম্—সমানরূপতাম্ ॥

২০। সাত্ম্যং দেবত্বং প্রাপিতাঃ ॥

২২। আদৃতং সাদরম্, অল্পং মিতাক্ষরম্ ; অর্থবৎ—বহ্বর্থযুক্তম্। সত্রময়নমাশ্রয়ো যস্য, হে সত্রায়ণ! শৌনক! ॥

২৩। শক্রস্য পার্ষ্ণিগ্রাহেণ পৃষ্ঠতঃ সহায়েন ॥

২৪। ভ্রাতৃহন্তারং দৈত্যহন্তারমিন্দ্রং মারয়িত্বা সুখিনী কদা স্যামিতি চিন্তয়ামাস দিতিঃ। উল্বণম্—ক্রূরম্, অক্লিন্নহৃদয়ম্—কঠিনচিত্তম্ ॥

২৫। ননু রাজা স্বদেহরক্ষার্থমন্যেষাং ঘাতং করোত্যেব, কিমত্র চিত্রম্? তত্রাহ—কৃমীতি। ঈশঃ প্রভুরিত্যভিহিতস্যাপি যস্য পূর্ব্বেষাং রাজ্ঞাং দেহস্য মরণানন্তরং দ্বিত্রিদিনাবস্থিতস্য কৃময় ইতি, শ্বাদিভির্ভক্ষিতস্য বিষ্ঠেতি, দগ্ধস্য তু ভস্মেতি সংজ্ঞা আসীৎ। তৎকৃতে তস্য দেহস্যার্থে যো ভূতেভ্যো দ্রুহ্যতি, স কিং স্বার্থং বেদ? ন বেদৈব। তত্র হেতুঃ—যতো ভূতদ্রোহান্নিরয়ো ভবতি ॥

২৬। ইদং দেহাদিকং ধ্রুবং নিত্যম্, আশাসানস্য মন্যমানস্য, অত উন্নদ্ধমুচ্ছৃঙ্খলং চেতো যস্য তস্যেন্দ্রস্য যো মদস্তস্য শোষকঃ পুত্রো মে যেন হেতুনা ভূয়াদ্ভবেৎ ॥

২৭। ভর্ত্তুঃ প্রিয়াচরণমেবেতি ভাবেন সা ভর্ত্তুঃ প্রিয়মসকৃদাচচার ॥

২৯। বিবশঃ স্ত্রীপরতন্ত্রঃ সন্ বাঢ়ং তব মনোরথং পূরয়িষ্যামীতি যদাহ, ন তচ্চিত্রম্ ॥

৩০। তত্র হেতুমাহ—বিলোক্যেতি। একান্তভূতানি নিঃসঙ্গানি ; মৈথুনেন সৃষ্টিবৃদ্ধ্যর্থং স্বদেহার্দ্ধমেব স্ত্রিয়ং চক্রে ॥

৩১। এবং স্ত্রিয়া শুশ্রূষিতঃ সন্ ॥

৩২। ইহ, 'চ'কারাৎ পরত্র চ। অগমঃ—অপ্রাপ্যঃ ॥

৩৩—৩৪। নম্বু পরমেশ্বরে স্বপ্রীতে সর্ব্বকামপ্রাপ্তিরিতি প্রসিদ্ধম্? তত্রাহ—পতিরেবেতি। (৩৩) নম্বু মনসি স্থিতঃ শ্রীবাসুদেব এব লক্ষ্মীপতিঃ পরং দৈবতমিতি প্রসিদ্ধম্? সত্যম্, স এব স্বাধিকারেণ রূপভেদৈঃ পূজ্যত ইত্যাহ—মানস ইতি সার্দ্ধেন॥ (৩৪) দেবতানাং লিঙ্গৈঃ মূর্ত্তিভিরুপলক্ষিতঃ; তান্যেবাহ—নাম ইন্দ্রাদি, রূপঞ্চ বজ্রহস্তত্বাদি, তাভ্যাং বিবিধং কল্পিতৈঃ॥

৩৭। ইন্দ্রহণম্ ইন্দ্রহন্তারম্; অমৃত্যুং মৃত্যুশূন্যম্; যেনেন্দ্রেণ বিষ্ণুনা সহায়েন ঘাতিতৌ॥

৪০। স্বভাবমনুবর্ত্তমানায়া যোষিতঃ কোঽতিক্রমোঽপরাধঃ॥

৪১—৪২। স্বভাবমেবাহ দ্বাভ্যাম্। (৪১) শরৎপদ্মস্যেবোৎসবো বিকাশো যস্মিন্। শ্রবণামৃতং কর্ণয়োরমৃততুল্যম্; ক্ষুরধারোপমং চিত্তম্॥ (৪২) স্বাশিষাত্মনাং স্বার্থকামনয়াত্মবৎ প্রেষ্ঠত্বেন প্রতীয়মানানাম্॥

৪৩। তত্রেদমুপকল্পতে যোগ্যং ভবতি। অয়ং ভাবঃ—বৈষ্ণবং ব্রতং তাবদুপদেক্ষ্যামি, তেনৈবাস্যাঃ শুদ্ধচিত্তায়া ইন্দ্রক্রোধো নিবর্ত্তিষ্যতে। পুত্রস্ত্বমর্ত্ত্যো ভবিষ্যতি, দীর্ঘকালত্বেন ব্রতস্য কথঞ্চিদ্ বৈগুণ্যে সতি ইন্দ্রস্য বধোঽপি ন ভবিষ্যতীতি॥

৪৫। হে ভদ্রে! অঙ্গো যথাবদ্যদি ধারয়িষ্যসি, তর্হি ইন্দ্রহা ভবিষ্যতি; বৈগুণ্যে তু সতি দেববান্ধবো ভবিষ্যতি, বৈষ্ণবত্বাৎ, ব্রতস্য কথঞ্চিদ্ বৈগুণ্যেঽপি সতি সর্ব্বথা বৈফল্যাভাবাৎ॥

৪৬। কার্য্যাণ্যাবশ্যকানি, ব্রতং যানি ন ঘ্নন্তি নাবশ্যকানি, ন চ নিষিদ্ধানি, কিন্ত্বভ্যনুজ্ঞাতানি তানি সর্ব্বাণ্যপি ব্রূহি॥

৪৭—৫১। তত্রৈকত্রিংশন্নিষেধানাহ—ন হিংস্যাদিতি পঞ্চভিঃ। (৪৭) ন শপেন্নাক্রোশেৎ, যদমঙ্গলং কপালাস্থ্যাদি, তন্ন স্পৃশেৎ॥ (৪৮) নাপ্সু

প্রবিশ্য স্নায়াৎ, পূর্ব্বং বিধৃতাং স্রজং পুনর্ন ধারয়েৎ॥ (৪৯) ভোজনে পঞ্চ নিষেধানাহ—নোচ্ছিষ্টমিতি। চণ্ডিকান্নং ভদ্রকাল্যৈ নিবেদিতম্, পিপীলিকাদিদূষিতং বা। অঞ্জলিনা ত্বপো ন পিবেৎ॥ (৫০) গৃহাদ্বহির্নির্গমে সপ্ত নিষেধানাহ—নোচ্ছিষ্টেতি। অনর্চ্চিতা—মণ্ডনহীনা, অসংবীতা—অপাবৃতা॥ (৫১) শয়নে অষ্ট নিষেধানাহ—নাধৌত-পাদেতি। নাপরাক্—ন পশ্চিমশিরাঃ॥

৫২—৫৩। কার্য্যাণ্যাহ—ধৌতবাসা ইতি দ্বাভ্যাম্। (৫২) প্রাতরাশাৎ প্রথমভোজনাৎ॥ (৫৩) বীরবতীর্জীবদ্ভর্ত্তৃকা আর্চ্চ্য সম্পূজ্য, কোষ্ঠগতং কুক্ষ্যন্তরগতম্॥

৫৪। পুংসবনং পুত্রোৎপত্তিকরম্; তুভ্যম্—তব॥

৫৫। অঞ্জস্তত্ত্ববুদ্ধ্যা॥

৫৬। কবিঃ—স্বার্থদর্শী॥

৫৮। হরিরিন্দ্রো ব্রতস্য ছিদ্রং প্রেপ্সুঃ প্রাপ্তুমিচ্ছুঃ, জিহ্মঃ কুটিলঃ সাধুবেশঃ, মৃগহা লুব্ধকো যথা মৃগবঞ্চনায় মৃগবেশো ভবতি, তদ্বৎ॥

৫৯। কেন মে শিবং স্যাদিতি চিন্তাং প্রাপ্তঃ॥

৬০। অস্পৃষ্টবারিশ্চাসাবধৌতাঙ্ঘ্রিশ্চ॥

৬১। নিদ্রয়াপহৃতং চেতো যস্যাঃ॥

৬২। মা রোদীরিত্যুপলালয়ন্নিব তান্ পুনঃ সপ্তধা চকর্ত্ত চিচ্ছেদ॥

৬৪। কৌশিকঃ—ইন্দ্রঃ, গণান্ সপ্ত, 'সপ্তগণা বৈ মরুতঃ' ইতি শ্রুতেঃ॥

৬৭। সজূঃ—সহ॥

৭১। দিত্যা নিষ্কপটমুক্তে সতি ইন্দ্রোঽপি নিষ্কপটমেবাহ—অম্বেতি। লব্ধমন্তরং যেন; অর্থ এব বুদ্ধির্যস্য॥

৭৪। অপি পরং মোক্ষমপি॥

৭৫। গুণস্পর্শং বিষয়ভোগং বুধঃ কো বৃণীত, যদ্ যস্মাৎ নরকেঽপি বিষয়ভোগঃ স্যাৎ ॥

৭৬। মহীয়সি ! হে মহত্তমে ! মৃতঃ পুনরুত্থিতঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং ষষ্ঠস্কন্ধে

অষ্টাদশোঽধ্যায়ঃ ॥ ১৮ ॥

একোনবিংশোঽধ্যায়ঃ

ঊনবিংশে তু যৎ প্রোক্তং কশ্যপেন দিতের্ব্রতম্।

তদেব বিবৃতং লোকহিতায় হরিতোষণম্ ॥ (১)

১। তস্য প্রকারমিতি শেষঃ ॥

২। মার্গশিরে মার্গশীর্ষে মাসি, শুক্লে পক্ষে, আদিতঃ প্রতিপদি ॥

৩। অনুমন্ত্র্য পৃষ্ট্বা, শুক্লা দন্তা যস্যাঃ সা শুক্লদতী ধৌতদন্তা, অলঙ্কৃতা সতী পূজয়েৎ ॥

৪—৬। আদৌ তাবন্নমস্কারমন্ত্রানাহ ত্রিভিঃ। (৪) তে তুভ্যম্, অলং পর্য্যাপ্তমেব সর্ব্বং ন কিঞ্চিদন্যৈঃ কৃত্যমস্তি, অতঃ কেবলং তে তুভ্যং নমোঽস্তু। পর্য্যাপ্তৌ হেতবঃ—নিরপেক্ষায়, হে পূর্ণকাম! মহাবিভূতিপতয়ে, লক্ষ্মীপতয়ে, সকলাঃ সিদ্ধয়োঽণিমাদ্যা যস্মিন্ তস্মৈ ॥ (৫) ভো ঈশ ! যথা যথাবত্ত্বং কৃপাদিভির্জুষ্টঃ, অন্যৈশ্চ সত্যসঙ্কল্পত্বাদিভিঃ সর্ব্বৈর্গুণৈঃ, ততস্তস্মাৎ ॥ (৬) মহাপুরুষস্য পরমেশ্বরস্যৈব লক্ষণানি নিরপেক্ষত্বাদীনি যস্যাস্তস্যাঃ সম্বোধনম্ ॥

৭। পূজামন্ত্রমাহ—ওঁ নম ইতি ॥

৮। হবিঃশেষমুপহারাবশিষ্টম্। হোমমন্ত্রস্যাঙ্গং দর্শয়তি—ওমিতি ॥

৯। প্রকর্ষেণ ভবন্ত্যাভ্যামিতি প্রভবৌ ॥

১২। ইজ্যা যজ্ঞনিবর্ত্তকঃ পুরুষব্যাপারো ভাবনাখ্যঃ, ক্রিয়া লৌকিকী ॥

১৩। প্রত্যয়ো নামরূপয়োঃ প্রকাশকঃ ; অপাশ্রয়স্তয়োরাধারঃ ॥

১৭। মহাপুরুষচেতসা—ঈশ্বরবুদ্ধ্যা, উপনমেৎ—ভজেৎ। পতিশ্চ স্বয়ং প্রেমশীলঃ সন্ পত্ন্যাঃ কর্ম্মাণি বিভৃয়াৎ, তদনুকূলো ভবেদিত্যর্থঃ ॥

১৮। যতো দম্পত্যোর্মধ্য একতরেণ কৃতমুভয়োরপি ভবতি ॥

১৯। ন বিহন্যাৎ, ন বিচ্ছিন্দ্যাৎ ॥

২১। দ্বাদশ মাসানিত্যুক্তে কদাচিত্তন্মধ্যে মলমাসে সতি, তেন সহ দ্বাদশসংখ্যায়াং সত্যাং শুদ্ধস্যৈকস্য ত্যাগঃ স্যাৎ ; হায়নমিত্যুক্তে তন্মধ্য-পাতিনস্তস্যাপি প্রসঙ্গঃ স্যাত্তদুভয়ং বারয়িতুমুভয়মুক্তম্। উপচরেৎ—উপবসেৎ ॥

২২। শ্বোভূতে প্রভাতে সতি, পয়সি শৃতেন ; পক্বেন—পাকযজ্ঞ-বিধানেন পার্ব্বণস্থালীপাকবিধানেন ॥

২৪। সুপ্রজাস্ত্বং সৎপুত্রত্বমিত্যর্থঃ ; তদ্‌যতস্ত্বং শেষম্ ॥

২৬। অবীরা—বিধবা। ধনেশ্বরী সত্যপি যা সুদুর্ভগা, সা সুভগা ভবতি ॥

২৭। য আময়াবী রোগী, স বিরুজা বিশিষ্টয়া রুজা বিমুচ্যতে। ইন্দ্রিয়ৈঃ সহিতং কল্পং দেহঞ্চ বিন্দেদিতি শেষঃ। পঠন্ যো বর্ত্তেত, তস্য পিতৃণাং দেবতানাঞ্চানন্তা তৃপ্তির্ভবতীত্যর্থঃ ॥

২৮। উপসংহরতি—রাজন্নিতি। মহৎ পুণ্যং জন্ম, মহৎ ব্রতঞ্চ ॥

ষষ্ঠস্কন্ধনিগূঢ়ার্থপদ-ভাবার্থদীপিকা।
সদ্ভিরাসেব্যতামেষা যতিশ্রীধরনির্ম্মিতা ॥ (২)

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং শ্রীধরস্বামিবিরচিতায়াং
ষষ্ঠস্কন্ধ-টীকায়ামেকোনবিংশোঽধ্যায়ঃ ॥ ১৯ ॥

ষষ্ঠস্কন্ধঃ সম্পূর্ণঃ।

সপ্তমঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

স্বভক্তপক্ষপাতেন তদ্বিপক্ষবিদারণম্ ।
নৃসিংহমদ্ভুতং বন্দে পরমানন্দবিগ্রহম্ ॥ (১)
ঊতিঃ পঞ্চদশাধ্যায়ৈঃ সপ্তমে বর্ণ্যতেঽধুনা ।
ঊতিশ্চ বাসনা প্রোক্তা তত্তৎকর্ম্মানুসারিণী ॥ (২)
অশুভা চ শুভা চেতি দ্বিধা সা হেতুভেদতঃ ।
অশুভা মহতাং কোপাৎ শুভা মহদনুগ্রহাৎ ॥ (৩)
নৃহরিদ্বাঃস্থয়োর্যদ্বদ্বৈকুণ্ঠে বসতোরপি ।
চতুঃসনরুষা বিষ্ণুদ্বেষাত্মশুভবাসনা ॥ (৪)
যথা চ দৈত্যগর্ভেঽপি প্রহ্লাদস্য সতঃ স্থিরা ।
নারদানুগ্রহাদাস বিষ্ণৌ সদ্ভক্তিবাসনা ॥ (৫)
স্বভক্তঞ্চ সদা বিষ্ণুর্দ্বিষন্তমপি রক্ষতি ।
তৃতীয়ে তু ভবেদ্ দ্বাঃস্থাবকরোদাত্মসাৎ প্রভুঃ[২] ॥ (৬)
অতো মনীষিণা যত্নঃ কার্য্যো মহদনুগ্রহে ।
ইত্যেতদর্থমূতীনামত্র লক্ষণমুচ্যতে ॥ (৭)
তত্রাদৌ দশভির্দৈত্যতৎপুত্রমতিভেদতঃ ।
মহৎকোপানুকম্পোত্থবাসনাভেদ উচ্যতে ॥ (৮)
সদ্বাসনা চ যুজ্যেত কর্ম্মভিঃ শুদ্ধচেতসঃ ।
পরৈস্তু পঞ্চভিস্তস্মাৎ ক্রিয়তে ধর্ম্মনিশ্চয়ঃ[৩] ॥ (৯)
তত্র তু প্রথমেঽধ্যায়ে হিরণ্যকশিপোঃ সুতে ।
বিষ্ণুভক্তে বিরোধস্তু বিপ্রশাপজ ঈর্য্যতে ॥ (১০)

১। হরের্দ্বারপয়ো- (ঘ) ; ২। পুনঃ (গ, ঘ) ; ৩। -নির্ণয়ঃ (ঘ)।

১—৩। যদুক্তং পূর্ব্বস্কন্ধান্তে—'হতপুত্রা দিতিঃ শক্রপাষ্ণিগ্রাহেণ বিষ্ণুনা। মন্যুনা শোকদীপ্তেন জ্বলন্তী পর্য্যচিন্তয়ৎ ॥' ইতি, তচ্ছ্রুত্বা বিস্মিতঃ পরীক্ষিৎ পৃচ্ছতি—সম ইতি ত্রিভিঃ। (১) ন হি সমস্য সুহৃদশ্চ বৈষম্যং নামাস্তি; ন চ প্রিয়স্য প্রীতিকর্ত্তৃষু বৈষম্যং যুক্তমিত্যর্থঃ॥ (২) কিঞ্চ, যস্য যৈঃ প্রয়োজনং সিধ্যতি, স তৎপক্ষপাতী ভবতি; যেভ্যো বিভেতি, তান্ দ্বেষেণ হন্তি, ন তু তদত্রাস্তীত্যাহ—ন হীতি। নিঃশ্রেয়সং পরমানন্দ এবাত্মা স্বরূপং যস্য; অসুরেভ্যশ্চোদ্বেগো ভয়ং নাস্তি, অতো বিদ্বেষোঽপি নাস্ত্যেব। তত্র হেতুঃ—অগুণস্যেতি। গুণাধীনৌ প্রীতিবিদ্বেষাবিত্যর্থঃ॥ (৩) শ্রীনারায়ণস্য গুণাননুগ্রহনিগ্রহাদীন্ প্রতি; তৎ তং সংশয়ম্॥

৪। ভাগবতস্য প্রহ্লাদস্য মাহাত্ম্যং গীয়ত ইতি সম্বন্ধঃ॥

৫। কৃষ্ণায় ব্যাসায়, কৃষ্ণং মুনিং নত্বেত্যর্থঃ॥

৬। যস্মাৎ প্রকৃতেঃ পরঃ, অতএব নির্গুণঃ, অতএবাজঃ, অতএবাব্যক্তো রাগদ্বেষাদিনিমিত্তভূতদেহেন্দ্রিয়াদিরহিতঃ সোঽপি স্বমায়াগুণং সত্ত্বাদিকমাবিশ্যাধিষ্ঠায় বাধ্যান্ প্রতি; যদ্বা, দেবাসুরাদীনাং পরস্পরং যা বাধ্যবাধকতা, তাং গতঃ প্রাপ্তঃ; তত্র হেতুর্জাত ইত্যর্থঃ॥

৭—৮। তত্র গুণানাং স্বীয়ত্বে সতি প্রাকৃতপুরুষবদ্বিষমঃ স্যাৎ, তত্তু নাস্তীত্যাহ—(৭) সত্ত্বমিতি। নন্বু স্বেচ্ছয়া গুণাধিষ্ঠানেনাপি পক্ষপাতে বৈষম্যং স্যাদেব, ন তস্য কালকৃতত্বাদিত্যাহ— ন তেষামিতি সার্দ্ধেন। উল্লাসো বৃদ্ধিঃ॥ (৮) সত্ত্বস্য জয়কালে দেবাদীনৃষীংশ্চাভজৎ; তত্তদ্দেহান্ প্রবিশ্য বর্দ্ধয়তীত্যর্থঃ। রজসো জয়কালে অসুরান্, তমসো জয়কালে যক্ষরক্ষাংসীত্যন্বয়ঃ। তস্য কালস্যানুগুণঃ সন্॥

৯। সমস্যাপি নিমিত্তভেদেন বৈষম্যে দৃষ্টান্তঃ—জ্যোতিরাদিরিব, জ্যোতিরগ্নির্যথা কাষ্ঠাদিষু, জলং যথা পাত্রাদিষু, আকাশং যথা ঘটাদিষু,

তথা ভগবান্ নানারূপ আভাতি। নন্থ তর্হি তদ্বদেব বিবেকেন কিং ন প্রতীয়তে? তত্রাহ—সংঘাতাৎ সুরাদিদেহান্ন বিবিচ্যতে, ন পৃথক্ প্রতীয়তে। তর্হি তান্ ভজতীতি কুতো জ্ঞায়তে? তত্রাহ—বিদন্তীতি; আত্মস্থং পরমাত্মানং কবয়ো নিপুণা মথিত্বা কার্য্যদর্শনলিঙ্গেণ বিচার্য্য জানন্তি, অন্ততঃ স্বভাবকালকর্ম্মাদিবাদনিষেধেন; বিন্দন্তীতি পাঠে লাভোঽপি জ্ঞানমেব, তত্রাপি জ্যোতিরাদিরিবেতি দ্রষ্টব্যম্,—যথা সূর্য্য-কান্তাদৌ দাহদর্শনাৎ জ্যোতির্জ্ঞায়তে, যথা চ গন্ধদর্শনাদ্ বায়ুরিত্যাদি ॥

১০। তদেবং মায়াগুণবশেনৈতদ্বৈষম্যং ন স্বাভাবিকমিত্যুক্তম্, তথাপি[১] গুণপারতন্ত্র্যাদনীশ্বরত্বমাশঙ্ক্যাহ—যদাত্মনো জীবস্য ভোগায় পুরঃ শরীরাণি পরঃ পরমেশ্বরঃ সিসৃক্ষুর্ভবতি, তদা সাম্যেন স্থিতং রজঃ পৃথক্ সৃজতি। বিচিত্রাসু তাসু পূর্ষু রিরংসুঃ ক্রীড়িতুমিচ্ছুর্যদা, তদা সত্ত্বং পৃথক্ সৃজতি। শয়িষ্যমাণঃ সংহরিষ্যন্ যদা, তদা তমঃ পৃথগীরয়তি প্রেরয়তি—আধিক্যং নয়তীত্যর্থঃ ॥

১১। যদা সিসৃক্ষুরিত্যাদিনির্দ্দেশেন প্রতীতং কালপারতন্ত্র্যং বারয়ন্ প্রধানপুরুষপারতন্ত্র্যমপি বারয়তি—কালমিতি। হে নরদেব! প্রধান-পুংভ্যাং নিমিত্তভূতাভ্যাং সত্যকৃদমোঘকর্ত্তৃশক্ত্যোঃ সহকারিত্বেনাশ্রয়ভূতং চরন্তং বর্ত্তমানং কালং স্বয়মেব সৃজতি। স্বচেষ্টারূপত্বাৎ কালস্য চ ন তৎপারতন্ত্র্যমিত্যর্থঃ; তথাপি প্রস্তুতে কিমায়াতম্? তত্রাহ—য এষ কালঃ, স সত্ত্বমেধয়তি বর্দ্ধয়তি, অতো হেতোরীশিতাপীশ্বরোঽপি সত্ত্বপ্রধানং সুরানীকং দেবসমূহমেধয়তীব। তৎপ্রত্যনীকানসুরান্ সুরপ্রতিপক্ষান্ প্রমিণোতি হিনস্তীবেত্যন্বয়ঃ[২]। উরু প্রভূতং শ্রবঃ কীর্ত্তির্যস্য সঃ কালশক্তি-ক্ষুভিতগুণগতবৈষম্যমিহ সন্নিধিমাত্রেণ তদধিষ্ঠাতরি স্ফুরতীতি প্রকরণার্থঃ ॥

১। তর্হি (ঘ); ২। হিনস্তি চেত্যন্বয়ঃ (ঘ)।

১২। ইদানীন্তু তয়োর্ব্বধো ন সুরপক্ষপাতেন, কিন্তু ব্রহ্মশাপেনাসুরীং যোনিং প্রাপ্তয়োরনুগ্রহার্থ এবেতি বক্তু মিতিহাসমুপক্ষিপতি—অত্রৈবেতি; অত্রৈব দ্বেষাদিরহিতস্যাপি দৈত্যবধে নারদেনেতিহাসঃ প্রস্তাবিতঃ ॥

১৩। চেদিভূভুজঃ —শিশুপালস্য ॥

১৫। একান্তভক্তানামপি দুর্ল্লভা প্রাপ্তির্বিদ্বিষো জাতেত্যেতদত্যদ্ভুতং হি ॥

১৬। তস্য তু বেণবন্নরকপাত এবোচিত ইত্যাহ—ভগবন্নিন্দয়েতি। তমসি—নরকে ॥

১৭। দমঘোষস্য সুতঃ —শিশুপালঃ কলভাষণাদ্বাল্যে কোমলভাষণমারভ্য সম্প্রত্যধুনাপ্যমর্ষী ক্রোধী মৎসরী বা ॥

১৮। শ্বিত্রঃ —শ্বেতকুষ্ঠম্ ॥

১৯। দুরবগ্রাহ্যং দুষ্প্রাপং ধাম স্বরূপং যস্য তস্মিন্, লয়ং সাযুজ্যমীয়তুর্জগ্মতুঃ। অভূতস্যাপি দন্তবক্রলয়স্য তজ্জাতকপ্রামাণ্যেন সিদ্ধবন্নির্দ্দেশঃ ॥

২০। এতদদ্ভুততমং হি, অতএবৈতৎ প্রতি মে ধীর্ভ্রাম্যতি। ভগবান্ সর্ব্বজ্ঞস্ত্বং ব্রূহি ॥

২১। আভাষ্য—সম্বোধ্য। সীদন্তি নিষীদন্ত্যস্যামিতি সৎ সভা, তস্যাঃ সদঃ সদসঃ শৃণ্বত্যাঃ সত্যাঃ কথাঃ প্রাহেত্যন্বয়ঃ ॥

২২—২৪। অহো ভগবন্নিন্দকস্য নরকপাতেন ভাব্যমিতি বদতস্তব কোঽভিপ্রায়ঃ, ভগবৎপীড়াকরত্বেন বা তদভাবেঽপি সুরাপানাদিবন্নিষিদ্ধনিন্দাচরণাদ্বা ? তত্র তাবদ্দেহাভিমানকৃতনিন্দাদিনিমিত্তত্বাৎ পীড়াদীনাং ভগবতশ্চ তদভাবান্ন পীড়াদিশঙ্কাস্তীত্যাহ—নিন্দনেতি সার্দ্ধৈস্ত্রিভিঃ। (২২) নিন্দনং দোষকীর্ত্তনম্, ন্যক্কারস্তিরস্কারঃ। নিন্দনস্তুত্যাদিজ্ঞানার্থং প্রধানপুরুষয়োরবিবেকেন কলেবরং কল্পিতং রচিতম্ ॥ (২৩) তদভিমানেন ভূতানাং যথা মমাহমিতি বৈষম্যমিহ ভূতানাং তৎকৃতং হিংসাদিকঞ্চ ভবতি, তথা ন যস্যেত্যুত্তরেণান্বয়ঃ। দণ্ডস্তাড়নম্, পারুষ্যং নিন্দা, তয়ো-

র্হেতুভূতয়োঃ হিংসা পীড়া চ ভবতি ॥ (২৪) যস্মিন্নিবদ্ধোঽয়মভিমানস্তস্য দেহস্য বধাদ্বধশ্চ যথা তথা যস্যাভিমানো নাস্তি, অতোঽস্য পরমেশ্বরস্য হিংসা কেন হেতুনা কল্প্যতে ? ন কেনাপি। অভিমানাভাবে হেতুঃ—কৈবল্যাদদ্বিতীয়ত্বেনাভিমন্তব্যাভাবাৎ। বৈষম্যাভাবে হেতুঃ —অখিলাত্মনঃ সর্ব্বাত্মন ইতি। তর্হি কিমিতি হন্তি দৈত্যান্ ? তত্রাহ—পরস্য দমকর্ত্তু-র্হিতার্থং দণ্ডং করোতীত্যর্থঃ ॥

২৫—৩১। যস্মাদ্ভগবতো নিন্দাদিকৃতং বৈষম্যং নাস্তি, তস্মাদ্ যেন কেনাপ্যুপায়েন ধ্যায়তস্তেনৈব ধ্যানেন নিন্দাদিকৃতপাপস্যাপি নাশাত্তৎ-সাযুজ্যং যুক্তমিত্যাশয়েনাহ—তস্মাদিতি সপ্তভিঃ। (২৫) নির্বৈরেণ নাস্তি বৈরং কেনাপি যস্মিন্ তেন, ভক্তিযোগেনেত্যর্থঃ, যুঞ্জ্যান্মন ইতি শেষঃ। তস্মাদেতৈরুপায়ৈঃ পৃথক্ নেক্ষতে ॥ (২৬) তেষ্বপি বৈরানুবন্ধঃ শ্রেষ্ঠ ইত্যাহ—যথেতি ; ন তথা ভক্তিযোগেনাপি ॥ (২৭) অত্র দৃষ্টান্তঃ —কীটঃ, পেশস্কৃতা ভ্রমরেণ ; সংরম্ভো দ্বেষো ভয়ঞ্চ, ত এব যোগস্তেন ॥ (২৮) বৈরেণ যানুচিন্তা তয়ৈব, পূতঃ পাপ্মা যেষাং তে, তং প্রাপুঃ ॥ (২৯) তদঘং কামাদিনিমিত্তং পাপং হিত্বা ॥ (৩০) তানাহ—গোপ্য ইতি ॥ (৩১) তর্হি বেণঃ কিমিতি নরকে পাতিতঃ ? তীব্রধ্যানাভাবাৎ পাপমেব তত্র ফলিতমিত্যাহ—কতমোঽপীতি। পুরুষং শ্রীহরিং প্রতি। পুরুষে চ পুরুষস্য কামাসম্ভবাদ্ ভয়াদিভিশ্চিন্তয়তাং পঞ্চানাং মধ্যে বেণো ন কতমোঽ-পীত্যুক্তম্ ॥

৩২। তদেবমিতিহাসপ্রস্তাবকথামুক্ত্বা শ্রীকৃষ্ণে শিশুপালস্য বৈরানুবন্ধে কো হেতুরিত্যপেক্ষায়াং তমেবেতিহাসং বক্তুমাহ—মাতৃষ্বস্রেয় ইতি। পদাদ্ বৈকুণ্ঠাচ্চ্যুতৌ ॥

৩৩। হরিদাসাবভিমৃশত্যভিভবতীতি তথা। কস্য শাপঃ, কীদৃশো বা ? অশ্রদ্ধেয়োঽনাদরণীয় ইবাসম্ভবাৎ ; ভবো জন্ম ॥

৩৪। অসম্ভবমেবাহ—জন্মহেতুভূতৈঃ প্রাকৃতৈর্দেহেন্দ্রিয়াসুভির্হীনানাং শুদ্ধসত্ত্বময়দেহানামিত্যর্থঃ। প্রাকৃতদেহসম্বন্ধেন সম্বদ্ধমেতদাখ্যানমাখ্যাতু-মর্হসি॥

৩৬। কথম্ভূতাঃ? পঞ্চ বা ষড়্‌বা হায়নানি বর্ষাণি যেষাম্, তে চার্ভা বালাস্তদ্বদাভা যেষাং তে। পূর্ব্বেষাং মরীচ্যাদীনামপি পূর্ব্বজাস্তেভ্যঃ প্রথম-জাতা দিগ্বাসসো দিগম্বরান্; অতঃ শিশূন্ মত্বা॥

৩৭। বাসমপি নার্হথঃ। কুতঃ পুনস্তৎসেবামিতি 'চ'কারার্থঃ। হে বালিশৌ! অতো হেতোরাশু যাতম্॥

৩৮। বাং যুবয়োঃ, ত্রিভির্জন্মভির্লোকায় স্বস্থানপ্রাপ্তয়ে কল্পতাং তাবতাঽয়ং শাপঃ সমাপ্যতামিতি পুনঃ প্রোক্তাবিত্যর্থঃ॥

৪০। ধরোদ্ধারে নিমিত্তে তৎপ্রতিঘাতী হতঃ॥

৪১। হিরণ্যকশিপোর্বধে কারণং সূচয়তি—হিরণ্যকশিপুঃ পুত্রমিতি॥

৪২। সর্ব্বভূতানামাত্মভূতম্। কুতঃ? সমং ব্রহ্মৈব পশ্যতীতি তথা তম্। অতঃ প্রশান্তং দ্বেষাদিরহিতম্, অতএব ভগবতস্তেজসা স্পৃষ্টং ব্যাপ্তম্। উদ্যমৈঃ শস্ত্রাস্ত্রপ্রহরণাদিভিঃ॥

৪৩। বিশ্রবসঃ সুতৌ॥

৪৪। ন্যহনদ্ধতবানিত্যর্থঃ। তর্হি তদেব কথয়েত্যুৎসুকং প্রত্যাহ—রামবীর্য্যমিতি॥

৪৫। কৃষ্ণচক্রেণ হতমংহো যয়োস্তৌ, তয়োঃ পাপমেব হতম্, ন তু তাবিত্যর্থঃ॥

৪৭। যেন কারণেন. প্রহ্লাদস্যাচ্যুতাত্মতাচ্যুতৈকচিত্তত্বম্, তদপি ব্রূহীতি শেষঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে

প্রথমোঽধ্যায়ঃ॥ ১॥

দ্বিতীয়োঽধ্যায়ঃ

দ্বিতীয়ে বিষ্ণুরোষেণ লোকং বিপ্লাব্য দানবৈঃ।
তত্ত্বতো[১] ভ্রাতৃপুত্রাদীনিতিহাসৈরসান্ত্বয়ৎ॥ (১)

১। ভগবদ্দ্বেষ এব তদ্দ্বেষেঽপি কারণমিত্যাশয়েনাহ—ভ্রাতরী-ত্যাদিনা। এবং দেবপক্ষপাতেন॥

২। কোপেন উদতিশয়েন জ্বলদ্ব্যাম্। কোপাগ্নিধূমেনৈব ধূম্রমম্বরং নিরীক্ষন্ নিরীক্ষমাণঃ॥

৩। করালদংষ্ট্রাভির্যুক্তয়োগ্রয়া দৃষ্ট্যা দুষ্প্রেক্ষ্যং ভ্রুকুটীযুক্তং মুখং যস্য সঃ॥

৬। সমেনাপ্যুপধাবনৈর্ভজনৈর্নিমিত্তভূতৈঃ পার্ষ্ণিগ্রাহেণ সতা॥

৭। এবং ত্যক্তঃ স্বভাবঃ সমত্বং যেন তস্য, ঘৃণেঃ শুদ্ধতেজোময়স্যাপি মায়াবনৌকসো বরাহরূপস্য সতঃ, অস্থিরাত্মনোঽব্যবস্থিতচিত্তস্য। কুতঃ? যো যো ভজতি, তং তং ভজমানস্যানুসরতঃ॥

৮—১০। তস্য রুধিরেণ যাবত্তর্পয়িষ্যামি, তাবদ্যূয়ং ভুবং যাতেতি তৃতীয়েনান্বয়ঃ॥ (৯) নন্বু দেবৈস্তদ্বধঃ কারিতঃ, অতস্তে কিং ন হন্যন্তে? তত্রাহ—তস্মিন্ হরৌ কূটে কপটেঽহিতে, প্রতিপক্ষে কূটমীহিতং যস্যেতি বা; নষ্টে অদৃষ্টে সতি, দেবাঃ শুষ্যন্তি, স্বয়মেব নাশং যাস্যন্তি। কুতঃ? বিষ্ণুরেব প্রাণা যেষাং তে। যথা কৃত্তমূলে বৃক্ষে শাখাঃ স্বয়ং শুষ্যন্তি, তদ্বৎ॥ (১০) তপোযজ্ঞাদিযুক্তান্ সূদয়ধ্বং ঘাতয়ত॥

১১। নন্বু তৈঃ কিমপরাদ্ধম্? তত্রাহ—বিষ্ণুরিতি। দ্বিজানাং ক্রিয়ানুষ্ঠানং মূলং যস্য সঃ; যতোঽসৌ যজ্ঞো ধর্ম্মময়শ্চ। দেবাদীনাং পরায়ণং

১। তদ্ধত- (ঘ)।

পরম আশ্রয়ঃ, অতো যজ্ঞরূপস্য বিষ্ণুর্মূলত্বাৎ, মামনাদৃত্য তদাশ্রয়ণাচ্চ তে বধ্যা ইতি ভাবঃ ॥

১২। তস্মাৎ পরং মন্ত্রং শৃণুতেত্যাহ—যত্র যত্রেতি। সন্দীপয়ত দহত, আজীব্যানাং বৃক্ষাণাম্ ; বৃশ্চত—ছেদনং কুরুত ॥

১৪। পুরং হট্টাদিমৎ, গ্রামস্তদ্রহিতঃ, ব্রজো গবাং বাসঃ, উদ্যানং কৃত্রিমং বনম্, ক্ষেত্রং ব্রীহ্যাদেঃ, আরামোঽকৃত্রিমং বনম্, আশ্রম ঋষীণাং স্থানম্, আকরো রত্নাদীনাম্, খেটঃ কৃষীবলানাং বাসঃ, খর্ব্বটো গিরিদ্রোণ্যাশ্রয়ো গ্রামঃ, ঘোষ আভীরাণাং বাসঃ, পত্তনং রাজধানী ॥

১৫। খনিত্রৈঃ খননসাধনৈঃ, আজীব্যানুপজীব্যান্ জম্ব্বাম্রকপিত্থাদীন্, শরণানি গৃহান্ ॥

১৬। বিপ্রকৃতে উপদ্রুতে, যজ্ঞভাগানামভাবাদ্ দিবং পরিত্যজ্যালক্ষিতাঃ সন্তো ভুবি চেরুঃ ॥

১৭। তদেবং প্রজাকদনং দানবেষু কুর্ব্বৎসু, স্বয়ং স্বর্গরাজ্যাদি সাধয়িতুং তপস্তপ্তুকামঃ প্রথমং যৎ কৃতবান্, তদাহ—হিরণ্যকশিপুরিত্যাদিনা। কটোদকং প্রেতায় প্রদেয়মুদকম্, 'আদি'-শব্দাৎ প্রেতশ্রাদ্ধাদিকঞ্চ ॥

২০। হে বধূরিতি ভ্রাতুর্ভার্য্যাং সম্বোধয়তি ॥

২১। ভবতু নাম তস্য শ্লাঘ্যো বধঃ, তথাপ্যস্মাকং তাবদ্দন্ধুর্গত এবেতি চেৎ, তত্রাহ—ভূতানামিতি। দৈবেন প্রাচীনকর্ম্মভিরেকত্র নীতানাং সংযোজিতানাং পুনশ্চ স্বৈঃ কর্ম্মভিরুন্নীতানাং বিযোজিতানাম্ ॥

২২। এবং লোকদৃষ্ট্যা শোকং নিবার্য্য তত্ত্বদৃষ্ট্যা বারয়তি—নিত্য ইতি ; আত্মা নিত্যো মৃত্যুশূন্যঃ, অব্যয়োঽপক্ষয়শূন্যঃ, শুদ্ধো নির্ম্মলঃ, সর্ব্বগঃ সর্ব্বগতঃ, সর্ব্ববিৎ সর্ব্বজ্ঞঃ, সর্ব্বত্র হেতুঃ—পরো দেহাদিব্যতিরিক্তঃ ; অতো মৃত ইতি, কৃশ ইতি, মলিন ইতি, বিযুক্ত ইতি, অজ্ঞ ইতি চ মত্বা শোকো

ন কার্য্য ইত্যর্থঃ। কথং তর্হি তস্য সংসারঃ? তত্রাহ—ধত্ত ইতি। আত্মনো মায়য়া স্বাবিদ্যয়া, লিঙ্গং মূর্ত্তীর্ধত্তে। গুণানুচ্চাবচান্, দেহান্ সুখদুঃখাদীন্ বা বিশেষেণ সৃজন্ স্বীকুর্ব্বন্। লিঙ্গশরীরোপাধিঃ সংসার ইত্যর্থঃ॥

২৩—২৬। এতৎ সদৃষ্টান্তং প্রপঞ্চয়তি—যথেতি চতুর্ভিঃ। (২৩) তরবঃ প্রতিবিম্বিতা উপাধিধর্ম্মা উপহিতে ভবন্তীতি দৃষ্টান্তমুক্ত্বা গ্রাহকধর্ম্মা গ্রাহ্যে ভবন্তীতি দৃষ্টান্তমাহ—চক্ষুষেতি॥ (২৪) অবিকলঃ পরিপূর্ণ এব, তৎসাম্যতাং মনঃসমতামিত্যর্থঃ॥ (২৫) লিঙ্গভাবনা দেহাভিমানঃ, এষ আত্মনো বিপর্য্যাসোঽন্যথাভাবঃ। তমেবাহ—প্রিয়ৈর্বিয়োগোঽপ্রিয়ৈর্যোগশ্চ, কর্ম্ম চ সংসৃতিশ্চ নানাগর্ভেষু প্রবেশঃ॥ (২৬) ততশ্চ সম্ভব উৎপত্তিঃ, বিবেকস্যাস্মৃতিরননুসন্ধানম্॥

২৭। তত্রাপি শোকহেতুং বিনা বৃথৈবায়ং শোক ইত্যস্মিন্নপ্যর্থে। প্রেতস্য মৃতস্য কস্যচিদ্যে বন্ধবস্তেষাঞ্চ সংবাদং শৃণুত॥

২৮। উপাসত তৎসমীপ আবৃত্য স্থিতাঃ॥

২৯। বিশীর্ণং রত্নময়ং কবচং যস্য, বিভ্রষ্টান্যাভরণানি স্রজশ্চ যস্য, শরেণ নির্ভিন্নং হৃদয়ং যস্য, অসৃজা রক্তেনাবিলং লিপ্তম্॥

৩০। প্রকীর্ণাঃ কেশা যস্য, ধ্বস্তে অক্ষিণী যস্য, রভসা সংরম্ভেণ দষ্টো দচ্ছদ ওষ্ঠো যেন, রজসা কুণ্ঠমাবৃতং মুখাম্ভোজং যস্য, ছিন্নমায়ুধং ভুজশ্চ যস্য॥

৩১। তস্য পাদয়োরুপ সমীপ আ সমন্তাদপতন্॥

৩৩—৩৪। বিলাপমেবাহ—অহো ইতি দ্বাভ্যাম্॥ (৩৩) অকরুণত্বমেবাহুঃ—দৃশামগোচরাং দশাং যেন বিধাত্রা ভবান্ প্রণীতো গমিতস্তেন বিধাত্রা ত্বমধুনা শুচাং বিবর্দ্ধনঃ কৃতোঽসীত্যন্বয়ঃ॥ (৩৪) হে মহীপতে! ত্বয়া সুহৃত্তমেন বিনা বয়ং কথং স্যাম ভবেম জীবেমেত্যর্থঃ। অতো হে

বীর! যত্র ত্বং যাস্যসি, তত্র তেঽনুযানমনুগমনং তব পাদয়োঃ শুশ্রূষাং কুর্ব্বতীনামস্মাকং দিশ দেহি ॥

৩৫। নির্হারং দাহার্থং নয়নমনিচ্ছতীনামস্তমস্তাচলং প্রতি ॥

৩৬। পরিদেবিতং রোদনম্, স্বপুর্য্যামেব স্থিত আশ্রুত্য শ্রুত্বা তত্র স্বয়মেবোপাগতো যমো বালকো ভূত্বা তানাহ—অহো ইত্যাদিনা ॥

৩৭। অহো আশ্চর্য্যম্। বয়সা মত্তোঽধিকানামপি লোকস্য বিধিং জন্মমরণাদিপ্রকারং বিপশ্যতামপি বিমোহঃ! মোহমেবাহ—যত্র যস্মাদ-ব্যক্তাদাগতস্তত্রৈব গতমপার্থং শোচন্তি। তদুক্তং গীতাসু—'অব্যক্তাদীনি ভূতানি ব্যক্তমধ্যানি ভারত! অব্যক্তনিধনান্যেব তত্র কা পরিদেবনা॥' ইতি। কিঞ্চ, স্বয়মপি স্বধর্ম্মা মৃতেন সহ সমানো মৃত্যুলক্ষণো ধর্ম্মো যেষাং তথাভূতা অপি ॥

৩৮। অবলা দুর্ব্বলা অপি বৃকাদিভিরভক্ষ্যমাণা বয়ং ন বিচিন্তয়ামঃ! তত্র হেতুঃ—যো গর্ভে রক্ষতি, স এব হি বিশ্বং রক্ষিতা রক্ষতি ॥

৩৯। ননু চ তস্য রক্ষণে কিং প্রয়োজনম্? ন কিঞ্চিদপি; কিন্তু ক্রীড়ৈব কেবলমিত্যাহ—য ইতি; য ঈশ ইদং বিশ্বং সৃজতি, রক্ষত্যব-লুম্পতে সংহরতি চ। ভোঃ অবলাঃ! তস্যেশিতুশ্চরাচরং ক্রীড়াসাধন-মাহুঃ। অতঃ স এব নিগ্রহে সংহারে সংগ্রহে পালনে চ প্রভুঃ ॥

৪০। প্রভুত্বমেবান্বয়ব্যতিরেকাভ্যাং দর্শয়তি—পথীতি। দিষ্টেন দৈবেনেশ্বরেণ রক্ষিতম্; তেনেশ্বরেণ বিহতমুপেক্ষিতম্। অস্য হতস্তেনৈবো-পেক্ষিতঃ ॥

৪১—৪৩। তদেবমাত্মনো জন্মমরণাদিকমঙ্গীকৃত্যেশ্বরাধীনত্বান্ন শোকঃ কার্য্য ইত্যুক্তম্, ইদানীন্তু দেহানামেব জন্মাদি, ন ত্বাত্মন ইত্যাহ— ভূতানীতি ত্রিভিঃ ॥ (৪১) ভূতানি দেহাঃ, নিজযোনিঃ স্বকারণভূতং লিঙ্গশরীরম্, তন্নিমিত্তৈঃ কর্ম্মভির্ভবন্তি জায়ন্তে, ন ভবন্তি নশ্যন্তি চ।

সর্ব্বশঃ দেবাদিদেহা অপি। তত্র হ তদা প্রকৃতৌ দেহে স্থিতোঽপ্যাত্মা তস্যাঃ প্রকৃতের্গুণৈর্দেহধর্ম্মৈর্জন্মাদিভির্ন বধ্যতে ন যুজ্যতে, যতোঽন্যতমো দেহাদ্যত্যন্তবিলক্ষণঃ॥ (৪২) নন্বহং কৃশঃ স্থূল ইত্যাদৌ ন বৈলক্ষণ্যং প্রতীয়তে? তত্রাহ—ইদমিতি; ইদং শরীরং মোহজমবিবেকাত্মত্বেন জাতম্, বস্তুতস্তু পৃথগেব। যত ঈয়তে দৃশ্যতে, ভৌতিকঞ্চ যথা গৃহমিত্যন্বয়ঃ। অত্রৈবং প্রয়োগঃ—দ্রষ্টুরভৌতিকাচ্চ পুরুষাৎ শরীরং ভিন্নং দৃশ্যত্বাৎ, ভৌতিকত্বাচ্চ যথাত্যন্তাবিবেকিন আত্মত্বেনাভিমতমপি গৃহং ততঃ পৃথক্ তদ্বদিতি। ভৌতিকত্বানুমানং বিবৃণ্বন্নাত্মনো জন্মাদ্যভাবমুপসংহরতি—যথা ঔদকৈঃ পরমাণুভির্জাতো বুদ্‌বুদাদিঃ, যথা চ পার্থিবৈর্জাতো ঘটাদিঃ, যথা চ তৈজসৈর্জাতঃ কুণ্ডলাদির্বিনশ্যতি, তথা তৈরেব ত্রিবিধৈঃ পরমাণুভির্জাতো জনো দেহ এব বিকৃতঃ পরিণতঃ সন্ বিনশ্যতি, ন ত্বাত্মেত্যর্থঃ॥ (৪৩) পৃথগবস্থানাভাবেঽপি ভিন্নত্বে দৃষ্টান্তদ্বয়মাহ—যথেতি। যথানলো দারুষ্ববস্থিতোঽপি দাহকত্বেন প্রকাশকত্বেন ভিন্ন এব প্রতীয়তে; যথা চ দেহগতোঽপ্যনিলো মুখনাসিকাদিষু পৃথক্ স্থিত এব প্রতীয়তে; দেহস্থত্বেঽপ্যাত্মনস্তদ্ধর্ম্মযোগাভাবে দৃষ্টান্তমাহ—যথা নভো ন সজ্জতে ক্বাপি সঙ্গং ন প্রাপ্নোতি, তথা পুমানপি সর্ব্বেষাং গুণানাং দেহেন্দ্রিয়াণামাশ্রয়স্তেষ্বাশ্রিতো বা পরঃ পৃথগেবেত্যর্থঃ॥ (৪৪) কিঞ্চ, হে মূঢ়াঃ! যমনুশোচথ, সোঽয়ং যুষ্মদ্বর্ত্তা সুযজ্ঞঃ শেতে, কিমিতি শোচথ? নন্বেতাবন্তং কালমসৌ শৃণোতি, অনন্তরং প্রতিবক্তি চ, ইদানীং তস্যাদর্শনান্মৃত ইতি শোচাম ইতি চেৎ, স তু শোচনীয়ো ন ভবতি, প্রাগপি তস্যাদর্শনাদিত্যাহ—যঃ শ্রোতেতি॥

৪৫। নন্ মুখনাসিকাসঞ্চারী প্রাণঃ শ্রোতা বক্তা চ দৃষ্ট এবেতি চেৎ, নাসৌ শ্রোতা বক্তা বাচেতনত্বাদিত্যাহ—ন শ্রোতেতি; মহান্ সর্ব্বেন্দ্রিয়চেষ্টাহেতুঃ, অতএব মুখ্যঃ, 'প্রাণো বৈ মুখ্যঃ' ইতি শ্রুতেঃ।

কস্তর্হি শ্রোতা বক্তা চ ? তত্রাহ—যস্ত্বিহ দেহ ইন্দ্রিয়ৈস্তত্তদর্থদ্রষ্টা আত্মা, স তু প্রাণদেহাভ্যামচেতনাভ্যামন্য এব স চেতনঃ ॥

৪৬। নন্বু চেতনত্বেঽন্যত্বে চাস্য 'অহং কৃশঃ স্থূলঃ কাণো বধিরঃ' ইত্যাদিদেহধর্ম্মোপলব্ধিঃ কুতঃ ? তত্রাহ—ভূতেন্দ্রিয়মনোভির্লিঙ্গ্যন্তে লক্ষ্যন্ত ইতি তথা, তান্ দেহান্ তেভ্যোঽন্য এব ভজতি, অহমিতি মন্যতে, তর্হি কথং মোক্ষঃ ? তত্রাহ—তচ্চ ভজনং স্বেন তেজসা বিবেকবলেনোৎ-সৃজত্যপি হি ইত্যনুভজনং[১] প্রমাণয়তি ॥

৪৭। নন্বু বিবেকানন্তরমপ্যাহারাদিকর্ম্মসু প্রবৃত্তের্ব্বন্ধঃ স্যাদেব ? ইত্যত আহ—যাবদিতি ; যাবল্লিঙ্গশরীরেণান্বিতস্তদভিমানধানাত্মা ভবতি, তাবদেব তস্য তৎ কর্ম্মনিবন্ধনং বন্ধহেতুর্ভবতি। ততো বিপর্য্যয়ো দেহধর্ম্ম-ভাক্ত্বম্, ততঃ ক্লেশশ্চানুবর্ত্ততে, ন তু লিঙ্গাভিমানে নিবৃত্তেঽপি, যতোঽয়ং মায়াযোগো বিপর্য্যয়াদিঃ, মায়য়া যুজ্যত ইতি, তথা ন পরমার্থত ইত্যর্থঃ ॥

৪৮। নন্বু সুখদুঃখাদীনাং তৎসাধনানাঞ্চ সত্যত্বপ্রতীতেঃ কুতো মায়াময়ত্বম্, তথা চ বহবো বাদিনঃ সত্যত্বমেব বদন্তি ? তত্রাহ—বিতথেতি ; বিতথো মিথ্যাভূতোঽয়মভিনিবেশঃ। কোঽসৌ গুণেষু তৎকার্য্যেষু সুখ-দুঃখাদিষ্বর্থঃ পরমার্থ ইতি ? দৃগ্ বচশ্চেতি যৎ, স কুতঃ ? ইত্যত আহ—যথেতি ॥

৪৯। উপসংহরতি—অথেতি ; অথ তস্মান্নিত্যমাত্মানমনিত্যং দেহং বা, তদ্বিদো নিত্যমনিত্যঞ্চ জানন্তো ন শোচন্তি। নন্বেবমুপদেষ্টারোঽপি শোচন্তো দৃশ্যন্তে ? তত্রাহ—নান্যথেতি। জ্ঞানদার্ঢ্যাভাবাৎ স্বভাবো ন নিবর্ত্তত ইত্যর্থঃ ॥

৫০। স্বয়ং সধর্ম্মা অপীতি যদুক্তম্, তত্রেতিহাসমাহ—লুব্ধক ইত্যা-দিনা। পক্ষিণামন্তক ঈশ্বরেণ নির্ম্মিতঃ সন্, যত্র যত্র তে, তত্র তত্র তান্

১। ইত্যনুভবং (ঘ)।

কণাদিভিঃ প্রলোভয়ন্ জালং বিস্তার্য্য বিশেষেণ ধৃতবান্; প্রলোভনমিতি পাঠে তেষামামিষাদিভিঃ প্রলোভনং কৃতবানিত্যর্থঃ ॥

৫১। কুলিঙ্গঃ কন্দভক্ষী পক্ষিবিশেষঃ; কুলিঙ্গয়োর্মিথুনম্ ॥

৫২। সিচস্তন্ত্র্যাং জালস্য সূত্রে, অসজ্জত বন্ধং প্রাপ। তামাপন্নামাপদং প্রাপ্তাং দৃষ্ট্বা কুলিঙ্গঃ পক্ষী তাং মোচয়িতুমকল্পঃ সন্ পর্য্যদেবয়দ্বৃক্ষশাখামাশ্রিত্য বিলাপং চকার ॥

৫৩। আকরুণয়া সর্ব্বতোঽনুকম্পয়া স্ত্রিয়া কিং করিষ্যতি ? ॥

৫৪। আত্মনো দেহস্যার্দ্ধেন। বিধুরায়ুষা ভার্য্যাশূন্যজীবিতেনানেন দুঃখং যথা ভবত্যেবং জীবতা কিং মে প্রয়োজনম্ ? অতো মামপি কামং নয়ত্বিত্যন্বয়ঃ ॥

৫৫। ন জাতাঃ পক্ষা যেষাং তান্ বালকান্ কথং বিভর্ম্মি পোক্ষ্যামি[১] ? মন্দভাগ্যা মে প্রজা মাতরং প্রতীক্ষন্তে ॥

৫৬। শাকুনিকঃ পক্ষিহন্তা নিলীনঃ সন্ ॥

৫৭। আত্মাপায়ং স্বমৃত্যুম্ ॥

৫৮। অযথোত্থিতম্—মিথ্যেবাবির্ভূতম্ ॥

৫৯। সাম্পরায়িকম্—পরলোককৃত্যম্ ॥

৬০। অশোচতেতি পাঠে অড়াগমশ্ছান্দসঃ। স্বঃ পর ইত্যভিনিবেশ এবাজ্ঞানম্, তেন বিনা ॥

৬১। সস্নুষা—স্নুষাসহিতা ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

১। পুষ্ণামি (ঘ)।

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে তস্য তপসা তপ্তং বীক্ষ্য জগদ্বিধিঃ।
আগত্য বিস্মিতস্তেন সংস্তুতশ্চ বরানদাৎ ॥ (১)

১। তদেবং সাধূনাং কদনে দানবানাদিশ্য বন্ধূনাঞ্চ শোকং তত্ত্বনিরূপণেনাপনীয় যৎ কৃতবান্, তদাহ—হিরণ্যকশিপুরিত্যাদিনা। অপ্রতিদ্বন্দ্বং প্রতিপক্ষহীনম্, একরাজমেকমেব রাজানং ব্যধিৎসত কর্ত্তুমৈচ্ছৎ ॥

২। ঊর্দ্ধ্বৌ বাহূ যস্য, নভসি দৃষ্টির্যস্য, পাদাঙ্গুষ্ঠেনাশ্রিতাবনির্যেন ॥

৩। জটানাং দীধিতিভিঃ কান্তিভিঃ, অংশুভী রশ্মিভিঃ, প্রলয়কর্ত্তা অর্ক ইব রেজে। পূর্ব্বং যে অলক্ষিতাঃ সন্তো ভুবি বিচেরুস্তে দেবাঃ পুনঃ স্বানি স্থানানি ভেজিরে ॥

৪। বিষ্বগীরিতঃ সর্ব্বতঃ প্রসৃতঃ সন্ ॥

৫। দ্বীপৈরদ্রিভিশ্চ সহিতা ভূশ্চলিতা ॥

৭। তব বলিহারাঃ করপ্রদাঃ পূজাকারিণ ইতি বা। অভিতো ভবতীত্যভিভূঃ, হে অভিভূঃ! হে সর্ব্বাধিপতে! অভি ভো ইতি পাঠে ভো ইতি সম্বোধনম্, অভিতো যাবন্ন নঙ্ক্ষ্যন্তীতি সম্বন্ধঃ ॥

৮—১১। ব্রহ্মণস্তস্মিন্ দ্বেষমুৎপাদয়িতুং তৎসংকল্পমাহুঃ —তস্যেতি চতুর্ভিঃ। (৮) তস্য সঙ্কল্পস্তব কিং ন বিদিতঃ? অথাপ্যস্মাভির্নিবেদিতং ত্বয়া শ্রূয়তাম্ ॥ (৯) তপোযোগয়োঃ সমাধিনা নিষ্ঠয়া সর্ব্বধিষ্ণ্যেভ্যঃ শ্রেষ্ঠং নিজাসনং সত্যলোকমধ্যাস্ত অধিতিষ্ঠতি ॥ (১০) তত্তথৈবাত্মনঃ সাধয়িষ্যামি। ননু ব্রহ্মণাতিদীর্ঘায়ুষা তপস্তপ্ত্বা তৎ সাধিতম্, অন্যঃ কুতস্তৎ সাধয়েৎ? তত্রাহুঃ —কালাত্মনোরিতি। যদ্যপ্যায়ুষোঽল্পত্বেন দেহো বারং বারং ম্রিয়তে, তথাপি কালস্যাত্মনশ্চ নিত্যত্বাদ্ বহুভির্জন্মভি-

স্তপস্তপ্তা তৎ[১] সাধয়িষ্যামোবেতি ॥ (১১) বর্দ্ধমানেনেতি যদুক্তম্, তস্য ফলমাহ[২]—অন্যথেতি ; অন্যথা সুরাসুরাদি-ব্যত্যয়েনাযথাপূর্ব্বং পুণ্য-পাপাদিব্যত্যয়েনেদং জগদ্বিধাস্যামি। অন্যৈর্বৈষ্ণবাদিভির্ধ্রুবাদিপদৈঃ কিং প্রয়োজনম্ ? অতস্তদেব সাধয়িষ্যামি ॥

১২। ইতি ত্বৎপদাপহরণে তস্য নির্ব্বন্ধং শুশ্রুম ; অতএবাসৌ তপঃ পরমমাস্থিতো বর্ত্ততে ; যদত্র যুক্তম্, তদনন্তরমেব বিধৎস্ব ॥

১৩। অন্যথা তব স্থানভ্রংশে সতি সাধূনামনিষ্টং স্যাদিতি শোচন্ত আহুঃ —তব পারমেষ্ঠ্যমিদমাসনং দ্বিজানাং গবাঞ্চ ভবায়োদ্ভবায়, শ্রেয়সে সুখায়, ভূত্যৈ ঐশ্বর্য্যায়, ক্ষেমায় লব্ধপালনায়, বিজয়ায়োৎকর্ষায় ॥

১৫—১৬। বল্মীকাদিভিঃ প্রতিচ্ছন্নং প্রথমং ন দদর্শ, পশ্চাৎ কথঞ্চিদ্ বিলক্ষ্য তং প্রাহেতি দ্বয়োরন্বয়ঃ। পিপীলিকাভিরাচীর্ণং সমন্তাদ্ ভক্ষিতং মেদশ্চ ত্বক্ চ মাংসঞ্চ শোণিতঞ্চ যস্য ॥ (১৬) অভ্রৈরপিহিতং ছন্নং রবিমিব বিলক্ষ্য বিস্মিতঃ প্রাহ ॥

১৮। হৃৎসারং ধৈর্য্যম্, দংশৈর্মক্ষিকাদিবিশেষৈর্ভক্ষিতো দেহো যস্য ॥

১৯। নিরম্বুর্নিবিদ্ধমম্বু যেন স ত্যক্তোদক ইত্যর্থঃ ॥

২০। তে ত্বয়ানেন ব্যবসায়েনৈব তাবজ্জিতোঽহম্। তপোনিষ্ঠেন ভবতা তু সুতরাং জিতঃ ॥

২১। মর্ত্ত্যস্য তবামর্ত্ত্যস্য মম দর্শনমফলং নিষ্ফলং ন ভবতি ॥

২২। আদৌ ভবতীতি আদিভবো ব্রহ্মা, ঔক্ষৎ প্রোক্ষিতবান্ ॥

২৩। বজ্রবৎ সংহননমঙ্গদার্ঢ্যং যস্য ; তপ্তস্য হেম্ন ইবাভা দেহকান্তির্যস্য ॥

২৪। তস্য দর্শনমেব মহানুৎসবো যস্য ॥

২৫। হর্ষেণাশ্রূণি পুলকোদ্ভেদশ্চ যস্য সঃ ॥

১। তৎপদং (ঘ); ২। তদভিপ্রায়মাহ (ঘ)।

২৬—২৭। অন্ধেন নিবিড়েন। তত্র হেতুঃ—কালসৃষ্টেন প্রকৃতি-গুণরূপেণ, ন তু ধ্বান্তেন। তমসাবৃতমিদং জগদ্ যোঽভিব্যনগভিব্যক্ত-মকরোৎ, যশ্চ[১] ত্রিগুণেনাত্মনেদং জগৎ সৃজতি, অবতি পালয়তি, লুম্পতি সংহরতি চ, তস্মৈ রজঃসত্ত্বতমসাং ধাম্নে আশ্রয়ায়, মহতেঽপরিচ্ছিন্নায়, পরায় পরমেশ্বরায় নম ইতি দ্বয়োরন্বয়ঃ॥

২৮—৩১। অত্র চ স্বপ্রকাশত্বং জগৎপ্রকাশকত্বং তৎকারণত্বং তৎ-সৃষ্ট্যাদিকর্ত্তৃত্বং মহত্ত্বং পরমেশ্বরত্বঞ্চেতি ষড়্‌বিধত্বমুক্তম্, তদেব প্রপঞ্চয়ন্ নমস্করোতি—নম ইত্যাদিচতুর্ভিঃ। (২৮) বীজায়—কারণায়। তত্র হেতুঃ—আত্মায়, জ্ঞানং জ্ঞপ্তিঃ, বিজ্ঞানং বিষয়াকারং জ্ঞানম্, তে মূর্ত্তির্যস্য তস্মৈ। অনেন স্বপ্রকাশত্বং জগৎপ্রকাশকত্বঞ্চ দর্শিতম্। বীজায়েতি নিমিত্তত্ব-মুক্তম্; উপাদানত্বঞ্চাহ—প্রাণাদয়ো যে বিকারাস্তৈ রূপৈর্ব্যক্তিং কার্য্যা-কার[২]মীয়ুষে প্রাপ্তবতে॥ (২৯) এবমাত্মনা ত্রিবৃতা চেত্যনেনোক্তং কারণত্বং দ্বেধা দর্শিতম্, মহত্ত্বমীশ্বরত্বঞ্চাহ—ত্বমিতি; ত্বমেব জগতো জঙ্গমস্য, তস্থুষঃ স্থাবরস্য চেশিষে নিয়ন্তা ভবসি। কেন? মুখ্যেন প্রাণেন সূত্রাত্মরূপেণ। অতস্ত্বং প্রজানাং পতিঃ, তাসাং চিত্তস্য চ চিত্তেশ্চ তৎ-পরিণামভূতায়াশ্চেতনায়া মনসশ্চ তন্নিয়ম্যানামিন্দ্রিয়াণাঞ্চ পতিঃ, অতস্ত্ব-মেব মহান্, ভূতানামাকাশাদীনাং তদ্‌গুণানাং শব্দাদিবিষয়াণামাশয়ানাং তদ্বাসনানামীশশ্চ; এতেনৈব স্রষ্টৃত্বং দর্শিতম্॥ (৩০) ইদানীং যজ্ঞ-প্রবর্ত্তকত্বেনান্তর্যামিত্বেন চ জগৎপালকত্বমাহ—ত্বমেব চ সপ্ততন্তূনগ্নিষ্টোমাদি-যজ্ঞান্ বিস্তারয়সি। কথম্? ত্রয্যা তন্বা বেদত্রয়রূপেণ। কথম্ভূতয়া? চত্বারো হোতারো যত্র তচ্চতুর্হোত্রকং কর্ম্ম, তদ্বিষয়তয়া বিদ্যয়াত্মবতাং প্রাণিনামাত্মভূতস্ত্বমেবান্তরাত্মা চান্তর্য্যামী। কুতঃ? যতঃ কবিঃ সর্ব্বজ্ঞঃ। তৎ কুতঃ? একঃ—অখণ্ডঃ। তত্র হেতুরনাদিরনন্তপারশ্চেতি, নাস্ত্যন্তঃ

১। তত্র হেতুঃ (গ); ২। কার্য্যকারণ- (গ)।

কালতঃ, পারঞ্চ দেশতো যস্য সঃ ॥ (৩১) অতঃ কালরূপেণ সংহর্ত্তৃত্বমাহ—ত্বমেবেতি। লবাদ্যৈঃ কালাবয়বৈঃ ক্ষিণোষি ক্ষপয়সি, তদেবং সৃষ্ট্যাদি-কর্ত্তৃত্বেঽপি নির্ব্বিকারত্বমেবাহ—কূটস্থ ইতি। তত্র হেতবঃ —আত্মা জ্ঞান-রূপঃ, পরমেষ্ঠী পরমেশ্বরঃ, অজো জন্মশূন্যঃ, মহানপরিচ্ছিন্নঃ, কিঞ্চ জীব-লোক এব কর্ম্মবশাজ্জন্মাদিভির্বিক্রিয়তে, ত্বন্তু তস্য জীবো জীবনহেতুর্যত-স্তস্যাত্মা নিয়ন্তা ॥

৩২। তৎ কুতঃ? তত্রাহ—ত্বত্ত ইতি। ত্বত্তো ব্যতিরিক্তং যদি কিঞ্চিদ্ভবেৎ, তর্হি তস্মাত্তব জন্মাদিবিকারো নিয়ম্যত্বাদিকং বা ভবেৎ, তত্তু নাস্তীত্যাহ—পরং কারণম্, অপরং কার্য্যম্, তত্র চ এতজ্জঙ্গমম্, অনেজৎ স্থাবরং চ তদ্ব্যতিরিক্তং নাস্তি। ননু মদ্বোধকং শাস্ত্রং ব্যতিরিক্ত-মস্তীতি চেন্ন, যতো বিদ্যা বেদোপবেদাদিবিদ্যাস্থানানি, কলাশ্চ তদঙ্গানি তবৈব তনবঃ, ন তু ত্বদ্ব্যতিরিক্তাঃ। তৎ কুতঃ? যতস্ত্বং বৃহদ্ব্রহ্মৈবাসি। তদপি কুতঃ? তত্রাহ—হিরণ্যরূপং ব্রহ্মাণ্ডং গর্ভে যস্য সঃ, ত্রিপৃষ্ঠস্ত্রি-গুণাত্মকস্য প্রধানস্য পৃষ্ঠে পরতঃ স্থিতঃ; 'অক্ষরাৎ পরতঃ পরঃ' ইত্যাদি শ্রুতেঃ ॥

৩৩। ননু ব্রহ্মাণ্ডশরীরস্য জীবস্য মম কুতো ব্রহ্মত্বম্, কুতো বা ব্রহ্মাণ্ড-গর্ভত্বাদি? তত্রাহ—ব্যক্তং কার্য্যমিদং তব শরীরম্, ব্যক্তং সত্যমিতি বা; যেন শরীরেণ ত্বমিন্দ্রিয়প্রাণমনসাং গুণান্ বিষয়ান্ ভুঙ্‌ক্ষে, কিন্তু[১] পারমেষ্ঠ্যে পরমৈশ্বর্য্যে ধামনি স্বরূপে স্থিত এব ভুঙ্‌ক্ষে, ন ত্বস্মদাদিবৎ স্বরূপ-তিরোধানেন। অতস্ত্বমব্যক্ত আত্মা নিরুপাধি ব্রহ্মৈব পুরাণপুরুষশ্চেত্যর্থঃ ॥

৩৪। ননু ব্রহ্মত্বং পুরাণপুরুষত্বং কথমেকস্য? তত্রাহ—অনন্তেতি, হে অনন্ত! যেন ত্বয়াব্যক্তেন মনোবচনাগোচরেণ রূপেণেদং বিশ্বং ততং

১। কিঞ্চ (ঘ)।

ব্যাপ্তম্, তস্মৈ তুভ্যং ভগবতেঽচিন্ত্যৈশ্বর্য্যায় নমঃ। ভগবত্ত্বে হেতুঃ— চিদচিচ্ছক্তিযুক্তায়—চিচ্ছক্তির্বিবিদ্যা, অচিচ্ছক্তির্মায়া, তাভ্যাং যুক্তায়েতি ॥

৩৫—৩৬। অন্যস্মাত্ত্বৎসৃষ্টব্যতিরিক্তাদপি, ভগবন্! আয়ুর্ধৈর্ম্ ত্যুর্মা ভূৎ ॥

৩৭। ব্যসুভিরপ্রাণৈঃ, অসুমদ্ভিঃ সপ্রাণৈঃ, যথা আত্মনস্তবাস্তি মহিমা, তথাপ্রতিদ্বন্দ্বতাদিকং দেহীতি শেষঃ ॥

৩৮। তপসা যোগেন চ প্রভাবো যেষাং তেষাম্। যদণিমাদ্যৈশ্বর্য্যং ন রিষ্যতি ন নশ্যতি, তচ্চ দেহীত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
তৃতীয়োঽধ্যায়ঃ ॥ ৩ ॥

চতুর্থোঽধ্যায়ঃ

চতুর্থে তু বরান্ লব্ধ্বা বিজিত্যাখিললোকপান্।
বিষ্ণুদ্বেষেণ তান্ সর্ব্বান্ দৈত্যেন্দ্রঃ সমপীড়য়ৎ ॥ (১)

১। শতধৃতির্ব্রহ্মা ॥

২। মম মত্তঃ, যদ্যপীমে দুর্লভাঃ ॥

৩। অমোঘোঽনুগ্রহো যস্য। প্রজেশ্বরৈর্মরীচ্যাদিভিঃ ॥

৪। যদর্থং তপস্তপ্তং তদাহ—এবমিত্যাদিনা ॥

৭। সর্ব্বেষাং সত্ত্বানাং প্রাণিজাতীনাং যে যে পতয়স্তান্ ॥

৮। ত্রিপিষ্টপং স্বর্গম্, অধ্যাস্তে স্ম—অধিষ্ঠিতবান্। তত্র চ মহেন্দ্র-ভবনমধ্যাবাসাধিবসতি স্ম ॥

৯—১১। অখিলসমৃদ্ধিযুক্তত্বমেবাহ—যত্রেতি ত্রিভিঃ। (১০ ক্ষৌ দামানি পরিচ্ছদাঃ পরিকরা যাসাম্ ॥ (১১) সুদতীঃ—সুদত্যঃ ॥

১২। উর্জ্জিতমধিকং চণ্ডং তীব্রং শাসনং যস্য ॥

১৩। অঙ্গ! হে রাজন্! উরুগন্ধিনোগ্রগন্ধেন মধুনা সুরয়া মত্তম্; অতএব বিবৃত্তে বিঘূর্ণিতে তাম্রে অক্ষিণী যস্য তম্, অশেষধিষ্ণ্যপাঃ সর্ব্ব-লোকপালা উপায়নযুক্তৈঃ পাণিভিরুপাসত। ত্রিভির্ব্রহ্মবিষ্ণুরুদ্রৈর্বিনা। পদমাশ্রয়ভূতম্ ॥

১৪। উপাসনপ্রকারমাহ—জগুরিতি ॥

১৭। তৎপত্ন্যো নস্য উহুর্বহন্তি স্ম। রত্নাকরানেবাহ—ক্ষারেতি ॥

১৮। আক্রীড়ম্—ক্রীড়াস্থানম্, ক্রমাঃ সর্ব্বেষ্বৃতুষু গুণান্—পুষ্প-ফলাদীন্; স চ লোকপালানাং পৃথগ্বিধান্ গুণান্ বর্ষণদহনশোষণাদীনেক এব দধার ॥

১৯—২০। নির্জ্জিতাঃ ককুভো যেন। যথোপজোষং যথাপ্রীতি; মহান্ কাল একসপ্ততিযুগানি কিঞ্চিদধিকানি ॥

২৪। অরূপা—বক্তৃরহিতা[১] ॥

২৫। মম দর্শনং শ্রবণং সর্ব্বেষাং শ্রেয়সামুপপত্তয়ে প্রাপ্তয়ে ভবতি ॥

২৮। ননু দেবাদিবিদ্বেষেঽপ্যস্য বিনাশো নাস্তি, ব্রহ্মবরোর্জ্জিতত্বাৎ? তত্রাহ—নির্ব্বৈরায়েতি। সর্ব্বমহং সহে, ন মদ্ভক্তদ্রোহমিতি ভাবঃ ॥

২৯। অসুরঞ্চ হতং মেনিরে, তদানীং তদ্দ্বেষস্য প্রবৃত্তত্বাদিতি ভাবঃ ॥

৩০। তমেব দ্বেষং বক্তুমাদৌ সুতস্য মহত্ত্বমাহ—তস্যেত্যাদিনা। গুণৈর্মহানভূৎ। গুণানেবাহ—মহদুপাসক ইত্যাদিনা ॥

৩১। সত্যা সন্ধা প্রতিজ্ঞা যস্য; এক এব প্রিয়শ্চ সুহৃত্তমশ্চ ॥

৩২। সম্যঙ্ নতা আর্য্যাণামঙ্ঘ্রয়ো যেন, গুরুর্বীশ্বর ইতি ভাবনা যস্য ॥

১। রূপরহিতা (ক)।

৩৩। ব্যসনেষু প্রাপ্তেষ্বপি নোদ্বিগ্নচিত্তঃ, দৃষ্টেষু শ্রুতেষু গুণেষু বিষয়েষু নিঃস্পৃহঃ, যতস্তেষ্ববস্তুদৃক্ ; দান্তা ইন্দ্রিয়াদয়ো যস্য, রহিত আসুরো ভাবো মৎসরাদির্যস্য, অসুরোঽপি সন্ প্রশান্তকামঃ ॥

৩৪। অধুনাপি তে গুণা নাপিধীয়ন্তে, তিরোহিতা ন ভবন্তি ॥

৩৫। সাধুগাথাসদসি সাধুকথাপ্রসঙ্গবত্যাং সভায়াম্। যং প্রহ্লাদম্, প্রতিমানং দৃষ্টান্তম্, রিপবোঽপি সুরাঃ কুর্ব্বন্তি, কিং বক্তব্যং ভবাদৃশা বিষ্ণুভক্তাঃ ? ॥

৩৬। সূচ্যতে ময়া কেবলং স্তোত্যতে সুষ্ঠু কথ্যত ইতি বা ॥

৩৭—৪২। নৈসর্গিকরতের্লিঙ্গান্যাহ—ন্যস্তক্রীড়নক ইতি ষড়্ভিঃ। (৩৭) তন্মনস্তয়া—তদেকচিত্তত্বেন ॥ (৩৮) এতানি—আসনাদীনি। গোবিন্দেন পরিরম্ভিত আত্মনা একীকৃতঃ ॥ (৩৯) রুদতি রোদিতি, রৌতি বৈকুণ্ঠস্য চিন্তয়া শবলা ব্যামিশ্রা ক্ষুভিতা চেতনা যস্য ; তস্য চিন্তয়া আহ্লাদো যস্য ॥ (৪০) ক্বচিদুৎকণ্ঠো মুক্তকণ্ঠঃ সন্, অনুচকার তচ্চেষ্টাদিকং স্বয়ং কৃতবান্ ॥ (৪১) সংস্পর্শস্তদ্ভাবাপত্তিস্তেন নির্বৃতঃ ; অস্পন্দঃ স্থিরো যঃ প্রণয়স্তেন য আনন্দস্তেন যৎ সলিলম্, তেন যুক্ত আমীলিত ঈষন্নিমীলিত ঈক্ষণে যস্য সঃ ॥ (৪২) আত্মনঃ পরাং নির্বৃতিং তন্বন্, দুঃসঙ্গেন দীনস্যান্যস্যাপি মনঃ শমং শান্তং ব্যধাৎ ॥

৪৩। অঘং দ্রোহমকরোৎ ॥

৪৪। প্রথমাধ্যায়ান্তে পৃষ্টমেবার্থমতিবিস্ময়েন পুনঃ পৃচ্ছতি—দেবর্ষ ইতি। তব ত্বত্তঃ, তব বাক্যমিতি বা। সাধবেঽঘমদাৎ সাধোর্দ্রোহং কৃতবানিতি যদেতদ্বেদিতুং জ্ঞাতুমিচ্ছামঃ ॥

৪৫। উপালভন্ত আক্ষিপন্তি, অঘন্তু নৈব কুর্ব্বন্তি, অপরঃ শত্রুরিব ॥

৪৬—

৪৬। অনুবশাননুকূলান্ সাধূনগাধবোধান্[১], গুরুঃ পিতৈব দেবতা যেষাং তানুদ্দিশ্যাঘং ন কুর্ব্বন্তীতি কিমু বক্তব্যমিত্যর্থঃ। পুত্রায় পুত্রমুদ্দিশ্য পিতুর্দ্বেষঃ, পিত্রা কৃতো দ্বেষঃ, পুত্রস্য মরণার্থং প্রযোজিতঃ প্রবর্ত্তিত ইতি যদেতৎ কৌতূহলং বিধম অপাকুরু; যদ্বা, যদ্যস্মাৎ পুত্রায় যো দ্বেষঃ, স পিতুর্ম্মরণায় প্রযোজিতঃ, অত এতৎ কৌতূহলং বিধমেত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
চতুর্থোঽধ্যায়ঃ॥ ৪ ॥

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে গুরুতোঽধীতং ত্যক্ত্বা বিষ্ণুস্তুতৌ রতম্।
ঘাতয়ন্ দ্বিপসর্পাদ্যৈঃ সুতং দৈত্যো ন চাশকৎ॥ (১)

১। ভগবদ্ভক্তিরেব বিদ্বেষকারণমিতি বক্তুমাহ—পৌরোহিত্যায়েত্যাদিনা। কাব্যঃ—শুক্রঃ, অতস্তস্য সুতৌ, দৈত্যরাজগৃহান্তিকে ন্যবসতামিতি শেষঃ॥

২। পাঠ্যান্ দণ্ডনীত্যাদীন্; পাঠ্যানসুরবালকানিতি বান্বয়ঃ॥

৩। অনু শ্রবণানন্তরম্, তথৈব পপাঠ চ, কিন্তু তৎ সাধু ন মেনে। তত্র হেতুঃ—স্বঃ পর ইত্যসদ্গ্রহো মিথ্যাভিনিবেশ এবাশ্রয়ো যস্য তৎ॥

৫। হে অসুরবর্য্য! অসদ্গ্রহাৎ 'অহং মম' ইতি-মিথ্যাভিনিবেশাদ্ধেতোঃ সম্যগুদ্বিগ্না বিষণ্ণা ধীর্যেষাং তে। 'বনং গতঃ সন্ হরিমাশ্রয়েত' ইতি যত্তদেবাহং সাধু মন্যে। কথম্ভূতং গৃহং হিত্বা? আত্মনঃ পাতমধঃপাতনিমিত্তম্। কুতঃ? অন্ধকূপবন্মোহাবহম্॥

১। অরাগরোষান্ (ঘ)।

৬। পরপক্ষে বিষ্ণৌ সমাহিতাঃ পরিনিষ্ঠিতাঃ। হাসমেবাহ[১]—বুদ্ধিরিতি ॥

৭। বিষ্ণুপক্ষৈর্ভাগবতৈর্হেতুভূতৈঃ। নন্‌ তদ্গৃহে কুতস্তেষাং প্রবেশঃ? সত্যম্, তথাপি প্রতিচ্ছন্নৈর্বেশান্তরেণ ছন্নৈঃ ॥

৮। দৈত্যৈর্গৃহমানীতম্ ॥

৯। বালান্ সর্ব্বান্, অতি অতিক্রম্য, তুভ্যং তব ॥

১১। অহো মায়ামোহিতা ভবন্তো মামাক্ষিপন্তীত্যাশয়েন তাবদাহ—'পরঃ স্বশ্চ' ইতি মিথ্যাভিনিবেশো যদীয়য়া মায়য়ৈব কৃতঃ, ন তু বাস্তবঃ, অতএব তদীয়য়া মায়য়া বিমোহিতবুদ্ধীনাং ভবতামেব দৃষ্টঃ, ন তু মম, তস্মৈ অচিন্ত্যমায়েশ্বরায় নমঃ ॥

১২—১৪। অহো কিমেতৎ প্রলপসি? তব বুদ্ধিভেদো যতো জাতস্তৎ কথয়েত্যাক্ষিপ্তঃ সন্, তৎপ্রসাদাদেবেত্যুত্তরমাহ—স ইতি ত্রিভিঃ। (১২) স ভগবান্ যদানুব্রতোহনুকূলো ভবতি, তদা পশূনামিব বুদ্ধির্ভেদগতাসতী মিথ্যা সংসারবিষয়া বিভিদ্যতে, অভিন্নাত্মনিষ্ঠা ভবতি ॥ (১৩) ভেদস্যাসত্ত্বং দর্শয়ন্নাহ—স এব পরমাত্মৈব স্বঃ পর ইতি চ, অবিবেকিভির্নিরূপ্যতে। যুক্তঞ্চৈতৎ, যতো যস্য বর্ত্মনি জিজ্ঞাসায়াং ব্রহ্মাদয়োঽপি মুহ্যন্তি। তত্র হেতুঃ —দুরত্যয়ং দুর্ঘটমনুক্রমণমনুচরিতমনুবর্ণনং বা যস্য সঃ॥ (১৪) নন্‌ নির্ব্বিকারস্য কথং মতিভেদকত্বম্? তত্রাহ—যথেতি; যথা অয়ো লৌহমাকর্ষস্যায়স্কান্তস্য সমীপে স্বয়মেব ভ্রমতি, তথা মে চেতসশ্চক্রপাণেঃ সন্নিধিরেব[২]। কুতো জাতস্তৎসন্নিধিঃ? তত্রাহ—যদৃচ্ছয়েতি; কস্য তপোদানাদেঃ ফলমেতদিতি ন জ্ঞায়ত ইত্যর্থঃ ॥

১৫। রাজসেবক উবাচেতি শেষঃ ॥

১। হাসে হেতুঃ (ঘ); ২। সন্নিধৌ তব (ঘ)।

১৬। অরে বেত্রং কশা আনীয়তাম্, উপায়ানাং[১] মধ্যে চতুর্থো দমো দণ্ডোঽস্য দুর্ব্বুদ্ধেরুদিত উক্তঃ শাস্ত্রেষু। দুর্ব্বুদ্ধিত্বে হেতুঃ—কুলাঙ্গারস্য কুলস্যাঙ্গারবন্নাশহেতোঃ॥

১৭। তৎ কুতঃ? তত্রাহ—দৈতেয়া এব চন্দনদ্রুমাস্তেষাং বনেঽয়ং কণ্টকদ্রুমতুল্যো জাতঃ। তদেবাহ—যস্য দৈতেয়চন্দনবনস্য মূলোন্মূলনে পরশুস্থানীয়স্য বিষ্ণোরয়মর্ভক এব নালায়িতো নালমিবাচরৎ। যথা পরশোশ্ছেদকত্বে বদরাদি[২]দ্রুমনির্ম্মিতো দণ্ডঃ সহকারী, তং বিনা ছেদনাসম্ভবাৎ, তথায়ং বিষ্ণোর্দৈত্যমূলচ্ছেদে হেতুর্জাত ইত্যর্থঃ॥

১৮। ইতি তং প্রহ্লাদং ভীষয়ন্ ধর্ম্মার্থকামবর্গস্য প্রতিপাদকং শাস্ত্রমধ্যাপয়ামাস॥

১৯। জ্ঞাতং জ্ঞেয়মুপায়ানাং চতুষ্টয়ং সামদানাদি যেন তং জ্ঞাত্বা। দৈত্যেন্দ্রং প্রতি। মাত্রা মৃষ্টমুদ্বর্ত্ত্য স্নাপিতম্॥

২৩। পাদসেবনং পরিচর্য্যা, অর্চ্চনং পূজা, দাস্যং কর্ম্মার্পণম্, সখ্যং তদ্বিশ্বাসাদি, আত্মনিবেদনং দেহসমর্পণম্; যথা বিক্রীতস্য গবাশ্বাদের্ভরণপালনাদিচিন্তা ন ক্রিয়তে, তথা দেহং তস্মৈ সমর্প্য তচ্চিন্তাবর্জ্জনমিত্যর্থঃ॥

২৪। ইতি নব লক্ষণানি যস্যাঃ সা, অধীতেন চেদ্ভগবতি বিষ্ণৌ ভক্তিঃ ক্রিয়তে। সা চার্পিতৈব সতী যদি ক্রিয়েত, ন তু কৃতা সতী পশ্চাদর্প্যেত, তদুত্তমমধীতং মন্যে; ন ত্বস্মাদ্গুরোরধীতং শিক্ষিতং বা তথাবিধং কিঞ্চিদস্তীতি ভাবঃ॥

২৬। ন বিদ্যতে সারং যত্র তদসারম্; ন বিদ্যতে সারং যস্মাদিতি বাস্তবোঽর্থঃ॥

২৭। মিত্রত্বেন প্রবর্ত্তমানস্যাপি তব বিরোধাচরণং নাসম্ভাবিতমিত্যাহ—সন্তি হীতি। দুষ্টং মৈত্রং মিত্রত্বং যেষাং তে দুর্মৈত্রাঃ। রোগ

১। সামদানভেদদণ্ডানাং (ঘ); ২। বব্বুলাদি- (ঘ)।

ইতি—'ব্রহ্মহা ক্ষয়রোগী স্যাৎ সুরাপঃ শ্যাব-দন্তকঃ। স্বর্ণহারী তু কুনখী দুশ্চর্ম্মা গুরুতল্পগঃ ॥' ইত্যাদি-স্মৃত্যুক্তঃ; পাতকিনাং কালে নরকভোগানন্তরং রোগো যথোদেতি, তথা তেষাং দুর্জনানাং সুজনত্বেন বর্ত্তমানানামপ্যঘং বিদ্বেষাদিকমুদেতীত্যর্থঃ ॥

২৮। মৎপ্রণীতং ময়া পাঠিতম্, নোঽস্মভ্যম্, কং কুৎসিতং দোষং মাস্ম অদাঃ, অড়াগম আর্ষঃ, ময়ি দোষারোপং মা কৃথা ইত্যর্থঃ। ইন্দ্রশত্রো ইতি ; ন হি ব্রাহ্মণেষু তব কোপ উচিত ইতি ভাবঃ ॥

২৯। গুরুমুখী—গুরুবাক্যজনিতা। হে অভদ্র ! ॥

৩০। আস্তামিয়ং বার্ত্তা, ভবাদৃশানাং বিষয়াসক্তানামত্রানধিকারাদিত্যাশয়েনাহ—মতিরিতি। পরতো গুরোঃ, স্বতো বা, মিথো বা, অন্যোন্যতো নাভিপদ্যেত ন সংপদ্যেত। কেষাম্? গৃহব্রতানাং গৃহ এব ব্রতং সংকল্প ইতিকর্ত্তব্যতাচিন্তা যেষাম্ ; অতএবাদান্তৈরনুপরতৈর্গোভিরিন্দ্রিয়ৈর্হেতু-ভূতৈস্তমিস্রং সংসারং বিশতাম্ ; তত্র চর্বিবতস্যৈব চর্ব্বণং যেষাম্ ॥

৩১। ননু শ্রীকৃষ্ণস্য পরমানন্দস্বরূপত্বাত্তেঽপি তন্নিষ্ঠা এব কিং ন স্যুঃ? ইতি চেৎ, তদজ্ঞানাদিত্যাহ—নেতি। যে দুরাশয়া বিষয়বাসিতান্তঃকরণাস্তে হি বিষ্ণুং ন বিদুঃ। তত্র হেতুঃ—স্বস্মিন্নেবার্থঃ পুরুষার্থো যেষাং তেষাং গতিং গম্যম্। ননু তেঽপি গুরূপদেশাদ্বিষ্ণুং জ্ঞাস্যন্তি? তত্রাহ—বহির্বিষয়েষ্বর্থো যেষাং তে বহিরর্থাস্তানেব গুরুত্বেন মন্তুং শীলং যেষাং তে ; অতোঽন্ধৈরুপনীয়মানা অন্ধা যথা পন্থানং ন বিদুঃ, কিন্তু গর্ত্তে পতন্তি, তথা তেঽপীশস্য তন্ত্র্যাং দীর্ঘরজ্জ্বাং বেদলক্ষণায়াম্, উরূণি দামানি ব্রাহ্মণাদিনামানি যস্যাং তস্যাং কামৈঃ কর্ম্মভির্বদ্ধা এব ভবন্তীত্যর্থঃ। তদুক্তম্—বিষয়াবিষ্টচিত্তানাং বিষ্ণ্বাবেশঃ[১] সুদূরতঃ। বারুণীদিগ্গতং বস্তু ব্রজন্নৈন্দ্রীং কিমাপ্নুয়াৎ?' ইতি ॥

১। কৃষ্ণাবেশঃ (গ)।

৩২। নন্থ 'একো দেবঃ সর্ব্বভূতেষু গূঢ়ঃ, সর্ব্বব্যাপী সর্ব্বভূতান্তরাত্মা' ইত্যাদিশ্রুতিপ্রতিপাদিতং বিষ্ণুং কথং ন বিদুঃ ? কুতো বা তেষাং তমিস্র-প্রবেশঃ ? তত্রাহ—নৈষামিতি। নিষ্কিঞ্চনানাং নিরস্তবিষয়াভিমানানাং মহত্তমানাং পাদরজসাভিষেকং যাবন্ন বৃণীত, তাবচ্ছ্রুতিবাক্যতো জ্ঞাতেঽ-প্যেষাং মতিরুরুক্রমস্যাঙ্ঘ্রিং ন স্পৃশতি, ন প্রাপ্নোতি, অসম্ভাবনাদিভি-র্বিহন্যত ইত্যর্থঃ। অনর্থস্য সংসারস্যাপগমো যদর্থঃ, যস্যা অঙ্ঘ্রিস্পর্শিন্যা মতেরর্থঃ প্রয়োজনম্। মহদনুগ্রহাভাবান্ন তত্ত্বনিশ্চয়ঃ, নাপি মোক্ষস্তেষা-মিত্যর্থঃ ॥

৩৩। নিরস্যত নিরাস্থচ্চিক্ষেপ ॥

৩৪। অমর্ষোঽসহনম্, তেন সহিতয়া রুষাবিষ্টো ব্যাপ্তঃ; কষায়ীভূতে আতাম্রে লোচনে যস্য। হে নৈর্ঋতা রাক্ষসাঃ! ॥

৩৫। বধ্যত্বে হেতুঃ—যতোঽয়ং মে ভ্রাতৃহা। কুতঃ? যো বিষ্ণোঃ পাদৌ দাসবদর্চ্চতি, তৎপক্ষপাতীত্যর্থঃ; অতঃ স এবায়মিত্যন্বয়ঃ ॥

৩৬। অহো বিষ্ণুরপ্যমুমবিশ্বসনীয়ং কিমিতি স্বীকৃতবানিত্যাহ—বিষ্ণোর্ব্বেতি। অহাৎ—জহৌ ॥

৩৭। নন্থ তবায়মপত্যং কথং বধ্যঃ? তত্রাহ—পরোঽপ্যৌষধমিব হিতকৃচ্চেত্তর্হ্যপত্যমেব জ্ঞেয়ঃ, সুতঃ স্বদেহজোঽপ্যহিতশ্চেদাময় ইব। আস্তাং মমতাস্পদস্য কথা, অঙ্গমপি যৎ করচরণাদি, তদপ্যাত্মনোঽহিতঞ্চেৎ ছিন্দ্যাদেবেত্যর্থঃ ॥

৩৮। অতঃ সর্ব্বৈরুপায়ৈর্হন্তব্যঃ। সম্ভোজো ভোজনং ভোজনাদিষু বিষাদিপ্রয়োগৈরিত্যর্থঃ। যথা দুষ্টমিন্দ্রিয়ং মুনেঃ শত্রুঃ ॥

৩৯। তিগ্মা তীক্ষ্ণা দংষ্ট্রা যেষাম্, করালান্যাস্যানি ভয়ঙ্করাণি মুখানি যেষাং তে চ তে চ। তাম্রাণি শ্মশ্রূণি শিরোরুহাশ্চ যেষাম্ ॥

৪১। পরে ঈশ্বরে যুক্তঃ সমাহিত আত্মা মনো যস্য, তস্মিন্ প্রহ্লাদে তেষাং নৈর্ঋতাদীনাং প্রহারা নিষ্ফলা আসন্ জাতাঃ। তত্র হেতবঃ — ব্রহ্মণি নির্বিকারেঽনির্দেশ্যেঽবিষয়ে ভগবতি নিরতিশয়ৈশ্বর্য্যে অখিলাত্মনি শস্ত্রাদীনামপি নিয়ন্তরি, এবম্ভূতে পরে। অপুণ্যস্য নির্দ্দৈবস্য সৎক্রিয়া মহোদ্যমা ইব॥

৪৩। দন্দশূকৈঃ সর্পৈঃ, অভিচারাঃ কৃত্যাদয়শ্চ, অবপাতনানি গিরিশৃঙ্গাদধঃপাতনানি চ তৈঃ, অবটাদিষু সংনিরোধৈশ্চ॥

৪৪। পর্ব্বতাক্রমণৈঃ পর্ব্বতানাং তদুপরি ক্ষেপণৈঃ; বহুবচনৈরভিচারাদ্যাবৃত্তিং দর্শয়তি। তদ্বন্ধনং কর্ত্তুং নাভ্যপদ্যত, ন প্রাপ, নাশক্নোদিত্যর্থঃ॥

৪৫—৪৭। চিন্তামেবাহ—এষ ইতি ত্রিভিঃ। (৪৫) মে ময়া, অসাধু পরুষং যথা ভবতি, তথোক্তঃ; অসদ্ধর্ম্মৈরপকারৈরভিচারৈর্বা॥ (৪৬) অবিদূরে সমীপে বর্ত্তমানোঽপ্যয়ং বালোঽপ্যজড়ধীর্নির্ভয়চিত্তো মেঽনার্য্যমন্যায্যং শক্রত্বং বা ন বিস্মরতি। অজীগর্ত্তস্য মধ্যপুত্রঃ শুনঃশেফো নাম পিতৃভ্যাং হরিশ্চন্দ্রায় বিক্রীতঃ সন্, যথা তয়োরপকারমবিস্মরংস্তদ্বিপক্ষং বিশ্বামিত্রমাশ্রিত্য গোত্রান্তরমাপন্নস্তদ্বৎ; যদ্বা, স্বভাবাপরিত্যাগে দৃষ্টান্তঃ—শুনঃশেফঃ পুচ্ছমিবেতি॥ (৪৭) অপ্রমেয়োঽপরিমেয়োঽনুভাবো যস্য, ন কুতশ্চিদ্ভয়ং যস্য, অমরঃ মৃত্যুশূন্যশ্চ। ন বা ভবিতা, অন্যথা মৃত্যুর্নৈব ভবিষ্যতীত্যর্থঃ॥

৪৮। ঔশনসাবুশনসঃ পুত্রৌ নীতিজ্ঞৌ; বিবিক্তে একান্তে॥

৪৯। ভ্রুবোর্বিজৃম্ভণেনৈব ত্রস্তাঃ সমস্তা ধিষ্ণ্যপা লোকপালা যস্মিন্। তস্য তব চিন্ত্যং ন চক্ষ্মহে, ন পশ্যাবঃ। পদমালম্বনং নৈবাস্তি; যদ্বা, শিশূনাং বৃত্তং গুণদোষয়োঃ পদং বিষয়ো ন ভবতীত্যর্থঃ॥

৫০। তথাপি তু বন্ধনমস্তোচিতমিত্যাহতুঃ —ইমস্তিতি। যাবদ্-গুরুর্ভার্গব আগমিষ্যতি, তাবদ্বদ্ধা নিধেহি। ততঃ কিম্? অত উচতুঃ — যতঃ পুংসো বুদ্ধিশ্চ বয়সা সমীচীনা, তথা আর্য্যসেবয়া ভবতীতি॥

৫১। অনুজ্ঞায়—তথেত্যঙ্গীকৃত্য॥

৫২। ততশ্চ তৌ প্রহ্লাদায় ধর্ম্মাদিকমূচতুঃ; প্রশ্রিতশ্চাসাববনতশ্চ তস্মৈ॥

৫৩। যথা যথাবত্রিবর্গমুপশিক্ষিতমপি সাধু ন মেনে, তাং শিক্ষাঞ্চ। কুতঃ? দ্বন্দ্বৈ রাগদ্বেষাদিভির্বিষয়েম্বারমণং যেষাং তৈরুপবর্ণিতাম্॥

৫৪। পরাবৃত্তঃ—অন্যত্র গতঃ। স উপহূতঃ, সন্ধিঃ পাদপূরণার্থঃ। ক্রীড়ার্থং কৃতক্ষণৈঃ কৃতোৎসবৈর্লব্ধাবসরৈরিতি বা॥

৫৫। তেষাং নিষ্ঠাং জন্মমরণাদিলক্ষণাং বিদ্বান্॥

৫৬। দ্বন্দ্বারামাণামীরিতৈরীহিতৈশ্চ ন দূষিতা ধীর্যেষাম্; যতো বালাঃ॥

৫৭। তস্মিন্নেব ন্যস্তং হৃদয়মীক্ষণঞ্চ যৈঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
পঞ্চমোঽধ্যায়ঃ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠে গুরৌ গৃহব্যগ্রে প্রহ্লাদো দৈত্যবালকান্।
অনুকম্প্য পরং তত্ত্বং নারদোক্তমুপাদিশৎ॥ (১)
নিরর্থকক্রিয়ালাপৈরায়ুর্ব্যয়মজানতাম্।
প্রহ্লাদঃ সদয়ং প্রাহ ধর্ম্মং ভাগবতং কৃতী॥ (২)

১। কৌমার ইত্যাদিনা ইহৈব মানুষজন্মনি ধর্ম্মানাচরেৎ; যতো-হর্থদমেতৎ, তত্র চ কৌমার এব যতস্তদপ্যধ্রুবম্। ন চৈবম্ভূতে জন্মান্তরে, যতো দুর্ল্লভম্; তত্র চ ধর্ম্মানেবাচরেৎ, ন সুখার্থপ্রয়াসান্; তত্র চ ভাগবতানেব তান্, ন কাম্যান্॥

২—৫। ইহ ভাগবতানেব ধর্ম্মানাচরেদিত্যেতদুপপাদয়তি—যথা হীতি চতুর্ভিঃ। (২) ইহ পুরুষস্য বিষ্ণোঃ পাদোপসর্পণমেব যথানুরূপং যোগ্যমিত্যর্থঃ; যদ্‌যস্মাদেষ প্রিয় ইত্যাদি॥ (৩) ননু ভোগোত্তমঃ কথং ত্যাজ্য ইতি চেৎ, তত্রাহ—সুখমিতি; সর্ব্বত্র পশ্বাদাবপি। দৈবাৎ পূর্ব্বাদৃষ্টাদেব॥ (৪) অতস্তদর্থং প্রয়াসো ন কর্ত্তব্যঃ, যতঃ প্রয়াসাৎ পরং কেবলমায়ুষো ব্যয় এব; যতস্তথা তেন প্রকারেণ ক্ষেমং ন প্রাপ্নোতি; যতো যথা মুকুন্দচরণাম্বুজং ভজন্ বিন্দতে, তথা নেতি বা॥ (৫) ভয়(ব)-মাশ্রিতঃ সংসারং প্রাপ্তঃ, পুরুষরূপং শরীরং যাবৎ পুষ্কলমস্তি, ন বিপদ্যেত, অক্ষমং ন ভবেৎ, ন নশ্যেদিতি বা, তাবচ্ছীঘ্রং ক্ষেমায় যতেত॥

৬—৮। আয়ুর্ব্যয়ক্রমমাহ—পুংস ইতি ত্রিভিঃ। (৬) যদ্ যস্মাচ্ছেতে॥ (৭) বিংশতির্ব্বর্ষাণি আয়ুর্যাতি॥ (৮) দুরাপূরেণ দুঃখৈঃ সমন্তাদাপূর্য্য-মাণেন॥

৯—১৫। ননু যৌবনে গৃহাসক্তোহপি পশ্চাদ্বিরক্তঃ সন্ ক্ষেমং যাস্যতীত্যাশঙ্ক্য তদসম্ভবং দর্শয়ন্ কৌমার এবাচরেদিত্যেতদুপপাদয়তি—কো গৃহেম্বিতি সপ্তভিঃ। (১০) যমর্থমসুভিঃ ক্রীণাতি প্রাণহানিমঙ্গী-কৃত্যাপি তস্করাদির্যং সাধয়তি, তস্মিন্নর্থে তৃষ্ণাং কো নু বিসৃজেৎ? (১১—১৩) কিঞ্চ—(১১) কথমিত্যাদি। প্রিয়ায়াঃ সঙ্গাদিকং স্মরন্ কথং ত্যজেদিতি তৃতীয়েনান্বয়ঃ। মন্ত্রান্—হিতশিক্ষালাপান্; সুহৃৎসু চ সঙ্গম্; তেষাং স্নেহেন সিতো বদ্ধঃ; কলানি মধুরাণ্যক্ষরাণি যেষাং তেষাঞ্চ সঙ্গম্; তেম্বনুরক্তং চিত্তং যস্য॥ (১২) তাঃ শ্বশুরস্য গৃহে

স্থিতা হৃদয্যা হৃদয়ঙ্গমাঃ ; মনোজ্ঞা উরবঃ পরিচ্ছদা যেষু তান্ গৃহান্। বৃত্তীর্জীবিকাঃ ; কুল্যাঃ কুলপরম্পরাগতাঃ ॥ (১৩) কোশস্কৃৎ কোশকারী কীটবিশেষঃ, স যথা গৃহং কুর্ব্বন্নাত্মনো নির্গমায় দ্বারমপি নাবশেষয়তি, তথা কর্ম্মাণীহমানঃ। নন্বু অবিতৃপ্তকামোঽপি দোষদর্শনেন বিরক্তঃ সন্ ত্যজেৎ ? তত্রাহ—ঔপস্থ্যঞ্চ শৈশ্ন্যং জৈহ্ব্যঞ্চ সুখং বহু মন্যমানঃ, তদেবাধিকং মন্যমানঃ ; অতো দুরন্তো মোহো যস্য স কথং বিরজ্যেত বিরক্তঃ[১] স্যাৎ ॥ (১৪) দুরন্তমোহত্বং দর্শয়ন্নাহ—কুটুম্বপোষায় বিয়দ্বিশেষেণ যৎ ক্ষীয়মাণং নিজমায়ুঃ পুরুষার্থঞ্চ বিহতং ন বুধ্যতে ; অতএব তাপত্রয়েণ দুঃখিতচিত্তোঽপি ন নির্বিদ্যতে দুঃখবুদ্ধিং ন করোতি ; যতঃ স্বকুটুম্বে রামো রতির্যস্য ॥ (১৫) প্রত্যুত চৌর্য্যং করোতীত্যাহ—বিত্তেম্বিতি। নিত্যমভিনিবিষ্টং চেতো যস্য সঃ, পরবিত্তহর্ত্তুঃ প্রেত্য নরকলক্ষণমিহ চ দণ্ডাদিরূপং দোষং যদ্যপি বিদ্বান্ জানন্, তথাপ্যজিতেন্দ্রিয়স্তথাপ্যশান্তাভিলাষঃ, তৎ পরবিত্তং হরত্যেব ॥

১৬। তদেবং কো গৃহেষু পুমানিত্যাদি-সপ্তভিঃ শ্লোকৈরুপপাদিতং গৃহাদিষু প্রসক্তস্য বৈরাগ্যাদ্যসম্ভবমুপসংহরতি—বিদ্বানপীতি। স্বলোকায় আত্মপরামর্শায় ন কল্পতে, কিন্তু বিমূঢ়ো যথা, তথা বিদ্বানপি তমোঽভিনিবেশমেব প্রপদ্যতে। তত্র হেতুঃ —য ইতি। 'স্বীয়মিদং পারক্যমিদম্' ইতি বিভিন্নো ভাবো ভাবনা যস্য সঃ ॥

১৭। তস্মাৎ কৌমার এব ভাগবতান্ ধর্ম্মানাচরেদিতি সহেতুকমুপসংহরতি—যত ইতি ; যতঃ কশ্চিদপি স্বমাত্মানং বিমোচিতুং ন সমর্থঃ, ততঃ শ্রীনারায়ণমুপেত শরণং যাতেত্যুত্তরেণান্বয়ঃ। অসামর্থ্যে হেতুঃ — অলং দীনো লম্পটঃ, অতঃ কামো দৃশির্যাসাং তাসাং বিহারে ক্রীড়ায়াং নিমিত্তে ক্রীড়ামৃগঃ ; বিহারমিতি পৃথক্পাঠে তাসাং বিহারসাধনমাত্মানম্,

১। বিবিক্তঃ (ক)।

যতস্তাসাং ক্রীড়ামৃগঃ স ইত্যন্বয়ঃ। কিঞ্চ, যৎ যাসু নিগড়ঃ শৃঙ্খলাতুল্যো বিসর্গঃ পুত্রাদিরূপো ভবতি ॥

১৮। বিদূরাদ্বিদূরতঃ সঙ্গং পরিহৃত্য ; যদ্বা, অবিদূরাৎ শীঘ্রং শ্রীনারায়ণ-মুপেতেত্যন্বয়ঃ ; যস্মাৎ স এবাপবর্গ ইষ্টঃ ॥

১৯। নন্বু বালানামস্মাকং তদ্ভজনমশক্যমিতি চেৎ, তত্রাহ—ন হীতি। বহ্বায়াসঃ—অতিপ্রয়াসঃ ॥

২০—২৩। আত্মত্বাৎ সর্ব্বত্র সিদ্ধত্বাদিতি চ হেতুদ্বয়মুপপাদয়তি—পরাবরেম্বিতি চতুর্ভিঃ। (২০) ব্রহ্মা অন্তো যেষাম্, স্থাবর আদির্যেষাং তেষু, ভূতেষু জীবেষু, ভৌতিকেম্বজীবেষু ঘটাদিষু, মহৎসু চ ভূতেম্বাকাশাদিষু ॥ (২১) গুণসাম্যে প্রধানে, গুণব্যতিকরে মহত্তত্ত্বাদৌ চ পরো ব্রহ্মস্বরূপঃ ॥ (২২—২৩) কথং তর্হি দ্রষ্টৃদৃশ্যভোক্তৃভোগ্যাদিভেদো মায়য়া ? ইত্যাহ—(২২) প্রত্যগাত্মা দ্রষ্টা ভোক্তা তৎস্বরূপেণ, ব্যাপকতয়া নির্দ্দেশ্যঃ, দৃশ্যং ভোগ্যং দেহাদি তদ্রূপেণ চ, ব্যাপ্যতয়া নির্দ্দেশ্যো মায়য়েয়ত ইত্যুত্তরেণান্বয়ঃ। বস্তুতস্তু স্বয়মবিকল্পিতোঽনির্দ্দেশ্যোঽপি সন্ ; যদ্বা, অনির্দ্দেশ্যোঽপ্যেবং নির্দ্দেশ্যঃ সন্, বিকল্পিত ঈয়ত ইত্যন্বয়ঃ ॥ (২৩) যতঃ কেবলোঽনুভবাত্মক আনন্দ এব স্বরূপং যস্য। নন্বু স এব চেৎ সর্ব্বত্র, তর্হি সর্ব্বত্র সর্ব্বজ্ঞত্বা-দ্যুপলভ্যেত ? তত্রাহ—গুণাত্মকঃ সর্গো যস্যাঃ সা গুণসর্গা, তয়া মায়য়া-স্তর্হিতমৈশ্বর্য্যং যেন সঃ ॥

২৪। যস্মাদেবং তস্মাৎ সর্ব্বেষু ভূতেষু যথোচিতং দয়াং সৌহৃদঞ্চ কুরুত। উন্মুচ্য—সন্ত্যজ্য ; যয়া দয়য়া ॥

২৫। ততঃ কিম্ ? অত আহ—তুষ্টে চ তত্র তস্মিন্ কিমলভ্যম্ ? তথাপি গুণপরিণামাদ্দৈবাদেব স্বসিদ্ধা অযত্নতঃ সিদ্ধা যে ধর্ম্মাদয়স্তৈঃ কিম্, অগুণেন চ মোক্ষেণ কাঙ্ক্ষিতেন কিম্ ; তমুপগায়তাং নোঽস্মাকমা-

কাঙ্ক্ষিতস্যাপি তস্য সিদ্ধেঃ ? যদ্বা, মা ভূন্মোক্ষঃ, তস্য চরণয়োঃ সারং জুষাং সুধাং সেবমানানাং তেনাপি কিমিত্যর্থঃ ॥

২৬। ননু চ ধর্ম্মাদেরপুরুষার্থত্বে কিমিত্যাচার্য্যাভ্যাং বেদোক্তত্বেন সত্য এবাভিহিতঃ ? তত্রাহ—ধর্ম্মার্থকাম ইতি যস্ত্রিবর্গস্তদর্থঞ্চ য ঈক্ষাদ্যা অভিহিতাঃ, 'ঈক্ষা আত্মবিদ্যা, ত্রয়ী কর্ম্মবিদ্যা, নয়দমৌ তর্কো দণ্ড-নীতিশ্চ, বিবিধা চ বার্ত্তা জীবিকা, তদেতৎ সর্ব্বং নিগমস্যার্থজাতম্, স্বসুহৃদঃ স্বান্তর্যামিণঃ পরমস্য পুংসঃ স্বাত্মার্পণসাধনঞ্চেৎ, তর্হি সর্ব্বং সত্যং মন্যে, সত্যপরত্বাৎ ; অন্যথা তদসত্যমেব। যদ্বা, তদেতদখিলং নিগমস্য ত্রৈগুণ্যবিষয়স্য প্রতিপাদ্যং মন্যে। সত্যং পুনর্নিস্ত্রৈগুণ্যলক্ষণং পরমস্য পুংসঃ স্বাত্মার্পণমেবেত্যর্থঃ ; তদুক্তং ভগবতা—'ত্রৈগুণ্যবিষয়া বেদা নিস্ত্রৈগুণ্যো ভবার্জ্জুন' ইতি ॥

২৭। তেষাং পুনর্বিশ্বাসার্থং গুরুসম্প্রদায়মাহ—জ্ঞানমিতি। যত্র নারদঃ শ্রোতা, তত্র কুতো মাদৃশানামধিকার ইত্যাশঙ্ক্যাহ[১]—ভগবত একান্তভক্তানাং যৎ পাদরজস্তেনাপ্লুতানাং স্নাতানাং দেহিনাং সর্ব্বেষামপি তজ্‌জ্ঞানং স্যাদেব, ন তূত্তমানামেবেতি নিয়মঃ ॥

২৮। অতএব ময়াপি পূর্ব্বং নারদাচ্ছ্রুতম্। বিজ্ঞানসংযুতমনুভব-পর্য্যন্তং জ্ঞানম্, ধর্ম্মঞ্চ শ্রুতম্ ॥

২৯। তত্রাতিবিস্মিতাঃ পৃচ্ছন্তি—প্রহ্রাদেতি, হে প্রহ্রাদ ! ত্বং বয়ঞ্চৈ-তাভ্যাং যণ্ডামর্কাভ্যামৃতেঽন্যং গুরুং ন বিদ্মঃ। এতদাগমনাৎ পূর্ব্বমেবাহং নারদপার্শ্বং গত ইতি চেৎ, তত্রাহুঃ —বালানামপ্যতিশিশূনামপ্যস্মাকমেতা-বীশ্বরৌ নিয়ন্তারৌ, অতস্তবান্যত্র গমনং ন সম্ভবতি ॥

১। ইতি মা শঙ্কীত্যাহ (ঘ)।

৩০। স এবাত্রাগত ইত্যপি ন সম্ভবতীত্যাহুঃ —বালস্যেতি। দুরন্বয়ো দুর্ঘটঃ, বিস্রম্ভকারণং বিশ্বাসহেতুঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
ষষ্ঠোঽধ্যায়ঃ ॥ ৬ ॥

সপ্তমোঽধ্যায়ঃ

সপ্তমে মাতৃগর্ভস্থে স্বস্মিন্ নারদভাষিতম্।
প্রহ্লাদো বর্ণয়ামাস শিষ্যপ্রত্যয়সিদ্ধয়ে ॥ (১)
অশ্রাবি নারদাদেতন্মাতৃ[১]গর্ভ ইতীরিতম্।
তৎপ্রস্তাবকথামাহ পদ্যৈঃ ষোড়শভিঃ সুধীঃ ॥ (২)

২। অস্মাকং পিতরি হিরণ্যকশিপৌ ; 'স্বকৃতেনৈব পাপেন পাপোঽসাবভক্ষি ভক্ষিতঃ' ইতি হর্ষেণ বদন্তো যুদ্ধোদ্যমং চক্রুঃ ॥

৬। রাজ্ঞঃ শিবিরমাবাসং ব্যলুম্পন্ সর্ব্বস্বাপহারেণ নাশিতবন্তঃ ॥

৮। অনাগসং নিরপরাধামেনাং নেতুং নার্হসীতি প্রাহ ॥

৯। অবিষহ্যং দুঃসহম্, অতোঽনয়া প্রসবপর্য্যন্তমত্রাস্যতাম্, ততশ্চার্থস্য পদবীং মার্গং গতঃ প্রাপ্তঃ সন্, জাতং পুত্রং হত্বা মোক্ষ্যামীত্যর্থঃ ॥

১০। সাক্ষাৎ স্বগুণৈরেব মহান্, ন তু পিত্রাদিসম্বন্ধেন ; ত্বয়া হেতুভূতেন সংস্থাং মৃত্যুং ন যাস্যতি, তত্র হেতবঃ —'নিষ্কিল্বিষঃ' ইত্যাদয়ঃ ॥

১১। অনন্তস্য প্রিয়ো যোঽহং স বা প্রিয়ো যস্য তস্য মম ভক্ত্যা, এনাং প্রদক্ষিণীকৃত্য ॥

১। -ন্ময়া (ঘ)।

১২। ইহোষ্যতামিত্যাহেতি শেষঃ ॥

১৩। অন্তিকে—সমীপে ॥

১৪। অন্তর্ব্বত্নী গর্ভিণী, ইচ্ছয়া ভর্ত্তুরাগমনানন্তরং প্রসূতয়ে, এবমপি স্বগর্ভস্য ক্ষেমায় ॥

১৫। তস্যাঃ শোকশান্ত্যৈ ধর্ম্মস্য তত্ত্বং ভক্তিলক্ষণম্, জ্ঞানমাত্মানাত্ম-বিবেকস্তদুভয়ং প্রাদাৎ ; ঈশ্বরঃ—সমর্থঃ ॥

১৭। ভূয়াৎ—ভবেৎ। বৈশারদী, স্বার্থে তদ্ধিতঃ ; দেহাত্মহঙ্কারচ্ছেদ-নিপুণেত্যর্থঃ ॥

১৮—২৭। কাসৌ বৈশারদী ধীরিত্যপেক্ষায়াং নারদোক্তমেব দেহাত্ম-প্রকারমাহ—জন্মেতি দশভিঃ। (১৮) জন্মাদ্যাঃ—জায়তে, অস্তি, বর্দ্ধতে, বিপরিণমতে, অপক্ষীয়তে, নশ্যতীত্যেবম্ভূতা ইমে ষড়্ভাববিকারা বৃক্ষে সত্যেব যথা ফলানাং দৃশ্যন্তে, তদ্বদাত্মনি তথৈব স্থিতে দেহস্য দৃষ্টা ইত্যর্থঃ। ঈশ্বরী বিকারসমর্থা মূর্ত্তির্যস্য, তেন ॥ (১৯) তদেবং দেহধর্ম্মৈস্তদ্বৈলক্ষণ্যেনা-ত্মনো দেহাদ্ভেদো দর্শিতঃ, ইদানীমাত্মধর্ম্মৈরেব ভেদং স্ফুটয়ংস্তদহঙ্কারাদিকং ত্যাজয়তি—আত্মেতি ; আত্মা নিত্যঃ, 'অবিনাশী বা অরে অয়মাত্মা' ইতি শ্রুতেঃ ; অব্যয়োঽপক্ষয়শূন্যঃ, 'ঋচোঽক্ষরে পরমে ব্যোমন্' ইতি শ্রুতেঃ ; শুদ্ধঃ 'নিরবদ্যং নিরঞ্জনম্' ইতি শ্রুতেঃ ; একঃ 'একমেবাদ্বিতীয়ম্' ইতি শ্রুতেঃ ; ক্ষেত্রজ্ঞঃ 'বিজ্ঞাতারমরে কেন বিজানীয়াৎ' ইতি শ্রুতেঃ ; আশ্রয়ঃ 'যস্মিন্ দ্যৌঃ পৃথিবী চান্তরীক্ষম্' ইতি শ্রুতেঃ ; অবিক্রিয়ঃ 'নিষ্কলং নিষ্ক্রিয়ং শান্তম্' ইতি শ্রুতেঃ ; স্বদৃকাত্মজ্যোতিঃ 'সম্রাড়িতি হোবাচ' ইতি শ্রুতেঃ ; হেতুঃ 'স ইমাঁল্লোকানসৃজত' ইতি শ্রুতেঃ ; ব্যাপকঃ 'সত্যং জ্ঞানমনন্তম্' ইতি শ্রুতেঃ ; অসঙ্গী 'অসঙ্গো হ্যয়ং পুরুষঃ' ইতি শ্রুতেঃ ; অনাবৃতঃ 'পূর্ণস্য পূর্ণমাদায় পূর্ণমেবাবশিষ্যতে' ইতি শ্রুতেঃ ॥ (২০) এতৈর্দ্বাদশভিরাত্মনো লক্ষণৈঃ, পরৈঃ শ্রেষ্ঠৈর্বিবেকসমর্থৈর্দেহাদ্ভেদং বিদ্বানসদ্ভাবং মিথ্যাবুদ্ধিং

ত্যজেৎ॥ (২১) নন্বেবং বিবিক্তাত্মজ্ঞানিনোঽপ্যপরোক্ষানুভবেন ব্রহ্মতা-প্রাপ্তিঃ কথং স্যাৎ? যতোঽহঙ্কারাদিকং ত্যজেদিত্যপেক্ষায়াং তৎ-প্রাপ্তিপ্রকারং সদৃষ্টান্তমাহ—স্বর্ণাকরক্ষেত্রেষু স্ফুরৎস্বর্ণকণেষু গ্রাবস্থু যোগৈর্ধ্মাত্যাপায়ৈস্তদুপায়াভিজ্ঞো হেমকারো যথা স্বর্ণং প্রাপ্নুয়াৎ; আত্মযোগৈরাত্মপ্রাপ্ত্যুপায়ৈর্ব্রহ্মগতিং ব্রহ্মতাম্; অধ্যাত্মবিৎ—আত্মাধি-কৃতকার্য্যকারণসংঘাতজ্ঞাতা॥ (২২—২৪) অধ্যাত্মবিবেকমাত্মপ্রাপ্ত্যু-পায়মাহ—অষ্টাবিতি ত্রিভিঃ। (২২) মূলপ্রকৃতির্মহদহঙ্কারৌ পঞ্চ তন্মাত্রাণি চেত্যষ্টৌ, ত্রয়ঃ সত্ত্বাদয়স্তে চ প্রকৃতিগুণা এব, ন তু ভিন্নাঃ, একাদশেন্দ্রিয়াণি পঞ্চ মহাভূতানি চেতি ষোড়শ পুমানাত্মা একঃ প্রোক্তঃ কপিলাদিভিরাচার্য্যৈঃ; একত্বে হেতুঃ, এষু সাক্ষিত্বেনান্বয়াৎ; তদুক্তম্—'মূলপ্রকৃতিরবিকৃতির্মহদাদ্যাঃ প্রকৃতিবিকৃতয়ঃ সপ্ত। ষোড়শকস্তু বিকারো ন প্রকৃতির্ন বিকৃতিঃ পুরুষঃ॥' ইতি॥ (২৩) জগৎ—জঙ্গমম্; তস্থুঃ—স্থাবরম্; অত্রৈব সর্ব্বসংঘাতাত্মকে দেহ এব পুরুষো মৃগ্যোঽন্বেষ্টব্যঃ। সুশক্যঞ্চৈতদিত্যাহ—নেতি, নেতীত্যন্যাপোহে ক্রিয়-মাণে স্বয়মেবাতত্ত্যজন্নাত্মবর্গাৎ পৃথগুপলভ্যমান ইত্যর্থঃ॥ (২৪) মণিষু সূত্রস্যেব সর্ব্বানুস্যূতত্বেনান্বয়ঃ; অতএব মণিভ্যঃ সূত্রস্যেবৈকৈক-ব্যতিরেকশ্চ তয়োর্দ্বৈন্দ্বৈক্যং তেন, যো বিবেকঃ পূর্ব্বোক্তো বা তেন, উশতা শুদ্ধেন, আত্মনা মনসা, সর্গস্থানসমাম্নায়ৈঃ সর্গস্থিতিসংহারৈঃ; 'যতো বা ইমানি ভূতানি জায়ন্তে' ইত্যাদিশ্রুত্যুক্তসর্গাদ্যনুসন্ধানেনেত্যর্থঃ। বিমৃশদ্ভি-র্বিচারয়দ্ভিরসত্বরৈরব্যগ্রৈর্মৃগ্য ইতি পূর্ব্বেণৈবান্বয়ঃ॥ (২৫—২৬) বিমর্শ-প্রকারমাহ—বুদ্ধেরিতি দ্বাভ্যাম্। (২৫) অধ্যক্ষঃ—সাক্ষী॥ (২৬) অতএবাভিবুর্দ্ধের্ভেদৈঃ পরিণামৈঃ পর্য্যস্তৈঃ পরিতঃ ক্ষিপ্তৈরনাত্মধর্ম্মত্বেন নিরস্তৈঃ। বুদ্ধিধর্ম্মত্বে হেতুঃ—ত্রিবর্ণৈস্ত্রিগুণাত্মকৈঃ ক্রিয়োদ্ভবৈঃ কর্ম্মজন্যৈঃ, বুদ্ধেরেব ত্রিগুণাত্মকত্বাৎ কর্ম্মকর্ত্তৃত্বাচ্চ, তস্যা এব তা অবস্থাঃ, আত্মা তু

বুদ্ধ্যন্বয়াত্তদবস্থাবানিব ভাতি, ন তত্ত্বত ইত্যাত্মনঃ স্বরূপং বুধ্যেজ্জানীয়াদিত্যর্থঃ। তত্র দৃষ্টান্তঃ—কুসুমধর্ম্মৈর্গন্ধৈস্তদাশ্রয়ং বায়ুমিব॥ (২৭) নন্বর্হি যথা কুসুমোপাধিকোঽপি বায়োর্গন্ধো বিবেকজ্ঞানেন ন নিবর্ত্ততে, এবমাত্মনঃ সংসারো ন নিবর্ত্তেত? ইত্যাশঙ্ক্যাহ—এতদ্দ্বারো বুদ্ধিদ্বারকস্তদবস্থাদ্বারকো বা সংসারঃ, ন স্বতঃ। হি যস্মাদ্বুদ্ধের্যে গুণাঃ কর্ম্মাণি চ, তৈর্নিবধ্যত ইতি, তথা। স চাজ্ঞানমূলঃ, অতোঽপার্থো মিথ্যাভূতোঽপি স্বপ্নবদর্প্যতে। বায়োস্তু গন্ধবদ্‌দ্রব্যসম্বন্ধস্য বাস্তবত্বাদ্ বিষমো দৃষ্টান্তঃ॥

২৮। যস্মাদেবং নিবৃত্তির্ঘটতে, তস্মাদ্বীজমজ্ঞানম্, তস্য নির্হরণং দহনম্। কিং তৎ? যোগঃ। কথম্ভূতঃ? ধিয়ঃ প্রবাহং জাগ্রদাদিরূপমুপরময়তীতি তথা॥

২৯—৩৩। তদেবং জ্ঞানপ্রকারমুক্ত্বা তৎসাধনং ধর্ম্মস্য তত্ত্বং নারদোক্তমেবাহ—তত্রেতি পঞ্চভিঃ। (২৯) যৈর্ধর্ম্মৈর্যথা যথাবদনুষ্ঠিতৈর্বা ভগবতি শ্রীনারায়ণে রতিরিতি যৎ, অয়মুপায়ো ভগবতোক্তঃ। তথা হি গীতাসু—'যৎ করোষি যদশ্নাসি যজ্জুহোষি দদাসি যৎ। যত্তপস্যসি কৌন্তেয় তৎ কুরুষ্ব মদর্পণম্॥' ইতি; 'ভক্ত্যা মামভিজানাতি যাবান্ যশ্চাস্মি তত্ত্বতঃ' ইত্যাদি চ॥ (৩০) তত্রৈবান্তরঙ্গান্ ধর্ম্মানাহ—গুরোঃ শুশ্রূষয়া, ভক্ত্যা প্রেম্ণা, সর্ব্বেষাং লব্ধানামর্পণেন চ॥ (৩১) তস্য লিঙ্গানাং মূর্ত্তীনামীক্ষণাঞ্চর্হণঞ্চাদির্যেষাং বন্দনাদীনাং তৈশ্চ॥ (৩৩) নির্জ্জিতঃ ষণ্ণাং কামক্রোধলোভমোহমদমাৎসর্য্যাণামিন্দ্রিয়াণাং বা বর্গো যৈঃ॥

৩৪—৩৬। ভগবদ্রতের্লিঙ্গান্যাহ—নিশম্যেতি ত্রিভিঃ। (৩৪) গুণান্ ভক্তবাৎসল্যাদীন্; অতিহর্ষেণোদ্গতাঃ পুলকা অশ্রূণি চ, তৈর্গদ্গদং যথা ভবত্যেবং প্রোৎকণ্ঠো মুক্তকণ্ঠ উদ্গায়তি॥ (৩৬) তস্য ভাবশ্চেষ্টাদিস্তস্য ভাবো ভাবনা, তেনানুকৃত আশয়াকৃতী মনঃশরীরে যস্য, নির্দ্দগ্ধং বীজমজ্ঞানমনুশয়ো বাসনা চ যস্য সঃ, সম্যগেতি প্রাপ্নোতি॥

৩৭। ততঃ কিম্? অত আহ—অধোক্ষজস্থালম্ভং মনসা স্পর্শম্। অধোক্ষজালম্বমিতি পাঠে তস্থাশ্রয়ণম্। অশুভো রাগাদিযুক্ত আত্মা মনো যস্থ। সংস্থতিচক্রশাতনং তন্নিবর্ত্তকং বুধা বিদুঃ, তদেব ব্রহ্মণি নির্ব্বাণং লয়ো মোক্ষস্তদাত্মকং সুখং বিদুঃ, হৃদীশ্বরমন্তর্য্যামিণম্॥

৩৮। ভক্তিরশক্যেতি চ ন মন্তব্যমিত্যাহ—ক ইতি। ছিদ্রবদাকাশবদ্ধৃদি তিষ্ঠতঃ; বিষয়াণামুপপাদনৈরর্জ্জনৈঃ কিম্? তত্র হেতুঃ—সর্ব্বদেহিনাং সামান্যতো বিষয়নিষ্ঠত্বে শূকরাদিসাধারণ্যাপত্তেরিত্যর্থঃ। ন চৈবমাদৌ পৌনরুক্ত্যদোষঃ, নারদোক্তানুবাদরূপত্বাদস্য প্রকরণস্য॥

৩৯। অনর্থকঞ্চ বিষয়ার্জ্জনমিত্যাহ—রায়োঽর্থাঃ, ক্ষণভঙ্গুরমায়ুর্যস্য তস্যৈতে কিয়ৎ প্রিয়ং কুর্ব্বন্তি? তদুক্তমিতিহাসেষু—'ধনং হি পুরুষো লোকে পুরুষং ধনমেব বা। অবশ্যমেকং ত্যজতি তস্মাৎ কিং ধনতৃষ্ণয়া?' ইতি॥

৪০। 'যন্ন দুঃখেন সম্ভিন্নং ন চ গ্রস্তমনন্তরম্। অভিলাষোপপন্নঞ্চ সুখং স্বর্গপদাস্পদম্॥' ইত্যেবম্ভূতাঃ স্বর্গাদিভোগা অপি ন সেবার্হা ইত্যাহ—এবং হীতি। ক্ষয়িষ্ণুত্বে হেতুঃ—ক্রতুভিঃ কৃতা ইতি; 'তদ্যথেহ কর্ম্মজিতো[1] লোকঃ ক্ষীয়ত এবমেবামুত্র পুণ্যজিতো[2] লোকঃ ক্ষীয়তে' ইতি শ্রুতেঃ। অতএব পুণ্যতারতম্যেন সাতিশয়াঃ, ন চ নির্ম্মলাঃ স্পর্দ্ধাদিমত্ত্বাৎ; ন বিদ্যতে দৃষ্টং শ্রুতঞ্চ দূষণং যস্মিন্॥

৪১। কিঞ্চ, যদর্থে যৎ সংকল্প্য, অতঃ সংকল্পিতাদ্বিপর্য্যাসং বিপরীতং ফলমমোঘমবশ্যং প্রাপ্নোতি॥

৪২। তদেব দর্শয়তি—সুখায়েতি। ঈহয়েচ্ছয়া ক্রিয়য়া বা; যঃ পূর্ব্বমনীহয়া হেতোঃ সুখেনাবৃতো ব্যাপ্ত আসীৎ, স ঈহয়া দুঃখমাপ্নোত্যেব॥

১। কর্ম্মচিতো (ঘ); ২। পুণ্যচিতো (ঘ)।

৪৩। কিঞ্চ, কামান্ ভোগান্, কাম্যৈর্বিষয়ৈঃ কর্ম্মভির্বা ; পারক্যঃ শ্বাদিভোগ্যঃ, ন ত্বাত্মীয়ো ভঙ্গুরশ্চ ॥

৪৪। কিমু দেহাদ্ব্যবহিতা অপত্যাদয়ো মমতাবিষয়াঃ পারক্যা ইতি বক্তব্যম্ ?

৪৫। কিঞ্চ, স্বয়ং পুরুষার্থরূপস্ত কিমেতৈরতিতুচ্ছৈরিত্যাহ—কিমেতৈরিতি ॥

৪৬। ভোগাবসরাভাবাচ্চৈতৈঃ ক উপযোগঃ ? ইত্যাহ—নিরূপ্যতামিতি। প্রাচীনৈঃ কর্ম্মভিঃ ক্লিশ্যমানস্ত কর্ম্মভিঃ কিয়ান্ স্বার্থ ইতি বান্বয়ঃ ॥

৪৭। নন্থ কর্ম্মস্থ সমাপ্তেষু ভোগাবসরঃ স্যাৎ ? তত্রাহ—কর্ম্মাণীতি। ন চেদং কর্ম্ম তৎফলং দেহাদিকঞ্চ পরমার্থ ইত্যাহ—উভয়ং কর্ম্ম চ দেহঞ্চাবিবেকতোঽজ্ঞানেনৈব তনুতে ॥

৪৮। অর্থাদয়ো যদপাশ্রয়া যদধীনাঃ ॥

৪৯। ভূতানাং প্রাণিনাম্, জীবসংজ্ঞিতোঽন্তর্য্যামী ॥

৫০—৫৪। অসুরাণামস্মাকমত্র নাধিকার ইত্যপি ন বাচ্যমিত্যাহ—দেব ইতি পঞ্চভিঃ। (৫২) অমলয়া—নিষ্কাময়া। অন্তর্দ্বিড়ম্বনম্—নটনমাত্রম্ ॥ (৫৪) অচ্যুততাম্—অমৃতত্বম্ ॥

৫৫। অধ্যায়দ্বয়োক্তমুপসংহরতি—এতাবানিতি। তদীক্ষণং গোবিন্দদৃষ্ট্যা সম্মাননম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে

সপ্তমোঽধ্যায়ঃ ॥ ৭ ॥

অষ্টমোঽধ্যায়ঃ

অষ্টমেঽতি রুষা সূনুং নিঘ্নন্ দৈত্যো হতঃ স্বয়ম্।
আবির্ভূয় নৃসিংহেন স চ ব্রহ্মাদিভিঃ স্তুতঃ ॥ (১)

অন্তঃকৃপাসুধাপূর্ণো বহিঃক্রোধো নৃকেশরী।
দৈত্যেন্দ্রমরিভাবেন ভজন্তং সমভাবয়ৎ ॥ (২)

২। একান্তসংস্থিতাম্—প্রত্যঙ্‌নিষ্ঠাম্। যথা—যথাবৎ ॥

৩—৪। স চ পুত্রং হন্তুং মনো দধে। কথম্ভূতঃ? কোপাবেশেনো-দ্রেকেণ চলদ্গাত্রং বপুর্যস্য সঃ; ক্ষিপ্‌ত্বা তিরস্কৃত্য, পাপেন সরোষেণ, তিরশ্চীনেন বক্রেণ ॥

৫। হে মন্দাত্মন্ অল্পবুদ্ধে! মদাজ্ঞালঙ্ঘিনং ত্বামদ্য যমালয়ং নেষ্যামি ॥

৬। অভীতবৎ—ভয়শূন্য ইব। কিং বলং যস্য স কিংবলঃ ॥

৮। বশং প্রণীতা ইত্যত্র হেতুঃ —স ঈশ্বর ইতি। উরবঃ ক্রমাঃ পাদ-বিক্ষেপা যস্য, বহুপরাক্রম ইতি বা, ওজআদিরূপঃ, সত্ত্বং ধৈর্য্যং বুদ্ধির্বা ॥

৯। নন্বু মচ্ছত্রুরসৌ কথং মমাপি স এব বলং স্যাৎ? অত আহ—জহীতি। আত্মনঃ স্বস্যাসুরং ভাবং ত্যজ, যতোঽজিতাদাত্মনো মনস ঋতে বিনান্যে বিদ্বিষো ন সন্তি। কিঞ্চ, তদ্ধি হি তদেব হি, সাম্যেন মনসো ধারণমেব সমর্হণমারাধনম্ ॥

১০। নন্বু ময়া দিগ্বিজয়ে সর্ব্বে রিপবো জিতাঃ, অতঃ সাম্প্রতং বিদ্বিষো ন সন্তীতি চেৎ, সত্যম্; তত্রাহ—দস্যূনিতি। একে ভবাদৃশা মন্দাঃ, পুরা আদৌ লুম্পতঃ সর্ব্বস্বং হরতঃ, ষট্—ইন্দ্রিয়লক্ষণান্ শত্রূন্, ন বিজিত্য—অজিত্বা, দশ দিশঃ স্বয়ং জিতা মন্যন্তে, সাধোস্তু জিতচিত্তস্য দেহিনাং সমস্য জ্ঞস্য বিদুষঃ স্বাজ্ঞানকল্পিতাঃ পরে শত্রবঃ কুতঃ স্যুঃ ॥

১১। ব্যক্তং নিশ্চিতম্, বিক্লবা অনন্বিতা ইত্যর্থঃ ॥

১২। হে মন্দভাগ্য ! মদন্যো জগদীশ্বরো যন্ত্বস্তি, তর্হসৌ ক্বাস্তি ? প্রহ্লাদ আহ—স সর্ব্বত্রাস্তে। হিরণ্যকশিপুরাহ—তর্হি কস্মাৎ স্তম্ভে নাস্তি ? প্রহ্লাদস্তু তং স্তম্ভং নিরীক্ষমাণো নমস্যন্নাহ—দৃশ্যত ইতি ॥

১৩। হিরণ্যকশিপুস্তু তত্র তমপশ্যন্নাহ—সোঽহমিতি। বিকত্থমানস্য বিপরীতং ব্রুবাণস্য তে শিরঃ কায়াদ্ধরামি পৃথক্ করোমি ॥

১৪। প্রহ্লাদেন মূর্দ্ধ্নি বদ্ধাঞ্জলিনা নিরীক্ষমাণং স্তম্ভং মুষ্টিনা তাড়িতবান্ ॥

১৬। তৎপদং তস্য ধ্বনেরাশ্রয়ম্ ; যেন নাদেন ॥

১৭। ভগবাংস্তদা স্তম্ভং বিদার্য্যাদৃশ্যত দৃশ্যো বভূব। কিমর্থম্ ? নিজভৃত্যেন প্রহ্লাদেন যদ্ভাষিতং 'দৃশ্যতে' ইতি, তৎ সত্যং বিধাতুং কর্ত্তুম্, তথাখিলেষু ভূতেষ্বাত্মনো ব্যাপ্তিঞ্চ সত্যাং কর্ত্তুং স্তম্ভেঽদৃশ্যত। তৎ কিমর্থম্ ? 'ভৌতিকেষু চ ভাবেষু ভূতেষ্বথ মহৎসু চ ভগবানাস্তে' ইতি তেনৈব ভৃত্যেন যদ্‌ভাষিতম্, তৎ সত্যং কর্ত্তুম্, তথাত্যদ্ভুতং দৈত্যঘাতক-মতিঘোরং রূপমুদ্বহন্ দধৎ। তৎ কিমর্থম্ ? নিজভৃত্যৈঃ সনকাদিভিঃ শাপা[১]নন্তরমনুতপ্তৈর্ভাষিতং যত্রিভির্জন্মভিঃ শাপমোক্ষো ভবত্বিতি যদুক্তম্, তৎ সত্যং কর্ত্তুম্, তথাত্যদ্ভুতং ব্রহ্মসৃষ্টাবদৃষ্টমশ্রুতঞ্চ রূপমুদ্বহন্, তচ্চ ন মৃগাকারং ন চ মনুষ্যাকারমুদ্বহন্, সভায়াং মধ্যেঽদৃশ্যত। তৎ কিমর্থম্ ? নিজভৃত্যেন হিরণ্যকশিপুনা ব্রহ্মাণং প্রতি যদ্ভাষিতং 'ভূতেভ্যস্তদ্বিসৃষ্টেভ্যো মৃত্যুর্মা ভূন্মম প্রভো' ইতি, তথা 'নান্তর্ন বহিঃ' ইতি, 'ন নরৈর্ন মৃগৈঃ' ইতি চ ব্রহ্মণা চ নিজভৃত্যেন 'তথাস্তু' ইতি যদ্‌ভাষিতম্, তৎ সর্ব্বং[২] সত্যং কর্ত্তুম্ ; ন হি তদ্‌ব্রহ্মসৃষ্টং ভূতং ন চ নরো বা মৃগো বা, ন চ সভাগৃহস্যান্তঃ, ন চ প্রাঙ্গণবদ্বহিঃ, এবং তাভ্যাং যদ্‌ভাষিতং তৎ সত্যং কর্ত্তুম্, যচ্চ হিরণ্যকশিপুনা ভাষিতম্ 'নূনমেতদ্বিরোধেন মৃত্যুর্মে ভবিতা' ইতি, তথা 'অয়মকুতশ্চিদ্ভয়োঽ-

---

১। কোপা- (গ) ; ২। তদুভয়োর্বাক্যং (ঘ)।

মরঃ' ইতি, যচ্চ নারদেন নিজভৃত্যেনেন্দ্রং প্রতি ভাষিতম্ 'অয়ং মহাংস্বয়া সংস্থাং ন প্রাপ্স্যতেঽনন্তানুচরঃ' ইত্যনেন স্বস্য ভক্তপক্ষপাতিত্বঞ্চ যদ্ভাষিতম্, তচ্চ সত্যং কর্ত্তুং তথাদৃশ্যত। 'চ'কারান্নিজভাষিতঞ্চ। কিম্? তৎ 'কৌন্তেয় প্রতিজানীহি ন মে ভক্তঃ প্রণশ্যতি' ইতি, তথা 'তেষামহং সমুদ্ধর্ত্তা মৃত্যুসংসারসংগরাৎ' ইত্যাদি, তচ্চ সত্যং কর্ত্তুমদৃশ্যতেতি দ্রষ্টব্যম্, অলমতিবিস্তরেণ॥

১৮। স দৈত্য এবমদ্ভুতং ধ্বনিং শ্রুত্বা তদাশ্রয়ং সত্ত্বং প্রাণিবিশেষং সর্ব্বতো বিলোকয়ন্ স্তম্ভস্য মধ্যান্নির্গচ্ছন্নৃমৃগেন্দ্রয়োর্মিশ্রং রূপম্, অহো কিমেতদিতি মীমাংসিতবানিতি শেষঃ॥

১৯। তস্যৈবমলং ভয়ানকং তৎ নৃসিংহরূপং মীমাংসমানস্যাগ্রতঃ স নৃসিংহরূপো হরিঃ সমুত্থিতঃ॥

২০—২২। ভয়ানকত্বমেব দর্শয়ন্ তদ্রূপমনুবর্ণয়তি—প্রতপ্ত ইত্যাদিনা বিদ্রাবিতদৈত্যদানবমিত্যন্তেন ত্রিভিঃ। (২০) প্রতপ্তং চামীকরং সুবর্ণমিব পিশঙ্গানি চণ্ডানি লোচনানি যস্মিন্, সটা জটাঃ, কেশরাঃ কণ্ঠলোমানি স্ফুরদ্ভিঃ সটাকেশরৈর্জৃম্ভিতং সাটোপমাননং যস্মিন্, করালাস্তঙ্গা দংষ্ট্রা যস্মিন্, করবালঃ খড়্গাস্তদ্বচ্চঞ্চলা ক্ষুরান্তবত্তীক্ষ্ণা চ জিহ্বা যস্মিন্, ভ্রূকুটীযুক্তেন মুখেনোল্বণম্॥ (২১) স্তব্ধাবুন্নতৌ শঙ্কুবদূর্দ্ধ্বৌ কর্ণৌ যস্মিন্, গিরিকন্দরবদদ্ভুতং ব্যাত্তং প্রসৃতমাস্যং নাসে চ যস্মিন্, হনূ কপোলপ্রান্তৌ, তয়োর্ভেদেন বিদারণেন ভীষণম্ কর্ণান্তমুখবিস্তারমিত্যর্থঃ; দিবিস্পৃশন্ কায়ো যস্মিন্, অলুক্‌সমাসঃ; অদীর্ঘা হ্রস্বা পীবরা চ স্থূলা গ্রীবা যস্মিন্; উরু বিশালং বক্ষঃস্থলং যস্মিন্, তচ্চ তচ্চ; অল্পং মধ্যমমুদরং যস্মিন্॥ (২২) চন্দ্রাংশুবদ্গৌরৈস্তনূরুহৈর্লোমভিশ্ছুরিতং ব্যাপ্তং বিষ্বঞ্চঃ সর্ব্বতঃ প্রসৃতা ভুজাস্তেষামনীকানি স্তোমাস্তেষাং শতানি যস্মিন্, নখান্যেবায়ুধানি যস্মিন্, দুরাসদং প্রাপ্তুমশক্যম্, সর্ব্বানি চ নিজানি চক্রাদীনীতরাণি চ বজ্রাদীনি, ত এবায়ুধ-

প্রবেকাঃ শস্ত্রোত্তমাস্তৈর্বিদ্রাবিতা দৈত্যা দানবাশ্চ যেন তদ্রূপম্ ; মীমাংস-মানস্যাগ্রতঃ সমুত্থিত ইতি পূর্ব্বেণৈবান্বয়ঃ ॥

২৩—২৯। তদাবির্ভাবপ্রয়োজনবিমর্শপূর্ব্বকং তেন সহ দৈত্যস্য যুদ্ধ-মাহ—সপ্তভিঃ। (২৩) প্রায়েণ মহামায়াবিনা হরিণা মেঽয়মেবম্ভূতো বধো মৃত্যুহেতুঃ, স্মৃতশ্চিন্তিতঃ ; তথাপ্যনেন সমুদ্যতেন কিম্? ন কিঞ্চিদপি স্যাদিত্যেবং ব্রুবন্নভ্যপতদিত্যন্বয়ঃ ॥ (২৪) তদা সোঽসুরো নৃসিংহস্তৌ-জসি দীপ্তৌ পতিতঃ সন্নলক্ষিতোঽদৃষ্টোঽভূৎ। সত্ত্বধাম্নি সত্ত্বপ্রকাশে হরৌ পতিতস্য তমোময়স্যাদর্শনং তদ্বিচিত্রং ন ভবতি। তত্র হেতুঃ —যো হরিঃ পুরা সৃষ্ট্যাদৌ প্রলয়কালীনং তমো নু অহো অপিবত্তস্মিন্ ॥ (২৫) বিক্রমন্তং ততস্ততঃ প্রহরন্তম্ ॥ (২৬) হস্তাদুৎকলিতো নিঃসৃতঃ। তদামরা দেবাঃ সর্ব্বে ধিষ্ণ্যপা অসাধ্বমন্যন্ত। হৃতানি ওকাংসি স্থানানি যেষাং তে, তদ্ভিয়া ঘনচ্ছদা মেঘান্তরিতাঃ সন্তঃ ॥ (২৭) যস্য হস্তাৎ স্বয়ং মুক্তস্তং নৃসিংহং স্ববীর্য্যাচ্ছঙ্কিতং মন্যমানঃ খড়্গাচর্ম্মণী প্রগৃহ্য পুনস্তমাসজ্জত, অভ্য-পদ্যতেত্যন্বয়ঃ ॥ (২৮) শ্যেনস্যেব বেগো যস্য তং শতচন্দ্রবর্ত্মভিঃ খড়্গা-চর্ম্মমার্গৈরচ্ছিদ্রং যথা ভবতোবমুপর্য্যধশ্চরন্তম্ ; অট্টহাসমেবাহ—খরং তীব্রমুৎস্বনেন মহাশব্দেনোল্বণং ভয়ঙ্করম্ ; তদ্ভয়েন হরেস্তেজসা চ নিমীলিতে অক্ষিণী যস্য ॥ (২৯) গ্রহণে দৃষ্টান্তঃ —ব্যালো যথা আখুং মূষিকম্ ; বিদারণে দৃষ্টান্তঃ —অহিং গরুড় ইবেতি। বিষ্বক্ সর্ব্বতঃ স্ফুরন্তং নিঃসরন্তম্, গ্রহণেনাতুরং বিবশম্, ইন্দ্রেণ সহ যুদ্ধে তৎপ্রযুক্তেন কুলিশেন ন ক্ষতা ত্বগপি যস্য। দ্বারি সভায়াং নান্তর্ন বহিঃ ; ঊরুমূরৌ নিপাত্য, ন ভূমৌ ন চাম্বরে, নখৈর্ন তু ব্যসুভিরসুমদ্ভির্ব্বা ; এবং দিবানক্তং পরিহারায় সন্ধ্যায়ামিতি দ্রষ্টব্যম্ ॥

৩০—৩১। দৈত্যবধমুক্ত্বা তদ্ভৃত্যবধমাহ দ্বাভ্যাম্। (৩০) সংরম্ভেণ দুষ্প্রেক্ষ্যাণি করালানি লোচনানি যস্য ; অসৃজো রক্তস্য লবৈর্বিন্দুভিরাক্তাঃ

সিক্তা অতএবারুণাঃ কেশরা আননঞ্চ যস্য সঃ। ক ইব? দ্বিপহত্যয়া গজবধেন হরিঃ সিংহো যথা; এবম্ভূতস্তস্যানুচরানহন্নিত্যুত্তরেণান্বয়ঃ॥ (৩১) নখাঙ্কুরৈরুৎপাটিতং হৃৎসরোরুহং যস্য তম্। দোর্দ্দণ্ডানাং যূথানি যস্য সঃ, তমনু পন্থা যেষাং তানন্যানপি তৎপক্ষপাতিন ইত্যর্থঃ॥

৩২—৩৩। দৈত্যবধব্যগ্রস্য নৃহরেরাটোপমাহ দ্বাভ্যাম্। (৩২) সটাভিরবধূতা প্রকম্পিতা জলদা মেঘাঃ পরাপতন্ ব্যশীর্য্যন্ত; অনেন 'যে মেঘান্তরিতা দেবাস্তে স্পষ্টং পশ্যন্ত' ইত্যাজ্ঞাং দত্তবানিত্যর্থঃ। তস্য দৃষ্ট্যা বিমুষ্টং রোচির্যেষাং গ্রহাণাং তে তিরস্কৃতপ্রভা অভবন্নিতি শেষঃ। দিগিভা দিগ্‌গজাঃ॥ (৩৩) তস্য সটাভিরুৎক্ষিপ্তানি বিমানানি, তৈঃ সঙ্কুলা ব্যাপ্তা সতী, প্রোৎসর্পত স্বস্থানাৎ প্রকর্ষেণোদসর্পচ্চলিতা॥

৩৪। স্বভৃত্যৈশ্বর্য্যমাশ্চর্য্যমিব মত্বা কৌতূহলেন তস্যাসন উপবিষ্টং ভয়াৎ কোঽপি ন বভাজ নাসেবত। ন লক্ষিতো দ্বৈরথঃ প্রতিযোদ্ধা যেন॥

৩৫। লোকত্রয়স্য মস্তকজ্বরং শিরোব্যথামিব দুঃসহম্, প্রহর্ষস্য বেগেনোৎকলিতানি বিকসিতান্যাননানি যাসাং তাঃ সুরস্ত্রিয়ঃ পুষ্পবর্ষৈর্নৃহরিং ববৃষুঃ॥

৩৬। নাকিনাং দেবানাং বিমানাবলিভির্নভস্তলং সঙ্কীর্ণমাস। সুরাণামানকাঃ পটহাস্তৈর্জঘ্নিরে বাদিতাঃ, স্ত্রিয়োঽপ্সরসো ননৃতুঃ, গন্ধর্ব্বা জগুঃ॥

৩৮। গন্ধর্ব্বাশ্চাপ্সরসশ্চ চারণাশ্চেত্যর্থঃ॥

৩৯। নরশার্দ্দূলম্—পুরুষোত্তমম্॥

৪০। ব্রহ্মাদয়ো নৃসিংহস্য শঙ্কয়াকুলচেতস আরাদেবাস্তুবন্ সপ্তদশশ্লোকৈঃ পৃথক্ পৃথক্। অনন্তায়ানন্তং ত্বাং প্রসাদয়িতুং নতোঽস্মি; অনন্তত্বে হেতুঃ—দুরন্তা অনন্তাঃ শক্তয়ো যস্য। তৎ কুতঃ? বিচিত্রাণি বীর্য্যাণি প্রভাবা যস্য। তৎ কিমর্থম্? পবিত্রাণি শ্রবণমাত্রেণ শোধকানি কর্ম্মাণি

যস্য তৎ। বিচিত্রবীর্য্যত্বমেবাহ—বিশ্বস্যেতি। সন্দধতে সম্যক্ কুর্ব্বতে, এবমপ্যব্যয়াত্মনেঽপ্রচ্যুতস্বরূপায়[১] ॥

৪১। শ্রীরুদ্রস্তু তৎকোপকালাভিজ্ঞঃ 'নায়ং কোপাবসরঃ' ইতি তং প্রার্থয়তে—কোপেতি ; সহস্রযুগান্তস্তব কোপস্য কালঃ। ন কোপ-যোগ্যশ্চায়মিত্যাহ—অল্পকোঽত্যল্পঃ। অতঃ কোপনিবৃত্ত্যা প্রহ্লাদং মা হিংসীরিত্যাহ—তৎসুতমিতি। যদ্বা, অকালেঽপ্যয়ং কোপোঽস্য ভক্তস্য রক্ষণায়েতি চেৎ, তর্হীদানীং কোপং ত্যক্ত্বেমং পাহীত্যর্থঃ ॥

৪২। ইন্দ্রস্তু, নাস্মাকং হবির্ভাগলাভঃ পুরুষার্থঃ, কিন্তু ত্বৎপরিচর্য্যৈব ; ভবতা পুনরনেন সংরম্ভেণ তৎ কার্য্যমেব সাধিতম্, তস্য চ সিদ্ধত্বাদুপসংহরৈনং ক্রোধমিত্যাশয়েনাহ—হে পরম ! নোঽস্মাংস্ত্রায়তা রক্ষতা ভবতা স্বীয়া এব ভাগা দৈত্যাহৃতাঃ প্রত্যানীতাঃ, অন্তর্যামিণস্তবৈব যজ্ঞেষু ভোক্তৃত্বাৎ। অস্মদীয়ঞ্চ হৃদয়কমলং ত্বদ্‌গৃহমেবৈতাবৎপর্য্যন্তং ভয়হেতুত্বেনাস্মৎস্মৃতিপথে নিত্যং স্থিতেন দৈত্যেনাক্রান্তং ব্যাপ্তং সৎ, প্রত্যবোধি ভয়াপাকরণেন বিকাশং নীতম্। তব ত্রৈলোক্যৈশ্বর্য্যসাধনার্থময়মুদ্যম ইতি চেৎ, তত্রাহ—কালগ্রস্তমিতি। তে ত্বাম্, হে নারসিংহ ! নরসিংহাকারাভ্যামাবির্ভূত ! অপরৈঃ স্বর্গাদিভিঃ কিম্ ॥

৪৩। ঋষয়স্তু, তপঃপ্রবর্ত্তনেনাস্মাকং মহাননুগ্রহঃ কৃত ইত্যাহুঃ—ত্বং নো যদাত্থ পরমং ধ্যানলক্ষণং তপঃ ; পরমত্বে হেতুঃ—আত্মনস্তব তেজঃ প্রভাবরূপম্। তদেবাহুঃ—যেন তপসাত্মনি লীনমিদং বিশ্বং সসর্ক্থ স্পৃষ্টবানসি, তদমুনা দৈত্যেন বিপ্রলুপ্তং কুণ্ঠিতং সৎ, হে শরণ্যপাল ! অস্য রক্ষার্থং গৃহীতেনানেন বপুষা পুনরপি তপঃ কুরুতেত্যভ্যনুজ্ঞাতবানসি, তস্মৈ তে নম ইত্যুত্তরশ্লোকচতুর্থপাদস্যানুষঙ্গঃ ॥

১। -স্বভাবায় (গ)।

৪৪। পিতরস্তু শ্রাদ্ধোদ্ধারণেন পরমোপকারিণং শ্রীনৃসিংহং প্রণমন্তি—শ্রাদ্ধানি শ্রদ্ধাযুক্তানি পিণ্ডাদীনি নোহস্মভ্যং পুত্রৈর্দত্তানি, প্রসভং বলাদ্ যঃ স্বয়মধিকৃত্য বুভুজে ; কিঞ্চ, তীর্থস্নানসময়ে দত্তং তিলোদকমপি অপিবত্তানি চ তস্যোদরাদ্য আচ্ছ দাহৃতবান্। কথম্ভূতাৎ ? নখৈর্বিদীর্ণা বপা যস্য তস্মাৎ ; বপাবিদারণস্য তদ্গতপিণ্ডোদ্ধারণমেব ফলমিতি ভাবঃ ॥

৪৫। যোগসিদ্ধাং গতিমণিমাদিসিদ্ধিম্, নানা অনেকে দর্পা যস্য তম্। তস্মৈ তুভ্যং তং ত্বামুদ্দিশ্য ॥

৪৬। বিদ্যামন্তর্দ্ধানাদিলক্ষণামন্তরাদ্ধাং সম্প্রাপ্তাম্। সংখ্যে—যুদ্ধে ॥

৪৭। রত্নানি ফণাসু স্থিতানি, তথা স্ত্রীরত্নানি চোত্তমাঃ স্ত্রিয়ঃ ; আসাং স্ত্রীণাং দত্ত আনন্দো যেন তৎসম্বোধনম্ ; অস্মদ্দত্তানন্দেতি পাঠে অস্মাকং দত্ত আনন্দো যেনেতি ॥

৪৮। নৃসিংহেনাবলোকিতাঃ সন্তো মূর্ধ্নি বদ্ধাঞ্জলয়ো মনবঃ প্রোচুঃ—মনবো বয়ং ধর্ম্মপালকাঃ, পরিভূতাঃ সেতবো বর্ণাশ্রমধর্ম্মমর্য্যাদা যেষাং তে ; অনুশাধি—অনুশিক্ষয় ॥

৪৯। প্রজাপতয়োহপি তদবলোকিতাঃ প্রোচুঃ—হে পরেশ ! তে ত্বয়াভিসৃষ্টাঃ প্রজেশা বয়ং যেন নিষিদ্ধাঃ সন্তঃ প্রজা ন সৃজামঃ, স এষ ভিন্নং বক্ষো যস্য সঃ, নু নিশ্চিতং মৃতঃ শেতে। অতঃপরং প্রজাঃ স্রক্ষ্যাম ইতি হৃষ্যন্তঃ প্রাহুঃ—হে সত্ত্বমূর্ত্তে ! তবায়মবতারো জগতাং মঙ্গলম্ ॥

৫০। গন্ধর্ব্বা অপি তদবলোকিতাঃ প্রোচুঃ—হে বিভো ! বয়ং তে ত্বদীয়া নটা নর্ত্তকা নাট্যে নৃত্যে গায়কাশ্চ যেন স্বাধীনাঃ কৃতাঃ। কথম্ভূতেন ? বীর্য্যং শৌর্য্যং বলং শক্তিস্তাভ্যামোজঃ প্রভাবো যস্য তেন, স এব ভবতেমাং দশাং মৃতিং নীতঃ। উচিতমেবৈতদিত্যাহুঃ—কিমিতি ॥

৫১। ভবাপবর্গম্—সংসারনিবর্ত্তকম্। আশ্রয়ণে হেতুঃ—যদ্‌যস্মাৎ সাধূনাং হৃদি ভয়জনকত্বেন শেতে তিষ্ঠতীতি তথা স এষোঽসুরস্ত্বয়া সমাপিতোঽন্তং নীতঃ॥

৫২। মনোজ্ঞৈঃ কর্ম্মভিস্তবানুচরেষু মুখ্যাস্তে বয়ং দিতিসুতেন শিবিকাবাহকত্বং প্রাপিতাঃ। পঞ্চতাম্—মৃত্যুম্। হে পঞ্চবিংশ! চতুর্বিংশতিতত্ত্বনিয়ামক!॥

৫৩। কিংপুরুষাস্তু ত্বাং স্তোতুং বয়ং কে বরাকা ইত্যাহুঃ—বয়ং কিংপুরুষাস্তুচ্ছপ্রাণিনঃ, ত্বন্তু মহানদ্ভুতপ্রভাবঃ পুরুষঃ। নন্বয়ং মহান্ দৈত্যো হত ইতি কিং ন বর্ণ্যতে? ইত্যাশঙ্ক্য কিয়দেতদিত্যাহ—অয়মিতি। যদা সাধুভির্ভগবদ্ভক্তৈস্তিরস্কৃতস্তদৈব নষ্টঃ॥

৫৪। সত্রেষু যজ্ঞেষু, তে ত্বয়া হতঃ, এতদ্দিষ্ট্যা ভদ্রং কৃতম্॥

৫৫। অমুনা দিতিজেন, বিষ্টিং নির্ম্মূল্যং কর্ম্ম, অনু নিরন্তরং কারিতাঃ। অতঃপরং নো বিভবায় সমৃদ্ধয়ে ভব॥

৫৬। নোঽস্মাকং ভক্তানাং হে শরণদ! আশ্রয়প্রদ! সর্ব্বেষাং লোকানাং শর্ম্ম মঙ্গলমেতদদ্ভুতং রূপমদ্যৈব দৃষ্টম্, ন তু পূর্ব্বম্। বিধিকরঃ—কিঙ্করঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে

অষ্টমোঽধ্যায়ঃ॥ ৮॥

নবমোঽধ্যায়ঃ

নবমে ব্রহ্মণা ভীত্যা চোদিতোঽসুরবালকঃ।
কোপং প্রশময়ন্নস্তৌন্নৃসিংহমতিভীষণম্ ॥ (১)

১—৭। 'উগ্রোঽপ্যনুগ্র এবায়ং স্বভক্তানাং নৃকেশরী। কেশরীব স্বপোতানামন্যেষামুগ্রবিগ্রহঃ[১] ॥' ইত্যাগমোক্তাং ভক্তানুকম্পিতামাহ—এবমিতি সপ্তভিঃ। (১) এবং দূরত এব স্থিত্বা স্তুবন্তঃ; মন্যুনা সংরম্ভ আবেশো যস্য তম্, উপ সমীপে গন্তুং নাশক্নুবন্ ॥ (২) শ্রীর্লক্ষ্মীর্দেবৈঃ প্রেষিতাপি, মহদদ্ভুতং রূপং দৃষ্ট্বা শঙ্কিতা সতী তং নোপজগাম। অদ্ভুতত্বে হেতুঃ —অদৃষ্টেতি ॥ (৩) উপেহি—উপগচ্ছ ॥ (৫) কাল এবাহিস্তস্মাদ্-বিত্রস্তা ধীর্যেষাং তেষাম্, কৃতমভয়ং যেন তৎ করাম্বুজম্ ॥ (৬) তস্য শ্রীনৃসিংহস্য করস্পর্শেন ধূতং নিরস্তমখিলমশুভং যস্য। সপদি তৎক্ষণ-মেবাভিব্যক্তমপরোক্ষীভূতং পরাত্মদর্শনং ব্রহ্মজ্ঞানং যস্য, নিবৃতঃ সন্ হৃদি দধৌ। হৃষ্যন্তী রোমাঞ্চিতা তনুর্যস্য, ক্লিন্নং প্রেমার্দ্রং হৃদ্যস্য, অশ্রূণি লোচনয়োর্যস্য, পরমপুরুষার্থতয়া দধৌ, ন সাধনত্বেনেত্যর্থঃ ॥ (৭) সু-সমাধিমেবাহ—তস্মিন্নেব ন্যস্তং হৃদয়মীক্ষণঞ্চ যেনেতি ॥

স্বস্মিন্নিব সমস্তেষু তৎকৃপামৃতবৃষ্টয়ে[২]।
প্রহ্লাদঃ স্তৌতি সৎপদ্যৈর্দ্বিচত্বারিংশতা হরিম্ ॥ (২)

৮—১২। তত্র তাবদাত্মনো ভগবতঃ স্তুতাবনধিকারমিবাশঙ্ক্যাধিকারং সম্ভাবয়ন্নাহ—ব্রহ্মাদয় ইতি পঞ্চভিঃ। (৮) মুনয়ো মননশীলাঃ, সিদ্ধা জ্ঞানিনোঽপি। কথম্ভূতাঃ? সত্ত্ব এবৈকস্মিংস্তানো বিস্তারো যস্যাঃ সা গতির্মতির্যেষাম্, তথাবিধা অপি বচসাং প্রবাহৈরপি তথা বহুভির্গুণৈক্ষ্য-মাণৈর্গুণৈরপি যমারাধয়িতুং ন পিপ্রুঃ, ন পূর্ণা ন শক্তা ইত্যর্থঃ। স

১। -বিক্রমঃ (গ); ২। -দৃষ্টয়ে (ঘ)।

হরির্মে কথং তোষং প্রাপ্তুমর্হতি ? তত্র হেতুঃ—উগ্রজাতেরুগ্রা ঘোরা আসুরী জাতির্যস্য ॥ (৯—১০) এবং হরিতোষণে স্বস্যাযোগ্যতামাশঙ্ক্য যোগ্যতাং সম্ভাবয়তি—মন্য ইতি দ্বাভ্যাম্। (৯) অভিজনঃ সৎকুলে জন্ম, রূপং সৌন্দর্য্যম্, শ্রুতং পাণ্ডিত্যম্, ওজ ইন্দ্রিয়নৈপুণ্যম্, তেজঃ কান্তিঃ, প্রভাবঃ প্রতাপঃ, বলং শারীরম্, পৌরুষমুদ্যমঃ, বুদ্ধিঃ প্রজ্ঞা, যোগোঽষ্টাঙ্গঃ—এতে ধনাদয়ো দ্বাদশাপি গুণাঃ পরস্য পুংস আরাধনায় ন ভবন্তি ; হি যতঃ কেবলয়া ভক্ত্যৈব গজেন্দ্রায় তুষ্টোঽভবৎ ॥ (১০) এবং ভক্ত্যৈব কেবলয়া হরেস্তোষঃ সম্ভবতীত্যুক্তম্, ইদানীং ভক্তিং বিনা নান্যৎ কিঞ্চিত্তোষ-হেতুরিত্যাহ—বিপ্রাদিতি। পূর্ব্বোক্তা ধনাদয়ো যে দ্বিষট্ দ্বাদশ গুণাস্তৈ-র্যুক্তাদ্বিপ্রাদপি শ্বপচং বরিষ্ঠং মন্যে ; যদ্বা, সনৎসুজাতোক্তা দ্বাদশ ধর্ম্মাদয়ো গুণা দ্রষ্টব্যাঃ। তদুক্তং মহাভারতে,—'ধর্ম্মশ্চ সত্যঞ্চ দমস্তপশ্চ, অমাৎসর্য্যং হ্রীস্তিতিক্ষানসূয়া। যজ্ঞশ্চ দানঞ্চ ধৃতিঃ শ্রুতঞ্চ, ব্রতানি বৈ দ্বাদশ ব্রাহ্মণস্য ॥' ইতি; যদ্বা, 'শমো দমস্তপঃ শৌচং ক্ষান্ত্যার্জ্জববিরক্ততাঃ। মৌন[১]বিজ্ঞানসন্তোষাঃ সত্যাস্তিক্যে দ্বিষড়্গুণাঃ ॥' ইতি। কথম্ভূতাদ্ বিপ্রাৎ ? অরবিন্দনাভস্য পাদারবিন্দাদ্বিমুখাৎ। কথম্ভূতং শ্বপচম্ ? তস্মিন্নরবিন্দনাভেঽর্পিতা মন আদয়ো যেন তম্। ঈহিতম্—কর্ম্ম। বরিষ্ঠত্বে হেতুঃ—স এবম্ভূতঃ শ্বপচঃ সর্ব্বং কুলং পুনাতি ; ভূরির্ম্মানো গর্ব্বো যস্য স তু বিপ্র আত্মানমপি ন পুনাতি, কুতঃ কুলম্ ? যতো ভক্তিহীনস্যৈতে গুণা গর্ব্বায়ৈব ভবন্তি, ন তু শুদ্ধয়ে, অতো হীন ইতি ভাবঃ ॥ (১১) তর্হি কিং ধনাদ্যর্পণেন সম্মানং প্রাকৃত ইব ভগবানপেক্ষতে ? নেত্যাহ—নৈবেতি। অয়ং প্রভুরীশ্বরোঽবিদুষোঽল্পকাজ্ঞনাদ্মানং পূজামাত্মনোঽর্থে ন বৃণীতে নেচ্ছতি, যতো নিজলাভেনৈব পূর্ণঃ। তর্হি কিং পূজাং নেচ্ছত্যেব ? তত্রাহ—করুণঃ কৃপালুঃ, অতো বৃণীতে চ ; তত্র হেতুঃ—যদ্যদিতি। যং

১। -জ্ঞান- (ঘ)।

যং মানম্; যদ্বা, যদ্ যস্মাৎ, যদ্ যেন ধনাদিনা ভগবতে মানং বিদধীত, তদেবাত্মনে ভবতি, নান্যৎ; যথা মুখে কৃতৈব তিলকাদিশ্রীঃ শোভা প্রতিবিম্বস্য ভবতি, ন তু সাক্ষাত্তস্যৈব কর্ত্তুং শক্যতে, তদ্বৎ॥ (১২) যস্মাদেবং ভগবান্ ভক্ত্যৈব তুষ্যতি, তস্মাদহং নীচোঽপি বিগতবিক্লবো গতশঙ্কঃ সন্নীশ্বরস্য মহি মহিমানং সর্ব্বপ্রযত্নেন স্বমনীষানুসারেণানুবর্ণয়ামি। অজানতোঽপি স্তুতিকরণে হেতুমাহ—যেনৈব মহিম্নানুবর্ণিতেনাবিদ্যয়া সংসারমনুপ্রবিষ্টঃ পুমান্ শুধ্যেত, তন্মহত্ত্বস্য তথা শোধকস্যাভাবাদিত্যর্থঃ॥

১৩—১৪। তদেবমাত্মনঃ স্তুতাবনধিকারং পরিহৃত্যেদানীং স্তুবন্ কোপোপসংহারং প্রার্থয়তে—সর্ব্বে হীতি দ্বাভ্যাম্। (১৩) ভো ঈশ! অমী উদ্বিজন্তো বিভ্যতঃ সর্ব্বে ব্রহ্মাদয়ঃ সত্ত্বমূর্ত্তেস্তব বিধিকরাস্ত্বন্নিয়োগ-কর্ত্তারো ভক্তা এব, নান্যে, ন চ বয়মসুরা ইব বৈরভাবেনৈতে ভক্তাঃ, কিন্তু শ্রদ্ধয়ৈব। তব রুচিরৈরবতারৈর্বিবিধং ক্রীড়নমস্য বিশ্বস্য ক্ষেমাদি-প্রয়োজনায়, ন তু ভয়োৎপাদনায়॥ (১৪) তত্তস্মাত্তেষাং ভয়পরিহারায় মন্যুং যচ্ছোপসংহর। যদর্থোঽয়ং মন্যুঃ, স চাসুরঃ সাধূনাং সন্তোষার্থমদ্য হতঃ, অতঃপরং ক্রোধেন কার্য্যাভাবাত্তং নিযচ্ছ। নন্বন্যেষাং বধেন সাধুঃ কিং মোদেত? তত্রাহ—বৃশ্চিকাদেঃ পরোপদ্রবকারিণোঽন্যত এব জাতয়া হত্যা বধেন তস্যৈব তদ্রুদ্রং জাতমিতি সাধুরপি মোদেতৈব। তর্হি বহূনাং সুখাবহত্বাদমুং ক্রোধং ন ত্যজামীতি চেৎ, তত্রাহ—লোকাশ্চ নির্ব্বৃতিমিতাঃ প্রাপ্তাঃ সন্তঃ প্রতিযন্তি ক্রোধোপসংহারং প্রতীক্ষন্তে। তর্হি জনানাং পুনর্ভয়াভাবায় মন্যুং ধারয়ামীতি চেৎ, তত্রাহ—রূপমিতি; বিভয়ায় ভয়-নিবৃত্ত্যৈ, এতদ্রূপস্মরণাদেব ভয়নিবৃত্তেঃ; ন মন্যুধারণেন কৃত্যমস্তীত্যর্থঃ॥

১৫। ত্বঞ্চেদ্বিভেষি, তর্হি ত্যজামীতি চেৎ, তত্রাহ—নাহমিতি। ভো অজিত! তেঽস্মদ্রূপাদহং ন বিভেমি। কথম্ভূতাৎ? আস্যঞ্চ জিহ্বা চ অর্ক-সদৃশনেত্রাণি চ ভ্রুকুটীনাং রভস আটোপশ্চোগ্রদংষ্ট্রাশ্চৈতান্যতিভয়ানকানি

যস্মিংস্তস্মাৎ, অন্ত্রময্যঃ স্রজো যস্মিংস্তদান্ত্রস্রক্, তস্মাৎ; ক্ষতজাক্তাঃ কেশরা যস্মিন্; শঙ্কুবদুন্নতৌ স্তব্ধৌ কর্ণৌ যস্মিংস্তচ্চ তচ্চ তস্মাৎ; নির্হ্রাদেন ভীতা দিগিভা যস্মাৎ। অরীন্ ভিন্দন্তীত্যরিভিন্দি, তানি নখাগ্রাণি যস্মিন্নেবম্ভূতাদপি তে রূপাদহং ন বিভেমি ॥

১৬। মহদ্ভয়ং ত্বন্যদস্তীত্যাহ—ত্রস্তোঽস্মীতি। দুঃসহং যদুগ্রং সংসার-চক্রে কদনং দুঃখম্, তস্মাদহং ত্রস্তোঽস্মি। তত্র চ গ্রসতাং হিংস্রাণাং মধ্যে স্বকর্ম্মভির্ব্বদ্ধঃ সন্ প্রণীতো নিক্ষিপ্তোঽস্মি; হে কৃপণবৎসল! হে উশত্তম! কদা নু ত্বং প্রীতঃ সন্নপবর্গভূতং শরণং তবাঙ্ঘ্রিমূলং প্রতি হ্বয়সে মামা-হ্বয়িষ্যসি ॥

১৭। দাস্যে সতি মৎপ্রীতিরিতি চেৎ, তর্হি নানাযোনিষু ক্লিশ্যমানস্য মম দাস্যজ্ঞানাভাবাত্ত্বমেব তদুপদিশেতি প্রার্থয়তে—যস্মাৎ প্রিয়ৈরপ্রিয়ৈশ্চ যথাসংখ্যং বিয়োগসংযোগাভ্যাং জন্ম যস্য, তেন শোকাগ্নিনা সকলযোনিষু দহ্যমানোঽস্মি। দুঃখস্য প্রতীকারঃ কার্য্য ইতি চেৎ, তত্রাহ—দুঃখস্যৌষধং প্রতীকারস্তদপি দুঃখমেবৈবমপ্যতদ্ধিয়া দেহাদ্যভিমানেন মুহ্যামি, অতো হে ভূমন্ বিভো! মে তব দাস্যরূপং যোগং নিস্তারোপায়ং বদ ॥

১৮। ননু দাস্যযোগে প্রবৃত্তস্যাপি তদন্তরায়ভূতানাং পূর্ব্বোক্তনানা-দুঃখানাং কুতঃ পরিহারঃ? তত্রাহ—সোঽহং ত্বদ্দাসঃ সন্ ভো নৃসিংহ! তব লীলাকথা অনুগৃণন্ দুর্গাণি মহাদুঃখান্যঞ্জসা তিতর্মি তরামি, ন গণয়িষ্যামীত্যর্থঃ। তত্র হেতুঃ—গুণৈ রাগাদিভির্বিশেষেণ প্রমুক্তঃ[১] সন্। তৎ কুতঃ? তে পদযুগমেবালয়ো যেষাং ভক্তানাম্, ত এব হংসা জ্ঞানিনস্তৈঃ সঙ্গো যস্য মম, সোঽহম্। কথম্ভূতস্য কথাঃ? তত্রাহ—প্রিয়স্যেত্যাদি। কুতো জ্ঞাতাঃ? বিরিঞ্চেন গীতাস্তৎসম্প্রদায়প্রবৃত্তাঃ। তথা চাথর্ব্বণী শ্রুতিঃ—'দেবা হ বৈ প্রজাপতিমব্রুবন্' ইত্যাদি। দাস্যে প্রবৃত্তস্য

১। প্রযুক্তঃ (গ)।

ভগবদনুগ্রহেণ সৎসঙ্গস্ততো বীতরাগতয়া ভগবদ্‌গুণবর্ণনম্, ততশ্চ ন দুঃখাভিভবঃ স্যাদিতি বাক্যার্থঃ ॥

১৯। ননু দুঃখৈস্তপ্তস্য তৎপ্রতীকারো লোকপ্রসিদ্ধ এব, কিং মদ্দাস্যাদিনা? তত্রাহ—বালস্যেতি। ভো নৃসিংহ! তপ্তস্য তৎপ্রতিবিধিদুঃখপ্রতীকার ইহলোকে যোঽঞ্জসেষ্টঃ, স ত্বয়োপেক্ষিতানাং তাবদেব ক্ষণমাত্রমেব, ন ত্বাত্যন্তিকঃ। তদেবাহ—বালস্য পিতরৌ শরণং রক্ষকাবিহ ন ভবতঃ, তাভ্যাং পাল্যমানস্যাপি তস্য দুঃখদর্শনাৎ, কচিদজীগর্ত্তাদিষু তাভ্যামেব তদ্বধদর্শনাচ্চ; ন চার্ত্তস্য রোগিণোঽগদমৌষধং শরণম্, কৃতেঽপ্যৌষধে মৃত্যুদর্শনাৎ; ন চোদন্বতি সমুদ্রে মজ্জতঃ পুংসো নৌঃ শরণম্, তয়া সহ মজ্জনদর্শনাৎ; অতস্ত্বমেব শরণমিত্যর্থঃ। অথবৈবং কাক্বা ব্যাখ্যেয়ম্—তপ্তস্য তৎপ্রতিবিধির্য ইহ তাবৎ প্রসিদ্ধঃ, স ত্বদুপেক্ষিতানাং কিমঞ্জসেষ্টঃ? অপি তু নেষ্ট এব; যদ্বা, যস্তাবদিহ প্রতিবিধিরিষ্টঃ, স কিমঞ্জসা? নৈবাঞ্জসেত্যাদি যোজ্যম্, বালস্যেত্যাদি পূর্ব্ববদেব ॥

২০। ননু কচিৎ কুতশ্চিৎ কেনচিৎ কদাচিৎ কশ্চিদ্ রক্ষকোঽপি দৃশ্যতে? ইত্যাশঙ্ক্য তত্রাপি তত্তদ্রূপেণ ত্বমেব রক্ষক ইত্যুররীকৃত্য তস্যৈব সর্ব্বাত্মতামাহ—যস্মিন্নিতি। অপরোঽর্ব্বাচীনঃ পিত্রাদিঃ, পরো ব্রহ্মাদির্ব্বা; ভাবঃ কর্ত্তা; তত্তৎকারকৈর্যদ্‌যৎ করোতি, তৎ সর্ব্বং ভবত এব স্বরূপম্, ন তু পৃথক্। যস্মিন্নধিকরণে, যতো নিমিত্তাদ্‌যর্হি যস্মিন্ কালে, যেন করণেন, যেন চ হেতুনা কর্ত্রা সঞ্চোদিতঃ, যস্য সম্বন্ধিনঃ, যস্মাদপাদানাৎ, যস্মৈ সম্প্রদানায়, যদীপ্সিততমম্, যঃ কর্ত্তেত্যেবং সপ্তবিভক্ত্যর্থা দর্শিতাঃ, যথা যেন প্রকারেণেতি ক্রিয়াবিশেষণানামব্যয়ানামর্থাঃ। পৃথক্‌স্বভাবঃ সত্ত্বাদিপ্রকৃতিঃ, করোতি উৎপাদয়তি, বিকরোতি রূপান্তরং নয়তীতি ॥

২১—২২। অতোঽন্যস্য রক্ষকস্যাভাবাদসংসারিত্বাচ্চ নিত্যমুক্তস্ত্বমেব মাং শরণাগতং রক্ষেতি প্রার্থয়তে—মায়েতি দ্বাভ্যাম্। (২১) ত্বদংশস্য

পুংসোঽনুমতেনেক্ষণরূপেণানুগ্রহেণ মনঃ প্রধানং লিঙ্গং মায়া সৃজতি। কথম্ভূতা ? কালেন চোদিতা ক্ষোভিতা গুণা যস্যাঃ ; কথম্ভূতং মনঃ ? কর্ম্মময়ং কুর্ব্বদ্রূপম্, বলীয়ো দুর্জ্জয়ম্, ছন্দোময়ং বেদোক্তকর্ম্মপ্রধানঞ্চ। অজয়া জীবস্যাবিদ্যয়া তদ্ভোগার্থমর্পিতাঃ ষোড়শ আরা বিকারা যস্মিন্, যদেবম্ভূতং সংসারচক্রাত্মকং মনস্তৎ কোঽতিতরেৎ ? ভো অজ ! ত্বদন্যস্ত্বত্তঃ পৃথক্ স্থিতস্ত্বামভজন্নিত্যর্থঃ ॥ (২২) ননু মমাপি মায়াসম্বন্ধাৎ কর্ত্তৃত্বাদ-বিশেষাচ্চ ত্বত্তঃ কো বিশেষঃ ? ইত্যত আহ—স ইতি। স্বধাম্না চিচ্ছক্ত্যা নিত্যং বিজিতা আত্মনো বুদ্ধের্গুণা যেন স হি ত্বম্ ; যতঃ কালো মায়া-প্রেরকঃ, অতএব বশীকৃতা বিসৃজ্যানাং কার্য্যাণাং বিসর্গাণাং সাধনানাঞ্চ শক্তয়ো যেন ; অত ইক্ষুদণ্ডবন্নিষ্পীড্যমানং মামুপকর্ষ স্বসমীপং নয় ॥

২৩—২৫। ননু লোকপালানাং ভোগান্ ভুঙ্ক্ষ্ব, পিত্র্যঞ্চ রাজ্যমিদং দাস্যামি, কিমিতি সংসারাদুদ্বিজসে ? তত্রাহ—দৃষ্টা ইতি ত্রিভিঃ। (২৩) শ্রিয়ঃ সম্পদঃ, বিভব উদ্ভবঃ ; আয়ুরাদয়ো দৃষ্টা ইতি কাক্বা তুচ্ছত্বমুক্তম্। তদেবাহ—যেঽস্মৎপিতুঃ কোপহাসবিকৃতভ্রূভঙ্গমাত্রেণ বিধ্বস্তাঃ, স চ ত্বয়া নিরস্তঃ ॥ (২৪) যস্মাদেবং তস্মাদাশিষো ভোগান্ জ্ঞস্তৎপরিপাকং বিদ্বান-হমৈন্দ্রিয়মিন্দ্রিয়ৈর্ভোগ্যং ব্রহ্মণো ভোগমভিব্যাপ্য কিমপি নেচ্ছামি ; তে কালাত্মনোরুবিক্রমেণ বিলুলিতান্ বিধ্বস্তানণিমাদীনপি ॥ (২৫) কিঞ্চ, বর্ত্তমানকালেঽপি ন ভোগার্হা ইত্যাহ—কুত্রেতি। শ্রুতিঃ শ্রবণম্, তদেব সুখং যাসু তা মৃগতৃষ্ণিকাবন্মিথ্যাভূতাশ্চাশিষঃ ক ? অশেষাণাং রুজাং রোগাণাং বিরোহ উদ্ভবস্থানং ক চেদং কলেবরম্ ? এবঞ্চেৎ, সর্ব্বোঽপি জনঃ কিং ন বিরজ্যতে ? তত্রাহ—যদপি যদ্যপীত্যেবং বিদ্বানয়ং জনস্তথাপি ন নির্বিদ্যতে, বিরক্তো ন ভবতি। কুতঃ ? কাম এবানলস্তং মধুতুল্যৈঃ সুখলবৈর্দুঃসাধ্যৈরপি শময়ন্ ; কামাগ্নিশমনব্যগ্রস্য নির্ব্বেদেঽপ্যবকাশো নাস্তীত্যর্থঃ ; যদ্বা, অচিন্ত্যমিদং তব মায়াচেষ্টিতমিতি ভাবঃ ॥

২৬। তর্হি ত্বং কথং নির্ব্বিঘ্নোঽসি ? অনর্হেঽপি ময়ি প্রবৃত্তয়া তৎ-কৃপয়ৈবেত্যাশয়েনাহ—ক্কেতি। রজসৈব প্রভবো জন্ম যস্য সঃ, সপ্তম্যন্তং বা কুলবিশেষণম্। তমোঽধিকং যস্মিন্ তস্মিন্নসুরাণাং কুলে জাতোঽহং ক্ক, ক্ক চ তবানুকম্পা ? তামেবাহ—ব্রহ্মাদীনাং শিরসি যো নার্পিতঃ, স পদ্মবৎ সকলসন্তাপহরঃ করঃ প্রসাদঃ পুরুষার্থরূপো মে শিরস্যর্পিত ইতি যৎ, যদ্ যয়ানুকম্পয়েতি বা ॥

২৭। ন চ ত্বয়ীদমতিচিত্রমিত্যাহ—নৈষেতি। এতে ব্রহ্মাদয় উত্তমাঃ, অয়মসুরো নীচ ইত্যেষা পরাবরমতির্জন্তোঃ প্রাকৃতস্য যথা তথা ভবতো নৈব স্যাৎ ; তত্র হেতুঃ —জগত আত্মনঃ সুহৃদশ্চ। তর্হি সর্ব্বত্র মৎপ্রসাদ একরূপ কিং ন স্যাৎ ? তত্রাহ—সংসেবয়া তব প্রসাদো ভবতি, তত্র চ সেবানুরূপং তত্তদিচ্ছানুসারেণ ধর্ম্মাদীনামুদয়ো ভবতি, এবং সত্যপি বৈষম্যাভাবে দৃষ্টান্তঃ —সুরতরোর্যথা সেবকস্যৈব সঙ্কল্পানুসারেণ ফলং দদাতি, ন চ বিষমস্তদ্বন্ন পরাবরত্বমত্র কারণমিতি শেষঃ ॥

২৮। এতচ্চ ত্বদ্ভৃত্যকৃপয়া ময়া প্রাপ্তমিতি ত্বদ্ভৃত্যপার্শ্বমেব মাং নয়েত্যাশয়েনাহ—এবমিতি। যথা ত্বয়ানুকম্পিতোঽস্মি,এবং নারদেনাত্মসাৎ কৃত্বা পূর্ব্বমনুগৃহীতঃ, সোঽহং কথং নু ত্বদ্ভৃত্যসেবাং বিসৃজামি ? কথ-ভূতোঽনুগৃহীতোঽস্মি ? প্রভব এবাহিযুক্তঃ কূপস্তস্মিন্ কামানভিতঃ কাময়মানং জনং নিপতিতমনু তৎপ্রসঙ্গাৎ প্রপতন্ যোঽহম্ ॥

২৯। তদেবং ত্বদ্ভৃত্যস্য শ্রীনারদস্যানুগ্রহেণ ত্বয়াত্যন্তমনুকম্পিতোঽস্মি, অয়মেব চ মম পরমোঽনুগ্রহঃ, ন পুনরিদমতিতুচ্ছং মৎপ্রাণরক্ষাদি, ন চেদং ত্বয়া মদনুগ্রহার্থং কৃতম্, কিন্ত্বন্যার্থমিত্যাহ—ভো অনন্ত ! যদেতন্মৎ-প্রাণরক্ষণং মাং হন্তুমুদ্যতস্য মম পিতুর্ব্বধশ্চ, তদুভয়ং স্বভৃত্যঋষিবাক্যমৃতং সত্যং বিধাতুমিত্যহং মন্যে। কুতঃ ? যদ্ যস্মাদসদযুক্তং বিধিৎসুঃ খড়্গং গৃহীত্বাবোচৎ। কিম্ ? মদপরো মদ্ব্যতিরিক্তশ্চেদীশ্বরোঽস্তি, তর্হি ত্বামিদানী-

মবতু, তব কং শিরোঽহং হরামীতি। অসূন্ বিধিৎসুরিতি পাঠেঽপ্যয়মেবার্থঃ; যদ্‌যদাবোচৎ, তদা মৎপ্রাণরক্ষণমিতি বান্বয়ঃ, এতচ্চ 'সত্যং বিধাতুং নিজভৃত্যভাষিতম্' ইত্যত্রৈব বহুধা ব্যাখ্যাতম্॥

৩০। ন চেদং পক্ষপাতেন রক্ষণং দৈত্যহননঞ্চ ত্বয়ি স্বাভাবিকম্, কিন্তু মায়াগুণোপাধিকম্; সর্ব্বাত্মকে ত্বয়ি স্বতস্তদযোগাদিত্যাহ—এক ইতি। এতজ্জগত্ত্বমেবৈকঃ, যদ্‌যতোঽমুষ্যাদাবন্তে চ পৃথগবস্থসি বিরামং করোষি, সন্মাত্রতয়া কারণত্বেনাবধিত্বেন চ বর্ত্তস ইত্যর্থঃ; অতো মধ্যতশ্চ ত্বমেব। কুতস্তর্হি ভেদপ্রতীতিঃ? তত্রাহ—নিজমায়য়া গুণপরিণামাত্মকমিদং জগৎ সৃষ্ট্বা তদনুপ্রবিষ্টস্ত্বং তৈর্গুণৈর্হেতুভূতৈর্নানেব রক্ষক ইব হন্তেব চাবসিতঃ প্রতীতঃ। তদুক্তং স্কন্ধোপক্রমে—'নির্গুণোঽপি হ্যজোঽব্যক্তো ভগবান্ প্রকৃতেঃ পরঃ' ইত্যাদিনা॥

৩১। ননু যদ্যেতজ্জগদহমেব, তর্হি জগতো বৈষম্যেণ মম বৈষম্যমপি কিং ন স্যাৎ? ইত্যত আহ—ত্বং বৈ ত্বমেবেদং সদসৎকার্য্যকারণাত্মকং জগৎ, ন তু ত্বত্তঃ পৃথক্; ভবাংস্তু ততোঽন্যঃ, আদ্যন্তয়োঃ পৃথগবস্থানাৎ। যদ্‌যস্মাদেবমতোঽয়মাত্মীয়োঽয়ং পর ইতি যা বুদ্ধিঃ, সা অপার্থা মায়ৈব। কার্য্যকারণাভেদং দৃষ্টান্তেন সাধয়তি—যদ্‌যতঃ, যস্য জন্মেক্ষণং প্রকাশশ্চ যস্মিন্ নিধনঞ্চ স্থিতিশ্চ, তদ্বৈ তদেব। অষ্টির্বীজং কারণম্, তরুঃ কার্য্যম্, তয়োর্যথা বস্তু-কালমাত্রত্বম্। অয়মর্থঃ—'কাল'-শব্দেন নীলত্বাদ্যসাধারণ-গুণযোগাৎ পৃথ্বী, 'বস্তু'শব্দেন বস্তুমাত্রং ভূতসূক্ষ্মম্, তত্র তরোর্যথা পৃথ্বীময়বীজমাত্রত্বম্, তস্য চ যথা ভূতসূক্ষ্মমাত্রত্বম্, এবং সর্ব্বমপি কার্য্য-কারণাত্মকং জগৎ পরমকারণাত্মকমেবেতি। তথা চ পারমর্ষং সূত্রম্ 'তদনন্যত্ব[১]মারম্ভণশব্দাদিভ্যঃ' ইতি; শ্রুতিশ্চ—'বাচারম্ভণং বিকারো নামধেয়ং মৃত্তিকেত্যেব সত্যম্' ইতি॥

১। তদনন্তত্ব- (খ)।

৩২। তত্র তাবদন্তে পৃথগবস্থানং দর্শয়তি—ত্বস্মেতি। ইদং জগদাত্মনৈবাত্মনি নিক্ষিপ্য স্বসুখমেবানুভবন্ নিষ্ক্রিয়ঃ সন্, প্রলয়োদকমধ্যে শয়নং করোষি। তর্হি জীবস্যেব মমাপি কিং তমোবৃত্তিরূপা নিদ্রাস্তি? নহি নহি, যোগ এব তু বহির্বৃত্ত্যভাবসাম্যান্নিদ্রোচ্যত ইত্যাহ—যোগেন মীলিতে দৃশৌ যেন; আত্মনা স্বরূপপ্রকাশেন নিপীতা নিদ্রা যেন। যতস্তর্য্যেঽবস্থাত্রয়াতিরিক্তে স্বরূপে স্থিতস্ত্বম্, ন তু সুষুপ্ত ইবাত্মনা তমো যুঙ্ক্ষে যোজয়সি পশ্যসি, ন চ জাগ্রৎস্বপ্নয়োরিব গুণান্ বিষয়াংশ্চেত্যর্থঃ॥

৩৩—৩৬। ইদানীং কারণত্বেনাদাবপি পৃথগবস্থানং দর্শয়ন্ মধ্যতশ্চ ত্বমেবেত্যেতৎ প্রপঞ্চয়তি চতুর্ভিঃ। (৩৩) যস্ত্বমম্ভসি শেষে তস্যৈব ত ইদং জগদ্বপুঃ স্বরূপম্, নান্যস্য; যতস্ত্বং মধ্যতোঽপি স্যাঃ। কথম্ভূতস্য? নিজকালশক্ত্যা সঞ্চোদিতাঃ প্রকৃতের্ধর্ম্মাঃ সত্ত্বাদয়ো যেন। স্বরূপত্বে হেতুঃ—অনন্তশয়নাচ্ছেষপর্য্যঙ্কাদ্ বিরমন্ সমাধির্যস্য তস্য তব নাভেঃ সকাশাদেকার্ণবোদকে মহাব্জং লোকপদ্মমভূৎ। কথম্ভূতম্? আত্মনি ত্বয্যেব গূঢং সৎ; স্বকণিকাতঃ সূক্ষ্মাদ্বটবীজান্মহাবট ইব॥ (৩৪) তদেবং কারণত্বেনানুগতঃ সন্, মধ্যতশ্চ ত্বমেব বর্ত্তস ইত্যুক্তম্, এতদেব শুদ্ধসত্ত্বস্য ব্রহ্মণোঽনুভবেন স্ফুটয়িতুং তস্য প্রাক্তনীমবস্থামাহ—তৎসম্ভব ইতি। তস্মিন্নব্জে সম্ভবো যস্য সঃ, কবির্ব্রহ্মা, অতঃ পদ্মাদন্যদপশ্যন্ বীজমুপাদানকারণভূতং ত্বাং স্বস্মিন্ ব্যাপ্তং সন্তমপি নাবিন্দৎ, যুক্তঞ্চৈতৎ, উহ অহো অঙ্কুরে জাতে সতি বীজং তদনুগতং কারণং পৃথক্ কথং নাম পুমান্ পশ্যেৎ? (৩৫) ভবদুপাসনয়া তু স্বস্মিন্নেব দৃষ্টবানিত্যাহ—স ত্বিতি। পরাবৃত্ত্যাত্মমাশ্রিতঃ সন্, তীব্রেণ তপসা ধ্যানেন; অনেন সন্মাত্ররূপেণোপাদানতয়া দর্শনমুক্তম্॥ (৩৬) ঈশ্বরত্বেন চ দৃষ্টা কৃতার্থোঽভবদিত্যাহ—এবমনেন প্রকারেণ সহস্রমপরিমিতানি যানি বদনাদীনি, তৈরাঢ্যং সমৃদ্ধম্,

মায়াময়ং মায়াপ্রধানম্, সতা প্রপঞ্চেন পাতালাদিনোপলক্ষিতঃ সন্নিবেশঃ পাদাদিরচনা যস্য ॥

৩৭। তদা চ ভবাংস্তস্যানুগ্রহং কৃতবানিত্যাহ—তস্মা ইতি ; হয়গ্রীবমূর্ত্তিং বিভ্রৎ সন্ রজস্তমোরূপৌ মধুকৈটভাখ্যৌ হত্বা তস্মৈ শ্রুতিগণান্ সমর্পিতবান্। তত্র হেতুঃ —সত্ত্বমিতি ॥

৩৮। 'একস্ত্বমেব' ইত্যাদিভিরষ্টভিঃ শ্লোকৈর্যদুক্তং পক্ষপাতেন রক্ষণং তদ্বিপক্ষবধশ্চ সত্ত্বোপাধিতঃ, ন তু স্বত ইতি, তদুপসংহরতি—ইত্থমিতি। বিভাবয়সি পালয়সি, হংসি ঘাতয়সি ; কলৌ তু তন্ন করোষি, যতস্তদা ত্বং ছন্নোঽভবঃ, অতস্ত্রিষ্বেব যুগেষ্বাবির্ভাবাৎ স এবম্ভূতস্ত্বং ত্রিযুগ ইতি প্রসিদ্ধঃ ॥

৩৯—৪১। তদেবং ভগবতস্তত্ত্বং নিরূপ্য স্বস্য চ তদ্বিচারাযোগ্যতাং নিবেদয়ন্ প্রার্থয়তে—নৈতদিতি ত্রিভিঃ। (৩৯) অসাধু বহির্ম্মুখম্, তীব্রং দুর্দ্ধর্ষম্, হর্ষশোকভয়ৈরেষণাত্রয়েণ চার্ত্তং দুঃখিতমপি ত্বৎকথাসু ন সম্প্রীয়তে, তস্মিন্নেবম্ভূতে মনসি সতি কথং তব তত্ত্বং বিচারয়ামি? (৪০) কিঞ্চ, জিহ্বাবিতৃপ্তা সতী, ভো অচ্যুত ! মা মাং যতো মধুরাদিরসস্তত আকর্ষতি ; উদরন্তু ক্ষুধাসন্তপ্তং সৎ সদৈব যৎ কিঞ্চিদাহারমাত্রং প্রতি ; চপলা দৃক্ চক্ষুঃ, কর্ম্মশক্তিঃ কর্ম্মেন্দ্রিয়াণি. লুনন্তি ত্রোটয়ন্তি ॥ (৪১) ন কেবলমহমেক এব কষ্টাং দশামাপন্নঃ, কিন্তু মহাজনোঽপ্যেবমেব ক্লিশ্যন্তি, অতঃ সর্ব্বং জনং পালয় ইতি প্রার্থয়তে—এবমিতি। ভবঃ সংসার এব বৈতরণী যমদ্বারনদী, তস্যাম্। অন্যোঽন্যতো যানি জন্মাদীনি তেভ্যোঽতিভীতম্ ; স্বেষাং পরেষাঞ্চ বিগ্রহেষু যথাযথং বৈরং মৈত্রঞ্চ যস্য ; এবং মূঢ়ং জনং পশ্যংস্ত্বম্, হে পারচর ! তস্যাঃ পারে স্থিত ! নিত্যমুক্ত ! হন্তেতি অহো কষ্টমিত্যেবমনুকম্প্যাদ্য পীপৃহি বৈতরণীমুত্তার্য্য পালয় ॥

৪২। একেন ময়া কথং সর্ব্বো জনস্তারণীয় ইতি চেত্তত্রাহ—কো ন্বিতি ; কো নু তেঽত্র সর্ব্বজনোত্তারণে প্রয়াসঃ ? ন কোঽপি। কুতঃ ? অস্য বিশ্বস্য ভবসম্ভবলোপানামুৎপত্তিস্থিতিসংহারাণাং হেতোঃ, ততোঽপি কিমেতদ্‌দুষ্করমিতি ভাবঃ। উচিতঞ্চৈতদিত্যাহ—মূঢ়েম্বিতি। ত্বাঞ্চ ত্বদীয়াংশ্চ তারয়িষ্যামি, ইমং দুরাগ্রহং মা কৃথা ইতি চেত্তত্রাহ—তব যে প্রিয়জনা ভক্তাস্তাননুসেবমানানাং নোঽস্মাকং তেনোত্তারণেন কিম্ ? 'কোঽতিপ্রয়াস ইহ নোঽসুরবালকানাং, কোঽন্বত্র তেঽখিলগুরো ভগবন্ প্রয়াসঃ। প্রহ্লাদ ইত্থমুপমন্ত্র্য মিথো নরাণা,-মীশেন সখ্যমকরোদপনীয় মায়াম্ ॥'

৪৩। বৎস প্রহ্লাদ ! ত্বাং তাবত্তারয়িষ্যামি, তাবতৈব কৃতার্থঃ স্যাঃ, কিমনেন নির্ব্বন্ধেন ? ইত্যত আহ—নৈবেতি। হে পর ! সর্ব্বোত্তম ! ত্বদ্বীর্য্যগায়নমেব মহামৃতং তস্মিন্ মগ্নং চিত্তং যস্য সোঽহং ভববৈতরণ্যা নৈবোদ্বিজে, কিন্তু বিমূঢ়ান্ শোচামি। তানেবাহ—ততো মহামৃতাদ্বিমুখং চেতো যেষাম্, প্রত্যুতেন্দ্রিয়ার্থনিমিত্তং যন্মায়াসুখং তদর্থং ভরং কুটুম্বাদি-ভারমুদ্বহতঃ ॥

৪৪। ত্বং তাবন্মুক্তিং গৃহাণ, তাংস্তু তত্ত্বজ্ঞা মুনয় উপদেক্ষ্যন্তীতি চেৎ, তত্রাহ—প্রায়েণেতি। ন বিমুমুক্ষে, বিমুক্তিং নেচ্ছামি। তর্হ্যন্যং কমপি প্রার্থয়স্ব, মামেব কিমিতি নির্ব্বধ্নাসীতি চেদত আহ—ত্বত্তোঽন্যমস্য জনস্য শরণং ন পশ্যামি ॥

৪৫। নন্বেতে স্ত্রীসম্ভোগাদিনা সুখিন এব, ন কৃপণাঃ ? তত্রাহ—যদিতি ; করয়োঃ কণ্ডুয়নেন সংঘর্ষণেনেব দুঃখমনুদুঃখং যস্মিন্, তর্হি দুঃখত্বাদেব ততো নির্বিদ্য মুচ্যেরন্ ? তত্রাহ—কৃপণাঃ কামুকা বহুদুঃখ-ভাজোঽপি ইহ গৃহমেধিসুখে ন তৃপ্যন্তি, অলমিতি ন মন্যন্তে, কণ্ডূতিবৎ কামস্য দুঃসহত্বাৎ। নন্বু কেচিৎ কণ্ডূতিমপি সহন্তে, কামঞ্চ ? ইত্যত্রাহ—

ত্বৎপ্রসাদাত্তু কশ্চিদ্ধীর এব মনসিজং কামং বিষহেত, ন তু সর্ব্বে, অত্রাপি কণ্ডূতিবদিতি দৃষ্টান্তঃ ॥

৪৬। নন্থ মৌনাদিভির্মোক্ষসাধনৈঃ সুলভৈব তেষামপি মুক্তিঃ? তত্রাহ—মৌনেতি। হে পুরুষ! অন্তর্যামিন্! যে মৌনাদয়ো দশ আপবর্গ্যা অপবর্গহেতবঃ প্রসিদ্ধাঃ; রহো বিবিক্তবাসঃ, তে তু প্রায়শোঽজিতেন্দ্রিয়াণামিন্দ্রিয়ভোগার্থং বিক্রীণতাং বার্ত্তা জীবনোপায়া ভবন্তি দাম্ভিকানান্তু বার্ত্তা উত অপি ভবন্তি বা, ন বা, দম্ভস্যানিয়তফলত্বাৎ ॥

৪৭—৪৯। তজ্জ্ঞানন্তু ভক্তিং বিনা সকামৈর্মৌনাদিভির্ন ভবত্যেবেত্যাহ—রূপে ইতি ত্রিভিঃ। (৪৭) বীজাঙ্কুরাবিব প্রবাহাপন্ন ইমে সদসতী কার্য্যকারণ এব তে রূপ উপলক্ষণভূতে বেদেন স্পষ্টে প্রকাশিতে, ন চান্যৎ স্বসমবেতং গৌরত্বাদিকমিব দেবদত্তাদেঃ। কুতঃ? অরূপকস্য প্রাকৃতরূপাদিশূন্যস্য, অতো যুক্তাঃ সংযতা এব ভক্তিযোগেন প্রত্যক্ষং ত্বামুভয়ত্র কার্য্যে কারণে চানুগতং পশ্যন্তি, মথনেন দারুষু বহ্নিমিব নান্যতঃ স্যাত্তজ্জ্ঞানমিতি শেষঃ; যদ্বা, জ্ঞানপ্রকারমাহ—এতদুভয়মন্যতঃ প্রধানপরমাণ্বাদের্ন স্যাৎ, 'স ঐক্ষত' ইত্যাদিশ্রুতেঃ। অতস্ত্বমেব কারণত্বাৎ সর্ব্বানুস্যূত ইতি ॥ (৪৮) তদেবাহ—ত্বং বায়ুরিতি। হৃদয়ং মনঃ, চিৎ চিত্তম্, অনুগ্রহোঽহঙ্কারো দেবতাবর্গো বা, স্বগুণঃ স্থূলঃ, বিগুণঃ সূক্ষ্মঃ; মনশ্চ বচশ্চ মনোবচস্তেন নিরুক্তং প্রকাশিতং কিমপি ত্বত্তোঽন্যন্নাস্তি ॥ (৪৯) অভক্তাস্তু স্বস্মিন্নুগতমপি ত্বাং ন জানন্তীত্যাহ—নৈত ইতি; এতে গুণাদ্যভিমানিনো দেবা আদ্যন্তবন্তঃ, জড়োপাধিত্বাদনাদ্যন্তং নিরুপাধিং ত্বাং ন বিদন্তি, হি যস্মাৎ সুধিয়ো বিদ্বাংসঃ, এবং বিচার্য্য শব্দাদধ্যয়নাদিব্যাপারাদুপরমন্তি, ত্বামেব সমাধিনোপাসত ইত্যর্থঃ। তথা চ শ্রুতিঃ—'কিমর্থা বয়মধ্যেষ্যামহে, কিমর্থা বয়ং যক্ষ্যামহে?' ইতি, 'নানুধ্যায়েদ্বহূঞ্ছব্দান্ বাচো বিগ্লাপনং হি তৎ' ইতি চ; স্মৃতিশ্চ—'যদা তে মোহকলিলং

বুদ্ধির্ব্ব্যতিতরিষ্যতি। তদা গন্তাসি নির্ব্বেদং শ্রোতব্যস্য শ্রুতস্য চ॥' ইত্যাদিঃ॥

৫০। উপসংহরতি—তদিতি। হে অর্হত্তম! নমঃস্তুতিকর্ম্মপূজাঃ—প্রণিপাতস্তুতিসর্ব্বকর্ম্মার্পণানি; কর্ম্ম চ—পরিচর্য্যা চরণয়োঃ, স্মৃতিঃ কথায়াম্, শ্রবণঞ্চেত্যেবং ষড়ঙ্গয়া সম্যক্‌সেবয়া বিনা পরমহংসানাং গতৌ প্রাপ্যে ত্বয়ি জনঃ কথং ভক্তিং লভেত? যস্মাদেবং ভক্তিং বিনা ন মোক্ষঃ, ন চ ভক্তিঃ সংসেবয়া বিনা, অতঃ প্রাক্ প্রার্থিতং ত্বদ্দাস্যযোগমেব দেহীতি প্রকরণার্থঃ॥

৫১। এতাবতা বর্ণিতা গুণা যস্য, যতমন্যুরুপসংহৃতকোপঃ॥

৫২। কামান্ পূরয়তীতি তথা; যদ্বা, পুরুষার্থপ্রবাহোঽস্মীত্যর্থঃ॥

৫৩। অপ্রীণতঃ—অপ্রীণয়তঃ; তপ্তুম্—অপূর্ণকামত্বেন শোচিতুম্॥

৫৪। প্রীণন্তি—তোষয়ন্তি॥

৫৫। একান্তিত্বান্নিরুপাধিভক্তত্বাৎ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
নবমোঽধ্যায়ঃ॥ ৯॥

দশমোঽধ্যায়ঃ

দশমে ত্বনুগৃহ্যামুং ভক্তমন্তর্হিতে হরৌ।
প্রসঙ্গাদ্ধরিণা রুদ্রে কৃতোঽনুগ্রহ ঈর্য্যতে॥ (১)

১। তৎ সর্ব্বম্—বরজাতম্॥

২। উৎপত্ত্যা স্বভাবেনৈবাসক্তং মাম্; তেষাং কামানাং সঙ্গাৎ ভীতঃ॥

৩। নমু কিমহং ভক্তং প্রলোভয়ামি ? নহি নহি, কিন্তু বরং বৃণীষ্বেতি বদতস্তবাভিপ্রায়োঽন্য এবেত্যাহ—ভৃত্যলক্ষণেতি। হৃদয়স্য গ্রন্থি-বদ্বন্ধকেষু॥

৪। অন্যথানর্থসাধনেষু প্রবর্ত্তনং ন ঘটেতেত্যর্থঃ। কথমেবং ভৃত্য-লক্ষণজ্ঞানং স্যাৎ ? তত্রাহ—য ইতি। তে—ত্বত্তঃ॥

৫। নমু কামনয়াপি সেব্যসেবকয়োঃ স্বামিভৃত্যভাবঃ প্রসিদ্ধঃ ? সত্যম্, সোপাধিকোঽসৌ, ন তু তাত্ত্বিক ইত্যাহ—স্বামিন্যাত্মন আশিষোঽ-পেক্ষমাণো নৈব ভৃত্যঃ, ভৃত্যহেতুকমাত্মনঃ স্বাম্যমিচ্ছন্ যো ভৃত্যায় দদাতি, স চ নৈব স্বামী॥

৬। আবয়োস্তু তাত্ত্বিকোঽসাবিত্যাহ—অহস্ত্বিতি। অনপাশ্রয়ো নিরভিসন্ধিঃ ; অন্যথা কামাত্ত্বভিসন্ধিনার্থঃ প্রয়োজনং নাস্তি॥

৭। নমু তথাপি পরমোদারস্য মম সন্তোষার্থং কিমপি বৃণীষ্বেতি চেদত আহ—যদীতি। কামাঙ্কুরাণামসংরোহমনুৎপত্তিম্, ভবতঃ সকাশাৎ॥

৮। নমু কামোৎপত্তৌ সত্যাং কো দোষঃ ? তত্রাহ—ইন্দ্রিয়াদীনি যস্য কামস্য জন্মনা নশ্যন্তীতি। আত্মা—দেহঃ॥

৯। কামাভাবে গুণমাহ—বিমুঞ্চতীতি। ভগবত্ত্বায় ত্বৎসমানৈশ্বর্য্যায় ; তথা চ শ্রুতিঃ—'যদা সর্ব্বে প্রমুচ্যন্তে কামা যেঽস্য হৃদি স্থিতাঃ। অথ মর্ত্ত্যোঽমৃতো ভবত্যত্র ব্রহ্ম সমশ্নুতে॥' ইতি॥

১০। নির্দ্দোষান্ কামান্ দাতুমিচ্ছন্তং প্রত্যাখ্যাস্যন্ নমস্যতি—ওঁ নম ইতি॥

১১। সত্যমেকান্তভক্তস্ত্বম্, তথাপি মদাজ্ঞা করণীয়েত্যাহ—নেতি। যে একান্তিনঃ কদাচিদপি ইহামুত্র চ মত্ত্যাশিষো ন বাঞ্ছন্ত্যেব, তথাপ্যে-তন্মন্বন্তরমাত্রং ভোগান্ ভুঙ্ক্ষ্ব॥

১২—১৩। নন্থ তর্হি বন্ধঃ স্থামিত্যত[১] আহ—কথা ইতি দ্বাভ্যাম্। (১২) সর্ব্বেষু ভূতেষু সন্তমেকমীশং যজ্ঞাধিষ্ঠাতারং মামাত্মন্যাবেশ্য যজস্ব। তর্হ্যনেনৈব কর্ম্মণা বন্ধঃ স্থাৎ? নেত্যাহ—যোগেন মযার্পণেন কর্ম্ম হিন্বংস্ত্যজন্ যজস্ব॥ (১৩) কিঞ্চ, ভোগেন সুখানুভবেন প্রারব্ধং পুণ্যং হিত্বা মুক্তবন্ধঃ সন্, লোকানুগ্রহার্থং কীর্ত্তিঞ্চ বিস্তার্য্য মাং প্রাপ্স্যসি, কুশলেন পুণ্যাচরণেন পাপং হিত্বেতি বিভীষামাত্রম্, অন্যথা তস্য রাজ্যেঽপ্রবৃত্তেঃ। ন তু তস্য প্রাচীনং পাপমস্তি, তদধিগম উত্তরপূর্ব্বাঘয়োরশ্লেষবিনাশৌ 'তদ্ব্যপদেশাৎ' ইতি ন্যায়াৎ, 'তৎসুকৃতদুষ্কৃতে বিধুন্বতঃ[২]' ইতি শ্রুতেশ্চ। ন চেদং প্রারব্ধপাপাভিপ্রায়ম্, তস্য ভোগেনৈব ক্ষয়াৎ, 'কুশলেন হিত্বা' ইতি বচনানুপপত্তেঃ। ন চাসাববিদ্বানিতি বাচ্যম্, ভগবতৈব কৃতার্থস্থানন্তরং বক্ষ্যমাণত্বাৎ। অতএব 'যোগেন কর্ম্ম হিন্বন্' ইতীদমপি লোকসংগ্রহার্থে কর্ম্মণি প্রবর্ত্তিতস্যানুদ্বেগমাত্রায়েতি সর্ব্বমনবদ্যম্॥

১৪। কিঞ্চ, য ইতি; ত্বাঞ্চ মাঞ্চেদং মচ্চরিতঞ্চ স্মরন্নেতৎ স্তোত্রং যঃ কীর্ত্তয়েৎ, সোঽপি কর্ম্মবন্ধাদ্বিমুচ্যতে, কুতস্তব বন্ধশঙ্কেত্যর্থঃ॥

১৫—১৭। ঈশ্বরাজ্ঞয়া প্রাপ্তকর্ম্মাধিকারঃ সন্ পিতুর্নিষ্কৃতিং প্রার্থয়তে ত্রিভিঃ। (১৫) বরং বরণীয়মেতদপরং বৃণে; তে ত্বত্তঃ॥ (১৬) বিদ্বোঽমর্ষেণ ক্রোধেনাশয়ো যস্য॥ (১৭) তেঽপাঙ্গেন সংদৃষ্টঃ, অতঃ পূত এব, তথাপি ভোঃ কৃপণবৎসল! কার্পণ্যেন প্রার্থয় ইত্যর্থঃ॥

১৮। যদ্যপি কশ্যপো মরীচির্ব্রহ্মা চেতি তৎপিতুস্ত্রয় এব পূর্ব্বজাঃ, তথাপি ত্রিঃসপ্তভিঃ সহেতি প্রাক্‌কল্পগতপিত্রভিপ্রায়েণোক্তম্; যদ্‌যস্মাৎ॥

১৯। সম্যগুত্তম আচারো যেষাং তে কীকটা অপি দেশাস্তত্তুল্যা বংশ্যাশ্চ পূয়ন্তে শুদ্ধা ভবন্তি॥

১। বন্ধঃ স্যাদিত্যত (ঘ); ২। বিধুনুতে (ঘ)।

২০—২১। নন্থ ত্বদ্ভক্তানাময়ং তাদৃশো মহিমেতি ন চিত্রম্, অহস্তু তাদৃশো ন ভবামীতি চেৎ, তত্রাহ—সর্ব্বাত্মনেতি দ্বাভ্যাম্। (২০) মদ্ভাবেন মদ্ভক্ত্যা বিগতা স্পৃহা যেষাম্॥ (২১) ত্বামনুগতা যে কেচিৎ পুরুষাস্তেঽপ্যেবংলক্ষণাঃ সন্তো মদ্ভক্তা ভবন্তি, অতো ভবান্ মে ভক্তানাং সর্ব্বেষাং প্রতিরূপধৃগুপমানাস্পদং শ্রেষ্ঠঃ খল্বিত্যর্থঃ॥

২২। মদঙ্গস্পর্শনেন সর্ব্বশঃ পূতস্তু তে পিতুঃ পাপশঙ্কৈব নাস্তি, কেবলং পুত্রকৃত্যানি প্রেতকার্য্যাণি কুরু॥

২৩। ব্রহ্মবাদিভির্বেদবাদিভিরুক্তমনতিক্রম্য মৎপরঃ সন্ কর্ম্মাণি কুরু॥

২৭। মম সৃষ্টিভির্ময়া সৃষ্টৈর্ভূতৈঃ সমস্তান্ নিগমান্ ধর্ম্মানিত্যর্থঃ, অহন্ হতবান্; স ত্বয়া নিহত এতদ্দিষ্ট্যা ভদ্রম্॥

২৮। সমিতঃ সম্যক্ প্রাপ্তঃ॥

২৯। সর্ব্বতঃ সম্যক্ত্রাসাৎ[১]। গোপ্তৃ রক্ষকম্॥

৩০। এবং বরস্ত্বয়া ন প্রদেয়ঃ; ক্রূরো নিসর্গঃ স্বভাবো যেষাম্; অমৃতম্—ক্ষীরম্॥

৩৫—৪১। শিশুপালদন্তবক্রয়োর্দ্বিষতোঃ শ্রীকৃষ্ণসাযুজ্যং কথমিতি যৎ পৃষ্টম্, তদেব তয়োঃ পূর্ব্বজন্মকথনাদিভিরুপপাদিতমুপসংহরতি—এবমিতি সপ্তভিঃ। (৩৫—৩৬) দিতেঃ পুত্রত্বং প্রাপিতৌ, বিপ্রশাপেনেত্যন্তরস্থানুষঙ্গঃ॥ (৩৭) তচ্চিত্তৌ শ্রীরামং চিন্তয়ন্তৌ[২]॥ (৩৮) করূষজো দন্তবক্রঃ; হরৌ সাযুজ্যং সমীয়তুঃ, যোগাদিসাধনং বিনৈব সম্যগীয়তুঃ॥ (৩৯) শ্রীকৃষ্ণনিন্দাদিনা পূর্ব্বকৃতঞ্চ যদেনঃ পাপং তদ্ধ্যানেন তদাত্মনঃ সন্তো জহুঃ; তদাত্মত্বে দৃষ্টান্তঃ—কীটঃ পেশস্কৃতো ধ্যানেন যথা তদাত্মা ভবতীতি॥ (৪০) অভিদা ভেদদর্শনশূন্যয়া; হরেঃ সাত্ম্যং সারূপ্যম্॥

১। সন্ত্রাসাৎ (ঘ); ২। শ্রীরামে চিত্তং যয়োস্তৌ (ঘ)।

৪২—৪৫। প্রহ্লাদচরিতার্থমুপসংহরতি—এষেতি চতুর্ভিঃ। (৪২) অবতারঃ শ্রীনৃসিংহরূপঃ, তস্য কথা আখ্যাতেতি শেষঃ॥ (৪৩—৪৫) প্রহ্লাদস্যানুচরিতমিত্যাদেঃ সমাম্নাতমিতি তৃতীয়েনান্বয়ঃ। (৪৩) অস্যেত্যনেনোক্তং স্বর্গস্থিত্যপ্যয়ানামীশস্য হরের্যাথার্থ্যং[১] তত্ত্বম্, অনেন কৃতং হরেগুর্ণকর্ম্মানুবর্ণনঞ্চেত্যর্থঃ॥ (৪৪) পরাবরেষাং দেবদৈত্যাদীনাং যানি স্থানানি, তেষাং ব্যত্যয়ো বিপর্য্যাসঃ॥ (৪৫) আধ্যাত্মিকমাত্মানাত্মবিবেকাদি॥

৪৬—৪৭। এতচ্ছ্রবণাদিফলমাহ—য ইতি দ্বাভ্যাম্। (৪৬) এতচ্ছ্রুত্বা যঃ কীর্ত্তয়েৎ॥ (৪৭) এতদেতাং মৃগেন্দ্রস্যেব লীলাম্; তামেবাহ—দৈত্যেন্দ্রস্য যূথপানাঞ্চ বধং যঃ শুচিঃ সন্ পঠেত। পুণ্যমনুভাবং প্রভাবং মতিনিশ্চয়ং বা। লোকম্—বৈকুণ্ঠম্॥

৪৮—৫০। অহো প্রহ্লাদস্য ভাগ্যম্, যেন দেবো দৃষ্টঃ, বয়ন্তু মন্দভাগ্যা ইতি বিষীদন্তং তং প্রত্যাহ—যূয়মিতি ত্রিভিঃ। (৪৮) যেষাং যুষ্মাকং গৃহান্ মুনয়োঽভিযন্তি সর্ব্বতঃ সমায়ান্তি। তৎ কস্য হেতোঃ? যেষু গৃহেষু নরাকারং গূঢ়ং সৎ শ্রীকৃষ্ণাখ্যং পরং ব্রহ্ম সাক্ষাদ্ বসতীতি॥ (৪৯) নন্বু কৃষ্ণোঽস্মাকং মাতুলেয়ঃ, কথং ব্রহ্মেত্যুচ্যতে? তত্রাহ—স বেতি; সোঽয়ং ব্রহ্মৈব। কথম্ভূতঃ? মহদ্ভির্বিমৃগ্যং যৎ কৈবল্যনির্ব্বাণসুখং নিরুপাধিঃ পরমানন্দস্তদনুভূতিরূপো বো যুষ্মাকং খলু প্রিয়ঃ সুহৃদিত্যাদিরূপো ভবতি; বিধিকৃৎ—আজ্ঞানুবর্ত্তী॥ (৫০) নন্বু পরং ব্রহ্ম চেৎ, কথং দ্ব্যষ্টসহস্রস্ত্রীষু রতিঃ, কথং বা ধর্ম্মাদ্যাচরণং তস্য? ইত্যত আহ—ন যস্যেতি, যস্য রূপং তত্ত্বং ভবাদিভিরপি ধিয়া স্ববুদ্ধ্যা বস্তুতয়া ইদমিত্থমিতি সাক্ষান্নোপবর্ণিতম্, স যুষ্মাকং স্বয়মেব প্রসন্নঃ; অস্মাকন্তু মৌনাদিসাধনৈস্তৎপ্রসাদঃ প্রার্থনীয় এবেত্যাহ—মৌনেনেতি। স এষ সাত্বতাং পতির্নঃ প্রসীদতু। ন হি প্রহ্লাদস্য গৃহেষু পরং ব্রহ্ম বসতি, ন চ তদ্দর্শনায় মুনয়স্তদ্গৃহানভিযন্তি,

১। -র্যাথাত্ম্যং (ম)।

ন চ তস্য ব্রহ্ম মাতুলেয়াদিরূপেণ বর্ত্ততে, ন চ স্বয়মেব প্রসন্নম্, অতো যূয়মেব ততোঽপ্যস্মত্তোঽপি ভূরিভাগ্যা ইতি ভাবঃ॥

৫১। নন্বৈন্দ্রং ষ্করং ত্রিপুরভেদাদিকং শ্রীরুদ্রঃ কৃতবান্, স এবম্ভূত ঈশ্বরোঽপ্যস্য তত্ত্বং ন জানাতীতি কথম্? ইত্যপেক্ষায়াং তস্যাপ্যেতৎ-সাহায্যাদেবাসৌ প্রভাবো ন কেবলস্যেতি বক্তুমাখ্যানমুপক্ষিপতি—স এষ ইতি॥

৫২। রাজা যুধিষ্ঠির উবাচ। জগদীশিতুর্দেবস্য কীর্ত্তিং কস্মিন্ কর্ম্মণি ময়ো হৃতবান্॥

৫৩। অনেন শ্রীকৃষ্ণেনোপবৃংহিতৈঃ সংবর্দ্ধিতৈঃ॥

৫৪। হৈমী চ রৌপ্যা চ আয়সী চেতি তিস্রঃ পুরো নির্ম্মায় তেভ্যো দদাবিতি শেষঃ। দুর্লক্ষ্যাবপায়সংযোগৌ গমনাগমনে যাসাম্; দুর্ব্বিতর্ক্যাঃ পরিচ্ছদা যাসু॥

৫৫। অসুরাণাং সেনান্যঃ সেনাপতয়ঃ পূর্ব্ববৈরং স্মরন্তঃ॥

৫৭। অস্ত্রমভিমন্ত্রিতং শরং পুরেষু ব্যমুঞ্চত॥

৫৮। ততঃ শরাৎ সূর্য্যমণ্ডলান্ময়ূখসন্দোহা রশ্মিসমূহা ইব; যতো যেভ্যঃ॥

৫৯। কূপরসে স্বয়ং নির্ম্মিতে কূপামৃতে॥

৬০। বজ্রসারা বজ্রবদ্দৃঢ়াঙ্গা মহৌজসো মহাবলা মেঘদলনা মেঘ-ভেদিনো বিদ্যুদ্রূপা বহ্নয় ইব॥

৬২। কালে—মধ্যাহ্নে॥

৬৪। আত্মনো বান্যস্য বা দ্বয়োরপি বা দৈবেন দিষ্টমুপকল্পিতম্, অপোহিতুং পরিহর্ত্তুমিহ কশ্চিদপীশ্বরঃ সমর্থো নাস্তি॥

৬৫। অসৌ শ্রীকৃষ্ণঃ; প্রধনং সংগ্রামস্তৎসাধনম্॥

৬৭। অভিজিতি—মধ্যাহ্নে॥

৬৮। বিমানশতানি সঙ্কুলানি সংকীর্ণানি যেষাং তে দেবাদয়ঃ ॥

৭০। আদিতঃ আরভ্য স্কন্ধান্তং নিগময়তি—এবংবিধানীতি। নৃলোকং নরাকারম্ ; আত্মনো বিড়ম্বমানস্যানুকুর্ব্বতঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে

দশমোঽধ্যায়ঃ ॥ ১০ ॥

একাদশোঽধ্যায়ঃ

তদেবং দশভির্জ্ঞানভক্তিযোগাবুদীরিতৌ ।

অথ পঞ্চভিরধ্যায়ৈঃ কর্ম্মযোগোঽনুবর্ণ্যতে ॥ (১)

একাদশে নৃণাং ধর্ম্মাঃ সাধারণ্যেন বর্ণিতাঃ ।

বিশেষেণ চ বর্ণানাং মুখ্যা মুখ্যাশ্চ যোষিতাম্ ॥ (২)

১। দৈত্যপতেঃ প্রহ্লাদস্য, সাধূনাং সভাসু সভাজিতং সৎকৃতম্, ঈহিতং চরিতং শ্রুত্বা পুনর্নারদং পপ্রচ্ছ। কথম্ভূতস্যেহিতম্ ? মহত্তমানামগ্রণ্যো মুখ্যস্য। তত্র হেতুঃ —উরুক্রম আত্মা মনো যস্য ॥

২। শ্রবণেচ্ছায়াং হেতুঃ —যদ্ যতো ধর্ম্মাদনুষ্ঠিতাৎ পরং জ্ঞানং ভক্তিঞ্চ বিন্দতে ॥

৪। ননু স্মৃতিকারৈর্ধর্ম্ম উক্ত এব ? তত্রাহ—নারায়ণপরা ইতি ॥

৫। অজায়—শ্রীনারায়ণায়। তস্যৈব মুখাচ্ছ্রুতম্ ॥

৬। তন্মুখাদাত্মনঃ শ্রবণং সম্ভাবয়ন্ বিশিনষ্টি—য ইতি ॥

৭। প্রথমং তাবদ্ধর্ম্মে প্রমাণমাহ—ধর্ম্মেতি ; ধর্ম্মস্য মূলং প্রমাণম্, স্মৃতঞ্চ স্মৃতিঃ, তদ্বিদাং বেদবিদাম্, যেন ধর্ম্মেণ চাত্মা মনঃ প্রসীদতি তুষ্যতি

চ; তথা চ যাজ্ঞবল্ক্যঃ —'শ্রুতিঃ স্মৃতিঃ সদাচারঃ স্বস্য চ প্রিয়মাত্মনঃ। সম্যক্ সঙ্কল্পজঃ কামো ধর্ম্মমূলমিদং স্মৃতম্ ॥' ইতি; মনুশ্চ—'বেদোঽখিলো ধর্ম্মমূলং স্মৃতিশীলে চ তদ্বিদাম্। আচারশ্চৈব সাধূনামাত্মনস্তুষ্টিরেব চ ॥' ইতি ॥

৮—১২। তত্র তাবন্নরমাত্রসাধারণং ধর্ম্মমাহ—সত্যমিতি পঞ্চভিঃ। (৮) তপ একাদশ্যুপবাসাদি, ঈক্ষা যুক্তাযুক্তবিবেকঃ, শমো মনসঃ সংযমঃ, দমো বাহ্যেন্দ্রিয়াণাম, ত্যাগো দানম্, স্বাধ্যায়ো যথোচিতজপঃ ॥ (৯) সন্তোষো দৈবলব্ধেনালংবুদ্ধিঃ, সমদৃশাং মহতাং সেবা, গ্রাম্যেহোপরমঃ প্রবর্ত্তক[১]-কর্ম্মভ্যো নিবৃত্তিঃ, বিপর্য্যয়েহেক্ষা নিষ্ফলক্রিয়াণামীক্ষণম্, মৌনং বৃথালাপ-নিবৃত্তিঃ, আত্মবিমর্শনং দেহাদিব্যতিরিক্তাত্মানুসন্ধানম্ ॥ (১০) আত্মেতি দেবতেতি চ বুদ্ধিঃ ॥ (১১) অস্য শ্রীকৃষ্ণস্য শ্রবণাদয়ো নব; ইজ্যা—অর্চ্চনম্ ॥ (১২) এবং ত্রিংশল্লক্ষণবান্ ॥

১৩। ইদানীং বর্ণধর্ম্মান্ বক্তুং দ্বিজানাং লক্ষণমাহ—সংস্কারা মন্ত্রবন্তো গর্ভাধানাদয়ো যস্মিন্নবিচ্ছিন্নাঃ, স দ্বিজঃ। তর্হি শূদ্রস্যাপি সংস্কারাবিচ্ছেদে সতি দ্বিজত্বং স্যাৎ? তত্রাহ—অজো ব্রহ্মা যমেবম্ভূতসংস্কারযুক্তং জগাদ, স দ্বিজঃ; শূদ্রস্তু ন মন্ত্রবৎসংস্কারযুক্তং জগাদ, ন চোপনয়নবন্তম্, অতো নাসৌ দ্বিজঃ; তথা চ স্মৃতিঃ—'বিবাহমাত্রং সংস্কারং শূদ্রোঽপি লভতাং সদা। ন কেনচিৎ সমসৃজচ্ছন্দসা তং প্রজাপতিঃ॥' ইতি; শ্রুতিশ্চ—'গায়ত্র্যা ব্রাহ্মণমসৃজৎ, ত্রিষ্টুভা রাজন্যম্, জগত্যা বৈশ্যম্, ন কেনচিৎ শূদ্রম্' ইতি; অতো বিবাহব্যতিরিক্তসংস্কারস্যানাবশ্যকত্বাদুপনয়নস্য তু সর্ব্বথা নিষেধাৎ, ন তস্য দ্বিজত্বমিত্যর্থঃ। বৈদিকা ইতি পাঠে বৈদিকা গর্ভাধানাদয় ইত্যর্থঃ। ত্রৈবর্ণিকানামাবশ্যকান্ ধর্ম্মানাহ—ইজ্যেতি। জন্মনা বিশুদ্ধেন কুলেন, কর্ম্মণা চাচারেণ, অবদাতানাং শুদ্ধানাম্; দ্বষ্কুলানাং

১। প্রবৃত্ত- (ঘ)।

ভুরাচারাণাঞ্চ, নৈতানি বিহিতানীত্যর্থঃ। ব্রহ্মচর্য্যাদ্যাশ্রমবিহিতাঃ ক্রিয়াশ্চ। শূদ্রস্য তু বর্ণধর্ম্ম এব, আশ্রমভেদকৃতবিশেষাভাবাৎ॥

১৪—২০। ব্রাহ্মণাদীনাং চতুর্ণামপি বৃত্তিরূপান্ ধর্ম্মানাহ—বিপ্রস্যেতি সার্দ্ধৈঃ সপ্তভিঃ। (১৪) বিপ্রস্য ষট্ কর্ম্মাণি বিহিতানীত্যনুষঙ্গঃ। তত্র ত্বধ্যাপনং যাজনং প্রতিগ্রহশ্চ জীবিকাঃ; যথাহ মনুঃ —'ষণ্নাস্তু কর্ম্মণামস্য ত্রীণি কর্ম্মাণি জীবিকাঃ। যাজনাধ্যাপনে চৈব বিশুদ্ধাচ্চ প্রতিগ্রহঃ॥' ইতি। অন্যস্য ক্ষত্রিয়স্যাপ্রতিগ্রহ ইতি। প্রতিগ্রহাতিরিক্তং যাজনমধ্যাপনঞ্চানাপত্যনু[১]জানাতি বক্ষ্যতি চানন্তরমেব 'ঋতে রাজন্যম্' ইতি। শ্রূয়তে চাশ্বপতিকৈকেয়প্রভৃতীনাং ক্ষত্রিয়াণামুপদেষ্টৃত্বাদি। প্রজাপালনেঽধিকৃতস্য ক্ষত্রিয়স্য বৃত্ত্যন্তরমাহ—রাজ্ঞ ইতি। 'আদি' শব্দেন দণ্ডশুল্কাদি॥ (১৫) বার্ত্তা কৃষিবাণিজ্যাদিলক্ষণা বৃত্তির্যস্য সঃ; শূদ্রস্য দ্বিজানাং শুশ্রূষা বিহিতা, স্বামিনো দ্বিজস্য শুশ্রূষা বৃত্তিশ্চ ভবেৎ॥ (১৬) বিপ্রস্য মুখ্যানুকল্পভেদেন বৃত্ত্যন্তরাণ্যাহ—বার্ত্তেতি; বার্ত্তা বিচিত্রা কৃষ্যাদিরূপা, শালীনং ধার্ষ্ট্যং বিনৈব প্রাপ্তমযাচিতম্, যাযাবরং প্রত্যহং ধান্যযাচ্ঞা, শিলং শালিক্ষেত্রাদৌ স্বামিত্যক্তকণিশোপাদানম্, উঞ্ছনমাপণাদিপতিতকণোপাদানম্, শিলোঞ্ছনদ্বয়মেকীকৃত্য চতুর্দ্ধেত্যুক্তম্। শ্রেয়সী—উত্তমা॥ (১৭) বৃত্তিষ্বেব ব্যবস্থাং দর্শয়ন্নাপদ্বৃত্তিরাহ—জঘন্যো নীচঃ উত্তমামধ্যাপনাদিরূপাম্; ঋতে রাজন্যম্, ক্ষত্রিয়স্য প্রতিগ্রহাদন্যাং ভজেৎ॥ (১৮) চতুর্ব্বিধাং পূর্ব্বোক্তাং বিপ্রবৃত্তিমিতরেষামপি দর্শয়ন্নাহ—ঋতামৃতাভ্যামিতি॥ (১৯) শ্লোকং ব্যাচষ্টে—ঋতমিতি॥ (২০) তয়োস্তদ্বর্জ্জনে হেতুমাহ—সর্ব্ববেদময় ইতি॥

২১—২৪। বর্ণানামভিব্যঞ্জকরূপান্ ধর্ম্মানাহ—শম ইতি চতুর্ভিঃ। (২১) অচ্যুতাত্মত্বং শ্রীবিষ্ণুপরত্বম্॥ (২২) শৌর্য্যং যুদ্ধোৎসাহঃ, বীর্য্যং

১। অধ্যাপনঞ্চাপত্যনু- (ঘ)।

প্রভাবঃ, তেজঃ প্রাগল্‌ভ্যম্, ত্যাগো দানম্, আত্মনো মনসো জয়ঃ ॥ (২৪) অমন্ত্রযজ্ঞঃ—নমস্কারেণৈব পঞ্চযজ্ঞানুষ্ঠানম্; তথা চ যাজ্ঞবল্ক্যঃ—'নমস্কারেণ মন্ত্রেণ পঞ্চযজ্ঞান্ন হাপয়েৎ' ইতি ॥

২৫—২৯। স্ত্রীধর্ম্মানাহ—স্ত্রীণামিতি পঞ্চভিঃ। (২৫) পতিরেব দেবো যাসাম্, তস্য পত্যুরেব শুশ্রূষা, পাদসংবাহনাদিভিস্তদনুকূলতা চ, হিতাচরণম্, তস্য যদ্‌ব্রতং নিয়মস্তস্য ধারণমাচরণম্—এতচ্চতুষ্টয়ং পতিব্রতানাং লক্ষণং ধর্ম্মশ্চ ॥ (২৬—২৮) কিঞ্চ, সংমার্জ্জনোপলেপাভ্যামিত্যাদেঃ পতিং ভজেদিত্যুত্তরেণান্বয়ঃ। (২৬) পরিমৃষ্টোদ্বর্ত্তনাদিনা নির্ম্মলীকৃতাঃ পরিচ্ছদা গৃহোপকরণানি যয়া ॥ (২৮) কিঞ্চ, সন্তুষ্টা যথা-লাভেন তাবন্মাত্রেঽপি ভোগেঽলোলুপা, দক্ষা অনলসা, প্রিয়া সত্যা চ বাক্ যস্যাঃ; সর্ব্বত্রাপ্যপ্রমত্তাবহিতা। অপতিতং মহাপাতকশূন্যম্, যথাহ যাজ্ঞবল্ক্যঃ—'আ শুদ্ধেঃ সংপ্রতীক্ষ্যো হি মহাপাতকদূষিতঃ' ইতি ॥ (২৯) তৎপরা সতী ভজেচ্ছ্রীর্হরিমিব; হর্য্যাত্মনা পত্যা সহ ॥

৩০। প্রতিলোমজানুলোমজানাং বৃত্তিমাহ—বৃত্তিরিতি। তত্তৎকুলকৃতা কুলপরম্পরা প্রাপ্তা; পরম্পরাপ্রাপ্তমপি চৌর্য্যং হিংসাদিকঞ্চ নিষেধতি[১]—অচৌরাণামপাপানাঞ্চেতি। তত্তৎপ্রদর্শনার্থং কাংশ্চিৎ প্রতিলোমজবিশেষানাহ—অন্ত্যজেতি; 'রজকশ্চর্ম্মকারশ্চ নটো বরুড় এব চ। কৈবর্ত্তমেদভিল্লাশ্চ সপ্তৈতে অন্ত্যজাঃ স্মৃতাঃ ॥' অন্তেবসায়িনশ্চ চণ্ডালপুক্কশমাতঙ্গাদয়ঃ, তেষাং পরম্পরয়া প্রাপ্তৈব বস্ত্রনির্ণেজনাদিবৃত্তিরিত্যর্থঃ ॥

৩১। শ্রেষ্ঠাদপি পরধর্ম্মান্নীচোঽপি স্বধর্ম্ম এব শ্রেয়ানিত্যাহ—প্রায় ইতি। স্বভাবেন সত্ত্বাদিপ্রকৃত্যা বিহিতো ধর্ম্মঃ শর্ম্মকৃৎ সুখহেতুঃ স্মৃতঃ। কৈঃ? বেদ এব দৃক্ চক্ষুর্যেষাং তৈঃ; ভগবতা চোক্তং গীতাসু—'শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ' ইতি ॥

১। প্রতিষেধতি (ঘ)।

৩২। ননু স্বাভাবিকস্য কর্ম্মণো বন্ধহেতুত্বাৎ কথং সুখহেতুত্বম্? তত্রাহ—বৃত্ত্যেতি ॥

৩৩—৩৪। ননু কাম্যানি কর্ম্মাণি কুর্ব্বতস্তৎফলোপভোগপরস্য কথং নৈর্গুণ্যং স্যাৎ? তদুক্তং প্রহ্লাদেন—'ঔপস্থ্যজৈহ্ব্যং বহু মন্যমানঃ' ইত্যাদি। তত্রাধিকারিভেদেন ব্যবস্থাং সদৃষ্টান্তমাহ—উপ্যমানমিতি দ্বাভ্যাম্। (৩৩) পুনঃ সূত্যৈ শস্যপ্রসবায় ॥ (৩৪) কামা আশেরতে বাসনারূপেণ যস্মিন্ তৎ। অয়ং ভাবঃ—উৎকটবাসনাবিশিষ্টস্য[1] সহসৈব কামত্যাগাসম্ভবাদ্ বেদোক্তনিয়মেন বহুশঃ কামান্ ভুঞ্জানস্যৈবং নিত্যনৈমিত্তিকৈর্বিশুদ্ধচেতসস্তদ্দোষদর্শনেন যযাতিসৌভরিপ্রমুখানামিব শনৈর্ব্বিরাগো ভবতি। যথা সবীর্য্যং ক্ষেত্রং নির্ব্বীর্য্যং শনৈর্ভবতি; যথা চ প্রজ্বলিতোঽগ্নির্ন ঘৃতবিন্দুভিঃ শাম্যতি, মহতা ঘৃতপূরেণ তু শাম্যত্যেব, তদ্বৎ। প্রহ্লাদকৃতস্তত্তৌ কৌমার এব নিবৃত্ত্যুপদেশো মন্দবাসনানামধিকারে ন; তদুক্তং তত্রৈব—'বালা অদূষিতধিয়ো দ্বন্দ্বারামেরিতেহিতৈঃ' ইতি; অতঃ সর্ব্বমনবদ্যম্ ॥

৩৫। শমাদিভিরেব ব্রাহ্মণাদিব্যবহারো মুখ্যঃ, ন জাতিমাত্রাদিত্যাহ—যস্যেতি। যদ্ যদি, অন্যত্র বর্ণান্তরেঽপি দৃশ্যেত, তদ্বর্ণান্তরং তেনৈব লক্ষণনিমিত্তেনৈব বর্ণেন বিনির্দ্দিশেৎ, ন তু জাতিনিমিত্তেনেত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
একাদশোঽধ্যায়ঃ ॥ ১১ ॥

১। -বাসনাবিষ্টস্য (ঘ)।

দ্বাদশোঽধ্যায়ঃ

দ্বাদশে বর্ণ্যতে ধর্ম্মো ব্রহ্মচারিবনস্থয়োঃ।
চতুর্ণামাশ্রমাণাঞ্চ সাধারণ্যেন কশ্চন ॥ (১)

১—২। বর্ণাদীনাং ধর্ম্মা উক্তাঃ, ইদানীমাশ্রমধর্ম্মা উচ্যন্তে। তত্রাস্মিন্ দ্বাদশেঽধ্যায়ে ব্রহ্মচারি-বানপ্রস্থয়োরসাধারণাশ্চতুর্ণাং সাধারণাশ্চোচ্যন্তে। ত্রয়োদশে যতের্ধর্ম্মাশ্চতুর্দ্দশে গৃহস্থস্য, পঞ্চদশে সর্ব্বধর্ম্মসারসংগ্রহঃ। (১) ব্রহ্মচারী গুরুকুলে বসন্ গুর্ব্বাদীনুপাসীতেত্যুত্তরেণান্বয়ঃ ॥ (২) তানাহ—সায়মিতি। ব্রহ্মগায়ত্রীং জপন্ সন্ধ্যাত্রয়মপ্যুপাসীত, উভে সন্ধ্যে তু যত-বাগ্ ভবেৎ, সায়ংপ্রাতঃ সন্ধ্যাকালনিমিত্তং মৌনং কুর্য্যাদিত্যর্থঃ ॥

৩। উপক্রমে—আদৌ, অবসানে—অন্তে, গুরোশ্চরণৌ প্রণমেৎ ॥

৪। যথোদিতমিতি, 'পালাশো দণ্ডো ব্রাহ্মণস্য' ইত্যাদি-নিয়মমনতি-ক্রম্য ; জটাধারণন্তু কেশপ্রসাধনাভাবমাত্রম্ ॥

৬। যাবদর্থম্—যথোপযোগমাত্রমেব ॥

৭। বৃহদ্ব্রতো ব্রহ্মচর্য্যবান্, গৃহস্থব্যতিরিক্তঃ সর্ব্বোঽপি প্রমদাগাথাং বর্জ্জয়েৎ। তত্র হেতুঃ —ইন্দ্রিয়াণি বলবন্তি সংযতস্যাপি মনো হরন্তীতি ॥

৯। ন কারয়েদিত্যত্র হেতুঃ —নন্বিতি। রহ একান্তে, অন্যদা কেশ-প্রসাধনাদিব্যতিরিক্তাবসরে অনেকান্তাবসরে বা যাবদর্থং তদুক্তং কুর্য্যাৎ ॥

১০। ননু মিথ্যাত্বাদতিকশ্মলত্বাচ্চ স্বয়ংত্যক্তপ্রায়ং স্ত্র্যাদি জহ্যাদিতি কোঽয়মতিনির্ব্বন্ধঃ ? তত্রাহ—কল্পয়িত্বেতি। আত্মনা স্বরূপসাক্ষাৎকারে-ণেদং দেহেন্দ্রিয়াদিকমাভাসমাত্রং কল্পয়িত্বা নিশ্চিত্য, যাবদসৌ জীব ঈশ্বরঃ স্বতন্ত্রো ন ভবেৎ, তাবদ্ দ্বৈতম্, 'অহং পুমানিয়ং স্ত্রী' ইতি ভেদো ন বিরমেৎ। ততঃ কিম্ ? অত আহ—ততো হি দ্বৈতাদ্বিপর্য্যয়ঃ —গুণা-ধ্যাসেন ভোগ্যতাবুদ্ধিঃ ; অতো জহ্যাদেবেত্যর্থঃ ॥

১১। এতৎ সর্ব্বং সুশীল ইত্যাদ্যুক্তং গৃহস্থস্ত বিশেষমাহ—গুরু-বৃত্তিরিতি ॥

১২। অঞ্জনাদীনামামিষান্তানাং দ্বন্দ্বৈক্যম্। অঞ্জনং শরীরস্ত, অভ্যঞ্জনং শিরসঃ, স্ত্রিয়শ্চাবলেখাশ্চ চিত্রকর্ম্ম স্ত্রীণাং কুড্যাদৌ লেখনং বা তন্নিরীক্ষণং বা। অত্রাভ্যঙ্গাদি স্বরূপতো নিষিধ্যতে, পূর্ব্বন্তু কথঞ্চিদাপদি প্রাপ্তমপি স্ত্রীকর্ত্তৃকং নিষিদ্ধমিতি ভেদঃ ॥

১৩। অঙ্গৈঃ শিক্ষাদিভিরুপনিষদ্ভিশ্চ সহিতাং বেদত্রয়ীমধীত্যাববুধ্য চ তদর্থঞ্চ বিচার্য্য। যাবদর্থম্—স্বাধিকারানুসারেণ ॥

১৪। যদীশ্বরঃ শক্তস্তর্হি গুরোঃ কামমপেক্ষিতং বরং দত্ত্বা যথাধিকারং গৃহস্থাদ্যাশ্রমং স্বীকুর্য্যাৎ, তত্রৈব বা বসেন্নৈষ্ঠিকঃ স্যাদিত্যর্থঃ ॥

১৫। স্বধামভিঃ স্বাশ্রয়ৈর্ভূতৈর্জীবৈঃ সহিতং নিয়ন্তৃতয়া ॥

১৬। চরন্—এবমাচরন্; বিদিতং বিজ্ঞানং বিজ্ঞেয়ং যেন সঃ ॥

১৭। ঋষিলোকম্—মহর্লোকম্ ॥

১৮। অকৃষ্টম্, অকৃষ্টপচ্যম্, অকালতঃ পাককালাৎ পূর্ব্বমেব নিষ্পন্ন-মিত্যর্থঃ; অর্কপক্বং ফলাদি আহরেদশ্নীয়াৎ ॥

১৯। বন্যৈর্নীবারাদিভিশ্চরুপুরোডাশান্ কালচোদিতান্ নিত্যান্; পুরাণং পূর্ব্বসঞ্চিতম্ ॥

২০। হিমাদীন্ সহত ইতি তথা ॥

২১। কেশাদীন্ মলঞ্চাপ্রক্ষালনেন ধারয়ন্, কমণ্ডল্বাদীংশ্চ দধৎ ॥

২২। কৃচ্ছ্রতঃ—তপঃক্লেশাৎ। যথা বুদ্ধির্ন নশ্যেৎ, তথা চরেৎ। দ্বাদশাব্দাদ্যনন্তরমপি যদি স্বধর্ম্মানুষ্ঠানে শক্তস্তর্হি বন এব বসেৎ। যদি তু জ্ঞানাভ্যাসযোগ্যস্তর্হি সংন্যসেৎ, ইত্যুত্তরাধ্যায়ে বক্ষ্যতি ॥

২৩। তদুভয়রহিতস্য যৎ কৃত্যং তদাহ—যদাকল্পোঽসমর্থঃ; আন্বী-ক্ষিক্যাং বিদ্যায়াং জ্ঞানাভ্যাসে ॥

২৪—৩১। অনশনাদি করিষ্যতঃ পূর্ব্বকৃত্যমাহ—আত্মনীত্যাদি যাবৎ-সমাপ্তি। (২৪) যথার্হতো যথাযোগ্যং স্বকারণেষ্বাকাশাদিষু সংঘাতং দেহং ন্যসেৎ প্রবিলাপয়েৎ॥ (২৫) তদেব বিভজ্য দর্শয়তি—খে আকাশে, খানি দেহগতচ্ছিদ্রাণি; আত্মবান্—ধীমান্; শেষম্—অস্থি-মাংসাদিকঠিনাংশম্॥ (২৬) এবং স্থূলশরীরস্য লয়মুক্ত্বা লিঙ্গশরীররূপ-স্যাধ্যাত্মাদিত্রয়স্য লয়মাহ—বাচমিত্যাদিনা। তত্র যদ্যপি যথোদ্ভবং লয়স্য যুক্তত্বাদধ্যাত্মাদীনাং স্বস্বকারণেষু রাজসাহঙ্কারাদিষু লয়ো বাচ্যঃ, তথাপীহ তেষাং লয়ভাবনেয়মদ্বিতীয়াত্মপ্রতিপত্তিপরেতি যথাকথঞ্চিল্লয়ে ভাব্যে দেবতানাং প্রবর্ত্তকত্বেন প্রাধান্যাদিন্দ্রিয়-তদ্বিষয়য়োর্দেবতাসু লয়ঃ কথ্যতে। বক্তব্যসহিতাং বাচমগ্নৌ ন্যসেৎ, এবং সর্ব্বত্র; পদানি পাদৌ, বয়সি বিষ্ণৌ॥ (২৭) সনাদেন শব্দেন সহ, অধ্যাত্মনি বায়ৌ; অধ্যাত্মবিদিতি পাঠে বায়াবিতি জ্ঞাতব্যম্॥ (২৮) জ্যোতিষি—আদিত্যে; রসগন্ধয়োস্ত্বিন্দ্রিয়া-দ্যাকর্ষকত্বেন প্রাধান্যবিবক্ষয়া দেবতাসহিতস্যেন্দ্রিয়স্য বিষয়ে লয়মাহ। প্রচেতসা সহ জিহ্বাং রসনমপ্সু রসরূপাসু; 'ঘ্রাণ'-শব্দেনাশ্বিনোরপ্যুপ-লক্ষণম্, অশ্বিভ্যাং সহ ঘ্রাণং ঘ্রেয়ৈর্গন্ধৈরুপলক্ষিতায়াং ক্ষিতাবিত্যর্থঃ॥ (২৯) পরে কবৌ ব্রহ্মণি; অধ্যাত্মনাহঙ্কারেণ; অধ্যাত্মতামিতি পাঠে কর্ম্মাণ্যহঙ্কারঞ্চেত্যর্থঃ। কথম্ভূতে রুদ্রে? যদ্‌যস্মাদহংমমতাপূর্ব্বিকা ক্রিয়া ভবতি, তস্মিন্। সত্ত্বেন—চেতনয়া; গুণৈর্গুণত্রয়কার্য্যৈঃ প্রাগবশিষ্টৈর্দেবৈঃ সহ; যদ্বা, সত্ত্বাদিভির্গুণৈর্হেতুভূতৈর্বৈকারিকং ভোক্তৃত্বাদিবিকারবন্তং ক্ষেত্রজ্ঞং পরে নির্ব্বিকারে ব্রহ্মণি॥ (৩০) ননু বিকারবতঃ কথং পরেঽ-বিকারে লয়ঃ স্যাৎ? বিকারহেতূনাং সর্ব্বোপাধীনাং লয়দ্বারেণেত্যাহ—অপ্‌স্বিতি। অদো জ্যোতিঃ; তচ্চ নভঃ কূটস্থেঽহংতত্ত্বে; তচ্চ কূটস্থং মহতি মহত্তত্ত্বে; তদব্যক্তে প্রধানে; তচ্চাব্যক্তমক্ষরে পরমাত্মনি॥

(৩১) ইতি সর্ব্বোপাধিলয়াদ্ধেতোরবশেষিতং চিন্মাত্রমাত্মানং ক্ষেত্রজ্ঞমক্ষরতয়া জ্ঞাত্বাদ্বয়ঃ সন্ বিরমেৎ, দগ্ধকাষ্ঠো যথানলঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

ত্রয়োদশোঽধ্যায়ঃ

ত্রয়োদশে যতের্ধর্ম্মঃ সাধকস্তোচ্যতে মহান্।
অবধূতেতিহাসেন সিদ্ধাবস্থা চ বর্ণ্যতে ॥ (১)

১—৯। এবং ধ্যাত্বা কল্পোঽনশনাদিকং[১] কুর্য্যাৎ, আন্বীক্ষিক্যাং কল্পস্ত্বেবং ধ্যাত্বা পরিব্রজেৎেতি সম্বন্ধঃ। কিয়দত্র ত্যাজ্যম্? দেহব্যতিরিক্তং সর্ব্বমিত্যাহ—দেহমাত্রেতি। তস্ত ধর্ম্মানাহ—গ্রামৈকরাত্রেতি নবভিঃ ॥ (২) কৌপীনং গুহ্যমাচ্ছাদ্যতে যাবতা তাবন্মাত্রম্, পরং কেবলম্, অন্যদিতি বা ত্যক্তং প্রৈষোচ্চারণাৎ পূর্ব্বমেব ॥ (৪) সদসতঃ পরে—কার্য্যকারণ-ব্যতিরিক্তে ॥ (৫) নন্বাত্মানং পরং ব্রহ্মেতি কথং সামানাধিকরণ্যনির্দ্দেশঃ, ন হি বদ্ধমুক্তয়োরৈক্যং সম্ভবতি? তত্রাহ—সুপ্তীতি। সুষুপ্তৌ হি তমসাবৃতমাত্মতত্ত্বং জাগ্রৎস্বপ্নয়োস্তু বিক্ষিপ্তং প্রকাশতে, সন্ধৌ তু ন তমো নাপি বিক্ষেপঃ, অতস্তদাত্মদৃগাত্মানং লক্ষীকৃত্য স্থিতঃ সন্নাত্মনো গতিং তত্ত্বং পশ্যন্, অত এব বন্ধং মোক্ষঞ্চ মায়ামাত্রং পশ্যন্নাত্মানং পরং ব্রহ্ম সর্ব্বত্র পশ্যেদিত্যন্বয়ঃ। তদুক্তং যোগগ্রন্থে—'নিদ্রাদৌ জাগরস্যান্তে যো ভাব উপজায়তে। তং ভাবং ভাবয়ন্নিত্যং মুচ্যতে নেতরো যতিঃ॥' ইতি॥ (৬) অস্য দেহস্য প্রভবোঽপ্যয়শ্চ

১। কল্পো নাশনাদিকং (ঘ)।

যস্মাত্তং কালম্ ॥ (৭) অসচ্ছাস্ত্রেষনাত্মপরেষু, জীবিকাং নক্ষত্রবিদ্যাদি-বৃত্তিম্ ; বাদবাদান্—জল্পবিতণ্ডাদিনিষ্ঠান্ ; কঞ্চ কমপি পক্ষং নির্ব্বন্ধেন ন সংশ্রয়েৎ ॥ (৮) শিষ্যান্নানুবধ্নীত প্রলোভাদিনা বলান্নাপাদয়েৎ ; আরম্ভান্—মঠাদিব্যাপারান্ ॥ (৯) তত্র পরমহংসস্য বিশেষমাহ—ন যতেরাশ্রমো ধর্ম্মার্থঃ। কথম্ভূতস্য যতেঃ ? মহাত্মনঃ। তস্য লক্ষণম্—শান্ত-স্যেত্যাদি। 'প্রায়ঃ' ইত্যস্যায়ং ভাবঃ—জ্ঞানোৎপত্তিপর্য্যন্তং বহূদকাদি-লিঙ্গমাশ্রিত্য সত্ত্বশুদ্ধ্যর্থং যমান্নিয়মাংশ্চাচরন্নেব জ্ঞানোৎপত্তৌ যতেত, উৎপন্নে তু জ্ঞানে নিয়মৈর্ন কৃত্যমস্তি, যমাশ্চ স্বত এব স্যুরতএবাস্য তদা লিঙ্গাদিভিঃ প্রয়োজনাভাবাল্লোকসংগ্রহার্থং ধারয়েদ্বা ত্যজেদ্বেতি ॥

১০। তস্যৈব জ্ঞানদার্ঢ্যাভাবে যোগভ্রংশপরিহারার্থমাহ—ন বহি-র্ব্যক্তং লিঙ্গং যস্য ; ব্যক্তোঽর্থঃ প্রয়োজনমাত্মানুসন্ধানং যস্য, স মনীষ্যপ্যু-ন্মত্তবদ্‌বালবচ্চ, কবিরপি মূকবদাত্মানং নৃণাং দৃষ্ট্যা দর্শয়েৎ, তে যথোন্মত্তাদি-রূপং মন্যেরংস্তথা বর্ত্তেত। স্বদৃষ্ট্যেতি পাঠে বাহ্যানুসন্ধানাভাবেনেত্যর্থঃ ॥

১১। পরমহংসধর্ম্মমেবেতিহাসেন স্ফুটয়তি—অত্রাপীতি যাবদধ্যায়-সমাপ্তি। অজগরব্রতস্য মুনেশ্চ ॥

১২। ধরোপস্থে ভূপৃষ্ঠে সহ্যাদ্রেস্তটে। রজোভির্ধূসরৈস্তনূদেশৈর্দেহা-বয়বৈর্নিগূঢ়মমলং তেজো যস্য তম্ ॥

১৪—১৫। কর্ম্মাদিভির্জনা যং ন বিদুস্তং পাদয়োঃ শিরসা স্পৃশন্ নত্বা, অপ্রাক্ষীদিত্যুত্তরেণান্বয়ঃ ॥

১৬—১৮। উদ্যমসহিত ইব ভোগবানিব পীবানং স্থূলং দেহং ধারয়সি, তত্র হেতুং বদেতি তৃতীয়েনান্বয়ঃ ॥ (১৭) উদ্যমং বিনৈব মম ভোগোঽ-স্তীতি চেৎ, তত্রাহ—বিত্তঞ্চেতি ॥ (১৮) 'নু' ইতি নিশ্চয়ে, 'হ' ইতি প্রসিদ্ধৌ, তবার্থো নাস্তীতি প্রসিদ্ধমেবেত্যর্থঃ। যতোঽর্থাদেব, যতো হেতোঃ পীবা ; ক্ষমং যোগ্যঞ্চেৎ ॥

১৯। কিঞ্চ, বিত্তার্জ্জনাত্মসমর্থোঽপ্যয়ং জনস্তদর্থমুদ্যমং করোতি, ত্বন্তু সমর্থোঽপি কিমিতি ন করোষি? ইত্যাহ—কবির্বিদ্বান্, কল্পো দক্ষঃ, নিপুণদৃক্ চতুরঃ, চিত্রাঃ প্রিয়া লোকরঞ্জনাঃ কথা যস্য, তথাপি লোকস্য কর্ম্ম কুর্ব্বতঃ সতঃ শেষে, তদ্বীক্ষিতাপি বা, তত্তৎ সর্ব্বং পশ্যন্নপি; ন দ্বেষি নৌষি বেতি পাঠে ন দ্বেষি, তৎ কর্ম্ম ন দ্বেক্ষি নৌষি বা ন চ স্তৌষীত্যর্থঃ॥

২০। তস্য বাগেবামৃতং তেন যন্ত্রিতো বশীকৃতঃ সন্ প্রাহ॥

২১। অধ্যাত্মচক্ষুষান্তর্দৃষ্ট্যা ভবান্ বেদৈব, আর্য্যাণাং জ্ঞানিনাং সম্মতো ননু ভবানিদমিতি যদুক্তম্, তদেবাহ—নৃণামীহোপরময়োঃ প্রবৃত্তিনিবৃত্ত্যোঃ পদানি স্থানানি ফলানীত্যর্থঃ॥

২২। বেদেতাত্র হেতুঃ—যস্যেতি। হৃদি প্রবিষ্টঃ সন্নজ্ঞানং ধুনোতি নশ্যতীতি, অর্কো যথা বহির্ধ্বান্তম্॥

২৩। যথাশ্রুতমিতি ঔদ্ধত্যপরিহারায়োক্তম্॥

২৪—২৭। লোকঃ কর্ম্মসু প্রবর্ত্ততে, ত্বন্তু নিবৃত্তঃ সন্ শেষ ইতি যদুক্তম্, তত্রাহ—তৃষ্ণয়েতি চতুর্ভিঃ। (২৪) ভবপ্রবাহকারিণ্যা যথোচিতৈরপি বিষয়ৈঃ পূরয়িতুমশক্যয়া তৃষ্ণয়া কর্ম্মসু প্রবর্ত্ত্যমানোঽহং পূর্ব্বং নানাযোনিষু প্রবেশিতঃ॥ (২৫) তয়ৈবং লোকং মনুষ্যদেহং যদৃচ্ছয়াপি প্রাপিতঃ। কথম্ভূতং লোকম্? ধর্ম্মেণ স্বর্গস্য দ্বারং সাধনম্, অধর্ম্মেণ তিরশ্চাঞ্চ শ্বশূকরাদিযোনের্দ্বারম্, মিশ্রাভ্যাং তাভ্যাং পুনরপ্যস্য মনুষ্যত্বস্য দ্বারম্, সর্ব্বতো নিবৃত্ত্যাপবর্গস্য দ্বারমিত্যর্থঃ॥ (২৬) তত্রাপি মনুষ্যত্বেঽপ্যন্থাপনুত্তয়ে দুঃখনিবৃত্ত্যৈ। বিপর্য্যয়ং দৃষ্ট্বা নিবৃত্তোঽস্মি॥ (২৭) ননু প্রবৃত্ত্যা কদাচিৎ সুখং স্যাৎ, নিবৃত্ত্যা তু কিং স্যাদিতি চেৎ, তত্রাহ—সুখমস্য জীবস্য স্বরূপমেব। তর্হি কিং ন প্রকাশতে? তত্রাহ—সর্ব্বেতি। তনোতীতি তনুঃ সর্ব্বক্রিয়ানিবৃত্তৌ স্বত এব প্রকাশত ইত্যর্থঃ। ভোগাংশ্চ মনঃসংস্পর্শজান্ মনোরথমাত্রজানশাশ্বতান্ দৃষ্ট্বা স্বপস্যামি নিরুদ্ধমোঽস্মীত্যর্থঃ।

তর্হি কদাচিৎ কথং ভুজ্ক্তে[১] ? তত্রাহ—সংবিশন্ প্রারব্ধভোগান্ ভুঞ্জান ইত্যর্থঃ ॥

২৮। এবঞ্চেৎ, কোঽপি সংসারং ন প্রাপ্নুয়াৎ ? তত্রাহ—ইত্যেতদাত্মনঃ সুখাত্মকং রূপং স্বস্মিন্নেব সন্তং স্বার্থং পুরুষার্থং বিস্মৃত্য ; অসত্যপি দ্বৈতে ॥

২৯। এতদেব দৃষ্টান্তেন যোজয়তি[২]—জলমিতি। তদুদ্ভবৈস্তৃণশৈবালাদিভিঃ ; জলকাম্যয়া জলেচ্ছয়া ; স্বত আত্মস্বরূপাদন্যত্র পুরুষার্থং পশ্যন্ ॥

৩০—৩৪। এবং স্বস্য নিরুদ্যমত্বে কারণমুক্ত্বা বিপর্য্যয়ং দৃষ্ট্বেতি যদুক্তং তদ্বিবৃণোতি—দেহাদিভিরিতি পঞ্চভিঃ। (৩০) ঈহত ইচ্ছতঃ, অনীশস্য নির্দ্দৈবস্য পুনঃ পুনঃ প্রারব্ধাঃ ক্রিয়া মোঘা বিফলা এব ভবন্তি ॥ (৩১) ক্রিয়াণাং সফলত্বেঽপি ফলস্যানুপযোগমাহ—আধ্যাত্মিকাদিভিরিতি। মর্ত্ত্যস্য মরিষ্যতঃ, কৃচ্ছ্রেণ দুঃখেনোপনতৈঃ প্রাপ্তৈঃ ॥ (৩২) কৃচ্ছ্রং বিনৈব প্রাপ্তেঽপ্যর্থে দুঃখং তদবস্থমিত্যাহ—পশ্যামীতি ॥ (৩৩) ভয়ং প্রপঞ্চয়তি —রাজত ইতি। স্বস্মাৎ স্বত এব কথঞ্চিত্ত্যাগভোগবিস্মরণাদিনা নাশঃ স্যাদিতি প্রাণবতামর্থবতাঞ্চ ভয়ং নিত্যম্ ॥ (৩৪) অতোঽনর্থহেতুত্বাৎ প্রাণে জীবনে চার্থে চ স্পৃহা ন কার্য্যেত্যাহ—শোকেতি ॥

৩৫। নন্বেবমনর্থাননুভবন্তোঽপি ন কেচিদ্বিরজ্যন্তে, ন চ যথালাভেন তুষ্যন্তি, ত্বন্তু কথং বৈরাগ্যাদিকং প্রাপ্তোঽসি ? তত্রাহ—মধুকারেতি। মধুমক্ষিকাঽজগরৌ, যয়োঃ শিক্ষয়া বৃত্তিপর্য্যালোচনয়া ॥

৩৬। মধুকরাচ্ছিক্ষিতমাহ—বিরাগ ইতি। বিত্তপতিং হত্বাপ্যন্যো বিত্তং হরেদিত্যেবম্ ॥

৩৭। অজগরাচ্ছিক্ষিতমাহ—অনীহ ইতি। সত্ত্বান্—ধৈর্য্যবান্ ॥

১। ভুঙ্ক্তে (খ); ২। স্পষ্টয়তি (ঘ)।

৩৮—৪৩। পীবরত্বহেতুত্বেন[1] যদৃচ্ছয়া প্রাপ্তং পরিতোষং প্রপঞ্চয়তি—ক্বচিদল্পমিতি ষড়্ভিঃ। (৪০) চীরং জীর্ণবস্ত্রখণ্ডম্, বসে পরিদধে; দিষ্টভুক্—প্রারব্ধকর্ম্মফলভোগী॥ (৪১) প্রাসাদমধ্যে পর্য্যঙ্কে, তত্রাপি কশিপৌ তুলিকায়াম্॥ (৪২) চরে বিচরামি, ক্বচিৎ গ্রহবদ্দিগম্বরো বিচরামি॥ (৪৩) ন চ মানাপমানকর্ত্তৃষু মম বৈষম্যমিত্যাহ—নাহমিতি। নাহং নিন্দামি, ন চ স্তৌমি। মহাত্মনি—বিষ্ণৌ॥

৪৪—৪৫। এবম্ভূতত্বেন স্থিতাবুপায়মাহ—বিকল্পমিতি দ্বাভ্যাম্। (৪৪) চিত্তৌ ভেদগ্রাহকমনোবৃত্তৌ; অর্থরূপো বিভ্রমো যস্মিন্ মনসি তন্মনো। বৈকারিকেঽহঙ্কারে, তমহঙ্কারম্, অনু অনন্তরম্, মহত্তত্ত্বদ্বারেণেত্যর্থঃ॥ (৪৫) সত্যমেব পশ্যতীতি তথা॥

৪৬। মন্দদৃষ্ট্যা লোকশাস্ত্রাভ্যাং ব্যপেতম্, ন তু তত্ত্বদৃষ্ট্যা; যতো ভবান্ ভগবৎপরঃ[2]॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
ত্রয়োদশোঽধ্যায়ঃ॥ ১৩॥

চতুর্দ্দশোঽধ্যায়ঃ

চতুর্দ্দশে গৃহস্থস্য পরমো ধর্ম্ম ঈর্য্যতে।
দেশকালাদিভেদেন পুনঃ শ্রেয়োবিশেষকৃৎ॥ (১)

১। গৃহস্থমুল্লঙ্ঘ্য মোক্ষান্তরঙ্গত্বেন[3] প্রথমং বনস্থযতিধর্ম্মেষ্বভিহিতেষু তর্হি গৃহস্থস্য মোক্ষো ন স্যাদিতি শঙ্কিতচিত্তঃ পৃচ্ছতি—গৃহস্থ ইতি॥

১। পীনত্বে হেতুং বদন্ (ঘ); ২। -প্রিয়ঃ (ক); ৩। মোক্ষং প্রত্যন্তরঙ্গত্বে (ঘ)।

২। তস্য মোক্ষধর্ম্মানাহ—গৃহেম্বিত্যাদিনা যাবদধ্যায়সমাপ্তি। সাক্ষাদ্‌-বাসুদেবার্পণং যথা ভবত্যেবং কুর্ব্বন্নুপাসীত ॥

৪। স্বয়মেব মুচ্যমানেষু বিযুজ্যমানেষু যথা স্বপ্নাদুত্থিতঃ পুমান্ স্বপ্নদৃষ্টেষু পুত্রাদিষু সঙ্গং বিমুঞ্চতি, তদ্বৎ ॥

৫। নন্বেবম্ভূতস্য দুর্জ্জনৈরভিভূয়মানস্য কুতো গৃহোচিতাঃ ক্রিয়াঃ স্যুঃ ? তত্রাহ—যাবদর্থমিতি। অন্তরনাসক্তো বহিস্ত্বাসক্ত ইব নৃলোকে জনমধ্যে নরতাং মনুষ্যতাং ন্যসেৎ, পুরুষাকারমাবিষ্কুর্য্যাদিত্যর্থঃ ॥

৬। আগ্রহন্তু ক্বাপি ন কুর্য্যাদিত্যাহ—জ্ঞাতয় ইতি ॥

৭। নন্বেবং সর্ব্বানুমোদনে বিত্তক্ষয়প্রসঙ্গাৎ কুতো জীবনম্, কুতো বা কর্ম্মকরণম্ ? তত্রাহ—দিব্যং বৃষ্ট্যাদিভির্জ্জাতং ধান্যাদি ; ভৌমং বিবরাদি-প্রাপ্তং নিধানাদি ; আন্তরীক্ষমকস্মাদেব প্রাপ্তম্ ; এবং স্বত এবাচ্যুত-নির্ম্মিতং দৈবলব্ধং যৎ। এতৎ পূর্ব্বোক্তং কর্ম্মাদি ॥

৮। দৈবাদ্ ভূরিলাভে জাতেঽপি তত্রাভিমানো ন কার্য্য ইত্যাহ—যাবদিতি। ভ্রিয়েত—পূর্য্যেত ॥

৯। অতএব যং কমপি স্বগৃহং ক্ষেত্রং বা প্রবিশ্য ভুঞ্জানং ন নি-বারয়েদিত্যাহ—মৃগেতি। মর্কো মর্কটঃ, সরীসৃপঃ সর্পঃ, মক্ষিকাশ্চ ; তৈঃ পুত্রৈরেষাং মৃগাদীনাং কিয়দন্তরম্ ॥

১০। অতিকৃচ্ছ্রেণোৎপাদ্য ন ভজেত, কিন্তু যাবদ্দৈবপ্রাপিতং তাবদেব ভজেত ॥

১১। শ্বানশ্চ অঘাংশ্চ পতিতাঃ অন্তেঽবসায়িনশ্চ চাণ্ডালাদয়স্তানভি-ব্যাপ্য যথার্হং কামান্ সংবিভজেৎ, স্বভোগ্যান্ বিভজ্য দদ্যাৎ। যদ্যপ্যে-কৈবাত্মনো দারা ভার্য্যা তস্যাম্, অতিথিশুশ্রূষণে নিযুক্তায়াং স্বস্য শুশ্রূষা হীয়েত। যস্যাঞ্চ নৃণাং স্বত্বগ্রহো মমৈবেত্যাগ্রহস্তামেকামপি সংবিভজেদ-

তিথিশুশ্রূষণে নিযুঞ্জীতেত্যর্থঃ, ন ত্বন্যথা মন্তব্যম্, যথার্হং সংবিভজে-দিত্যুক্তত্বাৎ ॥

১২। এবঞ্চেত্তেনেশ্বরো বশীকৃতঃ স্যাদিত্যাহ—জহ্যাদিতি। যদর্থে যন্নিমিত্তমন্যৈরজিতোঽপীশ্বরস্তেন জিত এব ॥

১৩। নন্থ কথমেবং তস্যাং স্বত্বাভিমানো হাতুং শক্যঃ, তত্ত্ববিচারেণ? ইত্যাহ—কৃমিবিড়্-ভস্মসু নিষ্ঠা পর্য্যবসানমন্তে যস্য; তদীয়া দেহার্থা রতির্যস্যাং সা; স্বমহিম্না নভোঽপি ছাদয়তীতি তথা ॥

১৪। কিঞ্চ, সিদ্ধৈর্দৈবলব্ধৈর্যজ্ঞাবশিষ্টার্থৈঃ পঞ্চযজ্ঞশেষৈরন্নাদিভিঃ; মহতাং নিবৃত্তানাং পরমহংসানাম্ ॥

১৫। এতদ্বিবৃণ্বন্নাহ—দেবাদীন্ পঞ্চযজ্ঞদেবতা আত্মানঞ্চৈবং পৃথক্ পুরুষমন্তর্য্যামিণমেব যজেত ॥

১৭। ন পুনরতিনির্ব্বন্ধো যজ্ঞার্থং কার্য্য ইত্যাহ—ন হীতি। বিপ্র-মুখে হুতৈরন্নাদিভির্যথেজ্যেত পূজ্যেত, ন তথাগ্নিমুখতো হবিষেজ্যেত॥

১৮। ব্রাহ্মণেষু চ দেবেষু পঞ্চযজ্ঞদেবতাসু চ মর্ত্ত্যাদিষন্যেষ্বপি নরেষু পশ্বাদিষু চ ক্ষেত্রজ্ঞমন্তর্য্যামিণং ব্রাহ্মণানন্থ মর্ত্ত্যাদিযজনে ব্রাহ্মণযজনানন্তর-মন্যেষু যজস্বেত্যর্থঃ। ব্রাহ্মণাননমিতি পাঠে ব্রাহ্মণা আননং যস্য তম্ ॥

১৯। প্রোষ্ঠপদে—ভাদ্রপদে ॥

২১। শুক্লে মাসি বৈশাখে শুক্লপক্ষেঽক্ষয়তৃতীয়ায়ামিত্যর্থঃ; হেমন্তে শিশিরে চ মার্গশীর্ষাদিমাসচতুষ্টয়েঽপি যাশ্চতস্রোঽষ্টকাস্তাসু ॥

২২। সংপূর্ণচন্দ্রা পৌর্ণমাসী রাকা, ন্যূনচন্দ্রা সৈবানুমতিস্তয়া সহ মাসর্ক্ষাণি তন্মাসনামপ্রবৃত্তিনিমিত্তানি নক্ষত্রাণি যুতানি যদা স্যুস্তদা; যদুক্তং ত্রিকাণ্ড্যাম্—'পুষ্যযুক্তা পৌর্ণমাসী পৌষী মাসে তু যত্র সা। নাম্না স পৌষো মাঘাদ্যাশ্চৈবমেকাদশাপরে॥' ইতি ॥

২৩। অনুরাধা শ্রবণা উত্তরফাল্গুনী উত্তরাষাঢ়া উত্তরাভাদ্রপদা বা দ্বাদশ্যাং যদা স্যাৎ, আসূত্তরাসু একাদশী বা যদা স্যাত্তদা চ। জন্মর্ক্ষশ্রোণ-যোগযুক্—জন্মনক্ষত্রস্য শ্রবণস্য বা যোগেন যুক্তং দিনং যদা তদা; যোগগ্রহণং সম্বন্ধবাহুল্যার্থম্ ॥

২৪—২৫। ন কেবলং শ্রাদ্ধস্যৈব তে কালাঃ, কিন্তু ধর্ম্মমাত্রস্যেত্যাহ—ত এত ইতি দ্বাভ্যাম্। (২৪) তদেবায়ুষোঽমোঘং সাফল্যমিত্যর্থঃ ॥

২৬। সংস্কারকাল ইতি, জায়ায়াঃ পুংসবনাদি, অপত্যস্য জাতকর্ম্মাদি, আত্মনো যজ্ঞদীক্ষাদি, প্রেতস্য সংস্থা দাহনাদি, মৃতাহশ্চ সাংবৎসরিকং যদা অন্যস্মিন্নপ্যভ্যুদয়ার্থে কর্ম্মণি শ্রেয়ঃ কুর্য্যাদিত্যনুষঙ্গঃ ॥

২৭। যত্র যস্মিন্ সর্ব্বমেতচ্চরাচরমস্তি, তস্য ভগবতো বিশ্বং রূপং সৎ পাত্রং যত্র লভ্যতে, স বৈ পুণ্যতমো দেশঃ ॥

৩০। অর্হৈরুত্তমৈরাশ্রিতানি ॥

৩১। সীতায়া রামস্য চাশ্রম আদির্যেষাম্। দ্বয়োঃ পৃথগ্‌গ্রহণং বিয়োগ-কালাভিপ্রায়েণ ॥

৩৩। অর্চ্চাশ্রিতাশ্চ স্থিরপ্রতিমাশ্রিতাঃ। পূর্ব্বন্তু শালগ্রামশিলাস্থর্চ্চন-দেশ উক্ত ইত্যপৌনরুক্ত্যম্। অত্রৈষু দেশেষ্বীহিতঃ কৃতঃ সহস্রগুণ-মধিকস্য ফলস্যোদয়ো যস্মাৎ স তথা ॥

৩৪। অথ পাত্রমাহ—হরিরেব পাত্রং নিরুক্তং নির্ণীতম্ ॥

৩৫। তদেবাহ—দেবেষু চ ঋষিষু চার্হৎসু চ তপোযোগাদিসিদ্ধেষু ব্রহ্মাত্মজাদিষু সনকাদিষ্বপি সৎসু তত্র ত্বদীয়ে রাজসূয়ে যদ্‌যস্মাদচ্যুত এব পাত্রতয়া সম্মতঃ ॥

৩৬। সম্মতত্বে হেতুমাহ—জীবরাশিভির্ব্যাপ্তো ব্রহ্মাণ্ডকোষ এব যোঽঙ্ঘ্রিপঃ। সর্ব্বজীবানামাত্মনশ্চ তর্পণম্ ॥

৩৭। এতদেব পুরুষনামনিরুক্ত্যা দ্রঢ়য়তি—পুরাণীতি। নৃতির্য্যগাদিরূপাণি পুরাণি শরীরাণি, তেম্বন্তর্য্যামিরূপেণ প্রত্যগংশেন চ যতঃ শেতে, অতঃ পুরুষ ইতি প্রসিদ্ধঃ॥

৩৮। তারতম্যেন তির্য্যগাদিভ্যঃ পুরুষে যস্মাদাধিক্যেন বর্ত্ততে, তস্মাৎ পুরুষঃ পাত্রম্। তত্রাপি যাবানাত্মা জ্ঞানাংশো যথা যথা ঈয়তে, তপআদিযোগেন যত্র যত্র প্রতীয়তে, তথা তথাসৌ পাত্রমিত্যর্থঃ। তথা চ শ্রুতিঃ—'পুরুষত্বে চাবিস্তরামাত্মা' ইত্যাদি॥

৩৯—৪০। তর্হি প্রতিমাদৌ হরেঃ পূজাং কিমিতি কুর্ব্বন্তি? তত্রাহ—দৃষ্ট্বেতি দ্বাভ্যাম্। (৩৯) মিথোঽবজ্ঞানমসম্মানস্তস্মিন্নাত্মা বুদ্ধির্যেষাং তেষাং ভাবং দৃষ্ট্বা, ক্রিয়ায়ৈ পূজাস্থর্থম্॥ (৪০) হরিমুপাসত উপাসিতাপ্যর্চ্চা পুরুষদ্বেষিণামর্থদা ন ভবতি, পুরুষেষু দ্বেষং হিত্বার্চ্চিতা সতী সাপি মন্দাধিকারিণাং পুরুষার্থপ্রদা ভবত্যেবেত্যর্থঃ॥

৪১। পুরুষেম্বেব জাত্যা তপআদিভিশ্চ পুনর্ব্বিশেষান্তরমাহ—পুরুষেম্বপীতি। যো ধত্তে, তং সুপাত্রং বিদুঃ॥

৪২। এতদেব কৈমুত্যন্যায়েন দ্রঢ়য়তি—নন্বস্যেতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ॥ ১৪॥

পঞ্চদশোঽধ্যায়ঃ

ততঃ পঞ্চদশে সর্ব্ববর্ণাশ্রমনিবন্ধনম্[১]।
সারতঃ সংগ্রহেণানু-বর্ণ্যতে মোক্ষলক্ষণম্ ॥ (১)

১। সর্ব্বেষামপি মোক্ষধর্ম্মাণাং সারসংগ্রহার্থমধ্যায়ারম্ভঃ। তত্র শ্রাদ্ধগতান্ বিশেষানাহ—কর্ম্মনিষ্ঠা ইতি। স্বাধ্যায়াদিষু পরিনিষ্ঠিতা ইতি শেষঃ॥

২। কব্যানি পিতৄনুদ্দিশ্য দেয়ানি, দৈবে চ হব্যানি তস্মৈ দেয়ানি। যথার্হত ইতি সর্ব্বত্র জ্ঞানাদিতারতম্যেন ॥

৪। নন্থ বিস্তরঃ কুতঃ প্রাপ্তঃ, যেন নিষিধ্যতে? তত্রাহ—স্বজনানামর্পণাজ্জামাতা চেন্নিমন্ত্র্যতে, তৎপিত্রাদয়ঃ কথং বর্জ্জ্যা ইত্যেবং প্রাপ্তাদ্ বিস্তরাদিত্যর্থঃ ॥

৫। মুন্যন্নমারণ্যং ব্রীহ্যাদি নীবারাদি ; হরিদৈবতং হরয়ে নিবেদিতং সৎ ॥

৬। পুরুষাত্মকমীশ্বররূপম্ ॥

৮। দণ্ডস্য ন্যাসো হিংসায়াস্ত্যাগো য এতাদৃশোঽন্যো ধর্ম্মো নাস্তি ॥

৯। অতএবোত্তমাধিকারিণো বাহ্যানি কর্ম্মাণি ত্যজন্তীত্যাহ—এক ইতি ; একেঽনীহা নিষ্কামাঃ, জ্ঞানদীপিতে আত্মস্ফূর্ত্তিমতি আত্মসংযমনে জুহ্বতি, মনো নিয়ম্য তদন্তরায়তয়া ত্যজন্তীত্যর্থঃ ; তদুক্তং সর্ব্বজ্ঞসূক্তৌ—'প্রত্যক্স্ফূর্ত্তিরসৎস্ফূর্ত্তিস্তত্ত্বনিষ্ঠাবিঘাতকম্। সংলক্ষ্য সংত্যজেৎ কর্ম্ম ত্যজন্ বিঘ্নহতোঽন্যথা ॥' ইতি ॥

১০। মা মামেষ ধ্রুবং হন্যাদিতি, কুতঃ? অকরুণঃ ; তৎ কুতঃ? অসুতৃপ্—প্রাণতর্পকঃ ; তৎ কিম্? অতজ্জ্ঞ আত্মতত্ত্বানভিজ্ঞঃ ; তথা চ শ্রুতিঃ—'ন তং বিদাথ য ইমা জজানান্যদ্যুষ্মাকমন্তরং বভূব, নীহারেণ প্রাবৃতা জল্প্যা চাসুতৃপ্ উকৃথশাসশ্চরন্তি' ইতি ॥

১। -নিরূপণম্ (গ)।

১১। প্রস্তুতমনুবর্ণয়তি—তস্মাদিতি ॥

১২। অধর্ম্মবৎ—সাক্ষান্নিষিদ্ধবৎ ॥

১৩। ক্রমমনাদৃত্য পঞ্চাপি ব্যাচষ্টে—ধর্ম্মবাধো ধর্ম্মবুদ্ধ্যাপি যস্মিন্ ক্রিয়মাণে স্বধর্ম্মবাধঃ; অন্যস্য চোদিতোঽন্যস্য ধর্ম্মঃ পরধর্ম্মঃ। উপমেতি ব্যাচষ্টে—উপধর্ম্মস্ত্বিতি। শব্দস্য ভিদ্ ভেদোঽন্যথা ব্যাখ্যানং যস্মিন্; যথা 'দশাবরান্ ভোজয়েৎ' ইত্যুক্তে দশভ্যোঽবরানিতি। শব্দভৃদিতি পাঠে ধর্ম্ম-শব্দমাত্রং বিভর্ত্তীতি তথা। যথা গাং দদ্যাদিত্যুক্তে মরিষ্যন্ত্যা গোর্দানম্ ॥

১৪। স্বধর্ম্মানুষ্ঠানানন্তরং ধর্ম্মভূয়স্ত্বার্থমপি পরধর্ম্মো নানুষ্ঠেয়োঽনুপ-যোগাদিত্যাহ—স্বভাববিহিত ইতি ॥

১৫—২১। কিঞ্চ, অধনো ধর্ম্মার্থং ধনং নেহেত নাপেক্ষেত, ধনার্থং ন ব্যাপ্রিয়েতেতি বা, দৈবোপপন্নেনৈব স্বধর্ম্মসিদ্ধেরুক্তত্বাৎ। যাত্রার্থমপি নেহেতেত্যেতৎ প্রপঞ্চয়তি—অনীহেতি সার্দ্ধৈঃ ষড়্ভিঃ ॥ (১৭) উপানহৌ পাদয়োর্যস্য য উপানৎপাৎ, তস্য ॥ (১৮) গৃহপালঃ শ্বা, তদ্বদাচরতি ॥ (২০) ক্ষুধা তৃষা চ জনঃ কামস্যান্তং যাতি, অন্নোদকাতিরিক্তকামান্তরা-ভাবাৎ ক্রোধস্য চান্তং যাতি, এতস্য ক্রোধস্য যৎ ফলং হিংসা তস্যোদয়া-ন্নিষ্পত্তেঃ। দিশো জিত্বাপি ভুবো ভুক্ত্বাপি লোভস্যান্তং নৈব যাতীত্যর্থঃ ॥

২২—২৫। ইদানীং কামাদিজয়োপায়ানাহ—অসংকল্পাদিতি চতুর্ভিঃ। (২২) জয়েদিতি যথাপেক্ষমন্বেতি। অর্থেঽনর্থদর্শনেন; তত্ত্বাবমর্ষণাদ-দ্বৈতানুসন্ধানেন ॥ (২৩) আন্বীক্ষিক্যা—আত্মানাত্মবিবেকেন; মহতাং সাত্ত্বিকানাং সেবয়া; যোগস্যান্তরায়ান্ লোকবার্ত্তাদীন্ ॥ (২৪) যেভ্যো ভূতেভ্যো ভয়ং জায়তে, তেষ্বেব কৃপয়া হিতাচরণেন; দৈবং দৈবোপসর্গ-নিমিত্তং বৃথা-মনঃপীড়াদি; তদুক্তং যাজ্ঞবল্ক্যেন—'বিমনা বিফলারম্ভঃ সংসীদত্যনিমিত্ততঃ' ইতি। আত্মজং দেহজম্, যোগবীর্য্যেণ প্রাণায়ামাদি-বলেন, সত্ত্বনিষেবয়া সাত্ত্বিকাহারাদিনা ॥

২৬। নন্থ কথং গুরৌ ভক্ত্যা সত্ত্বস্থ জয়ঃ স্থাৎ, তস্থাপি মনুষ্যত্বেন তদবস্থত্বাৎ ? তত্রাহ—যস্তেতি ; মর্ত্ত্যাসদ্ধীঃ—মনুষ্য ইতি দুর্ব্বুদ্ধিঃ, তস্থ শাস্ত্রশ্রবণং কুঞ্জরশৌচবদ্‌ব্যর্থম্‌ ॥

২৭। নন্থ গুরোরপি পিতৃপুত্ত্রাদয়স্তে তং নরমেব মন্যন্তে ? অত আহ—এষ গুরুঃ সাক্ষাদ্‌ ভগবানেব ভবেৎ, লোকস্থ নরোঽসাবিতি বুদ্ধি-র্ভ্রান্তিরিত্যর্থঃ ; যদ্বা, ন হি তৎপুত্ত্রাদের্মনুষ্যবুদ্ধ্যা প্রতীয়মানোঽপি গুরু-র্ভগবান্‌ ন ভবেৎ, যথৈষ শ্রীকৃষ্ণ ইত্যর্থঃ ॥

২৮। এবং সর্ব্বৈরুপায়ৈঃ কামাদিবেগং জিত্বা নিয়তেন্দ্রিয়ো ভূত্বা ধ্যানপরো ভবেৎ, অন্যথা তং প্রতি সর্ব্বশাস্ত্রবৈফল্যং স্থাদিত্যাহ—ষড়্‌-বর্গেতি। সর্ব্বা অপি নিয়মচোদনা ইষ্টাপূর্ত্তাদিবিধয়ঃ, ষড়িন্দ্রিয়বর্গস্থ যঃ সংযমস্তস্মিন্নেবৈকস্মিন্নন্তো যাসাং তদেকপরা ইত্যর্থঃ। ন চ তাবতাপি চরিতার্থা ইত্যাহ—তদন্তাঃ সত্যোঽপি যদি যোগান্‌ ধারণাধ্যানসমাধীন্‌ নো আবহেয়ুর্ন সাধয়েয়ুঃ, তর্হি কেবলং শ্রমাবহা এবেত্যর্থঃ ॥

২৯। এতদেব দৃষ্টান্তেনাহ—যথা বার্ত্তাদয়ঃ কৃষ্যাদয়ঃ, অর্থাত্তৎফলানি চ যোগস্থার্থং মোক্ষং ন সাধয়ন্তি, প্রত্যুতানর্থায় সংসারায়ৈবাসতো বহি-র্ম্মুখস্তেষ্টাপূর্ত্তান্যপি তথা ॥

৩০। এবং যোগং যুঞ্জতোঽপি যস্থ কুটুম্বাদিসঙ্গেন চিত্তং বিক্ষিপ্যেত, তস্থ কৃত্যমাহ—যশ্চিত্তস্থ বিজয়ে যত্ত উদ্‌যুক্তঃ স ভিক্ষুঃ স্থাৎ, সংন্যসেৎ ; তথা চ স্মৃতিঃ—'দ্বন্দ্বাহতস্থ গার্হস্থ্যং ধ্যানভঙ্গাদিকারণম্‌। লক্ষয়িত্বা গৃহী স্পষ্টং সংন্যসেদবিচারয়ন্‌ ॥' ইতি। ভিক্ষয়া প্রাপ্তং মিতমশনং যস্থ সঃ ॥

৩১। ঋজু সমমঙ্গং যস্থ সঃ, সুখং যথা ভবত্যেবমাসীত ; ওমিত্যু-চ্চারয়ন্নিতি শেষঃ ॥

৩৪। এবমনিশমভ্যস্থতস্তস্থ যতেশ্চিত্তং নির্ব্বাণং শান্তিং যাতি ॥

৩৫। ন চ পুনর্বিক্ষিপ্যেতেত্যাহ—কামাদিভিরক্ষুভিতং যচ্চিত্তং তন্নোত্তিষ্ঠেত ; যতঃ প্রশান্তা অখিলা বৃত্তয়ো যস্য। কুতঃ? ব্রহ্মসুখেন স্পৃষ্টম্ ॥

৩৬। যস্তু প্রব্রজ্যাং কৃত্বাপি ভোগলিপ্সুঃ স্যাত্তং নিন্দতি—য ইতি। ত্রয়াণাং ধর্ম্মাদীনাং বর্গ আ সমন্তাদুপ্যতে যস্মিংস্তস্মাদ্‌গৃহাৎ। তান্ ধর্ম্মাদীন্ ; বান্তাশী ছর্দ্দিতভোজী নির্লজ্জশ্চ সঃ ॥

৩৭। ন চেদমঘটিতং দৃষ্টত্বাদিত্যাহ—যৈঃ পূর্ব্বং স্বদেহোঽনাত্মাদিরূপঃ স্মৃতশ্চিন্তিতস্ত এব পুনরেনমাত্মেতি মত্বা শ্লাঘয়ন্তি ভাবয়ন্তি হি ॥

৩৮—৩৯। যতিমুপলক্ষণীকৃত্যান্যানপি স্বধর্ম্মত্যাগিনো নিন্দতি—গৃহস্থস্যেতি দ্বাভ্যাম্ ॥

৪০। নন্বাত্মতত্ত্বজ্ঞস্য ভিক্ষোরিন্দ্রিয়লৌল্যে কো দোষঃ? তত্রাহ—আত্মানং পরং ব্রহ্ম চেজ্জানীয়াৎ, জ্ঞানেন ধূতা নিরস্তা আশয়া বাসনা যস্য, তস্য জ্ঞানিনো লৌল্যমেব ন সম্ভবতীত্যর্থঃ ; তথা চ শ্রুতিঃ—'আত্মানঞ্চেদ্বিজানীয়াদয়মস্মীতি পূরুষঃ। কিমিচ্ছন্ কস্য কামায় শরীরমনুসঞ্চরেৎ?' ইতি ॥

৪১—৪৬। অজ্ঞস্য তু লৌল্যেন নরকপাতাপত্তেঃ, অপ্রমত্তেন সদা তত্ত্বজ্ঞানে যতিতব্যমিতীমমর্থম্ 'আত্মানং রথিনং বিদ্ধি শরীরং রথমেব চ' ইত্যাদিশ্রুত্যুক্তরথরূপকদ্বারেণাহ—আহুরিতি ষড়্‌ভিঃ। (৪১) ইন্দ্রিয়েশং মনোঽভীষূন্ রশ্মীনাহুঃ ; মাত্রাঃ শব্দাদীন্, বর্ত্মানি গন্তব্যদেশানাহুঃ ; সত্ত্বং চিত্তম্, বৃহদ্দেহব্যাপি, বন্ধুরং বন্ধনম্, চিত্তং বিনা হ্যনিবদ্ধমিব শরীরং ভবতি, ঈশসৃষ্টমিতি বন্ধনকর্ত্তা ত্বীশ এবেত্যর্থঃ ॥ (৪২) প্রাণাদয়ঃ পঞ্চ, 'নাগঃ কূর্ম্মশ্চ কৃকরো[১] দেবদত্তো ধনঞ্জয়ঃ' চেত্যেবং দশবিধং প্রাণমক্ষমভিমানং সাহঙ্কারং জীবং রথিনম্ ; শুদ্ধং জীবং শরম্, পরং ব্রহ্ম লক্ষ্যম্ ;

১। কৃকলো (ঘ)।

যথা ধনুষা শরো লক্ষ্যে নিপাত্যতে, তথা প্রণবেন জীবো ব্রহ্মণি নিপাত্যত ইত্যর্থঃ॥ (৪৩) রাগাদয়ো জেতব্যাঃ শত্রবঃ॥ (৪৪) তত্র রজোঽভিনিবেশঃ ক্বচিদারূঢ়সমাধেঃ সত্ত্বপ্রকৃতয়োঽপি পরোপকারাদিপ্রবৃত্তয়ঃ শত্রবঃ॥ (৪৫) নৃকায়রূপং রথম্, আত্মবশ উপকল্প ইন্দ্রিয়াদিপরিকরো যস্মিংস্তথাভূতং যাবদ্ধত্তে, তাবদেব গরিষ্ঠানাং গুরূণাং চরণসেবয়া নিশিতং জ্ঞানখড়্গং বিভ্রদচ্যুতাশ্রয়ঃ সন্, নিরস্তশত্রু উপশান্তঃ স্বানন্দেন তুষ্টো ভূত্বেদং রথাদিকমুপেক্ষেতেত্যর্থঃ॥ (৪৬) অচ্যুতাশ্রয়াভাবে বাধকমাহ—নো চেদিতি; অসন্তো বহির্ম্মুখা য ইন্দ্রিয়বাজিনঃ সূতশ্চ তে উৎপথং প্রবৃত্তিমার্গং নীত্বা বিষয়াখ্যেষু দস্যুষু নিক্ষিপন্তি। হয়ৈঃ সূতেন চ সহ বর্ত্তমানম্, তমোঽন্ধে তমসা ব্যাপ্তে; উরু মৃত্যুভয়ং যস্মিন্॥

৪৭—৫৬। নন্বু চ বেদবিহিতেষ্টাপূর্ত্তাদিকারিণঃ পুংসঃ কথমেবমনর্থপ্রাপ্তিঃ স্যাদিত্যাশঙ্ক্য বেদোক্তকর্ম্মণাং দ্বৈবিধ্যং দর্শয়ন্ ফলভেদমাহ—প্রবৃত্তঞ্চেতি দশভিঃ॥ (৪৮) হিংস্রং শ্যেনাদি কর্ম্ম, অশান্তিদমত্যাসক্তিযুক্তম্, 'আদি'-শব্দার্থবিবরণম্—দর্শশ্চেতি। পশুঃ—পশুযাগঃ, সুতঃ—সোমযাগঃ॥ (৪৯) হুতং বৈশ্বদেবম্, প্রহুতং বলিহরণম্[১]—এতৎ সর্ব্বমিষ্টমুচ্যতে। এতদেব যদি কাম্যমশান্তিদঞ্চ, তর্হি প্রবৃত্তাখ্যমপীত্যর্থঃ। আজীব্যং প্রপাদি॥ (৫০—৫১) প্রবৃত্তেন কর্ম্মণারোহাবরোহাভ্যামাবৃত্তিপ্রকারমাহ—দ্রব্যস্য চরুপুরোডাশাদেঃ সূক্ষ্মো বিপাকঃ পরিণামো দেহান্তরারম্ভকঃ, যেন সংপরিষ্বক্তো গচ্ছতি, য এব শ্রুতৌ 'অপ্-'শব্দেনোক্ত ইতি তু 'পঞ্চম্যামাহুতাবাপঃ পুরুষবচসো ভবন্তি' ইতি। দ্রব্যমুষ্মবিপাক ইতি পাঠে 'দ্রব্য'-শব্দেন 'তেজোমাত্রা'-শব্দোক্তানীন্দ্রিয়াণি, 'উষ্মবিপাক'-শব্দেন হৃদয়াগ্রপ্রদ্যোতঃ। তথা চ শ্রুতিঃ—'স ইমাস্তেজোমাত্রাঃ সমভ্যাদদানো হৃদয়মেবানুচংক্রামতি' ইতি, 'তথা তস্য

১। 'হুতং বৈশ্বশরীরং ভবতি। ঈশস্যষ্টমিতি বন্ধনকর্ত্তা, দেবং প্রহুতং বলিহরণম্' (খ)।

হৈতস্ত হৃদয়াগ্রং প্রদ্যোততে, তেন প্রদ্যোতেনৈষ আত্মা নিষ্ক্রামতি' ইতি। 'ধূমাদি'-শব্দৈস্তদভিমানিন্যো দেবতাঃ। তত্রাপক্ষয়ঃ কৃষ্ণপক্ষঃ, সোমঃ—সোমলোকঃ। তত্র ভুক্তভোগস্থাবরোহণপ্রকারো দর্শ ইত্যাদি; দর্শ ইতি বিপরীতলক্ষণয়া বিশিষ্টভোগক্ষয়ে শোকাগ্নিনা দেহলয়েনাদর্শনমুচ্যতে। এতদুক্তং ভবতি—ভূতসূক্ষ্মযুতো ধূমাদ্যাতিবাহিকদেবতাভিঃ সোমলোকং প্রাপিতস্তদ্ভোগাবসানে বিলীনদেহো বৃষ্টিদ্বারেণৌষধিবীরুধাদিশস্যোৎপত্তিক্রমেণ জায়তে; এবং পুনর্ভবহেতুঃ পিতৃযানং প্রবৃত্তকর্ম্মমার্গ ইতি। ক্ষেশ! হে ভূপতে! পুনর্ভবমেবাহ—একৈকস্মিন্ প্রত্যেকং ক্রমেণ ভূত্বা তত্তৎসান্নিধ্যং প্রাপ্যেহ ভূমৌ জায়তে॥ (৫২) তত্রাধিকারিণমাহ—নিষেকাদীতি। অন্তস্ত্বিষ্টাদিকার্য্যেঽপ্যেবং জন্ম ন লভত ইত্যর্থঃ। নিবৃত্তকর্ম্মনিষ্ঠস্যোপাসনাবিশেষমুপদিশন্নর্চ্চিরাদিমার্গেণ ব্রহ্মলোকপ্রাপ্তিমাহ—ইন্দ্রিয়েষ্বিত্যাদিনা; যদ্বা, দ্রব্যযজ্ঞেষু হিংসায়া দুর্ব্বারত্বাদতিমুখ্যং নিবৃত্তং কর্ম্মৈব দর্শয়ন্নাহ—জ্ঞানেন দীপ্যন্ত ইতি, তথা তেষ্বিন্দ্রিয়ব্যাপারাণামিষ্টাপূর্ত্তাদীনামিন্দ্রিয়তাবন্মাত্রতাং ভাবয়ন্তীত্যর্থঃ। এবমুত্তরত্রাপি॥ (৫৩) ঊর্ম্মৌ দর্শনাদিসঙ্কল্পরূপে মনসি, বৈকারিকং বিকারযুক্তং মনো বাচি, বিধ্যাদিলক্ষণয়া বাচা হি মনঃ কর্ত্তৃত্বাদি বিকারং ভজতি। বর্ণানাং সমাম্নায়ে সমুদায়ে তদ্বিশেষত্বাদ্বাচঃ স্বরেঽকারাদিস্বরত্রয়াত্মকে, ওঙ্কারং বিন্দৌ, তঞ্চ নাদে প্রাণে সূত্রাত্মনি, মহতি ব্রহ্মণি॥ (৫৪) অগ্নিরিতি, তত্তদভিমানিন্যো দেবতাস্তাঃ প্রাপ্নোতীতি পূর্ব্ববৎ। দিবা অহঃ, প্রাহ্নস্তস্যৈবান্তঃ, রাকা শুক্লপক্ষস্যান্তঃ, যদ্বা, প্রাহ্নো রাকেতি চ পুরাণমতম্, উত্তরময়নম্; স্বরাট্—ব্রহ্মা। এবং ব্রহ্মলোকং গতস্য ভোগাবসানে মোক্ষপ্রকারমাহ—বিশ্ব ইতি; বিশ্বঃ স্থূলোপাধিঃ, স স্থূলং সূক্ষ্মে বিলাপ্য সূক্ষ্মোপাধিস্তৈজসো ভবতি, সূক্ষ্মঞ্চ কারণে বিলাপ্য কারণোপাধিঃ প্রাজ্ঞো ভবতি, কারণঞ্চ সর্ব্বসাক্ষিত্বেনান্বয়াৎ সাক্ষিস্বরূপে বিলাপ্য তুর্য্যো ভবতি, তেষাঞ্চ

ব্যভিচারিণাং সাক্ষ্যাণাং লয়ে শুদ্ধ আত্মা ভবতি, মুচ্যত ইত্যর্থঃ ॥ (৫৫) যথেতরো ভূত্বা ভূত্বা নিবর্ত্ততে, তথা ন নিবর্ত্তত ইত্যর্থঃ ॥ (৫৬) বেদেন নির্ম্মিতে 'তে ধূমমভিসম্ভবন্তি' ইত্যাদিনা, 'তেঽর্চ্চিরভিসম্ভবন্তি' ইত্যাদিনা চ নিশ্চয়েন বিবিচ্য জ্ঞাপিতেত্যর্থঃ। জনস্থোঽপি দেহস্থোঽপি ন মুহ্যতি ॥

৫৭। তত্র হেতুমাহ—আদাবিতি। জনানাং দেহাদীনামাদৌ কারণত্বেনান্তে চাবধিত্বেন যৎ সৎ, তথা বহির্ভোগ্যমন্তর্ভোক্তৃ পরমমবর-ঞ্চোচ্চনীচম্। তমোঽপ্রকাশঃ, জ্যোতিঃ প্রকাশঃ, তত্তু সর্ব্বময়ং জ্ঞানী স্বয়মেব ; ন ত্বস্মাদ্ব্যতিরিক্তং বস্তু কিঞ্চিদস্তি, যেন মুহ্যেদিত্যর্থঃ ॥

৫৮। ননু তর্হি কথং পৃথগর্থস্তস্যাপি প্রতীয়তে? তত্রাহ—আ-বাধিতস্তর্কবিরোধেন সর্ব্বতো বাধিতোঽপ্যাভাসঃ প্রতিবিম্বাদির্ব্বস্তুতয়া যথা স্মৃতস্তদ্বদৈন্দ্রিয়কং সর্ব্বমর্থত্বেন বিকল্পিতম্, ন তু পরমার্থতঃ, দুর্ঘটত্বাৎ ॥

৫৯। তদেবাহ—ক্ষিত্যাদীনাং পঞ্চভূতানাং ছায়ৈক্যবুদ্ধ্যালম্বনরূপং দেহাদিসংঘাতারম্ভপরিণামানাং মধ্যে কতমাপ্যন্যতমাপি ন ভবতি ; ন তাবত্তেষাং সংঘাতো বৃক্ষাণামিব বনম্, একদেশাকর্ষণে সর্ব্বাকর্ষণানুপ-পত্তেঃ ; ন হ্যেকস্মিন্ বৃক্ষ আকৃষ্টে সর্ব্বং বনমাকৃষ্যতে ; ন চ বিকার আরব্ধোঽবয়বী; 'অপি'-শব্দান্ন পরিণামোঽপি। কুতঃ? স কিং স্বয়-মেবাবয়বেভ্যো বা পরিণমতে, তেভ্যো বা পৃথক্ তদন্বিতো বা? ন তাবদত্যন্তং পৃথক্, তথাপ্রতীতেঃ ; ন চান্বিতঃ। স কিং প্রত্যবয়বং সর্ব্বোঽপ্যন্বেতি, অংশেন বা? আদ্যেঽঙ্গুলিমাত্রেঽপি দেহবুদ্ধিঃ স্যাৎ, দ্বিতীয়ে তস্যাপ্যংশাঙ্গীকারে সত্যনবস্থা স্যাৎ, অতো মৃষৈবেত্যর্থঃ ॥

৬০। এবং দেহাদের্ম্মিথ্যাত্বমুক্ত্বা তদ্ধেতূনাং ক্ষিত্যাদীনামপি মিথ্যা-ত্বমাহ—ধাতব ইতি। ধারয়ন্তীতি ধাতবো মহাভূতানি তন্মাত্রৈঃ সূক্ষ্মৈ-রবয়বৈর্ব্বিনা ন স্যুঃ, অবয়বিত্বাৎ। তেষামপি তর্হ্যবয়বঃ সত্য ইতি চেৎ, তত্রাহ—উক্তপ্রকারেণাবয়বিন্যসত্যবয়বোঽপ্যন্ততোঽসন্নেব স্যাৎ, অবয়বি-

প্রতীত্যন্যথানুপপত্তিং বিনা তৎসদ্ভাবে প্রমাণাভাবাদিত্যর্থঃ। তদুক্তং পঞ্চম-স্কন্ধে 'এবং নিরুক্তং ক্ষিতিশব্দবৃত্তম্' ইত্যাদি ॥

৬১। নন্বয়বিনোঽভাব আগমাপায়িষু বাল্যাদিষু 'সোঽয়ং দেবদত্তঃ' ইতি প্রত্যভিজ্ঞানং ন স্যাৎ ? তদুক্তং ভট্টৈঃ —'আবির্ভাবতিরোভাবধর্ম্মকেষনপায়ি যৎ। তদ্ধর্ম্মী' ইতি, তত্রাহ—স্যাদিতি। বস্তুনঃ পরমাত্মনো বিকল্পে ভেদে সতি, যদ্বা, বস্তুনোঽবিদ্যয়া বিকল্পে সতি পূর্ব্বপূর্ব্বারোপসাদৃশ্যাৎ স এবেতি ভ্রমঃ স্যাৎ, স চ তাবদেব যাবদবিদ্যানিবৃত্তিঃ। নন্মু সর্ব্বমিথ্যাত্বে শাস্ত্রস্য বিধিনিষেধতা কথম্? তত্রাহ—স্বপ্নমধ্যে জাগ্রৎস্বাপব্যবস্থা যথেতি ॥

৬২—৬৫। ইদানীমুক্তমেবাদ্বৈতং ভাবনাত্রয়োপদেশেন দ্রঢ়ীকরোতি —ভাবাদ্বৈতমিতি চতুর্ভিঃ। (৬২) বর্ত্তয়ন্নালোচয়ন্, স্বানুভূত্যাত্মতত্ত্বানুভাবেন ত্রীন্ জাগ্রদাদীন্, 'ত্রয় আবসথাস্ত্রয়ঃ স্বপ্নাঃ' ইতি শ্রুতেঃ ; যদ্বা, বস্তুভেদবুদ্ধিরেকঃ স্বপ্নঃ, ততস্তত্তদধিকারভেদেন কর্ম্মভেদবুদ্ধির্দ্বিতীয়ঃ, ততো 'মৎকর্ম্মসাধিতমেতৎ ফলং মমৈব ভোগ্যম্' ইতি তৃতীয়ঃ ; তান্ ধুনুতে নিবর্ত্তয়তি॥ (৬৩) কার্য্যকারণয়োর্বস্ত্বৈক্যস্য দর্শনমালোচনম্—তন্তুরেব ন পট ইতি॥ (৬৪) মনোবাক্তনুভিঃ কৃতানাং কর্ম্মণাং সমর্পণং তৈঃ সমর্পণমিতি বোদ্দেশ্যফলভেদো হি ক্রিয়াভেদে হেতুঃ, ঈশ্বরার্পণে চ তদভাবাৎ ক্রিয়াণামদ্বৈতম্ ॥ (৬৫) আত্মনঃ স্বস্য জায়াদীনাঞ্চ স্বার্থশ্চ কামশ্চ তয়োর্দেহাদীনাং পঞ্চভূতাত্মকত্বেন ভোক্তুশ্চ পরমাত্মত্বেনাভেদালোচনেনার্থকাময়োর্যদৈক্যদর্শনমিত্যর্থঃ ॥

৬৬। উক্তানাশ্রমধর্ম্মান্ সংক্ষিপ্যাহ—যদিতি, যদ্দ্রব্যম্, যেনোপায়েন, যতঃ সকাশাৎ ॥

৬৭। প্রস্তুতমুপসংহরতি—এতৈরিতি। অস্য শ্রীকৃষ্ণস্য গতিম্ ; তদ্ভক্তিভাক্—তস্য ভক্তঃ ॥

৬৮। এতচ্চ সর্ব্বসাধারণমুক্তম্, ভক্তস্য তু ভক্তিরেব সর্ব্বপুরুষার্থ-হেতুরিতি পাণ্ডবানেব লক্ষীকৃত্যাহ—যথা হীতি। হে নৃপদেব! নৃপৈর্দ্দেবৈশ্চ সহায়ৈর্দুস্ত্যজাদিতি বা, আত্মনঃ শ্রীকৃষ্ণাদেব প্রভোর্হেতোঃ। অড়ভাব আর্ষঃ; উৎকর্ষেণাতরতেত্যর্থঃ। যথা যথাবৎ, তমেব ভজতেতি শেষঃ। যদ্বা, যথাপদ্গণাদুত্তীর্ণস্থং যথা চ ক্রতূনহার্ষীৎ, তথা শ্রীকৃষ্ণাদেব তারকাৎ সংসারাদপ্যুত্তরতেত্যর্থঃ॥

৬৯—৭৩। শ্রীকৃষ্ণসেবা মহতামবজ্ঞয়া ভ্রশ্যতি, তৎকৃপয়া চ সিধ্যতীতি দর্শয়ন্ স্বপূর্ব্ববৃত্তান্তমাহ—অহমিতি সার্দ্ধৈঃ পঞ্চভিঃ। (৬৯) নাম্নোপবর্হণঃ॥ (৭০) পেশলং সৌকুমার্য্যম্, রূপাদিভিঃ প্রিয়ং দর্শনং যস্য॥ (৭২) তদাহ্বানং বিদ্বানুন্মত্তঃ সন্ গায়ন্নেব গতঃ॥

৭৫। ত্বস্তু কৃতার্থ এবেতি হর্ষেণ পুনঃ পূর্ব্বশ্লোকানেব পঠতি—যূয়মিতি। শেষং স্পষ্টম্॥

সপ্তমস্কন্ধ-গূঢ়ার্থপদভাবার্থ-দীপিকা।
সংসেব্যতাং সদা সদ্ভির্যতিশ্রীধরনির্ম্মিতা॥ *

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং সপ্তমস্কন্ধে
পঞ্চদশোঽধ্যায়ঃ॥ ১৫॥

সপ্তমঃ স্কন্ধঃ সম্পূর্ণঃ॥ ৭॥

---

* এষ শ্লোকঃ ক-খ-গ-পুস্তকে নোপলভ্যতে।

অষ্টমঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

* অথাষ্টমে চতুর্ব্বিংশত্যধ্যায়ৈর্ম্মনুবর্ণনম্ ।
তৎসুতৈশ্চর্ষিদেবেন্দ্রৈর্মূর্ত্তিভিশ্চ হরেঃ সহ ॥ (১)

প্রতিমন্বন্তরঞ্চৈব মন্বাদ্যাঃ ষট্ পৃথক্ পৃথক্ ।
প্রবর্ত্তয়ন্তি সদ্ধর্ম্মান্ পালয়ন্ত্যাচরন্তি চ ॥ (২)

অতো মন্বন্তরস্যোক্তং সদ্ধর্ম্ম ইতি লক্ষণম্ ।
যেন বৈ ক্রিয়মাণেন নরো ন নিরয়ং ব্রজেৎ ॥ (৩)

তত্র তু প্রথমে স্বায়ম্ভুবঃ স্বারোচিষস্তথা ।
উত্তমস্তামসশ্চেতি চতুর্ম্মনুনিরূপণম্ ॥ (৪)

স্বায়ম্ভুবেঽন্তরেঽনন্তদুরন্তগুণবর্ণনাৎ ।
মুদিতঃ পরিপপ্রচ্ছ সর্ব্বমন্বন্তরস্থিতিম্ ॥ (৫)

১—৩। স্বায়ম্ভুবস্যেতি ত্রিভিঃ। (১) যত্র বিশ্বসৃজাং মরীচ্যাদীনাং মনুকন্যাসু পুত্রপৌত্রাদিসর্গঃ ॥ (২) মহীয়সো হরেঃ, অত্র ক্বচিদ্বহু পাঠান্তরমস্তি, তদুপেক্ষিতমস্মাভিঃ ॥ (৩) যস্মিন্নতীতে যৎ কৃতবান্, যস্মিন্ননাগতে যৎ কর্ত্তা করিষ্যতি, অদ্য বা বর্ত্তমানে যৎ কুরুতে, তদ্বদিত্যন্বয়ঃ ॥

৪। অস্মিন্ কল্পে ষণ্মনবো ব্যতীতাঃ ॥

৫। তস্য মনোর্দুহিত্রোঃ কপিলযজ্ঞমূর্ত্তিভ্যাং পুত্রতাং গতঃ প্রাপ্তঃ ॥

---

* "নমঃ শ্রীমৎপরমহংসাস্বাদিতচরণকমলচিন্মকরন্দায় ভক্তজনমানসনিবাসায় শ্রী-রামচন্দ্রায়।" ইত্যধিকঃ পাঠো ঘ-পুস্তকে দৃশ্যতে।

৮। ঘোরং দুশ্চরং তপস্তপ্যমানঃ সমাধাবনুভূতমিদং বক্ষ্যমাণং নিদ্রিতোচ্ছ্বসিতবদবিস্মিত ইব, উপদিশন্নিব, অনুবদন্নিব চাষ্টভিঃ শ্লোকৈরন্বাহ ॥

৯—১৬। (৯) যেন চিদাত্মনা বিশ্বং চেতয়তে চেতনীভবতি, বিশ্বন্তু যং ন চেতয়তে চেতনীকরোতি, স্বতএব চিদ্রূপত্বাৎ। তত্র হেতুঃ—অস্মিন্ শয়ানে স্বপতি সতি যো জাগর্ত্তি সাক্ষিতয়া বর্ত্ততে, অহো চিত্রং নায়ং জনস্তং বেদ, স ত্বিমং বেদ॥ (১০) তস্যেশ্বরত্বং দর্শয়ন্ লোকস্য হিতমুপদিশতি—আত্মনেশ্বরেণাবাস্যং সত্তাচৈতন্যাভ্যাং ব্যাপ্যং[১] বিশ্বং সর্ব্বং জগত্যাং লোকে যৎ কিঞ্চিজ্জগদ্ ভূতজাতম্ অতস্তেনেশ্বরেণ যৎ কিঞ্চিত্ত্যক্তং দত্তং যদ্ধনম্, তেনৈব ভুঞ্জীথা ভোগান্ ভুঙ্‌ক্ষ ; যদ্বা, তেন হেতুনা ত্যক্তেনেশ্বরার্পণেনৈব ভুঞ্জীথাঃ। স্বার্থং কস্যস্বিৎ কস্যচিদপি ধনং মা গৃধঃ—মাভিকাঙ্ক্ষীঃ ; যদ্বা, কস্যস্বিদিতি কস্যান্যস্য ধনমস্তি, যতো ধনাকাঙ্ক্ষা ক্রিয়েতেত্যর্থঃ ; তথা চ শ্রুতিঃ —'ঈশাবাস্যম্' ইতি যথাশ্লোকমেব ॥ (১১) ননু যদি সর্ব্বং ব্যাপ্নোতি, তর্হি চক্ষুরাদিভিঃ কিং ন প্রতীয়তে ? তত্রাহ—যং পশ্যন্তং জনশ্চক্ষুর্বা ন পশ্যতি, চক্ষুরাদ্যবিষয়ত্বাৎ ; ন হি প্রমাতারং প্রমাণং বিষয়ীকরোতীতি ভাবঃ ; তথা চ শ্রুতিঃ —'চক্ষুষশ্চক্ষুরুত শ্রোত্রস্য শ্রোত্রম্' ইত্যাদি। ননু তর্হি ঘটনাশে দেবদত্তস্য তদ্বিষয়ং চাক্ষুষং জ্ঞানমিবেশ্বরস্যাপি স্বরূপভূতং তদ্বিষয়ং জ্ঞানং নশ্যেৎ ? তত্রাহ—যস্য তু পশ্যতশ্চক্ষুর্জ্ঞানং ন রিষ্যতি ন নশ্যতি ; তত্তদাকারেণোৎপন্নায়া বৃত্তেরেব নাশঃ, ন স্বতঃসিদ্ধস্য জ্ঞানস্য ; ন হি সবিতৃপ্রকাশঃ প্রকাশ্যনাশে নশ্যতীতি ভাবঃ। ভূতানি নিলয়ো যস্য তং সর্ব্বান্তর্যামিণং তথাপি সুপর্ণং শোভনপতনমসঙ্গমুপধাবত ভজধ্বম্ ॥ (১২) তৎস্বরূপস্য নিত্যতামুপপাদয়ন্নাহ—ন যস্যেতি। অমূন্যাদ্যন্তাদীনি বিশ্বস্য যস্মাদ্ভবন্তি, বিশ্বঞ্চ যদ্ যদ্রূপম্,

---

১। সংব্যাপ্তং (ঘ)।

অতএবাব্যভিচারিত্বাত্তদৃতং সত্যং মহৎ পরিপূর্ণং ব্রহ্ম॥ (১৩) ননু বিশ্বঞ্চেত্তদ্রূপম্, তর্হি তস্য কুতো জন্মাদ্যভাবঃ স্বপ্রকাশত্বং বা, কথং বা জগজ্জন্মাদিকর্তৃত্বেন বিকারিণঃ সত্যত্বং পরিপূর্ণত্বং বা? অত আহ—স ঈশঃ, অজঃ, সত্যঃ, স্বপ্রকাশঃ, পুরাণো নির্ব্বিকারঃ, বিশ্বং কায়ো যস্য, পুরূণি ভূতানি নামানি যস্য, তথাবিধোঽপি; যতোঽস্য বিশ্বস্য জন্মাদি স্বশক্ত্যা মায়য়া ধত্তে, তাঞ্চ নিত্যসিদ্ধয়া বিদ্যয়োদস্য হিত্বা নিষ্ক্রিয় এবাস্তে॥ (১৪) যদ্‌যস্মাদেবমীশ্বরঃ কর্ম্ম কৃত্বা সন্ত্যজ্য নৈষ্কর্ম্মেণাস্তে, অথ তস্মাদ্ধেতোঋর্ষয়োঽপ্যগ্র আদৌ কর্ম্মাণি কুর্ব্বন্তি। কিমর্থম্? অকর্ম্ম-হেতবে মোক্ষার্থম্; কর্ম্মহন্তবে ইতি পাঠে কর্ম্মনাশায়। হি—যস্মাৎ॥ (১৫) নন্বীহমানঃ কর্ম্মভিরবগুণ্ঠিতঃ কোশকার ইব বধ্যেতৈব? তত্রাহ—ঈহত ইতি। অতস্তমনুবর্ত্তমানা যে তে নাবসীদন্তি, ন বিসজ্জন্তে॥ (১৬) তদেবং লোকানুগ্রহায় বিশ্বসৃষ্ট্যাদি যঃ করোতি, শ্রীরামকৃষ্ণাদ্যবতারৈশ্চ বেদোক্তমপ্যাচরতি, তং শরণং ব্রজামীত্যাহ—তমিতি। নিজবর্ত্ম নরাব-তারানুরূপো মার্গস্তত্র সম্যক্ স্থিতম্, অত ঈহমানং কর্ম্মাচরন্তম্, তথাপি জীববৈলক্ষণ্যমাহ—নিরহঙ্কৃতম্, নিরাশিষম্, অনন্যচোদিতমিতি চ। নিরহ-ঙ্কারত্বে হেতুঃ—বুধম্; নিরাশীষ্ট্বে হেতুঃ—পূর্ণম্; অনন্যনিযুক্তত্বে হেতুঃ—প্রভুম্; তথাপি কর্ম্মানুষ্ঠানে হেতুঃ—নৄন্ স্বাচারেণ শিক্ষয়ন্তম্। তৎ কিমর্থম্? তত্রাহ—অখিলধর্ম্মান্ ভাবয়তি প্রবর্ত্তয়তীতি তথা তম্॥

১৭। সমাহিতমপি সন্তং মন্ত্রোপনিষদং ব্যাহরন্তং দৃষ্ট্বা সুপ্তোচ্ছ্বসিত-বদ্বিবশমিব মত্বাসুরা যাতুধানাশ্চ ক্ষুধা নিমিত্তেন জগ্ধুমত্তুমভ্যদ্রবন্নভি-দুদ্রুবুঃ॥

১৮। যামৈঃ স্বপুত্রৈঃ, ত্রিবিষ্টপং স্বর্গমপালয়ৎ, স্বয়মিন্দ্রোঽভূদিত্যর্থঃ। তত্র প্রতিমন্বন্তরং মন্বাদয়ঃ ষড়ন্যেঽন্যে ভবন্তি। তথা হি সূতো দ্বাদশে বক্ষ্যতি—'মন্বন্তরং মনুর্দ্দেবা মনুপুত্রাঃ সুরেশ্বরঃ। ঋষয়োঽংশাবতারাশ্চ হরেঃ

ষড়্ বিধমুচ্যতে ॥' ইতি। তত্রাদ্যে স্বায়ম্ভুবো মনুঃ, প্রিয়ব্রতোত্তানপাদৌ মনু-পুত্রৌ, যামাদয়ো দেবাঃ, মরীচিপ্রমুখাঃ সপ্ত ঋষয়ঃ, যজ্ঞো হরেরবতার ইন্দ্রশ্চ স এবেতি তন্মন্বন্তরং পঞ্চবিধমেব, তচ্চ চতুর্থস্কন্ধোপক্রমে নিরূপিতম্ ॥

১৯। দ্বিতীয়াদিত্রিষু মন্বন্তরেষু মন্বাদি-ষট্‌কমাহ—স্বারোচিষো দ্বিতীয়-স্ত্বিতি, যাবদ্‌গজেন্দ্রমোক্ষপ্রশ্নম্ ॥

২২। বিভোরসাধারণচরিতমাহ—অষ্টাশীতিসহস্রাণীতি ॥

২৬। সত্যজিত ইন্দ্রস্য সখা সন্ ॥

২৭। উত্তমস্তৃতীয়ো মনুস্তস্য ভ্রাতা তামসশ্চতুর্থো মনুঃ ॥

২৮। ত্রিশিখ ঈশ্বর ইন্দ্রঃ ॥

২৯। অন্যানপি বিশিষ্টপরাক্রমান্ দেবানাহ—দেবা বৈধৃতয় ইতি ॥

৩০। হরিরিত্যাহুতো ব্যাহৃতঃ ; গ্রহাৎ—গ্রাহাৎ ॥

৩১। অমূমুচৎ—মোচয়ামাস ॥

৩২। শ্রবণেচ্ছায়াং হেতুঃ —তৎকথাসু তাসু কথাসু, সা কথৈব বা সুমহৎ পুণ্যম্। পুণ্যস্য বিশেষণং ধন্যমিত্যাদি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
প্রথমোঽধ্যায়ঃ ॥ ১ ॥

দ্বিতীয়োঽধ্যায়ঃ

তুর্য্যে মন্বন্তরে প্রোক্তং গজেন্দ্রস্য বিমোক্ষণম্।
দ্বিতীয়াদিত্রিভিস্তত্তু বিস্তরেণোপবর্ণ্যতে ॥ (১)

দ্বিতীয়ে তু গজেন্দ্রস্য গজীভিঃ ক্রীড়তো জলে।
দৈবাদ্‌গ্রাহগৃহীতস্য হরিস্মৃতিরুদীর্য্যতে ॥ (২)

১। আসীৎ—অস্তি ॥

২। তাবতা যোজনাযুতেন, পর্য্যক্ পরিতঃ। 'ত্রিকূট'-সমাখ্যাবীজমাহ—ত্রিভিঃ শৃঙ্গৈর্মুখ্যৈঃ ॥

৩। অন্যৈশ্চ শৃঙ্গৈর্নির্ঝরাম্ভসাং নির্ঘোষৈশ্চ ককুভঃ সর্ব্বা রোচয়ন্নাস্ত ইতি পূর্ব্বেণান্বয়ঃ। কথম্ভূতৈঃ শৃঙ্গৈঃ? রত্নৈর্ধাতুভিশ্চ বিচিত্রিতৈঃ, নানাবিধানাং দ্রুমলতানাং গুল্মা যেষু তৈঃ ॥

৪। পয়স ঊর্ম্মিভিঃ সমন্তাদবনিজ্যমানা অঙ্ঘ্রয়ো মূলপ্রান্তা যস্য। হরিদ্ভিঃ পালাশবর্ণৈঃ ॥

৬। কিন্নরাদীনাং সঙ্গীতসন্নাদৈর্নদন্ত্যো গুহা যস্মিন্ প্রদেশে তম্, অভিগর্জ্জন্তি হরয়ঃ সিংহাঃ; অমর্ষয়া—অসহনেন ॥

৭। নানা যে আরণ্যাঃ পশবস্তেষাং ব্রাতৈঃ সঙ্কুলাভির্দ্রোণীভিরলঙ্কৃত আস্তে। কিঞ্চ, চিত্রা দ্রুমা যেষু তেষু সুরোদ্যানেষু কলকণ্ঠা মধুস্বনা বিহঙ্গমা যস্মিন্ ॥

৮। কিঞ্চ, অচ্ছোদকৈঃ সরিৎসরোভির্যুতঃ, মণয় ইব বালুকা যেষু তৈঃ পুলিনৈশ্চ যুতঃ, দেবস্ত্রীণাং মজ্জনেন য আমোদস্তেন সৌরভযুক্তা-স্তম্বূন্যনিলাশ্চ, তৈশ্চ যুত আস্তে ॥

৯। তস্য দ্রোণ্যাং বরুণস্যোদ্যানমস্তি ॥

১০—১৩। গিরিবনাদিকং ধ্যেয়ত্বেন[১] বক্ষ্যতি। (১০) অতো গিরিমুপবর্ণ্য বনমুপবর্ণয়তি—সর্ব্বতোঽলঙ্কৃতমিতি। পুনর্গিরিং বর্ণয়তি—মন্দারৈরিতি চতুর্ভিঃ। মন্দারাদিভির্বৃত ইত্যন্বয়ঃ ॥

১৪—১৯। তস্মিন্ গিরৌ সর আস্তে, তদ্বর্ণয়তি—সুবিপুলমিত্যাদি-সার্দ্ধৈঃ পঞ্চভিঃ। (১৪) লসন্তি কাঞ্চনপঙ্কজানি যস্মিন্ ॥ (১৫) কুমুদাদীনাং শ্রিয়োর্জ্জিতম্; কলঃ স্বনো যেষাং তৈঃ শকুন্তৈশ্চ নিঘুষ্টম্ ॥ (১৬) চক্রাহ্বৈঃ সারসৈরপ্যাকীর্ণম্; জলকুক্কুটাদীনাং কুলৈঃ কূজিতম্ ॥

১। গিরিবনাদি সর্ব্বং ধ্যেয়মিতি (ঘ)।

(১৭) মৎস্যানাং কচ্ছপানাঞ্চ সঞ্চারেণ চলতাং পদ্মানাং রজসা যুক্তং পয়ো যস্মিংস্তৎ ॥ (১৯) নিত্যমৃতবঃ ফলপুষ্পাদিসম্পত্তিহেতবো যেষাং তৈরলং শোভিতম্ ॥

২০—২৪। (২০) তত্রৈবং সত্যেকদা তদ্গিরিকাননাশ্রয়ো বারণযূথপঃ করেণুভিশ্চরংস্তৃষার্দ্দিতেন স্বযূথেন বৃতস্তস্য সরোবরস্যাভ্যাসং সমীপমগমদিতি পঞ্চমেনান্বয়ঃ। কিং কুর্ব্বন্ ? কীচকবেণুবেত্রবন্তং বিশালং গুল্মং লতাদি-সন্দর্ভং বনস্পতীংশ্চ প্ররুজন্ প্রভঞ্জন্ ॥ (২১) কথম্ভূতঃ ? যস্য গন্ধ-মাত্রাদ্ধরয়ঃ সিংহা গজেন্দ্রাদয়শ্চ ভয়াদ্দ্রবন্তি পলায়ন্তে ॥ (২২) বৃকাদয়স্তু ক্ষুদ্রা অল্পাঃ প্রাণিনোঽন্যত্র তদ্দৃষ্টিপথং ত্যক্ত্বা চরন্তি ॥ (২৩) পুনঃ কীদৃশঃ ? ঘর্ম্মতপ্তো মদচ্যুন্মদস্রাবী ; মদমশ্নন্তীতি তথা তৈঃ ॥

২৫। নিজেন পুষ্করেণ করাগ্রেণোদ্ধৃতম্, গতক্লমঃ সন্ নিকামং পপৌ ॥

২৮। দীনধিয়ঃ করেণবস্তং কেবলং বিচুক্রুশুঃ ॥

৩০। মন উৎসাহশক্তিঃ, বলং শারীরম্, ওজ ঐন্দ্রিয়ম্ তেষাম্ ; সকলং বলাদি বিপর্য্যয়ো বিপরীতমধিকম্ , জলৌকসো গ্রাহস্য ॥

৩১। স ইত্থং যদা প্রাণসঙ্কটমাপ ; যতো দেহী ॥

৩২। বুদ্ধিমেবাহ—ন মামিতি। অহঞ্চ ন প্রভবামি ; যতো গ্রাহ-রূপেণ কেবলং বিধাতুঃ পাশেনাবৃতস্তথাপি তং পরং পরমেশ্বরং পরেষাং ব্রহ্মাদীনাময়নমাশ্রয়ভূতং শরণং ব্রজামি[১] ॥

৩৩। কোঽসৌ, যং শরণং যামি[২] ? তত্রাহ—যঃ কশ্চনেতি। অন্তক এবোরগস্তস্মাত্তং শরণমীমহি ব্রজেম। যদ্ভয়াদিত্যত্র শ্রুতিঃ —'ভীষাস্মাদ্বাতঃ পবতে, ভীষোদেতি সূর্য্যঃ, ভীষাস্মাদগ্নিশ্চন্দ্রশ্চ মৃত্যুর্ধাবতি পঞ্চমঃ' ইতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

১। যামি (ঘ); ২। যাসি (ঘ)।

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে তু গজেন্দ্রেণ স্তুতো হরিরুপেত্য তম্।
সমুদ্দধার তং গ্রাহাদ্‌গ্রাহং দেবলশাপতঃ॥ (১)

১। জাপ্যম্—জপ্যং স্তোত্রম্। প্রাগ্‌জন্মনি—ইন্দ্রদ্যুম্নসংজ্ঞে॥

২। তস্মৈ নমো নমনম্, অভিধীমহি—অভিধ্যায়েম, কেবলং গ্রাহ-গৃহীতত্বেন কায়প্রণতেরশক্যত্বাৎ। স্বস্য তজ্‌জ্ঞানং সম্ভাবয়িতুং তং বিশিনষ্টি—যতশ্চিদ্রূপাদেতদ্দেহাদি চিদাত্মকং চেতনং ভবতি। তদুক্তম্—'যেন চেতয়তে বিশ্বম্' ইতি। তত্র হেতুঃ—পুরুষায় পূর্ব্বকারণত্বেন প্রবিষ্টায়। নন্থ 'প্রকৃতিপুরুষৌ কারণে' ইতি প্রসিদ্ধিঃ? তত্রাহ—আদিঃ প্রকৃতিবীজং পুরুষস্তদ্রূপায়। প্রবিষ্টত্বেঽপি জীববৎ পারতন্ত্র্যং বারয়তি—পরেশায়েতি॥

৩। পরমৈশ্বর্য্যং বিবৃণ্বন্নাহ যাবৎসমাপ্তি। যস্মিন্নধিষ্ঠানে, যত উপাদানাৎ, যেন কর্ত্রা, যশ্চ স্বয়মেবেদং বিশ্বং ভবতি, অস্মাৎ কার্য্যাৎ, পরস্মাৎ কারণাচ্চ যঃ পরস্তং স্বয়ম্ভুবং স্বতঃসিদ্ধং প্রপদ্যে, শরণং ব্রজামি॥

৪। বিশ্বহেতুত্বং স্বতঃসিদ্ধত্বঞ্চোক্তম্, ইদানীং বিশ্বপ্রকাশকত্বং স্ব-প্রকাশকত্বঞ্চ বর্ণয়ন্ প্রার্থয়তে—যঃ স্বাত্মনীতি। বিভাতমভিব্যক্তং সৎ ক্বচিচ্চ প্রলয়ে তিরোহিতং লীনং স্যাৎ, তদুভয়ং কার্য্যং কারণঞ্চ সাক্ষী সমীক্ষতে। সাক্ষিত্বে হেতুঃ—অবিদ্ধদৃগলুপ্তদৃষ্টিঃ; আত্মমূলঃ—স্ব-প্রকাশঃ। কুতঃ? পরাৎ প্রকাশকাচ্চক্ষুরাদেঃ পরস্তস্যাপি প্রকাশক ইত্যর্থঃ, 'চক্ষুষশ্চক্ষুঃ' ইতি শ্রুতেঃ॥

৫—৬। তিরোহিতমীক্ষত ইত্যেতৎ-প্রপঞ্চপূর্ব্বকং দুর্জ্ঞেয়ত্বং বদন্ প্রার্থয়তে—কালেনেতি দ্বাভ্যাম্। (৫) পঞ্চত্বমিতেষু নাশং প্রাপ্তেষু; গহনং দুরবগাহম্, গভীরমনন্তম্; তস্য তমসঃ, 'আদিত্যবর্ণং তমসঃ পরস্তাৎ' ইতি শ্রুতেঃ॥ (৬) অতএব দেবাদয়ো যস্য স্বরূপং ন বিদুঃ,

জন্তুরর্ব্বাচীনঃ কোঽপি গন্তুং জ্ঞাতুম্, ঈরিতুং বক্তুং বা। দুরত্যয়ং দুর্গমমনুক্রমণং চরিতং কথনং বা যস্য, স মা মাম্ ॥

৭। কথং তর্হি 'তমেব বিদিত্বাতিমৃত্যুমেতি' ইত্যাদিশ্রুতিরিত্যাশঙ্ক্য তজ্‌জ্ঞানোপায়ং কথয়ন্নাহ—দিদৃক্ষব ইতি। অলোকব্রতং ব্রহ্মচর্য্যাদি, অব্রণমচ্ছিদ্রম্। ভূতানামাত্মভূতাস্তেষ্বাত্মদৃষ্টয়ঃ সন্তঃ। স মে গতিরস্তু ॥

৮। দুরত্যয়ানুক্রমণত্বং প্রপঞ্চয়ন্ প্রণমতি—ন বিদ্যত ইত্যাদিনা। লোকানামপ্যয়ঃ প্রলয়ঃ সম্ভবো জন্ম তয়োর্দ্বন্দ্বৈক্যম্, তদর্থে যস্তানি জন্মাদীনি স্বীকরোতি, তস্মৈ নম ইত্যুত্তরেণান্বয়ঃ ॥

৯। ব্রহ্মণেঽরূপায়ানন্তশক্তয়ে, উরুরূপায়, যত আশ্চর্য্যাণি কর্ম্মাণি যস্য, তস্মৈ পরেশায় নমঃ ॥

১০। আত্মপ্রদীপায় প্রকাশান্তরস্যাবিষয়ায়। কুতঃ? সাক্ষিণে স্ব-প্রকাশকায়, পরমাত্মনে জীবনিয়ন্ত্রে, অতএব গিরাং বিদূরায়াপ্রাপ্যায়, চেতসাং চিত্তবৃত্তীনাঞ্চ; তথা চ শ্রুতিঃ—'যতো বাচো নিবর্ত্তন্তে অপ্রাপ্য মনসা সহ' ইতি ॥

১১। এবমপি বিপশ্চিতা নির্গুণেন[১], নৈষ্কর্ম্ম্যেণ সন্ন্যাসেন, সত্ত্বেন শুদ্ধেন, 'সন্ন্যাসযোগাদ্‌যতয়ঃ শুদ্ধসত্ত্বাঃ' ইতি শ্রুতেঃ, প্রতিলভ্যায় প্রত্যক্ষেণ প্রাপ্যায়; নির্ব্বাণসুখ-সংবিদে মোক্ষানন্দানুভূতয়ে ॥

১২। গুণধর্ম্মিণে সত্ত্বাদিধর্ম্মানুকারিণে, জ্ঞানঘনায় চেতি নির্বিবশেষত্বেঽপি প্রধানবৈলক্ষণ্যমুক্তম্ ॥

১৩। সাক্ষিণ ইতি সর্ব্বাধ্যক্ষত্বেঽপি নির্ব্বিকারত্বমুক্তম্। আত্মনাং ক্ষেত্রজ্ঞানাং মূলায়, মূলস্য প্রধানস্যাপি প্রকৃতয় উদ্ভবহেতবে; তত্র হেতুঃ—পুরুষায় পূর্ব্বমেব সতে; তথা চ শ্রুতিঃ—'পূর্ব্বমেবাহমিহাসম্' ইতি, 'তৎপুরুষস্য পুরুষত্বম্' ইতি, পূর্ণায়েতি বা ॥

১। নিপুণেন (ঘ)।

১৪। সর্ব্বেন্দ্রিয়াণাং যে গুণা বিষয়াস্তেষাং দ্রষ্ট্রে, সর্ব্বে প্রত্যয়া ইন্দ্রিয়বৃত্তয়ো হেতবো জ্ঞাপকা যস্য, তস্মৈ। তদেবাহ—অসতাহঙ্কারাদি-প্রপঞ্চেন ছায়য়াসদ্রূপয়োক্তায় প্রতিবিম্বেন বিম্বমিব সূচিতায় ; তত্র হেতুঃ —সদ্রূপো বিষয়েষ্বাভাসো যস্য, তস্মৈ। তদুক্তং তৃতীয়ে—'যথা জলস্থ আভাসঃ' ইত্যাদিনা। অসত্যচ্ছায়য়াহংক্তায় ইতি পাঠে অসত্যস্য ছায়য়া-ধ্যাসেনাক্তায় যুক্তায় তদধিষ্ঠানায়েত্যর্থঃ ॥

১৫। অখিলকারণায় সর্ব্বকারণরূপায়, অতএব স্বয়ং নিষ্কারণায়। কারণত্বেঽপি মৃদাদিবদ্বিকারং বারয়তি— অদ্ভুতকারণায়েতি। এবম্ভূতত্বে প্রমাণমাহ—সর্ব্বে আগমাঃ পঞ্চরাত্রাদয় আম্নায়াশ্চ বেদাস্তেষাং মহার্ণবায় স্রোতসামিব পর্য্যবসানস্থানায়, অপবর্গায় মোক্ষরূপায়, অতঃ পরায়ণায়ো-ত্তমানামাশ্রয়ায় ॥

১৬। গুণা এবারণিস্তয়াচ্ছন্নো যশ্চিতূষ্মপঃ জ্ঞানাগ্নিস্তস্মৈ, তেষাং গুণানাং ক্ষোভে কার্য্যে বিস্ফূর্জিতং বহির্বৃত্তিকং মানসং যস্য, 'সোঽকাময়ত বহু স্যাম্' ইতি শ্রুতেঃ। নৈষ্কর্ম্ম্যমাত্মতত্ত্বম্, তস্য ভাবেন ভাবনয়া বিবর্জ্জিতা আগমা বিধিনিষেধলক্ষণা যৈস্তেষু স্বয়মেব প্রকাশো যস্য, তস্মৈ ॥

১৭। মাদৃঙ্ মদ্বিধশ্চাসৌ প্রপন্নঃ পশুশ্চ, তস্য পাশোঽবিদ্যা, তস্য বিশেষেণ মোক্ষণং যেন। তত্র[১] যোগ্যতামাহ—মুক্তায়। মোচনে হেতুঃ —ভূরিঃ করুণা যস্য, অতস্তত্রার্থেঽলয়ায়ানলসায় ; স্বাংশেনান্তর্যামি-রূপেণ সর্ব্বেষাং তনুভূতাং মনসি প্রতীতা প্রখ্যাতা যা প্রত্যগ্ দৃগ্ জ্ঞানম্, তস্মৈ ; তথা চ শ্রুতিঃ —'য আত্মনি তিষ্ঠন্নাত্মানমন্তরো যময়তি' ইতি ; ভগবতে সর্ব্বেষাং তনুভূতাং নিয়মনে সমর্থায় ; তেষাং মনসি স্থিতত্বেঽপি বৃহতেঽপরিচ্ছিন্নায় ॥

১। তস্য (গ)।

১৮। অন্তঃস্থিতত্বেঽপি দেহাদিম্বাসক্তৈর্দুষ্প্রাপণায় প্রাপ্তুমশক্যায়; তত্র হেতুঃ—গুণসঙ্গেন বিবর্জ্জিতায়, অতএব মুক্তাত্মভির্দেহাদিম্বনাসক্তৈ-শ্চিন্তিতায়; তৈঃ পরিভাবিতং রূপমাহ—জ্ঞানাত্মন ইত্যাদি॥

১৯। ইষ্টাং গতিং কামিতং ধর্ম্মাদিফলং প্রাপ্নুবন্ত্যেব, ন চ[১] তাবদেব, কিন্তু যান্তৈরকামিতাস্তা অন্যা অপ্যাশিষো রাতি, দেহমপ্যব্যয়ং রাতি, এবং য অদভ্রদয়ঃ স মে বিমোক্ষণমেব কেবলং করোতু, নাধিকং প্রার্থয়ে॥

২০—২১। এতাবদপ্যহং ভক্তিসুখানভিজ্ঞত্বেন বাঞ্ছামি, যস্য ত্বেকান্ত-ভক্তাঃ কঞ্চনার্থং ন বাঞ্ছন্তি, তং পরেশমীড়ে স্তৌমীত্যুত্তরেণান্বয়ঃ। (২০) তেষাং নিষ্কামত্বে হেতুঃ—যে বৈ ভগবতঃ সর্ব্বজ্ঞান্ মুক্তান্ প্রপন্নাঃ সেবিতবন্তঃ॥ (২১) অত্যদ্ভুতত্ব-সুমঙ্গলত্ব-প্রদর্শনায়াক্ষরাদীনি বিশেষণানি॥

২২—২৪। পরিপূর্ণত্বং প্রদর্শয়ন্নাহ ত্রিভিঃ। (২২) যস্য ফল্গ্ব্যা স্বল্পয়ৈব কলয়াংশেন কৃতাঃ, স জয়তাদিতি তৃতীয়েনান্বয়ঃ॥ (২৩) কথং কৃতা ইত্যপেক্ষায়াং দৃষ্টান্তৌ—যথার্চ্চিষোঽগ্নেরিতি প্রবাহে দৃষ্টান্তঃ, সবিতু-র্গভস্তয় ইত্যানন্ত্যে। নির্যান্ত্যুদ্গচ্ছন্তি, সংযান্তি লীয়ন্তে। গুণসংপ্রবাহ-মেবাহ—বুদ্ধির্ম্মন ইতি, খানি করণানি, শরীরসর্গাঃ কার্য্যদেহ-প্রবাহাশ্চ যতো ভবন্তি, সঃ॥ (২৪) অতএব দেবাদীনাং মধ্যে কোঽপি ন ভবতি; ন জন্তুর্লিঙ্গত্রয়শূন্যং প্রাণিমাত্রমপি, কিন্তু সর্ব্বস্য নিষেধেঽবাধিত্বেনাবশিষ্যত ইতি নিষেধশেষঃ। মায়য়া অশেষাত্মকশ্চ জয়তাৎ মদ্বিমোক্ষণায়াবি-র্ভবতু॥

২৫। ন চ গ্রাহাচ্ছরীরস্য মোক্ষণেনাহং জীবিতুমিচ্ছামি। তত্র হেতুঃ—অমুয়ান্তর্ব্বহিশ্চাবিবেকব্যাপ্তয়া গজজাত্যা কিং প্রয়োজনম্? আত্মলোকস্যাত্মপ্রকাশস্য যদাবরণমজ্ঞানম্, তস্যৈব তু মোক্ষমিচ্ছামি, যস্য

১। নতু (ঘ)।

মোক্ষস্ত কালেন নাশো নাস্তি; যদ্বা, দেহস্থ বন্ধো দেহনাশে নশ্যেদেব, কিং তন্মোক্ষপ্রার্থনেন? আত্মলোকাবরণস্ত তু কালেন বিপ্লবো নাস্তি, জ্ঞানৈকনিবর্ত্ত্যত্বাৎ; অতস্তস্যৈব মোক্ষমিচ্ছামীত্যর্থঃ॥

২৬। সোঽহং মুমুক্ষুর্বিশ্বং বিশ্বরূপম্, অবিশ্বং বিশ্বব্যতিরিক্তঞ্চ; বিশ্বং বেদো ধনমুপকরণং যস্য তং বিশ্বস্যাত্মানঞ্চ কেবলং প্রণতোঽস্মি, ন তু তং জানামি॥

২৭। যোগং বিনা দুর্জ্ঞানত্বাদিত্যাহ—যোগেন ভগবদ্ধর্ম্মেণ রন্ধিতানি দগ্ধানি কর্ম্মাণি যেষাং তে যং প্রপশ্যন্তি॥

২৮—২৯। তর্হি সর্ব্বেঽপি যোগমেব কিং নাস্থিতাঃ? তত্রাহ—নম ইতি দ্বাভ্যাম্। (২৮) অসহ্যবেগো রাগাদিলক্ষণো যস্য তথাভূতং শক্তিত্রয়ং যস্য, তস্মৈ; বহিশ্চাখিলধিয়াং সর্ব্বেন্দ্রিয়াণাং গুণায়; শব্দাদিস্বরূপেণ প্রতীয়মানায়; অতঃ কদিন্দ্রিয়াণাং কুৎসিতানীন্দ্রিয়াণি যেষাং তেষামনবাপ্যং বর্ত্ম যস্য॥ (২৯) যচ্ছক্ত্যা যস্য মায়য়া যা অহংধীস্তয়া হতমাবৃতম্, অয়ং জনো ন বেদ দুরত্যয়ং মাহাত্ম্যং যস্য, তমিত আশ্রিতোঽস্মি॥

৩০। উপবর্ণিতং নির্বিশেষং মূর্ত্তিভেদং বিনা পরং তত্ত্বং যেন তম্; বিবিধা চাসৌ লিঙ্গভিদা চ মূর্ত্তিভেদস্তস্যামভিমানো যেষাং তে, অতএবৈতে যদা নোপজগ্মুস্তত্র, তদাখিলামরময়ঃ সর্ব্বদেবময়মূর্ত্তিঃ॥

৩১। দিবিজৈর্দেবৈঃ সহ ছন্দোময়েনেতি শৈঘ্র্যায়োক্তম্॥

৩২। খে দৃষ্ট্বা; উপাত্তমুদ্যতং চক্রং যেন॥

৩৩। গরুড়োঽপি মন্দগতিরিতি, ততঃ সহসাবতীর্য্যারিণা চক্রেণ বিপাটিতং মুখং যস্য; উচ্ছ্রিয়াণাং দেবানাম্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

তৃতীয়োঽধ্যায়ঃ॥ ৩॥

চতুর্থোঽধ্যায়ঃ

চতুর্থে তু তয়োর্গ্রাহঃ প্রাপ্য গন্ধর্ব্বতাং পুনঃ ।

গজং স্বপার্ষদং কৃত্বা হরির্নিন্যে স্বকং[১] পদম্ ॥ (১)

৩। হূহূসংজ্ঞো যো গন্ধর্ব্বসত্তমঃ, অসৌ দেবলশাপেন গ্রাহো জাতঃ, স বৈ স তু ততঃ সদ্যো মুক্তঃ সন্নুত্তমঃশ্লোকমগায়তেত্যন্বয়ঃ। এবং হীতিহাসোত্তমে কথা—"সরসি স্ত্রীভিঃ ক্রীড়ন্নসৌ স্নাতুং প্রবিষ্টং দেবলং পাদে প্রগৃহ্য বিচকর্ষ, স চ কুপিতো 'গ্রাহো ভব' ইতি শশাপ, তেন চ প্রসাদিতঃ সন্নুবাচ—'এবমেব গজেন্দ্রং গৃহ্ণীষ, ততশ্চ গজেন্দ্রমুদ্ধরন্ হরিস্ত্বামপি মোচয়িষ্যতি" ইতি ॥

৪। কথম্ভূতম্ ? যশসো ধামাশ্রয়ম্, অতঃ কীর্ত্তন্যাঃ কীর্ত্তনীয়া গুণাঃ সতী কথা চ যস্য তম্ ॥

৫। স্বং লোকম্—গন্ধর্ব্বলোকম্ ॥

৮। কুলাচলে মলয়াদ্রাবাশ্রমো যস্য ॥

৯। তূষ্ণীং রহস্যুপাসীনং বীক্ষ্য ॥

১০। শাপমেবাহ—অসাধুরিত্যাদি। অকৃতাশিক্ষিতা বুদ্ধির্যস্য ; গজো যথা স্তব্ধমতিস্তথৈবায়ম্ অতঃ স এব গজ এব ভবত্বিতি শেষঃ ॥

১১। দিষ্টং দৈবপ্রাপিতং[২] তদুপধারয়ন্নালোচয়ন্ ॥

১২। কৌঞ্জরীং যোনিমাপন্নস্তর্হি পশ্চাৎ কথং স্মৃতির্জ্জাতা ? তত্রাহ—হরেরর্চ্চনস্যানুভাবেনেতি ॥

১৩। অদ্ভুতং স্বভবনমগাৎ ॥

১৪। এতদ্গজরাজমোক্ষণং নাম কৃষ্ণানুভাবস্তবেরিতঃ। কথম্ভূতম্ ? তত্রাহ—স্বর্গ্যমিত্যাদি ; দুঃস্বপ্নং নাশয়তীতি তথা ॥

১। পরং (ক), নিজং (ঘ) ; ২। দৈবার্পিতং (ঘ)।

১৫। অতঃ শ্রেয়স্কামা য এতদ্‌যথাবদনুকীর্ত্তয়ন্তি ॥

১৬—২৫। অনেন শ্রেয়ো ভবতীতি কুতো জ্ঞাতম্? সাক্ষাদ্ভগবদ্-বচনাদেব, ইত্যাহ—ইদমাহেত্যাদি যাবৎ পরিসমাপ্তি ॥ (১৭) প্রসঙ্গাদন্য-স্যাপি স্মরণে ফলমুচ্যতে। সর্ব্বেষাং দ্বিতীয়ান্তানাং স্মরন্তীত্যষ্টমেনান্বয়ঃ ॥ (২২) অব্যক্তং মায়াম্, অব্যয়ং ধর্ম্মং ভক্তিলক্ষণম্। সোমকশ্যপয়োরপি পত্নীর্দাক্ষায়ণীঃ ॥ (২৩) সিতবারণম্—ঐরাবতম্ ॥ (২৪) সুসমাহিতা একাগ্রচিত্তাঃ; মম রূপাণি—মদ্বিভূতীঃ ॥

২৬। জলজোত্তমং শঙ্খবরম্, প্রধ্মায় বাদয়িত্বা ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
চতুর্থোঽধ্যায়ঃ ॥ ৪ ॥

পঞ্চমোঽধ্যায়ঃ

অমৃতাখ্যানমষ্টাভিরধ্যায়ৈরনুবর্ণ্যতে।
স্বভক্তপক্ষপাতেন যত্র যোষায়িতং বিভোঃ[১] ॥ (১)
পঞ্চমে পঞ্চমঞ্চাথ ষষ্ঠঞ্চাকথয়ন্মনুম্।
বিপ্রশাপাচ্চ নিঃশ্রীকৈঃ কৃতাং দেবৈর্হরিস্তুতিম্ ॥ (২)

২। তামসশ্চতুর্থো মনুঃ, তস্য সোদরো ভ্রাতা ॥

৬। তস্য বৈকুণ্ঠসংজ্ঞস্য হরেরনুভাবঃ—সনকাদিশাপেন দৈত্যতাং প্রাপ্তাভ্যাং স্বপার্ষদাভ্যাং বারাহাদিরূপেণ যুদ্ধাদিলক্ষণঃ; গুণাশ্চ ব্রহ্মণ্য-তাদয়ঃ, পরমোদয়াশ্চ মহর্দ্ধয়ঃ কথিতাস্তৃতীয়স্কন্ধাদিষু ॥

১১। যতো হেতোরমুচরাত্মনা কূর্ম্মরূপেণ ॥

১। প্রভোঃ (ঘ)।

১২। 'সুরাণাং সাধিতা সুধা' ইত্যুক্ত্যা যুদ্ধাদ্যপি সূচিতম্। অতঃ পৃচ্ছতি—কিঞ্চান্যদিতি ॥

১৫। নোত্তিষ্ঠেরন্—ন পুনর্জীবন্তি স্মেত্যর্থঃ ॥

১৬। দুর্ব্বাসসা হি কদাচিন্মার্গে গচ্ছন্তমিন্দ্রং দৃষ্ট্বা স্বকণ্ঠস্থমালা তস্মৈ দত্তা, তেন চ শ্রীমদেনানাদৃত্যৈরাবতস্য কুম্ভয়োর্নিক্ষিপ্তা, স চ গজো মত্তঃ পদ্ভ্যাং তাং মালাং চূর্ণীচকার। ততঃ কুপিতো দুর্ব্বাসাস্তং শশাপ—'ত্রিভির্লোকৈঃ সহ নিঃশ্রীকো ভব' ইতি। তদেতদাহ—যদা দুর্ব্বাসঃশাপেনেতি। ইজ্যাদয়ো যাগাদ্যাঃ ॥

১৯। অসুরানযথা দেববৈলক্ষণ্যেন বলপুষ্ট্যাদিযুক্তান্ বিলোক্যেত্যর্থঃ ॥

২০। 'হরিং শরণং গতাঃ সন্তঃ যথাপূর্ব্বং সর্ব্বং প্রাপ্স্যামঃ' ইতি হর্ষেণোৎফুল্লং বিকসিতং বদনং যস্য সঃ ॥

২১। মনুষ্যাদয়ো জরায়ুজাণ্ডজোদ্ভিজ্জস্বেদজাঃ, যস্যাবতারঃ পুরুষস্তস্যাংশো ব্রহ্মা, তস্য কলা মরীচ্যাদয়স্তাভির্বিসর্জ্জিতাঃ পুত্রপৌত্রাদিদ্বারা জনিতাঃ ॥

২২—২৩। ননু তর্হি সর্ব্বেষ্বসৌ সমঃ স্যাৎ, কিং তচ্ছরণাশ্রয়েণ? সত্যম্, যদ্যপ্যেবম্, তথাপ্যস্মৎপক্ষপাতী ভবিষ্যতীত্যাশয়েনাহ—(২২) ন যস্যেতি দ্বাভ্যাম্॥ (২৩) স্থিতিপালনস্য ক্ষণঃ কালঃ, অতঃ সুরপ্রিয়ঃ সন্ স্বীয়ানাং নঃ শং শুভং[১] করিষ্যতি ॥

২৪। যত্র ক্ষীরাব্ধৌ হরের্বাসস্তদেব তমসঃ পরং স্থানম্; যদ্বা, লোকালোকাৎ পরতো যত্তমস্ততঃ পরং স্থানং জগাম ॥

২৫। দৈবীভির্লোকেঽপ্রসিদ্ধাভির্বৈদিকীভির্গীর্ভিঃ স্তুতিমকরোৎ ॥

১। সুখং (ঘ)।

২৬। দেববরং ত্বাং নমামহে নমাম ; হে দেব ! বরং ত্বাং নমামেতি বা। বরত্বে হেতুঃ—সত্যম্। কুতঃ ? অবিক্রিয়ম্। তৎ কুতঃ ? অনন্ত-মাদ্যন্তানাদিম্। আদ্যন্তবতো হি বৃদ্ধ্যাদিবিক্রিয়া[১] ভবন্তি। কিঞ্চ, গুহাশয়ং সর্ব্বান্তর্গতম্[২]। কুতঃ ? নিষ্কলং নিরুপাধিম্। তৎ কুতঃ ? অপ্রতর্ক্যম্। তৎ কুতঃ ? মনোঽগ্রযানং মনসোঽপি জবিষ্ঠম্, মনঃপ্রাপ্যে স্থানে ততঃ প্রাগেব বিদ্যমানত্বাৎ। তথা চ শ্রুতিঃ—'অনেজদেকং মনসো জবীয়ো, নৈনদ্দেবা আপ্নুবন্ পূর্ব্বমর্ষৎ। তদ্ধাবতোঽন্যানত্যেতি তিষ্ঠৎ' ইতি। বচসানিরুক্তম্, অবিষয়ত্বাৎ ; 'যদ্বাচা নাভ্যুদিতং যেন বাগভ্যুদ্যতে' ইতি শ্রুতেঃ। মনো-বচসোরগোচরত্বাদপ্রতর্ক্যম্ ; যথেষ্টং বা সর্ব্বেষাং হেতুহেতুমদ্ভাবঃ ॥

২৭। কিঞ্চ, প্রাণাদীনাং বিপশ্চিতং জ্ঞাতারম্। আত্মা—অহঙ্কারো দেহো বা। ন তু তদ্ব্যতিরিক্তং জ্ঞেয়মস্তীত্যাহ—অর্থো বিষয়ঃ, ইন্দ্রিয়াণি তদ্গ্রাহকাণি, তদুভয়রূপেণাভাসত ইতি তথা তম্, তথাপ্যনিদ্রং স্বপ্নদ্রষ্টৃ-বদজ্ঞানরহিতম্। কুতঃ ? অব্রণমদেহম্, অতএবাক্ষরং খমিব ব্যাপিনঞ্চ। সর্ব্বত্র হেতুঃ—যত্র যস্মিন্ গৃধ্রপক্ষৌ জীবপক্ষপাতিনৌ ছায়াতপাববিদ্যা চ তন্নিবর্ত্তিকা বিদ্যা চ নাস্তি, তং ত্রিযুগং ত্রিষু যুগেষ্বাবির্ভবন্তং শরণং ব্রজাম ॥

২৮। তদেবমবিক্রিয়ত্বাদিভিশ্চ সর্ব্বজ্ঞত্বাদিভিশ্চ সত্যত্বং বরেণ্যত্ব-ঞ্চোক্তম্, সংসারচক্রাধারত্বেনাপি তদেব দর্শয়ন্নাহ—অজস্য জীবস্য চক্রং চক্রবদাবর্ত্তমানং দেহাদ্যজয়া মায়য়া প্রের্য্যমাণম্। যোঽক্ষো যস্য যদধিষ্ঠান-মাহুস্তমৃতং সত্যং প্রপদ্যে। কথম্ভূতং চক্রম্ ? মনোময়ং মনঃপ্রধানম্; দশেন্দ্রিয়াণি পঞ্চ প্রাণাশ্চেত্যেবং পঞ্চদশ অরা যস্য ; আশু শীঘ্রম্ ; ত্রয়ো গুণা নাভিরিব মধ্যে যস্য ; বিদ্যুদিব চলমষ্টৌ প্রকৃতয়ো নেময় ইবা-বরণানি যস্য ॥

১। বৃদ্ধ্যাদিক্রিয়াযুক্তা (ঘ) ; ২। সর্ব্বান্তরম্ (ঘ)।

২৯—৩০। সর্ব্বজীবনিয়ন্তৃত্বাদিনা চ বরিষ্ঠত্বমাহ—য ইতি। (২৯) য উপসুপর্ণং জীবসমীপে তন্নিয়ন্তৃত্বেনাসাঞ্চকার আস্তে স্ম,—'দ্বা সুপর্ণা সযুজা সখায়া সমানং বৃক্ষং পরিষস্বজাতে' ইতি শ্রুতেঃ ; যদ্বা, ভক্তরক্ষণার্থং গরুড়স্যোপরি য উপবিষ্ট ইত্যর্থঃ। তর্হি দেহস্থত্বাদ্ ভক্তরক্ষণাদিক্রিয়া-*বেশাজ্জীবসাম্যং স্যাৎ ?* তত্রাহ—একবর্ণং জ্ঞানৈকস্বরূপম্, তমসঃ প্রকৃতেঃ পরম্, অলোকমদৃশ্যম্, অব্যক্তং নির্ব্বিকল্পম্, অনন্তপারং কালতো দেশতশ্চা-পরিচ্ছিন্নং তদ্‌ব্রহ্মৈব যঃ। অপ্রচ্যুতস্বরূপত্বান্ন জীবসাম্যম্—'তয়োরন্যঃ পিপ্পলং স্বাদ্বত্ত্যনশ্নন্নন্যোঽভিচাকসীতি' ইতি বিশেষশ্রবণাদিত্যর্থঃ। অতএব যমেনং ধীরা যোগেন রথেন প্রাপ্তিসাধনেনোপাসতে ভজন্তে, তং নমামেত্যুত্ত-রেণান্বয়ঃ॥ (৩০) মায়ানিয়ন্তৃত্বেনাপি জীবসাম্যং পরিহরন্ বরিষ্ঠত্বমাহ—যস্য মায়াং কশ্চ কশ্চিদপি নাতিতিতর্ত্তি নাতিক্রামতি। কথম্ভূতাম্ ? জনো যয়া মুহ্যতি, অর্থমাত্মস্বরূপং ন তু বেদ ; নির্জ্জিত আত্মা আত্মশক্তির্মায়া চ তদ্‌গুণাশ্চ যেন তম্॥

৩১। অর্থং ন বেদেতি যদুক্তম্, তৎ প্রপঞ্চয়ন্নাহ—ইমে বয়ং দেবা ঋষয়শ্চ যস্য প্রিয়য়া তন্বা সত্ত্বেনৈব সৃষ্টা অপি বহিশ্চান্তশ্চ সত্তাপ্রকাশাভ্যা-মাবিঃ প্রকটামপি, সূক্ষ্মাং গতিং নিরুপাধিস্বরূপং ন বিদ্মঃ ; ইতরপ্রধানা রজস্তমোময়াঃ কুতো বিদুঃ ? তং নমামেতি পূর্ব্বেণৈবান্বয়ঃ॥

৩২—৪৩। ইদানীং বৈরাজরূপেণ স্তুবন্ প্রার্থয়তে—পাদৌ মহীতি দ্বাদশভিঃ। (৩২) যত্র মহ্যাং জরায়ুজাদিভূতসর্গঃ, সা মহী যস্য পাদৌ, স নঃ প্রসীদতু। আত্মতন্ত্রঃ পাদাদিমত্ত্বেঽপি ন তৎপরতন্ত্রঃ। কুতঃ ? ব্রহ্ম—অপ্রচ্যুতস্বরূপঃ। তৎ কুতঃ ? মহতী বিভূতিরৈশ্বর্য্যং যস্য সঃ॥ (৩৩) উদারং বীর্য্যং শক্তির্যস্য, তদম্ভো যস্য রেতঃ, স নঃ প্রসীদতু। উদার-বীর্য্যতামাহ—যতোঽম্ভসো লোকাদয়ঃ সিধ্যন্তি জায়ন্তে॥ (৩৪) যঃ সোমো দেবানামন্ধোঽন্নম্, অতএব বলমায়ুশ্চ ; নগানাং বৃক্ষাণাং প্রকর্ষেণ

জনয়তি বৰ্দ্ধয়তীতি প্রজনন্তং যস্য মনঃ সমামনন্তি, স নঃ প্রসীদতু ॥ (৩৫) অগ্নির্যস্য মুখং জাতঃ। কথম্ভূতঃ? জাতং বেদো ধনং যস্মাৎ। ক্রিয়াকাণ্ডং তৎপ্রতিপাদ্যং কর্ম্ম, তন্নিমিত্তং জন্ম যস্য। অন্তঃসমুদ্র উদরমধ্যে, স্বধাতূন্ পাকার্হানেবান্নাদীন্সুপচন্ প্রসিদ্ধসমুদ্রেঽপি বাড়বরূপেণোদকান্যেবাস্নুপচন্নগ্নিঃ ॥ (৩৬) এষ তরণির্যস্য চক্ষুরাসীৎ। কথম্ভূতঃ? দেবযানমর্চিরাদিমার্গদেবতা ; ত্রয়ীময়ঃ—'সৈষা ত্রয্যেব বিদ্যা তপতি' ইতি শ্রুতেঃ। ব্রহ্মণো ধিষ্ণ্যমুপাসনাস্থানম্—'য এষোঽন্তরাদিত্যে হিরণ্ময়ঃ পুরুষঃ' ইতি শ্রুতেঃ। মুক্তের্দ্বারং দেবযানত্বাৎ, অমৃতঞ্চ পুণ্যলোকত্বাৎ, মৃত্যুশ্চ কালরূপত্বাৎ। এবম্ভূতস্তরণির্যস্য চক্ষুঃ, স প্রসীদতু ॥ (৩৭) কথম্ভূতো বায়ুঃ? চরাচরাণাং সহাদিধৰ্ম্মবান্ প্রাণঃ ; যং প্রাণং বয়ং বুদ্ধ্যাদ্যধিষ্ঠাতারো দেবাঃ সম্রাজং ভৃত্যা ইবান্বাস্মানুসৃত্য স্থিতাঃ, এবম্ভূতো বায়ুর্যস্য প্রাণাদভূৎ, সঃ ॥ (৩৮) খানি দেহগতচ্ছিদ্রাণি ; প্রাণঃ পঞ্চবৃত্তিঃ, ইন্দ্রিয়াণি চাত্মা মনশ্চ, অসবো নাগকূর্ম্মাদয়শ্চ শরীরঞ্চ, তেষাং কেত আশ্রয়ভূতং খঞ্চ যস্য পুরুষস্য নাভ্যাঃ প্রজজ্ঞে, সঃ ॥ (৩৯) যস্য বলান্মহেন্দ্রো জজ্ঞে ; ছন্দাংসি ঋষয়শ্চ খেভ্যঃ। কঃ—প্রজাপতিঃ ॥ (৪০) ইতরোঽধৰ্ম্মঃ ॥ (৪১) বিড়্ বৈশ্যঃ, ওজো নৈপুণ্যম্, তস্য বৃত্তিঃ। অঙ্ঘ্রিরঙ্ঘ্রিজাবিত্যর্থঃ। কৌ? অবেদশূদ্রৌ ; অবেদো বেদব্যতিরিক্তা শুশ্রূষা তদ্বৃত্তিঃ, তদ্বৃত্তিমান্ শূদ্রঃ ; 'ঊর্ব্বোর্ব্বিশোঽঙ্ঘ্রেরভবচ্চ শূদ্রঃ' ইতি পাঠঃ সুগমঃ ॥ (৪২) উপরি—উত্তরোষ্ঠাৎ, নস্তঃ—নাসিকাতঃ, দ্যুতিঃ—কান্তিঃ, পশব্যঃ পশূনাং হিতঃ, কামঃ স্পর্শেনাভূৎ ॥ (৪৩) দ্রব্যং ভূতানি, বয়ঃ কালম্, বিশেষং লৌকিক[১]-প্রপঞ্চম্। যদ্‌যস্মাদ্ দুর্ব্বিভাব্যম্। কুতঃ? প্রবুধাপবাধং বিদ্বদ্ভিরপোহ্যমানম্। প্রবুধাববোধমিতি পাঠে প্রবুধানাং মায়েত্যববোধো যস্মিন্নিত্যর্থঃ ॥

১। ভৌতিক- (ক, ঘ)।

৪৪। তদেবং সপ্রপঞ্চমুপবর্ণ্য নিষ্প্রপঞ্চং বর্ণয়ন্ প্রণমতি—নমোঽস্থিতি। বৃত্তিভির্দর্শনাদিভিঃ। নভস্বান্ বায়ুস্তদ্বেবোতির্লীলা যস্য, তস্মৈ॥

৪৫। তে সস্মিতং মুখাম্বুজং দিদৃক্ষূণাং নোঽস্মাকং চক্ষুরাদিকরণ-গোচরং যথা ভবত্যেবং চাত্মানং দর্শয় ॥

৪৬। ভক্তেচ্ছানুবর্ত্তিত্বঞ্চ তব বহুশো দৃষ্টমেবেত্যাহ—তৈস্তৈরিতি। যন্নো দুর্ব্বিষহমশক্যং কর্ম্ম, তদ্ভগবান্ হি স্বয়মেব করোতি॥

৪৭। ন চ বহির্ম্মুখাণামিব ত্বদ্ভক্তানামস্মাকং ত্বয্যর্পিতানি পূর্ব্বপুণ্যানি বিপরীতফলানি ভবিতুমর্হন্তীত্যাহ—ক্লেশো ভূরির্যেষু, অল্পং সারং ফলং যেষু, তানি তানি যথা বিফলান্যেব সকামানাং কর্ম্মাণি ; ত্বয্যর্পিতন্তু নৈব তথা॥

৪৮। তত্রাবৈফল্যমুপপাদয়তি—অবমোঽল্পোঽপি কর্ম্মকল্পঃ কর্ম্মা-ভাসোঽপীশ্বরার্পিতশ্চেদ্বিফলায় শ্রমায়[১] ন কল্পতে ; হি যস্মাৎ, স এষ ঈশ্বরঃ পুরুষস্য আত্মা, অতএব দয়িতো হিতশ্চ। ন হ্যাত্মনি দয়িতে হিতে চার্পিতং নিষ্ফলং স্যাৎ॥

৪৯। অনল্প[২]ফলত্বমাহ—যথা হি মূলাবসেচনং স্কন্ধানাং শাখানাঞ্চ ভবতি॥

৫০। এবং সত্যপি ত্বদর্পিতকর্ম্মণাং ত্বদ্ভক্তানামস্মাকং যন্নিমিত্তমিদং দুঃখমিতি ত্বমেব বেৎসীত্যাশয়েনাহ—নম ইতি। দুর্ব্বিতর্ক্যাণ্যাত্মকর্ম্মাণি স্বভাবচেষ্টিতানি যস্য তস্মৈ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
পঞ্চমোঽধ্যায়ঃ॥ ৫॥

১। আয়াসায় (ঘ); ২। অনন্ত- (ঘ)।

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠে পুনঃ স্তুতির্বিষ্ণাবাবির্ভূতে সুরৈঃ কৃতা।
তন্মন্ত্রাচ্চাসুরৈঃ[১] সাকমমৃতার্থে মহোদ্যমঃ॥ (১)

১। সহস্রার্কাণামুদয়ে দ্যুতিরিব দ্যুতির্যস্য॥

২। মহসা তেজসা প্রতিহতানীক্ষণানি চক্ষূংষি যেষাম্॥

৩—৭। তামাবির্ভূতাং তনুং বিরিঞ্চো দৃষ্ট্বা তুষ্টাবেতি পঞ্চমেনান্বয়ঃ। (৩) কঞ্জগর্ভবদরুণ ঈক্ষণে যস্যাম্॥ (৪) তপ্তহেমবদবদাতেন পীতেন লসতা কৌশেয়বাসসা যুক্তাম্; প্রসন্নানি চারূণি সর্ব্বাঙ্গানি যস্যাম্; শোভনং মুখং যস্যাম্; সুন্দরে ভ্রুবৌ যস্যাম্॥ (৫) মহান্তো মণয়ো যস্মিংস্তেন কিরীটেন; কর্ণাভরণে কুণ্ডলে, তাভ্যাং নির্ভাতৌ যৌ কপোলৌ, তাভ্যাং শ্রীমুর্খাম্বুজে যস্যাম্॥ (৬) কৌস্তুভ আভরণং কণ্ঠে যস্যাঃ; লক্ষ্মীং বক্ষসি বিভ্রতীম্॥ (৭) দেবপ্রবরো ব্রহ্মা, সর্ব্বাঙ্গৈরবনিং গতৈঃ সাষ্টাঙ্গ প্রণতৈঃ॥

অনাবিরাবিরাসেয়ং মা ভূতাভূদিতি ব্রুবন্।
ব্রহ্মাভিপ্রৈতি নিত্যত্ববিভুত্বে ভগবত্তনোঃ॥ (২)

৮। শ্রীমূর্ত্তেরয়মাবির্ভাব এব, ন ত্বস্মদাদিবজ্জন্মাদি তবাস্তীত্যাহ—ন জাতা জন্মাদয়ো যস্য। কুতঃ? অগুণায়, অতো নির্ব্বাণসুখস্যার্ণবায়াপার-মোক্ষসুখস্বরূপায়েত্যর্থঃ; তথাপ্যণোরপ্যণিম্নেঽতিসূক্ষ্মায়, দুর্জ্ঞানত্বাৎ; বস্তুতস্ত্বপরিগণ্যমিয়ত্তাতীতং ধাম মূর্ত্তির্যস্য, তস্মৈ; ন চৈতদসম্ভাবিতম্, যতো মহানচিন্ত্যোঽনুভাবো যস্য, তস্মৈ॥

৯। তন্মূর্ত্তেঃ সনাতনত্বমপরিমেয়ত্বঞ্চোপপাদয়তি—রূপমিতি। হে পুরুষর্ষভ! হে ধাতঃ! এতত্তব রূপং বৈদিকেন তান্ত্রিকেণ চ যোগেন

১। তন্মন্ত্রেণাসুরৈঃ (ঘ)।

উপায়েন শ্রেয়োঽর্থিভিঃ সদেজ্যং পূজ্যম্, অতো নেদমিদানীমপূর্ব্বং জাতমিতি ভাবঃ। নন্ু যূয়ং দেবাঃ পূজ্যত্বেন প্রসিদ্ধাঃ? সত্যম্, সর্ব্বেঽপ্যত্রৈবান্তর্ভূতা ইত্যাহ—উ অহো, হ স্ফুটম্, অমুষ্মিংস্ত্বয়ি নোঽস্মাংস্ত্রিলোকাংশ্চ সহ পশ্যামি। তত্র হেতুঃ—বিশ্বং মূর্ত্তৌ যস্য, অতস্তবৈতদ্রূপং পরিচ্ছিন্নমপি ন ভবতীতি ভাবঃ॥

১০। বিশ্বমূর্ত্তিত্বমেবাহ—ত্বয়ীতি। ঘটস্য মৃত্তিকা যথাদিরন্তশ্চ মধ্যঞ্চ, তথা ত্বমস্য জগতঃ। তত্র হেতুঃ—পরস্মাৎ প্রধানাদপি পরঃ॥

১১। মৃত্তিকাদৃষ্টান্তেন পরিণামং প্রাপ্তং বারয়তি—ত্বমিতি। স্বয়া স্বাধীনয়া, অতএব গুণানাং ব্যবায়ে পরিণামেঽপ্যগুণমেব ত্বাং যুক্তাঃ পশ্যন্তি; মনীষিণো বিবেকিনঃ, বিপশ্চিতঃ শাস্ত্রজ্ঞাঃ॥

১২। এতদেব সদৃষ্টান্তমাহ—যথাগ্নিং কাষ্ঠে মথনেন, অমৃতমাজ্যং গোষু দোহনাদিনা, ভুব্যন্নং ব্রীহ্যাদি কর্ষণাদিনা, অম্বু চ খননেন, উদ্যমনে পুরুষকারে[১] বাণিজ্যাদিনা বৃত্তিং জীবিকাম্, যদ্বা, অম্বুন উদ্যমনে[২] ঘটীযন্ত্রাদিনোদ্ধরণে, যোগৈরুপায়ৈর্মনুষ্যা অধিযন্তি প্রাপ্নুবন্তি, তথা কবয়স্ত্বাং বুদ্ধ্যা গুণেষ্বধিযন্তি বদন্তি চ॥

১৩। হে নাথ! সরোজনাভ! অতিচিরাদীপ্সিতমর্থং তং যোগৈকপ্রাপ্যং ত্বাং সম্যগুজ্জিহানমাবির্ভবন্তং প্রত্যক্ষতো দৃষ্ট্বাদ্য বয়ং নির্বৃতিং গতাঃ। দবার্ত্তা দাবাগ্নিপীড়িতাঃ॥

১৪। যদ্বিধেয়ং তৎ কথয়েতি চেৎ, তত্রাহ—হে অন্তরাত্মন্! অশেষসাক্ষিণস্তে বহিঃ কিং বান্যৈর্বিজ্ঞাপ্যমস্তি॥

১৫। যূয়মেব কিঞ্চিৎ কুরুতেতি চেৎ, তত্রাহ—অহমিতি। অগ্নেঃ কেতবো বিস্ফুলিঙ্গা ইব তে ত্বত্তো বয়ং পৃথগ্বিভাতাঃ সন্তঃ, আত্মনঃ শং

১। উদ্যমেন পুরুষকারেণ (ঘ); ২। অম্বূদ্যমনে (ঘ)।

শ্রেয়ঃ কিং বা বিঘ্নঃ? অতস্ত্বমেব দ্বিজানাং দেবতানাঞ্চ মন্ত্রং বিধৎস্ব, ইদং কুরুত—ইত্যুপায়মুপদিশেত্যর্থঃ ॥

১৬। হৃদয়মিতি, মন্ত্র উপদেষ্টব্য ইত্যভিপ্রেতং যথা তথৈব বিজ্ঞায় জগাদ। সংবৃতানি নিয়মিতানি সর্ব্বাণি কারকাণীন্দ্রিয়াণি যৈস্তান্ ॥

১৭। ঈশ্বরস্যাপি তথৈবাভিপ্রেতমিত্যাহ—এক এবেশ্বরঃ সমর্থোঽপি ॥

১৮। হে সুরাঃ! হে দেবাঃ! অন্যে চ গন্ধর্ব্বাদয়ঃ ॥

১৯। ব আত্মনঃ স্বতো যাবদ্ভবো বৃদ্ধির্ভবতি ॥

২০। অর্থস্য প্রয়োজনস্য পদবীং সিদ্ধিং প্রাপ্তেঃ; ততঃ পশ্চাদহি-মূষিকবদ্‌বধ্যঘাতকস্বভাবেন বর্ত্তিতব্যমিতি শেষঃ; যদ্বা, পেটিকায়াং নিরুদ্ধোঽহির্যথা নির্গমদ্বারবিধানার্থং প্রথমং মূষিকেণ সমং সন্ধিং বিধত্তে, পশ্চাত্তমেব কদাচিদ্ভক্ষয়তি, তথার্থমার্গপ্রবৃত্তেঃ প্রথমং সন্ধেয়া ইত্যর্থঃ ॥

২১। ততস্তৈঃ[১] সহ যৎ কার্য্যম্, তদাহ—অমৃতোৎপাদন ইতি। যস্যামৃতস্য পীতস্য সতঃ ॥

২২। নেত্রম্—রজ্জুম্ ॥

২৩। ননু তর্হি তেঽপ্যমৃতপানেনামৃতাঃ স্যুঃ? তত্রাহ—ক্লেশভাজ ইতি ॥

২৪—২৫। বলিভিঃ সহকারিভিঃ সাধ্যা অর্থাস্তদনুসরণং বিনা ন সিধ্যন্তীতি কৃত্বা সামাদিকমুপদিশতি—যূয়মিতি দ্বাভ্যাম্। (২৪) হে সুরাঃ! সংরম্ভেণ সম্ভ্রমেণ, সান্ত্বয়া সামমার্গেণ যথা সিধ্যন্তি ॥ (২৫) বস্তুষু মথনা-দুৎপন্নেষু ॥

২৭। সুরাস্তু বলিমুপেয়ুরুপজগ্মুঃ ॥

২৮। অসংযত্তানপি দৃষ্ট্বা। শ্লোক্যঃ—কীর্ত্ত্যর্হঃ ॥

২৯। বৈরোচনিং বলিম্, জিতমশেষং ত্রৈলোক্যং যেন তম্ ॥

১। অতস্তৈঃ (খ)।

৩০। তৎ সর্ব্বমমৃতোন্মথনাদি ॥

৩১। তত্র যেঽন্যে চাসুরাধিপাঃ পৌলোমকালেয়াদয়ঃ শম্বরাদয়শ্চ তেভ্যশ্চারোচত ॥

৩২। সংবিদম্—সময়ম্॥

৩৩। পরিঘা ইব বাহবো যেষাম্ ॥

৩৯। বিসর্জ্জিতঃ প্রস্থাপিতঃ ; সুপর্ণে তত্র স্থিতে বাসুকেরাগমনাযোগাদিতি ভাবঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
ষষ্ঠোঽধ্যায়ঃ ॥ ৬ ॥

সপ্তমোঽধ্যায়ঃ

সপ্তমে মথনোদ্ভূত-বিষভীত্যাখিলৈর্জনৈঃ।
স্তুতঃ সন্ কৃপয়া রুদ্রঃ পপৌ বিষমিতীর্য্যতে ॥ (১)

১। ফলভাগেন তবাপ্যমৃতে ভাগো ভবিষ্যতীতি সংমন্ত্র্য, বাসুকিং নেত্রং গিরৌ পরিবীয় সংবেষ্ট্য, অব্ধিং মথিতুমারেভিরে ॥

২। বাসুকের্ম্মুখং তীব্রং দৈত্যান্ গ্রাহয়িতুমেব পূর্ব্বং হরিঃ পুরস্তান্মুখং জগৃহে ; ততোঽভবন্ মুখং জগৃহুঃ ॥

৫। কৃতো ধারণে স্থানবিভাগো যৈঃ ॥

৭। দৈবেন হেতুনা স্বপৌরুষে নষ্টে সতি ॥

৮। বিঘ্নেশস্য বিধানম্, তেন রচিতং বিঘ্নম্। অবিতথঃ সত্যোঽভিসন্ধিঃ সঙ্কল্পো যস্য ॥

৯। লক্ষযোজনং প্রস্তারো বিস্তারো যস্যাস্তীতি, তথাভূতেন পৃষ্ঠেন ॥

১০। তস্য গিরেরাবর্ত্তনং ভ্রমণমঙ্গকণ্ডূয়নং মেনে ॥

১১। আসুরেণাসুরাকারেণ, দৈবেন দেবাকারেণ রূপেণাবিশৎ ॥

১৩। আত্মনি দেবদৈত্যমধ্যে, গোত্রে দার্ঢ্যরূপেণ, নেত্রেঽবোধ-রূপেণ[১], পরেণ হরিণা। ক্ষোভিতং নক্রাণাং চক্রং সমূহো যস্মিন্ ॥

১৪। দৃশশ্চ মুখানি চ শ্বাসাশ্চ। অহীন্দ্রস্য সাহস্রমপরিমিতাঃ কঠোরা যে দৃগাদয়স্তেভ্যো নির্গতাভ্যামগ্নিধূমাভ্যামাহতং বর্চ্চো যেষাং তে। সরলা দ্রুমবিশেষাঃ ॥

১৫। দেবাংস্তু ভগবদ্বশা ঘনাঃ সমভ্যবর্ষন্; সমুদ্রোর্ম্মিভিরুপগূঢ়া বায়বশ্চ শীতলা ববুর্বান্তি স্ম। কথম্ভূতান্? তস্যাহীন্দ্রস্য শ্বাসশিখাদিভির্হৃতা প্রভা যেষাম্, ধূম্রাণ্যম্বরাদীনি যেষাম্ ॥

১৭। ধৃতোঽদ্রির্যেন স ধৃতাদ্রির্ভগবান্ পরমপুরুষোঽনন্তরমশোভতে-ত্যন্বয়ঃ। কথম্ভূতঃ? কনকপরিধিঃ পীতবাসাঃ, কর্ণয়োর্বিদ্যোতমানা বিদ্যুৎ কুণ্ডললক্ষণা যস্য, তথা মূর্দ্ধ্নি ভ্রাজন্তো বিলুলিতাঃ কচা যস্য স তথা। জৈত্রৈর্জিষ্ণুভিঃ, দন্দশূকং সর্পম্; প্রতিগিরিঃ প্রতিদ্বন্দ্বী পর্ব্বতঃ ॥

১৮। হালহলমিত্যাহ্বা নাম যস্য; সংভ্রান্তা মীনা উদ্গতা মকরাদয়শ্চ যস্মিন্, তিম্যাদিভিরাকুলাচ্চ ॥

১৯। তদ্বিষম্, অপ্রত্যপ্রতিমং প্রতিক্রিয়াশূন্যমিতি বা। কুতঃ? উগ্রো বেগো যস্য; তদেবাহ—দিশি দিশীতি; যদ্বা, উগ্রা বেগা রোমাঞ্চস্বেদাদয়ো যস্মাৎ, অতএবাসহ্যং বিলোক্য ভীতাঃ, অন্যেন কেনাপ্য-রক্ষ্যমাণাঃ সদাশিবং শরণং দুদ্রুবুর্জগ্মুঃ ॥

২০। ত্রিলোক্যা উদ্ভবায় দেব্যা সহাদ্রৌ কৈলাস আসীনং তথাপি মুনীনামভিমতং তেষামেবাপবর্গায় তপো জুষাণম্ ॥

১। অভেদ্যাবোধরূপেণ (ঘ)।

নির্গুণং সগুণঞ্চৈব শিবং হরিপরাক্রমৈঃ।
স্তুবন্তস্তু প্রজেশানা নামান্যন্তান্তরং তয়োঃ ॥ (২)

২৩। নন্বেবম্ভূতো বিষ্ণুরিতি প্রসিদ্ধম্? তত্রাহুঃ—গুণময্যেতি। অস্য জগতো যদা সর্গাদীন্ ধৎসে, তদা হে ভূমন্! স্বদৃক্ স্বতঃসিদ্ধজ্ঞানস্ত্বং ব্রহ্মাদিসংজ্ঞাং ধৎসে ॥

২৪। তত্র হেতুঃ—ত্বং ব্রহ্মেতি। সদসতো ভাবান্ দেবতির্য্যগাদি-রূপান্ ভাবয়তীতি তথা। সৃজ্যস্তু তদ্ব্যতিরিক্তং নাস্তীত্যাহুঃ—আত্মৈব ত্বং নানাশক্তিভির্জগদ্রূপেণাভাতঃ, যস্মাদীশ্বরঃ ॥

২৫। স্বতঃসিদ্ধজ্ঞানত্বমুপপাদয়ন্তো জগদাত্মনাভানপ্রকারমাহুঃ—ত্বং শব্দস্য বেদস্য যোনিঃ, অতঃ স্বতঃসিদ্ধজ্ঞানস্ত্বং জগদাদির্মহত্তত্ত্বম্, আত্মা চাহঙ্কারঃ। কথম্ভূতঃ? প্রাণেন্দ্রিয়দ্রব্যাণাং কারণভূতা গুণা যস্য রাজ-সাদিস্ত্রিবিধ ইত্যর্থঃ। স্বভাবাদয়শ্চ ত্বমেব, ক্রতুঃ সঙ্কল্পঃ সত্যমৃতঞ্চেতি যো ধর্ম্মঃ, স ত্বম্। মহদাদিরূপত্বে হেতুঃ—ত্রিবৃত্ত্রিগুণাত্মকং যদক্ষরং প্রধানম্, ত্বয়ি ত্বদাশ্রয়ং তদামনন্তি; যদ্বা, এবম্ভূতে ত্বয়ি ত্রিবৃদক্ষরং প্রণবং প্রকাশকমাহুরিত্যর্থঃ ॥

২৬। অখিলদেবতাত্মা—'অগ্নিঃ সর্ব্বদেবতা' ইতি শ্রুতেঃ; সোঽগ্নিস্তে মুখম্। হে লোকভব! দ্বিতীয়ান্তেষু বিদুরিত্যস্য সম্বন্ধঃ ॥

২৭। পরেঽবরে চ য আত্মনো জীবাস্তেষামাশ্রয়ণমাশ্রয়স্তবাত্মাহঙ্কারঃ॥

২৮। ত্রয়ীময়াত্মন্—বেদত্রয়মূর্ত্তে! ॥

২৯। পঞ্চোপনিষদঃ—তৎপুরুষাঘোর-সদ্যোজাত-বামদেবেশানরূপা মন্ত্রাঃ; যৈর্মুখৈরষ্টোত্তরত্রিংশন্মন্ত্রাণাং বর্গস্তেষামেব মন্ত্রাণাং পদচ্ছেদেনা-ষ্টোত্তরত্রিংশৎকলাত্মকা মন্ত্রা ইত্যর্থঃ। অবস্থিতির্নিরুপরতাবস্থা ॥

৩০। ছায়াধর্ম্মস্তোর্ম্মিষু দম্ভলোভাদিষু, যৈরূর্ম্মিভির্ব্বিসর্গঃ প্রতিসর্গঃ সংহারঃ; যদ্বা, যৈঃ সত্ত্বাদিভির্ব্বিবিধঃ সর্গস্তানি নেত্রত্রয়ম্। হে দেব!

ছন্দোময় ঋষির্ব্বেদঃ, স তবেক্ষা—ঈক্ষণম্। সাক্ষান্মনুরিতি পাঠে মনুর্ব্বেদঃ। তমেবাহ—ছন্দোময় ইতি॥

৩১। হে গিরিত্র! তে পরং জ্যোতিরখিলানাং লোকপালাদীনাং গম্যং ন ভবতি। কুতঃ? যত্র রজআদির্নাস্তি। কিং তজ্জ্যোতিঃ? যস্মিন্নস্তভেদং ব্রহ্ম॥

৩২। কামশ্চাধ্বরশ্চ দক্ষযজ্ঞস্ত্রিপুরাদয়শ্চ যে অনেকভূতদ্রুহস্তান্ ক্ষপয়তঃ সংহরতস্তে তৎ কর্ম্ম স্তুতয়ে ন ভবতি, অত্যল্পমেতদিত্যর্থঃ। গরভক্ষণ[১]স্যাবশ্যম্ভাবিত্বাৎ সিদ্ধবন্নির্দ্দেশঃ। স্তুতয়েঽলং ন ভবতীত্যত্র হেতুঃ—যস্ত ভবান্ স্বনেত্রবহ্নিবিস্ফুলিঙ্গস্য শিখয়েদং জগদ্ভসিতং ভস্মসাজ্জাতং ন বেদ, নালোচয়ত্যপি॥

৩৩। এবং নিত্যং পরানুগ্রহব্যগ্রং ত্বাং যে নিন্দন্তি, তেঽতিমূর্খা ইত্যাহুঃ—যে চ ত্বা ত্বামুময়া সহ চরন্তং তস্যাং নিতরাং রতং কামিনং কথন্তে প্রলপন্তি, তথা শ্মশানে চরন্তম্, উগ্রং ক্রূরং পরুষঞ্চ হিংস্রং কথন্তে। কথম্ভূতম্? আত্মারামাশ্চ তে গুরবো বিশ্বহিতোপদেষ্টারশ্চ, তৈর্হৃদি চিন্তিতমঙ্ঘ্রিদ্বন্দ্বং যস্য তথাভূতমপি তপসাভিতপ্তমপি তে নূনং তব উতিমবিদন্নিতি কাকুঃ; ত্বল্লীলাং নৈব বিদুরিত্যর্থঃ। অতো হাতলজ্জাস্ত্যক্তত্রপাঃ, কথমাত্মারামৈঃ সেবিতচরণযুগলস্য তে কামিত্বসম্ভবঃ? কথং বা তপসাভিতপ্তস্য শান্তস্যোগ্রত্বং পরুষত্বং বা সম্ভবতীত্যবিচার্য্যৈবং প্রলাপাদিত্যর্থঃ॥

৩৪। আস্তাং তাবন্নিন্দকানাং বার্ত্তা, মহান্তোঽপি তব তত্ত্বং ন জানন্তীত্যাহুঃ—তত্তস্মাৎ, তব স্বরূপস্য গমনে জ্ঞানে ব্রহ্মাদয়োঽপি ন সমর্থাঃ, সংস্তবনে তু কুতঃ শক্তাঃ স্যুঃ, তত্র বয়ঞ্চ কথং প্রভবামঃ[২]? যতস্তেষাং

১। গরক্ষপণ- (ঘ); ২। প্রভবেম (ঘ)।

সর্গেঽত্যন্তার্ব্বাচীনাঃ, তথাপি যদেতৎ স্তবনম্, তদাত্মশক্তিপরিমিতমাত্র-মিত্যর্থঃ ॥

৩৫। তদেবাহুঃ —এতৎ পরমিতি। ন পরং রূপং তথাপি তদ্দর্শনাদেব কৃতার্থা বয়মিত্যাহুঃ — মৃড়নায় হীতি ॥

৩৭—৪০। মৎপ্রভাবমবিচার্য্য বিষপানে প্রবৃত্তং মাং কথঞ্চিদিয়ং প্রিয়া বারয়েদিতি শঙ্কয়া তামনুজ্ঞাপয়ন্নাহ—অহো বতেতি সার্দ্ধৈশ্চতুর্ভিঃ। (৩৭) বৈশসম্—দুঃখম্ ॥ (৩৮) প্রাণপরীপ্সূনাং প্রাণরক্ষণেচ্ছূনাম্, মে ময়া, প্রভোঃ সমর্থস্য, অর্থঃ কার্য্যম্ ॥ (৩৯) কিঞ্চ, বদ্ধবৈরেষু ভূতেষু পরস্পরং জিঘাংসৎসু ॥ (৪০) কৃপয়তঃ কৃপাং কুর্ব্বতঃ পুংসঃ, মে মত্তঃ, স্বস্তিঃ শোভনা সত্তা সুখেন জীবিতমস্ত্বিত্যর্থঃ ॥

৪১। জগ্ধুম্—অত্তুম্ ॥

৪২। করতলীকৃত্য করতলপরিমিতমাত্রং কৃত্বা ॥

৪৩। জলকল্মষো জলদোষো বিষম্ ; যস্মাত্তং গলে নীলং চকার। সাধোঃ —কৃপালোঃ ॥

৪৬। প্রস্কন্নং গলিতম্ ; অপরে চ যে সবিষাস্তেঽপি জগৃহুঃ ; অনেন বিষস্য তীব্রতোক্তা ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

সপ্তমোঽধ্যায়ঃ ॥ ৭ ॥

অষ্টমোঽধ্যায়ঃ

অষ্টমে মথ্যমানেঽব্ধৌ লক্ষ্ম্যা বিষ্ণৌ বৃতেঽসুরৈঃ।

ধন্বন্তরের্হৃতে সোমে মোহিন্যুদ্ভব ঈর্য্যতে ॥ (১)

১। হবির্দ্ধানী—সুরভিঃ ॥

২। দেবযানস্য ব্রহ্মলোকমার্গপ্রাপকস্য যজ্ঞস্য সম্বন্ধিনে হবিষে ॥

৩। ঈশ্বরশিক্ষয়া প্রাগেব কৃতয়া ॥

৪। ভগবতো যঃ শ্বেতাদ্রিঃ কৈলাসস্তস্য মহিং মহিমানং দন্তৈঃ শিখরতুল্যৈর্হরংশ্চন্দ্রবৎ পাণ্ডর ইত্যনুষঙ্গঃ ॥

৭। বল্গুভির্গত্যাদিভিঃ, স্বর্গিণাং রমণ্যো রতিকর্ত্র্যঃ ॥

৮। সুদামা পর্ব্বতস্তত্রৈকস্যাং দিশি জাতা সৌদামনী, স্ফটিকাদিময়-গিরিশৃঙ্গেষ্বধিকং বিস্ফুরন্তী বিদ্যুদিব কান্ত্যা দিশো রঞ্জয়ন্তী, শ্রীঃ সম্পৎ, সাক্ষান্মূর্ত্তিধারিণী সতী, সৈব ভগবৎপরা রমাবিরভূদিত্যর্থঃ ॥

৯। তস্যা রূপাদিমহিম্নাক্ষিপ্তং চেতো যেষাম্ ॥

১০। ভগবদ্বক্ষসি স্থিতয়া শ্রিয়া বিলোকিতানাং দেবতানাং যথাপূর্ব্বং সর্ব্বসম্পৎপ্রাপ্তিমসুরাণাঞ্চ তদ্বিপর্য্যয়ং বক্তুমভিষেকাদিমহোৎসবপূর্ব্বকং ব্রহ্মাদিপরিহারেণ ভগবৎপ্রাপ্তি-প্রকারমাহ—'তস্যা আসনম্' ইত্যাদিনা 'অথাসীদ্বারুণী' ইত্যতঃ প্রাক্তনেন গ্রন্থেন ॥

১১। আভিষেচনিকা অভিষেকোচিতাঃ; পঞ্চ পবিত্রাণি—পঞ্চ-গব্যানি; মধুমাধবৌ চৈত্রবৈশাখভবং ফলপুষ্পাদি। মধুমাধবমিতি পাঠে দ্বন্দ্বৈক্যে স এবার্থঃ; মধুমাসোদ্ভবং মধ্বিবতি বা ॥

১২। আভিষেকমভিষেকোচিতং বিধিম্; নট্যঃ নটানাং স্ত্রিয়ঃ ॥

১৩। শঙ্খবেণুবীণাশ্চ ব্যনাদয়ন্; তুমুলো নিস্বনো যেষাং তান্ মৃদঙ্গাদীন্ ॥

১৯। পদম্—আশ্রয়ম্, ধ্রুবম্—নিত্যম্, অব্যভিচারিণো নিত্যাঃ সন্তো গুণা যস্মিংস্তং নান্ববিন্দত, ক্বচিৎ কস্যচিদ্দোষস্য সদ্ভাবাৎ ॥

২০—২২। তদেবাহ—নূনমিতি ত্রিভিঃ। (২০) মন্যুনির্জ্জয়ো নাস্তি দুর্ব্বাসঃপ্রভৃতিষু; গুরু-শুক্রাদিষু সঙ্গবর্জ্জিতজ্ঞানং নাস্তি; মহত্ত্বেঽপি ব্রহ্মসোমাদৌ ন কামনির্জ্জয়ঃ; পরতো ব্যপাশ্রয়ঃ পরাপেক্ষ ইন্দ্রাদিঃ; স কিমীশ্বরঃ? (২১) ন ভূতসৌহৃদং পরশুরামাদিষু; ন মুক্তিকারণং ত্যাগঃ শিবিপ্রভৃতিষু; পুংসঃ কার্ত্তবীর্য্যাদেবীর্য্যমস্তি, অজবেগনিস্কৃতং কাল-বেগেন পরিহৃতস্তু ন ভবতি; গুণসঙ্গ-বর্জ্জিতঃ সনকাদির্দ্বিতীয়ঃ সমচরো[১] ন হি, সমাধিনিষ্ঠত্বাৎ ॥ (২২) চিরায়ুষ্যপি মার্কণ্ডেয়াদৌ শীলং মঙ্গলং নাস্তি, ইন্দ্রিয়দমনশীলত্বাৎ। ক্বচিত্তদপ্যস্তি হিরণ্যকশিপুপ্রভৃতৌ, আয়ুষঃ স্থৈর্য্যং ন বেত্থং তুজ্জ্ঞাতম্, ভগবদ্দ্বেষিণোঽকস্মাদেব মৃত্যুসম্ভবাৎ। যত্র কুত্র চ শ্রীরুদ্রে মার্কণ্ডেয়াদিবদিন্দ্রিয়দমনাদ্যভাবাচ্ছীলং মঙ্গলঞ্চায়ুর্নিশ্চয়-শ্চেত্যুভয়মস্তি, ন চান্যঃ পূর্ব্বোক্তঃ কশ্চিদ্দোষঃ, তথাপি সোঽপ্যমঙ্গলঃ শ্মশানবাসাদ্যমঙ্গলচেষ্টিতঃ। শ্রীমুকুন্দং লক্ষ্যীকৃত্যাহ—কশ্চেতি, কশ্চিৎ সুমঙ্গলো নিরবদ্যশ্চ স তু মাং ন হি কাঙ্ক্ষতে, আত্মারামত্বাৎ ॥

২৩। এবং বিমৃষ্য রমা নিরপেক্ষমপি মুকুন্দমেব বরং বব্রে। তৎ কিম্? অব্যভিচারিভিঃ সদ্ভির্ধর্ম্মজ্ঞানাদিভিগুণৈর্নিজৈকাশ্রয়তয়া চ নৈর-পেক্ষ্যেণ বরং সর্ব্বোত্তমম্। তত্র হেতুঃ—অগুণাশ্রয়ং প্রকৃতিগুণাতীতম্। আশ্রয়তেতি পাঠান্তরেঽপ্যয়মেবার্থঃ। অতএব স্বস্ত্যেপ্সিতম্; কিঞ্চ, সর্ব্বৈ-গুণৈরণিমাদিভিরপেক্ষিতং বৃতম্। অয়ং ভাবঃ—যদ্যপি স্বয়মাত্মারামত্বে-নাত্যনিরপেক্ষস্তথাপ্যাশ্রিতা অণিমাদিসিদ্ধীর্যথা নোপেক্ষতে, তথা মামপি নোপেক্ষেত, তাবতৈব চ তৎসেবয়াঽহং কৃতার্থা স্যাম্; কিমন্যৈঃ প্রাকৃতৈ-রিতি তমেব বৃতবতীতি ॥

১। মম বরো (ঘ)।

২৪। তদেবাহ—তস্যাংসদেশে কমনীয়াং নবকঞ্জমালাং নিধায় তদনুগ্রহং প্রতীক্ষমাণা তূষ্ণীং তস্য নিকটে তস্থৌ। কথম্ভূতাং মালাম্? মাদ্যন্তো যে মধুব্রতাস্তেষাং বরূথস্য গিরোপঘুষ্টাং নাদিতাম্। কথম্ভূতা শ্রীঃ? সব্রীড়হাসেন বিকসদ্ যন্নয়নং তেন, তস্যোরঃ স্বধাম যাতা সতী বক্ষঃ প্রতীক্ষমাণা তস্থাবিত্যর্থঃ॥

২৫। ভগবানপি ত্রৈলোক্যাভিবৃদ্ধয়ে স্ববক্ষস্তস্যাঃ স্থানং দদাবিত্যাহ—তস্যা ইতি। বিশিষ্টা ভূতয়ো বিভবা যস্যাস্তস্যাস্ত্রিজগতো জনন্যা শ্রিয়ঃ পরমং সুস্থিরম্, ঐশ্বর্যতাবর্দ্ধয়ৎ॥

২৭। তল্লিঙ্গৈর্বিষ্ণুপ্রতিপাদকৈঃ, অবিতথৈর্যথার্থৈঃ॥

৩০। বারুণী—বরুণদৈবত্যং যদন্নং তন্ময়ী সুরা॥

৩২। দীর্ঘৌ পীবরৌ দোর্দ্দণ্ডৌ যস্য, কম্বুগ্রীবঃ শঙ্খনাভিরিব ত্রিরেখা সুবৃত্তা গ্রীবা যস্য॥

৩৩। স্নিগ্ধঃ কুঞ্চিতঃ কেশানামন্তোঽপি যস্য॥

৩৪। ইজ্যভাক্—যজ্ঞভাগভোক্তা॥

৩৫। অমৃতেনাভৃতং পরিপূর্ণম্॥

৩৭। মিথো দৈত্যানাং পরস্পরং কলহোৎপাদনেন যোগমায়য়া চ 'মোহিন্যা বোঽর্থং সাধয়িষ্যামি, অতো মা খিদ্যত' ইত্যাহেতি শেষঃ॥

৩৮। তদেবাহ—মিথ ইতি। তর্ষঃ কামস্তদ্‌যুক্তানি চেতাংসি যেষাম্, ইত্যেবং সমবলানাং কলিরভূৎ॥

৩৯—৪০। দুর্ব্বলানাং ত্বাক্রোশপ্রকারমাহ—দেবা ইতি দ্বাভ্যাম্। (৩৯) যে দেবাস্তুল্যেনায়াসেন হেতবঃ সাধকাঃ, তুল্য আয়াসো হেতুশ্চ ধনাদির্যেষামিতি বা। সত্রযাগে যথা সর্ব্বেষাং সমং ফলং তদ্বৎ; তথা হি শ্রুতিঃ—'ঋদ্ধিকামাঃ সত্রমাসীরন্' ইতি, 'যে যজমানাস্ত ঋত্বিজঃ' ইতি চ॥

৪২—৪৬। তদ্রূপং বর্ণয়তি পঞ্চভিঃ। (৪২) প্রেক্ষণীয়মুৎপলমিব শ্যামম্, সর্ব্বাবয়বেষু সুন্দরম্, সমানয়োঃ কর্ণয়োরাভরণে যস্মিন্, সুকপোলঞ্চ তদুৎকৃষ্টনাসিকঞ্চাননং যস্মিন্॥ (৪৩) নবযৌবননির্বৃত্তয়োঃ স্তনয়োর্ভারেণ চ কৃশমুদরং যস্মিন্॥ (৪৪) সুষ্ঠু গ্রীবা যস্মিন্, কণ্ঠ আভরণং যস্মিংস্তচ্চ তচ্চ, শোভনা গ্রীবা যেন তৎ কণ্ঠাভরণং যস্মিন্নিতি বা; সুভুজয়োরঙ্গদাভ্যাং ভূষিতম্॥ (৪৫) বিরজাম্বরেণ সংবীতো নিতম্ব এব দ্বীপো বিশালত্বাৎ, তত্র শোভা যস্যাস্তয়া কাঞ্চ্যা প্রকর্ষেণ বিলসদ্বল্গু যথা ভবত্যেবং চলতোশ্চরণয়োর্নূপুরে যস্মিন্॥ (৪৬) সব্রীড়েন স্মিতেন সহ বিক্ষিপ্তা কম্পিতা যা ভ্রূস্তস্যা বিলাসেন সহ যান্যবলোকনানি, তৈর্দ্দৈত্যযূথপানাং মুহুর্ম্মুহুশ্চেতঃসু কামমুদ্দীপয়ৎ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

অষ্টমোঽধ্যায়ঃ॥ ৮॥

নবমোঽধ্যায়ঃ

নবমে মোহিতৈর্দ্দৈত্যৈরর্পিতেঽমৃতভাজনে।

তদ্বঞ্চনেন দেবেভ্যোঽমৃতং দত্তং তয়েয্যতে॥ (১)

২। অহো রূপং সৌন্দর্য্যম্, ধাম দ্যুতিরিতি বদন্তঃ কা ত্বমিত্যাদি পপ্রচ্ছুঃ॥

৩। মথ্নন্তীব—ক্ষোভয়ন্তীব॥

৪—৫। কস্যাসীত্যযুক্তমুক্তমস্মাভিঃ, যতস্ত্বং ন কেনচিদ্ভুক্তপূর্ব্বেত্যাহুঃ—নেতি দ্বাভ্যাম্॥ (৪) ত্বা ত্বামমরাদিভিরস্পৃষ্টপূর্ব্বাং ন জানীম ইতি ন, অপি তু জানীম এব॥ (৫) আস্তামিদং ত্বদ্দর্শনস্ত্বীশ্বরৈর্নৈব

সম্পাদিতমিত্যাহুঃ —নূনমিতি। সর্ব্বেন্দ্রিয়াণাঞ্চ মনসশ্চ প্রীতিং বিধাতুং সঘৃণেন কিং প্রেষিতাসি, কিংবা যদৃচ্ছয়ৈবাগতাসি ? নৈবং নূনং প্রেষিতৈবেত্যর্থঃ ॥

৭। ভেদো বিগ্রহো যথা ন ভবেৎ, তথা ॥

৯। সঙ্গতাঃ—অনুস্যূতাঃ ॥

১০। হে সুরদ্বিষঃ ॥

১১। ভাবেন কেনাপ্যভিপ্রায়েণ গম্ভীরং যথা ভবত্যেবং[১] জহসুঃ ॥

১২। ঈষৎস্মিতেন শোভা যস্যাস্তয়া। ময়া কৃতং সাধু বাসাধু যদ্ব্যভ্যুপেতাঙ্গীকুরুত, তর্হি বিভজে ॥

১৩। অসুরপুঙ্গবা দৈত্যশ্রেষ্ঠাঃ, প্রমাণমিয়ত্তামজানন্তঃ ॥

১৫। যথোপজোষং যথাপ্রীতি। অহতস্য লক্ষণম্—'অহতং যন্ত্রনির্ম্মুক্তং মুক্তং বাসঃ স্বয়ম্ভুবা। শস্তং তন্মাঙ্গলিকেষু তাবন্মাত্রেণ সর্ব্বদা ॥' ইতি। প্রাগগ্রেষু কুশেষূপবিবিশুঃ ॥

১৬। ধূপৈরামোদিতায়াং সুরভীকৃতায়াং শালায়াম্ ॥

১৭। অথ তস্যাং শালায়াং হে নরেন্দ্র! সা কলসপাণিরাবিবেশ। কথম্ভূতা ? 'মণিবন্ধাদাকনিষ্ঠং করস্য করভো বহিঃ', করভসদৃশৌ সুবৃত্তাবূরূ যস্যাঃ সা ; উশৎ কমনীয়ং দুকূলং যস্মিংস্তেন শ্রোণীতটেন বিশালয়া শ্রোণ্যালসা মন্দা গতির্যস্যাঃ সা ; করভোরুলসদ্দুকূলেতি পাঠে করভসদৃশয়োরূর্ব্বোর্লসদ্দুকূলং যস্যাঃ সা চাসৌ শ্রোণীতটেনালসগতিশ্চ ; মদেন বিহ্বলে অক্ষিণী যস্যাঃ ॥

১৮। তাং শ্রিয়ঃ সখীং সংবীক্ষ্য দেবা অসুরাশ্চ সংমুমুহুঃ। কথম্ভূতাম্ ? কনকময়ে কুণ্ডলে যস্যাঃ সা চাসৌ চারবঃ কর্ণাদয়ো যস্যাঃ সা চ তাম্ ; বিগলিতঃ স্রস্তঃ স্তনপট্টিকায়া অন্তো যস্যাস্তাম্ ॥

১। ভবতি তথৈব (গ)।

১৯—২১। এবং তান্ মোহয়িত্বা যৎ কৃতবাংস্তদাহ ত্রিভিঃ। (১৯) অসুরাণাং সুধাদানং সর্পাণাং ক্ষীরদানমিব দুর্নয়মন্যায্যং মত্বা তাং সুধাং তেভ্যো ন ব্যভজৎ। অয়ং ভাবঃ—'দৈত্যৈর্মদীয়ং সাধ্বসাধু বা সর্ব্বমনুমতমেব, অতোঽহং মদ্ভক্তান্ দেবানেব সুধাং পায়য়িষ্যামি ; কিঞ্চ, তৈর্যথান্যায়ং বিভজস্বেত্যুক্তম্, ন চৈতেভ্যো জাত্যৈব ক্রূরেভ্যো দানং ন্যায্যমতস্তেভ্যঃ সুধাং ন দদ্যাম্' ইতি॥ (২০) পঙ্‌ক্তীঃ পৃথগ্বিবিক্তাঃ কল্পয়িত্বা বিধায় তাসু পঙ্‌ক্তিষু স্বেষু স্বেষু তত্তৎস্বজাতীয়েষু[১] তাংশ্চাসুরানপি প্রতারণার্থমেবোপবেশয়ামাস॥ (২১) উপসঙ্করৈর্বহুমানপ্রিয়বাক্যাদিনা তানতিক্রম্যাতিক্রম্য গমনৈঃ ; দূরস্থানপি দেবান্॥

২২। তয়া কৃতঃ স্নেহো যেষু ; স্ত্রিয়া সহ বিবাদস্য জুগুপ্সয়া নিন্দয়া॥

২৩। কৃতোঽতিপ্রণয়ঃ স্নেহো যৈঃ ; প্রণয়াপায়েন কাতরা ভীতাঃ ; 'এতে তাবৎ কৃপণাঃ পূর্ব্বং কিঞ্চিৎ পিবন্তু, যূয়ং তু ধীরাঃ ক্ষণং প্রতীক্ষধ্বম্' ইত্যাদি-বহুমানেনাবদ্ধা নিয়ন্ত্রিতাঃ। সময়পালনাদিভিঃ ষড়্‌ভিরেতৈঃ কারণৈরপ্রিয়ং কিঞ্চিদপি নোচুঃ, কিন্তু তূষ্ণীমাসন্॥

২৪। দেবপঙ্‌ক্তৌ চন্দ্রার্কয়োর্মধ্যে প্রবিষ্টঃ সোমমমৃতমপিবৎ॥

২৫। হরিস্তস্য শিরো জহার। অপ্লাবিতোঽসংস্পৃষ্টঃ॥

২৬। গ্রহং সূর্য্যাদিবদ্গ্রহত্বাধিকারিণম্॥

২৮। হরিভক্তানামেবোদ্যমঃ ফলতি, নান্যেষামিত্যেবমাখ্যানতাৎপর্য্যমাহ—এবমিতি। সমা দেশাদয়ো যেষাম্, হেতুর্মন্দরাদ্রিঃ, অর্থঃ সমুদ্রে ক্ষিপ্তং বীরুধাদি বিবিধঃ কল্পঃ ; ফলং কেষাঞ্চিজ্জাতং কেষাঞ্চিন্নেতি বৈচিত্র্যং যেষাং তে ফলবৈষম্যবন্তো বভূবুরিত্যর্থঃ। তদেবাহ—তত্র তেষু, যস্য পাদপঙ্কজরজঃশ্রয়ণাদ্দেবা অমৃতং ফলমাপুঃ, স এব সেব্য ইত্যর্থঃ, যত্তদোর্নিত্যসম্বন্ধাৎ॥

১। তৎসমজাতীয়েষু (ঘ)।

২৯। এতদেবোপপাদয়তি—যদিতি। অসুঃ প্রাণঃ, বসু ধনম্, প্রাণাদিভির্দেহাত্মজাদিষু নৃভির্যদ্ যুজ্যতে প্রযুজ্যতে, দেহাদ্যর্থং যৎ কিঞ্চিৎ ক্রিয়ত ইত্যর্থঃ, তদসদ্‌ব্যর্থং ভবতি। কুতঃ? পৃথক্ত্বাদ্ভেদাশ্রয়ত্বাৎ শাখাদিনিষেচনবৎ। তৈরেব প্রাণাদিভিরীশ্বরোদ্দেশেন যৎ ক্রিয়তে, তত্তু সৎ মহাফলং ভবতি। কুতঃ? অপৃথক্ত্বাদীশ্বরস্য সর্ব্বানুগতত্বাৎ। তত্র দৃষ্টান্তঃ—যত্তরোর্মূলনিষেচনং তদ্‌যথা সর্ব্বস্য স্কন্ধশাখাদেরপি ভবতীতি; যদ্বা, ল্যব্লোপে পঞ্চম্যৌ; পৃথক্ত্বং পর্য্যালোচ্য ভেদদৃষ্ট্যা দেহাদ্যুদ্দেশেন যৎ ক্রিয়তে, তদসৎ; অপৃথক্ত্বং পর্য্যালোচ্যেশ্বরদৃষ্ট্যা তৈরেব তেষ্বেব চ যৎ ক্রিয়তে, তৎ সদ্ভবতীতি। শেষং সমানম্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
নবমোঽধ্যায়ঃ॥ ৯॥

দশমোঽধ্যায়ঃ

দশমে মৎসরাদ্দৈত্যৈরারব্ধে তু মৃধেঽসুরৈঃ।
দৈত্যমায়াবিষণ্ণেষু দেবেষ্বাবির্ব্বভৌ হরিঃ॥ (১)
তদেবমমৃতাবাপ্তির্নাভক্তানামিতীরিতম্।
ভক্তমৎসরতঃ প্রাণহানিঃ পুনরুদীর্য্যতে॥ (২)

৫। রণঃ সংগ্রামঃ, উদন্বতঃ সমুদ্রস্য, রোধসি তীরে বভূব॥

৬। অন্যোঽন্যং সমাসাদ্য নিজঘ্নুঃ॥

১৩—১৫। চিত্রধ্বজপটাদিভিশ্চ বীরাণাং মালাভিশ্চ রাজিভির্দেবদানব-বীরাণাং ধ্বজিন্যৌ, যাদসাং মালাভিঃ সাগরাবিব রেজতুরিতি ত্রয়াণামন্বয়ঃ,

যাদোভিরিতি বা। (১৩) সিতৈরমলৈরাতপত্রৈশ্চ বার্হৈশ্চামরৈশ্চ ব্যজনৈঃ॥ (১৪) বাতেনোদ্ধূতৈরুত্তরৈরুত্তরীয়ৈরুষ্ণীষৈশ্চ সূর্য্যরশ্মিভিঃ সুতরাং স্ফুরদ্ভিঃ॥

১৬। অসুরাণাং যা চমূস্তস্যাঃ পতিঃ স বলির্যানমাস্থিতঃ॥

১৮—২০। উদয় উদয়গিরিশিখরে স্থিতশ্চন্দ্র ইব রেজ ইতি ত্রয়াণামন্বয়ঃ॥

২৫। স্রবন্তি প্রস্রবণানি যস্মিন্নিতি মদধারাসাদৃশ্যম্॥

২৬—২৭। নানা বাহনাদীনি যেষাং তে ; দেবা অসুরাশ্চ মিথো যুযুধুঃ॥

২৮—৩৪। দ্বন্দ্বান্যেবাহ—যুযোধেতি সপ্তভিঃ। (২৮) অস্তুত—আস্তুদযুধ্যতেত্যর্থঃ॥ (৩০) সূর্য্যো দেব এক এব শতেন বলিসুতৈঃ, বাণো জ্যেষ্ঠো যেষাং তৈঃ॥ (৩১) নিশুম্ভশুম্ভাভ্যাং দেবী॥

৩৭। আরোহন্তীত্যারোহাস্তৈঃ সহিতা অন্যে চ বাহাঃ, পূর্ব্বং তু কেবলং গজাদয় উক্তাঃ। কথম্ভূতাঃ? নিকৃত্তা বাহ্বাদয়ো যেষাম্; ছিন্নানি ধ্বজাদীনি যেষাং তে॥

৩৮। তেষাং দেবাদীনাং পদাঘাতৈ রথাঙ্গৈশ্চ চূর্ণিতাদাযোধনাদ্রণভূমেরুত্থিতো রেণুর্দ্দিশঃ খং দ্যুমণিঞ্চ সূর্য্যং ছাদয়ংস্তদৈব খাদের্ন্যবর্ত্তত। কথম্ভূতাৎ? অসৃক্স্রুতিভী রক্তক্ষরণৈঃ পরিপ্লুতাৎ সিক্তাৎ; যদ্বা, পরিপ্লবনাদ্ধেতোর্ন্যবর্ত্তত, ভাবে ক্তঃ, রক্তধারাণাং তাবৎপর্য্যন্তমুচ্ছলনাদিত্যর্থঃ ; পরিপ্লুত ইতি প্রথমান্তপাঠে রেণোর্বিশেষণম্॥

৩৯। শিরোভির্মহাভুজৈশ্চ করভসদৃশৈরূরুভিশ্চ সা রণভূঃ প্রকর্ষেণাস্তৃতা সতী বভৌ। কথম্ভূতৈঃ শিরোভিঃ? উদ্ধৃতান্যুৎপতিতানি কিরীটানি কুণ্ডলানি চ যেভ্যস্তৈঃ, সংরম্ভযুক্তা দৃশো যেষু তৈঃ, পরিদষ্টা দচ্ছদা ওষ্ঠা যেষু তৈঃ॥

৪০। পতিতানি যানি স্বশিরাংসি তত্রত্যৈরক্ষিভিস্তৈঃ পশ্যন্ত ইত্যর্থঃ। উদ্যতান্যায়ুধানি যৈস্তৈর্দোর্দ্দণ্ডৈর্যুক্তাঃ ॥

৪১। বাহানৈরাবতপাদরক্ষকান্, আরোহং গজযন্তারম্, আর্চ্ছয়দ্-বিব্যাধ ॥

৪৩। দুর্ম্মর্ষোঽসহনো বলিঃ ॥

৪৪। ঋষ্টয়ঃ —ঋষ্টীঃ ॥

৪৬। টঙ্কবত্তীক্ষ্ণাগ্রৈঃ শিখরৈঃ সহিতাঃ ॥

৪৯। স্তনয়িত্নবশ্চাঙ্গারান্ মুমুচুরিত্যনুষঙ্গঃ ॥

৫০। অধাক্ আর্ষঃ, অধাক্ষীদিত্যর্থঃ ॥

৫১। উদ্ধূতৈস্তরঙ্গৈরাবর্ত্তৈশ্চ ভীষণঃ ॥

৫২। এবমন্যৈশ্চ দৈত্যৈঃ সৃজ্যমানাসু ॥

৫৩। যত্র যদা, তত্র তদা, তৈর্ধ্যাতঃ সন্ ॥

৫৪। অষ্টাবায়ুধযুক্তা বাহবো যস্য ; শ্রীশ্চ কৌস্তুভশ্চানর্ঘ্যং কিরীটঞ্চ কুণ্ডলে চোল্লসন্তি শ্রীকৌস্তুভাদীনি যস্মিন্ ॥

৫৫। অসুরাণাং কূটকর্ম্ম মন্ত্রাদিপ্রয়োগস্তস্মাজ্জাতাঃ। মহিনা—মহিম্না ; হরেঃ স্মৃতিরেব সর্ব্বাসাং বিপদাং বিমোক্ষণরূপা, কিমুত হরেঃ প্রবেশ ইত্যর্থঃ ॥

৫৬। ইভারিবাহঃ, সিংহবাহঃ, অহিনোচ্চিক্ষেপ ; লীলয়ৈব তদ্-গৃহীত্বাহনদহন্ ; হে নৃপ ! ॥

৫৭। যস্য চক্রেণ কৃত্তশিরসৌ পেততুস্তং তথাভূতমপ্যাহত্য সংহত্যা[১] গু-জেন্দ্রং গরুড়মহনৎ, তং হন্তুং গদামুন্নিন্য ইত্যর্থঃ ; আদ্যো হরিঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
দশমোঽধ্যায়ঃ ॥ ১০ ॥

১। সজ্জটা- (খ)।

একাদশোঽধ্যায়ঃ

একাদশে তু দেবেষু দৈত্যঘাতিষু নারদঃ।
দেবানবারয়চ্ছুক্রো মৃতান্ দৈত্যানজীবয়ৎ॥ (১)

২। উদযচ্ছৎ—উন্নিন্যে॥

৪। নিবদ্ধান্যক্ষীণি যেষাং তান্ বালান্ জিত্বা নটঃ কপটবৃত্তির্যথা তেষাং ধনং হরতি, তথা হে মূঢ়! মায়েশানস্মান্ জেতুমিচ্ছসি॥

৫। মৎপ্রভাবং শৃণ্বিত্যাহ—আরুরুক্ষন্ত্যারোঢ়ুমিচ্ছন্তি যে চোৎসিসৃক্ষন্ত্যল্লঙ্ঘয়িতুমিচ্ছন্তি মোক্ষমিচ্ছন্তীত্যর্থঃ। অধো বিধুনোমি পাতয়ামি॥

৮। কালরশনং কালযন্ত্রিতম্, অতো ন হৃষ্যন্তি। তত্রৈবং বিবেকে যূয়মপণ্ডিতা অনিপুণাঃ॥

৯। তত্র কীর্ত্তিজয়াদাবাত্মানং সাধনং মন্যমানানাং বো গিরো ন গৃহ্নীমঃ; মর্ম্মসু তাড়নং যাভিস্তাঃ॥

১০। বিভুমিন্দ্রম্; বীরো বলিঃ॥

১১। তোত্রমঙ্কুশস্তেনাহত ইব॥

১২। সযানো বিমানসহিতঃ॥

১৯। নমুচির্বলঃ পাকশ্চেতি ত্রয় আজগ্মুঃ॥

২১—২৩। ত্রয়াণাং পৃথগ্‌বিক্রমানাহ—হরীনিতি ত্রিভিঃ। (২১) হর্য্যশ্বস্য—ইন্দ্রস্য। তাবদ্ভির্দ্দশভিঃ শতৈঃ॥ (২৩) আহত্য—ইন্দ্রং বিদ্ধা॥

২৪। প্রাবৃট্‌কালীনং সূর্য্যম্॥

২৫। বণিক্‌পথা বণিজঃ, ভিন্না নৌর্যেষাং তে ভিন্ননাব ইত্যর্থঃ॥

২৬। তুরাষাড়িন্দ্রোঽশ্বাদিসহিতো বিনির্গতঃ। অগ্রণীঃ—সারথিঃ॥

২৯। শোকামর্ষাভ্যাং যুক্তয়া রুষা ক্রোধেনান্বিত ইন্দ্রং হন্তুং পরমোদ্‌যোগং চকার॥

৩০। ঘণ্টাবদ্ ঘণ্টাভির্যুক্তম্ ॥

৩২। অতিবীর্য্যং বৃত্রমভিনদিতি তথা ॥

৩৪। পতত্রৈঃ —পক্ষৈঃ ॥

৩৫। তপঃসারময়ং বীর্য্যাধিকং ত্বাষ্ট্রম্ ; তপ এব বৃত্রঃ, স যেন বজ্রেণ ময়া বিপাটিতঃ ॥

৩৬। দণ্ডং লগুড়তুল্যং কুলিশম্, ব্রহ্মতেজো দধীচেঃ সামর্থ্যম্ ॥

৩৮। আর্দ্রশুষ্কাভ্যাং মৃত্যুর্নৈবেতি ॥

৪০। উভয়াত্মকত্বমেবাহ—ন শুষ্কেণ, ন চার্দ্রেণ ফেনেন ; তথা চ শ্রুতিঃ —'অপাং ফেনেন নমুচেঃ শির ইন্দ্রোঽদারয়ৎ' ইতি ॥

৪৫। অনুচরৈরুপগীয়মানা ইত্যর্থঃ ; উপগীয়মানৈরনুচরৈঃ সহেতি বা ॥

৪৭। অবিনষ্টা অবয়বা যেষাম্, বিদ্যমানা শিরোধরা যেষাং তান্ ॥

৪৮। প্রত্যাপন্নানি পুনঃ প্রাপ্তানীন্দ্রিয়াণি স্মৃতিশ্চ যেন সঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
একাদশোঽধ্যায়ঃ ॥ ১১ ॥

দ্বাদশোঽধ্যায়ঃ

দ্বাদশে মোহিনীরূপবিভ্রমালোকনোৎসুকম্ ।
ভবং সম্মোহয়ামাস হরিঃ পুনরসান্ত্বয়ৎ ॥ (১)
অমুহন্নসুরা বিষ্ণুমায়য়া ন তদদ্ভুতম্ ।
ইতি বক্তুং মহাদেবমোহোঽয়মুপবর্ণ্যতে ॥ (২)

১—২। হরিঃ সোমমপায়য়ৎ, ইতীদং নিশম্য স যত্রাস্তে, তত্র তদ্রূপং দ্রষ্টুং যযাবিত্যুত্তরেণান্বয়ঃ ॥

৩। সোময়া—উময়া সহ ॥

৪—১১। ত্বয়ি কিঞ্চিন্ন চাশ্চর্য্যং বয়ং ত্বাশ্চর্য্যমানসাঃ।
ইতি বক্ষ্যন্মহাদেবস্তুষ্টাব হরিমষ্টভিঃ ॥ (৩)

(৪) ত্বয়ি মহামায়াবিনি পরমেশ্বরে ন হি কিঞ্চিদঘটিতমিব, বয়ন্তু পরমকৌতূহলেন দ্রষ্টুমাগতা ইতি বহুধা সম্বোধয়ন্ স্তৌতি—হে দেবদেব! কুতোঽহং দেবানাং দেবঃ? ইত্যত আহ—হে জগদ্ব্যাপিন্! তৎ কুতঃ? হে জগন্ময়! তর্হি কিং প্রধানম্? ন, হে জগদীশ! তচ্চ কুতঃ? তত্রাহ—সর্ব্বেষামপি ত্বং হেতুরত ঈশ্বর আত্মত্বাচ্চ, ন জড়ং ন প্রধানং ত্বমিত্যর্থঃ ॥ (৫) নন্বু জগন্ময়ত্বোক্ত্যা জগত উৎপত্ত্যাদিনাসত্যত্বেন জাড্যেন চ মমাপি কিং তথা ত্বং ব্রূষে? ন হি, ন হীত্যাহ—আদ্যন্তৌ মধ্যঞ্চাস্য জগতো যতো ব্রহ্মণো ভবন্তি, যস্য চাব্যয়স্য তান্যাদ্যন্তমধ্যানি ন সন্তি, যচ্চ ব্রহ্মেদংকারাস্পদং দৃশ্যমহঙ্কারাস্পদং দ্রষ্টৃ[১] চ, বহির্ভোগ্যমন্তর্ভোক্তৃ চ, তৎ সত্যঞ্চ চিদ্রূপঞ্চ ব্রহ্মৈব ভবান্, অতো ন তব বিকারাদিশঙ্কেত্যর্থঃ ॥ (৬) তবৈবম্ভূতত্বে মুমুক্ষূণামাচারঃ প্রমাণমিত্যাহ—তবৈবেতি। উভয়ত্র ইহামুত্র চ সঙ্গং ত্যক্ত্বা ॥ (৭) নন্বু ব্রহ্মৈব চেদহম্, অসঙ্গোদাসীনস্য মম চরণাম্ভোজোপাসনয়া কিং তেষাম্? তত্রাহ—ত্বমিতি; ব্রহ্মত্বেঽপি ত্বং নাত্যন্তমুদাসীনঃ, কিন্তু বিশ্বস্য প্রপঞ্চস্যোদয়াদীনাং হেতুস্তদুপাধীনামাত্মনাং জীবানামীশ্বরশ্চ তত্তৎফলদাতা। তর্হি কিং রাজাদিবৎ কয়াপ্যপেক্ষয়া সেবকেভ্যঃ ফলং দদামি? ন হি ন হি, অনপেক্ষ এব ত্বম্। তর্হি কিমীশ্বরত্বেন? তত্রাহ—তৈরাত্মভিস্তত্তৎফলদানার্থমপেক্ষ্যত ইতি তদপেক্ষ-স্তস্য ভাবস্তদপেক্ষতা, তয়া। অনপেক্ষত্বমেব দর্শয়িতুং তদীয়ং ব্রহ্মত্বং বিশিনষ্টি—পূর্ণমমৃতঞ্চ সুখরূপম্। বিষয়সুখ-বৈলক্ষণ্যার্থমাহ—অবিকারং নিত্যমানন্দমাত্রঞ্চ, অতঃ[২] বিশোকম্। তৎ কুতঃ? বিগুণম্। কিঞ্চ, অনন্তং

১। উপদ্রষ্টৃ (ঘ); ২। কুতঃ? (ঘ)।

—ন বিদ্যতেঽন্যদ্‌যস্মাৎ, ব্রহ্মব্যতিরিক্তাভাবাদপি নিরপেক্ষস্ত্বমিত্যর্থঃ। তর্হি সর্ব্বাত্মকত্বে তত্তদ্বিকারপ্রসঙ্গো দুর্ব্বারঃ? তত্রাহ—অন্যৎ সর্ব্বতো ব্যতিরিক্তঞ্চ, কারণত্বাৎ। ন হ্যেবম্ভূতসুখাত্মকব্রহ্মস্বরূপস্য তবান্যাপেক্ষাস্তি, অতঃ কেবলং ভক্তানুগ্রহার্থমেব তবৈশ্বর্য্যম্, ন স্বার্থমিত্যর্থঃ॥ (৮) অন্যত্বমনন্যত্বঞ্চৈকস্য কুতঃ? ইত্যাশঙ্ক্য দৃষ্টান্তেনোপপাদয়তি—সদসৎ কার্য্যকারণরূপং দ্বয়মদ্বয়ঞ্চ পরমকারণং ত্বমেবৈকঃ। কৃতং কুণ্ডলাদিরূপং দ্বয়মকৃতঞ্চ কেবলমদ্বয়ং স্বর্ণং যথৈকমেব, তদ্বদেবেহ ত্বমিতি ত্বয়ি বস্তুতো ভেদো নাস্তি। কথং তর্হি ভেদপ্রতীতিঃ? তত্রাহ—অজ্ঞানত ইতি। কুতঃ? যস্মান্নিরুপাধিকস্যৈব তবায়ং গুণৈর্ব্যতিকরো ভেদঃ, ন স্বতঃ॥ (৯—১০) অতএব ত্বাং বহুধা বর্ণয়ন্তি, তত্ত্বতস্তু কেঽপি ন জানন্তীত্যাহ দ্বাভ্যাম্। (৯) ত্বাং 'ব্রহ্ম' বেদান্তিনোঽবযন্তি মন্যন্তে; ত্বামেব 'ধর্ম্মং' মীমাংসকা মন্যন্তে; প্রকৃতি-পুরুষয়োঃ পরং 'পুমাংসং' সাঙ্খ্যাঃ; বিমলোৎ-কর্ষিণী জ্ঞানা ক্রিয়া যোগা প্রহ্বী সত্যা ঈশানা অনুগ্রহা চেত্যেবং নবশক্তিযুতং 'পরং' পাঞ্চরাত্রাঃ; 'মহাপুরুষং' পাতঞ্জলাঃ॥ (১০) পরায়ুর্ব্রহ্মা, সত্ত্বসর্গাঃ সত্ত্বগুণেন সৃষ্টা অপি, যেন ত্বয়া বিরচিতং বিশ্বমপি খলু তত্ত্বতো ন জানন্তি; কিং পুনস্ত্বাম্? হে ঈশ! অভদ্রং রাজসং তামসং চ বৃত্তমুৎপত্তির্বৃত্তিশ্চ যেষাং তে ন জানন্তীতি, কিমুত বক্তব্যম্? (১১) কিন্তু, ত্বং তৎ সর্ব্বং জানাসীত্যাহ—স ত্বং সর্ব্বমবরুন্ৎসে ব্যাপ্নোষি জানাসি। কিং তৎ সর্ব্বম্? সমীহিতং স্বকৃতমদঃ স্থিতিজন্ম-নাশম্, অমুষ্য জগতো জন্মাদি ভূতানামীহিতঞ্চ জগতো ভববন্ধমোক্ষৌ চ। ব্যাপ্তৌ দৃষ্টান্তঃ—চরাচরাখ্যং দেহজাতং খঞ্চ যথা বায়ুরাবিশতি, তথা কথমবরুন্ৎসে, তদাত্মকতয়া তস্য সর্ব্বস্যাত্মতয়েত্যর্থঃ। আত্মত্বে হেতুঃ—অবগমো জ্ঞানস্বরূপ ইতি॥

১২—১৩। এবং স্তুত্বা প্রস্তুতং বিজ্ঞাপয়তি—অবতারা ইতি দ্বাভ্যাম্॥

১৫। স্মরকার্য্যাণি যোষিদ্বেশেন ভবিষ্যন্তীতি পশ্যতা। অয়ং ভাবঃ — অবশ্যং তাবদুন্মত্তান্ দৈত্যান্ বঞ্চয়িত্বা দেবেভ্যোঽমৃতং দেয়ম্, ন চৈবং বৈষম্যং রূপান্তরেণ কর্ত্তুমুচিতম্, অতো বঞ্চনমোহনাদিসারং কামিনীরূপং ময়া ধৃতমিতি ॥

১৬। তদ্রূপং দর্শয়িষ্যামি ; সঙ্কল্পপ্রভবঃ কামস্তস্যোদয়ো যস্মাৎ ॥

১৮। বিচিত্রাণি পুষ্পাণি, অরুণা পল্লবাশ্চ যেষাং তে দ্রুমা যস্মিন্। লসদ্দুকূলেন পর্য্যস্তে পরিবৃতে নিতম্বে মেখলা যস্যাস্তাম্ ॥

১৯। উৎপতৎপতৎকন্দুকলীলাবশেন যে আবর্ত্তনোদ্বর্ত্তনে নমনোন্নমনে তাভ্যাং কম্পিতয়োঃ স্তনয়োঃ প্রকৃষ্টহারাণাঞ্চোরুভরৈঃ প্রতিপদং মধ্যে প্রভজ্যমানামিব ; চলৎ পদমেব প্রবালবৎ কোমলং ততস্ততো নয়ন্তীম্ ॥

২০। দিক্ষু ভ্রমতঃ কন্দুকস্য চাপলৈশ্চাঞ্চল্যৈর্ভৃশং প্রোদ্বিগ্নতারে আয়তে লোলে চঞ্চলে লোচনে যস্যাঃ ; স্বকর্ণাভ্যাং বিভ্রাজিতে যে কুণ্ডলে, তাভ্যামুল্লসন্তৌ কপোলৌ, তাভ্যাঞ্চ নীলালকৈশ্চ মণ্ডিতমাননং যস্যাঃ ॥

২১। সংনহ্যতীং বধ্নন্তীম্, জগদ্বিমোহয়ন্তীম্ ॥

২২। তাং বীক্ষ্য দেবঃ শ্রীরুদ্র আত্মানমন্তিকে স্থিতামুমাং স্বগণাংশ্চ ন বেদ। কথম্ভূতঃ ? ইত্যেবম্ভূতয়া কন্দুকলীলয়া যা ঈষদ্ব্রীড়া, তয়া স্ফুটং স্মিতম্, তেন সহ বিসৃষ্টো যঃ কটাক্ষস্তেন মুষ্টো বঞ্চিতঃ, অতএব স্বয়ং যৎ স্ত্রিয়াঃ প্রেক্ষণম্, তয়া চ প্রতিসমীক্ষণম্, তাভ্যাং বিহ্বল আত্মা মনো যস্য ॥

২৩। তং কন্দুকমনুব্রজন্ত্যাঃ স্ত্রিয়া লঘু সূক্ষ্মং বাসঃ, সসূত্রং কাঞ্চী-সহিতম্ ॥

২৪। বিষজ্জন্ত্যাং কুঞ্চিতকটাক্ষৈরাত্মানং নিরীক্ষমাণায়াম্ ॥

২৫। তৎপাদং তস্যাঃ পদং সমীপং যযৌ ॥

৩০। অঙ্গ ! হে রাজন্ ॥

৩৪। এবং তামনুধাবন্ হরঃ সরিৎসরঃসু শৈলাদিষু চ সন্নিহিতো বভূব ॥

৩৬। তত্রহ দেবমায়য়া জড়ীকরণম্ ॥

৩৮। স্বাং নিষ্ঠাং প্রকৃতিম্ ॥

৪০। কালেন সৃষ্ট্যাদিনিমিত্তেন, ময়া কালরূপেণ ভাগশো রজ-আদ্যংশেন সমেতা মদধীনা সতী ॥

৪৫। অষ্টাধ্যায়ার্থনিগমনম্—ইতীতি ॥

৪৬। এতৎকীর্ত্তনাদৌ ফলমাহ—এতদিতি ॥

৪৭। ভগবতা কৃতং ভক্তপক্ষপাতং স্মরন্ নমস্করোতি—অসতাম-বিষয়ম্, ভাবো ভজনং তেন গম্যমঙ্ঘ্রিম্, প্রপন্নান্ শরণাগতান্, সিন্ধুমথ্যং সিন্ধোর্মথনেন জাতমমৃতং য আশয়দভোজয়ৎ[১] ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

ত্রয়োদশোঽধ্যায়ঃ

ত্রয়োদশে তু বর্ণ্যন্তে সপ্তমাদীন্যনুক্রমাৎ।
মন্বন্তরাণি সর্ব্বাণি ষড়্বিধানি পৃথক্ পৃথক্ ॥ (১)

১। সপ্তমাদিমন্বন্তরাণ্যাহ—মনুরিত্যাদিনা যাবদধ্যায়সমাপ্তি ॥

৪। আদিত্যাদয়ো দেবা ইত্যন্বয়ঃ ॥

৬। ভগবতো জন্ম অবতারঃ, তমেবাহ—আদিত্যানাং বিবস্বানর্য্যমা পূষেত্যাদ্যুক্তানাং মধ্যেঽবরং জন্ম যস্য সঃ ॥

১। -পায়য়ৎ (ক্বচিৎ পাঠঃ)।

৭। শক্ত্যা অবতারেণান্বিতানি ॥

৮—১০। অষ্টমং মনুং বক্তুং কথামাহ—বিবস্বত ইতি ত্রিভিঃ। (৯) একে বড়বাং তৃতীয়ামাহুঃ; মম তু সংজ্ঞৈব বড়বেতি মতম্। তদুক্তং ষষ্ঠে—'সৈব ভূত্বাথ বড়বা নাসত্যৌ সুষুবে ভুবি' ইতি। যমশ্চ যমী চ যমুনা শ্রাদ্ধদেবশ্চেতি ত্রয়ঃ সুতাঃ॥ (১০) সাবর্ণিঃ—পুত্রঃ॥

১৩। পদত্রয়ং যাচমানায়েমাং সর্ব্বাং মহীং সপ্তমে মন্বন্তরে দত্ত্বা, অষ্টমে মন্বন্তরে বিষ্ণোঃ প্রসাদেন চ রাদ্ধং লব্ধমিন্দ্রপদং হিত্বেত্যর্থঃ॥

১৫। রামঃ পরশুরামঃ; দ্রোণপুত্রোঽশ্বত্থামা॥

১৬। ইদানীন্তু স্বযোগত আসতে॥

১৯। অদ্ভুতঃ—ইন্দ্রঃ॥

২২। হবিষ্মৎপ্রমুখা ইত্যুক্তানামেব কেষাঞ্চিন্নামান্যাহ—হবিষ্মানিতি॥

২৩। বিসূচ্যাং জাতঃ সন্॥

২৪। একাদশম ইত্যাদিরার্ষঃ॥

২৯। তস্য মনোরন্তরং সাধয়িষ্যতি, সত্যসহসঃ সূনৃতায়াশ্চ সুতঃ সন্।

৩২। দিবস্পতেরিন্দ্রস্যোপহর্ত্তা সম্পাদকঃ সম্ভবিষ্যতি॥

৩৫। ক্রিয়াতন্তূন্ কর্ম্মসন্ততীর্বিতায়িতা বিস্তারয়িষ্যতি॥

৩৬। যুগসাহস্রেণ পর্য্যয়ঃ পরিবর্ত্তো যস্য, যুগসাহস্রপ্রমাণ ইত্যর্থঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
ত্রয়োদশোঽধ্যায়ঃ॥ ১৩॥

চতুর্দ্দশোঽধ্যায়ঃ

চতুর্দ্দশে তু সর্ব্বেষাং মন্বাদীনাং যথাযথম্[১]।
পৃথক্ কর্ম্মাণি বর্ণ্যন্তে ভগবদ্বশবর্ত্তিনাম্ ॥ (১)

২। পুরুষেণেশ্বরেণ যজ্ঞাদ্যবতারৈঃ শাস্যন্তে নিযুজ্যন্ত ইতি তথা ॥

৩। তদেবাহ—যজ্ঞাদয় ইতি ॥

৪—৭। ঋষ্যাদীনাং কর্ম্মাণ্যাহ—চতুর্যুগান্ত ইতি চতুর্ভিঃ। (৪) যতো যেভ্যঃ শ্রুতিগণেভ্যঃ ॥ (৫) উদিতা উক্তাঃ, যুক্তাঃ সংযতাঃ সন্তো মহীং ধর্ম্মং সঞ্চারয়ন্তি, মহ্যাং ধর্ম্মং প্রবর্ত্তয়ন্তীত্যর্থঃ ॥ (৬) প্রজাপালা মনুপুত্রাস্তং ধর্ম্মং পালয়ন্তি, যাবদন্তং যাবন্মন্বন্তরাবসানম্, বিভাগশঃ পুত্রপৌত্রাদিক্রমেণ; যে চান্যে দ্যাবাপৃথিব্যাদয়ো যত্র কর্ম্মণি ভোক্তৃত্বেনান্বিতাস্তৈশ্চ সহ ॥

৮—৯। প্রসঙ্গাদ্রূপান্তরৈরপি জগদ্যাত্রাপ্রবর্ত্তনমাহ—জ্ঞানমিতি দ্বাভ্যাম্। (৮) সিদ্ধাঃ সনকাদয়ঃ, ঋষয়ো যাজ্ঞবল্ক্যাদয়ঃ, যোগেশা দত্তাত্রেয়াদয়ঃ, তত্তদ্রূপঃ সন্, জ্ঞানং কর্ম্ম চ যোগঞ্চ ব্রূতে ॥ (৯) প্রজেশা মরীচ্যাদয়স্তেন রূপেণ, সর্গং করোতীতি শেষঃ; স্বরাড়্বপূ রাজমূর্ত্তিঃ; সর্ব্বেষামভবায় ভবতি। পৃথগ্বিধা গুণাঃ শীতোষ্ণাদয়ো যস্য ॥

১০। নামরূপাত্মিকয়া মায়য়া বিমোহিতাত্মভিরেভির্জ্জনৈর্নানাদর্শনৈঃ শাস্ত্রৈঃ স্তূয়মানো নিরূপ্যমাণোঽপি নৈব দৃশ্যত ইত্যর্থঃ ॥

১১। প্রাসঙ্গিকং নিরূপ্য প্রস্তুতমেবোপসংহরতি—এতদিতি। কল্পস্য বিকল্পস্য—অবান্তরকল্পস্য ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ ॥ ১৪ ॥

১। যথাক্রমম্ (গ)।

পঞ্চদশোঽধ্যায়ঃ

বলিং পঞ্চদশে বিশ্বজিতাচার্য্যা অযাজয়ন্।
ততোঽসৌ স্বর্গমজয়ত্তয়াদ্দেবা নিলিল্যিরে ॥ (১)

অত্রের্য্যতে নবাধ্যায্যা বামং বামনচেষ্টিতম্।
নিগ্রহচ্ছলতো যত্র বলের্ভূয়াননুগ্রহঃ ॥ (২)

১। ঈশ্বরঃ স্বয়ং কৃপণবৎ কস্মাদ্ধেতোরযাচত, লব্ধার্থো ভূত্বাপি তং কস্মাদ্ববন্ধ ?

৩। তত্র তাবদ্বলেস্ত্রিলোকীমপহর্ত্তুং যাচ্ঞাদিচ্ছলনং কৃতবানিতি বক্তুং ব্রাহ্মণারাধনবলেন বলেরকাণ্ড এব স্বর্গবিজয়ক্রমমাহ—পরাজিতশ্রী-রিত্যাদিনা যাবদধ্যায়সমাপ্তি। যুদ্ধে পরাজিতা শ্রীর্যেন সঃ; ইন্দ্রেণাসুভিশ্চ ত্যাজিতঃ সন্। ভৃগূন্ ভৃগোর্বংশ্যান্ শুক্রাদীন্। মহাত্মা উদারচিত্তঃ; অর্থানাং নিবেদনেনার্পণেন ॥

৪। ত্রিনাকং স্বর্গং জেতুমিচ্ছন্তং বিশ্বজিতা যাগেনাযাজয়ন্, মহাভিষে-কেণৈন্দ্রেণ বহ্বৃচব্রাহ্মণ-প্রসিদ্ধেন ॥

৫। হর্য্যশ্বস্যেন্দ্রস্য যে তুরঙ্গাস্তেষামিব বর্ণো হরিতো যেষাম্॥

৬। পুরটং সুবর্ণম্, তূণাবিষুধী, অরিক্তাবক্ষয্যশরৌ। পিতামহঃ প্রহ্লাদঃ; জলজং শঙ্খম্॥

৭। বিপ্রৈরর্জ্জিতঃ সম্পাদিতো যোধনার্থো যুদ্ধপরিকরো যস্য; তৈরেব কল্পিতং কৃতং স্বস্ত্যয়নং মঙ্গলবাচনাদি যস্য; আমন্ত্র্য পৃষ্ট্বা ॥

৮—৯। অথারুহ্য ররাজেতি দ্বয়োরন্বয়ঃ। (৮) সুস্রগ্ধরঃ শোভন-মালাধরঃ॥ (৯) হেমাঙ্গদাভ্যাং লসন্তৌ বাহূ যস্য; ধিষ্ণ্যস্থো বনে[১] প্রজ্বলিতঃ কুণ্ডস্থ আহবনীয় ইবেতি বা ॥

১। ভবনে (খ)।

১০—১১। তুল্যমৈশ্বর্য্যং বলঞ্চ শ্রীশ্চ যেষাং তৈর্দৈত্যযূথপৈর্বৃতো যযাবিতি দ্বয়োরন্বয়ঃ। (১০) পরিধীন্—দিশঃ॥ (১১) স্বৃদ্ধাম্—অতি-সমৃদ্ধাম্॥

১২—২২। ধিগ্ গ্রাম্যসুখম্, তথাবিধাং পুরীমকস্মাদেব পরিত্যজ্যে-ন্দ্রাদয়ঃ পলায়িতা ইতি বৈরাগ্যার্থমিন্দ্রপুরীমনুবর্ণয়তি—রম্যামিতি সার্দ্ধৈ-রেকাদশভিঃ। (১২) উপবনানি ফলপ্রধানানি নিকটস্থানি বা, উদ্যানানি পুষ্পপ্রধানানি দূরস্থানি বা, তৈ রম্যাম্; কূজন্তি বিহঙ্গমিথুনানি যেষু; গায়ন্তো মত্তা মধুব্রতা যেষু; প্রবালাদীনামুরুর্ভারো যাসু তাঃ শাখা যেষাং তেঽমরদ্রুমা যেষু তৈঃ॥ (১৩) যত্র যাসু সুরসেবিতাঃ প্রমদাঃ ক্রীড়ন্তি, তা হংসাদিকুলৈরাকুলা ব্যাপ্তা নলিন্যঃ সরাংসি যত্র যেষু সন্তি, তৈরুপবনোদ্যানৈ রম্যামিতি পূর্ব্বেণৈবান্বয়ঃ॥ (১৪) কিঞ্চ, পরিখাভূতয়া আকাশগঙ্গয়া বৃতাম্, প্রাকারেণ সৌবর্ণেন চ বৃতাম্, অট্টালাঃ প্রাকারোপরি রচিতান্যুন্নতানি যুদ্ধস্থানানি, তৎসহিতেন॥ (১৫) রুক্মপট্টানি কবাটানি যেষু, তৈর্দ্বারৈরবান্তরৈঃ স্ফটিকময়ৈ-র্গোপুরৈশ্চ পুরদ্বারৈর্জুষ্টাম্; বিভক্তাঃ প্রপথা রাজমার্গা যস্যাম্॥ (১৬) সভা উপবেশস্থানানি, চত্বরাণ্যঙ্গনানি, রথ্যা উপমার্গাঃ, তৈ-রাঢ্যাং সম্পন্নাম্; ন্যর্ব্বুদং দশকোটয়স্তৈর্গণনীয়ৈরনন্তৈর্বিমানৈর্যুতাম্; বজ্রবিদ্রুমময্যো বেদয়ো যেষু তৈঃ, শৃঙ্গাটকৈশ্চতুষ্পথৈর্যুতাম্॥ (১৭) নিত্যং বয়স্তারুণ্যং রূপঞ্চ সৌকুমার্য্যং যাসাং তা রূপবন্নার্য্যঃ স্বলঙ্কৃতাঃ স্ত্রিয়ঃ, যত্র যস্যাং ভ্রাজন্তে॥ (১৮) সুরস্ত্রীণাং কেশেভ্যো বিভ্রষ্টানাং নবসৌগন্ধিকস্রজামামোদম্॥ (১৯) হেমগবাক্ষেভ্যো নির্গচ্ছতা ধূমেন; সুরপ্রিয়াঃ—অপ্সরসঃ॥ (২০) মুক্তাময়ৈর্বিতানৈশ্চন্দ্রাতপৈঃ, মণিহেম-ময়ৈঃ কেতুভিশ্চ ধ্বজৈর্নানাপতাকাযুক্তাভির্বলভীভিশ্চ বিমানানাং পুরো-ভাগৈরাবৃতাং ব্যাপ্তাম্; বৈমানিকস্ত্রীণাং কলগীতৈর্মঙ্গলাম্॥ (২১)

উপদেবানাং গন্ধর্ব্বাদীনাং গীতকৈশ্চ মনোরমাম্; জিতা প্রভা সাক্ষাদ্-দীপ্ত্যধিষ্ঠাত্রী দেবতা যয়া[১] তাম্, অন্যৈরজিতপ্রভামিতি বা; জিতগ্রহামিতি পাঠে জিতা গ্রহাঃ সূর্য্যাদয়ো যয়া ॥ (২২) যৎ—যাম্ ॥

২৩। পৃতন্যয়া—সেনয়া ॥

২৫। কেন হেতুনা, এবং তেজসোর্জ্জিত আসীৎ ॥

২৬। প্রতিবোঢ়ুমপাকর্ত্তুম্ ॥

২৭। যতঃ কারণাদেতস্য ওজআদি, যত ওজআদেরেতস্য সমুদ্যমঃ ॥

২৮। উপভৃতম্—সঞ্চিতম্ ॥

৩০। তত্রোচিতং মন্ত্রমাহ—তস্মাদ্ যূয়ং ত্রিপিষ্টপমুৎসৃজ্য নিলয়মদর্শনং যাত, যতঃ কালাৎ ॥

৩১। কেনাস্য বিপর্য্যয়ঃ স্যাদিত্যত আহ—এষ ইতি। বিপ্রাণাং বলেনোদর্ক উত্তরোত্তরমধিকং ফলং যস্য সঃ ॥

৩২। সুমন্ত্রিতোঽর্থঃ কার্য্যং যেষাং তে নিলয়ং জগ্মুঃ ॥

৩৪। এবং প্রাপ্তমিন্দ্রপদং স্থিরীকর্ত্তুমযাজয়ন্; অনুব্রতমনুবর্ত্তিনম্ ॥

৩৬। দ্বিজদেবৈর্ব্রাহ্মণৈরুপলম্ভিতাং প্রাপিতাম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
পঞ্চদশোঽধ্যায়ঃ ॥ ১৫ ॥

ষোড়শোঽধ্যায়ঃ

ষোড়শে পুত্রনাশেন শোচন্ত্যা অদিতেঃ পতিঃ।
প্রার্থিতঃ কশ্যপঃ প্রাহ পয়োব্রতমিতীর্য্যতে ॥ (১)

১। ইদানীং শ্রীবামনাবতারপ্রসঙ্গমাহ—এবমিত্যাদি যাবৎসমাপ্তি; নষ্টেষু—অদৃষ্টেষু সৎসু ॥

১। যথা (ঘ)।

৩। স কশ্যপঃ পত্নীমিদমাহ ॥

৪—১০। দীনবদনত্বাদিকমালক্ষ্য বহুধা বিকল্পয়ন্ পৃচ্ছতি—অপ্য-ভদ্রমিতি সপ্তভিঃ। (৪) হে ভদ্রে! মৃত্যোশ্ছন্দমিচ্ছামনুবর্ত্তত ইতি তথা মৃত্যুবশবর্ত্তিনো জনস্যেত্যর্থঃ॥ (৫) হে গৃহমেধিনি! অপি বা কিংবা, গৃহেষু ধর্ম্মাদেঃ কিঞ্চিৎ কুশলমিতি কাক্বা প্রশ্নঃ; যত্র যেষু গৃহেষু, অযোগিনামপি যোগঃ স্বধর্ম্মাদিনা যোগফলং ভবতি॥ (৬) কিংবা ত্বয়াপূজিতা এবাভ্যেত্য গৃহাদ্যাতাঃ? (৭) নাচ্চিতা অনর্চ্চিতাঃ সন্তো যদি নির্গচ্ছন্তি, তে গৃহাঃ ফেরুরাজঃ শৃগালরাজস্তদীয়বিবরতুল্যাঃ॥ (৮) বেলায়াং হোমকালে, কর্হিচিন্ন হুতাঃ কিম্? (১০) ভবত্যা আত্মানং মনোঽস্বস্থমপ্রকৃতিস্থং লক্ষণৈর্ম্মুখম্লান্যাদিভির্লক্ষয়ামি ॥

১১—১২। অস্বাস্থ্যকারণমন্যদস্তীতি বক্তুং ত্বৎপৃষ্টমভদ্রাদিকং নাস্তী-ত্যাহ—ভদ্রমিতি দ্বাভ্যাম্। (১১) ইমে গৃহাস্ত্রিবর্গস্য পরং ক্ষেত্রমুদ্ভব-স্থানম্, ত্রিবর্গোঽপি যথাবদ্বর্ত্তত ইত্যর্থঃ॥ (১২) ভগবতস্তবানুধ্যানং যন্ময়া ক্রিয়তে, তস্মাদগ্নয়োঽতিথয় ইত্যাদি সর্ব্বং ন রিষ্যতি, ন হীয়তে ॥

১৩। প্রস্তুতং বিজ্ঞাপয়িতুমাহ—কো ন্বিতি ॥

১৪—১৭। সম্পাদ্যং কামমাহ—তবৈবেতি চতুর্ভিঃ। (১৫) সপত্নৈ-র্দৈত্যৈর্হৃতা শ্রীর্যেষাম্, হৃতং স্থানং যেষামিতি পুত্রাভিপ্রায়েণ বহুবচনং পুংস্ত্বঞ্চ ॥

১৮। কঃ কশ্যপঃ প্রথমং তাবৎ পুত্রস্নেহং ত্যাজয়িতুং বিস্ময়ব্যাজে-নৈব তত্ত্বমুপদিশতি—অহো ইতি সার্দ্ধেন ॥

২০—২১। অত্রাপরিতুষ্যন্তীং প্রত্যাহ— (২০) উপতিষ্ঠস্বেতি দ্বাভ্যাম্॥ (২১) নন্বেবম্ভূতকামপ্রাপ্তিহেতুর্দেবান্তরসেবা প্রসিদ্ধা? তত্রাহ—অমোঘেতি ॥

২২—২৩। যথা চ মে মনোরথং বিদধ্যাৎ, যথা চ মে আশু তুষ্যতি, তথা তৎসেবাপ্রকারমাদিশ ॥

২৪। মে ময়া পৃষ্টঃ পদ্মজো মে যদ্‌ব্রতমাহ, এতত্তে তব প্রবক্ষ্যামীত্যন্বয়ঃ ॥

২৫। অমলে—শুক্লে ॥

২৬—৪৪। তত্রাদৌ পূর্ব্বেদ্যুঃকৃত্যমাহ—'সিনীবাল্যাম্' ইত্যাদিনা 'ব্রহ্মচার্য্যথ ভদ্রাত্র্যাম্' ইত্যন্তেন গ্রন্থেন। (২৬) যদি লভ্যেত, তর্হি ক্রোড়বিদীর্ণয়া বন্যবরাহোৎখাতয়ালিপ্য ॥ (২৭) তত্র মন্ত্রঃ—ত্বং দেবীতি, হে দেবি! ত্বং রসায়া উদ্ধৃতাসি ॥ (২৮) নিবর্ত্তিত আত্মনিয়মো নিত্যনৈমিত্তিকো যেন ॥ (২৯) তত্রাবাহনাদৌ নব মন্ত্রানাহ—নমস্তুভ্যমিতি। পাদ্যাদৌ বিশেষতস্তু দ্বাদশাক্ষরং বক্ষ্যতি ॥ (৩০) চতুর্বিংশতিগুণাস্তত্ত্বানি জানাতীতি তথা তস্মৈ; গুণসংখ্যানস্য হেতবে সাংখ্যপ্রবর্ত্তকায় ॥ (৩১—৩৩) এবং সামান্যতো নত্বা গুণাবতারান্ প্রণমতি ত্রিভিঃ। (৩১) তত্রাদৌ মন্ত্রোক্তযজ্ঞরূপেণ বিষ্ণোঃ প্রণামঃ—নম ইতি। দ্বে শীর্ষে যস্য, ত্রয়ঃ পাদা যস্য, তস্তবে ফলবিস্তারকায়, ত্রয্যাং বিদ্যায়ামাত্মা যস্যেতি ত্রিধা বদ্ধ ইত্যস্যার্থ উক্তঃ। তথা চ মন্ত্রঃ—'চত্বারি শৃঙ্গাণি ত্রয়োঽস্য পাদা দ্বে শীর্ষে সপ্ত হস্তাঃ সোঽস্য ত্রিধা বদ্ধো বৃষভো রোরবীতি মহাদেবো মর্ত্ত্যানাবিবেশ' ইতি, * 'মার্গমুদ্গাবদালূনঃ সোঽয়ং প্রাজ্ঞৈর্যথাযথম্। বিষ্ণুস্তু যজ্ঞরূপেণ স্তূয়তেঽনেন তত্ত্বতঃ ॥'; তথা চ যাস্কঃ — 'চত্বারি শৃঙ্গাণীতি বেদা এব উক্তাস্ত্রয়োঽস্য পাদাঃ' ইতি, 'সবনানি ত্রীণি দ্বে শীর্ষে প্রায়ণীয়োদয়নীয়ে সপ্ত হস্তাঃ সপ্ত চ্ছন্দাংসি ত্রিধা বদ্ধস্ত্রেধা বদ্ধো মন্ত্রব্রাহ্মণকল্পৈর্বৃষভো রোরবীতি রোরবণমস্য সবনক্রমেণ ঋগ্‌ভির্যজুর্ভিঃ সামভির্যদেনমৃগ্‌ভিঃ শংসন্তি যজুর্ভির্যজন্তি সামভিঃ স্তুবন্তি মহাদেব ইত্যেব হি মহান্

* 'মার্গ'-ইত্যাদ্যারভ্য 'যজনায়েতি' ইতিপর্য্যন্তাংশঃ 'ঘ'-গ্রন্থে নাস্তি।

দেবো যদ্‌যজ্ঞো মর্ত্ত্যানাবিবেশেত্যেষ হি মনুষ্যানাবিশতি যজনায়' ইতি॥ (৩৩) প্রাণায়—সূত্রাত্মনে ; যোগৈশ্বর্য্যং শরীরং যস্য ॥ (৩৫) অধিগতা প্রাপ্তা শ্রীর্যেন, তস্মৈ ॥ (৩৭) তৎপাদপদ্ময়োরামোদং স্পৃহয়ন্ত ইব দেবাশ্চ শ্রীশ্চ যমন্ববর্ত্তন্ত, স মে প্রসীদতু ॥ (৩৮) আবাহনে পুরস্কৃতং সম্মানিতম্॥ (৪০) পয়সি শৃতং পক্কং পায়সম্। মূলবিদ্যয়া দ্বাদশাক্ষরেণৈব ॥ (৪২) পূর্ব্বোক্তাভিরন্যাভিশ্চ স্তুতিভিঃ ॥ (৪৩) তস্য শেষাং নির্ম্মাল্যম্। দ্বাববরৌ যেষাং তান্, অসম্ভবে দ্বাবপি ভোজয়েদিত্যর্থঃ ॥ (৪৪) সভাজিতৈস্তৈরনুজ্ঞাতঃ সন্, সেষ্টৌ বন্ধুভিঃ সহিতস্তস্যাং রাত্র্যাং ব্রহ্মচারী সন্, শ্বোভূতে প্রভাতে সতি ॥

৪৬। পয় এব ভক্ষ্য আহারো যস্য ॥

৪৮। অধঃ স্বপ্নং শয়নম্॥

৫০। পঞ্চকৈঃ—পঞ্চামৃতৈঃ ॥

৫৮। ময়া চ তে সমুদাহৃতম্॥

৬০। সর্ব্বযজ্ঞাখ্যোঽয়ং যজ্ঞঃ সর্ব্বব্রতমিতি চ স্মৃতমেতদ্‌ব্রতম্॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
ষোড়শোঽধ্যায়ঃ ॥ ১৬ ॥

সপ্তদশোঽধ্যায়ঃ

ততঃ সপ্তদশেঽদিত্যা কৃতে তস্মিন্ ব্রতে হরিঃ।
তৎকামপূরণায়াদৌ তৎপুত্রোঽভূদিতীর্য্যতে ॥ (১)

৬। প্রীতিবিহ্বলত্বাদেব সা বদ্ধাঞ্জলিঃ সতী স্থিতা, কেবলমীড়িতুং পুনর্নোৎসেহে ন শশাক, অপি তু তূষ্ণীং বভূব। কথম্ভূতা? আনন্দজলৈরাকুলে ঈক্ষণে যস্যাঃ ; পুলকৈরাকুলা আকৃতির্দ্দেহো যস্যাঃ ; তস্য দর্শনেন যোঽত্যুৎসবস্তেন গাত্রে বেপথুঃ কম্পো যস্যাঃ ॥

৭। তুষ্টাব পিবতীব উদ্বীক্ষমাণেতি চ ; ক্রিয়াভেদাৎ সেত্যস্য পদস্য[১] দ্বিরুক্তির্ন দোষঃ ॥

অযত্নতো বিনির্জ্জিত্য দৈত্যানত্যূর্জ্জিতানপি।
ভক্তান্ রক্ষিতুমীশস্ত্বমিত্যস্তৌদদিতিস্ত্রিভিঃ ॥ (২)

৮—১০। যজ্ঞেশেত্যাদি-দশভিঃ সম্বোধনৈস্তবাশক্যং কিমপি নাস্তীতি বদন্তী প্রার্থয়তে—শং নঃ কৃধি কুরু, যতো দীনানাং নাথোঽসি ত্বম্। তীর্থং শ্রবঃ কীর্ত্তির্যস্য, শ্রবণমেব মঙ্গলং যস্য, তাদৃশং নামধেয়ং যস্য ; আপন্নানাং শরণাগতানাং লোকানাং বৃজিনোপশমায়োদয়ো যস্য ॥ (৯) ভূম্নে মহতে নমঃ ; মহত্ত্বে হেতবঃ —বিশ্বায় ; বিশ্বস্য ভবনস্থিতিসংযমার্থং স্বৈরং গৃহীতাঃ পুরুশক্তের্মায়ায়া গুণা যেন, তস্মৈ ; তথাপি স্বস্থায়াপ্রচ্যুত-স্বরূপায়। কুতঃ ? শশ্বদুপবৃংহিতো নিত্যোর্জ্জিতো যঃ পূর্ণো বোধস্তেন ব্যাপাদিতং নিত্যং নিরস্তমাত্মনি তমো মায়ালক্ষণং যেন, তস্মৈ ॥ (১০) অস্মদীয়মনোরথপূরণমীষৎকরমেব তবেতি কৈমুত্যন্যায়েনাহ—আয়ুঃ পরং ব্রহ্মায়ুঃ ; পুনরপি দ্যৌশ্চ ভূশ্চ রসা রসাতলঞ্চ দ্যৌর্ভূরসাঃ ; দ্যৌরিতি পৃথক্ পাঠে ভূশ্চ রসাশ্চ বিলস্বর্গা ইতি বিগ্রহঃ। দ্যৌর্ভূরসেতি পাঠে ত্রীণি পদানি। সকলা যোগগুণা অণিমাদয়ঃ ॥

১১। ক্ষেত্রজ্ঞঃ —অন্তর্য্যামী ॥

১২। সপত্নৈর্হৃতা শ্রীর্যেষাং তেষাং স্বধামতশ্চ্যাবিতানাঞ্চ পুত্রাণাং সম্বন্ধি যৎ তদ্ভবত্যাশ্চিরকাঙ্ক্ষিতং[২] ময়া বিজ্ঞাতম্ ॥

১৩—১৫। কাঙ্ক্ষিতমেবাহ—তানিতি ত্রিভিঃ। (১৩) প্রতিলব্ধো জয়শ্চ শ্রীশ্চ যৈস্তৈঃ পুত্রৈঃ সহোপাসিতুমেকত্র স্থাতুমিচ্ছসি ॥ (১৫) প্রত্যাহৃতং যশশ্চ শ্রীশ্চ যৈস্তান্ ॥

১। সা সা ইতি পদদ্বয়স্য (ক) ; ২। পরমাকাঙ্ক্ষিতং (গ)।

১৬। অপারণীয়া অনতিক্রমণীয়াঃ; যদ্‌যস্মাদনুকূল ঈশ্বরঃ কালো যেষাং তৈর্বিপ্রৈর্গুপ্তা রক্ষিতাঃ, অনুকূলৈরীশ্বরৈঃ সমর্থৈর্বিপ্রৈর্গুপ্তা ইতি বা ॥

১৭। মম ময়া চিন্ত্য এব। তত্র হেতুঃ—সন্তোষিতস্তেত্যাদি; শ্রদ্ধানুরূপমিচ্ছানুসারেণ ফলহেতুত্বাৎ ॥

১৮। মারীচস্য তপস্যধিষ্ঠায় স্থিতঃ সন্ গোপ্তাহস্মি পালয়িষ্যামি ॥

১৯। অতঃ পতিমুপধাব ভজস্ব ॥

২০। দেবানাং গুহ্যং রহস্যং সর্ব্বং সুসংবৃতং সুগুপ্তং সৎ সম্পদ্যতে সিধ্যতি ॥

২১। প্রভোর্হরেরাত্মনি জন্ম লব্ধ্বা ॥

২৩। অবিতথমীক্ষণং দৃষ্টির্যস্য সঃ; অনিলো যথা সর্ব্বত্র সমোহপি দারুণি সংঘর্ষেণ বনদাহকমগ্নিমাধত্তে, এবং স্বয়ং পুত্রেষু সমোহপি দৈত্য-ক্ষপণং বীর্য্যমাধত্তেত্যর্থঃ ॥

২৪। ধিষ্ঠিতমধিষ্ঠায় স্থিতম্, সমীড়ে তুষ্টাবেত্যর্থঃ ॥

২৬। অদিতেরেব পূর্ব্বস্মিন্ জন্মনি পৃশ্নিরিতি নাম, তস্যা গর্ভায়া-র্ভকায়; বেদা গর্ভে যস্য; যদ্বা, বেদানাং গর্ভায়, বেদেষু প্রকাশমানায়ে-ত্যর্থঃ। ত্রয়ো লোকা নাভৌ যস্য স ত্রিনাভস্তস্মৈ। ত্রয়াণাং লোকানাং পৃষ্ঠ উপরি স্থিতায়। শিপিবিষ্টায় 'শিপি'-শব্দেন পশবো জীবাস্তেম্বন্তর্য্যামি-তয়া প্রবিষ্টায়, 'যজ্ঞো বৈ বিষ্ণুঃ, পশবঃ শিপির্যজ্ঞ এব পশুষু প্রতিতিষ্ঠতি' ইতি শ্রুতেঃ; যদ্বা, শিপয়ো রশ্ময়স্তৈর্বেষ্টিতায়েত্যর্থঃ; তথাপি বিষ্ণবে ব্যাপিনে ॥

২৭। অন্তঃ পতিতং তৃণাদি যথা গভীরং স্রোত আক্ষিপত্যাকর্ষতি, তথা কালাত্মা ভবান্ বিশ্বমাক্ষিপতি ॥

২৮। প্রজানাং প্রজাপতীনাঞ্চ ত্বমেব সম্ভবিষ্ণুরুৎপাদনশীলোঽসি। অয়ং ভাবঃ—ন হ্যেবম্ভূতস্য তব জন্মাদিসম্ভবঃ, কিন্তু দেবানাং প্রজাপতীনাং প্রজানাঞ্চ পরমাশ্রয়ত্বেন তৎকার্য্যসাধনায়াবতারোঽয়ম্, অতস্তান্ স্বর্গ-চ্যুতান্ পুনঃ স্বর্গে স্থাপয়েতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

সপ্তদশোঽধ্যায়ঃ॥ ১৭॥

অষ্টাদশোঽধ্যায়ঃ

ততস্ত্বষ্টাদশে ভূত্বা বামনঃ সংকৃতোঽখিলৈঃ।

যজ্ঞং গতস্ততস্তেন সংকৃত্যোক্তো বরান্ বৃণু[১]॥ (১)

১—৩। ইত্থং বিরিঞ্চেন স্তুতং কর্ম্ম দেবকার্য্যলক্ষণং বীর্য্যঞ্চ প্রভাবো যস্য স হরিরদিত্যাং প্রাদুর্বভূবেতি ত্রয়াণামন্বয়ঃ। (১) অমৃতভূর্মৃত্যু-জন্মশূন্যঃ; শঙ্খগদাব্জচক্রাণ্যস্য সন্তীতি তথা; অর্শআদিত্বেন মত্বর্থীয়োঽচ্-প্রত্যয়ঃ। চক্রেতি অবিসর্গপাঠে স চাসৌ পিশঙ্গবাসাশ্চ॥ (২) ঝষ-রাজো মকরস্তদাকারয়োঃ কুণ্ডলয়োস্ত্বিষোল্লসন্তী শ্রীর্বদনাম্বুজে যস্য; শ্রীবৎসো বক্ষসি যস্য; বলয়ৈরঙ্গদৈশ্চ সহোল্লসন্তি কিরীটাদীনি যস্য॥ (৩) শ্রীমত্যা বনমালয়া বিরাজিতঃ; বেশ্মগতং তমঃ॥

৪। অগ্নিজিহ্বা দেবাঃ, নগাঃ পর্ব্বতাঃ॥

৫। তৎপ্রাদুর্ভাবসময়মাহ—শ্রোণায়ামিতি। ভাদ্রপদশুক্লদ্বাদশী শ্রবণ-দ্বাদশীতি প্রসিদ্ধা, তস্যাম্; তত্রাপি শ্রোণায়াং শ্রবণস্থে চন্দ্র ইত্যর্থঃ। তত্রাপি শ্রবণস্য প্রথমাংশেঽভিজিতি নক্ষত্রে, তচ্চ শ্রুত্যা দর্শিতম্—'অভি-

---

১। শৃণু (গ)।

জিন্নাম নক্ষত্রমুপরিষ্টাদাষাঢ়ানামধস্তাচ্ছ্রোণায়াঃ’ ইতি। এবং বিশিষ্টে মুহূর্ত্তে প্রভুঃ প্রাদুর্ভূবেত্যন্বয়ঃ। কিঞ্চ, নক্ষত্রাণ্যশ্বিন্যাদীনি, ‘তারা’-শব্দেন গ্রহা গুরুশুক্রাদয়স্ত আস্থা যেষাং তে সূর্য্যাদয়োঽপি সর্ব্বে তস্য জন্ম দক্ষিণমুদারং চক্রুঃ, জন্মমুহূর্ত্তে গুণাবহা[১] বভূবুরিত্যর্থঃ ॥

৬। বিশেষান্তরমাহ—যস্যাং দ্বাদশ্যাং হরের্জন্ম, তত্তস্যামহন্যেব বিদুঃ। তদা চ মধ্যন্দিনগতঃ সবিতাতিষ্ঠৎ, সা চ দ্বাদশী ‘বিজয়া’ নাম প্রোক্তেত্যন্বয়ঃ ॥

৭। শঙ্খাদয়ো যে, তেষামন্যেষাঞ্চ চিত্রবাদিত্রতূর্য্যাণাং নির্ঘোষোঽভবৎ ॥

৮—১০। দেবা মনব ইত্যাদীনাং কুসুমৈঃ সমবাকিরন্নিতি তৃতীয়েনান্বয়ঃ ॥

১২। বিস্ময়ান্তরমাহ—যত্তদিতি, যত্তদ্বপুর্হরিরধারয়ৎ প্রকটিতবাংস্তেনৈব বপুষা, মাতাপিত্রোঃ সংপশ্যতোরেব বামনো বটুর্বভূব। দিব্যগতিরদ্ভুতচেষ্টিতঃ। স্বয়ং কথম্ভূতঃ? অব্যক্তচিদ্রূপঃ। কথমধারয়ৎ? ভাতির্দীপ্তিবিভূষণানি চায়ুধানি চ তৈর্ব্যক্তং যথা ভবতি তথা ॥

১৩। কর্ম্মাণি—জাতকর্ম্মাদীনি ॥

১৫। বনস্পতির্বনানাং পতিঃ সোমঃ ॥

১৭। পাত্রিকাম্—ভিক্ষাপাত্রম্ ॥

১৮। স এবং সম্ভাবিতো মারিষঃ শ্রেষ্ঠো বটুর্ব্রহ্মবর্চ্চসেন ব্রহ্মর্ষিগণসংজুষ্টাং তাং সভামতিক্রম্যারোচত ॥

২০। যদর্থং বটুর্বভূব, তদাহ—শ্রুত্বেত্যাদি যাবৎসমাপ্তি। যজমানং যজন্তম্। ভৃগূণাং ভৃগুভিরুপকল্পিতৈঃ প্রবর্ত্তিতৈঃ; অখিলেন সারেণ বলেন সম্ভৃতঃ সম্পূর্ণঃ ॥

১। গুণা বহবো (ঘ)।

২১। নর্ম্মদায়া উত্তরে তটে ভৃগুকচ্ছসংজ্ঞকে ক্ষেত্রে ক্রতূত্তমং প্রবর্ত্তয়ন্তো যে বলের্ঋত্বিজো ভগবন্তে তং ব্যচক্ষতাপশ্যন্, আরাৎ সমীপ এবোদিতং রবিমিব ॥

২২। তে ঋত্বিগাদয়ঃ সূর্য্যঃ কিমেত্যেবমাদি ব্যতর্কয়ন্নিতি শেষঃ ॥

২৩। হয়মেধবাটমশ্বমেধমণ্ডপং বিবেশ ॥

২৪। উপবীতাজিনমুপবীতবদ্‌ধৃতমজিনমেব উত্তরমুত্তরীয়ং যস্য তম্ ॥

২৫। সংক্ষিপ্তা অভিভূতাঃ সন্তঃ ॥

২৬। রূপস্যানুরূপা অবয়বা যস্য তং দৃষ্ট্বেতি শেষঃ ॥

২৮। চন্দ্রমৌলিশ্চেত্যন্বয়ঃ। অপ্যর্থে চকারঃ, চন্দ্রমৌলিরপি গঙ্গা-রূপং যন্মূর্দ্ধ্না দধারেত্যর্থঃ ॥

২৯। হে আর্য্য! ত্বা ত্বাং সাক্ষাৎ প্রত্যক্ষং ব্রহ্মর্ষীণাং তপ এব মন্যে। কথম্ভূতম্? তপঃ বপুর্দ্ধরং মূর্ত্তিধারি ॥

৩১। ত্বচ্চরণাবনেজনৈর্বার্ভির্হতমংহো যস্য, তস্য মে। পুনীতা—পবিত্রীকৃতা ॥

৩২। মে মত্তঃ, প্রতীচ্ছ গৃহাণ, হে অর্হত্তম! পূজ্যতম! ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

অষ্টাদশোঽধ্যায়ঃ ॥ ১৮ ॥

একোনবিংশোঽধ্যায়ঃ

ঊনবিংশে তু হরিণা যাচিতে চ পদত্রয়ে।
প্রতিশ্রুতে চ বলিনা জানন্ ভৃগুরবারয়ৎ ॥ (১)
দাতুঃ স্তুতিঃ স্বয়ং তুষ্টিরিত্যাদি প্রস্তুতোচিতম্।
বক্তব্যমিতি ভিক্ষুংস্তু শিক্ষয়ন্নাহ বামনঃ ॥ (২)

২—১৭। বচস্তৈবৈতদিতি যোড়শভিঃ। (২) হে জনদেব ! সাম্পরায়ে পারলৌকিকে ধর্ম্মে ; পিতামহশ্চ প্রহ্লাদঃ প্রমাণম্॥ (৩) নিঃসত্ত্বস্ত লক্ষণম্—যো দ্বিজাতয়ে যাচকায় প্রত্যাখ্যাতা, ন দদামীতি বক্তা। কৃপণস্ত লক্ষণম্—প্রথমং প্রতিশ্রুত্য যো বা ন দাতেতি॥ (৪) তীর্থে দানাবসরে ; যদ্যস্মিন্ যুষ্মৎকুলে॥ (৫) যতো যস্মিন্ কুলে জাতঃ॥ (৬) ক্ষোদ্ধারে ভূম্যা উদ্ধরণে॥ (৯) পরাগ্দৃশো বহির্দৃষ্টেঃ॥ (১০) অতো হৃদয়ে স্থিতং মাং ন জ্ঞাস্যতীত্যেবং নিশ্চিত্য শ্বাসানিলেঽন্তর্হিতঃ সূক্ষ্মো দেহো যস্য সঃ ; বিবিগ্নমতিকম্পিতং চেতো যস্য, অনুকম্পিতচেতা ইতি বাস্তবোঽর্থঃ॥ (১১) ন দদর্শ, অন্তঃপ্রবিষ্টত্বাৎ॥ (১২) পুমান্ যতঃ সকাশান্নাবর্ত্ততে, তদ্ব্রহ্মৈব নূনং গতো নিত্যমুক্তত্বাদিতি[১] বাস্তবোঽর্থঃ॥ (১৩) এবং মৃত্যুপর্য্যন্তমখণ্ডং বিষ্ণৌ বৈরং যৎ কৃতবাংস্তদুচিতমেব তস্যা-প্রতিদ্বন্দ্বমহাবলপরাক্রমস্য শূরাহংমানবিজৃম্ভিতক্রোধানুবন্ধস্য কথং নামাসৌ শূরশিরোমণির্জীবন্নেব কাতরবদ্বৈরমুপেক্ষিতবান্ ? ইত্যাশঙ্ক্যাহ—বৈরানুবন্ধ এতাবানামৃত্যোর্ভবতি, দেহিনাং দেহে নিগূঢ়াভিমানবতাং শূরাণাং তথাহং-মানেনোপবৃংহিতো মন্যুশ্চ ভবত্যেব। যতোঽজ্ঞানপ্রভবঃ, যতোঽজ্ঞান-নিবৃত্তেঃ প্রাক্ পৌরুষত্যাগো মৌঢ্যমেবেত্যর্থঃ[২]॥ (১৪) তদেবং পূর্ব্বজান্ স্তুত্বা তৎপিতরং স্তৌতি—পিতেতি। দ্বিজবেশধারিণো মদ্বৈরিণো দেবা এতে, ন তু দ্বিজা ইতি ; তদ্বিদ্বানপি স যাচিতঃ সন্, স্বীয়মায়ুর্দেবেভ্যো দদৌ॥ (১৬) মম পদা সংমিতানীতি ত্রিবিক্রমপদাভিপ্রায়েণ ন চানৃতবাদঃ, তত্রাপি স্বপদস্থানপগমাৎ॥ (১৭) যাবদর্থমেব প্রতিগ্রহো[৩] যস্য সঃ॥

১৮—২০। ঈশ্বরস্যাপি যাচ্ঞাকারণং যাচ্ঞাপ্রকারঞ্চোক্ত্বা বলে-র্বন্ধনপ্রশ্নোত্তরত্বেন তস্য গর্ব্বাতিরেকেণাধিক্ষেপপ্রকারমাহ—অহো ইতি ত্রিভিঃ। (১৮) তে বাচো বৃদ্ধানাং সম্মতাঃ, ত্বং তু বালো বালিশমতিশ্চ

১। নিত্যযুক্তত্বাদিতি (ঘ); ২। মান্দ্যমেবেত্যর্থঃ (ঘ); ৩। পরিগ্রহো (ঘ)।

বালিশানামজ্ঞানামিব মতির্যস্য, অতএব স্বার্থং প্রতি যথাবুধঃ; বস্তুতস্তু বাল ইব অবালিশমতিশ্চেতি চ্ছেদঃ, স্বার্থং প্রত্যবুধ ইতি চ ভক্তানামেবার্থং বুধ্যসে ন স্বার্থম্, পরিপূর্ণস্তু তব তদ্ব্যতিরেকেণ স্বার্থাভাবাদিত্যর্থঃ ॥ (১৯) অবুধত্বমেবাহ—মামিতি। দ্বীপস্তু দাশুষং দাতারম্। অবুদ্ধিমান্ বস্তুতস্তু বুদ্ধিমানিত্যেব চ্ছেদঃ ॥ (২০) কামং যথেষ্টং[১] সম্যক্ পাদপ্রসারণেনে-ত্যর্থঃ। অতএব তথা করিষ্যতীতি ॥

২১—২৭। পুনরপি নিঃস্পৃহত্বমেবাবিষ্কুর্ব্বন্নাহ—যাবন্ত ইতি সপ্তভিঃ। (২২) নববর্ষসমেতেন দ্বীপেনাপি সপ্তানাং দ্বীপবরাণামিচ্ছয়া ॥ (২৩) তৃষ্ণায়া অন্তং ন গতা ইত্যস্মাভিঃ শ্রুতম্ ॥ (২৪) অসন্তুষ্টস্তু প্রাপ্তৈস্ত্রিভি-র্লোকৈরপি ন সুখং বর্ত্ততে ॥ (২৬) আশুশুক্ষণিরগ্নিঃ ॥ (২৭) সিদ্ধোঽহং কৃতার্থঃ, এতাবতৈব সর্ব্বস্বাপহারসিদ্ধেরিতি গূঢ়োঽভিপ্রায়ঃ। তদেবাহ—বিত্তং হি যাবৎপ্রয়োজনমেব সুখম্, অধিকস্তু ক্লেশাবহত্বাদিত্যর্থঃ ॥

৩১। অনয়োঽন্বয়ঃ ॥

৩২। অন্বায়মেবাহ—এষ ইতি ॥

৩৩—৩৫। নন্বু ময়া পদত্রয়মেব প্রতিশ্রুতং নাধিকম্? তত্রাহ—ত্রিভিরিতি। (৩৩) ক্রমতামিতি চেৎ, তত্রাহ—সর্ব্বস্বমিতি ॥ (৩৪—৩৫) তথাপি প্রতিশ্রুতং সম্পাদনীয়মেবেতি চেৎ, তত্রাহ—ক্রমত ইতি দ্বাভ্যাম্ ॥ (৩৪) একেন পদা পাদন্যাসেন ভূমিং ক্রমমাণস্যেত্যর্থঃ, তার্ত্তীয়স্য তৃতীয়-পাদন্যাসস্য ॥

৩৬। তথাপি সর্ব্বস্বদানাৎ কীর্ত্তিস্তাবদ্ভবিষ্যতীতি চেৎ, তত্রাহ—ন তদ্দানমিতি। তপশ্চিত্তৈকাগ্র্যম্; কর্ম্ম—পূর্ত্তম্ ॥

৩৮—৪৩। নন্বু তর্হি প্রতিশ্রুত্য নেতি কথমনৃতং বাচ্যম্? তত্রাহ—অত্রাপীতি সার্দ্ধৈঃ ষড়্ভিঃ। (৩৮) অত্রাপি সত্যানৃতব্যবস্থায়াম্; বহ্বৃচ-

---

১। যথেচ্ছং (ঘ)।

শ্রুত্যা হি 'প্রথমমোমিতি সত্যং নেত্যনৃতম্' ইত্যাদিনা সত্যানৃতয়োর্লক্ষণ-পূর্ব্বকং স্তুতিনিন্দাভ্যাং সত্যং বিহিতম্, অনৃতঞ্চ নিষিদ্ধম্। অনন্তরঞ্চ 'পরাগ্বা এতদ্রিক্তমক্ষরম্' ইত্যাদিনা সত্যে দোষান্, অনৃতে চ গুণানুক্ত্বা, 'তস্মাৎ কাল এব দদ্যাৎ; কালে ন দদ্যাৎ তৎ সত্যানৃতে মিথুনীকরোতি' ইত্যুপসংহারেণ বৃত্তিসঙ্কটাদিষ্বনৃতমপ্যনুজ্ঞাতম্। তমিমং শ্রুত্যর্থং দর্শয়ন্নাহ—ওমিত্যঙ্গীকারেণ যৎ প্রোক্তং তৎ সত্যম্, নেতি যদাহ তদেবানৃতম্॥ (৩৯) তত্তু সত্যমীষদনৃতং বিনা ন সিধ্যতীত্যাশয়েনাহ—সত্যং পুষ্প-ফলং বিদ্যাজ্জানীয়াৎ। আত্মবৃক্ষস্য দেহরূপস্য বৃক্ষস্য। কুতো গীয়তে? শ্রুত্যোচ্যত ইত্যর্থঃ। জীবত ইতি পাঠান্তরন্তু সুগমম্। যদ্যপি শ্রুত্যা বাচঃ সত্যং পুষ্পফলং চেত্যুক্তম্, তথাপি বাচো দেহনির্ব্বাহাধীনত্বাদাত্মবৃক্ষস্যেতি প্রস্তুতানুসারেণোক্তম্। ভবতু, পুষ্পফলস্থানীয়ং সত্যম্, ততঃ কিম্? অত আহ—বৃক্ষে দেহেঽজীবতি তৎ পুষ্পফলং ন স্যাৎ। সা ন স্যাদিতি পাঠে শ্রুত্যুক্তায়া বাচঃ পরামর্শঃ। দেহশ্চানৃতেন রক্ষণীয় ইত্যাহ—অনৃতং ত্বাত্মনো দেহস্য মূলম্॥ (৪০) এতদেব দৃষ্টান্তেন স্পষ্টয়তি—তদ্যথা বৃক্ষ উৎপাটিতমূলঃ শুষ্যত্যচিরাদেবোদ্বর্ত্ততে পততি চ, এবং নষ্টমনৃতং যস্য, স আত্মা দেহঃ শুষ্যেৎ। যদ্যপি চ শ্রুত্যৈবমেবানৃতং বদন্নাত্মানমাবির্মূলং করোতীত্যেবং নিন্দয়ানৃতং নিষিদ্ধং তথাপ্যুপসংহারানুসারেণ তৎ কেবলা-নৃতবিষয়মিত্যভিপ্রেত্যৈবং ব্যাখ্যাতম্। দয়েত ত্বেতেনেতি চ তথৈবোক্তম্। তথা চ শ্রুতিঃ—'ওমিতি সত্যং নেত্যনৃতম্, তদেতৎ পুষ্পফলং বাচো যৎ সত্যং সহেশ্বরো[১] যশস্বী কল্যাণকীর্ত্তির্ভবিতা, পুষ্পং হি ফলং বাচঃ সত্যং বদত্যথৈতন্মূলং বাচো যদনৃতং তদ্যথা বৃক্ষ আবির্মূলঃ শুষ্যতি, স উদ্বর্ত্ততে এবমেবানৃতং বদন্নাবির্মূলমাত্মানং করোতি, স শুষ্যতি, স উদ্বর্ত্ততে, তস্মাদ-নৃতং ন বদেৎ, দয়েত ত্বেতেনেতি এতেনানেন ত্বনৃতেন দয়েত; সঙ্কটেষ্বাত্মানং

১। মহেশ্বরঃ (গ)।

রক্ষেদিতি শ্রুত্যর্থঃ ॥ (৪১—৪২) সর্ব্বথা সত্যবচনেন দেহো ন নির্ব্বহে-দিতি স্ফুটীকর্ত্তুং সত্যস্য দোষাননৃতস্য গুণানাহ—পরাগিতি দ্বাভ্যাম্। (৪১) যদোমিত্যক্ষরং তৎ পরাক্ দূরেঽর্থং গৃহীত্বাঞ্চতীতি, পরাগ্ রিক্তমিতি শ্রুতিপদস্য ব্যাখ্যানম্—অপূর্ণং বেতি। তত্তস্মাদর্থিনে যৎ কিঞ্চিদোমিতি দাস্যামীতি ব্রূয়াৎ, তেন রিচ্যেত ন্যূনো ভবেৎ। কিঞ্চ, ভিক্ষবে সর্ব্বমোঙ্কুর্ব্বন্ দাস্যামীত্যঙ্গীকুর্ব্বন্নাত্মনে কামেনালং পর্য্যাপ্তো ন ভবতি, তস্য ভোগো ন সিধ্যতীত্যর্থঃ। তথা চ শ্রুতিঃ—'পরাগ্বা এতদ্রিক্তমক্ষরং যদেতদোম্' ইতি। তদ্‌যৎ কিঞ্চোমিত্যাহ—'অত্রৈবাস্মৈ তদ্রিচ্যতে, স যৎ, স সর্ব্বমোঙ্কুর্য্যাদ্রিচ্যাদাত্মানং স কামেভ্যো নালং স্যাৎ' ইতি। নেতি যত্নক্তম্, যদনৃতং বচ এতৎ পূর্ণমর্থব্যয়াভাবাৎ, অভ্যাত্মঞ্চেতি চকারান্বয়ঃ। আত্মনোঽভিমুখমন্যস্যার্থমাকর্ষতীত্যভ্যাত্মম্। যো হি নিত্যং মম কিঞ্চিদপি নাস্তি, সীদামীতি ব্রূতে, স হি তেনানৃতেন পরেষামর্থানা-কর্ষতীতি প্রসিদ্ধম্। নন্ন তর্হীদমনৃতমেবামৃতবৎ সর্ব্বদা সেব্যং স্যাৎ? (৪২) নেত্যাহ—সর্ব্বমিতি। তথা চ শ্রুতিঃ—'অথৈতৎ পূর্ণমভ্যাত্মং যন্নেতি স যৎ সর্ব্বং নেতি ব্রূয়াৎ পাতিকাস্য[১] কীর্ত্তির্জায়েত, সৈনং তত্রৈব হন্যাৎ' ইতি॥ (৪৩) অতো বৃত্তিসঙ্কটাদিষ্বনৃতং ন দোষায়েত্যুপসংহরতি—স্ত্রীষু প্রোৎ-সাহনেন বশীকরণে, নর্ম্মণি পরিহাসে, বিবাহে চ বরাদিস্তুতৌ, গবাং ব্রাহ্মণানাঞ্চ হিতার্থম্, হিংসায়াঞ্চ কস্যচিৎ প্রাপ্তায়াম্। তথা চ যাজ্ঞবল্ক্যঃ—'বর্ণিনাং হি বধো যত্র তত্র সাক্ষ্যনৃতং বদেৎ' ইতি। তথা চ শ্রুতিঃ—'তস্মাৎ কাল এব দদ্যাৎ, কালে ন দদ্যাৎ, তৎ সত্যানৃতে মিথুনীকরোতি' ইতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

একোনবিংশোঽধ্যায়ঃ ॥ ১৯ ॥

১। পাপিকাস্য (গ)।

বিংশোঽধ্যায়ঃ

বিংশে ত্বনৃতভীতোঽসৌ জ্ঞাত্বাঽপি কপটং হরেঃ।
দদাবেব ততো বিষ্ণুঃ সহসাবর্দ্ধতাদ্ভুতম্ ॥ (১)

২। ভগবতা ত্বয়া প্রোক্তং সত্যম্। কিং তৎ? যোঽর্থকামাদিকং ন বাধেত, স হি গৃহমেধিনাং ধর্ম্ম ইতি ॥

৩। কথং প্রত্যাচক্ষে নিরাকরোমি?

৫। নন্বপ্রত্যাখ্যানে দোষা উক্তাঃ? তত্রাহ—নাহমিতি। অধন্যাদ্ দারিদ্র্যান্মৃত্যোরপি ॥

৬। কিঞ্চ, যদ্যদ্ধনাদিকং[১] তত্তৎ সর্ব্বং সম্পরেতং মৃতং পুরুষং হাস্যতি ত্যক্ষ্যত্যেব। তৎ কিমিতি জীবতৈব স্বয়ং ন দেয়মিতি ভাবঃ। তথাপি তাবদ্‌বৃত্তিসঙ্কটপরিহারার্থমর্দ্ধং দীয়তামিতি চেৎ, তত্রাহ—তস্যেতি। বিপ্রশ্চেত্তেনার্থেন দত্তেনাপি ন তুষ্যেৎ, তর্হি তস্যার্থস্য ত্যাগে দানে কিং নিমিত্তম্? ন কিঞ্চিৎ। যাচিতাদল্পস্য দানে বিপ্রস্যাসন্তোষাদ্দানং ব্যর্থমেব স্যাৎ; অতস্তদ্‌যাচিতং সর্ব্বং দেয়ম্, ন কিঞ্চিদিতি ভাবঃ ॥

৭। তর্হি ন দেয়মেবেতি চেৎ, তত্রাহ—শ্রেয় ইতি। দুস্ত্যজৈরসুভিরপি, কো বিকল্পো বিচারঃ ॥

৮। যৈর্দৈত্যেন্দ্রৈর্যুদ্ধেঽনিবর্ত্তিভিরিয়ং ভূর্বুভুজ উপভুক্তা, তেষামিহলোকান্ পরলোকাংশ্চ ভোগানিতি বা কালোঽগ্রসীৎ সংহৃতবান্, ন তু ভুবি তৈরধিগতং প্রাপ্তং যশোঽগ্রসীৎ, অতঃ কীর্ত্তিরেব সাধ্যা, নান্যদিতি ভাবঃ ॥

৯। দেহত্যাগাদপি ধনত্যাগে কীর্ত্তির্ভবতীত্যাহ—সুলভা ইতি। তনুং ত্যজন্তীতি তথা; তীর্থে পাত্রে; অতো দুষ্করো ধনত্যাগ এব ময়া কার্য্য ইতি ভাবঃ ॥

১। যদ্‌যদ্‌ধরাদিকং (খ)।

১০। তর্হি নির্দ্ধনত্বেন দৈন্যং স্যাদিতি চেৎ, তত্রাহ—মনস্বিন ইতি। যাদৃশতাদৃশানামপ্যর্থিনাং কামোপনয়েন কামপূরণেন দুর্গতির্দৈন্যমিতি যত্তচ্ছোভনং ভদ্রমেব, ভবাদৃশানান্তু কামোপনয়েন দুর্গতিঃ শোভনমিতি কিং পুনর্ব্বক্তব্যমিত্যর্থঃ ॥

১১। ননু নায়ং বটুঃ, কিন্তু শ্রীবিষ্ণুস্তব শত্রুরিত্যুক্তম্, তর্হি সুতরামেব দাস্যামীত্যাহ—যজন্তীতি ; পরঃ শত্রুর্ব্বাস্তু ॥

১৩। যদ্যদি যশো ন জিহাসতি, তর্হি যুদ্ধেঽয়ং মাং হত্বৈনাং ভূমিং হরেচ্ছয়ীত বা ; সম্যগ্ জ্ঞাতঃ সন্ মম চিত্তে শয়ীতেতি বাস্তবোঽর্থঃ ॥

১৪। অশ্রদ্ধিতম্—অজাতশ্রদ্ধম্ ॥

১৭। জালকং মুক্তাভরণবিশেষস্তন্মালাবতী, অবনেজনীনামপাং কলসং ভৃতং পূর্ণম্ ॥

২১। অবর্দ্ধত বাঞ্ছাতঃ, প্রতিগৃহ্যতামিতি বলিনা পূর্ব্বমুক্তত্বাৎ। গুণত্রয়মাত্মনি যস্য তৎ ; অতএব ভূঃ খমিত্যাদয়ো যদ্যস্মিন্নাসন্ত স্থিতাস্তৎ[১] ॥

২২। ঋত্বিগাদিসহিতো বলিস্তস্য হরেঃ কায় এতদ্বিশ্বং দদর্শ ॥

২৩—২৯। তদেব প্রপঞ্চয়তি—রসামিতি পাদোনৈঃ সপ্তভিঃ। (২৩) মারুতং গণং বায়ুসঙ্ঘম্। ইন্দ্রস্য সেনৈব সেনা যস্য সঃ, ইন্দ্রপদে স্থিতত্বাৎ। অচষ্ট—ঐক্ষত ॥ (২৪) ঐক্ষৎ—ঐক্ষত। আত্মা স্বয়ং বলির্মুখ্যো যেষাং তানসুরান্। ঋক্ষমালাম্—নক্ষত্রপঙ্‌ক্তিম্ ॥ (২৫) অঙ্গ! হে রাজন্! সমস্তান্ রেফাংশ্চ শব্দান্ ॥ (২৬) দ্যৌশ্চ—দ্যাঞ্চ ॥ (২৭) রসে—রসনে ॥ (২৮) রেতসা—রেতসি ; ক্রমণেষু পাদন্যাসেষু, ওষধিজাতয় ওষধিজাতীশ্চ ॥ (২৯) প্রাণেষু—ইন্দ্রিয়েষু ॥

১। স্থিতবন্তঃ (ঘ)।

৩০। সর্ব্বাত্মনীত্যাদি বাক্যান্তরম্। সুদর্শনমিত্যাদীনামীশমুপতস্থুরিত্যুত্তরেণান্বয়ঃ॥

৩১। বিদ্যাধরসংজ্ঞোঽসিঃ॥

৩২। মীনকুণ্ডলে—মকরকুণ্ডলে। স্ফুরন্তি কিরীটাদীনি যস্য সঃ॥

৩৩। মধুব্রতানাং স্রজো যস্যাং তয়া বনমালয়া শ্রীবৎসাদিভিশ্চাবৃতো ব্যাপ্তঃ। উরুক্রমত্বমেবাহ—ক্ষিতিমিতি॥

৩৪। দ্বিতীয়ং পদং ক্রমতো বিক্ষিপতস্ত্রিবিষ্টপং তদীয়ং কিঞ্চিন্মাত্রং জাতম্, তৃতীয়ায় তু ন কিঞ্চিদপি; তত্র হেতুঃ—উরুক্রমস্যাঙ্ঘ্রিস্ত্রিবিষ্টপাদুপর্য্যুপরি গচ্ছন্ মহর্জ্জনাভ্যাং তপসশ্চ পরং গতঃ সত্যলোকং গত ইতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
বিংশোঽধ্যায়ঃ॥ ২০॥

একবিংশোঽধ্যায়ঃ

একবিংশে পদাপূর্ত্তিমিষেণ বলিবন্ধনম্।
বিষ্ণুনা কৃতমুৎকর্ষং তস্য খ্যাপয়িতুং জনে॥ (১)

১। উরুক্রমস্যাঙ্ঘ্রিস্তপসঃ পরং গত ইত্যুক্তম্, ততঃ কিং বৃত্তম্? তদাহ—সত্যং সত্যলোকং প্রাপ্তং তমঙ্ঘ্রিং সমীক্ষ্যাব্জভবোঽভ্যগাৎ; তথা মরীচিমিশ্রাদয়শ্চেতি দ্বয়োরন্বয়ঃ। কথম্ভূতোঽব্জভবঃ? হরেরঙ্ঘ্রের্নখা এব ইন্দবস্তৈর্হতা স্বধাম্নো দ্যুতির্যস্য সঃ, স্বয়ঞ্চ তৈরাবৃতশ্ছন্নঃ। হে নরদেব! বৃহদ্ব্রতা যোগিনশ্চ॥

২। অঙ্গানি শিক্ষাদীনি, পুরাণানি সংহিতাশ্চ। যোগ এব সমীরস্তেন দীপিতং জ্ঞানমেবাগ্নিস্তেন রন্ধিতং দগ্ধং কর্ম্মকল্মষং কর্ম্মমলং যেষাম্, তে চ সর্ব্বে তমজ্ঘ্রিং ববন্দিরে। যস্যাজ্ঘ্রেঃ স্মরণানুভাবতঃ; অকর্ম্মকং কর্ম্মভিরপ্রাপ্যম্॥

৩। বিষ্ণোরজ্ঘ্রয়ে স্বয়ং যস্য নাভিপঙ্কেরুহসম্ভবস্তস্য বিষ্ণোরজ্ঘ্রিং সমর্চ্চ্য॥

৪। লোকত্রয়ং নিমার্ষ্টি পবিত্রয়তি॥

৫। সংক্ষিপ্তোপসংহৃতা আত্মবিভূতিঃ স্ববিস্তারো যেন, তস্মৈ; যথা পূর্ব্বং বামনরূপেণ স্থিতায়েত্যর্থঃ॥

৯। ত্রিপদবিষয়া যা ব্যাজযাচ্ঞা কপটযাচ্ঞা তয়া, স্বভর্ত্তুর্বলের্মহীং হৃতাং দৃষ্টাত্যমর্ষিতাঃ সন্ত ঊচুঃ॥

১০—১৩। কিমূচুস্তদাহ—ন বেতি সার্দ্ধৈস্ত্রিভিঃ। (১৩) অনুচরাশ্চ তেঽসুরাশ্চ॥

১৯। অর্থকৃৎ—অনুকূলঃ॥

২০। পৌরুষৈস্তং কালমতিবর্ত্তিতুং পুমানীশ্বরঃ সমর্থো ন ভবতি॥

২৩। হরেরনুচরা দেবাঃ; দৈবেন ঋদ্ধৈঃ সমৃদ্ধৈর্ভবদ্ভিঃ॥

২৪। অর্থত্বায়—আনুকূল্যায়॥

২৬। বিষু পক্ষিষু রাজত ইতি বিরাট্, প্রভোশ্চিকীর্ষিতং জ্ঞাত্বা। অয়মর্থঃ—অস্য সর্ব্বস্বাপহারেণ মমেত্যভিমানং সংত্যজ্যেদানীং দেহস্বীকারেণাহঙ্কারমপি ত্যাজয়িত্বা পরমানুগ্রহং কর্ত্তুমিচ্ছতি, ন চানেন তুল্যোঽন্যঃ কোঽপি সত্যসন্ধো ধীরো বাস্তীতি, তদ্‌যশঃপ্রখ্যাপনার্থং কিঞ্চিদ্‌যাতয়িতু[১]মপীচ্ছতীতি প্রভোরভিপ্রায়ং জ্ঞাত্বা তং ববন্ধেতি। সুত্যেঽহনি সোমাভিষবদিনে॥

১। পাতয়িতু- (ঘ)।

২৭। রোদস্যোর্দ্যাবাপৃথিব্যোঃ ॥

৩০। অসৌ—সূর্য্যঃ ॥

৩১। ময়া আত্মনেত্যন্বয়ঃ, ব্যাপিনেত্যর্থঃ। খঞ্চ দিশশ্চ, তনোস্তন্বা। তে স্বং ত্বদীয়ং সর্ব্বস্বম্ ॥

৩২। গুরুণা শুক্রেণানুমোদিতঃ সন্ ॥

৩৩। এবমুক্ত্বাপি নিরয়পরিহারার্থং স্বর্গাদ্‌ভ্রংশপরিহারার্থঞ্চ মনোরথং কুর্ব্বন্তং প্রত্যাহ—বৃথেতি। যঃ প্রতিশ্রুতস্যাদানেন যাচকং বিপ্রলম্ভতে, তস্য মনোরথো বৃথৈব, স্বর্গস্তস্য দূর এব, স চাধঃ পতত্যেব ॥

৩৪। ত্বয়া চাহং বিপ্রলব্ধস্তস্মাদ্ব্যলীকফলমনৃতস্য ফলং নিরয়ং ভুঙ্‌ক্ষ্বেত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
একবিংশোঽধ্যায়ঃ ॥ ২১ ॥

দ্বাবিংশোঽধ্যায়ঃ

দ্বাবিংশে তু প্রসন্নঃ সন্ প্রস্থাপ্য সুতলং বলিম্।
দত্ত্বা বরান্ হরির্নূনং মত্বা তদ্দ্বারপোঽভবৎ ॥ (১)
সমর্পিততনূবিত্তনির্ম্মলাচলভক্তিতঃ।
ছলিতো বলিনা নূনং[১] স্বমেবার্পয়দচ্যুতঃ ॥ (২)

১। বিপ্রকৃতঃ—অপকৃতঃ; ভিদ্যমানঃ—সত্যাচ্চাল্যমানঃ ॥

২। হে উত্তমঃশ্লোকেতি কটাক্ষঃ। মম বচ ঈরিতং প্রতিশ্রুতং ন তাবদ্ব্যলীকং ত্বয়া কপটেন বামনতয়া ভিক্ষিত্বা রূপান্তরস্যাবিষ্কৃতত্বাদেবমপি

১। চিত্রং (ঘ)।

যদি ভবান্ ব্যলীকং মন্যতে, তথাপি ঋতমেবাহং করোমি, মদুক্তং প্রলম্ভনং ন ভবতু, মে শীর্ষ্ণি নিজং তৃতীয়ং পদং কুরু, ন চ দ্বাভ্যাং বিশ্বং ক্রান্তবতো মে তব শিরঃ পদপর্য্যাপ্তং[১] ন ভবতীতি মন্যেথাঃ। বিত্তেন চেৎ পদদ্বয়ং জাতম্, তর্হীদমধিকমেব স্যাৎ, বিত্তাদপি বিত্তবতোঽধিকত্বাদিতি ভাবঃ ॥

৩। ননু চ 'আপদর্থে ধনং রক্ষেদ্দারান্ রক্ষেদ্ধনৈরপি। আত্মানং সততং রক্ষেদ্দারৈরপি ধনৈরপি ॥' ইত্যাদিবচনাদাত্মভয়পরিহারায় সর্ব্বস্বং ত্যজ্যতে, ত্বন্তু কুতোঽভীতঃ সন্নাত্মানং সমর্পয়সি? অত আহ—বিভেমীতি। অসাধুবাদাদপকীর্ত্তের্যথাহং ভৃশমুদ্বিজে, তথা নিরয়াদিভ্যো ন বিভেমি ॥

৪। ননু ময়া কৃতনিগ্রহাত্তবাপকীর্ত্তির্জাতৈব? নৈবেত্যাহ—পুংসামিতি। অর্হত্তমৈরর্পিতং যং দণ্ডং মাত্রাদয়ো ন হ্যাদিশন্তি নৈবার্পয়ন্তি, হিতৈষিণা ত্বয়া নিগৃহীতোঽহং শ্লাঘ্য এবাস্মীতি ভাবঃ ॥

৫। নন্বহং দেবানাং হিতৈষী, নাসুরাণাম্? তত্রাহ—ত্বং নূনমিতি। পরোক্ষঃ শক্রচ্ছলেন বর্ত্তমানঃ ॥

৬। শক্রত্বং পুনর্ভক্তানিবাস্মাননুগ্রহীতুমেবেত্যাহ—যস্মিন্নিতি। উ অহো, হ প্রসিদ্ধম্ ॥

৭। অতো মম নাত্র লজ্জা, নাপি দুঃখমিত্যাহ—তেন গুরুণা ভবতা ॥

৮—১১। কিঞ্চ, যোঽয়ং দণ্ডরূপো মমানুগ্রহস্ত্বয়া কৃতঃ, স তু ত্বদ্ভক্তপৌত্রত্বেন; ন ত্বহমনুগ্রহস্য পাত্রমিত্যাশয়েনাহ—পিতামহ ইতি। (৮) ভবদীয়ানাং সম্মতঃ, যত আবিষ্কৃতঃ সাধুবাদো যস্য, ত্বমেব পরম আশ্রয়ো যস্য সঃ। অতো ভবতো বিপক্ষেণ বিদ্বিষা হিরণ্যকশিপুনা বিচিত্রং বৈশসং হিংসাং সম্প্রাপিতোঽপি দেহাদীনামসাররূপত্বং নিশ্চিত্যাকুতোভয়ঞ্চ ধ্রুবঞ্চ ভবতঃ পাদপদ্মমেব প্রপেদে, অথ তস্মাদহমপি দৈবেন তস্যৈব ভাগ্যেন তবান্তিকং নীত ইতি চতুর্ণামন্বয়ঃ ॥ (৯) অন্ততঃ—আয়ুষোঽন্তে।

১। পদপর্য্যন্তং (ক্বচিৎ পাঠঃ)।

রিক্‌থহারৈঃ পুত্রৈঃ, ইহ গেহে কেবলমায়ুষো ব্যয় এব, ন তু সুখং কিঞ্চিৎ॥ (১০) স প্রসিদ্ধো মহান্। স্বপক্ষং দৈত্যকুলং ক্ষপয়তীতি তথা, তস্যাপি॥ (১১) প্রসভং বলাত্ত্যাজিতা শ্রীর্যস্য ; যয়া শ্রিয়া স্তব্ধমতিঃ সন্ পুমানিদং জীবিতমধ্রুবং ন বুধ্যতে। কথম্ভূতম্? কৃতান্তস্যান্তিকবর্ত্তি মৃত্যোঃ সন্নিহিতম্॥

১২। রাকাপতিঃ—পূর্ণচন্দ্রঃ॥

১৩। অঞ্জনত্বিষম্—শ্যামম্॥

১৪। স্বকৃতাহঙ্কারাদিরূপাপরাধস্মরণেন সব্রীড়ং নীচীনমধো মুখং যস্য সঃ॥

১৫। শিরসা নমন্নেবোপেত্য মূর্দ্ধ্না ননাম, বলেস্তৎকৃতমনুগ্রহং দৃষ্ট্বা পুলকৈরশ্রুভিশ্চ বিক্লবো বিহ্বলঃ॥

১৬। ত্বয়ৈবেতি। ন হৈন্দ্রং পদমেতদীয়ং ত্বয়াপহৃতম্, কিন্তু স্বীয়মেব পুনঃ স্বীকৃতম্, তচ্চ শোভনমেব কৃতম্। তত্র হেতুঃ—মন্য ইতি ; যদ্-যস্মাচ্ছ্রীরেব যদাত্মমোহনম্, তস্মাদ্বিভ্রংশিতঃ॥

১৭। মোহনত্বমেবাহ—যয়া শ্রিয়া বিদ্বানপি, যতঃ সংযতোঽপি মুহ্যতি, তত্তস্যাং সত্যাং কোঽন্যঃ পুমানাত্মনো গতিং তত্ত্বং যথাবদ্বিচষ্টে পশ্যতি? তস্মৈ মহাকারুণিকায়॥

১৮। তস্য প্রহ্লাদস্যানুশৃণ্বত উবাচেতি, কিঞ্চিদ্বক্তুং প্রবৃত্ত ইত্যর্থঃ॥

১৯। তদৈব বিন্ধ্যাবলিরপি বক্তুং প্রবৃত্তা ; তাঞ্চ সম্মানয়ন্ হিরণ্য-গর্ভস্তূষ্ণীং ক্ষণং স্থিতঃ, অতস্তস্যা এব বাক্যং প্রথমমবতারয়তি—বদ্ধং বীক্ষ্যেতি॥

২০। ত্রিজগতঃ কর্ত্তুঃ প্রভোঃ পালকস্যাস্ততঃ সংহর্ত্তুশ্চেশ্বরস্য তবান্যে কিমাবহন্তি, কিং সমর্পয়ন্তি? ত্বয়াঽবরোপিতঃ কর্তৃবাদঃ কর্ত্তারঃ স্বতন্ত্রা বয়মিতি বাদমাত্রমপি যেষাং তে ; অয়ং ভাবঃ—লোকত্রয়ং ময়া-

পিতম্, তৃতীয়পাদায় দেহং সমর্প্য প্রতিশ্রুতমৃতং করোমীতি দেহাদিষু স্বাম্যাবিষ্কারেণ ব্রুবন্নয়ং কুবুদ্ধির্নির্লজ্জশ্চ ; যতস্ত্বমেব সর্ব্বব্যাপী[১] স্বামী, অতো মন্দবুদ্ধিমেনং কেবলং কৃপয়া বিমুচ্য পালয়েতি ॥

২১—২৩। তদেবং প্রহ্লাদস্য বিন্ধ্যাবলেশ্চ পরমার্থোক্ত্যা প্রসন্নো হরিঃ। ব্রহ্মা তু লোকদৃষ্ট্যৈব বিজ্ঞাপয়তি—(২১) ভূতভাবনেতি ত্রিভিঃ। (২২) নিগ্রহানর্হত্বে হেতুঃ—কৃৎস্নেতি। সর্ব্বস্বমেবাহ—আত্মেতি ॥ (২৩) তদেব কৈমুত্যন্যায়েনাহ— যস্য তব পাদয়োঃ সলিলমাত্রমপি প্রদায় সর্ব্বোঽপি জন উত্তমাং গতিমাপ্নোতি, তস্মৈ তুভ্যমসৌ বলিস্ত্রিলোকীং দাশ্বান্ দত্তবানার্ত্তিং কথমাপ্নুয়াৎ ॥

২৪। তস্য বিশোঽর্থান্। নন্বর্থাপহারঃ, কোঽয়মনুগ্রহঃ ? তত্রাহ— যন্মদো যৈরর্থৈর্মদো যস্য সঃ, অতএবাস্তব্ধোঽনম্রঃ সন্ ; মদস্তম্ভহেতূনা-মর্থানামপহার এবানুগ্রহ ইত্যর্থঃ ॥

২৫—২৬। দুর্ল্লভং পুরুষং জন্ম কথঞ্চিল্লব্ধবতো জীবস্য জন্মাদি-নিমিত্তো গর্ব্বো মহাহানিকরস্তস্য চ নাশো মদনুগ্রহাদেবেত্যাহ—যদেতি দ্বাভ্যাম্। (২৫) অনীশঃ পরতন্ত্রঃ সন্, নিজৈঃ কর্ম্মভির্নানাযোনিষু কৃমিকীটাদিষু সংসরন্ ॥ (২৬) তত্র পৌরুষ্যাং গতৌ জন্মাদিভিরস্য যদি স্তম্ভো ন ভবেৎ, তর্হ্যয়ং মদনুগ্রহ এব ॥

২৭। কথং তর্হি ধ্রুবাদিভ্যঃ সম্পদো দদাসীতি চেৎ, তত্রাহ—মান এব স্তম্ভোঽনম্রতা তস্য নিমিত্তভূতানাং সমন্ততঃ সর্ব্বশঃ সর্ব্বশ্রেয়ঃপ্রতি-কূলানাং জন্মাদীনাং সত্ত্বেঽপি, জন্মাদিভিরিতি বা। হন্তেতি খেদে, হে ব্রহ্মন্! মৎপরো ন মুহ্যেৎ, অতো ভক্তস্বেচ্ছয়া সম্পদোঽপি দদামি, অভক্তস্তু মুহ্যেদিতি তদপহাররূপমেব তস্যানুগ্রহং করোমীতি ভাবঃ ॥

১। সর্ব্বস্যাপি (ঘ)।

২৮—৩০। অস্য চেদানীং মৎপরত্বাদদৈত্যৈর্দুষ্প্রাপমপি দাস্যামীতি বক্তুং তস্য মোহাভাবমাহ—এষ ইতি ত্রিভিঃ। (৩০) 'ন হ্যেতস্মিন্ কুলে কশ্চিন্নিঃসত্ত্বঃ কৃপণঃ পুমান্' ইত্যাদিনা চ্ছলৈরেব ময়া ধর্ম্ম উক্তঃ; তথাপি তং ধর্ম্মময়ং ন ত্যজতি, অতঃ সত্যবাক্ ॥

৩১। মে ময়া ; অহমেবাশ্রয়ঃ পালকো যস্য সঃ ॥

৩২। 'স্থানং প্রাপিতঃ' ইতি যদুক্তম্, তদেব স্থানমাহ—তাবৎ সাবর্ণি-মন্বন্তরপর্য্যন্তং সুতলমধ্যাস্তামধিবসত্বিত্যর্থঃ। যদ্‌যস্মিন্নিবসতামাধ্যাদয়ো মমেক্ষয়া ন সম্ভবন্তি ॥

৩৩—৩৬। এবং ব্রহ্মাণং প্রত্যুক্ত্বা করুণাপরবশঃ সাক্ষাদ্বলিং প্রত্যাহ—(৩৩) ইন্দ্রসেন ইতি চতুর্ভিঃ। (৩৪) ত্বচ্ছাসনমতিগচ্ছন্ত্যতিবর্ত্তন্ত ইতি তথা তান্ ॥ (৩৫) তথাপি ভগবদ্‌বিয়োগাৎ[১] তদনিচ্ছন্তং প্রত্যাহ—সদেতি ॥ (৩৬) সঙ্গাদ্য আসুরো ভাবঃ, স বিনঙ্ক্ষ্যতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে
দ্বাবিংশোঽধ্যায়ঃ ॥ ২২ ॥

ত্রয়োবিংশোঽধ্যায়ঃ

ত্রয়োবিংশে বলৌ যাতে সুতলং সপিতামহে।
উপেন্দ্রেণ দিবং গত্বা পূর্ব্ববন্মোদতে হরিঃ ॥ (১)

১। বাষ্পস্য কলাভির্বিন্দুভিরাকুলে ঈক্ষণে যস্য ; ভক্ত্যা উদ্‌গল উৎকণ্ঠঃ ॥

১। ভবদ্‌বিয়োগাৎ (ঘ)।

২। অহো ! ত্বৎপ্রণামস্য মহিমা, যদর্থং কৃতঃ সমুত্তম এব প্রপন্নানাং ভক্তানাং যোঽর্থস্তস্য বিধাবভক্তেঽপি তস্য সম্পাদনে সমাহিতোঽপ্রমত্তঃ স্থিতঃ ! কুতঃ ? যদ্‌যেনোদ্যমেন লোকপালৈরমরৈঃ সত্ত্বপ্রধানৈরপ্যলব্ধ-পূর্ব্বস্ত্বদনুগ্রহোঽপসদে নীচে রাজসে ময্যর্পিতঃ। অয়ং ভাবঃ—পরমেশ্বরায় তুভ্যমহং বরাকস্ত্রিলোকীং দত্তবানিত্যেতদাস্তাম্, প্রণামোঽপি ন সম্যক্ কৃতঃ, কিন্তু তদর্থমুদ্যমমাত্রং কৃতম্, তেন চ কর্ম্মতপোদানাদিকোটিভিরপ্য-লভ্যস্ত্বদনুগ্রহঃ সম্পাদিতঃ ; অহো ত্বৎপ্রণামপ্রভাব আশ্চর্য্যমিতি ॥

৪। অশাসদুপেন্দ্রঃ সন্ পালয়ামাস ॥

৬। দুর্গপালোঽসি, রক্ষিষ্যে সর্ব্বতোঽহমিত্যুক্তত্বাৎ ॥

৭। হে শরণদ, আশ্রয়প্রদ ! যে কুসৃতয়ো দুর্বৃত্তাঃ খলযোনয় উগ্র-জাতয়শ্চ, তে বয়ং তস্য ভবতো দাক্ষিণ্যদৃষ্টেঃ পদবীং কস্মাদ্ধেতোঃ প্রণীতাঃ, বহুমানেন চিত্তানুবর্ত্তনং দাক্ষিণ্যং তেন যা দৃষ্টিস্তদ্বিষয়তাং প্রাপিতাঃ ?

৮। ভক্তপ্রিয়ত্বাদিতি চেৎ, তর্হ্যেবং তবেহিতমহো চিত্রম্ ! কিং তৎ ? সর্ব্বাত্মনঃ সমদৃশশ্চ স্বভাবো বিষম ইতি যৎ। সর্ব্বাত্মত্বে চিত্র-চরিতত্বে চ হেতুঃ—অমিতাচিন্ত্যা যা যোগমায়া তস্যা যা লীলা, তয়া বিসৃষ্টানি বিরচিতানি ভুবনানি যেন, তস্য। 'অহো' ইত্যত্র সন্ধিরার্ষঃ। সমদৃক্ত্বে হেতুঃ—বিশারদস্য সর্ব্বজ্ঞস্য। অথবা ভক্তপ্রিয়ত্বেঽপি তব বৈষম্যং নাস্ত্যেব, যতঃ কল্পতরুস্বভাবঃ সন্ ভক্তপ্রিয়োঽসি, ন হি কল্প-তরুরাশ্রিতানামেব কামান্ পূরয়ন্নপি বিষমো ভবতীত্যর্থঃ ॥

১০। মদ্দর্শনেন যো মহাহ্লাদস্তেন ধ্বস্তং কর্ম্মনিবন্ধনমজ্ঞানং যস্য ॥

১৪। কর্ম্ম বিতন্বতঃ শিষ্যস্য যচ্ছিদ্রমন্তরং নূনং জাতম্, তৎ সন্তনু বিস্তারয় সন্ধৎস্ব। যজমানং বিনা কথং সন্ধাতব্যমিতি ন বাচ্যমিত্যাহ—যত্তদিতি। ব্রহ্মদৃষ্টং ব্রাহ্মণৈর্দৃষ্টমেব সমং ভবেৎ, কিং পুনরনুষ্ঠিত-মিত্যর্থঃ ॥

১৫। ভবান্ যস্য সর্ব্বেণাপি ভাবেন, ন বস্তুমাত্রেণ পূজিতঃ, তস্য কর্ম্মসু কুতো বৈষম্যম্? কথম্ভূতঃ? কর্ম্মণামীশ্বরঃ প্রবর্ত্তকো যজ্ঞেশো যজ্ঞফলদো যজ্ঞময়শ্চ পুরুষঃ ॥

১৬। আস্তাং তাবৎ পূজা, যস্মান্মন্ত্রতঃ স্বরাদিভ্রংশেন, তন্ত্রতো ব্যুৎক্রমাদিনা, দেশতঃ কালতঃ, অর্হতঃ পাত্রতো বস্তুতশ্চ দক্ষিণাদিনা যচ্ছিদ্রং ন্যূনম্, তৎ সর্ব্বং তব নামানুকীর্ত্তনমাত্রমেব নিশ্ছিদ্রং করোতি ॥

১৮। ইতি হরেরাজ্ঞাং প্রতিনন্দ্য বলের্যজ্ঞচ্ছিদ্রং সমাধত্ত সন্দধে; সমাধায়েতি পাঠান্তরে যজ্ঞচ্ছিদ্রং সমাধায় হরেরাজ্ঞাং সম্পাদিতবানিতি শেষঃ ॥

২০। দেবাশ্চ ঋষয়শ্চ ভূমিপাশ্চ মনবস্তৈঃ সহিতঃ ॥

২২। ননু লোকাদীনাং পতিরিন্দ্রোঽস্ত্যেব? সত্যম্, তথাপি বেদাদীনাং কল্পং পালনে দক্ষং বামনমুপেন্দ্রং কল্পয়াঞ্চক্রে ॥

২৪। *দেবযানেন মার্গেণ, বিমানেনেতি বা ॥*

২৮। এতচ্চরিতং সর্ব্বমাখ্যাতমিতি বিশেষোক্ত্যা অন্যান্যপি সন্তীত্যুক্তম্ ॥

২৯। তানি তর্হি নিঃশেষাণি বর্ণনীয়ানীত্যপেক্ষায়ামাহ—পারমিতি। উরু বহুধা বিক্রমতো বিষ্ণোর্ম্মহিম্নঃ পারং যো গৃণানো ভবতি, স মর্ত্ত্যঃ পার্থিবানি রজাংস্যপি বিমমে গণিতবান্; যথা পার্থিবপরমাণুগণনমশক্যম্, তথা বিষ্ণোর্গুণগণনমশক্যমিত্যর্থঃ। তথা চ মন্ত্রঃ—'বিষ্ণোর্নু কং বীর্য্যাণি' ইতি। এতদেব মন্ত্রান্তরার্থং সূচয়ন্নাহ—যস্য পুরুষস্য পূর্ণস্য মহিম্নঃ পারং মন্ত্রদৃগৃষির্বশিষ্ঠশ্চেতি এবমাহ—কথম্, কিং জায়মানো জাতো বোপৈতি? ন কোঽপীতি বদন্ননন্তত্বেনৈবাহেত্যর্থঃ; তথা চ মন্ত্রঃ—'ন তে বিষ্ণোর্জ্জায়মানো ন জাতো বেদ মহিম্নঃ পারমনন্তমাপ' ইতি ॥

৩০। য ইদং শৃণ্বন্ ভবতি, স পরাং গতিং যাতি ॥

৩১। সুকৃতং যথাবৎ কৃতং বিদুঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়ামষ্টমস্কন্ধে

ত্রয়োবিংশোঽধ্যায়ঃ ॥ ২৩ ॥

চতুর্বিংশোঽধ্যায়ঃ

চতুর্ব্বিংশে প্রসঙ্গেন মৎস্যরূপস্য শার্ঙ্গিণঃ।
লীলোচ্যতে যতঃ সত্যব্রতরক্ষা মহার্ণবে ॥ (১)

তনুং তনুং নিদর্শ্যাদৌ[১] নিজৈশ্বর্য্যনিদর্শনাৎ।
মৎস্যং পৃচ্ছতি পৃথ্বীশো লীলয়া বামনোপমম্ ॥ (২)

১। মায়য়া মৎস্যবিড়ম্বনং মৎস্যরূপানুকরণং যস্যাং নিরূপ্যতে, তাম্ ॥

২—৩। ননু কস্মাদকস্মাদেব মৎস্যাবতারশ্রবণেচ্ছা ? শ্রীবামনসাদৃশ্যাদিত্যাহ—যদর্থমিতি দ্বাভ্যাম্। (২) দুর্ম্মর্ষম্—দুঃসহম্ ॥ (৩) বলেরনুগ্রহায় জুগুপ্সিতমপি যাচকরূপং ধৃতবানিতি যুক্তমুক্তম্, যদর্থস্তু লোকজুগুপ্সিতং মাৎস্যং রূপমধারয়ৎ, এতন্নো যথাবদ্বক্তুমর্হসীত্যর্থঃ ॥

৫। সামান্যেনাবতারপ্রয়োজনমাহ—গোবিপ্রেতি ॥

৬। জুগুপ্সিতত্বং পরিহরতি—ধিয়ো গুণৈর্যান্যুচ্চাবচানি ভূতানি, তেষু নিয়ন্তৃত্বেন চরন্নীশ্বরো নোচ্চাবচত্বং ভজতে, নির্গুণত্বাৎ। কুতঃ পুনঃ শুদ্ধসত্ত্বময়ৈর্মৎস্যাদ্যাকারৈরুচ্চাবচত্বশঙ্কেতি ভাবঃ ॥

১। বিদর্শ্যাদৌ (ঘ)।

৭—৯। বিশেষতো মৎস্যাবতারপ্রয়োজনমাহ—আসীদিতি ত্রিভিঃ। (৭) ব্রহ্মণো নিদ্রায়াং ভবো ব্রাহ্মস্তেনৈব নিমিত্তেন জাতো নৈমিত্তিকঃ। সমুদ্রে উপপ্লুতা নিমগ্নাঃ॥ (৮) অন্তিকে নিঃসৃতান্॥ (৯) শফরী-রূপং মৎস্যরূপম্॥

১০। প্রয়োজনান্তরঞ্চ লীলাপ্রকারঞ্চাহ—তত্র রাজঋষিরিত্যাদি যাবৎসমাপ্তি॥

১১। স এব শ্রাদ্ধদেব ইতি খ্যাতঃ॥

১২। কৃতমালায়াং নদ্যাম্॥

১৮। যত্রাহং সুখং নিবসামি, তদোকঃ স্থানং কল্পয়॥

১৯। ঔদঞ্চনোদকে মণিকস্থে[১] জলে॥

২২। রক্ষাযোগেন রক্ষায়া যোগেনোপায়েন, যথা মহাহ্রদপ্রাপ্তেরর্ব্বাগ্ জলং বিনা ন শুষ্যেয়ম্, তেনোপায়েন নিধেহি। অবিদাসিনি—অনুপক্ষয়ে॥

২৩। সম্মিতং তজ্জলাশয়পরিমিতং সন্তম্॥

২৬। অভিব্যানশে—অভিতো ব্যাপ্তবান্॥

২৮। মুখ্যঃ সত্য আত্মা চ গতিশ্চাশ্রয়ঃ॥

৩০। হে অরবিন্দাক্ষ! পৃথগাত্মনাং দেহাদ্যভিমানিনাং সতামিতরেষাং পদোপসর্পণং যথা মৃষা ভবেৎ, তথা সর্ব্বসুহৃৎপ্রিয়াত্মনস্তব পদোপসর্পণং মৃষা ন ভবেৎ ; যদ্যস্মান্নো ভক্তানামীদৃশমদ্ভুতং বপুরদীদৃশো দর্শিতবানসি। পৃথগাত্মনোঽসতামিতি পাঠে পৃথগাত্মনো ভেদদর্শিনঃ পুংসোঽসতাং পরিচ্ছিন্নানাং পদোপসর্পণং যথা মৃষেত্যর্থঃ॥

৩১। একান্তজনা ভক্তাঃ প্রিয়া যস্য॥

৩২। অপ্যয়াম্ভোধৌ—প্রলয়ার্ণবে। ভূর্ভুবআদিকমিত্যর্থঃ॥

৩৩। সংবর্ত্তাম্ভসি প্রলয়োদকে ; ত্বামুপস্থাস্যতি প্রাপ্স্যতি॥

১। মণিকচ্ছে (ক্বচিৎ পাঠঃ)।

৩৪। ওষধীরাদায়েতি শেষঃ ॥

৩৫। ঋষীণামেবালোকেন[১] বিচরিষ্যসি ॥

৩৬। মহাহিনা—বাসুকিনা ॥

৩৮। মে ময়ানুগৃহীতং প্রসাদীকৃতং হৃত্তপরোক্ষং বেৎস্যসি। ত্বয়া কৃতৈঃ সংপ্রশ্নৈর্ম্ময়া বিবৃতং প্রকাশিতং সন্তম্ ॥

৪৫। বরত্রেণ—ডোরকরূপেণ ॥

৪৬। সাগরং তারয়িষ্যন্তং তরিষ্যন্ ভবসাগরম্।
সত্যব্রতো গুরুস্তেন তুষ্টাব হরিমষ্টভিঃ ॥ (৩)

অত্রেদং চিন্ত্যম্—কিময়ং মহাপ্রলয়ো দৈনন্দিনো বেতি? তত্র তাবদ্ 'ব্রাহ্মো লয়ঃ' ইতি, 'যোঽসাবস্মিন্ মহাকল্পে' ইতি চোক্তের্মহাপ্রলয় ইতি প্রাপ্তম্? নেতি ব্রূমঃ, মহাপ্রলয়ে পৃথিব্যাদীনামবশেষাসম্ভবাৎ, 'যাবদ্ব্রাহ্মী নিশা' ইত্যাদ্যুক্তিবিরোধাচ্চ; অতো দৈনন্দিন ইতি যুক্তম্, ন চৈতদপি সঙ্গচ্ছতে, সাংবর্ত্তকৈরনাবৃষ্ট্যাদিভির্বিনাকস্মাদেব 'সপ্তমেঽহনি ত্রৈলোক্যং নিমজ্জ্যতি' ইতি মৎস্যোক্তেরনুপপত্তেঃ। যচ্চোক্তং প্রথমস্কন্ধে—'রূপং স জগৃহে মাৎস্যং চাক্ষুষান্তরসংপ্লবে। নাব্যারোপ্য মহীময্যামপাদ্বৈবস্বতং মনুম্ ॥' ইতি, তদপি তদা দুর্ঘটম্, ন হি প্রলয়দ্বয়েঽপি মহীময্যাং নাব্যারোহঃ সম্ভবতি, ন চ চাক্ষুষান্তরে প্রলয়োঽস্তি। তথা চ সতি সপ্তমো মনুর্ব্বৈবস্বত ইত্যপি দুর্ঘটং স্যাৎ, 'ত্বং তাবদোষধীঃ সর্ব্বাঃ' ইত্যাদি নির্দ্দেশোঽপি ন সঙ্গচ্ছতে, ন হি তদৌষধ্যাদীনাং সত্ত্বানাং চাবশেষঃ সম্ভবতি; তস্মাদন্যথা বর্ণ্যতে—নৈবায়ং বাস্তবঃ কোঽপি প্রলয়ঃ, কিন্তু সত্যব্রতস্য জ্ঞানোপদেশায়াবির্ভূতো ভগবান্ বৈরাগ্যার্থমকস্মাৎ প্রলয়মিব দর্শয়ামাস, যথাস্মিন্নেব বৈবস্বতমন্বন্তরে মার্কণ্ডেয়ায় দর্শিতবান্, তদপেক্ষয়ৈব মহাকল্পেঽস্মিন্নিতি বিশেষণং

১। অবলোকেন (ক্বচিৎ পাঠঃ)।

সঙ্গচ্ছতে। তথা চ—'ততঃ সমুদ্র উদ্বেলঃ সর্ব্বতঃ সমদৃশ্যত' ইতি তস্যৈব তথা দর্শনমুক্তম্, ইত্যেষা দিক্। প্রস্তুতং স্তোত্রং ব্যাখ্যাস্যামঃ—তত্র নানাযোনিষু সংসরতঃ স্বস্য ভগবৎরূপয়ৈব তৎপ্রাপ্তিং দৃষ্ট্বা মুক্তয়ে তমেব প্রার্থয়তে, - অনাদির্যাবিদ্যা, তয়োপহতাবৃতা আত্মসংবিদ্যেষাং তে, অতএবাবিদ্যামূলৈঃ সংসারপরিশ্রমৈরাতুরা ইহ সংসারে যদৃচ্ছয়া যদনুগ্রহা-দেবোপস্থতা আশ্রিতাঃ সন্তো যমাপ্নুয়ুরাপ্নুবন্তি, স ভবানেব সাক্ষান্নো গুরুঃ সন্, গ্রন্থিং ভিন্দ্যাদিত্যুত্তরেণান্বয়ঃ॥

৪৭। নন্থ বৈরাগ্যং বিনা কুতো মুক্তিঃ? তর্হি তস্য ত্বৎসেবৈক-ফলত্বাৎ সেবামাদিশেত্যাশয়েনাহ—জন ইতি। অবুধোঽয়ং জনোঽসুখং যথা ভবতি, তথা কর্ম্ম সমীহতে, তাং সুখেচ্ছাং নো হৃদয়রূপং গ্রন্থিং স ভিন্দ্যাৎ, যত স এব পরমো গুরুঃ॥

৪৮। নন্থ যজ্ঞদানাদিভিঃ সত্ত্বশুদ্ধিং বিনা কথং গ্রন্থির্ভেদ্যঃ স্যাৎ? তত্রাহ—যৎসেবয়েতি, যস্য সেবয়ৈব পুমানাত্মনো মনসো মলং তমো বিজহ্যাৎ, এষ হীনমলো নিজং বর্ণঞ্চ স্বরূপং ভজেৎ, স ঈশো নো গুরু-র্ভূয়াৎ, যতঃ স এব গুরোরপি পরমো গুরুঃ। মলহীনে দৃষ্টান্তঃ—রুদ্র-রোদনং রজতম্, 'যদরোদীৎ তদ্রুদ্রস্য রুদ্রত্বং যদশ্রু অবশীর্য্যত তদ্রজতং হিরণ্যমভবৎ' ইতি শ্রুতেঃ। যদ্যথাগ্নেঃ সম্পর্কান্মলং জহাতি, স্বং বর্ণঞ্চ ভজতে,ন তু ক্ষালনাদিভিস্তথা ন যজ্ঞাদিভির্ম্মলত্যাগঃ, কিন্তু তৎসেবয়ৈব; -তেষান্তু সেবাঙ্গত্বমেবেতি ভাবঃ॥

৪৯। পরমেশ্বরত্বং পরমগুরুত্বঞ্চ প্রপঞ্চয়ন্নাহ—নেতি। যৎপ্রসাদস্যা-যুতভাগস্তস্য লেশমপ্যন্যে দেবাদয়ঃ সর্ব্বে সমেতা অপি স্বয়ং তস্মিন্ নিরপেক্ষাঃ সন্তঃ কর্ত্তুং ন প্রভবন্তি॥

৫০। তদেব দৃষ্টান্তেন স্পষ্টয়ন্নাহ—অচক্ষুরিতি। অবিদুষো জনস্যা-বুধোঽবিদ্বান্ গুরুস্তথৈব। অর্কপ্রকাশবৎ স্বত এব দৃগ্জ্ঞানং যস্য সোঽর্ক-

দৃক্, অতঃ সর্ব্বদৃশাং সর্ব্বেন্দ্রিয়াণাং সমীক্ষণঃ প্রকাশকঃ; অতএব স্বগতিং বোদ্ধুমিচ্ছদ্ভির্নোঽস্মাভির্গুরুর্বৃতোঽসি ॥

৫১। কিঞ্চ, প্রাকৃতো গুরুরনর্থহেতুরেবেত্যাহ—জন ইতি। আ-দিশতে—উপদিশতি। অসতীং মতিমর্থকামাদিমতিম্; তমঃ—সংসারম্ ॥

৫২। নন্বু তর্হি সর্ব্বোঽপি লোকো মামেব কিং নোপসরতি? অজ্ঞানাদিত্যাহ—ত্বমিতি; প্রিয়শ্চাসাবীশ্বরশ্চ ॥

৫৩। অহন্তু ত্বামেব শরণং যামীত্যাহ—তং ত্বামিতি। প্রতি-বোধনায়োপদেশায়, অর্থদীপৈঃ পরমার্থপ্রকাশকৈঃ; হৃদয়ে ভবান্ গ্রন্থীন-হঙ্কারাদীন্। স্বমোকঃ স্বং রূপং বিবৃণু প্রকাশয় ॥

৫৪। নৃপতিং প্রতি ॥

৫৫। পুরাণসংহিতাং মৎস্যপুরাণম্, অশেষতোঽব্রবীদিত্যনুষঙ্গঃ ॥

৫৭। অতীতঃ পূর্ব্বো যঃ প্রলয়স্তস্যাপায়েঽবসানে ॥

৬০। যোঽয়ং হরেরবতারস্তং যঃ কীর্ত্তয়েৎ ॥

৬১। সত্যব্রতানাং সত্যব্রতস্য ঋষীণাঞ্চ[১], ছত্রিণো গচ্ছন্তীতিবল্লিঙ্গ-সমবায়াদ্বহুবচনম্। জিহ্মমীনং মায়ামৎস্যম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং শ্রীধরস্বামি-বিরচিতায়া-মষ্টমস্কন্ধটীকায়াং চতুর্বিংশোঽধ্যায়ঃ ॥ ২৪ ॥

অষ্টমস্কন্ধঃ সম্পূর্ণঃ ॥ ৮ ॥

১। পুরুষাণাঞ্চ (গ)।

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

নবমঃ স্কন্ধঃ

প্রথমোঽধ্যায়ঃ

গুণা যং গুণভাবাপ্ত্যৈ বৃণতে করুণানিধিম্।
তমহং শরণং যামি পরমানন্দমাধবম্॥ (১)

ত্রিগুণাষ্টভিরধ্যায়ৈর্বৈবস্বতসুতান্বয়ঃ।
নবমে কৃষ্ণসৎকীর্ত্তিপ্রসঙ্গায় বিতন্যতে॥ (২)

এবমুক্তোঽষ্টমস্কন্ধে সদ্ধর্ম্মঃ সত্ত্বশোধকঃ।
কর্ত্তৃপালকসংজ্ঞাদি মন্বাদীনাং নিরূপণৈঃ॥ (৩)

সদ্ধর্ম্মশুদ্ধসত্ত্বানামন্তরঙ্গেশসৎকথা।
সূর্য্যসোমান্বয়াখ্যানৈরধুনা সঙ্গতোচ্যতে॥ (৪)

তত্র চ— ত্রয়োদশভিরধ্যায়ৈঃ সূর্য্যবংশোঽনুবর্ণ্যতে।
একাদশভিরধ্যায়ৈঃ সোমবংশস্ততঃ পরৈঃ॥ (৫)

তত্র তু প্রথমেঽধ্যায়ে বৈবস্বতসুতান্বয়ে।
সোমবংশপ্রবেশোক্ত্যৈ সুদ্যুম্নস্ত্রীত্বমুচ্যতে॥ (৬)

১—৫। উক্তানুবাদপূর্ব্বকং বৈবস্বতমনোর্ব্বংশং পৃচ্ছতি—মন্বন্তরাণীতি পঞ্চভিঃ॥

৮—১২। অনুক্তং বংশং বক্তুং পূর্ব্বোক্তমেব তাবদ্বংশং তৎপ্রবর্ত্তকং শ্রীনারায়ণমারভ্যানুস্মারয়তি—পরাবরেষামিতি পঞ্চভিঃ। (১২) নাভাগশ্চেতি পাঠে নভগ এব নাভাগঃ॥

১৩—৪২। সূর্য্যপৌত্রস্য সুদ্যুম্নস্য স্ত্রীত্বে সতি বুধাৎ পুরূরবঃপ্রভৃতি-সোমবংশসঞ্চারং বক্তুং সপ্রস্তাবমিলোপাখ্যানমাহ—(১৩) 'অপ্রজস্য মনোঃ পূর্ব্বম্' ইত্যাদিনা যাবদধ্যায়সমাপ্তি। পূর্ব্বমিক্ষ্বাকুপ্রভৃতীনামুৎপত্তেঃ প্রাক্॥

(১৪) দুহিত্রর্থং মম কন্যা যথা ভবেৎ, তথা যজেতি হোতারং সম্যগ-যাচত। পয় এব ব্রতমাহারো নিয়তো যস্যাঃ সা॥ (১৫) অধ্বর্য্যুণা হোতর্যজেতি প্রেষিতো হোতা ; তেন গৃহীতে হবিষি সতি, তত্তয়া প্রার্থিতং ধ্যায়ন্ ব্যচরদযজৎ। পাঠান্তরে—তদধ্যায়ৎ। বাচা বষট্কারং গৃণন্, বষড়িত্যুচ্চারয়ন্॥ (১৭) ব্রহ্মবিক্রিয়া—মন্ত্রাণ্যথাত্বম্॥ (১৯) প্রপিতা-মহো বশিষ্ঠঃ॥ (২৯) বিগতং তিমিরমাভাসঃ প্রকাশশ্চান্যস্য যাস্থ, তথাভূতা দিশঃ কুর্ব্বন্তঃ॥ (৩১) প্রসঙ্গং রত্যভিনিবেশম্। স্ত্রীপ্রসঙ্গ-কলুষিতমনসঃ সন্তস্তৎপ্রসঙ্গশূন্যং নরনারায়ণাশ্রমং প্রযযুঃ॥ (৩৩) প্রাসঙ্গিক-মুক্ত্বা প্রস্তুতমনুবর্ণয়তি—সা চেতি। অনুচরীসংযুক্তেতি বক্তব্যে ভূত-পূর্ব্বগত্যা পুংস্ত্বনির্দ্দেশঃ॥ (৩৭) আশয়ন্—ইচ্ছন্॥ (৪০) নাভ্য-নন্দন্, স্ত্রীত্বে লজ্জয়া মাসং মাসং নিলীয়াবস্থানাৎ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
প্রথমোঽধ্যায়ঃ॥ ১॥

দ্বিতীয়োঽধ্যায়ঃ

দ্বিতীয়ে মনুপুত্রাণাং দ্বাবপুত্রৌ বিরাগতঃ।
করূষকাদিপঞ্চানাং বংশানাহ লঘুক্রমাৎ[১]॥ (১)

১। বৈবস্বতো মনুঃ শ্রাদ্ধদেবঃ॥

২। ইক্ষ্বাকুঃ পূর্ব্বজো যেষাং তান্ দশপুত্রান্ লেভে॥

৩—১৫। তত্র পৃষধ্রস্য বংশো নাভবদিতি সহেতুকমাহ 'পৃষধ্রস্তু' ইত্যাদিনা 'কবিঃ কনীয়ান্' ইত্যতঃ প্রাক্তনেন গ্রন্থেন। খড়্গপাণেঃ

১। পৃথুক্রমাৎ (গ)।

সতস্তিষ্ঠতো জাগরণং বীরাসনং তদেব ব্রতং যস্য ; যত্তোঽবহিতঃ সন্ গাঃ পালয়ামাস ॥ (৪) শার্দ্দূলো ব্যাঘ্রঃ ॥ (৬) প্রলীনা উড়ুগণা যস্মিন্ সময়ে ; বভ্রোঃ কপিলায়া গোঃ ॥ (৭) গাং কামতো ন জঘানেতি খ্যাপয়িতুং 'বৃক্ণশ্রবণঃ' ইত্যাদ্যুক্তম্ ॥ (৮) ব্যুষ্টায়াং প্রভাতায়াম্ ॥ (৯) ক্ষত্রবন্ধুরপি ত্বং ন ভবিতা, অপি তু শূদ্রো ভবিতেতি ॥ (১৪) উপযুক্তকরণো দগ্ধদেহঃ ॥ (১৫) কবেরপি বংশো নাভবদিত্যাহ—কবিরিতি ; বন্ধুভিঃ সহ রাজ্যং বিসৃজ্য ॥

১৭। ব্রহ্মভূয়ং ব্রাহ্মণত্বম্। নৃগস্য বংশঃ —পুত্রঃ সুমতিঃ, ততো ভূতজ্যোতিস্ততো বসুঃ ॥

১৮। ওঘবতঃ পিতা, তৎপুত্রোঽপ্যোঘবানেবেত্যর্থঃ ॥

১৯—২২। তদেবং ত্রিভিঃ শ্লোকৈঃ করূষ-ধৃষ্ট-নৃগাণাং ত্রয়াণাং বংশা উক্তাঃ। নরিষ্যন্তস্য বংশমাহ—চিত্রসেন ইতি সার্দ্ধৈস্ত্রিভিঃ। (১৯) তত ইত্যাদের্যত্রাধিক্যং স্যাৎ, তত্রানন্তর্য্যে 'ততঃ' ইত্যাদি পদং ব্যাখ্যেয়ম্ ; যত্র তু ন্যূনত্বম্, তত্র পূর্ব্বস্য পরস্য বানুষঙ্গাদিভির্ব্যাখ্যেয়ম্ ॥ (২১) অগ্নিবেশ্য এব কানীন ইতি, জাতূকর্ণ ইতি চ ব্যাখ্যাতঃ[১] ॥

২৩। দিষ্টস্য পুত্রো নাভাগো বক্ষ্যমাণান্নাভাগাদন্য ইতি ভ্রান্তিব্যুদাসার্থমনুবাদমাত্রম্ ॥

২৬। অঙ্গিরসঃ সুতো মহাযোগী সংবর্ত্তো যমযাজয়ৎ, স মরুত্তঃ ॥

২৭। অস্য যৎ কিঞ্চিৎ পাত্রাদিকমস্তি, তত্তু সর্ব্বং হিরণ্ময়ং শোভনমাসীৎ ॥

২৮। অমাদ্যৎ—অহৃষ্যৎ ॥

৩১। যতো যস্যাং তৃণবিন্দোঃ পুত্রা অভবন্ ॥

১। বিখ্যাতঃ (ঘ)।

৩৩। তানেবাহ—বিশাল ইতি। তস্য তৃণবিন্দোঃ সুতাঃ ॥

৩৪। সহদেবজো দেবজেন সহিতঃ; সহদৈবত ইতি পাঠে নামান্তর-মাত্রম্, অর্থস্তু স এব ॥

৩৬। বৈশালভূপালাঃ—বিশালস্যান্বয়ে জাতাঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

তৃতীয়োঽধ্যায়ঃ

তৃতীয়ে মনুপুত্রস্য শর্য্যাতেঃ কীর্ত্ত্যতেঽন্বয়ঃ।

যত্র সৌকন্যমাখ্যানং রৈবতঞ্চ মহাদ্ভুতম্ ॥ (১)

১। ব্রহ্মিষ্ঠো বেদার্থতত্ত্বজ্ঞঃ। তদেবাহ—যো বেতি। দ্বিতীয়-মহো দ্বিতীয়েঽহ্নি ক্রিয়মাণং কর্ম্ম ঊচিবানুবাচ। তস্য বংশমুত্তানবর্হিরানর্ত্ত ইত্যাদিনা বক্ষ্যতি ॥

২। আদৌ তাবৎ কন্যাবৃত্তান্তমাহ—সুকন্যা নামেত্যাদিনা ॥

৬। ভার্গবস্য চ্যবনস্য, অভদ্রমপরাধঃ ॥

৯। 'মুগ্ধেয়ং মম কন্যা, ক্ষন্তব্যং ত্বয়া' ইত্যুচ্যমানে 'কতি বর্ষাণ্যস্যা বিবাহঃ কৃতো ন বা?' ইত্যাদি-বাক্যৈস্তদভিপ্রায়ং জ্ঞাত্বা তস্মৈ তাং দুহিতরং প্রাদাৎ ॥

১১। হে ঈশ্বরৌ স্বর্বৈদ্যৌ[১]! যুবাং মহ্যং বয়স্তারুণ্যং দত্তং সম্পা-দয়তম্ ॥

১২। অসোমপোঃ সোমপানরহিতয়োরপি যুবাং যুবয়োঃ সোমস্য গ্রহং সোমপূর্ণপাত্রং গ্রহীষ্যে দাস্যামি, বাং সোমেন যক্ষ্যে ইত্যর্থঃ।

১। সদ্‌বৈদ্যৌ (ঘ)।

ঐন্দ্রবায়বং গ্রহং গৃহ্লাতীত্যাদিষু দ্রব্যদেবতাসম্বন্ধানুপপত্ত্যা গৃহ্লাতের্যাগ-পর্য্যবসায়িত্বাৎ ॥

১৩। বাঢ়মিত্যভিনন্দ্য ভবানস্মিন্ নিমজ্জতামিত্যূচতুঃ ॥

১৪। হ্রদং প্রবেশিতঃ, তাবপি তমপি বৃদ্ধং গৃহীত্বা প্রবিষ্টাবিত্যর্থঃ ॥

১৬। অশ্বিনৌ শরণং যযৌ, যুবাং পৃথক্ স্থিত্বা মৎপতিং দর্শয়তমিতি প্রার্থয়ামাসেত্যর্থঃ ॥

২০। প্রলম্ভিতো বঞ্চিতঃ। হে অসতি! অসম্মতমনভীষ্টম্ ॥

২১। হে সতাং কুলপ্রসূতে! তে মতিরন্যথা তদ্বিপর্য্যয়েণ কথমব-গতাঽবসন্না অধ্যবসিতেতি বা। তদেবাহ—কুলদূষণমিত্যাদি ॥

২৫। সত্যস্তৎক্ষণমেব মন্যুর্যস্য, স ইন্দ্রঃ ॥

২৮। বিষয়ান্ দেশানানর্ত্তাদীনভুঙ্ক্তাপালয়ৎ। ককুদ্মী জ্যেষ্ঠো যস্মিংস্তৎ ॥

২৯। বিভুম্—ব্রহ্মাণম্ ॥

৩০। ন লব্ধঃ ক্ষণোঽবসরো যেন ; আদ্যং ব্রহ্মাণম্ ॥

৩১। তে ত্বয়া হৃদি যে কৃতাস্তে সর্ব্বে কালেন নিরুদ্ধাঃ সংহৃতাঃ ॥

৩২। ত্রিনব সপ্তবিংশতিচতুর্যুগানি, তৈর্ব্বিকল্পিতো বিভক্তঃ ॥

৩৩। যো দেবদেবস্যাংশোঽস্তি, তস্মৈ নররত্নায় দেহি ॥

৩৪। তদেবাহ—ভুব ইতি ॥

৩৫। পুণ্যজনত্রাসাদ্ যক্ষভয়াৎ পূর্ব্বমেব চিরং তদ্ভ্রাতৃভিস্ত্যক্তম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে তৃতীয়োঽধ্যায়ঃ ॥ ৩ ॥

চতুর্থোঽধ্যায়ঃ

চতুর্থে মনুপুত্রস্য নভগস্য কথোচ্যতে।

তৎসূনোশ্চাম্বরীষস্য কৃত্যা প্রতিহতা যতঃ ॥ (১)

১। নভগস্য বংশমাহ—নভগস্যাপত্যং নাভাগঃ, নাভাগাদম্বরীষো মহাভাগবতোঽভূদিতি বক্ষ্যংস্তদ্ধেতুত্বেন বংশপ্রবর্ত্তকস্য নভগস্য নিষ্কপটং চরিতম্, তেন চ রুদ্রপ্রসাদমাহ—যং ততমিত্যাদিনা। ব্রহ্মচারিণং বহুকালং গুরুকুলে বসন্তং নৈষ্ঠিকোঽসাবিতি মত্বা বিভাগসময়ে তস্মৈ ভাগমপ্রকল্প্যৈব ভ্রাতরঃ সর্ব্বং দায়ং বিভজ্য গৃহীত্বা, পশ্চাদ্‌গুরুকুলাদাগতং যং ভাগার্থিনং কবিং বিদ্বাংসং যবিষ্ঠং প্রতি ততং তাতং পিতরং দায়ং ব্যভজন্নিত্যর্থঃ ॥

২। এতদেব প্রশ্নোত্তরাভ্যাং দর্শয়তি। তত্র নভগঃ পৃচ্ছতি—ভো ভ্রাতরঃ! মহ্যং কিমভাঙ্‌ক্ত ব্যভজত, কং ভাগং মদর্থং যূয়ং প্রকল্পিতবন্তঃ? ভ্রাতর আহুঃ—তদা বিস্মৃতমস্মাভিরিদানীন্তু তব পিতরং ভজাম বিভজাম, ত্বং পিতরং গৃহাণেত্যর্থঃ। স চ পিতরং গত্বাহ—তত, হে তাত! আর্য্যা জ্যেষ্ঠা মম ত্বামভাঙ্ক্ষুর্ভাগং চক্রুর্মদীয়ো ভাগস্ত্বমিত্যর্থঃ। কিং ম ইতি পাঠে হে তাত! কিমিদং মমাভাঙ্ক্ষুঃ 'ভজাম পিতরং তব' ইত্যুক্তবন্ত আর্য্যাস্ত্বাং মহ্যং কিমর্থং দদুরিত্যর্থঃ। পিতাহ—হে পুত্রক! তত্তৈরুক্তম্ —মাদৃথাঃ ; প্রতারণমাত্রং তৈঃ কৃতম্, তস্মিন্নাদরং মা কার্ষীঃ, ন হ্যহং দায় ইব ভোগসাধনমিত্যর্থঃ ॥

৩—৫। তথাপি তৈর্ভাগত্বেন দত্তোঽহং তব জীবনোপায়মুপদেক্ষ্যামীত্যাহ—ইম ইতি সপাদাভ্যাং দ্বাভ্যাম্। (৩) 'অভিপ্লবঃ[১] ষড়হো ভবতি, পৃষ্ঠ্যঃ ষড়হো ভবতি' ইতি বিহিতেষু ষড়হেষ্বাবর্ত্ত্যমানেষু ষষ্ঠং ষষ্ঠমহঃ কর্ম্মোপেত্য প্রাপ্য, কর্ম্মণি তদনুষ্ঠানে সুমেধসোঽপি তে সূক্তবিশেষাজ্ঞানেন

১। অতিপ্লবঃ (ক্বচিৎ পাঠঃ)।

মুহ্যন্তি। কবে! হে বিদ্বন্॥ (৪—৫) তান্ মহাত্মনোঽপি 'ত্বমিদমিত্থং রৌদ্রম্' ইতি চ 'যে যজ্ঞে দক্ষিণায়' ইতি চ বৈশ্বদেবে দ্বে সূক্তে শংসয় পাঠয়, ততঃ কর্ম্মণি সমাপ্তে সতি তে স্বর্যান্তঃ স্বর্গং গচ্ছন্তঃ, স্বসত্রে পরিশেষিতমবশিষ্টমাত্মনো ধনং তে তুভ্যং দাস্যন্তি, অথ তস্মাত্তানর্চ্ছ গচ্ছেতি। তথেত্যাদি শুকবাক্যম্। যথাবৎ কৃতবান্ সত্রপরিশেষণং সত্রাবশিষ্টং ধনম্॥

৬। পুরুষঃ শ্রীরুদ্রঃ, দৃশ্যত ইতি দর্শনং শরীরম্, কৃষ্ণং দর্শনং যস্য সঃ। বাস্তুকং যজ্ঞভূমিগতং বসু ধনং মমেত্যুবাচ॥

৭। তর্হি স্ম তদৈব 'মমেদম্' ইতি মানবো নাভাগ উবাচ। পুনশ্চ শ্রীরুদ্র উবাচ—'নৌ আবয়োরস্মিন্ বিবাদে তব পিতরি প্রশ্নঃ স্যাৎ' ইতি। 'পৃষ্টবান্' ইতি শুকোক্তিঃ॥

৮। পৃষ্টস্য মনোর্বাক্যম্—যজ্ঞবাস্তুগতমিতি। উচ্ছিষ্টম্—উর্ব্বরিতম্। উ ক্বচিদিতি দক্ষাধ্বরে, 'উচ্ছেষণভাগো বৈ রুদ্রঃ' ইতি শ্রুতেঃ। কিঞ্চ, স দেব ঈশ্বরঃ সর্ব্বমেবার্হতি, কিং পুনর্যজ্ঞাবশিষ্টমিত্যর্থঃ॥

১০। শ্রীরুদ্র আহ—যত্তে ইতি॥

১১। ইদং চাখ্যানং শ্রুতিপ্রসিদ্ধম্, তথা চ বহ্বৃচব্রাহ্মণম্—'নাভাগেন দিষ্টং শংসতি, নাভাগেন দিষ্টং বৈ মানবং ব্রহ্মচর্য্যং বসন্তং ভ্রাতরো নিরভজন্, সোঽব্রবীৎ' ইত্যাদি॥

১২। অস্যাখ্যানস্য স্মরণে ফলমাহ—য এতদিতি; আত্মনো গতিঞ্চ প্রাপ্নোতীতি শেষঃ॥

১৩। ক্বচিদপি ন প্রতিহতো ব্রহ্মশাপোঽপি ব্রাহ্মণেন দুর্ব্বাসসা নির্ম্মিতঃ কৃত্যানলোঽপি যং নাস্পৃশৎ, অতোঽসৌ মহাভাগবতঃ, অতএব কৃতী পুণ্যবান্॥

১৪। তস্য শ্রোতুমিচ্ছামি চরিতমিতি শেষঃ। ব্রহ্মদণ্ডঃ কৃত্যানলো ন প্রাভূৎ, ন সমর্থো বভূব ॥

১৫। শ্রিয়ং সম্পদম্, বিভবমৈশ্বর্য্যম্, অতুলং নিরুপমম্ ॥

১৬। পুংসামতিদুর্ল্লভমপি তৎ সর্ব্বম্, স্বপ্নবৎ সংস্তুতং নিরূপিতমনুপাদেয়ং মেনে; তত্র হেতুঃ—বিভবস্য নির্ব্বাণং নাশং বিদ্বান্। যদ্‌যেন বিভবেন তন্নাশেন বা পুমান্ তমো বিশতি, মোহে নিমজ্জতি ॥

১৭। নন্বেবং জানন্তোঽপি বিভবৈষিণো দৃশ্যন্তে? তত্রাহ—বাসুদেব ইতি। ভাবং ভক্তিং প্রাপ্তঃ; যেন ভাবেনেদং বিশ্বং লোষ্ট্রবদতিতুচ্ছং স্মৃতম্ ॥

১৮—২০। ভক্তিমেব সর্ব্বেন্দ্রিয়াণাং ভগবৎপরত্বকথনেন প্রপঞ্চয়তি—স বা ইতি ত্রিভিঃ। (১৮) শ্রুতিং শ্রোত্রম্, অচ্যুতস্য সৎকথানামুদয়ে শ্রবণে, চকারেত্যস্য সর্ব্বত্রান্বয়ঃ॥ (১৯) মুকুন্দস্য লিঙ্গানামালয়াঃ স্থানানি, তেষাং দর্শনে দৃশৌ নেত্রে, শ্রীমত্যাস্তুলস্যাস্তৎপাদসরোজেন যৎ সৌরভম্, তস্মিন্; তদর্পিতে তস্মৈ নিবেদিতান্নাদৌ ॥ (২০) কামং স্রক্‌চন্দনাদি-সেবাং দাস্যে নিমিত্তে, তৎপ্রসাদস্বীকারায়; ন তু কামকাম্যয়া বিষয়েচ্ছয়া। কথং চকার? উত্তমঃশ্লোকজনাশ্রয়া রতির্যথা ভবেৎ, তথা। অনেন চ তদ্ভক্তেষু পরং ভাবং প্রাপ্ত ইত্যেতৎ স্ফুটীকৃতম্ ॥

২১। সর্ব্বত্রাত্মেতি ভাবো ভাবনা যস্মিংস্তম্, আত্মনঃ স্বস্য কর্ম্মণাং কলাপং সমূহং ভগবতি বিদধৎ সমর্পয়ন্, তন্নিষ্ঠৈর্ভাগবতৈর্ব্বিপ্রৈরভিহিতঃ শিক্ষিতঃ সন্, মহীং শশাস পালয়ামাস। অনেনাধিকৃতধর্ম্মোঽপি যথাবদ্দর্শিতঃ ॥

২২। কিঞ্চ, যজ্ঞাধিষ্ঠাতারমীশ্বরমশ্বমেধৈরীজে আরাধয়ামাস। মহাবিভূত্যোপচিতান্যঙ্গানি দক্ষিণাশ্চ যেষু, তৈর্ব্বশিষ্ঠাদিভির্হেতুভূতৈস্তৈ-

র্বিস্তৃতৈঃ। ধন্বনি ধন্বদেশে, নিরুদকে সরস্বতীমভিস্রোতং তস্যাঃ প্রতি-লোমমিত্যর্থঃ ॥

২৩। কিঞ্চ, যস্য ক্রতুষু সদস্যাদয়ো গীর্ব্বাণৈঃ সহ ভূষণাদিভিস্তুল্যরূপা ব্যদৃশ্যন্ত, স ইত্থমিতি চতুর্থেনান্বয়ঃ ; ন চ দেবানাং নিমেষাভাবাদ্বৈলক্ষণ্যম্, যতোঽনিমিষাশ্চ ব্যদৃশ্যন্ত। ন নিমিষন্তীতি তথা, আশ্চর্য্যদর্শনোৎসুক্যেন তেষাং নিমিষোপরমাদিতি ভাবঃ ॥

২৪। যস্য যদীয়ৈর্ম্মনুজৈরপি স্বর্গোঽপি ন প্রার্থিতঃ, তস্য তু কা বার্ত্তা ? ॥

২৫। আস্তাং তাবৎ স্বর্গপ্রার্থনশঙ্কাপি, যদ্‌যতো মুকুন্দং হৃদি পশ্যতস্তান্ জনান্ কামা বিষয়া ন সমর্দ্ধয়ন্তি, ন হর্ষয়ন্তি। কথম্ভূতাঃ ? স্বারাজ্যেন স্বরূপসুখেন পরিভাবিতা অতিশায়িতাঃ, অতএব সিদ্ধানামপি দুর্ল্লভাঃ। যানিতি পাঠে যান্ মনুজান্। স্বারাজ্যপরিভাবিতানিত্যপি পাঠে মনুজানাং বিশেষণম্। যমিতি পাঠে যমম্বরীষম্। পশ্যতামিতি পাঠে সিদ্ধানাং বিশেষণম্ ॥

২৬—২৭। এবং শ্রীভগবদারাধনপরস্য তস্য কামাদ্যপেক্ষা নৈব চিত্রমিত্যুপসংহরতি—স ইত্থমিতি দ্বাভ্যাম্ ॥

২৮। নন্বেবম্ভূতোঽসৌ কথং প্রতিপক্ষান্ জয়েৎ ? তত্রাহ—তস্মা ইতি ॥

২৯। তদেবং তস্য বৈরাগ্যাদিকং শ্রীহরিভক্তিঞ্চোক্ত্বা ‘ব্রহ্মদণ্ডো যত্র ন প্রাভূৎ’ ইতি যদুক্তম্, তদেব দ্বাদশীব্রতনিষ্ঠাং কথয়ন্নাহ—‘আরিরাধয়িষুঃ’ ইত্যাদিনা যাবদধ্যায়সমাপ্তি ॥

৩০। অর্চ্চয়দড়াগমাভাব আর্ষত্বাৎ ॥

৩২। ব্রাহ্মণাংশ্চ পূজয়ামাস ; সিদ্ধার্থানাপ্তকামান্ পূজানপেক্ষানপি ॥

৩৩। রূপ্যাঙ্ঘ্রীণাং রূপ্যখুরাণাম্, পয়ঃশীলাদি সম্পদো যাসাং তাসাম্ ॥

৩৪। স্বর্ব্বুদানি ষট্ ষষ্টিকোটিঃ ॥

৩৫। তর্হি তদৈব দুর্ব্বাসা অতিথিঃ সাক্ষাৎ প্রত্যক্ষোঽভূৎ ॥

৩৬। আনর্চ্চ—অর্চ্চিতবান্; অভ্যবহারায়—ভোজনায় ॥

৩৭। আবশ্যকং নৈয়মিকং মাধ্যাহ্নিকং কর্ম্ম কর্ত্তুং গতঃ। বৃহদ্ব্রহ্ম ॥

৩৯। ধর্ম্মসঙ্কটমেবাহ—যদ্যতো ব্রাহ্মণাতিক্রমে দোষোঽধর্ম্মঃ, দ্বাদশ্যামপারণেঽপি দোষো ব্রতবৈগুণ্যম্। যৎ কৃত্বা—যস্মিন্ কৃতে ॥

৪০। এবং দ্বিজৈঃ সহ বিচার্য্য নিশ্চিনোতি—অন্তসেতি। ব্রতস্য পারণং সমাপ্তিম্। তদশিতমাহুঃ, অশিতং নেতি চাহুঃ; শ্রুতিশ্চ—'অপোঽশ্নাতি যত্তন্নৈবাশিতং ভবতি নৈবানশিতম্' ইতি ॥

৪১। প্রত্যচষ্ট—প্রত্যৈক্ষত ॥

৪৩। প্রচলৎ কম্পমানং গাত্রং যস্য; ভৃকুটীভ্যাং কুটিলমাননং যস্য ॥

৪৮। ক্রুদ্ধমহিং পাবকো দাবাগ্নিরিব ॥

৪৯। নিষ্ফলমুদ্বীক্ষ্য ॥

৫০। অনুষক্তং পৃষ্ঠতঃ সংসক্তম্, মেরোর্গুহাং বিবিক্ষুরধাবৎ ॥

৫২। অরণমেষমাণঃ শরণমিচ্ছন্; অজিততেজসো হরেশ্চক্রাৎ ॥

৫৩। এতৎ সর্ব্বং যস্য ভ্রূভঙ্গমাত্রেণ তিরোভবিষ্যতি। কদা? ক্রীড়ায়া অবসানে; তদপি কদা? দ্বিপরার্দ্ধসংজ্ঞে কালে ॥

৫৪। অতো বয়ং সর্ব্বে যস্য নিয়মমাজ্ঞাং প্রপন্নাঃ প্রাপ্তাঃ সন্তো লোকহিতং যথা ভবত্যেবং তং নিয়মং মূর্দ্ধ্যর্পিতং বহামঃ, অতস্তদ্ভক্তদ্রোহিণং ত্বাং রক্ষিতুং ন সমর্থোঽহমিতি শেষঃ; যত্তদোর্নিত্যসম্বন্ধাৎ ॥

৫৬—৫৯। শ্রীরুদ্রোঽপি প্রত্যাচষ্টে—বয়মিতি চতুর্ভিঃ। (৫৬) ভূম্নি মহতি; মহত্ত্বমেবাহ—যস্মিন্ পরে পরমেশ্বরে, অজা ব্রহ্মাণঃ, ত এব জীবাস্তেষাং কোশা উপাধিভূতা ব্রহ্মাণ্ডবিগ্রহা ঈদৃশা দৃশ্যমানব্রহ্মাণ্ডপ্রমাণা অন্যেঽপি ভবন্তি জায়ন্তে নশ্যন্তি চ। যত্র যেষু ব্রহ্মাণ্ডেষু, লোকেশাভি-

মানিনো বয়ং ভ্রমামঃ ॥ (৫৭) নন্বু সর্ব্বজ্ঞস্ত তব ভ্রমঃ কুতঃ ? তত্রাহ —অহমিতি ॥ (৫৮) পারদর্শিনঃ সর্ব্বজ্ঞা অপি যস্ত মায়াং ন বিদুঃ ॥

৬১। হে সতামীপ্সিত ! মা মাম্, অব পাহি ॥

৬২। অপরাধং নিবেদয়ন্ প্রার্থয়তে—অজানতেতি। অঘং দুঃখম্ ; অপচিতিং নিষ্কৃতিম্। মদ্ভক্তদ্রোহে নিষ্কৃতিং ন পশ্যামীতি চেৎ, তত্রাহ—যস্ত তব নাম্নি কীর্ত্তিতে নরকস্থোঽপি মুচ্যেত, তস্ত তব কিমশক্যমিতি ভাবঃ ॥

৬৪। ন আশাসে—ন স্পৃহয়ামি ॥

৬৫। ইমং পরঞ্চ লোকং হিত্বা ॥

৬৭। প্রতীতং প্রাপ্তমপি ॥

৬৯। আত্মনস্তবৈবাভিচারো হিংসা যতোঽভূৎ, তমেব যাহি। অশিবমনর্থম্ ॥

৭০। তপোবিদ্যাসম্পন্নস্ত মম কথমনর্থঃ সমজনীতি বিস্ময়ং মা কার্ষীরিত্যাহ—তপ ইতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
চতুর্থোঽধ্যায়ঃ ॥ ৪ ॥

পঞ্চমোঽধ্যায়ঃ

পঞ্চমে বিষ্ণুচক্রস্ত প্রসাদ্য প্রাণসঙ্কটাৎ।
দুর্ব্বাসা রক্ষিতস্তেন যথা[১] তদ্বৃত্তমীর্য্যতে ॥ (১)

২। স উত্তমমিতি চ্ছেদঃ, সুলোপঃ পাদপূরণার্থঃ ॥

১। তথা (ঘ)।

৩। জ্যোতিষাং নক্ষত্রাণাং পতিঃ সোমস্ত্বম্, মাত্রাণীন্দ্রিয়াণি চ। ত্বচ্ছক্ত্যৈবাগ্ন্যাদয়ঃ স্বং স্বং কার্য্যং কুর্ব্বন্তীত্যর্থঃ ॥

৪। সহস্রমারা যস্য, হে সহস্রার! স্বস্তি শরণং ভূয়াঃ; ইড়স্পতে! পৃথিবীপতে! ॥

৫। ব্রাহ্মণরক্ষণং তব যুক্তমেবেত্যাহ—ত্বং ধর্ম্ম ইতি। ন চ তবেয়-মতিস্তুতিরিত্যাহ—পৌরুষং পুরুষস্যেশ্বরস্য পরং তেজঃ সামর্থ্যং ত্বম্। অয়ং ভাবঃ—'স ঐক্ষত' ইত্যাদি-শ্রুতিপ্রসিদ্ধং ভগবতঃ শোভনং দর্শনং সুদর্শনম্, তত এব চ সর্ব্বং জাতম্, অতএব ত্বং সর্ব্বাত্মেতি ॥

৬। হে সুনাভ! অদ্ভুতকর্ম্মাণং ত্বাং কঃ স্তোতুং সমর্থঃ? অতস্তুভ্যং কেবলং নমো গৃণ ইত্যন্বয়ঃ। অদ্ভুতকর্ম্মত্বমেবাহ—অখিলানাং ধর্ম্মাণাং সেতবে মর্য্যাদারূপায়; অতএবাধর্ম্মশীলানামসুরাণাং ধূমকেতবে দাহকায়; ত্রৈলোক্যং গোপায়তীতি তথা, তস্মৈ; বিশুদ্ধমত্যুজ্জ্বলং বর্চ্চস্তেজো যস্য, তস্মৈ ॥

৭—৮। তদেব প্রপঞ্চয়তি—ত্বত্তেজসেতি দ্বাভ্যাম্। (৭) সূর্য্যাদেঃ প্রকাশশ্চ ত্বয়ৈব রূপ্যতে প্রকাশ্যত ইতি ত্বদ্রূপম্॥ (৮) হে অজিত! অনঞ্জনেন শ্রীহরিণা যদা বিসৃষ্টস্ত্বম্, তদা দৈত্যদানবানাং বলং প্রবিষ্টঃ সন্ তেষাং বাহ্বাদীন্ ভিন্দন্ বিরাজসে। প্রবিষ্টোর্জ্জিতদৈত্যদানবমিতি পাঠে উর্জ্জিতা দৈত্যদানবা যস্মিংস্তদ্বলম্; পূর্ব্বপদে সন্ধিরার্ষঃ ॥

৯। কিঞ্চ, ত্বয়া ভগবন্নিযুক্তেন খলানামেব দণ্ডঃ কার্য্যঃ, সাধবস্তু রক্ষণীয়াঃ; অতো বিপ্র-রক্ষণেনাস্মাননুগৃহাণেত্যাহ—স ত্বমিতি। হে জগত্ত্রাণ! স এবম্ভূতস্ত্বং খলানামেব প্রহরণার্থং নিরূপিতো নিযুক্তঃ; অতোঽস্মৎকুলস্য দৈবহেতবে ভাগ্যলাভায় বিপ্রস্য ভদ্রং বিধেহি, তদেব নোঽনুগ্রহঃ ॥

১০—১১। সর্ব্বস্বকৃতার্পণেন বিপ্ররক্ষাং প্রার্থয়তে—যন্মস্তীতি দ্বাভ্যাম। (১০) বিপ্রো দৈবং দেবতা যস্মিংস্তৎ ॥

১২। রাজ্ঞস্তস্যৈব যাচ্ঞয়া ॥

১৭—১৮। রাজেত্যাদি শ্লোকদ্বয়ং শুকোক্তিঃ ॥

২০—২১। প্রীতোঽস্মীতি শ্লোকদ্বয়ং পুনশ্চ বিপ্রোক্তিঃ। (২০) আত্মনি মেধা যেন, তেনাতিথ্যেন ॥ (২১) ভূরিয়ম্, তত্রস্থো জনঃ, কীর্ত্তয়িষ্যতি ॥

২৩। তস্য ধৈর্য্যাতিশয়মাহ—গতো মুনির্যাবতা নাগতঃ, তাবৎ সংবৎসরোঽতিক্রান্ত ইতি ॥

২৪। দ্বিজস্যোপযোগেন ভোজনেনাতিপবিত্রমাহরদ্‌বুভুজে ; স্ববীর্য্যঞ্চ ধৈর্য্যাদিলক্ষণং পরানুভাবং শ্রীভগবতঃ প্রভাবং মেনে ॥

২৫। এবংবিধা অনেকে গুণা যস্য সঃ, আবিরিঞ্চ্যান্ বিরিঞ্চ্যপদ-সহিতান্, ভোগান্ নিরয়প্রায়ানপশ্যদিত্যর্থঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
পঞ্চমোঽধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠোঽধ্যায়ঃ

ষষ্ঠারম্ভেঽম্বরীষস্য বংশমুক্ত্বা ততঃ পরম্।
ষষ্ঠাদ্যষ্টভিরধ্যায়ৈরিক্ষ্বাকোর্ব্বংশ উচ্যতে ॥ (১)

তত্র ষষ্ঠে শশাদাদির্মান্ধাত্রন্তো নিরূপ্যতে।
প্রসঙ্গাৎ সৌভরেরাখ্যা মান্ধাতৃতনয়াপতেঃ ॥ (২)

২। তন্তবে—সন্তানার্থম্ ॥

৩। যেঽঙ্গিরসা জনিতা এতে রথীতরস্য ক্ষেত্রে প্রসূতত্বেন রথীতর-গোত্রাঃ সন্তঃ, অঙ্গিরসো বীর্য্যেণ প্রসূতত্বাদাঙ্গিরসাশ্চ পুনরপি রথীতরাণা-মন্যেষাং জাতানাং প্রবরা মুখ্যাঃ স্মৃতাঃ, যতঃ ক্ষত্রোপেতা ব্রাহ্মণা ইত্যর্থঃ ॥

৪। তদেবং মনোর্দশসু পুত্রেষু পৃষধ্রশ্চ কবিশ্চ বিরক্তত্বান্ন বংশ-প্রবর্ত্তকৌ, করূষাদীনাঞ্চ সপ্তানাং বংশাস্তারতম্যক্রমেণোক্তাঃ, ইদানীমতি-বিততমিক্ষ্বাকোর্ব্বংশমাহ—ক্ষুবত ইত্যাদিনা যাবৎ সোমবংশপ্রস্তাবঃ। ক্ষুতং কুর্ব্বতো মনোর্ঘ্রাণতো জজ্ঞে। 'শ্রদ্ধায়াং জনয়ামাস দশ পুত্রান্' ইতি তু পূর্ব্বোক্তং বাহুল্যাভিপ্রায়েণেতি দ্রষ্টব্যম্। পুত্রাণাং শতে জ্যেষ্ঠাঃ ॥

৫। 'আর্য্যাবর্ত্তঃ পুণ্যভূমির্মধ্যং বিন্ধ্যহিমাগয়োঃ' তস্মিন্ পুরস্তাৎ সমুদ্রপর্য্যন্তং মণ্ডলবিভাগেন পঞ্চবিংশতির্নৃপা অভবন্। হে নৃপ! তথৈব পশ্চাচ্চ পঞ্চবিংশতিঃ; মধ্যে তু জ্যেষ্ঠাস্ত্রয়ঃ; অপরে তু অন্যতঃ। অন্য-তোঽত্র দক্ষিণোত্তরাদিষু ॥

৬—৯। বিকুক্ষিরেব শশাদ ইতি বিশ্রুত ইতি বক্ষ্যতি। তত্র হেতু-মাহ—(৬) স একদেতি চতুর্ভিঃ। (৭) ক্রিয়ার্হণান্—শ্রাদ্ধার্হান্, আদদভক্ষয়ৎ ॥ (৮) তদ্গুরুর্বশিষ্ঠঃ; প্রোক্ষণায় শ্রাদ্ধোচিতসংস্কারায় ॥ (৯) ত্যক্তো বিধিঃ সদাচারো যেন, তম্ ॥

১০। স ত্বিক্ষ্বাকুঃ, জ্ঞাপকেন বশিষ্ঠেন; রাজ্যভোগেন বিরক্তো যোগী সন্, তেন যোগেন কলেবরং ত্যক্ত্বা স যৎ পরং তত্ত্বম্, তদবাপ ॥

১১। শাসৎ পালয়ন্ হরিমীজে ॥

১২। দৈত্যপুরস্য জয়াৎ পুরঞ্জয়ঃ; ইন্দ্রো বাহোঽস্যেতীন্দ্রবাহঃ; ককুদি স্থিতত্বাৎ ককুৎস্থ ইতি চ—শশাদসুতস্য ত্রীণি নামানি তৎকর্ম্ম-নিমিত্তানি ॥

১। জাপকেন (ঘ)।

১৩—১৯। তান্যেব ব্যাচক্ষাণ আহ—কৃতান্ত ইতি সপ্তভিঃ। (১৩) কৃতং বিশ্বমন্তয়তীতি তথা ; পার্ষ্ণিগ্রাহঃ সহায়ঃ ॥ (১৪) ইন্দ্রো যদি মম বাহনং স্যাৎ, তর্হি দৈত্যান্ হনিষ্যামীতি, তেন বাহনত্বেন বৃতঃ সন্নিন্দ্রো লজ্জয়া তদনঙ্গীকুর্ব্বন্ বিষ্ণোর্ব্বচনাত্তস্য বাহনত্বায় মহাবৃষো বভূবেত্যর্থঃ ॥ (১৭) যেঽভিমুখং যযুস্তান্ যমং দর্শয়িতুং সদেহানেব ভল্লৈরনয়দিত্যর্থঃ ॥ (১৮) তচ্চ দৃষ্ট্বান্যে চ দুদ্রুবুঃ, স্বমালয়ং পাতালম্ ॥ (১৯) ইত্যেতৈঃ কর্ম্মভিঃ পুরঞ্জয়াদিনামভিরাহ্বতো ব্যাহৃতঃ। আহুত ইতি পাঠান্তরে আহূত ইত্যর্থঃ ॥

২১। শ্রাবস্তিঃ শ্রাবস্তস্য সুতঃ ; কুবলয়াশ্ব[১] এব ধুন্ধুমার ইতি খ্যাতঃ ॥

২২। তত্র কারণমাহ—য ইতি। সুতানামেকবিংশত্যা সহস্রৈর্বৃতঃ সন্ হতবান্ ॥

২৩। ধুন্ধুমার ইতি চেতি চকারস্যান্বয়ঃ ॥

২৫। অথ তস্মান্নিকুম্ভাৎ কৃশাশ্বঃ ॥

২৬। ভার্য্যাণাং শতেন সহাস্য পুত্রার্থমিন্দ্রদৈবত্যামিষ্টিং প্রবর্ত্তয়ামাসুঃ। 'স্ম' ইত্যাশ্চর্য্যে ॥

২৭—৩২। তদেবাহ—রাজেতি ষড়্ভিঃ। (২৭) তর্ষিতস্তৃষিতঃ সন্ জলার্থং প্রবিষ্টো মন্ত্রাভিমন্ত্রিতং জলং পত্ন্যৈ দেয়ং স্বয়ং পপৌ ॥ (২৮) ব্যুদকং নিরুদকম্ ; পুংসবনং পুত্রোৎপত্তিকারণম্ ॥ (২৯) অহো ! দৈববলমেব মুখ্যং বলং পুরুষবলন্তু ন কিঞ্চিদিতি বদন্ত ঈশ্বরায় নমস্কারং চক্রুঃ ॥ (৩১) 'অয়ং কং ধাস্যতি পাস্যতি' ইতি দুঃখিতৈর্বিপ্রৈরুক্তে সতি, তস্যামিষ্ট্যামারাধিত ইন্দ্রঃ 'মাং ধাতা পাতা, হে বৎস ! মা রোদীঃ' ইতি ব্রুবন্ দেশিনীং তর্জ্জনীমদাদিত্যর্থঃ ॥ (৩২) তস্য পিতা যুবনাশ্বো ভিন্নকুক্ষিরপি ন মমার, কিন্তু কালান্তরে তপসা সিদ্ধিমন্বগাৎ ॥

১। কুবলয়াশ্বক (ঘ)।

৩৩—৩৮। মান্ধাতুর্মহিমানমাহ—ত্রসদ্দস্যুরিতি ষড়্ভিঃ। (৩৩) অঙ্গ, হে রাজন্! যস্মান্মান্ধাতুর্দস্যব উদ্বিগ্নাঃ কম্পিতাঃ সন্তঃ ত্রসন্তি, অত ইন্দ্রো যস্য ত্রসদ্দস্যুরিতি নাম বিদধে, স মান্ধাতাবনীমেকঃ শশাসেত্যুত্তরেণান্বয়ঃ॥ (৩৪) অচ্যুতস্য তেজসা, অপ্রচ্যুতেন তেজসেতি বা॥ (৩৫—৩৬) আত্মবিদপি স যজ্ঞং বিষ্ণুমীজে। তমেব বিশিনষ্টি—সর্ব্বদেবময়মিতি সার্দ্ধেন॥ (৩৭) প্রতিতিষ্ঠতি—অস্তং গচ্ছতি॥ (৩৮) প্রসঙ্গাৎ সৌভরেশ্চরিতমাহ—তেষামিতি যাবৎসমাপ্তি। তেষাং স্বসারঃ মান্ধাতুঃ কন্যাঃ॥

৩৯—৪৪। ননু মহাতাপসস্য তস্য কুতো বিবাহপ্রসঙ্গঃ, কথং বা জরাজর্জ্জরিতং রাজকন্যা বব্রিরে? তদাহ—(৩৯) যমুনান্তর্জল ইতি ষড়্ভিঃ। (৪০) নৃপং মান্ধাতারম্। সোঽপি মান্ধাতা স্বয়ংবরে কামং গৃহ্যতামিত্যাহ॥ (৪১—৪২) স বিপ্রঃ স্ত্রীণামপ্রিয়ং মাং বিচিন্ত্যানেনাহং প্রত্যুক্তোঽহত আত্মানং তথা সাধয়িষ্যামীতি ব্যবসিতো নিশ্চিতবানিতি দ্বয়োরন্বয়ঃ। (৪১) অপ্রিয়ত্বে হেতুঃ—জরঠো বৃদ্ধঃ, বলিভির্যুক্তঃ পলিতশ্চ, এজৎকঃ কম্পমানশিরাঃ, তাপসত্বাদিনা চাসম্মতোঽহমিতি মত্বা॥ (৪২) তথেত্যস্য প্রপঞ্চঃ। সুরস্ত্রীণামভীপ্সিতম্, কিং পুনর্মনুজেন্দ্রাণাং যাঃ স্ত্রিয়স্তাসামিতি॥ (৪৩—৪৪) ততঃ কিং বৃত্তম্? তদাহ—মুনিরিতি দ্বাভ্যাম্। (৪৩) ক্ষত্রা প্রতীহারেণ, পঞ্চাশতাপি রাজকন্যাভিঃ স এক এব বরো বৃতঃ॥

৪৫—৪৮। তস্য গার্হস্থ্যং বর্ণয়তি—স ইতি চতুর্ভিঃ। (৪৫) 'বহ্বৃচঃ' ইতি মন্ত্রসামর্থ্যমুক্তম্। তাভিঃ সহ রেম ইত্যুত্তরেণান্বয়ঃ। ক্ব রেমে? অপারণীয়ং দুরন্তং যত্তপস্তস্য শ্রিয়া সমৃদ্ধ্যানর্ঘ্যাঃ পরিচ্ছদা যেষু, তেষু গৃহেষু; তথা নানাবিধেষূপবনেষু চামলান্যম্ভাংসি যেষাম্, তেষু সরঃসু চ। কীদৃশেষু? সৌগন্ধিকানাং কহ্লারাণাং কাননানি স্তোমা যেষু॥ (৪৬) কীদৃশেষু

গৃহাদিষু? স্বলঙ্কৃতাঃ স্ত্রিয়ঃ পুরুষাশ্চ যেষু; অনুগায়ন্তো দ্বিজাশ্চ পক্ষিণো ভৃঙ্গাশ্চ বন্দিনশ্চ যেষু। কীদৃশঃ? মহার্হশয্যাদিভিরুপলক্ষিতঃ সন্॥ (৪৭) স্তম্ভম্—গর্ব্বম্॥ (৪৮) আজ্যস্তোকৈর্ঘৃতবিন্দুভিঃ॥

৪৯—৫৫। ইদানীং তস্যানুতাপপূর্ব্বকং বানপ্রস্থাশ্রমমাহ—স কদাচিদিতি সপ্তভিঃ। (৪৯) আত্মনো মনসো হেতোরাত্মনোঽপহ্নবং তপোহানিং দদর্শ॥ (৫০) সংশ্চাসৌ চরিতব্রতশ্চ যোঽহম্, তস্য ব্রহ্ম তপঃ॥ (৫১) মিথুনব্রতিনাং দাম্পত্যধর্ম্মবতাম্, চেদ্যদি, প্রসঙ্গস্তর্হি তদ্ব্রতিষু ঈশ্বরার্থধর্ম্মপরেষ্বেব কার্য্য ইতি শেষঃ॥ (৫২) সঙ্গাজ্জাতং দোষং প্রপঞ্চয়তি—এক ইতি। পঞ্চাশতা ভার্য্যাভিঃ সম্বন্ধাৎ পঞ্চাশদাসমভূবমিত্যর্থঃ। ততশ্চ সুতৈঃ পঞ্চসহস্রসর্গ আসম্, প্রত্যেকং তাসু পুত্রশতরূপেণোৎপত্তেঃ। উভয়কৃতান্যৈহিকপারত্রিকাণি কর্ম্মাণি তদ্বিষয়াণাং মনোরথানাম্, অর্থভাবঃ পুরুষার্থবুদ্ধিমান্॥ (৫৩) ন্যাসোঽত্র সঙ্গত্যাগ এব, বানপ্রস্থধর্ম্ম ইত্যর্থঃ॥ (৫৫) আধ্যাত্মিকীং গতিং ব্রহ্মনিলয়ম্[১]॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
ষষ্ঠোঽধ্যায়ঃ॥ ৬॥

সপ্তমোঽধ্যায়ঃ

মান্ধাতুরন্বয়ঃ প্রোক্তঃ সপ্তমে যত্র গীয়তে।
পুরুকুৎসস্য চাখ্যানং হরিশ্চন্দ্রস্য চোত্তমম্॥ (১)

১। পুত্রপ্রবরঃ পুত্রশ্রেষ্ঠঃ; স পিতামহেন যুবনাশ্বেন প্রবৃতঃ পুত্রত্বেন স্বীকৃতঃ, অতএব তস্য মান্ধাতৃপ্রবর্গ্যত্বম্। তৎসুতঃ—অম্বরীষস্য সুতঃ।

১। ব্রহ্মণি লয়ম্ (ঘ)।

ইমে যৌবনাশ্বাম্বরীষহারীতা মান্ধাতৃগোত্রস্ত প্রবরা অবান্তরবিশেষ-প্রবর্ত্তকাঃ ; যদ্বা, যৌবনাশ্ব-বিশেষণম্, পিতামহেন মান্ধাত্রা সহ আর্ষেয়প্রবরত্বেন[১] প্রবৃতঃ ; মান্ধাতা প্রবরো যেষাং ত ইমে অম্বরীষ-যৌবনাশ্ব-হারীতাঃ। যথাহাশ্বলায়নঃ—'হরিত-কুৎস-পিঙ্গদর্ভ-ভৈমগবানামাঙ্গিরসাম্বরীষযৌবনাশ্বাশ্চেতি মান্ধাতারং হেকে ব্রুবতে, অবন্তীত্যাঙ্গিরসং মান্ধাত্রম্বরীষযৌবনাশ্বাশ্চ' ইতি ॥

২। পুরুকুৎসস্ত বংশং কথয়িষ্যন্নাদৌ তস্ত বিবাহং প্রভাবঞ্চাহ—উরগৈর্ভ্রাতৃভির্যা দত্তা নর্ম্মদা, তয়া ॥

৩। বধ্যান্ বধার্হান্ ; স চ পুরুকুৎসো নাগাল্লব্ধবরোঽভূৎ। বরমাহ—ইদং নর্ম্মদায়া রসাতলনয়নাদিকং স্মরতাং সর্পাদভয়মিতি ॥

৪। দেহকৃৎ পিতা, ত্রসদ্দস্যোঃ সুতোঽনরণ্য ইত্যর্থঃ ॥

৫। ত্রয়ঃ শঙ্কব ইব দুঃখহেতবো দোষা যস্তাসৌ ত্রিশঙ্কুঃ ; তদুক্তং হরিবংশে—'পিতুশ্চাপরিতোষেণ গুরোর্দ্দোগ্ধ্রীবধেন চ। অপ্রোক্ষিতোপযোগাচ্চ ত্রিবিধস্তে ব্যতিক্রমঃ॥' ইতি। পরিণীয়মানবিপ্রকন্যাহরণাৎ ক্রুদ্ধস্ত গুরোঃ পিতুঃ শাপাৎ। কৌশিকস্ত বিশ্বামিত্রস্ত তেজসা প্রভাবেণ ॥

৬। তেনৈব কৌশিকেন ॥

৭। পক্ষিণো আড়ীবকয়োঃ সতোঃ। বিশ্বামিত্রো রাজসূয়দক্ষিণাচ্ছলেন হরিশ্চন্দ্রং সর্ব্বস্বমপহৃত্য যাতয়ামাস। তচ্ছ্রুত্বা কুপিতো বশিষ্ঠোঽপি 'বিশ্বামিত্র ত্বমাড়ী ভব' ইতি শশাপ, সোঽপি 'ত্বং বকো ভব' ইতি বশিষ্ঠং শশাপ ; তয়োশ্চ যুদ্ধমভূদিতি প্রসিদ্ধম্ ॥

৮—১৬। 'হরিশ্চন্দ্রো হ বৈধস ঐক্ষ্বাকবো রাজা অপুত্র আস্তে[২]' ইত্যাদি-শ্রুতিপ্রসিদ্ধং হরিশ্চন্দ্রস্ত চরিতমাহ—সোঽনপত্যঃ ইত্যাদিনা যাবৎসমাপ্তি। (৮) কথং শরণং যাতঃ? তদাহ—পুত্রো মে জায়তাম্ ॥

১। আর্ষেয়বরেণ (ঘ) ; ২। রাজা পুত্র আস (ঘ)।

(৯) 'যদি বীরঃ পুত্রো মে জায়তে[১], তর্হি তেনৈব পুরুষপশুনা ত্বাং যজে যজামি' ইতি ভাষয়া। তথেত্যুক্তবতা বরুণেন নিমিত্তেনাস্য রোহিতো নাম পুত্রো জাতঃ ॥ (১০) জাতে পুত্রে, স বরুণঃ ; 'জাতঃ সুতঃ, মামনেন যজস্ব' ইত্যব্রবীৎ, যদা পশুর্নির্দ্দশো নির্গতদশদিবসঃ স্যাৎ, ইত্যত্র স রাজা অব্রবীদিত্যনুষঙ্গঃ ॥ (১৪) রাজন্! হে বরুণ! রাজন্যঃ পশুর্যদা সান্নাহিকঃ কবচবন্ধনার্হঃ সংগ্রামে সমর্থঃ, অথ তদা শুচিঃ ॥ (১৫) ইত্যেবং তং তং কালং বঞ্চয়তা রাজ্ঞোক্তঃ প্রার্থিতো দেবো বরুণস্তং তং কালং প্রত্যৈক্ষতেত্যর্থঃ ॥ (১৬) চিকীর্ষিতমাত্মনা পশুনা বরুণযজনম্ ॥

১৭। ততশ্চ কুপিতেন বরুণেন গ্রস্তম্, অতএব জাতং মহদুদরং যস্য তং পিতরং শ্রুত্বা ॥

১৮। সমাম্—বৎসরম্ ॥

১৯। দ্বিতীয়ে তৃতীয়ে চ বর্ষে বৃত্রহা অভ্যেত্যাভ্যেত্য তথৈব তং প্রতিষেধন্ কিঞ্চিৎ কিঞ্চিদাহ ॥

২১। বরুণেন মুক্তমুদরং যস্য সঃ ; মহৎসু কথা যস্য সঃ ॥

২২। আত্মবান্ জমদগ্নিরধ্বর্য্যুরভূৎ ; অয়াস্যো মুনিঃ সামগ উদ্গাতা-ভূদিত্যর্থঃ ॥

২৩। উপরিষ্টাদ্ বিশ্বামিত্রসুতাখ্যানপ্রসঙ্গেন ॥

২৪। অবিহতাং গতিং জ্ঞানম্ ॥

২৫—২৬। তামেব গতিমাহ সার্দ্ধাভ্যাম্। (২৫) মনঃ পৃথিব্যাং ধারয়ন্ জ্ঞানকলাং ধ্যাত্বা তয়াজ্ঞানং বিনির্দ্দহন্ তাঞ্চ হিত্বা মুক্ত্বা মুক্তবন্ধন-স্তুস্থাবিত্যন্বয়ঃ। মনোমূলো হি সংসারঃ, মনশ্চান্নময়ম্—'অন্নময়ং হি সৌম্য মনঃ' ইতি শ্রুতেঃ ; অতোঽন্নশব্দবাচ্যায়াং পৃথিব্যাং মনো ধারয়ন্নেকীকুর্ব্বন্, তাং পৃথিবীমদ্ভিরেকীকুর্ব্বন্, অপস্তেজসা, তত্তেজোঽনিলেন, তঞ্চ খে

১। জায়েত (ঘ)।

আকাশে, তচ্চ ভূতাদাবহঙ্কারে, তঞ্চ ভূতাদিমহঙ্কারং মহাত্মনি মহত্তত্ত্বে॥ (২৬) তস্মিন্ বিষয়াকারং ব্যাবর্ত্ত্য জ্ঞানকলাং জ্ঞানাংশমাত্মত্বেন ধ্যাত্বা, তয়া ধ্যানবৃত্তিরূপয়াত্মাবরকমজ্ঞানং বিনির্দ্দহন্ নির্ব্বাণসুখসংবিদা তাঞ্চ হিত্বা মুক্তবন্ধনঃ সন্, অনির্দ্দেশ্যেনাপ্রতর্ক্যেণ স্বেন ভাবেন স্বস্বরূপেণ তস্থৌ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
সপ্তমোঽধ্যায়ঃ॥ ৭॥

অষ্টমোঽধ্যায়ঃ

অষ্টমে রোহিতস্যোক্তো বংশো যত্রাভবন্নৃপঃ।
সগরঃ কপিলাক্ষেপান্নির্দ্দগ্ধা যস্য সূনবঃ॥ (১)

১। 'চম্পস্তস্মাদভূদ্যেন চম্পা পুরী বিনির্ম্মিতা'; অতশ্চম্পাৎ সুদেবঃ॥

২। হৃতা ভূর্যস্য॥

৩। ঔর্ব্বেণ ঋষিণা, আত্মানং দেহম্, প্রজাবন্তং সগর্ভম্॥

৪। গরো বিষম্, তেনৈব গরেণ সহ জাতঃ॥

৫। গুরুবাক্যেনৌর্ব্ববচনেন কাংশ্চিদহত্বৈব বিকৃতবেশিনশ্চক্রে॥

৬। তদেবাহ—মুণ্ডানিতি, মুক্তকেশানর্দ্ধমুণ্ডিতাংশ্চ॥

৭। ঔর্ব্বোপদিষ্টো যো যোগ উপায়স্তেন॥

৮—১৩। তস্য দ্বে ভার্য্যে—সুমতিঃ কেশিনী চ; তত্র সুমত্যাঃ পুত্রাণাং প্রভাবং মৃত্যুঞ্চাহ—(৮) সুমত্যা ইতি ষড়্ভিঃ। (৯—১০) 'এষ বাজি-হরঃ' ইতি ব্রুবন্তোঽভিযযুঃ। ষষ্টিসহস্রাণি পরিচ্ছেদকতয়া সন্তি যেষাম্। উন্মিমেষ—লোচনোন্মীলনঞ্চকার॥ (১২) কেচিত্তু কপিলস্য কোপাগ্নিনা

দগ্ধা ইতি বর্ণয়ন্তি, তন্নিরাকরোতি—নেতি। কুতঃ? ইত্যত আহ—সত্ত্বধামনি শুদ্ধসত্ত্বমূর্ত্তৌ; জগতঃ পবিত্রঃ শুদ্ধিকর আত্মা যস্য তস্মিন্, কথং বিভাব্যতে সম্ভাব্যতে? অসম্ভাবনায়াং দৃষ্টান্তঃ—ভুবো রজঃ খে কথং সম্ভাব্যত ইতি॥ (১৩) কিঞ্চ, যস্য যেনেরিতা প্রবর্ত্তিতা, তস্য বিপশ্চিতঃ সর্ব্বজ্ঞস্য কথং পৃথঙ্‌মতিররিমিত্রাদিভেদদৃষ্টিঃ?॥

১৪। তদেবং সুমত্যাঃ পুত্রেষু মৃতেষু কেশিন্যাঃ পৌত্রেণাশ্বঃ সমানীতঃ; পিতৃব্যোদ্ধরণপ্রযত্নশ্চ কৃত ইতি দর্শয়িতুমাহ—যোঽসমঞ্জস ইত্যুক্তঃ কেবলমজ্ঞৈঃ; বস্তুতস্তু সমঞ্জস এব; স তু কেশিন্যাঃ সুতঃ। ক্ষেত্রজত্বমিব প্রতীতং বারয়তি—তস্যৈব নৃপস্যাত্মনো দেহাজ্জাতঃ॥

১৫—১৮। তস্য কথামাহ চতুর্ভিঃ শ্লোকৈঃ। (১৫—১৬) অসমঞ্জসঃ পুরা পূর্ব্বজন্মনি যোগী সন্, সঙ্গাদ্ধেতোর্যোগাদ্বিচালিতঃ, অত ইদানীং জাতিস্মরঃ সন্ সঙ্গপরিহারায় জনমুদ্বেজয়ন্, লোকে গর্হিতং জ্ঞাতীনাঞ্চ বিপ্রিয়ং কর্ম্মাচরন্ ক্রীড়তো বালান্ সরয্বাং প্রাস্যৎ প্রাক্ষিপদিতি দ্বয়োরন্বয়ঃ॥ (১৭) এবম্বিধং বৃত্তং কর্ম্ম যস্য সঃ॥

১৯। পিতৃব্যখাতমনু যঃ পন্থাস্তং যযৌ। ভস্মান্তি—ভস্মসমীপে॥

অজানন্তোঽবজানন্তোঽপ্যনুকম্প্যা বয়স্ত্বিতি।
তুষ্টাব ষড়্‌ভিরীশানমংশুমানেবমাশয়ঃ॥ (২)

২১—২৬। অজনোঽজো ব্রহ্মাপি ত্বামদ্যাপি ন পশ্যতি, ন চ বুধ্যতে। কথম্ভূতম্? আত্মনঃ স্বস্মাৎ পরং পরমেশ্বরম্। কৈর্হেতুভিঃ? সমাধি-যুক্তিভিঃ। সমাধিনাপ্যপরোক্ষং ন পশ্যতি, যুক্তিভিঃ পরোক্ষমপি সম্যঙ্‌ন বুধ্যত ইত্যর্থঃ। অপরেঽর্ব্বাচীনাস্তু কুতস্ত্বাং পশ্যেয়ুঃ? অর্ব্বাচীনত্বে হেতুঃ—তস্য ব্রহ্মণো মনশ্চ শরীরঞ্চ ধীশ্চ সত্ত্বতমোরজঃ-কার্য্যাণি, তাভির্বিবিধা যে দেবতির্য্যঙ্‌নরাণাং সর্গাস্তেষু সৃষ্টাঃ, তত্রাপি বয়-মপ্রকাশা অজ্ঞাঃ কুতঃ পশ্যাম ইত্যর্থঃ॥ (২২) অপরে তর্হি কিং

পশ্যন্তি ? তদেবাহ—যে দেহভাজস্তে স্বস্মিন্ সম্যক্ স্থিতমপি ত্বাং ন বিদুঃ, কিন্তু গুণানেব বিপশ্যন্তি ; অথবা ন গুণান্, অপি তু তম এব পশ্যন্তি। যতস্ত্রিগুণা বুদ্ধিরেব প্রধানং যেষাম্, অতো বহিরেব প্রকাশো জ্ঞানং যেষাম্। বুদ্ধিপরতন্ত্রতয়া জাগ্রৎস্বপ্নয়োর্ব্বিষয়ান্ পশ্যন্তি, সুষুপ্তৌ তু তম এব কেবলম, ন তু নির্গুণং ত্বাম্। সর্ব্বত্র হেতুঃ—যদ্‌যতো যস্য তব মায়য়েতি বা মোহিতং চেতো যেষাং তে ॥ (২৩) তথাপি ত্বং বিচারেণ জ্ঞাস্যসীতি চেৎ[১], তত্রাহ—তং ত্বামহং বিমূঢ়ঃ কথং পরিভাবয়ামি বিচারয়ামি ? কথম্ভূতম্ ? জ্ঞানঘনস্বভাবং শুদ্ধজ্ঞানমূর্ত্তিম্। স্বত এব[২] প্রধ্বস্তৌ মায়াগুণনিমিত্তৌ ভেদমোহৌ যেষাম্, তৈর্ব্বিভাব্যং বিচিন্ত্যম্। অয়ং ভাবঃ—জ্ঞানঘনত্বান্ন তাবৎ জ্ঞানবিষয়ত্বম্ ; বিচারবিষয়ত্বেঽপি মায়াগুণৈরভিভূতোঽহং ন বিচারে সমর্থ ইতি ॥ (২৪) তস্মাৎ হে প্রশান্ত ! ত্বাং পুরাণং পুরুষং কেবলং নমামেত্যন্বয়ঃ। পুরাণপুরুষত্বে হেতুঃ—মায়য়া গুণাঃ কর্ম্মাণি চ বিশ্বসৃষ্ট্যাদীনি লিঙ্গানি চ ব্রহ্মাদি-রূপাণি যস্য, তম্। প্রশান্তত্বে হেতুঃ—সদসদ্ভ্যাং কার্য্যকারণাভ্যাং পুণ্যপাপাভ্যাং বা বিমুক্তম্। অতোঽনামরূপং তৎকৃতনামরূপশূন্যম্, কিন্তু জ্ঞানোপদেশায় গৃহীতঃ প্রকটিতো দেহঃ শুদ্ধসত্ত্বমূর্ত্তির্যেন, তম্ ; যদ্বা, হে প্রশান্তমায়েতি, হে অগুণেতি চ সম্বোধ্য কর্ম্মভিঃ সৃষ্ট্যাদিকার্য্যৈর্লিঙ্গানি যস্যেতি যোজ্যম্ ; যদ্বা, প্রশান্তা মায়াগুণাদয়ো যস্মিন্, ইত্যেকমেব পদম্ ॥ (২৫—২৬) স্বভাগ্যং শ্লাঘতে—ত্বন্মায়েতি দ্বাভ্যাম্। (২৫) কামাদিভির্ব্বিভ্রান্তানি চেতাংসি যেষাম্, ত ইমে সর্ব্বে গৃহাদিষু ভ্রমন্তি ॥ (২৬) হে সর্ব্বভূতাত্মন্ ! নোঽস্মাকন্তু ত্বৎকৃপয়ৈব ঘটিতাত্ত্বদ্দর্শনাদস্য দৃঢ়োঽপি মোহময়ঃ পাশশ্ছিন্নঃ। কথম্ভূতঃ ? কামাদীনামাশয় আশ্রয়ঃ ; ত্বৎপ্রসাদেন কৃতার্থোঽস্মীত্যর্থঃ ॥

১। তথাপ্যহং বিচারেণ জ্ঞাস্যামীতি চেৎ (ঘ) ; ২। অতএব (গ)।

২৮। অশ্বং লব্ধ্বাপি সাকাঙ্ক্ষং প্রত্যাহ—ইমে চেতি ॥

২৯। তং পরিক্রম্যেতি শুকোক্তিঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

অষ্টমোঽধ্যায়ঃ ॥ ৮ ॥

নবমোঽধ্যায়ঃ

নবমেঽংশুমতো বংশঃ খট্বাঙ্গাবধি বর্ণ্যতে।

গঙ্গাং ভূতলমানিন্যে যস্য পৌত্রো ভগীরথঃ ॥ (১)

১। যথা সগরঃ পৌত্রায় রাজ্যং দত্ত্বা তপস্তেপে, তথাঽংশুমাংশ্চ স্বপুত্রায় রাজ্যং দত্ত্বা মহান্তং কালং তপস্তেপ ইতি চকারস্যার্থঃ। না-শক্নোদ্গঙ্গামানেতুমিতি শেষঃ। সংস্থিতঃ—মৃতঃ ॥

২। কালং মৃত্যুমেয়িবান্ প্রাপ্তঃ ॥

৩। তং প্রত্যাত্মানং দর্শয়ামাস। তে বরদাস্মীতি গঙ্গয়োক্তঃ সন্, স্ব-মভিপ্রায়ং পূর্ব্বজোদ্ধরণং শশংস কথয়ামাস ॥

৪। আহ গঙ্গা—কোঽপি গগনাৎ পতন্ত্যা মে বেগং ধারয়িতা ধারয়িষ্যতি ॥

৫। কিঞ্চ, আমৃজন্তি ক্ষালয়িষ্যন্তি। তত্রোপায়ো বিচিন্ত্যতাম্ ॥

৬। অঘং হরন্তি হরিষ্যন্তি ; অঘং ভিনত্তীত্যঘভিৎ ॥

৭। আত্মা কথম্ভূতঃ ? যস্মিন্নিদং বিশ্বমোতং গ্রথিতমূর্দ্ধতন্তুষু শাটীব পট ইব, প্রোতঞ্চ তির্য্যকৃতন্তুষু পট ইব। অসৌ সর্ব্বাধারস্তদ্বেগং ধারয়িষ্যতীত্যর্থঃ ॥

৮। ইত্যেবং গঙ্গামুক্ত্বা। তচ্ছ্রুত্বেতি পাঠে শ্রাবয়িত্বেত্যর্থঃ ॥

৯। রাজ্ঞাভিহিতং তথেত্যঙ্গীকৃত্য হরেঃ পাদেন পূতং জলং যস্যাঃ ॥

১২—১৫। প্রসঙ্গাদ্গঙ্গামাহাত্ম্যমাহ চতুর্ভিঃ। (১২) যদ্‌যস্যা জল-স্পর্শমাত্রেণ, তচ্চ কেবলং দেহভস্মভিরেব, ন সাক্ষাৎ; ব্রহ্মণি স্বকৃতেন দণ্ডেন হতা অপি। তাং শ্রদ্ধয়া যে সেবন্ত ইতি শেষঃ ॥ (১৩) এতৎ প্রপঞ্চয়তি—ভস্মীভূতেনাঙ্গেন যঃ সঙ্গস্তেন ॥ (১৫) অনন্তস্য বিশেষণং সন্নিবেশ্যেতি। ত্রৈগুণ্যং দেহসম্বন্ধম্ ॥

১৭। নলস্য সখা অয়াৎ প্রাপ্তঃ। তৎসুতস্তস্য ঋতুপর্ণস্য সুতঃ ॥

১৮। তৎপুত্রঃ সৌদাসঃ ॥

১৯। ন রহো ন রহস্যম্ ॥

২০। মৃগয়াং চরন্ কিঞ্চিদ্রক্ষো রাক্ষসং জঘান, তস্য ভ্রাতরং মুমোচ; স ভ্রাতা পলায্য গতঃ ॥

২১। অঘম্—অনিষ্টম্; সূদঃ পাচকস্তদ্রূপধরঃ সন্ রাজ্ঞো গৃহে বর্ত্তমানঃ ॥

২২। অভক্ষ্যমঞ্জসা বিলোক্য। এবং নরমাংসব্যবহারেণ ॥

২৩। বশিষ্ঠ এব তং শাপং দত্ত্বা দ্বাদশবার্ষিকং চক্রে ॥

২৪। রুশতীস্তীক্ষ্ণা অপঃ স্বপাদয়োর্জ্জহৌ, নান্যত্র। তত্র হেতুঃ—দিশ ইতি। এবমনেন মিত্রসহত্বমপি দর্শিতম্, মিত্রস্য কলত্রস্য বাচঃ সহনাৎ[১] ॥

২৫। তদেবং রাক্ষসত্বে কল্মাষাঙ্ঘ্রিত্বে চ কারণমুক্ত্বা 'স্বকর্ম্মণানপত্যঃ' ইতি যদুক্তম্, তৎ প্রপঞ্চয়তি—'ব্যবায়কালে' ইত্যাদিনা 'কর্ম্মণাপ্রজাঃ' ইত্যন্তেন। বনমোকো নিবাসো যয়োস্তৌ বনৌকসৌ চ, তৌ দম্পতী চ। বনৌকাবিতি পৃথক্‌পদত্বে স-কারলোপ আর্ষঃ ॥

২৬। অকৃতার্থবৎ—দীনবৎ ॥

১। বাচঃ সহতে (গ)

২৭। অকৃতার্থম্—অসমাপ্তরতিম্ ॥

২৯। সর্ব্বভূতানামাত্মেতি ভাবনয়ারাধয়িতুমিচ্ছুঃ ; যদ্বা, সর্ব্বভূতাত্ম-ভাবেন ভূতেষু স্থিতমপি গুণৈরন্তর্হিতং ব্রহ্মেতি সম্বন্ধঃ। অন্তর্হিত ইতি পাঠে অন্তর্হিতঃ সোঽয়মিত্যুত্তরেণান্বয়ঃ ॥

৩২। ভ্রূণস্য শ্রোত্রিয়স্য গর্ভস্য সত ইতি বা। বভ্রোর্গোঃ, সতাং মতো ভবান্, বধং কথং সাধু মন্যত ইত্যর্থঃ ॥

৩৩। ক্ষণমপি যেন বিনা ন জীবিষ্যামি, সোঽয়ং যদি ভক্ষ্যঃ ক্রিয়তে, তর্হি মৃতকং যথা, মৃতপ্রায়াং মাং পূর্ব্বং ভক্ষয় ॥

৩৫। দিধিষুম্—গর্ভাধানকর্ত্তারম্ ॥

৩৬। আধানাৎ—মৈথুনাৎ। হে অকৃতপ্রজ্ঞ ! মৃত্যুর্ময়া দর্শিতঃ ॥

৩৯। তদেবং কর্ম্মণাঽপ্রজাঃ ॥

৪০। অবিভ্রদ্দধারেত্যর্থঃ। ন ব্যজায়ত, ন প্রাসূত ; অতো বশিষ্ঠ এব তস্যা উদরমশ্মনা জঘান। স উৎপন্নঃ সুতোঽশ্মকঃ ॥

৪১। স্ত্রীভিঃ সংবেষ্ট্য পরশুরামাৎ পরিরক্ষিতঃ, অতো নারীকবচ ইত্যুক্তঃ। নিঃক্ষত্রে সতি ক্ষত্রবংশস্য মূলমভবদতো মূলক ইতি চোক্তঃ ॥

৪৩। প্রসন্নৈর্দেবৈর্ব্বরং বৃণুষ্বেত্যুক্তে খট্বাঙ্গেনোক্তম্ ‘প্রথমং তাব-ন্মমায়ুঃ কথ্যতাম্’ ইতি, দেবৈশ্চোক্তম্ ‘মুহূর্ত্তমাত্রম্’ ইতি। তজ্জ্ঞাত্বা দেবৈর্দ্দত্তেন বিমানেন শীঘ্রং স্বপুরমেত্য মনঃ পরমেশ্বরে সন্দধে ॥

৪৪—৫০। এতদেব সাধু[১]বৃত্তানুস্মরণপূর্ব্বকং তৎকৃতেন নিশ্চয়েন দর্শয়তি—নেতি সপ্তভিঃ। (৪৪) কুলদেবাদ্ ব্রহ্মকুলাৎ সকাশাৎ, মে প্রাণাদয়ো নাতিবল্লভাঃ, নাতিপ্রিয়াঃ ॥ (৪৫) মহ্যং মম ॥ (৪৬) ভূত-ভাবনো হরিস্তস্মিন্নেব ভাবনা যস্য, সোঽহং তং কামং ন বৃণে ॥ (৪৭) তত্র হেতুঃ —য ইতি। বিক্ষিপ্তানীন্দ্রিয়াণি ধীশ্চ যেষাম্, তে দেবা অপি ॥

১। স্বসাধু- (ক্বচিৎ পাঠঃ)।

(৪৮) অথ তস্মাৎ প্রকৃত্যা স্বভাবেনাত্মনি রূঢ়ং গুণেষু সঙ্গং বিশ্বকর্ত্তৃ ভাবেন হিত্বা তমেবাহং প্রপদ্যে ॥ (৪৯) অন্যভাবং দেহাদ্যভিমানরূপমজ্ঞানং হিত্বা ॥ (৫০) স্বং ভাবমেবাহ—যত্তদিতি। শূন্যবৎ কল্পিতং বাগাদ্য-বিষয়ত্বাদ্ বাসুদেব ইতি যং গৃণন্তি, ব্রহ্মণ এব ভক্তানুগ্রহার্থমাবিষ্কৃত-শক্তে[১]র্ব্বাসুদেবত্বাৎ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
নবমোঽধ্যায়ঃ ॥ ৯ ॥

দশমোঽধ্যায়ঃ

দশমে প্রাহ খট্বাঙ্গবংশে শ্রীরামসম্ভবম্।
তচ্চরিত্রঞ্চ লঙ্কেশং হত্বাযোধ্যাগমাবধি ॥ (১)

১। খট্বাঙ্গাচ্চ দীর্ঘবাহুঃ ॥

৩। ঋষিভির্ব্বাল্মীকিমুখৈর্ভূরি বর্ণিতম্, ত্বয়া মুহুঃ শ্রুতম্, তথাপি সংক্ষেপতঃ কথ্যমানং শৃণু ॥

গ্রন্থকোটিভিরাকীর্ণমদ্ভুতং রামবিক্রমম্।
অধ্যায়দ্বয়তো বক্ষ্যন্নেকশ্লোকে সমস্ততি ॥ (২)

৪। স কোশলেন্দ্রঃ শ্রীরামঃ, নোঽস্মানবতাৎ পাতু। কথম্ভূতঃ? যো গুর্ব্বর্থে পিতুঃ সত্যপালনার্থং ত্যক্তরাজ্যঃ সন্ পদ্মবদতিসুকুমারাভ্যাং পদ্ভ্যাম্, তদেবাহ—প্রিয়ায়াঃ পাণিনাপি স্পর্শে নাস্তি ক্ষমা যয়োস্তাভ্যাং প্রতিবনং ব্যচরৎ। হরীন্দ্রো হনূমান্ সুগ্রীবো বা, অনুজো লক্ষ্মণঃ, তাভ্যাং মৃজিতাঽপনীতা পথরুজা মার্গশ্রমো যস্য। সূর্পণখ্যা বৈরূপ্যাৎ কর্ণ-নাসিকাচ্ছেদাদ্ধেতোস্তয়া প্রলোভিতেন রাবণেনাপহারাৎ প্রিয়েণ কলত্রেণ

১। আবিষ্কৃততনোঃ (ঘ)।

যো বিরহস্তেন যা রুট্, তয়ারোপিতয়োর্ভ্রুবোর্বিজৃম্ভেণৈব ত্রস্তোঽব্ধি-র্যস্মাৎ। ততস্তদ্বিজ্ঞাপনেন বদ্ধঃ সেতুর্যেন। খলা রাবণাদয় এব দবো বনম্, তস্য দহনঃ॥

৫। সংক্ষেপতো বর্ণিতং শ্রীরামচরিতমাদিত আরভ্য বিস্তরেণাহ—'বিশ্বামিত্রাধ্বরে' ইত্যাদিনা যাবদুত্তরাধ্যায়সমাপ্তি। পশ্যত এব লক্ষ্মণস্য তমপানপেক্ষ্যৈব হতা ইত্যর্থঃ। যচ্ছব্দানাং স কোশলেন্দ্রোঽবতাদিত্যনে-নৈবান্বয়ঃ॥

৬। লোকে যে বীরাস্তেষাং সমিতৌ সমাজ ঐশং ত্রৈয়ম্বকং ধনুরিক্ষু-যষ্টিমিব লীলয়ৈবাদায়, সজ্যীকৃতমারোপিতং বিকৃষ্য মধ্যে বভঞ্জ। হে নৃপ! উগ্রং কঠিনং গরিষ্ঠম্। তদাহ—বাহকানাং ত্রিভিঃ শতৈরুপনীতম্, বালগজস্য লীলেব লীলা যস্য সঃ॥

৭। অনুরূপাণি স্বযোগ্যানি গুণশীলাদীনি যস্যাস্তাং সীতাসংজ্ঞাম্, পূর্ব্বমুরস্যভিলব্ধো মানো যয়া, তাং শ্রিয়ং জিত্বা ধনুর্ভঙ্গমহানাদশ্রবণক্ষুভিতস্য ভৃগুপতের্দ্দর্পং ব্যনয়দপনীতবান্। কথম্ভূতস্য? ত্রিঃসপ্তকৃত্বো রাজবীজ-শূন্যাং মহীং যোঽকরোৎ, তস্য॥

৮। ইদানীং 'গুর্ব্বর্থে' ইতি শ্লোকং বিবৃণ্বন্নাহ—য ইতি। কদাচিৎ কৈকেয্যাস্তুষ্টেন রাজ্ঞা 'ত্বদপেক্ষিতং দাস্যামি' ইতি প্রাতিশ্রুতম্। ততঃ শ্রীরামস্য যৌবরাজ্যাভিষেকসময়ে তয়া ভরতস্য যৌবরাজ্যং শ্রীরামস্য চ বনে বাসঃ প্রার্থিতঃ। তদা সত্যপাশেন পরিবীতস্য পিতুর্নিদেশমাজ্ঞাং শিরসা জগৃহে। ততো রাজ্যাদিকং ত্যক্ত্বা সভার্য্যো বনং যযৌ। দুস্ত্যজস্যাপি সহর্ষত্যাগে দৃষ্টান্তঃ—মুক্তসঙ্গো যোগী, অসূন্ প্রাণানিবেতি॥

৯। রক্ষসো রাবণস্য স্বসুঃ সূর্পণখায়া অশুদ্ধবুদ্ধেঃ, সীতাং জিঘৃক্ষোঃ কামাতুরায়া ইতি বা রূপং ব্যকৃত বিকারমনয়ৎ। তস্যাঃ খরত্রিশিরদূষণ-

মুখ্যা বন্ধবো যেষু তাংশ্চতুর্দ্দশসহস্রং জঘান। অপারণীয়মলঙ্ঘ্যমসহ্যং কোদণ্ডং পাণৌ যস্য সঃ॥

১০। সীতায়াঃ কথাশ্রবণেন দীপিতো হৃচ্ছয়ো যস্য, তেন সীতাং হরিষ্যতা স্বস্মাদ্ভীতেন, স্বস্যাশ্রমাদপকর্ষণার্থং সৃষ্টং নিসৃষ্টং মারীচং বিলোক্য জঘান। কথম্ভূতম্? অদ্ভুতৈণবপুষা স্বর্ণহরিণদেহেনোপলক্ষিতম্। অতএব প্রলোভনেন তেনাশ্রমতোঽপকৃষ্টঃ সন্, কং দক্ষং যথোগ্রঃ শ্রীরুদ্রঃ॥

১১। ততশ্চ রক্ষোঽধমেন রাবণেনাসমক্ষমপনীতায়াম্, প্রিয়য়া বিযুক্তো ভ্রাত্রা লক্ষ্মণেন সহ কৃপণবদ্বনে বিচচার। কিমভিপ্রায়ঃ সন্? ইত্যনেন প্রকারেণ স্ত্রীসঙ্গিনাং দুঃখোদর্কাং গতিং প্রখ্যাপয়ন্॥

১২। আত্মার্থেন কৃত্যেন কর্ম্মণা রাবণেন সহ যুদ্ধেন হতং কৃত্যং শাস্ত্রীয়ং দহনাদিকং যস্য, তং জটায়ুষং পুত্র ইব দগ্ধ্বা কবন্ধং স্বগ্রহণায় প্রসারিতবাহুং রাক্ষসমহন্। অথ বালিনি হতে তৈঃ কপিভির্দ্দয়িতায়া গতিং বুদ্ধা অজভবাভ্যামর্চ্চিতাবঙ্ঘ্রী যস্য, স মনুজো বেলাং সমুদ্রতীরমগাৎ॥

১৩। তত্র ত্রিরাত্রমুপবাসেন প্রতীক্ষিতোঽপি সিন্ধুর্যদা নোপস্থিতঃ, তদা যস্য রোষবিভ্রমেণ ক্রোধলীলয়া বিবৃত্তো যঃ কটাক্ষঃ, তস্য পাতেন সংভ্রান্তা নক্রা মকরাশ্চ যস্মিন্; ভয়েন গীর্ণো গ্রস্তঃ স্তম্ভিতো ঘোষো যেন, স সিন্ধুরেতদ্বক্ষ্যমাণং বভাষে। অর্হণমর্ঘ্যাদিকম্? রূপী মূর্ত্তিমান্॥

১৪—১৫। ভাষণমেবাহ—ন ত্বামিতি দ্বাভ্যাম্। (১৪) এতাবৎ-পর্য্যন্তং নু নিশ্চিতং ত্বাং ন বিদাম, ন জানীমেত্যর্থঃ। ইদানীন্তু জ্ঞাতোঽ-সীত্যাহ—যদিতি পৃথক্ পদং যস্যেত্যর্থঃ। যদ্বশেভ্যঃ সত্ত্বাদিভ্যঃ সুর-গণাদয়ো ভবন্তি, স ভবানিতি॥ (১৫) কামং যথেচ্ছং জলমাক্রম্যাপি প্রযাহি। অবমেহম্—পুরীষপ্রায়ম্। ত্রৈলোক্যং রাবয়ত্যাক্রন্দয়তীতি তথা, তং জহি। হে বীর! যদ্যপি তব জলং প্রতিবন্ধকং ন ভবতি,

তথাপীহ সেতুং বধ্নীহি। তর্হি কিমর্থম্? তে যশসো বিস্তারায়। তদেবাহ—যং সেতুমুপেত্য দুষ্করং কর্ম্মাবেক্ষ্য ত্বদ্‌যশো গাস্যন্তি ভূপাস্তম্॥

১৬। তদ্বাক্যমভিনন্দ্য যৎ কৃতম্, তদাহ— বদ্ধেতি। বিবিধৈরদ্রীণাং কূটৈঃ শৃঙ্গৈঃ সেতুং বদ্ধা, অগ্রে সীতান্বেষণে হনূমতৈব দগ্ধাং লঙ্কামাবিশৎ। কথম্ভূতৈঃ শৃঙ্গৈঃ? কপীন্দ্রাণাং করৈঃ কম্পিতানি ভূরুহাণামঙ্গানি শাখাদীনি যেষু তৈঃ। বিভীষণস্য দৃশা বুদ্ধ্যা। কৈঃ সহাবিশৎ? সুগ্রীবাদয়ঃ প্রমুখা যেষাং তৈরনীকৈঃ॥

১৭। ততঃ সা লঙ্কা ঘূর্ণা প্রচলিতা বভূব। কথম্ভূতা? বানরেন্দ্রাণাং বলৈ রুদ্ধা বিহারাদয়ো যস্যাং সা, নির্ভজ্যমানা ধিষণাদয়ো যস্যাং সা; তত্র বিহারঃ ক্রীড়াস্থানম্, কোষ্ঠং ধান্যাগারাদি, শ্রীঃ কোষঃ, দ্বারং গৃহাদীনাম্, গোপুরং পুরদ্বারম্, সদঃ সভা, বলভী প্রাসাদাদিপুরোভাগাচ্ছাদনী, বিটঙ্কঃ কপোতপালিকা, ধিষণং বেদিকাদি, শৃঙ্গাটকং চতুষ্পথম্॥

১৮। রক্ষঃপতিঃ —রাবণঃ, পুত্রমিন্দ্রজিতং প্রহস্তাদীংশ্চ সমহিনোৎ প্রাযুঙ্‌ক্ত॥

১৯। অসিশূলাদিভির্দুর্গমাং তাং যাতুধানানাং পৃতনাং সেনাম্, সুগ্রীবাদিভিরন্বিতঃ শ্রীরামোঽয়াৎ; মরুৎসুতো হনূমান্; ঋক্ষো জাম্ববান্॥

২০। তে রঘুপতেরনীকপা অঙ্গদাদ্যাঃ সর্ব্বে রাবণস্যেভাদিভির্যদ্বরূথং সৈন্যম্, তত্র দ্বন্দ্বং যথা ভবতি, তথাভিপত্য সঙ্গম্য দ্রুমাদিভির্জঘ্নুঃ। কান্? সীতায়া অভিমর্ষেণ হতং মঙ্গলং যস্য স রাবণ ঈশো যেষাং, তান্॥

২১। স্ববলস্য নষ্টিং নাশমবেক্ষ্য, রুষ্টঃ ক্রুদ্ধঃ সন্, যানকং পুষ্পকং বিমানং রথং বারুহ্য শ্রীরামমভিসসার। অথ তং স্বঃস্যন্দনে স্বর্গস্যেন্দ্রস্য রথে মাতলিনেন্দ্রসারথিনোপনীতে দ্যুমতি দীপ্তিযুক্তে বিভ্রাজমানমহনদহন্॥

২২। হে পুরুষাদপুরীষ! রাক্ষসেষু পুরীষপ্রায়! যদ্‌যস্মাদপহৃতা; শ্ববৎ —শ্বা যথাঽসমক্ষং গৃহং প্রবিশ্য কিমপি হরতি, তদ্বৎ। তস্মাজ্‌জুগুপ্সিতস্য

কর্ম্মণঃ কর্ত্তুস্তেঽস্ত কাল ইবালঙ্ঘ্যবীর্য্যোঽহং ফলং যচ্ছামি ; অধর্ম্মকর্ত্তুঃ পুংসঃ কালো যথা যচ্ছতীতি বা ॥

২৩। রিক্তঃ ক্ষীণপুণ্যঃ সুকৃতী বিমানাদিব, বিমানাৎ পুষ্পকান্ন্যপতদিতি বা ॥

২৪—২৮। রাক্ষসস্ত্রীণাং বিলাপমাহ—তত ইতি পঞ্চভিঃ। (২৪) মন্দং স্বল্পমুদরং যস্যাস্তয়া রাবণভার্য্যয়া সহ॥ (২৬) পরৈরর্দ্দিতা পীড়িতা॥ (২৮) গৃধ্রাণামন্নং ভক্ষ্যম্, নরকহেতবে নরকভোগায় ॥

২৯। সাম্পরায়িকমৌর্দ্ধ্বদেহিকম্ ॥

৩১। আত্মনো স্বস্য সন্দর্শনেন য আহ্লাদস্তেন বিকসন্মুখপঙ্কজং যস্যাস্তাম্ ॥

৩২। যানং পুষ্পকম্ ; ভ্রাতৃভ্যাং লক্ষ্মণসুগ্রীবাভ্যাম্, আয়ুশ্চ দত্ত্বা তেনাপি সহৈব যযৌ ॥

৩৪। গোমূত্রযাবকং গোমূত্রপক্বযবান্নভোজনম্, ভ্রাতরং ভরতম্ ॥

৩৫—৩৮। স্বশিবিরাদ্রামং বিনাঽযোধ্যামপ্রবিশন্ স্বস্য যন্নিবাসং নির্ম্মিতবান্, তস্মাৎ সকাশাৎ পৌরাদিভির্যুক্তো রামং প্রত্যুত্থতোঽভিমুখং যযৌ। (৩৬) ব্রহ্মঘোষেণ বৃহতা ঘোষেণ পঠদ্ভিঃ ॥ (৩৭) স্বর্ণরসাক্তাঃ কক্ষাঃ প্রান্তা যাসাং তাভিঃ পতাকাভিঃ। হৈমৈরিতি চত্বারি রথবিশেষণানি ॥ (৩৮) পারমেষ্ঠ্যানি রাজার্হাণি ছত্রচামরাদীনি। প্রেম্ণা বিক্লিন্নং হৃদয়মীক্ষণে চ নেত্রে যস্য ॥

৩৯। নেত্রজৈর্জলৈঃ স্নাপয়ন্নাশ্লিষ্য ॥

৪০। যেঽর্হসত্তমাঃ কুলবৃদ্ধাস্তেভ্যোঽপি নমশ্চক্রে ॥

৪২—৪৫। অযোধ্যাপ্রবেশপ্রকারমাহ—(৪২) পাদুকে ইতি সার্দ্ধেস্ত্রিভিঃ ॥ (৪৩) ধনুশ্চ নিষঙ্গৌ চ তান্, ঋক্ষরাড় জাম্ববান্ ॥ (৪৫) গুরুপত্নীঃ—কৈকেয্যাদ্যাঃ ॥

৪৬। বয়স্থানবরজাংশ্চ যথাবদনুক্রমেণ সমুপেয়তুঃ ॥

৪৭। বাষ্পৌঘৈরভিষিঞ্চন্ত্যঃ শুচঃ শোকান্ বিজহুঃ ; শেষং স্পষ্টম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
দশমোঽধ্যায়ঃ ॥ ১০ ॥

একাদশোঽধ্যায়ঃ

ততস্ত্বেকাদশেঽযোধ্যামাবসন্ননুজৈঃ সহ।
যজ্ঞাদি যচ্চকারেশো রামস্তদনুবর্ণ্যতে ॥ (১)

৩। তদন্তরা তাসাং দিশাং মধ্যে যাবতী ভূস্তাং ব্রাহ্মণ এবার্হতীতি মন্যমানঃ ॥

৪। অয়ং শ্রীরামঃ ; তত্তদা সৌমঙ্গল্যমাভরণাদিকং তাবন্মাত্রমবশেষিতং যস্যাঃ, তদ্ব্যতিরিক্তং হিরণ্যাদি সর্ব্বং দদাবিত্যর্থঃ ॥

৬। কিমপ্রত্তং কিমপ্রদত্তম্ ? সর্ব্বং দত্তমিত্যর্থঃ। বিশ্য—প্রবিশ্য ॥

৭। ন্যস্তদণ্ডৈর্মুনিভিরর্পিতৌ চিত্তে ন্যস্তাবঙ্ঘ্রী যস্য তস্মৈ ; তেষ্বর্পিতাবঙ্ঘ্রী যেনেতি বা ॥

১০। অসংবিদোঽজ্ঞাৎ, প্রাচেতসো বাল্মীকিস্তস্য আশ্রমং প্রাপ্তা ॥

১১। অন্তর্ব্বত্নী গর্ভিণী ; ক্রিয়া জাতকর্ম্মাদ্যাঃ ॥

১৬। ঈশ্বরোঽপি শুচো রোদ্ধুং নাশক্নোৎ ॥

১৭। ন চাতিচিত্রমেতদিত্যাহ—স্ত্রীপুংসয়োঃ প্রসঙ্গ আসক্তিস্ত্রাসমাবহতীতি তথা ; বিভক্তেরলুগার্ষঃ ; সর্ব্বত্র ত্রাসমাবহেদিতি পাঠস্তু সুগমঃ। কিমুতেতি প্রাসঙ্গিকোক্তিঃ ॥

১৮। অগ্নিহোত্রমজুহোৎ ; প্রভুঃ —রামঃ ॥

১৯। আত্মজ্যোতির্নিজং ধাম ॥

২০। জলধিবন্ধনম্, অস্ত্রপূগৈশ্চ রক্ষসাং বধ ইতীদং কবিভিরাশ্চর্য্যমিব বর্ণিতমপি যশস্তুতির্ন ভবতি। তত্র হেতুঃ —অধিকসাম্যাভ্যাং বিমুক্তং ধাম প্রভাবো যস্য তস্য কিং কপয়ঃ সহায়াঃ ? অতঃ সুগ্রীবাদ্যাশ্রয়ণং যথা লীলামাত্রং তথৈবেদমপি। যুক্তঞ্চৈতদিত্যাহ—সুরাণাং যাচ্ঞয়া আত্তা স্বীকৃতা লীলার্থা তনুর্যেন, তস্য ॥

২১। এবংবিধলীলাপ্রয়োজনং দর্শয়ন্ প্রণমতি। যস্য যশো নৃপাণাং যুধিষ্ঠিরাদীনাং সদঃসু ঋষয়ো মার্কণ্ডেয়াদয়ো গায়ন্তি। দিগিভেন্দ্রাণাং পট্টবদাবরণরূপং তৎপর্য্যন্তং ব্যাপ্তমিত্যর্থঃ। নাকপালা দেবাঃ, বসুপালাশ্চ বসুধাপালাস্তেষাং কিরীটৈর্জুষ্টং পাদাম্বুজং যস্য, তং রঘুপতিম্। জুষ্টং পাদাম্বুজং রঘুপতেরিতি পাঠে তত্তস্য রঘুপতের্নাকপালাদিভির্জুষ্টং পাদাম্বুজং প্রপদ্য ইত্যর্থঃ ॥

২২। স রামঃ সংবিষ্ট উপবেশিতোঽনুগতো বা যৈঃ, তে কোশল-বাসিনঃ সর্ব্বে যত্র যোগিনো গচ্ছন্তি, তৎ স্থানং যযুঃ ॥

২৩। আনৃশংস্যপর উপশমনিষ্ঠঃ সন্ বিমুচ্যতে ॥

২৪। স রামঃ স্বয়ং কথমবর্ত্তত ? ভ্রাতৄন্ প্রতি বা কথমবর্ত্তত ? কথম্ভূতান্ ? আত্মন আত্মাংশভূতান্। তস্মিন্ বা ঈশ্বরে তে ভ্রাত্রাদয়োঽনু অনন্তরং কথমবর্ত্তন্তেতি প্রশ্নত্রয়ম্ ॥

২৫। তত্র শ্রীরামস্য ভ্রাত্রাদিষু বৃত্তিপ্রকারমাহ—অথেতি। অনেনৈব ভ্রাতৄণামপি তদাজ্ঞানুসারিতয়া বৃত্তিরুক্তা। অথ সিংহাসনস্বীকারানন্তরম্ ॥

২৬—২৮। পুরীং বর্ণয়তি ত্রিভিঃ। (২৬) গন্ধোদকৈর্ম্মদবিন্দুভিশ্চা-সিক্তা মার্গা যস্যাম্, সুতরাং মত্তামিব সমৃদ্ধাম্। বেতি বিতর্কে। বাসিত-গামিতি পাঠে বাসিতাং কামোন্মত্তাং গামিবেত্যর্থঃ ॥

২৯। পৌরাণাং তস্মিন্ বৃত্তিমাহ—তমুপেয়ুরিতি। বরাহরূপেণ ত্বয়োদ্ধৃতামিমাং পৃথ্বীং পাহীতি ॥

৩০। প্রজানাং তস্মিন্ বৃত্তিমাহ—ততঃ প্রজা ইতি ॥

৩১—৩৬। স্বয়ং কথমবর্ত্ততেত্যস্যোত্তরমাহ—অথেতি যাবৎসমাপ্তি। স্বগৃহং প্রবিষ্টঃ সন্, তস্মিন্ রেম ইতি পঞ্চমেনান্বয়ঃ। (৩১—৩৪) গৃহং বর্ণয়তি সার্দ্ধৈস্ত্রিভিঃ। (৩১) অনন্তা যেঽখিলানাং রত্নাদীনাং কোষাস্তৈরাঢ্যম্; অনর্ঘা উরবঃ পরিচ্ছদা যস্মিন্ ॥ (৩২) বিদ্রুমময়া উড়ুম্বরা দেহল্যো যেষু, তৈর্দ্বারৈঃ; স্বচ্ছৈঃ স্থলৈঃ; তৃতীয়ান্তানাং মণ্ডিতমিতি তৃতীয়েনান্বয়ঃ ॥ (৩৩) বাসসাং মণিগণানাঞ্চাংশুকৈর্দীপ্তিভিঃ; চিৎ চৈতন্যং তদ্বদুল্লাসৈরুজ্জ্বলৈঃ, যদ্বা, চিদিতি ক্বচিৎ ক্বচিদ্বৈদুর্য্যস্তম্ভাদিষু যথাশোভমুজ্জ্বলৈর্মুক্তাফলৈর্মণ্ডিতমিত্যর্থঃ। কান্তাঃ কমনীয়াঃ, কামোপপত্তয়ো ভোগসাধনানি, তাভিঃ ॥ (৩৪) ভূষণানাং ভূষণভূতৈঃ ॥ (৩৬) নৃণাং মধ্যে; যদ্বা, নৃভিরভিধ্যাতমঙ্ঘ্রিপল্লবং যস্যেতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
একাদশোঽধ্যায়ঃ ॥ ১১ ॥

দ্বাদশোঽধ্যায়ঃ

দ্বাদশে রামপুত্রস্য কুশস্যান্বয় উচ্যতে।
এবমিক্ষ্বাকুপুত্রস্য শশাদস্যেরিতোঽন্বয়ঃ ॥ (১)

১। কুশস্য শ্রীরামপুত্রস্যাতিথিশ্চ সুতোঽভবৎ ॥

২। অর্কসম্ভবঃ—অর্কস্যাংশাৎ সম্ভূতঃ ॥

৩। ততো বিধৃতের্হিরণ্যনাভঃ। কথম্ভূতঃ ? জৈমিনেঃ শিষ্যো যোগাচার্য্যঃ ॥

৪। তদাহ—যতঃ সকাশাৎ কৌশল্যো যাজ্ঞবল্ক্য ঋষিরাধ্যাত্মং যোগ-মধ্যগাৎ। মহান্ত উদয়াঃ সিদ্ধয়ো যস্মিংস্তম্, হৃদয়গ্রন্থের্ভেদকঞ্চ ॥

৬। মরুং বিশিনষ্টি—যোঽসাবিতি। পুনর্ভাবয়িতা—ভাবয়িষ্যতি ॥

৮। তে পিত্রাঽভিমন্যুনা ॥

১২। ততস্তস্মাদমিত্রজিৎ ॥

১৫। নিষ্ঠা বংশস্য স্থিতিস্তস্যা অন্তঃ ॥

১৬। তদেবাহ—ইক্ষ্বাকূণামিতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

দ্বাদশোঽধ্যায়ঃ ॥ ১২ ॥

ত্রয়োদশোঽধ্যায়ঃ

ইক্ষ্বাকোরেব পুত্রস্য নিমের্ব্বংশস্ত্রয়োদশে।

বর্ণ্যতে জজ্ঞিরে যত্র ব্রহ্মজ্ঞা জনকাদয়ঃ ॥ (১)

১—১১। নিমেরৌরসঃ পুত্রো নাভূদিতি দর্শয়ন্ কথামাহ—নিমিরিত্যেকাদশভিঃ। (১) সত্রমারভ্য বশিষ্ঠমৃত্বিজমর্ত্তে বব্রে॥ (২) তং শক্রমখং নির্ব্বর্ত্ত্য; প্রতিপালয় প্রতীক্ষস্বেতি; গৃহপতির্নিমিঃ ॥ (৩) ইদং জীবিতং চলমস্থিরং বিদ্বান্ ॥ (৪) তমিন্দ্রস্য মখং নির্ব্বর্ত্ত্যাগতো গুরুঃ শিষ্যস্য ব্যতিক্রমমন্যায়ং বীক্ষ্য 'নিমের্দেহঃ পততু' ইত্যশপৎ ॥ (৬) উর্ব্বশীদর্শনাৎ স্কন্নং রেতস্তাভ্যাং কুম্ভে নিষিক্তম্, তস্মাৎ প্রপিতামহো বশিষ্ঠো জজ্ঞে; তদাহ—মিত্রাবরুণয়োরিতি; তথা চ শ্রুতিঃ—'কুম্ভে রেতঃ সিষিচতুঃ সমানম্' ইতি ॥ (৮) যদি প্রসন্নাঃ প্রভবঃ সমর্থাশ্চ, তর্হি জীবত্বিত্যূচুঃ ॥ (৯) যস্য দেহস্য যোগং ন বাঞ্ছন্তি, অপি তু মোক্ষায়ৈব ভজন্তি ॥ (১১) নিমির্বিদেহ এব সন্মনুষ্যতাং বসতু, কামং যথেচ্ছম্। এবং

সতি যুষ্মাভিঃ প্রার্থিতং জীবিতমস্তু ভবিষ্যতি, ন চ দেহবন্ধ ইতি ভাবঃ। স চাধ্যাত্মসংস্থিতো লোচনয়োঃ স্থিতঃ সন্, উন্মেষণ-নিমেষাভ্যাং তৎপ্রবর্ত্তকত্বেন লক্ষিতোঽবর্ত্তত ইতি শেষঃ ॥

১২। তদেবং মৃতাদপি নিমের্দ্দেহাদ্ বংশপ্রবৃত্তিং দর্শয়তি—অরাজক-ভয়মিতি ॥

১৩। তস্যান্বর্থানি ত্রীণি নামান্যাহ—জন্মনাঽসাধারণেন জন এব জনকঃ; যদ্বা, স্বদেহদ্বারা জনকত্বাৎ স নিমির্জনকোঽভূদিত্যর্থঃ; মিথিলা যেন নির্ম্মিতেত্যনেন ব্যুৎপত্ত্যন্তরমর্থাদুক্তম্ ॥

১৫। সুধৃৎ সুধৃতিঃ, তস্য পিতা ॥

২১। তস্য কেশিধ্বজস্য, ভানুমান্ ॥

২৩। তত্তস্মাৎ সুপার্শ্বকঃ ॥

২৪। অগ্নিসম্ভবোঽগ্নেরংশাৎ সম্ভূতঃ ॥

২৫। যদ্যস্মাৎ সুভাষণঃ ॥

২৭। যোগেশ্বরা যাজ্ঞবল্ক্যাদয়স্তেষাং প্রসাদেন ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
ত্রয়োদশোঽধ্যায়ঃ ॥ ১৩ ॥

চতুর্দ্দশোঽধ্যায়ঃ

চতুর্দ্দশাদিভিঃ সোমবংশমাহা সমাপ্তিতঃ।
যস্মিন্নৈলাদয়ো ভূপাঃ কীর্ত্ত্যন্তে পুণ্যকীর্ত্তয়ঃ ॥ (১)

চতুর্দ্দশে গুরোঃ পত্ন্যাং তারায়াং সোমজাদ্বুধাৎ।
জাতশ্চৈলঃ ষড়ূর্ব্বশ্যামায়ুমুখ্যানজীজনৎ ॥ (২)

৩। দৃগ্‌ভ্য—আনন্দাশ্রুভ্যঃ, অতএবামৃতময়ঃ। কিলেত্যাশ্চর্য্যে। দৃশ ইতি পাঠে দৃশো নেত্রাৎ। বক্ষ্যমাণদর্পস্য কারণমাহ—বিপ্রেতি॥

৪—১৩। সোমস্য পুত্রো বুধ ইতি কথাদ্বারেণাহ—পত্নীমিতি সার্দ্ধৈর্নবভিঃ। (৫) তৎকৃতে—তন্নিমিত্তম্॥ (৬) সুরাণাং দানবানাঞ্চ বিগ্রহে কারণমাহ—শুক্র ইতি। অসুরৈঃ সহিত উড়ুপমগ্রহীদিত্যর্থঃ; সন্ধিরার্ষঃ। গুরোঃ সুতং বৃহস্পতিমগ্রহীৎ, অঙ্গিরসঃ সকাশাৎ প্রাপ্তবিদ্যো হর ইতি প্রসিদ্ধিঃ॥ (৮) নিবেদিতো বিজ্ঞাপিতঃ; বিশ্বকৃদ্‌ব্রহ্মা; অবৈদবুধ্যত॥ (৯) বৃহস্পতিরাহ—ত্যজ ত্যজেতি, পরৈরাহিতং গর্ভম্। গর্ভে ত্যক্তে ভস্মীকরিষ্যতীতি বিভ্যতীং প্রত্যাহ—নাহমিতি, সান্তানিকঃ সন্তানার্থী। সন্তানিকে ইতি পাঠে হে সৎপুত্রে[১] ইত্যর্থঃ॥ (১৩) রহ একান্তে॥

১৪। পুরূরবস উর্ব্বশ্যামায়ুপ্রমুখাঃ ষট্ পুত্রা জাতা ইতি বক্তুং কথামাহ—তস্যেত্যাদিনা যাবৎসমাপ্তি॥

১৭। নন্থ কুতো দেবী মনুষ্যান্তিকমুপাগচ্ছেত্তত্রাহ—মিত্রাবরুণয়োঃ শাপান্নরলোকতাং মনুষ্যভাবমাপন্না সতী।

১৯। নৌ আবয়ো রতিরস্ত্বিতি শেষঃ॥

২০। যস্য তবাঙ্গান্তরং বক্ষ আসাদ্য রিরংসয়া রন্তুমিচ্ছয়া হ স্ফুটং ন চ্যবতে, নাপযাতি; যদ্‌যস্মাদিতি বা॥

২১—২২। শাপাবসানে ভাষাভঙ্গমিষেণ জিগমিষোস্তস্যা ভাষাবন্ধমাহ—এতাবিতি দ্বাভ্যাম্। (২১) উরণকৌ মেষৌ ন্যাসৌ নিক্ষেপরূপৌ রক্ষস্ব। যঃ শ্লাঘ্যঃ, স এব স্ত্রীণাং বরঃ স্মৃতঃ; অতো বিজাতীয়ত্বং ন দোষ ইতি ভাবঃ॥ (২২) হে বীর! ঘৃতং মে ভক্ষ্যং স্যাৎ, 'অমৃতং বা আজ্যম্'

১। সপুত্রে (খ)।

ইতি শ্রুতেঃ, দেবানাঞ্চামৃতাশিত্বাৎ। মৈথুনাদন্যত্র বিবাসসং ত্বাং নেক্ষিষ্যে ইতি প্রতিপেদেঽঙ্গীকৃতবান্ ॥

২৩। তদেবাহ—অহো ইতি ॥

২৫। পদ্মকিঞ্জল্কস্য গন্ধ ইব গন্ধো যস্যাস্তস্যা মুখামোদেন মুষিতঃ প্রলোভিতঃ সন্ ॥

২৬। মহ্যম্—মম ॥

২৭। মহারাত্রে মধ্যরাত্রে, 'মহানিশা দ্বে ঘটিকে রাত্রের্মধ্যমযামযোঃ' ইতি স্মৃতেঃ ॥

২৮—২৯। জিগমিষোস্তস্যাঃ পরুষোক্তিমাহ—হতাস্মীতি সার্দ্ধেন। (২৮) নপুংসা—নপুংসকেন ॥ (২৯) যথা নারী তথা সন্ত্রস্তঃ শেতে ॥

৩১। বিদ্যুতো বিশিষ্টদ্যুতিমন্তঃ ; ব্যদ্যোতন্ত দীপ্তিমকুর্ব্বত ; যদ্বা, তদৈব তড়িতঃ প্রাকাশন্তেত্যর্থঃ। নগ্নমৈক্ষত, অতো ভাষাভঙ্গান্নিজর্গামেতি জ্ঞেয়ম্ ॥

৩৩। তস্যাঃ সখীশ্চ পঞ্চ বীক্ষ্য। সূক্তং শোভনবচনম্, 'অহো[1] জায়ে' ইত্যাদি ॥

৩৪—৩৫। তদেবার্থত আহ—অহো ইতি দ্বাভ্যাম্। (৩৪) অনির্বৃত্য মৎকৃতাং নির্বৃতিমপ্রাপ্য ; অনির্ব্বর্ত্ত্যেতি পাঠে মাং নির্বৃতিমগময়িত্বা, মন্ত্রাননুক্ত্বেতি বা। বচাংসি কৃণবাবহৈ গোষ্ঠীঃ করবাবহৈ ॥ (৩৫) সুদেহোঽতিকমনীয়োঽয়ং মম দেহঃ ॥

৩৬—৩৯। 'পুরূরবো মা মৃথাঃ' ইত্যাদি তস্যাঃ সূক্তং তদপ্যর্থত আহ—মা মৃথা ইতি চতুর্ভিঃ। (৩৬) মা ম্রিয়স্ব পুরুষোঽসি, অতো ধৈর্য্যমাবহেতি ভাবঃ। ইমে বৃকাঃ প্রসিদ্ধা ইন্দ্রিয়াণি বা ত্বা ইতি ত্বাং মাস্ম

১। অয়ে (ঘ)।

অদ্যাৰ্ভক্ষয়েয়ুঃ, ইন্দ্রিয়বশো মা ভবেত্যর্থঃ॥ (৩৭) প্রিয়ে নিমিত্তে সাহসং যাসাম্॥ (৩৯) তং সান্ত্বয়তি—সংবৎসরান্ত ইতি॥

৪০। অপরাণীতি বচনাদন্তর্ব্বত্নীমুপালক্ষ্য জ্ঞাত্বা॥

৪২। অনেনাগ্নিনা কর্ম্ম কৃত্বা তদ্বশাদুর্ব্বশীং প্রাপ্স্যতীত্যভিপ্রায়েণাগ্নিস্থালীং দত্তঃ। স তু তাং স্থালীমেবোর্ব্বশীং মন্যমানস্তয়া সহিতো বনে বিচরন্ 'নেয়মুর্ব্বশী কিন্ত্বগ্নিস্থালী' ইত্যবুধ্যত॥

৪৩। ততশ্চ তাং স্থালীং বনে স্থাপয়িত্বা গৃহান্ গত্বা নিশি নিত্যং তামেবাধ্যায়তস্তস্য মনসি ত্রেতায়াং ত্রয্যবর্ত্তত, কর্ম্মবোধকং বেদত্রয়ং প্রাদুরভূৎ॥

৪৪। ততঃ স্থালীস্থানং গতঃ[১] সন্ তত্র শম্যা গর্ভে জাতমশ্বত্থং বিলক্ষ্য অস্মিন্নসাবগ্নিরস্তীতি বিশেষেণ লক্ষয়িত্বা তেনাশ্বত্থেন দ্বে অরণী কৃত্বাগ্নিং মমন্থেতি শেষঃ, 'শমীগর্ভাদগ্নিং মমন্থ' ইতি শ্রুতেঃ॥

৪৫। মথনপ্রকারমাহ—অধরারণিমুর্ব্বশীং ধ্যায়ন্নুত্তরাঞ্চারণিমাত্মানং ধ্যায়ন্নুভয়োররণ্যোর্ম্মধ্যে যৎ কাষ্ঠং তৎ প্রজননং পুত্রং ধ্যায়ন্; তথা চ মন্ত্রঃ—'উর্ব্বশ্যা উরসি[২] পুরূরবাঃ' ইতি॥

৪৬। তস্য তেন কৃতান্নির্ম্মথনাদ্বিভাবসুরগ্নির্জাতঃ। কথম্ভূতঃ? জাতং বেদো ধনং ভোগ্যং যস্মাৎ, স চ ত্রয্যা বিদ্যয়া বিহিতেনাধানসংস্কারেণ ত্রিবৃদাহবনীয়াদিরূপঃ সন্, রাজ্ঞা পুরূরবসা পুত্রত্বে কল্পিতঃ, পুণ্যলোকপ্রাপকত্বাৎ॥

৪৭। তদাহ—তেনেতি॥

৪৮—৪৯। নন্বনাদিবেদত্রয়বোধিতো ব্রাহ্মণাদীনামিন্দ্রাদ্যনেকদেবযজনেন স্বর্গপ্রাপ্তিহেতুঃ কর্ম্মমার্গঃ কথং সাদিরিব বর্ণ্যতে? তত্রাহ—এক এবেতি দ্বাভ্যাম্। (৪৮) পুরা কৃতযুগে সর্ব্ববাঙ্ময়ঃ সর্ব্বাসাং বাচাং

১। প্রাপ্তঃ (ঘ); ২। উর্ব্বশ্যস্থায়ুরসি (ঘ)।

বীজভূতঃ প্রণব এক এব বেদঃ দেবশ্চ নারায়ণ এক এব ; অগ্নিশ্চৈক এব লৌকিকঃ, বর্ণশ্চৈক এব হংসো নাম ॥ (৪৯) বেদত্রয়ী তু পুরূরবসঃ সকাশাদাসীৎ। এয়িবান্—প্রাপ। অয়ং ভাবঃ —কৃতযুগে সত্ত্বপ্রধানাঃ প্রায়শঃ সর্ব্বেঽপি ধ্যাননিষ্ঠাঃ; রজঃপ্রধানে তু ত্রেতাযুগে বেদাদিবিভাগেন কর্ম্মমার্গঃ প্রকটো বভূবেতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
চতুর্দ্দশোঽধ্যায়ঃ ॥ ১৪ ॥

পঞ্চদশোঽধ্যায়ঃ

ততঃ পঞ্চদশে গাধিরৈলপুত্রান্বয়েঽজনি।
যদ্দৌহিত্রসুতো রামঃ কার্ত্তবীর্য্যমহন্ রুষা ॥ (১)

২। সুগ্রহত্বায়াল্লাদিক্রমেণ শ্রুতায়ুপ্রভৃতিষণ্ণাং বংশানাহ—শ্রুতায়ো-রিত্যাদিনা। একঃ—একসংজ্ঞঃ ; অমিতঃ—তৎসংজ্ঞঃ ॥

৩। জহ্নোঃ পুরুঃ, তস্য বলাকঃ, তস্যাজকঃ ॥

৫। গাধেঃ পুত্রো বিশ্বামিত্রো ব্রহ্মর্ষিরভূদিত্যুত্তরাধ্যায়ে[১] বক্ষ্যতি 'গাধেরভূন্মহাতেজাঃ' ইত্যাদিনা। তত্র তাবত্তদুপোদ্ঘাতত্বেন চ ভৃগুবংশ-সম্ভবস্য ঋচীকস্য চরিতপ্রসক্তানুপ্রসক্তত্বেন চ পরশুরামাবতারচরিতমাহ—তস্য সত্যবতীমিত্যাদিনা। বিসদৃশম্—অননুরূপম্, ভার্গবম্—ঋচীকম্ ॥

৬। দক্ষিণবাময়োরেকতঃ শ্যামঃ কর্ণো যেষাম্, সর্ব্বস্মিন্নঙ্গে চন্দ্রস্যেব বর্চ্চো যেষাম্, ন চেদমপি পর্য্যাপ্তমস্মৎকন্যায়াঃ, যতঃ কুশিকাঃ কৌশিকা বয়ম্ ॥

৮। উভয়ৈর্মন্ত্রৈঃ —পত্ন্যে ব্রাহ্ম্যৈর্মন্ত্রৈঃ, শ্বশ্রে্ব তু[২] ক্ষাত্রৈরিত্যর্থঃ ॥

১। উত্তরাধ্যায়ান্তে (ঘ) ; ২। শ্বশ্রে্বতি (খ)।

৯। যাবৎ স্নাত্বা মুনির্নাগতস্তাবদ্ভার্য্যায়াং ভর্ত্তৃস্নেহাধিক্যাৎ পুত্র্যাঃ সত্যবত্যাশ্চরুং শ্রেষ্ঠং মত্বা অনয়া[১] মাত্রা সত্যবতী যাচিতা সতী ব্রাহ্ম-মন্ত্রাভিমন্ত্রিতং স্বচরুং মাত্রেঽযচ্ছৎ প্রাদাৎ, মাতুশ্চরুং ক্ষাত্রমন্ত্রাভিমন্ত্রিতং স্বয়মদৎ আদৎ ॥

১০। কষ্টং জুগুপ্সিতম্; তদেবাহ—তে পুত্রো ঘোরো ভবিষ্যতি, ভ্রাতা তু ব্রহ্মবিত্তমো ভবিষ্যতীতি ॥

১১। এবং মা ভূদিতি প্রসাদিতো ভার্গব আহ—অথ তর্হি পৌত্রো ঘোরো ভবিষ্যতীতি। ততো জমদগ্নিঃ পুত্রোঽভবদিত্যর্থঃ ॥

১২। সা চ সত্যবতী কৌশিকী নদ্যভূৎ ॥

১৩। ভার্গবঋষের্জমদগ্নেঃ সুতাঃ ॥

১৫। অনীনশৎ—নাশয়ামাস; তদেবাহ—রজস্তমোবৃতমিতি। মহদিতি পাঠস্তু সুগম এব ॥

১৭—২২। কার্ত্তবীর্য্যার্জ্জুনেন কৃতমপরাধং বক্তুং তস্য দর্পহেতু-মৈশ্বর্য্যাদিকমাহ—হৈহয়ানামিতি ষড়্ভিঃ। (১৭) পরিকর্ম্মভিঃ পরিচর্য্যা-কর্ম্মভিঃ, দত্তং দত্তাত্রেয়মারাধ্য ॥ (১৮) অব্যাহতমিন্দ্রিয়াদিকঞ্চ লেভে॥ (১৯) যত্র যস্মিন্নৈশ্বর্য্যেঽণিমাদয়ো গুণাঃ ॥ (২০) রেবাম্ভসি নর্ম্মদা-জলে, সরিতং নর্ম্মদাম্॥ (২১) রাবণো দিগ্বিজয়ে মাহিষ্মত্যাঃ সমীপে নর্ম্মদায়াং দেবপূজাং কুর্ব্বংস্তেন প্রবাহস্যাবরোধাৎ প্রতিস্রোতসঃ সত্যাস্তস্যাঃ সরিতো জলৈর্বিপ্লাবিতং স্বশিবিরমালক্ষ্য তস্য তদ্বীর্য্যং ন সেহে ॥ (২২) ততশ্চ কৃতকিল্বিষঃ ক্রীড়ন্তমভিভবিতুং প্রবৃত্তঃ সন্ গৃহীতঃ; মাহিষ্মত্যাং স্বপুর্য্যাম্; কপিরিব সন্নিরুদ্ধশ্চ পুনশ্চাবজ্ঞয়া যেন মুক্তঃ ॥

২৩। ইদানীং তৎকৃতমপরাধং দর্শয়ন্নাহ—স একদেত্যাদিনা ॥

২৪। অর্হণমাতিথ্যাদি; হবিষ্মত্যা কামধেন্বা ॥

১। তয়া (ঘ)।

২৫। তদর্হণং নাদ্রিয়ত, তস্মিন্ নাতুষ্যৎ ; যতোঽগ্নিহোত্র্যাং হোমধেনৌ সাভিলাষঃ ; সহৈহয়ো হৈহয়ৈঃ সহ বর্ত্তমানঃ ॥

২৬। দর্পাদ্ধেতোঃ্ঋষেই বির্দ্ধানীমগ্নিহোত্রধেনুং হর্ত্তুং নরানচোদয়ৎ, প্রেরিতবান্ ॥

২৭। তদ্দৌরাত্ম্যং হবিষ্মত্যা হরণম্ ; ক্রোধযুক্তোঽহিরিব চুক্রোধ ॥

২৮। সতূণং কার্ম্মুকং বর্ম্ম[১] চাদায় ॥

২৯। ঐণেয়চর্ম্ম কৃষ্ণাজিনমম্বরং যস্য ॥

৩১। প্রহরন্ পরশ্বধো যস্য ; মনশ্চানিলশ্চ তয়োরিবৌজো বীর্য্যং যস্য, পরেষাং চক্রং সৈন্যং সূদয়তীতি তথা ; ছিন্না ভুজা উরবঃ কন্ধরাশ্চ যেষাম্ ; হতাঃ সূতা বাহনানি চ যেষাম্, তে বীরা নিপেতুঃ ॥

৩২। বিবৃক্ণা বর্ম্মাদয়ো যস্য ॥

৩৩। পঞ্চশতেষু ধনুঃষু সোঽর্জ্জুনো রামায় সন্দধে। একমেব ধনুর্যস্য সঃ ; একবন্ধেষুভিরিতি পাঠে এক এব বন্ধঃ সন্ধানং যেষাম্, তৈরিষুভিস্তানি ধনূংষি সমং সহ তৎক্ষণমেবাচ্ছিনৎ ॥

৩৪। মৃধে সাধনভূতানচলান্, অঙ্ঘ্রিপাংশ্চোৎক্ষিপ্যাভিধাবতস্তস্য ভুজান্ চিচ্ছেদ, অহেঃ ফণানিবেত্যর্থঃ ॥

৩৬। সমর্পয়ৎ—সমার্পয়ৎ ॥

৩৯। অর্হণতাং পূজ্যতাম্ ॥

৪০। সৌরী সূর্য্যস্য প্রভেব ॥

৪১। তীর্থসংসেবয়া, 'চ'কারাদ্ যমনিয়মৈশ্চ। অচ্যুতে চেতনা চিত্তং যস্য সঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

পঞ্চদশোঽধ্যায়ঃ ॥ ১৫ ॥

১। চর্ম্ম (ঘ)।

ষোড়শোঽধ্যায়ঃ

ষোড়শেঽথাৰ্জ্জুন-সুতৈর্জমদগ্নৌ হতে মুহুঃ।
রামাৎ ক্ষত্রবধঃ প্রোক্তো বিশ্বামিত্রস্য চান্বয়ঃ॥ (১)

৩। কিঞ্চিদীষচ্চিত্ররথে গন্ধর্ব্বরাজে স্পৃহা যস্যাঃ সা, কিঞ্চিন্ন সম্মারেতি বা॥

৪। কলসং পুরোধায়াগ্রে নিধায়॥

৫। ব্যভিচারং মানসং জ্ঞাত্বা॥

৬। আজ্ঞাতিলঙ্ঘিনাং ভ্রাতৃণাং মাতুশ্চ বধে সঞ্চোদিতঃ সন্, মুনের্যঃ সমাধিস্তপশ্চ তয়োঃ প্রভাবজ্ঞঃ। যদি ন হন্যাম্, তর্হি মামপি শপ্তুং সমর্থঃ; যদি তু হন্যাম্, তর্হি ময়ি সন্তুষ্টঃ সংস্তানপি জীবয়িতুং সমর্থ ইতি জানন্নিত্যর্থঃ॥

৮। নন্বতিনিন্দিতং তৎ কথং কৃতবান? তত্রাহ—পিতুর্বিদ্বানিতি পূর্ব্বোক্ত এবাভিপ্রায়ঃ॥

৯। সর্ব্বক্ষত্রিয়বধে কারণং বক্তুমাহ—যেঽর্জ্জুনস্য সুতা ইত্যাদিনা॥

১১। ভগবত্যাবেশিতা ধীর্যেন, তম্॥

১৫। দুঃখাদীনাং বেগেন বিমোহিতাঃ॥

১৭। ব্রহ্মঘ্নৈর্বিহতা শ্রীর্যস্যাস্তাম্। হে রাজন্! স রামস্তেষাং শীর্ষৈর্মাহিষ্মত্যা মধ্যে মহান্তং গিরিং চক্রে॥

১৮—১৯। তেষাং রক্তেনাব্রহ্মণ্যানাং ভয়াবহাং ঘোরাং নদীং চক্রে। তথাপি সর্ব্বক্ষত্রিয়বধে কিং কারণম্? তদাহ—হেতুং কৃত্বেতি সার্দ্ধেন। (১৮) অমঙ্গলকারিণ্যন্যায়বর্ত্তিনি সতি॥ (১৯) ত্রিঃসপ্তকৃত্বো রেণুকয়া দুঃখাবেশাদুরস্তাড়নং[১] কৃতম্। ততো রামস্তাবৎকৃত্বঃ ক্ষত্রমুৎসাদিতবানিতি প্রসিদ্ধিঃ॥

১। উদরতাড়নং (খ)।

২৪। সংজ্ঞানং স্মৃতিস্তদেব লক্ষণং চিহ্নং যস্য তম্, স্বদেহং লব্ধা স সপ্তর্ষীণাং মণ্ডলে সপ্তম ঋষিরভূৎ ॥

২৫। বৃহদ্‌ব্রহ্ম বেদম্। বেদপ্রবর্ত্তকেষু সপ্তর্ষিষ্বেকতমো ভবিষ্যতীত্যর্থঃ ॥

২৭। ভুবো ভারমহন্। ভারমেবাহ—নৃপানিতি ॥

২৮। তদেবং প্রসক্তানুপ্রসক্তং সমাপ্য প্রস্তুতমাহ—গাধেরিতি। মহাতেজা বিশ্বামিত্রঃ ॥

২৯। তে সর্ব্বে লিঙ্গসমবায়ন্যায়েন প্রাণভৃত উপধাবতীতিবৎ[১] মধুচ্ছন্দস এবোচ্যন্তে; তথা চ শ্রুতিঃ—'তস্য হ বিশ্বামিত্রস্যৈকশতং পুত্রা আসুঃ। পঞ্চাশদেব জ্যায়াংসো মধুচ্ছন্দসঃ পঞ্চাশৎ কনীয়াংসঃ' ইত্যাদি। তত্র চ বিশ্বামিত্রপুত্রেষু ভার্গবস্যাজীগর্ত্তস্য দেবরাতস্য জ্যেষ্ঠত্বমবগম্যতে। তথাশ্বলায়নবোধায়নাদিভিঃ কৌশিকানাং দেবরাতপ্রবরত্বমুক্তম্। প্রবরশ্চ তস্মিন্নেব বংশেঽবান্তরভেদঃ, ন তু বংশান্তরম্। তথা চ স্মৃতিঃ—'এক এব ঋষির্যাবৎ প্রবরেষ্বনুবর্ত্ততে। তাবৎ সমানগোত্রত্বং বিনা ভৃগ্বঙ্গিরোগণাৎ ॥' ইতি ॥

৩০—৩৭। তৎ কুতো ভৃগুবংশসম্ভবস্য দেবরাতস্য কৌশিকপ্রবরত্বমিত্যাশঙ্ক্য তদুপপাদয়ন্নাহ—পুত্রং কৃত্বেত্যাদি যাবৎসমাপ্তি। (৩০) পূর্ব্বমজীগর্ত্তসুতত্বে মধ্যমত্বেন পিতৃভ্যাং মমতাং বিহায় বিক্রীতত্বাৎ। তস্য কৃপয়া সুতানাহ—জ্যেষ্ঠ এষ প্রকল্প্যতামিতি ॥ (৩১—৩২) এতদেব স্পষ্টয়িতুং বিশিনষ্টি—য ইতি দ্বাভ্যাম্। (৩১) মুমুচে—অমুচ্যত ॥ (৩২) ভার্গবোঽপি গাধিষু গাধের্ব্বংশজেষু দেবরাত ইতি খ্যাতঃ ॥ (৩৩) তত্তস্য জ্যেষ্ঠত্বং কুশলং ন মেনিরে, মধ্যমত্বস্যানর্থাবহত্বং দৃষ্ট্বা নাঙ্গীকৃতবন্তঃ। মুনির্ব্বিশ্বামিত্রঃ ॥ (৩৪) পঞ্চাশতা কনিষ্ঠৈঃ সাকং স মধ্যমো মধুচ্ছন্দা

১। উপদধাতীতিবৎ (ঘ)।

উবাচ.—'নোঽস্মাকং যজ্জ্যেষ্ঠত্বং কনিষ্ঠত্বং বা ভবান্ পিতা সঞ্জানীতে মন্যতে, তস্মিন্ বয়ং তিষ্ঠাম' ইতি ॥ (৩৫) এবমুক্ত্বা মন্ত্রদৃশং 'কস্য নূনং কতমস্যা-মৃতানাম্' ইত্যাদিমন্ত্রাণাং দ্রষ্টারং শুনঃশেফং জ্যেষ্ঠং চক্রুঃ। কথং চক্রুঃ? তদাহ—বয়ং সর্ব্বে ত্বামন্বঞ্চঃ স্ম হি, অনুগন্তারঃ কনিষ্ঠাঃ স্ম ইত্যর্থঃ। ততঃ প্রসন্নো বিশ্বামিত্রস্তান্ সুতানাহ—বীরবন্তঃ পুত্রবন্তো ভবিষ্যথ ; যে যূয়ং মে মানং পূজ্যত্বমনুগৃহ্নন্তোঽনুবর্ত্তমানাঃ সন্তঃ. মাং বীরবন্তং পুত্রবন্তমকর্ত্ত কৃতবন্ত ইত্যর্থঃ ॥ (৩৬) হে কুশিকাঃ ! এষ দেবরাতো বো যুষ্মদীয়ঃ কৌশিক এব, যতো বীরো মৎপুত্রস্তমেনমন্বিতানুগচ্ছত। অন্যে চাষ্টকাদয়-স্তস্য সুতা আসন্ ॥ (৩৭) উপসংহরতি—এবমিতি। একে শপ্তাঃ, একেঽনুগৃহীতাঃ, অন্যস্তু পুত্রত্বেন স্বীকৃত ইত্যেবং কৌশিকগোত্রং পৃথগ্বিধং নানাপ্রকারং জাতম্, তচ্চ প্রবরান্তরমাপন্নং প্রাপ্তম্ ; হি যস্মাদেবং দেব-রাতজ্যেষ্ঠত্বেন তৎ প্রকল্পিতম্ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

ষোড়শোঽধ্যায়ঃ ॥ ১৬ ॥

সপ্তদশোঽধ্যায়ঃ

আয়োঃ সপ্তদশে ত্বেলজ্যেষ্ঠপুত্রস্য পঞ্চসু।

সুতেষু ক্ষত্রবৃদ্ধাদিচতুর্ণাং বংশবর্ণনম্ ॥ (১)

১। ইহ শ্রীকৃষ্ণাবতারপ্রস্তাবায় বংশানুবর্ণন[১]মৈলাদিক্রমেণ প্রক্রান্ত-মিতি, যস্য বংশে শ্রীকৃষ্ণাবতারস্তস্য বংশোঽতিবিস্তৃতত্বাদন্তে[২] নিরূপ্যতে। অতঃ পুরূরবসঃ পুত্রাণাং পঞ্চানাং কনিষ্ঠানাং বংশানুক্ত্বেদানীং প্রথমস্য বংশমাহ—য ইতি। এবং নহুষ-যযাতি-যদুপ্রভৃতিষ্বপি দ্রষ্টব্যম্ ॥

১। বংশানুক্রমণ-(ঘ); ২। -বিততত্বাদন্তে (ঘ)।

২। ক্ষত্রবৃধঃ —ক্ষত্রবৃদ্ধস্য ॥

৪। দীর্ঘতমসঃ পিতা ॥

৫। স্মৃতমাত্র এবার্ত্তিং রোগদুঃখং নাশয়তীতি তথা ॥

৬। ততঃ প্রতর্দ্দনাদি-শব্দবাচ্যাদ্ দ্যুমতঃ সকাশাদলর্কাদয়ঃ ॥

৮। অলর্কাৎ সন্ততিঃ সন্ততিসংজ্ঞঃ ॥

৯। সত্যকেতোর্ধৃষ্টকেতুস্তস্মাৎ সুকুমারঃ, তস্মাদ্বীতিহোত্রঃ ; তস্য ভর্গঃ, অতো ভর্গাদ্ভার্গভূমিঃ ॥

১০। কাশয়ঃ কাশের্ব্বংশ্যাঃ। কাশেঃ প্রপিতামহস্য ক্ষত্রবৃদ্ধস্যান্বয়মন্তে যান্তীতি তথা ॥

১১। ততোঽনেনসঃ শুদ্ধো জজ্ঞে ॥

১২। কৃতকৃত্যঃ সঃ ; যত আত্মবান্ জ্ঞানী, অতঃ পুত্রোৎপাদনং ন কৃতবানিত্যর্থঃ ॥

১৫। তেষাং মতিভ্রংশায় গুরুণা বৃহস্পতিনাঽভিচারবিধানেনাগ্নৌ হূয়মানে সতি ॥

১৬। সিংহাবলোকনেনাহ—ক্ষাত্রবৃদ্ধাৎ ক্ষত্রবৃদ্ধপৌত্রাৎ কুশাৎ প্রতিঃ ; প্রতেঃ সঞ্জয়ঃ ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
সপ্তদশোঽধ্যায়ঃ ॥ ১৭ ॥

অষ্টাদশোঽধ্যায়ঃ

অষ্টাদশে যযাতেস্তু নাহুষস্য কথোচ্যতে।
যস্য পঞ্চসু পুত্রেষু কনীয়ানগ্রহীজ্জরাম্ ॥ (১)

২। তস্য রাজ্যস্য পরিণামমনর্থাবহত্বং বেত্তীতি তথা। তত্র হেতুঃ—যত্রেতি॥

৩। স্থানাৎ স্বর্গাৎ, দ্বিজৈরগস্ত্যাদিভিঃ॥

৪। যবীয়সো ভ্রাতৄনাদিশৎ। কাব্যস্য শুক্রস্য বৃষপর্ব্বণশ্চ কন্যাভ্যাং কৃতদারঃ সন্॥

৬—২৩। নাত্র প্রতিলোমতাদোষঃ, ঈশ্বরঘটনাদিতি দর্শয়ন্ কথামাহ—'একদা' ইত্যাদিনা, 'প্রতিজগ্রাহ তদ্বচঃ' ইত্যন্তেন। (৬—৭) গুরোঃ শুক্রস্য পুত্র্যা দেবযান্যা চ ব্যচরদিতি দ্বয়োরন্বয়ঃ॥ (৭) কলগীতা অলয়ো যেষু তানি নলিনীপুলিনানি যস্মিন্, তস্মিন্ পুরোদ্যানে। অবলা শর্ম্মিষ্ঠা॥ (৮) সিঞ্চতীঃ সিঞ্চন্ত্যঃ॥ (১০) অজানতী স্বীয়ং মত্বা গুরুপুত্র্যা বাসঃ সমব্যয়ৎ পর্য্যধাৎ॥ (১১) অসাম্প্রতম্—অন্যায্যম্॥ (১২—১৪) অন্যায়মেব ব্রাহ্মণোৎকর্ষবর্ণনেন ব্যনক্তি—যৈরিতি ত্রিভিঃ। (১২) যে ব্রাহ্মণাঃ পরস্য পুংসঃ মুখং মুখাদুৎপন্নত্বেন তৃপ্তিদ্বারত্বেন চ শ্রেষ্ঠা ইত্যর্থঃ। জ্যোতির্ব্রহ্ম, পন্থা বেদমার্গঃ॥ (১৪) তদেবং ব্রাহ্মণমাত্রমেব তাবৎ পূজ্যম্, তত্রাপি বয়ং ভৃগবঃ; অস্যাশ্চ পিতা নঃ শিষ্যঃ; এবং সত্যপ্যস্মাভির্ধার্য্যং বাস ইয়মসতী ধৃতবতী॥ (২১) নিষিদ্ধোঽয়ং প্রতিলোমসম্বন্ধ ইতি চেৎ, তত্রাহ—এষ ইতি॥ (২২) ব্রাহ্মণমেব ত্বং বৃণীহি কিমনেনাগ্রহেণেতি চেৎ, তত্রাহ—ন ব্রাহ্মণ ইতি। বৃহস্পতেঃ সুতঃ কচঃ শুক্রান্মৃতসঞ্জীবনীং বিদ্যামধ্যগাৎ, তদা চ দেবযানী তং পতিং চকমে। স চ 'গুরুপুত্রী মম পূজ্যা' ইতি ন তামুদবহৎ। ততশ্চ কুপিতা সতী 'তবেয়ং বিদ্যা নিষ্ফলা ভবতু' ইতি তং শশাপ। স চ 'তব ব্রাহ্মণঃ পতির্ন ভবেৎ' ইতি তাং শশাপ। তদেতদাহ—যমহমশপম্, তস্য শাপাৎ॥ (২৩) অশাস্ত্রীয়ত্বাদনভিপ্রেতমপি দৈবেনোপহৃতং প্রাপিতং বুদ্ধা তদ্গতং তস্যাং সকামং স্বং[১] মনশ্চ

১। স্বস্য (ঘ)।

বুদ্ধা, 'ন হ্যধর্ম্মে মদীয়ং মনঃ প্রবিশেৎ' ইতি তস্যা বচঃ প্রতিজগ্রাহাঙ্গী-কৃতবান্ ॥

২৪—৩২। শর্ম্মিষ্ঠাসম্বন্ধোঽপি দৈববশাদেবাভবদিতি দর্শয়ন্নাহ—গতে রাজনীতি নবভিঃ। (২৪) উক্তং ভিক্ষুকীত্যাদি; কৃতং কূপ-প্রক্ষেপাদি ॥ (২৫) কাপোতীম্—উঞ্ছবৃত্তিম্ ॥ (২৬) প্রত্যনীকা দেবাস্তে বিবক্ষিতা জয়ং প্রাপণীয়া ইত্যভিপ্রেতং যস্য তথাভূতং জ্ঞাত্বা প্রত্যনীকানাং বিবক্ষিতমিতি বা ॥ (২৮) সানুগা সখীসহিতা শর্ম্মিষ্ঠা মামনুযাত্বিতি ॥ (২৯) তত্তস্মান্নির্গতাৎ শুক্রাৎ সঙ্কটং বীক্ষ্য; তত্তস্মাদবস্থিতাদর্থস্য প্রয়োজনস্য গৌরবঞ্চ বীক্ষ্য ॥ (৩০) তল্পে নাধা নোপগচ্ছেরিত্যর্থঃ ॥ (৩২) অপত্যার্থমৃতুকালে প্রার্থনাত্তস্যাঃ কামপূরণং ধর্ম্মমবেক্ষ্য শুক্রস্য বচশ্চ স্মরন্, দিষ্টং দৈবপ্রাপিতমেব তৎসঙ্গমভ্যপদ্যত, ন তু কামত ইত্যর্থঃ ॥

৩৪। আসুর্য্যাঃ শর্ম্মিষ্ঠায়াঃ, ভর্ত্তুঃ সকাশাৎ ॥

৩৫। উপমন্ত্রয়ন্—প্রসাদয়ন্ ॥

৩৬। বিকৃতং রূপং করোতীতি তথা ॥

৩৭। তে দুহিতরি কামৈরস্যাপ্যতৃপ্তোঽস্মি, কামানাং ভোগৈরিতি বা। শুক্র আহ—তর্হি যোঽভিধাস্যত্যভিতো ধারয়িষ্যতি, তস্য বয়সা যথাকামং ব্যত্যস্যতাং যথেচ্ছং জরাব্যত্যয়ং যাতু, ব্যত্যয়ং নীয়তামিতি বা; যদ্বা, ব্যত্যস্যেতি চ্ছেদঃ, তাং জরাং ব্যত্যস্য ব্যত্যাসং গময়েত্যর্থঃ ॥

৩৮। ইতি লব্ধং ব্যবস্থানং জরায়া ব্যবস্থিতির্যেন, সঃ ॥

৪১। যতো ন ধর্ম্মজ্ঞা অনিত্যে চ যৌবনে নিত্যবুদ্ধয়ঃ ॥

৪২। 'ত্বং জরাং কিং গ্রহীষ্যসি?' ইত্যপৃচ্ছৎ। 'প্রত্যাখ্যানং মা কৃথাঃ' ইত্যাহ—ন ত্বমিতি ॥

৪৩। আত্মকৃতঃ স্বদেহকর্ত্তুঃ প্রত্যুপকারং কর্ত্তুং কো নু ক্ষমঃ? ॥

৪৪। তথাপি পিতুর্যশ্চিন্তিতং কুর্য্যাৎ, স উত্তমঃ; যস্তু প্রোক্তকারী, স মধ্যমঃ; যস্ত্বশ্রদ্ধয়া কুর্য্যাৎ, সোঽধমঃ; অকর্ত্তা পিতুরুচ্চরিতং পুরীষপ্রায়ঃ॥

৪৫। জুজুষে—সেবিতবান্॥

৪৬। যথোপজোষং যথাপ্রীতি জুজুষে॥

৪৯। নানেব ভাতি যাবদিন্দ্রিয়প্রবৃত্তিঃ, তদুপরমে নাভাতি চ; স্বপ্ন-মায়াভ্যাং সহিতো মনোরথ ইবেত্যর্থঃ॥

৫১। মনঃসুখং কামভোগম্; কদিন্দ্রিয়ৈঃ কুৎসিতৈঃ পরাঙ্মুখৈ-রিন্দ্রিয়ৈঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

অষ্টাদশোঽধ্যায়ঃ॥ ১৮॥

একোনবিংশোঽধ্যায়ঃ

ঊনবিংশে যযাতিঃ স্বং চেষ্টিতং নস্বজোপমম্।

দেবযানীং সমাশ্রাব্য বিরক্তো মুক্তিমাপ্তবান্॥ (১)

ভুক্তভোগ্যামজাং হাস্তন্নজবদ্ বৃত্তমাত্মনঃ।

বিড়ম্বয়ন্ প্রিয়ামাহ নির্ব্বেদয়িতুমাত্মবান্॥ (২)

১। কামানাচরন্নুপভুঞ্জানঃ; গাথামিতিহাসম্॥

২। মদ্বিধেন মাদৃশেনাচরিতামনুষ্ঠিতাম্, মদ্বিধস্যাচরিতং যস্যামিতি বা। যস্য গ্রামনিবাসিনঃ কামিনো মদ্বিধস্যাচরিতং বনে স্থিতা ধীরাঃ শোচন্তি, তস্য গাথাং শৃণু॥

৩। আত্মানমনুলক্ষ্যাহ—বস্ত ইতি। প্রিয়ামনুলক্ষ্যাহ—অজামিতি; বনে সংসারে; প্রিয়ম্—বিষয়ম্॥

৪। রোধসি তটে বিষাণাগ্রেণ মৃদাদিকমুদ্ধৃত্য তীর্থং নির্গমায় মার্গং ব্যধত্ত ॥

৫। বহ্ব্য ইতি শর্ম্মিষ্ঠাপ্রমুখাঃ কাময়ামাসুঃ। কান্তং প্রতি কামিনীঃ কামবত্যঃ ॥

৬। পীবানং পুষ্টম্ ; শ্মশ্রুলং শ্মশ্রুবহুলং রতিসমর্থমিত্যর্থঃ। মীঢ্বাংসং রেতঃসেক্তারম্, যাভে মৈথুনে, কোবিদমভিজ্ঞমতএব প্রেষ্ঠম্ ; নাববুধ্যত নান্ববুধ্যত ॥

৮। স্বামিনমিতি শুক্রাভিপ্রায়েণাহ ॥

৯। ইড়বিড়াকারং বস্তজাতিশব্দম্ ; সন্ধিতুং প্রসাদয়িতুম্ ॥

১০। বৃষণমচ্ছিনজ্জরয়া সম্ভোগাসমর্থমকরোৎ, অর্থায় স্বপুত্র্যাঃ কামোপভোগায় ; যোগবিদুপায়জ্ঞঃ, জরাব্যত্যাসেন[১] রতিশক্তিং দদাবিত্যর্থঃ ॥

১১। কূপলব্ধয়া সহ, কামৈঃ সেব্যমানৈর্ন তুষ্যতি ॥

১৩—১৪। নন্বু তর্হি পুনরপি বহবো বিষয়াঃ সেব্যন্তাম্, ততো মনসি প্রীতে সতি কামোপশান্ত্যা মোহো নিবর্ত্তেতেতি চেৎ, তত্রাহ—যদিতি দ্বাভ্যাম্। (১৩) ন দুহ্যন্তি, ন পূরয়ন্তি ॥ (১৪) হবিষা ঘৃতেন, কৃষ্ণবর্ত্মা অগ্নিরিব ॥

১৫—২০। তর্হি কদা কেনোপায়েন বা মনসঃ সম্পূর্ণা প্রীতিঃ স্যাৎ? যদা কামোপশমঃ স্যাদিত্যাহ—যদেতি ষড়্ভিঃ। (১৫) অমঙ্গলং ভাবং রাগদ্বেষাদিবৈষম্যম্ ॥ (১৬) দুঃখানি নিতরাং বহতীতি তথা, তাম্ ॥ (১৭) স্ত্রীসন্নিধানন্তু সর্ব্বথা ত্যাজ্যমিত্যাহ—মাত্রেতি। অবিবিক্তং সঙ্কীর্ণমাসনং যস্য সঃ, কর্ষত্যাকর্ষতি ॥ (২০) নন্বু তৃষ্ণাত্যাগস্যাতিদুষ্করত্বাৎ কথং ব্রহ্মণি মনস আধানং স্যাৎ? তত্রাহ—দৃষ্টমিতি। যো

১। জরাব্যত্যয়েন (ঘ)।

নানুধ্যায়েৎ, ন সংবিশেৎ, ন চোপযুঞ্জীত। তত্র দৃষ্টশ্রুতয়োরনুধ্যানাদৌ স আত্মদৃগ্‌ভবতি ॥

২৩। তস্য পুরোর্বংশে স্থাপয়িত্বা ॥

২৪। বিষয়েষু শব্দাদিষ্বাসেবিতং ষড়্‌বর্গং ষড়িন্দ্রিয়সুখম্, মুমুচে তত্যাজ; যদ্বা, বিষয়েষ্বাসেবিতং সেবাং কারিতং ষণ্ণামিন্দ্রিয়াণাং বর্গং মুমুচে, উপৈক্ষতেত্যর্থঃ ॥

২৫। বিধুতং নিরস্তং ত্রিগুণাত্মকং লিঙ্গং যেন। প্রতীতঃ—প্রখ্যাতঃ ॥

২৬। প্রস্তোভমেবাহ—পরিহাসমিবেতি; যদ্বা, প্রস্তোভং নিবৃত্তিমার্গ-প্রোৎসাহনং মেনে ॥

২৯। কথং সমাবেশ্য? তদাহ—নম ইতি, নমনাদিভিঃ সমাবেশ্য ইত্যর্থঃ। শ্রীশুকো বা নমস্করোতি ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
একোনবিংশোঽধ্যায়ঃ ॥ ১৯ ॥

বিংশোঽধ্যায়ঃ

বিংশে পিতৃপ্রসাদাপ্তরাজাসনমহোন্নতেঃ।
পূরোর্ব্বংশে তু দৌষ্মন্তের্ভরতস্যের্য্যতে যশঃ ॥ (১)

৩। তৎসুতোঽহংযাতেঃ সুতঃ ॥

৪। ধর্ম্মেয়ুশ্চ সত্যেয়ুশ্চ ব্রতেয়ুশ্চ ধর্ম্মসত্যব্রতেয়বঃ ॥

৫। বনেয়ুশ্চাবমঃ স্মৃতঃ, এবং দশৈতে ঋতেয়ুপ্রমুখাঃ; তস্য রৌদ্রাশ্বস্য ঘৃতাচ্যামপ্সরসি পুত্রা জাতাঃ; অপ্সরস ইতি ষষ্ঠী সপ্তম্যর্থে। বশবর্ত্তিত্বে দৃষ্টান্তঃ—জগদাত্মনো জগত আত্মভূতস্য মুখ্যস্য প্রাণস্যেন্দ্রিয়াণীব ॥

৮—২২। দুষ্মন্তস্য শকুন্তলায়াং ভরতঃ পুত্রোঽভবদিতি কথাদ্বারেণাহ —দুষ্মন্তো মৃগয়ামিতি পঞ্চদশভিঃ। (৮—৯) তমাশ্রমং মণ্ডয়ন্তীং স্ত্রিয়ং বিলোক্য মুমুহেঽমুহৎ॥ (১০) তস্যা দর্শনেন প্রমুদিতঃ, অতঃ সংনিবৃত্তঃ পরিশ্রমো যস্য॥ (১২) পৌরবাণাং চেতো ন হ্যধর্ম্মে রমতে, অতো মচ্চেতসস্ত্বয়ি রমণাদেবাহং ত্বাং রাজন্যতনয়াং বেদ্মি॥ (১৩) বিশ্বামিত্রস্যাত্মজাহং মেনকায়াং জাতা। তয়া চ স্বর্গং গচ্ছন্ত্যা অত্র ত্যক্তা, অতো রাজন্যকন্যৈবাহমিত্যর্থঃ॥ (১৫) 'কিং করবাম' ইত্যাদিবাক্যাত্তদভিপ্রায়ং জ্ঞাত্বাহ—উপপন্নমিতি॥ (১৬) গান্ধর্ব্ববিধিনা মিথঃসময়পূর্ব্বকেণ॥ (১৯) দুরত্যয়ং বিক্রান্তং বিক্রমণং যস্য॥ (২১) ভস্ত্রা চর্ম্মপাত্রম্, তদ্বন্মাতা আধারমাত্রম্, পিতুরেব তু পুত্রঃ, তত্র হেতুঃ—যেনেতি, 'আত্মা বৈ পুত্রনামাসি' ইতি শ্রুতেঃ। ভরস্ব পুষাণ; অনেন ভরতনাম নিরুক্তম্॥ (২২) কিঞ্চ, রেতোধা রেতঃসেক্তা বংশকৃৎ পুত্রো যমক্ষয়াৎ পিতরং নয়তি, তারয়তি; তথা চ স্মৃতিঃ—'পুন্নাম্নো নরকাদ্‌যস্মাৎ পিতরং ত্রায়তে সুতঃ। তস্মাৎ পুত্র ইতি প্রোক্তঃ স্বয়মেব স্বয়ম্ভুবা॥' ইতি। পুত্রমিতি পাঠান্তরে মাতাপিত্রোঃ পুত্রং প্রতি বিবাদে যমক্ষয়াদ্ধর্ম্মনির্ণেতুর্যমস্য সভায়াঃ সকাশাদ্রেতোধা রেতঃসেক্তা পিতৈব ধর্ম্মেণ বিজিত্য পুত্রং নয়তি, ন তু মাতেত্যর্থঃ। ততশ্চ ভার্য্যাপুত্রৌ স্বীকৃতবানিতি জ্ঞেয়ম্॥

২৩। চক্রবর্ত্তী বভূবেতি শেষঃ। তস্য মহিমা গীয়তে 'তদপ্যেতে শ্লোকা অভিগীতাঃ' ইত্যাদিবহ্বৃচশ্রুত্যা হরেরংশভুবোঽংশাজ্জাতস্য॥

২৪। তত্র লিঙ্গমাহ—চক্রমিতি॥

২৫। গঙ্গায়ামনুলোমং পঞ্চপঞ্চাশতা বাজিভিরীজে, পুরোধায় পুরোহিতং কৃত্বা। যমুনামনু চ যমুনায়াঞ্চানুলোমম্॥

২৬। অষ্টাধিকসপ্ততিং মেধ্যানশ্বান্ ববন্ধ। কিং কুর্ব্বন্? বসু ধনং প্রকর্ষেণ দদৎ। সাচীগুণে প্রকৃষ্টগুণবতি দেশেঽগ্নিশ্চিতোঽভূৎ; যস্মিন্নগ্নি-

চয়নে দেশে বা সহস্রং ব্রাহ্মণা ভরতেন ভূরিদানেন দত্তা গা বদ্ধশঃ প্রত্যেকং বদ্ধং বিভেজিরে, বিভজ্য জগৃহুঃ। চতুরশীত্যধিকৈস্ত্রয়োদশসহস্রৈরেকং বদ্ধং ভবতি। তথা হি—'হিরণ্যেন পরিবৃতান্ কৃষ্ণান্ শুক্লদতো মৃগান্। মষ্ণারে ভরতোঽদদাচ্ছতং বদ্ধানি সপ্ত চ॥' ইতি শ্রুত্যুক্তানি সপ্তাধিকশতং বদ্ধানি শ্রীশুকেনোত্তরশ্লোকে চতুর্দ্দশলক্ষত্বেন সংগৃহীতানি। 'অদাৎ কর্ম্মণি মষ্ণারে নিযুতানি চতুর্দ্দশ' ইতি। এবং চতুর্দ্দশলক্ষাণাং সপ্তাধিকশতভাগো বদ্ধমিত্যুক্তং ভবতি, ইয়ঞ্চ বদ্ধসংখ্যা শ্লোকেন সংগৃহ্যতে,—'চতুর্দ্দশানাং লক্ষাণাং সপ্তাধিকশতাংশকঃ। বদ্ধং চতুরশীত্যগ্রসহস্রাণি ত্রয়োদশ॥' ইতি॥

২৭। দেবানামপি মায়াং বৈভবম্, অত্যগাদত্যশেত; যতো গুরুং পূজ্যং হরিমাষযৌ প্রাপ্তঃ, তদংশভবত্বাৎ। মায়বত্তর ইতি পাঠে হ্রস্বঃ শ্রুত্যনুসারেণ; মায়াবতাং শ্রেষ্ঠো হরিরেবাসাবিত্যর্থঃ॥

২৮। মৃগান্ শ্রেষ্ঠগজান্, ভদ্রমন্দ্রমৃগাদয়ো গজজাতিভেদাঃ। 'মষ্ণারে' ইত্যস্য শ্রুতিপদস্য ব্যাখ্যানম্; কর্ম্মণীতি কস্মিংশ্চিৎ কর্ম্মবিশেষে। কেচিত্তু 'মষ্ণারে তীর্থে' ইতি ব্যাচক্ষতে॥

৩১। পুরা দেবান্ জিত্বা যেঽসুরা রসৌকাংসি রসাতলাদিস্থানানি ভেজিরে, তৈঃ প্রাণিভির্ব্বলিভির্দ্দেবস্ত্রিয়ো রসাতলং নীতাঃ সতীঃ পুনরাহরদানিন্যে; প্রাণিভিরন্যৈর্মনুষ্যাদিভিঃ সহ নীতা ইতি বা। পণিভিরিতি পাঠে পণয়োঽসুরাস্তৈর্নীতাঃ সতীঃ; যদ্বা, পণয়ো দূতাস্তৈর্দূতান্ প্রস্থাপ্যাহরদিত্যর্থঃ॥

৩২। ত্রিনবসাহস্রীঃ সমাঃ সপ্তবিংশতিসহস্রসংবৎসরান্। চক্রং সেনামাজ্ঞাং বা॥

৩৩। তস্য বৈরাগ্যেণ মোক্ষপ্রকারমাহ—স ইতি। মৃষেতি বিচার্য্যেতি শেষঃ॥

৩৪। নানুরূপা মৎসদৃশা ন ভবন্তীতি ভর্ত্রা ঈরিতে সতি ব্যভিচার-শঙ্কয়াস্মাংস্ত্যক্ষ্যতীতি ভয়াৎ পুত্রান্ জঘ্নুঃ। পুনঃ পুনঃ পুত্রাণাং দর্শনেন বৈসাদৃশ্যানুসন্ধানেন ত্যজেৎ, নান্যথেত্যাশয়েন হতবত্যঃ॥

৩৫। বিতথে ব্যর্থে সতি, তদর্থং পুত্রার্থম্, মরুৎসোমেন যাগেন যজতস্তস্য প্রসন্নাঃ সন্তো মরুতো ভরদ্বাজং নাম পুত্রমুপাদত্তুঃ সমর্পয়ামাসুঃ॥

৩৬—৩৯। মরুতাং ভরদ্বাজাগমপ্রকারং প্রদর্শয়ন্নাহ—অন্তর্ব্বত্ন্যামিতি চতুর্ভিঃ। (৩৬) অন্তর্ব্বত্ন্যাং গর্ভিণ্যাং ভ্রাতুরুতথ্যস্য পত্ন্যাং মমতায়াং চৌর্য্যেণ কদাচিৎ মৈথুনায় প্রবৃত্তো বৃহস্পতিস্তদা দ্বিতীয়গর্ভস্যাবকাশা-ভাবাদাক্রোশপূর্ব্বকং গর্ভস্থেন বারিতঃ। ততঃ ক্রুদ্ধো বৃহস্পতিঃ 'অন্ধো ভব' ইতি তং গর্ভং শপ্ত্বা বলাদ্বীর্য্যং ন্যষিঞ্চৎ। ততো বৃহস্পতেঃ শাপাদ্গর্ভস্থো দীর্ঘতমা অন্ধো বভূব। তেন চ তদ্বীর্য্যং পার্ষ্ণিপ্রহারেণ যোনের্বহির্নিঃসারিতং ভূমৌ পতিতং সদ্য এব কুমারোঽভবৎ॥ (৩৭) তঞ্চ পরবীর্য্যজং ভর্ত্তু-স্ত্যাগবিশঙ্কিতাং সতীং ত্যক্তুকামাং মমতাং প্রতি সুরা এনং বৃহস্পতের্ম্মম-তায়াশ্চ বিবাদরূপং শ্লোকং জগুঃ। কিমর্থং জগুঃ? অত আহ—তস্য নাম নিরুচ্যতে যেন, তম্। তন্নামনির্ব্বচনেনৈব ভর্ত্তুস্ত্যাগশঙ্কামপাকর্ত্তুমিত্যর্থঃ॥ (৩৮) তত্র পুত্রং ত্যক্ত্বা যান্তীং মমতাং বৃহস্পতিরাহ—হে মূঢ়ে! ইমং পুত্রং ভর পুষাণ। ভর্ত্তুর্বিভেমীতি চেৎ, তত্রাহ,—দ্বাজম্, একস্য ক্ষেত্রেঽন্যস্য বীজাদিত্যেবং দ্বাভ্যাং জাতম্, অতস্তস্যাপ্যয়ং পুত্র ইতি ন তস্মাদ্ভয়শঙ্কে-ত্যর্থঃ। এবমুক্ত্বা সতী তং প্রত্যাহ—'হে বৃহস্পতে! ত্বমিমং ভর, যতো দ্বাজং দ্বাভ্যামাবাভ্যামন্যায়তো জাতম্, অতো নাহমেকাকিনী ভরামি' ইত্যর্থঃ। যদ্যস্মাদেবমুক্ত্বা পিতরৌ মমতাবৃহস্পতী বিবদমানৌ পুত্রং পরিত্যজ্য যাতৌ, ততো হেতোরয়ং 'ভরদ্বাজ'-সংজ্ঞঃ ইতি। যদ্দুঃখাদিতি পাঠান্তরে যস্য পুত্রস্য ত্যাগদুঃখাৎ পিতরৌ যাতাবিত্যর্থঃ॥ (৩৯) ব্যভিচার-সম্ভবং তমাত্মজং বিতথং নিরর্থকং মত্বা মমতা ব্যসৃজত্তত্যাজ। আদি-

জমিতি পাঠান্তরে আদিভবং প্রথমজং ভর্ত্তুর্বীর্য্যাজ্জাতমেব মুখ্যমাত্মজং মত্বা বৃহস্পতের্জাতং তত্যাজেত্যর্থঃ। তত্র[১] তয়া ত্যক্তং মরুতোঽবিভ্রন্নবিভরুঃ। তদেবং মরুদ্ভিঃ প্রাপ্তোঽয়ং ভরতস্যান্বয়ে বিতথে সতি দত্তঃ॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

বিংশোঽধ্যায়ঃ॥ ২০॥

একবিংশোঽধ্যায়ঃ

একবিংশে তু দৌষ্মন্তেঃ সুতস্যান্বয় উচ্যতে।
রন্তিদেবাজমীঢ়াদের্যত্র কীর্ত্তিঃ প্রতন্যতে॥ (১)

১। ভরতস্যান্বয়ে বিতথে সতি দত্তত্বাদ্‌বিতথসংজ্ঞো ভরদ্বাজঃ, স চ ব্রাহ্মণোঽপি ভরতস্য দত্তপুত্রো জাত ইতি তদ্বংশোঽনুক্রম্যতে। বিতথস্য সুতো মন্যুস্তস্মাদ্‌বৃহৎক্ষত্রজয়মহাবীর্য্যনরগর্গাঃ পঞ্চ পুত্রা বভূবুঃ॥

৩। বিয়দ্বিত্তস্য বিয়তো গগনাদিবোদ্যমং বিনৈব দৈবাদুপস্থিতং বিত্তং ভোগ্যং যস্য; যদ্বা, বিয়দ্‌ব্যয়ং প্রাপ্নুবদ্বিত্তং ভোগ্যং যস্য; তদেবাহ—বুভুক্ষতোঽপি সতো লব্ধং লব্ধং দদতঃ॥

৪—১৯। তৎ প্রপঞ্চয়তি—নিষ্কিঞ্চনস্যেত্যাদি সার্দ্ধৈঃ পঞ্চদশভিঃ। (৪) অপিবতো জলপানমপ্যকুর্ব্বতঃ। ঘৃতাদিত্রয়াণাং দ্বন্দ্বৈক্যম্, তোয়ঞ্চ॥ (৭) অথান্যো বৃষলোঽতিথিরাগমৎ। বিভক্তস্য কুটুম্বার্থমন্নাদিকং বিভক্তবতঃ॥ (৮) সগণায়—শ্বযূথসহিতায়॥ (১০) উচ্ছেষমুর্ব্বরিতমেকমেব পরিতর্পয়তীতি তথা॥ (১২) পরদুঃখাসহিষ্ণুতয়া সর্ব্বেষাং দুঃখং স্বয়ং ভোক্তুমাশাস্তে—নেতি। অণিমাদ্যষ্টসমৃদ্ধিযুক্তাং গতিমপি মোক্ষমপি

১। এবং (ঘ)।

চাহং ন কাময়ে। তর্হি কিং কাময়সে ? তদাহ—অখিলদেহভাজামার্ত্তিং পীড়াং দুঃখং তত্তদ্ভোক্তৃরূপেণান্তঃস্থিতঃ সন্, অহং প্রপদ্যে প্রাপ্নুয়ামিত্যেবং কাময়ে। যেন তদদুঃখভোক্ত্রা ময়া হেতুভূতেন তে সর্ব্বেঽদুঃখা ভবন্তি ॥ (১৩) নন্নু দুঃখং কিমিতি প্রার্থয়সে ? পরদুঃখনিবৃত্ত্যৈব মম সর্ব্বদুঃখ-নিবৃত্তিরিত্যাহ—ক্ষুত্তৃড়িতি। কৃপণস্য জন্তোর্জিজীবিষোর্জীবনহেতোর্জল-স্যার্পণান্মে সর্ব্বে ক্ষুত্তৃড়াদয়ো নিবৃত্তা এব ॥ (১৪) ইত্যেবং প্রভাষ্য ॥ (১৫) ত্রিভুবনাধীশা ব্রহ্মাদয়ো মায়াস্তদীয়ধৈর্য্যপরীক্ষার্থং প্রথমং মায়য়া বৃষলাদিরূপেণ প্রতীতাঃ সন্ত ইত্যর্থঃ ॥ (১৬) পরং কেবলং বাসুদেবে ভক্ত্যা মনশ্চক্রে ; ন তু তান্ কিমপি যাচিতবান্ ॥ (১৭) অনন্যরাধস ঈশ্বরাতিরিক্তফলান্তরানপেক্ষস্য, প্রত্যলীয়তাত্মন্যেব লীনা বভূব ॥ (১৯) মন্যুসুতস্য নরস্য বংশমুক্ত্বা তৎসুতস্যৈব গর্গস্য বংশমাহ—গর্গাদিতি। মহা-বীর্য্যস্য বংশমাহ—মহাবীর্য্যাদ্ দুরিতক্ষয়ঃ, তস্য ত্রয্যারুণিঃ, কবিঃ, পুষ্করা-রুণিশ্চেতি ত্রয়ঃ পুত্রাঃ। কথম্ভূতাঃ ? যেঽত্র ক্ষত্রবংশে ব্রাহ্মণগতিং ব্রাহ্মণরূপতাং গতাস্তে। মন্যুপুত্রাণাং পঞ্চানাং জ্যেষ্ঠস্য বংশমাহ—বৃহৎ-ক্ষত্রস্যেতি ; যদ্‌যেন হস্তিনাপুরং কৃতমিত্যর্থঃ ॥

২১। অজমীঢ়াদয়স্ত্রয়ো হস্তিনঃ পুত্রাঃ ॥

২৩। অজমীঢ়াদেবান্যঃ পুত্রো বৃহদিষুর্নামাভবৎ ॥

২৪। পারস্য তনয়ো নীপস্তস্য পুত্রশতম্ ॥

২৫। স এব কৃত্ব্যাং কৃত্বীসংজ্ঞায়াং শুককন্যায়াং ব্রহ্মদত্তং জনয়ামাস ; তদুক্তং হরিবংশাদিষু—'পরাশরকুলোৎপন্নঃ শুকো নাম মহাযশাঃ। ব্যাসাদরণ্যাং সম্ভূতো বিধূমোঽগ্নিরিব জ্বলন্ ॥ স তস্যাং পিতৃকন্যায়াং বীরিণ্যাং জনয়িষ্যতি। কৃষ্ণং গৌরং প্রভুং[১] শম্ভুং তথা ভূরিশ্রুতং জয়ম্ ॥

১। গৌরপ্রভং (ঘ)।

কন্যাং কীর্ত্তিমতীং ষষ্টিং যোগিনীং যোগমাতরম্। ব্রহ্মদত্তস্য জননীং মহিষীমণুহস্য চ॥' ইতি। যদ্যপি শুক উৎপত্ত্যৈব বিমুক্তসঙ্গো নির্গত-স্তথাপি বিরহাতুরং ব্যাসমনুযান্তং দৃষ্ট্বা ছায়াশুকং নির্ম্মায় গতবান্। তদভি-প্রায়েণৈবায়ং গার্হস্থ্যাদিব্যবহার ইত্যবিরোধঃ। স চ ব্রহ্মদত্তো যোগী গবি বাচি সরস্বত্যাম্॥

২৬। স এব যোগতন্ত্রং চকার। বার্হদীষবাঃ বৃহদিষোর্ব্বংশ্যা ইমে। দীর্ঘত্বমার্ষম্॥

২৭। সুপার্শ্বকৃৎ সুপার্শ্বস্য পিতা॥

২৮। প্রাচ্যসাম্নাং ষট্ সংহিতা জগৌ বিভজ্যাধ্যাপিতবান্॥

৩০। অজমীঢ়স্য বংশ্যাঃ প্রিয়মেধাদয়ঃ কেচিদ্ব্রাহ্মণা বভূবুঃ; বৃহ-দিষুপ্রভৃতয়ঃ ক্ষত্রিয়াশ্চেতি বংশদ্বয়মুক্তম্। তস্যৈব বংশান্তরমাহ—নলিন্যা-মিতি যাবৎসমাপ্তি॥

৩২। মুদ্গল একো যবীনরাদয়শ্চত্বার ইত্যেবং পঞ্চ॥

৩৪। ভার্য্যাদ্ভর্ম্মাশ্বপুত্রান্মিথুনঞ্চাভূৎ। তদেবাহ—দিবোদাসঃ পুমান্, অহল্যা চ কন্যকেতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
একবিংশোঽধ্যায়ঃ॥ ২১॥

দ্বাবিংশোঽধ্যায়ঃ

দ্বাবিংশে তু দিবোদাসবংশমুক্ত্বাথ বর্ণিতাঃ।
ঋক্ষবংশে জরাসন্ধপার্থদুর্যোধনাদয়ঃ॥ (১)

২। তস্য সোমকস্য পুত্রাণাং শতং বভূব, তেষাং জন্তুর্জ্যেষ্ঠঃ, যবীয়ান্ পৃষতঃ॥

৪। অজমীঢ়স্যৈব বংশান্তরমাহ—য ইতি। ততঃ সংবরণাৎ কুরুঃ ॥

৬। তস্য কৃতিন উপরিচরো বসুস্ততো বসোর্বৃহদ্রথো মুখমাদির্যেষাং তানেবাহ—কুশাম্বেতি ॥

৭। তৎসুতঃ পুষ্পবান্ জজ্ঞে। তস্যাপত্যং সত্যহিত ইতি যোজ্যম্ ॥

৮। জরয়া রাক্ষস্যা ॥

৯। যদ্যস্মাৎ সোমাপেঃ শ্রুতশ্রবাঃ। কুরোঃ পুত্রঃ পরীক্ষিদনপত্যঃ। জাহ্নবো জহ্নোঃ পুত্রঃ ॥

১০। অতো রাধিকাদযুতায়ুরভূদিত্যর্থঃ ॥

১২। তস্য প্রতীপস্য দেবাপিশান্তনুবাহ্লীকাঃ ॥

১৩। প্রাক্ পূর্ব্বজন্মনি মহাভিষ ইতি সংজ্ঞা জাতা যস্য সঃ ॥

১৪। যদা দেবো ন ববর্ষ, তদা শান্তনুস্তত্র কারণং ব্রাহ্মণান্ পপ্রচ্ছ ॥

১৫। ব্রাহ্মণৈশ্চৈবমুক্তঃ—'দারাগ্নিহোত্রসংযোগং কুরুতে যোঽগ্রজে স্থিতে। পরিবেত্তা স বিজ্ঞেয়ঃ পরিবিত্তিস্তু পূর্ব্বজঃ ॥' ইতি স্মৃতেঃ। যোঽগ্রভুগ্ ভুবমগ্রতো ভুনক্তি,অয়ং ত্বাদৃশোঽপি পরিবেত্তৈব ভবতি। অতস্তদ্দোষপরিহারায় রাজ্যমগ্রজায় দেহি, ততো বৃষ্টির্ভবিষ্যতীত্যেবমুক্তঃ শান্তনুর্বনং গত্বা জ্যেষ্ঠং ছন্দয়ামাস। রাজ্ঞঃ প্রজাপালনাদিঃ পরো ধর্ম্মঃ, অতস্ত্বং রাজ্যং স্বীকুর্বিতি প্রার্থিতবান্। ততঃ পূর্ব্বমেব তস্য মন্ত্রিণা অশ্ববার[১]-সংজ্ঞেন দেবাপিং পাষণ্ডীকৃত্য রাজ্যানর্হং কর্ত্তুং যে প্রহিতা বিপ্রাস্তৈঃ পাষণ্ডমতাশ্রয়য়া গিরা বেদাদ্বিভ্রংশিতঃ সন্, বেদবাদস্যাতিবাদান্ নিন্দাবচনানি সোঽব্রবীৎ। অতস্তস্য পাতিত্যেন রাজ্যানর্হত্বে জাতে শান্তনোর্দোষাভাবাদ্ দেবো ববর্ষেত্যর্থঃ ॥

১৮। ততঃ সোমদত্তাদ্ভূরির্ভূরিশ্রবাঃ শলশ্চেতি ত্রয়ঃ ॥

১। অশ্মরাত- (ঘ)।

২০। রামো জামদগ্ন্যঃ। দাসকন্যায়ামিত্যুপরিচরস্য বসোর্বীর্য্যেণ মৎস্যগর্ভাদুৎপন্না কন্যা দাসৈঃ কৈবর্ত্তৈঃ পালিতা, অতো দাসকন্যেতি প্রসিদ্ধায়াং সত্যবত্যাম্॥

২১। নাম্না তৎসমাননাম্না, চিত্রাঙ্গদেন গন্ধর্ব্বেণ যুদ্ধে হতঃ। যস্যাং সত্যবত্যাং শান্তনুপরিগ্রহাৎ পূর্ব্বমেব॥

২২। বেদা গুপ্তা যেন; যতোঽহং জাত ইদং শ্রীভাগবতং চাধ্যগা-মধিগতবানস্মি॥

২৪। স্বয়ংবরাদ্ভীষ্মেণ বলাদুপানীতে॥

২৫। মাত্রা সত্যবত্যোক্ত ইতি নিষেধাভাবমাহ—'অপতিরপত্যলিপ্সু-র্দেবরাদ্ গুরুপ্রযুক্তাৎ, ন তু ঋতুমতী' ইত্যাদিবচনাৎ॥

২৬। দুঃশলা নাম কন্যকা চ জজ্ঞে॥

২৭। অরণ্যে মৃগশাপান্মৈথুনেন রুদ্ধস্য প্রতিষিদ্ধস্য[১]॥

২৮। নাসত্যদস্রাভ্যামশ্বিভ্যাম্[২], পঞ্চভ্যো যুধিষ্ঠিরাদিভ্যঃ পঞ্চাভবন্॥

৩০। তথাপরে চ ভার্য্যান্তরেষু॥

৩১। কালী চান্যা ভীমস্য ভার্য্যা, তস্যাং ততো ভীমসেনাৎ সর্ব্বগতো নাম পুত্রোঽভবদিত্যর্থঃ॥

৩২। উলূপ্যাং নাগকন্যায়াং মণিপুরপতেঃ সুতায়াং পুত্রিকাধর্ম্মেণ দত্তায়াং বভ্রুবাহনমসূত। অতস্তৎপুত্রঃ সন্নপি স পুত্রিকাসুতো মাতামহ-সুত ইত্যর্থঃ॥

৩৭। তুরসংজ্ঞং পুরোহিতং কৃত্বা॥

৩৮। ভবিষ্যানাহ—তস্য পুত্র ইতি যাবৎসমাপ্তি। যাজ্ঞবল্ক্যাৎ ক্রিয়া-জ্ঞানম্, পরঞ্চাত্মজ্ঞানং শৌনকাৎ প্রাপ্স্যতি, অস্ত্রজ্ঞানঞ্চ কৃপাচার্য্যাদিতি

১। প্রতিবদ্ধস্য (ঘ); ২। অশ্বিনীকুমারাভ্যাম্ (ঘ)।

দ্রষ্টব্যম্। 'যাজ্ঞবল্ক্যাৎ ত্রয়ীমধীত্য কৃপাদস্ত্রাণ্যবাপ্য' ইতি বৈষ্ণবোক্তেঃ। ক্বচিত্তু অস্ত্রজ্ঞানং কৃপাচার্য্যাদিত্যেব পাঠঃ॥

৪১। যদ্‌যস্মাৎ সুথীনলঃ পুত্রঃ॥

৪২। তস্মাৎ পরিপ্লবঃ, তস্মাৎ সুনয়স্তস্যাত্মজো মেধাবীত্যর্থঃ॥

৪৩। তস্মাৎ সুদাসস্ততঃ শতানীক ইত্যর্থঃ॥

৪৬। বৃহদ্রথস্য জরাসন্ধঃ, তস্য সহদেবস্তস্য মার্জ্জারিঃ, যদ্‌যস্মান্মার্জ্জারেঃ শ্রুতশ্রবাঃ॥

৪৯। সহস্রসংবৎসরমেতে ভাব্যা ভূপালাঃ, ততঃ পরং ভাব্যান্ দ্বাদশস্কন্ধে বক্ষ্যতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে
দ্বাবিংশোঽধ্যায়ঃ॥ ২২॥

ত্রয়োবিংশোঽধ্যায়ঃ

ত্রয়োবিংশে ত্বনোর্দ্রুহ্যোস্তুর্ব্বসোশ্চান্বয়ঃ ক্রমাৎ।
যদোশ্চ বংশোঽনুক্রান্তো যাবজ্জ্যামঘসম্ভবঃ॥ (১)

১—১৪। তদেবং যযাতেঃ পুত্রাণাং পঞ্চমস্য পুরোর্ব্বংশোঽনুক্রান্তঃ। ইদানীং চতুর্থস্য বংশমনুক্রামতি—অনোরিতি, কর্ণস্য জগতীপতেরিত্যন্তেন। (২) তস্য জনমেজয়স্য মহাশীলঃ, তস্য মহামনাঃ॥ (৩) চত্বার উশীনরস্যাত্মজাঃ; সন্ধিরার্ষঃ॥

১৮। স দুষ্মন্তঃ, স্বং বংশং পৌরববংশম্॥

২১। প্রথমস্য সহস্রজিত আত্মজঃ॥

২২। কুন্তেঃ সোহঞ্জিঃ, সোহঞ্জের্মহিষ্মান্, মহিষ্মতো ভদ্রসেনকঃ॥

২৩। ভদ্রসেনস্ত দুর্ম্মদো ধনকশ্চেতি দ্বৌ পুত্রৌ; কৃতবীর্য্যস্ত জনকঃ; কৃতবীর্য্যাদয়শ্চত্বারো ধনকস্যাত্মজা ইত্যর্থঃ ॥

২৬। অনষ্টমবিনাশং বিত্তং যেন, তথাবিধং স্মরণং যস্য সঃ; অক্ষয্যং ষড়্‌বসু ষড়িন্দ্রিয়-বিষয়ং বুভুজে ॥

২৮। ঔর্ব্বস্য তেজসা সগরেণোপসংহৃতমিত্যর্থঃ ॥

২৯। তেষাং তালজঙ্ঘপুত্রাণাং জ্যেষ্ঠঃ; তস্য মধোঃ পুত্রশতম্; বৃষ্ণি-র্জ্জ্যেষ্ঠো যস্মিন্; যতো মধোর্ব্বৃষ্ণের্যদোশ্চ হেতোরিদং কুলম্ ॥

৩১। চতুর্দ্দশ মহারত্নানি তত্তজ্জাতিশ্রেষ্ঠানি যস্য সঃ; তানি চ মার্কণ্ডেয়পুরাণে বর্ণিতানি—'গজবাজিরথস্ত্রীষু নিধিমাল্যাম্বরদ্রুমাঃ। শক্তি-পাশমণিচ্ছত্র-বিমানানি চতুর্দ্দশ ॥' ইতি ॥

৩২। দশানাং পত্নীসহস্রাণাং ভার্য্যাযুতস্য প্রত্যেকং লক্ষ[১]মিত্যেবং তাসু পুত্রাণাং দশলক্ষ-সহস্রাণি জনয়ামাস ॥

৩৩। পৃথুশ্রবাঃ পৃথুকীর্ত্তিঃ। পুণ্যযশা[২] ইত্যাদয়ঃ ষট্ প্রধানাঃ শ্রেষ্ঠা যেষাম্, তেষাং মধ্যে ॥

৩৪। পঞ্চাত্মজা আসন্, তান্ শৃণু। তানেবাহ—পুরুজিদিতি ॥

৩৫। ভার্য্যাভয়াদেবৈকভার্য্যস্য বন্ধ্যাপতের্জ্যামঘস্যাপুত্রস্য তদ্বয়মেব পুত্রপ্রদমভবদিতি দর্শয়ন্নাহ—জ্যামঘস্ত্বিতি ॥

৩৭। যদি মে সপত্নী স্যাৎ, তর্হি স্নুষেয়ং যুজ্যেতাপি; ন ত্বেতদস্তী-ত্যাহ—অসপত্নী চেতি। অতিভয়ব্যাকুলহৃদয়ো বিশুষ্যন্মুখঃ সগদ্গদমাহ —জনয়িষ্যসীতি ॥

৩৮। ভার্য্যাভয়প্রকম্পমান-স্বিন্নসর্ব্বাঙ্গস্য মোমুহ্যমানস্য পলায়নমভি-লষতো রাজ্ঞঃ প্রাণসঙ্কটমালোক্যানুকম্পিতাস্তেন পূর্ব্বং বহুকালমারাধিতা বিশ্বেদেবাঃ পিতরশ্চ 'তথাস্তু' ইত্যন্বমোদন্ত। ততো 'দেবতাপ্রসাদেন

১। লক্ষং লক্ষ- (ঘ); ২। পৃথুযশা (ঘ)।

জনয়িষ্যসি' ইতি প্রতিবচনেন মুহূর্ত্তগুণেন চ নিবৃত্তরজস্কাপি শৈব্যা গর্ভমধাৎ। তস্য চাসাধারণো মহিমা পরাশরাদিভিরুক্তঃ; যথোক্তম্— 'ভার্য্যা বশ্যাশ্চ যে কেচিদ্ভবিষ্যন্ত্যথবা মৃতাঃ। তেষান্তু জ্যামঘঃ শ্রেষ্ঠঃ শৈব্যাপতিরভূন্নৃপ॥' ইতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং নবমস্কন্ধে

ত্রয়োবিংশোঽধ্যায়ঃ॥ ২৩॥

চতুর্ব্বিংশোঽধ্যায়ঃ

চতুর্ব্বিংশে বিদর্ভস্য পুত্রত্রয়সমুদ্ভবাঃ।
বংশা নানামুখাঃ প্রোক্তা রামকৃষ্ণোদ্ভবাবধি॥ (১)

২। চৈদ্যাদয়ো দমঘোষাদয়ঃ॥

৪। ততো দশরথাচ্ছকুনিঃ, পুরাণান্তরাদেবমাদির্ব্বিশেষো দ্রষ্টব্যঃ॥

৫। ততঃ কুরুবংশাদনুঃ॥

৬। অনোঃ পুত্রঃ পুরুহোত্রঃ॥

৭। মহাভোজশ্চেত্যেবং সপ্ত। মারিষ! হে আর্য্য॥

৯। ততস্তদুপদেশেন যে পঞ্চষষ্ট্যাদিসংখ্যাঃ পুরুষাস্তেঽমৃতত্বং মোক্ষং প্রাপ্তাঃ॥

১২। তস্য যুধাজিতঃ শিনিরনমিত্রশ্চ, তস্য সত্যকঃ॥

১৪। সাত্যকিঃ সত্যকস্য পুত্রো যুযুধানস্তস্য জয়ঃ, তস্য কুণিঃ, ততঃ কুণের্যুগন্ধরঃ। অনমিত্রস্যৈবাপরো বৃষ্ণির্নাম পুত্রঃ॥

১৫। অক্রূরঃ প্রমুখো যেষাম্, ইত্যতদ্গুণসংবিজ্ঞানো বহুব্রীহিঃ॥

১৬। অতোঽক্রূরব্যতিরিক্তান্ দ্বাদশ দর্শয়তি—আসঙ্গ ইতি॥

১৮। পৃথুরেকঃ, বিদূরথান্তা অন্যে চ বহবঃ। পৃথুর্বিপৃথুধামান্তা ইতি পাঠে 'আন্ত'-শব্দেন বিদূরথোঽপ্যুক্তঃ। ততশ্চ শূরো বিদূরথাদাসীদিতি বক্ষ্যমাণনির্দ্দেশোপপত্তিঃ॥

১৯। কুকুরাদয়শ্চত্বারোঽন্ধকস্য সুতা ইতি জ্ঞেয়ম্। যথাহ পরাশরঃ —'কুকুরভজমানশুচিকম্বলবর্হিষাখ্যাস্তথান্ধকস্য পুত্রাঃ' ইতি॥

২০। অনোরন্ধকঃ, অন্ধকাদ্দুন্দুভিরিত্যপি তদ্বচনাদেব জ্ঞেয়ম্॥

২২। ধৃতদেবা আদির্যাসাং শান্তিদেবাদীনাং ষণ্ণাং তাঃ সপ্ত॥

২৩। তাঃ সপ্ত॥

২৪। উগ্রসেনয় উগ্রসেনস্য সুতাঃ॥

২৫। বসুদেবস্য যেঽনুজা দেবভাগাদয়স্তেষাং স্ত্রিয়ো ভার্য্যাঃ॥

২৬। অন্ধকস্য সুতানাং চতুর্ণাং প্রথমস্য কুকুরস্য বংশ উক্তঃ, দ্বিতীয়স্য ভজমানস্য বংশমাহ—শূরো বিদূরথাদিতি। 'ভজমানাচ্চ বিদূরথঃ পুত্রোঽভবৎ, বিদূরথাচ্চ শূরঃ' ইতি পরাশরাদিবচনাৎ; যদ্বা, 'পৃথুর্বিদূরথাদ্যাশ্চ' ইতি পূর্ব্বোক্তচিত্ররথাত্মজাদ্বিদূরথাৎ॥

২৭। দেবমীঢ়স্য যঃ শূরো নাম পুত্রস্তস্য। দেবমীঢ়ো হৃদিকস্যৈব সুতঃ; যথাহ পরাশরঃ—'তস্যাপি কৃতবর্ম্মশতধনুর্দ্দেবমীঢ়ুষাদ্যাঃ পুত্রা বভূবুঃ, দেবমীঢ়ুষস্য শূরঃ, শূরস্যাপি মারিষা নাম পত্ন্যভূৎ, তস্যাঞ্চাসৌ দশ পুত্রানজনয়দ্বসুদেবপূর্ব্বানিতি॥

২৯। আনকাশ্চ নেদুঃ॥

৩০। হরেঃ প্রাদুর্ভাবস্য স্থানম্॥

৩১—৩৫। পৃথায়াঃ কন্যকাবস্থায়াং কর্ণোৎপত্তিপ্রকারমাহ—কুন্তেরিতি পঞ্চভিঃ। (৩১—৩২) কদাচিদ্গৃহমাগতং দুর্ব্বাসসং পৃথা পরিচর্য্যাদিনা তোষয়ামাস, ততশ্চ সা তস্মাদ্দেবহূতিং দেবাহ্বানহেতুং বিদ্যামবাপ, তদাহ—সাপেতি॥ (৩৩) দেবমুপাগতং বীক্ষ্য সা প্রাহ—প্রত্যয়ার্থং পরীক্ষার্থং

ময়া বিদ্যা প্রযুক্তা, ন তু ত্বয়া কিঞ্চিৎ কার্য্যমিত্যভিসন্ধিনাতো যাহীতি ॥ (৩৪) এবমুক্তো রবিরুবাচ—অমোঘং দেবদর্শনমিতি। কন্যাহমিতি চেৎ, তত্রাহ—যথা যোনির্ন দুষ্যেত, তথাহং কর্ত্তা করিষ্যামি ॥

৩৯। আবন্ত্যৌ বিন্দানুবিন্দৌ ॥

৪০—৫৫। তদেবং বসুদেবস্য ভগিনীনাং পতীন্ পুত্রাংশ্চোক্ত্বা তদ্-ভ্রাতৄণাং নবানাং পত্নীঃ পুত্রাংশ্চাহ—দেবভাগস্যেতি নবভিঃ শ্লোকার্দ্ধৈঃ। (৪৫—৫৫) শ্রীবসুদেবস্য পত্নীঃ পুত্রাংশ্চাহ—পৌরবীত্যেকাদশভিঃ ॥ (৪৮) কৌশল্যা ভদ্রা ॥ (৫৫) অষ্টমস্তু স্বয়মেবাসীৎ, ন তু কর্ম্মাদিনা হেতুনা। তাভ্যাং জনিতো বা, যতোঽসৌ হরিঃ ॥

৫৬—৫৮। তদেবোপপাদয়তি—যদেতি ত্রিভিঃ। (৫৭) ঈশস্য মায়ানিয়ন্তুঃ, পরস্যাসঙ্গস্য, দ্রষ্টুঃ সাক্ষিণঃ, আত্মনঃ সর্ব্বগতস্য ন হেবম্ভূতস্য মায়াবিনোদং বিনা জন্মনঃ কর্ম্মণো বা হেতুঃ সম্ভবতীত্যর্থঃ ॥ (৫৮) কিঞ্চ, যস্য মায়াচেষ্টিতং পুংসো জীবস্যানুগ্রহঃ, তস্য সর্ব্বজীবানুগ্রাহকস্য কুতঃ কর্ম্মাদিপারতন্ত্র্যেণ জন্মাদিসম্বন্ধঃ[1] ? অনুগ্রহমেবাহ—হি যস্মাৎ, তদেব স্থিত্যাদয় ইষ্যতে। প্রলয়ে লীনোপাধের্জীবস্য ধর্ম্মাদ্যসম্ভবাদুপাধিসৃষ্ট্যা-দিনা ধর্ম্মাদিসম্পাদনেনানুগ্রহঃ ; তথাত্মলাভায় মোক্ষায় চেষ্যতে। তত্র হেতুঃ —তেনৈব শ্রূয়মাণেন তস্য স্থিত্যাদের্নিবৃত্তেঃ ॥

৫৯—৬০। তস্য চেষ্টিতং ভূমেরপ্যনুগ্রহ ইত্যাহ—অক্ষৌহিণীনামি-ত্যাদি দ্বাভ্যাম্। (৫৯) অভারায় ভারপরিহারায় ॥ (৬০) সুরেশ্বরৈরপি মনসাপ্যপরিমেয়াণ্যবিতর্ক্যাণি সঙ্কর্ষণসহিতশ্চক্রে ॥

৬১—৬২। সংকল্পমাত্রেণ ভূভারহরণসমর্থস্যাপি কর্ম্মকরণং যশো-বিস্তারদ্বারা ভক্তানুগ্রহার্থমিত্যাহ—কলাবিতি দ্বাভ্যাম্। (৬১) দুঃখ-

---

১। -সম্ভবঃ (ঘ)।

শোকতমাংসি নুদতীতি তথা। তদ্‌যশো ব্যতনোৎ॥ (৬২) যস্মিন্ সতাং কর্ণপীযূষে যশোরূপে তীর্থবরে শ্রোত্রমেবাঞ্জলিঃ পানসাধনং যস্য, স পুরুষঃ সকৃদপ্যপস্পৃশ্যাচমনমাত্রং কৃত্বা তৎসৌন্দর্য্যাকৃষ্টচিত্তঃ সন্, কর্ম্মবাসনাং ধুনুতে॥

৬৩—৬৪। তদেবাহ দ্বাভ্যাম্। (৬৩) ভোজাদিভিঃ শ্লাঘনীয়মীহিতং যস্য॥ (৬৪) সর্ব্বৈরঙ্গৈ রম্যয়া মূর্ত্ত্যা চ॥

৬৫। তৎপ্রদর্শনার্থং মুখশোভামাহ—যস্যাননং দৃশিভির্নেত্রৈঃ পিবন্ত্যো নার্য্যো নরাশ্চ ন ততৃপুঃ, ন তৃপ্তাঃ। নিমেষোন্মেষমাত্রব্যবধানমপ্যসহমানাস্তৎকর্ত্তুর্নিমেঃ কুপিতাশ্চ বভূবুঃ। কথম্ভূতমাননম্? মকরকুণ্ডলাভ্যাং চারু; কর্ণৌ, ভ্রাজন্তৌ কপোলৌ চ, তৈঃ সুভগম্; সবিলাসো হাসো যস্মিন্; নিত্যমুৎসবো যস্মিন্॥

৬৬—৬৭। শ্রীকৃষ্ণচরিতং সমাসতো বর্ণয়তি—জাত ইতি দ্বাভ্যাম্। (৬৬) জাতো নিজেন রূপেণ, পশ্চাৎ পুরুষো মনুষ্যাকারঃ সন্ ব্রজং গতঃ। ব্রজবাসিনামেধিতা অর্থা যেন; তেষু দারেষু সুতানাং শতান্যুৎপাদ্য; আত্মনিগমং স্বকীয়ং বেদমার্গম্॥ (৬৭) অন্তঃসমুত্থেন কলিনা নিমিত্তেন গুরুভরং ক্ষপয়ন্ দৃষ্ট্যৈব ভূপচমূর্বিধূয় বিজয়ে জয়ম্, 'অর্জ্জুনেন জিতম্' ইত্যেবমুদ্ঘোষং কৃত্বা, পরং তত্ত্বমুদ্ধবায়োপদিশ্য স্বধাম সম্যক্ তেনৈব[১] রূপেণ জগামেতি॥

ইতি শ্রীমদ্ভাগবত-ভাবার্থ-দীপিকায়াং শ্রীধরস্বামিবিরচিতায়াং
নবমস্কন্ধ-টীকায়াং চতুর্বিংশোঽধ্যায়ঃ॥ ২৪॥

নবমস্কন্ধঃ সম্পূর্ণঃ॥ ৯॥

১। স্বেনৈব (ঘ)।